नागेन्द्रगच्छीयपू.आचार्यवर्यश्रीउदयप्रभसूरिविरचिता
कर्णिकावृत्तिसमलङ्कृता पू.श्रीधर्मदासगणिक्षमाश्रमणविरचिता

# उपदेशमाला


✲ सम्पादकाः ✲

सुविशालगच्छाधिपतिपूज्यपादाचार्यदेवश्रीमद्विजयरामचन्द्रसूरीश्वराणां
पट्टप्रभावकवर्धमानतपोनिधिपूज्यपादाचार्यदेवश्रीमद्विजयगुणयशसूरीश्वराणां विनेयरत्नाः
प्रवचनप्रभावकपूज्यपादाचार्यदेवश्रीमद्विजयकीर्तियशसूरीश्वराः

मन्त्रीश्वरवस्तुपालस्य गुरुवर्यसत्तम-
नागेन्द्रगच्छीय-पूज्याचार्यश्रीउदयप्रभसूरिविरचितसंस्कृतकथोपेता
कर्णिकावृत्तिसमन्विता प्रभुश्रीमहावीरस्वामिस्वहस्तदीक्षित-चतुर्दशपूर्वधर-
अवधिज्ञानि-पूज्यश्रीधर्मदासगणिक्षमाश्रमणविरचिता

# उपदेशमाला

✻ सम्पादन-संशोधनकाराः ✻

तपागच्छाधिपति-दीक्षायुगप्रवर्तक-पूज्यपादाचार्यवर्य-श्रीमद्विजयरामचन्द्रसूरीश्वरचरणरेणु-
वर्धमानतपोनिधिपूज्यपादाचार्यश्रीमद्विजयगुणयशसूरीश्वरविनेयाः
प्रवचनप्रभावकपूज्यपादाचार्यश्रीमद्विजयकीर्तियशसूरीश्वराः

✻ प्रकाशकौ ✻

सन्मार्गप्रकाशनम् -अहमदाबादस्तथा
शासनशिरताजसूरिरामचन्द्रदीक्षाशताब्दीसमितिः

| | | |
|---|---|---|
| ग्रन्थनाम | : | कर्णिकावृत्तिसमन्विता उपदेशमाला |
| ग्रन्थकर्ता | : | चतुर्दशपूर्वधर-पूज्यश्रीधर्मदासगणिक्षमाश्रमणाः |
| टीकाकर्त्तारः | : | नागेन्द्रगच्छीय-पूज्याचार्यश्रीउदयप्रभसूरीश्वराः |
| सम्पादकाः संशोधकाश्च | : | पूज्याचार्यदेवश्रीमद्विजयकीर्तियशसूरीश्वराः |
| प्रकाशकौ | : | सन्मार्गप्रकाशनम् - अहमदाबादस्तथा<br>शासनशिरताजसूरिरामचन्द्रदीक्षाशताब्दीसमितिः |
| आवृत्तिः | : | प्रथमा, वि.सं. २०६९, वी.सं. २५३९, ई. २०१३ |
| प्रतयः | : | ५००/- |
| साहित्यसेवा | : | रूपकाणि ५००/- (पंचःशतानि) |
| पत्राणि | : | ४०+५२० |

| | | |
|---|---|---|
| प्राप्तिस्थानम् | : | सन्मार्ग प्रकाशनम्<br>जैन आराधन भवन, पाछियानी पोळ,<br>रिलीफ रोड, अहमदाबाद-३८०००१ |
| अक्षरांकनम् | : | विरति ग्राफिक्स, अहमदाबाद<br>मो. ८५३०५२०६२९ |


---

* ખાસ સૂચના *

આ પુસ્તક જ્ઞાનખાતામાંથી છપાયેલું હોવાથી ગૃહસ્થોએ ઉપયોગ કરવો હોય તો સંપૂર્ણ કિંમત જ્ઞાનખાતામાં ચૂકવી પછી જ માલિકી કરવી અથવા યોગ્ય નકરો જ્ઞાનખાતામાં ભરીને ઉપયોગ કરવો.



વ્યાખ્યાન વાચસ્પતિ, સુવિશાલ તપાગચ્છાધિપતિ,
સંઘસન્માર્ગદર્શક પૂજ્યપાદ આચાર્યદેવ
શ્રીમદ્ વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજા

# શાસનશિરતાજ, દીક્ષાયુગપ્રવર્તકશ્રીજીના શ્રીચરણે આદરભરી અંજલિ

ન્યાયાંભોનિધિ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ **વિજયાનંદસૂરીશ્વરજી (આત્મારામજી)** મહારાજાના સ્વર્ગવાસના વર્ષે જન્મી ચૂકેલા પાદરાના મા **સમરથ** અને પિતા **છોટાલાલ રાયચંદ**ના એકમેવ સુપુત્રરત્ન **ત્રિભુવનકુમારે** દીક્ષા માટેની સાર્વત્રિક વિપરીત અવસ્થાઓના વાદળાંઓને સ્વપુરુષાર્થથી વિખેરી ભરૂચ પાસેના **ગંધારતીર્થ**ના આંગણે પૂ.મુ.**શ્રીમંગલવિજયજી** મહારાજાના વરદહસ્તે રજોહરણ પ્રાપ્ત કરી પૂ.મુ.**શ્રી પ્રેમવિજયજી** મહારાજ (ત્યારબાદ સૂરીશ્વરજી)ના પ્રથમ **પટ્ટશિષ્યરૂપે** પૂ.મુ.**શ્રી રામવિજયજી** મહારાજનું નામ ધારણ કર્યું. એ વખતે દીક્ષિતો અને દીક્ષાર્થીઓને દીક્ષાનું પ્રદાન-આદાન કરવા માટે જે ભીષણ રીતે ઝઝૂમવું પડતું હતું તે પરિસ્થિતિમાં પૂર્વ-પશ્ચિમ જેવો પ્રચંડ પલટો લાવવાનો દઢ સંકલ્પ કરી એનાં મૂળ કારણો શોધી એને ધરમૂળથી ઉખેડવાનો ભીષ્મ પુરુષાર્થ તેઓશ્રીમદે આદર્યો.

એ પુરુષાર્થની પાયાની શિલા **'પ્રવચનધારા'** બની. અનંત તીર્થંકરોને હૃદયમાં વસાવી, જિનાજ્ઞા-ગુર્વાજ્ઞાને ભાલપ્રદેશે સ્થાપી, કરકમળમાં આગમાદિ ધર્મશાસ્ત્રો ધરી, ચરણદ્વયમાં ચંચલા લક્ષ્મીને ચાંપી, જીહ્વાના અગ્રભાગે મા શારદાને સંસ્થાપિત કરી આ મહાપુરુષે દીક્ષાવિરોધની સામે ભીષણ જેહાદ જગવી દીધી. અનેક બાળ, યુવા, પ્રૌઢ અને વૃદ્ધોને દીક્ષા આપી. એકસામટા પરિવારો દીક્ષિત થવા લાગ્યા. હીરા બજારના વેપારીઓ, મીલમાલિકો, ડૉક્ટરો, એન્જીનીયરો અને ચાર્ટર્ડ એકાઉન્ટન્ટો પણ તેઓશ્રીની વૈરાગ્ય ઝરતી વાણીને ઝીલી વીરશાસનના ભિક્ષુક બન્યા.

આ કાર્ય કાળ દરમ્યાન તેઓશ્રીમદ્‌ને કેઈ ઝંઝાવાતો, અપમાનો, તિરસ્કારો, કાચની વૃષ્ટિઓ અને કંટકોની પગથાર, કાળા વાવટાઓ, સ્થાન અને ગામમાં પ્રવેશ પણ ન મળે તેવા કારસ્તાનોનો સામનો કરવો પડ્યો. પાંત્રીસથી વધુ વાર તો તેઓશ્રીને સિવિલ કે ક્રિમીનલ ગુનાના આરોપી બનાવી જૈન વેષધારીઓએ જ ન્યાયની કોર્ટ બતાવી. મા સમરથના જાયા, રતનબાના ઘડતરપાયા, સૂરિદાનની આંખની કીકી અને સમકાલીન સર્વ વડીલ ગુરુવર્યોના હૃદયહારરૂપે સ્થાન પામેલા પૂજ્યશ્રીએ જિનાજ્ઞા અને સત્યવાદિતાના જોરે એ બધાં જ આક્રમણોને ખાળી વિજયશ્રી પ્રાપ્ત કરી. પૂ.મુ.**શ્રી રામવિજયજી** મહારાજામાંથી પૂ.આ.શ્રી. વિજય**રામચંદ્રસૂરીશ્વરજી** મહારાજાના રૂપે વિખ્યાત બનેલા તેઓશ્રીમદ્ વ્યાખ્યાનવાચસ્પતિ, પરમશાસનપ્રભાવક, મહારાષ્ટ્રાદિ દેશોદ્ધારક, દીક્ષાયુગપ્રવર્તક, જૈનશાસનશિરતાજ, તપાગચ્છાધિરાજ જેવા ૧૦૮થી ય વધુ સાર્થ બિરુદોને પામી જૈનશાસનને આરાધના, પ્રભાવના અને સુરક્ષાના ત્રિવેણી સંગમથી પરિસ્નાત કરતા રહ્યા.

કટ્ટરમાં કટ્ટર વિરોધી વર્ગને પણ વાત્સલ્યથી નિહાળતા અને પોતાના પ્રત્યે ગંભીર ગુનો આચરનારને પણ ઝટ ક્ષમાનું દાન કરતા તેઓશ્રીએ પોતાના ૭૭-૭૮ વર્ષના સુદીર્ઘ સંયમપર્યાયમાં મુખ્યત્વે દીક્ષાધર્મની સર્વાંગીણ સુરક્ષા-સંવર્ધના કરી એનાં બીજ એવાં સુનક્ષત્રમાં વાવ્યાં કે તેઓશ્રીનાં નામ સાથે પુણ્ય સંબંધ ધરાવતા એક જ સમુદાયમાં આજે આશરે

૧૪૦૦ જેટલા સંયમીઓ સાધનારત છે. અન્ય અન્ય સમુદાયો, ગચ્છો અને સંપ્રદાયોમાં દીક્ષાપ્રવૃત્તિના વેગમાં પણ તેઓશ્રીમદ્ અસામાન્યકારણરૂપ છે એમ કોઈ પણ નિષ્પક્ષપાતીને કહ્યા વિના ચાલે તેમ નથી.

પૂજ્યપાદશ્રીજીના દીક્ષાસ્વીકારની ક્ષણે **વિ.સં. ૨૦૬૮ના પોષ સુદ ૧૩**ના દિને **'શતાબ્દી'**માં મંગલ પ્રવેશ કરીને પૂરા વર્ષભર એ નિમિત્તે **દીક્ષાધર્મ**ની પ્રભાવનાનાં વિધવિધ **અનુષ્ઠાનો**ની હારમાળા સર્જી છે.

પાલિતાણા ખાતે **'સૂરિરામચંદ્ર'** સામ્રાજ્યના મોવડી **પૂજ્યો** ગચ્છસ્થવિર પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **લલિતશેખરસૂરીશ્વરજી** મહારાજા, વાત્સલ્યનિધિ પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **મહાબલસૂરીશ્વરજી** મહારાજા, ગચ્છાધિપતિ પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **પુણ્યપાલસૂરીશ્વરજી** મહારાજા, પ્રવચનપ્રભાવક પૂજ્ય આચાર્યદેવ શ્રીમદ્‌વિજય **કીર્તિયશસૂરીશ્વરજી** મહારાજા આદિ દશાધિક સૂરિવરો, પદસ્થો, શતાધિક મુનિવરો અને પંચશતાધિક શ્રમણીવરોની નિશ્રા-ઉપસ્થિતિમાં પંચદિવસીય મહામહોત્સવના આયોજન સાથે પ્રારંભાયેલ **'દીક્ષાશતાબ્દી'**ની ભારતભરમાં અનેક સ્થળે ભાવસભર ઉજવણી થઈ છે. પૂજ્યશ્રી સાથે સંકળાયેલાં સ્મૃતિસ્થાનો, તીર્થોમાં પણ વિધવિધ ઉજવણીઓ આયોજાઈ છે. સમુદાયના અન્ય અન્ય સૂરિવરો આદિની નિશ્રા ઉપસ્થિતિમાં ય રાજનગર, સુરત, મુંબઈ વગેરે સ્થળોમાં પ્રભાવક ઉજવણીઓનાં આયોજનો થયાં છે.

આ સર્વે ઉજવણીઓના શિરમોર અને સમાપનરૂપે પૂજ્યપાદશ્રીજીના દીક્ષાસ્થળ શ્રી ગંધારતીર્થના આંગણે વધુમાં વધુ સંખ્યામાં ચતુર્વિધ શ્રીસંઘને આમંત્રી દિગદિગંતમાં ગાજે એવો દીક્ષાદુંદુભિનો પુણ્યઘોષ કરવાનો ય મનસૂબો ગુરુભક્તો અને સમિતિએ સેવ્યો હતો, જે દેવગુરુની કૃપાથી ૧૪ આચાર્યો, ૧૫૦ શ્રમણો, ૩૦૦થી વધુ શ્રમણીઓ અને હજારો શ્રાવક-શ્રાવિકાઓની નિશ્રા-ઉપસ્થિતિમાં, ૧૭ દીક્ષાઓ, અનેક વડીદીક્ષાઓ, મુહૂર્તપ્રદાનો, વિશિષ્ટ દેવગુરુભક્તિપરક પૂજા-પૂજનો, પરિકરપ્રતિષ્ઠા, સાલગીરી ધ્વજારોપણ, અનેકાનેક ગ્રંથવિમોચન, વિશિષ્ટ સાધર્મિકભક્તિ આદિથી સભર ૧૧ દિવસીય સંસ્મરણીય મહોત્સવની ઉજવણી સાથે શિખરને સ્પર્શ્યો હતો.

દીક્ષાશતાબ્દી વર્ષમાં જિનભક્તિ, ગુરુભક્તિ, સંઘ-શાસનભક્તિનાં વિવિધ અનુષ્ઠાનો જેમ યોજવાનાં નક્કી કરાયાં હતાં તેમ વધુમાં વધુ સંખ્યામાં મુમુક્ષુઓ મહાત્માઓ બને એવા દીક્ષામહોત્સવો પણ યોજવાના નિર્ધારાયા હતા. સાથોસાથ જ્ઞાન-સુરક્ષાવૃદ્ધિ, અનુકંપા અને જીવદયાદિનાં સંગીન કાર્યો કરી પૂજ્યપાદશ્રીજીના ધર્મપ્રભાવક આજ્ઞાસામ્રાજ્યને આદરભરી અંજલિ સમર્પવાનું નક્કી થયું હતું.

આ મહદ્‌યોજનાના જ એકભાગરૂપે પ્રાચીન અર્વાચીન શ્રુતપ્રકાશનનું સુંદર અને સુદૃઢ કાર્ય હાથ ઉપર લેવાયું છે. સૂરિરામચન્દ્રસામ્રાજ્યના વર્તમાન ગચ્છાધિપતિ પ્રવચનપ્રદીપ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **પુણ્યપાલસૂરીશ્વરજી** મહારાજાના આજ્ઞા-આશીર્વાદને ઝીલી પ્રવચનપ્રભાવક પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **કીર્તિયશસૂરીશ્વરજી** મહારાજાના શાસ્ત્રીય માર્ગદર્શન અનુસારે વિવિધ શ્રુતરત્નોનું પ્રકાશન **'શાસનશિરતાજ સૂરિરામચંદ્ર દીક્ષાશતાબ્દી ગ્રંથમાળાના'** ઉપક્રમે નિર્ધાર્યું છે, તેના ૩૪મા પુષ્પરૂપે નાગેન્દ્રગચ્છીય પૂજ્યાચાર્યવર્ય**શ્રીઉદયપ્રભસૂરિ**મહારાજાવિરચિત **'કર્ણિકા'**વૃત્તિ સહિત પ.પૂ.શ્રુતકેવલી **ધર્મદાસગણિવર**વિરચિત **ઉપદેશમાલા** ગ્રંથનું પ્રકાશન કરતાં અતીવ આનંદ અનુભવીએ છીએ.

આ ગ્રંથનું સંપાદન-સંશોધનકાર્ય પ્રવચનપ્રભાવક પૂ.આ.શ્રી **કીર્તિયશસૂરીશ્વરજી**મહારાજાએ કરી-કરાવીને મહાન્ ઉપકાર કર્યો છે. અક્ષરમુદ્રાંકનનું જટિલ કાર્ય **વિરતિગ્રાફિક્સ**વાળા **અખિલેશમિશ્રા**એ કર્યું છે તો **સન્માર્ગપ્રકાશન–** અમદાવાદે પણ ખૂબ જ જહેમતથી મુદ્રણ-પ્રકાશન વ્યવસ્થામાં **પૂરેપૂરો** સહયોગ આપ્યો છે. તે બદલ અમો તેઓ સહુના ઉપકૃત છીએ.

સૌ કોઈ આ પુસ્તકના પઠન-પાઠનાદિ દ્વારા જ્ઞાનાવરણીયાદિ કર્મોનો ક્ષયોપશમ પામી મુક્તિમાર્ગમાં આગળ વધી આત્મશ્રેયઃ સાધે એ જ અંતરભાવના.

વિ.સં. ૨૦૬૯, ફાગણ સુદ-૨
બુધવાર, તા. ૧૩-૩-૨૦૧૩
રાજનગર

**શાસનશિરતાજ સૂરિરામચંદ્ર**
**દીક્ષાશતાબ્દી સમિતિ**

● ● ●

# સમર્પણમ્

**સિંહસત્ત્વના સ્વામી જિનશાસનશિરતાજ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્વિજયરામચંદ્રસૂરીશ્વરજી મહારાજાના શાસ્ત્રપૂત કરકમળમાં**

એક સદી જેટલા વિરાટ સમયખંડમાં પથરાયેલું, સેંકડો ઘટનાઓને સમાવી લેતું, હજારો પરિચિતો સાથે સંકળાયેલું અને લાખો વ્યક્તિઓને સ્પર્શતું આપશ્રીનું જિનશાસનસમર્પિત સમગ્ર જીવન એક વિહંગાવલોકનથી નિહાળીએ તો આપશ્રીના મુખ્ય બે ગુણ નજર સામે તરી આવે - ભીમ અને કાંત ! વીરરસથી ધગધગતો ભીમગુણ અને શાંતરસથી છલોછલ થતો કાંતગુણ !

પોતાને દઝાડનારાઓને આપશ્રીએ નિર્મળ વાત્સલ્યથી નવડાવી દઈને સદા શાંતરસનો અનુભવ કરાવ્યો છે અને જિનશાસનને દઝાડનારાઓને આપશ્રીએ સદા ધગધગતા અંગારા જેવા વીરરસનો પરિચય કરાવ્યો છે...પોતાના અપરાધીઓને આપશ્રીએ સદા મિત્ર જ માન્યા છે, પણ જિનશાસનના અપરાધીઓને આપશ્રીએ ક્યારેય મિત્ર નથી માન્યા - વર્ષોથી નિકટતમ હતા તો પણ.

દેવગુરુ પ્રત્યે ભક્તિભીનાં અને ભક્તો-વિરોધીઓ સૌ પ્રત્યે કરુણાભીનાં આપશ્રીનાં નિર્વિકાર નયન શાસનરક્ષા અને ચોયણા-પડિચોયણાં આદિ પ્રસંગોમાં લાલઘૂમ પણ થઈ શકતાં હતાં...જોતાં વેંત આકર્ષી લે એવું મોહક સ્મિત સર્જતા બે હોઠને આપશ્રી સત્યરક્ષા પ્રસંગે સામેવાળાને ધ્રુજાવી દે એ રીતે ભીડી પણ શકતા હતા...અમૃતનિર્ઝર વહાવતા આપશ્રીના કોમલ કરકમલ ધર્મ ઉપરનાં આક્રમણોને મારી હઠાવતી કરાલ કરવાલ પણ બની શકતા હતા. સાથે કોણ કોણ છે, કેટલા છે...સામે કોણ કોણ છે, કેટલા છે ? - આવું બધું જોવા બેસવાનું આપશ્રીના સ્વભાવમાં જ નહોતું. આપશ્રીની નીતિ સ્પષ્ટ હતી. જિનમતના આગ્રહી સૌ મારી સાથે જ છે અને નિજમત કે જનમતના આગ્રહીઓ સૌ મારી સામે છે - પછી ભલે એ પાસે હોય કે દૂર હોય ! આપશ્રીની આવી છાપ વિરોધીઓમાં પણ હતી.

શ્રીસંઘમાં ઉત્પન્ન થયેલા પ્રાયઃ તમામ વિવાદોમાં પ્રચંડ લોકમત અને પ્રબલ લોકહિત સામ સામે ટકરાયાં હતાં - આવી સ્થિતિમાં લોકમત તરફ ઝૂકી જઈને લોકપ્રિય બનવાનો વિચાર પણ આપશ્રીને નહોતો આવ્યો, બલ્કે તમામ આક્રમણો અને આકર્ષણોને અવગણીને આપશ્રી લોકહિતને વળગી રહ્યા હતા. કારણ કે આપશ્રી સાચા સંઘહિતચિંતક હતા. સંઘને સન્માર્ગે દોરવાની ભાવનાસ્વરૂપ સંઘવાત્સલ્યથી આપશ્રીનું હૃદય છલોછલ હતું.

આપશ્રીના વ્યક્તિત્વનું એક તેજદાર પાસું હતું - સ્પષ્ટ નિર્ણયશક્તિ. તુલા રાશિ અને તુલા લગ્ન લઈને જન્મેલા આપશ્રીમાં ત્રાજવાના બંને પલ્લાને ન્યાય આપવાની કળાકુશળતા જન્મજાત હતી. વિવાદાસ્પદ મુદ્દાઓની ચર્ચાઓમાં દર વખતે પક્ષનું સુકાન તમામ વડીલો આપશ્રીને જ સોંપતા. આપશ્રીનું નિવેદન ચતુર્વિધ સંઘના અગ્રણીઓ ખૂબ ગંભીરતાપૂર્વક સાંભળતા. બોલાયેલો શબ્દ આપશ્રીએ ક્યારેય પાછો લેવા પડ્યો નથી કે ફેરવી તોળવો પડ્યો નથી ! આક્ષેપો અને આવેશો, આરોપો અને આક્રોશો, અપયશો અને અપમાનોના ઝેરના ઘૂંટડા ગળે ઉતારીને જગતને તો આપશ્રીએ સ્મિતભર્યા ચહેરે અમૃતભર્યું સત્ય જ આપ્યું છે. અરે ! ઝેર રેડનારાઓ ઉપર પણ આપશ્રીએ તો કરુણારૂપી અમૃત જ વરસાવ્યું છે.

આપશ્રીને નહિ સમજનારાઓએ આપને વિષે ફેલાવેલી ગેરસમજની તોતિંગ ઈમારત આપશ્રીના ફક્ત એકાદ પ્રવચનથી કે આપશ્રીની ફક્ત એકાદ મુલાકાતથી કકડભૂસ થઈને તૂટી પડ્યાનાં દૃષ્ટાંતો સંખ્યાબંધ છે. ભક્તો અને શિષ્યોના હૃદયમાં આસન જમાવવું આસાન છે. ગુરુદેવના હૃદયમાં સ્થાન મેળવવું કઠિન છે. જ્યારે વિરોધીઓના હૃદયમાં બિરાજમાન થવું અશક્યપ્રાયઃ છે...આપશ્રીએ શિષ્યો, ભક્તો અને ગુરુદેવોની સાથોસાથ વિરોધીઓના હૃદયને પણ વશ કર્યું હતું. આપશ્રીના વશીકરણ મંત્રો હતા-ન્યાયનિષ્ઠા, વિનયશીલતા અને કરુણા !

દર્શનમોહનીયકર્મના ક્ષયોપશમથી પાવન બનેલા જ્ઞાનાવરણીયકર્મના અદ્ભુત ક્ષયોપશમે આપશ્રીને સર્વોત્તમ ગીતાર્થ બનાવ્યા. જ્ઞાન એવું પામ્યા કે આપશ્રીએ કરેલા શાસ્ત્રાર્થને સફળતાપૂર્વક કોઈ પડકારી શક્યું નહિ અને દર્શનમોહનીયકર્મ તેમજ ચારિત્ર-મોહનીયકર્મના અદ્ભુત ક્ષયોપશમે આપશ્રીને અનુપમ સંવિગ્ન બનાવ્યા. શ્રદ્ધા એવી પામ્યા કે ગમે તેવી ધાકધમકી અને શેહશરમ, સ્વીકારેલા સત્યને આપશ્રી પાસેથી છોડાવી શકી નહીં. જ્ઞાન-શ્રદ્ધાના આ મોંઘેરા ઘરેણાંમાં મઘમઘાટ વેર્યો પ્રવચનલબ્ધિએ !

આપશ્રીનો પૂર્ણ પરિચય એક જ પંક્તિથી પામવો હોય તો ગાતાં રહો પૂજ્યપાદ મહોપાધ્યાયરચિત સમકિત સજ્ઝાયની આ કડી

**'સંવેગરંગતરંગ ઝીલે માર્ગ શુદ્ધ કહે બુધા !'**

અત્યંત વિપરીત વાતાવરણ વચ્ચે શાસ્ત્રીય સત્યો, સંયમધર્મ, શુદ્ધધર્મવિધિ અને સદ્દ્રવ્યવ્યવસ્થાના સંરક્ષણ-સંવર્ધનનાં લગભગ એકલપંડે આપશ્રીએ કરેલાં અગણિત કાર્યો બુદ્ધિની પહોંચની બહાર છે...જ્યાં બુદ્ધિ જ ન પહોંચી શકે, ત્યાં શબ્દોનું તો શું ગજું ?

જીવનના પ્રથમ ઉપદેશથી લઈ અંતિમ માર્ગદર્શન સુધી પ્રત્યેક સ્વ-પર-ઉપકારક વિચાર-વચન-વર્તનમાં 'સમ્યગ્દર્શન'ની ધરીને અકબંધ જાળવનારા, માટે જ જૈનશાસનશિરતાજ, તપાગચ્છાધિરાજ, દીક્ષાયુગપ્રવર્તક, ભાવાચાર્યભગવંત જેવાં સેંકડો સાર્થક બિરુદ ધરાવનારા, સદાય જિનાજ્ઞાના ધારક અને વાહક, સુવિશુદ્ધપ્રરૂપક, દર્શનશુદ્ધિધારક, પરમતારક, પરમશ્રદ્ધેય, પરમગુરુદેવ આપશ્રીના વિશુદ્ધ કરકમળોમાં આપશ્રીના દીક્ષાશતાબ્દીવર્ષે સાદર સમર્પણમ્.

**લિ. - વિજયકીર્તિયશસૂરિ**

# પ્રકાશકીય

પરમાત્મા શ્રીઅરિહંતદેવોના પરમસુખદાયી શાસનની આરાધનાનાં બે મુખ્ય અંગો છે—૧-શ્રુત અને ૨-શીલ-ચારિત્ર. અલબત્ત બંનેય અંગો સમ્યગ્દર્શનથી સંલગ્ન અને સંશુદ્ધ તો જોઈએ જ. ઉત્તમશીલને સાધવા માટે ઉત્તમશ્રુતજ્ઞાનનો પાયો મજબૂત જોઈએ સમ્યગ્જ્ઞાન, શ્રુત અને અભિનવશ્રુતરૂપે વીશસ્થાનક આરાધનામાં ત્રણ સ્થાનકો ખાસ આ બાબતની પુષ્ટિ માટે રાખ્યાં છે, એથી પણ શ્રુતનું મહત્ત્વ સમજી શકાય તેમ છે.

શાસન સ્થપાય છે શ્રુત અને શીલથી, ચાલે છે શ્રુત અને શીલથી અને શ્રુત અને શીલ જ્યાં સુધી અકબંધ ત્યાં સુધી શાસનનું વહેણ પણ અકબંધ - એમ અપેક્ષાએ કહી શકાય તેમ છે. જૈનશાસનના મુક્તિદાયી શ્રુતજ્ઞાનના વિવિધ અંગ-પ્રત્યંગોના પ્રસાર-પ્રચાર દ્વારા ચતુર્વિધ શ્રીસંઘને એક મજબૂત આલંબન સમર્પવાનો વિનમ્ર પ્રયાસ **સન્માર્ગપ્રકાશ**ને આદરેલો છે.

મહામહિમ **શ્રી શંખેશ્વરપાર્શ્વનાથ**પરમાત્માનો અસીમ અનુગ્રહ ઝીલીને, શાસનનાયક પ્રભુ **શ્રીવીરપરમાત્મા**ની ૭૭મી પાટે આવેલા વર્તમાનકાલીન મૂર્ધન્યશ્રુતધર પ્રવરપ્રાવચનિક, દીક્ષાયુગપ્રવર્તક, જૈનશાસનશિરતાજ, તપાગચ્છાધિરાજ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજાની કૃપાવૃષ્ટિમાં સ્નાત થઈને, તેઓશ્રીના આજીવનઅંતેવાસી, ગુરુગચ્છવિશ્વાસધામ, વર્ધમાનતપોનિધિ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **ગુણયશસૂરીશ્વરજી** મહારાજાનું તપ-સંયમ સાંનિધ્ય મેળવી તેમજ તેઓશ્રીના પ શિષ્યાલંકાર પ્રવચનપ્રભાવક પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્‌વિજય **કીર્તિયશસૂરીશ્વરજી** મહારાજાના બહુમૂલ્ય માર્ગદર્શનથી અમો છેલ્લાં વીશ-પચ્ચીશ વર્ષની ટૂંકી અવધિમાં જૈનસંઘમાં નોંધપાત્ર કહી શકાય એવાં શ્રુતરત્નો પ્રકાશિત કરવામાં સુસફળ નીવડ્યા છીએ.

વિવિધ આગમગ્રંથો, પ્રકરણગ્રંથો, અદ્યાવધિ અપ્રગટ એવા નવસંશોધિત પ્રાકૃત-સંસ્કૃત ગ્રંથો, અનુવાદ ગ્રંથો, અધ્યયનના ગ્રંથો, વ્યાખ્યાનવાચસ્પતિ પૂ.આ.શ્રી વિજય **રામચંદ્રસૂરીશ્વરજી** મહારાજાના ટંકશાળી પ્રવચનપુસ્તકો, પ્રવચનપ્રભાવક પૂ.આ.શ્રી વિજય**કીર્તિયશસૂરીશ્વરજી** મહારાજાના પ્રવચનોનાં સારગ્રાહી અવતરણનાં પુસ્તકો, ગુજરાતી, અંગ્રેજી અને હિંદી ભાષાકીય વિવિધવિષયક પુસ્તકો, પ્રશ્નોત્તર અને કથાગ્રંથો તેમજ પ્રતિ પંદર દિવસે ગુજરાતી અને હિંદીભાષાની અલગ-અલગ આવૃત્તિરૂપે બહોળી નકલોમાં પ્રકાશિત થઈ જનજનના ઘટઘટમાં જૈનત્વની જ્યોતને જાગૃત અને જ્વલંત બનાવતા **'સન્માર્ગ'** પત્રનું નિયમિત પ્રકાશન આદિ અનેકવિધ કાર્યો દ્વારા અમોને નિરંતર શ્રુતસેવાનો અનુપમ લાભ મળી રહ્યો છે - જે અમારું સૌભાગ્ય છે.

આ દરેક કાર્યોમાં પૂજ્ય આચાર્યાદિ ગુરુભગવંતોનો સદુપદેશ, ભારતવર્ષીય શ્રીસંઘો અને શક્તિમાન શ્રાવક-શ્રાવિકાવર્ગનો સતત સહયોગ મળતો રહ્યો છે - જે અમારું પ્રેરક પરિબળ બન્યું છે.

વધુમાં **'સ્મૃતિમંદિર અંજન-પ્રતિષ્ઠાસમિતિ'** હસ્તકનાં તમામ પ્રકાશનો અને **'શાસનશિરતાજ સૂરિરામચંદ્ર દીક્ષા-શતાબ્દીસમિતિ'**ના ઉપક્રમે પ્રકાશિત થયેલાં - થતાં તમામ પ્રકાશનોના મુદ્રણ-વિતરણાદિનો પુણ્યલાભ મેળવવા પણ અમો ભાગ્યશાળી નીવડ્યા છીએ.

પરમપ્રભુ અને પરમગુરુદેવોના આશીર્વાદ આ જ રીતે કાયમ અમ પર વરસતા રહે અને ચતુર્વિધ શ્રીસંઘ દ્વારા મળતો ભાવ-સ્નેહ પણ અકબંધ બન્યો રહે - જેના બળે અમો ભવિષ્યમાં પણ આવી સુંદર શ્રુતસેવા કરી સ્વ-પરનું શ્રેયઃ સાધી શકીએ.

પ્રસ્તુતમાં પ્રભુશ્રી વીરસ્વહસ્તદીક્ષિત-શ્રુતધર અવધિજ્ઞાની પૂ. શ્રી **ધર્મદાસગણિક્ષમાશ્રમણજી** વિરચિત **'ઉપદેશમાળા'** શાસ્ત્રગ્રંથઉપર તેરમા સૈકાના ધર્મપ્રભાવક **શ્રીવસ્તુપાળમંત્રીશ્વર**ના ગુરુપદે બિરાજમાન, મહાકવિ, **સમર્થસાહિત્યકાર** પૂ.આ.શ્રી **ઉદયપ્રભસૂરીશ્વરજી** મહારાજાએ રચેલી **'કર્ણિકા'** વૃત્તિનું સર્વપ્રથમ સંશોધિતપાઠપૂર્વક અમો **શાસનશિરતાજ સૂરિરામચંદ્ર દીક્ષાશતાબ્દી ગ્રંથમાળાના ૩૪મા પુષ્પરૂપે** સહપ્રકાશન કરી રહ્યા છીએ.

આ ગ્રંથનું નવ હસ્તપ્રતોના આધારે પ્રથમવાર સંશોધન-સંપાદન કરીને મુદ્રણકાર્યનું માર્ગદર્શન આપીને પ્રવચનપ્રભાવક પૂ.આ.શ્રીવિજય**કીર્તિયશસૂરીશ્વરજી**મહારાજાએ મહાન્ ઉપકાર કર્યો છે. અક્ષરમુદ્રાંકન માટે વિરતિગ્રાફિક્સવાળા **અખિલેશમિશ્રા**એ ખૂબ ધીરજ અને ખંતપૂર્વક કાર્ય કરી આપ્યું છે અને **સન્માર્ગપ્રકાશન**-અમદાવાદે પણ ખૂબ જ જહેમતથી મુદ્રણ-પ્રકાશનવ્યવસ્થામાં પૂરેપૂરો સહયોગ આપ્યો છે તે બદલ અમો તેઓ સૌના ઉપકૃત છીએ.

સૌ કોઈ આ અને આવા શ્રુતરત્નોનો પ્રકાશ એ શ્રુતરત્નોના પરખનાર ઝવેરી સમાન ગીતાર્થ ગુરુભગવંતોના સાંનિધ્યમાં પ્રાપ્ત કરી પરમસુખમય - મોક્ષને પ્રાપ્ત કરો એ જ શુભાભિલાષા.

**વિ.સં. ૨૦૬૯, ફાગણ સુદ-૨** **— સન્માર્ગપ્રકાશન**

**બુધવાર, તા. ૧૩-૩-૨૦૧૩**

**સૂરિરામચંદ્રવડીદીક્ષાશતાબ્દીદિન**

# સંપાદકીય

**તીર્થંકરભગવંતોનો ઉપદેશ :-**

અનંતદુ:ખમય સંસારથી છોડાવી અનંતસુખમય મોક્ષને પમાડવા માટે જૈનશાસનની સંસ્થાપના થયેલી છે. અનંત તીર્થંકરોએ સમયે સમયે આ જૈનશાસનની સંસ્થાપના કરી જીવોના શાશ્વત સુખનો સ્રોત સંજીવન રાખ્યો છે.

શ્રી તીર્થંકરભગવંતોનો ઉપદેશ જૈનસંઘનું સંચાલક બળ બન્યું છે. આ ઉપદેશવાક્યોને જ જૈનપ્રવચન, આપ્તવચન, જિનાજ્ઞા, સિદ્ધાંતવાણી, આગમશાસ્ત્ર અગર ઉપદેશ જેવા ભિન્ન-ભિન્ન નામે ઓળખવામાં આવે છે. એના સંગ્રહરૂપ ગ્રંથો પણ તે તે નામથી ઓળખાય છે.

જગતમાં જે ચાર પુરુષાર્થ કહેવાય છે, તેમાંથી અર્થ અને કામ આ બે પુરુષાર્થો કેવળ નામના જ પુરુષાર્થો છે. વાસ્તવમાં જોતાં એ અનર્થકારી છે. આમ છતાં અનાદિકાળના અશુભ સંસ્કારોના કારણે જગતના મોટા ભાગના જીવોની એ અર્થ-કામમાં પ્રવૃત્તિ કોઈ પણ ઉપદેશ વિના સહજ થતી રહે છે. જ્યારે મોક્ષ પુરુષાર્થ અને મોક્ષ માટેના અસાધારણકારણરૂપ ધર્મપુરુષાર્થને આચરવા માટે જીવને કોઈક ઉપદેશની જરૂર પડે છે. બંધ મશીનરીને ચાલુ કરવા માટે જેમ ઇલેક્ટ્રિક કરંટનો એક સ્પર્શ કાફી થઈ પડે છે તેમ સુયોગ્ય ઉપદેશવાક્ય પણ ભવ્યજીવને મોક્ષાર્થ ધર્મપુરુષાર્થ માટે પ્રેરવા સમર્થ બને છે.

આ જ કારણથી અનંત કરુણાના નિધાન એવા શ્રીઅરિહંતપરમાત્માઓ, તેઓશ્રીના ચરણને અનુસરનારા શ્રીગણધરભગવંતો અને એ પટ્ટપરંપરામાં થયેલા સુવિહિત આચાર્ય, ઉપાધ્યાય અને સાધુભગવંતો પણ ભવ્યાત્માઓના ભવનિસ્તાર અને ભાવવિસ્તાર માટે ઉપદેશામૃતનો અવિરત વરસાદ કરતા રહે છે.

**ઉપદેશમાલા ગ્રંથરચનાકાર અને ગ્રંથરચનાનો હેતુ :-**

આવા ઉપદેશવાક્યો કે હિતવાક્યોના સંગ્રહરૂપ પ્રાચીનતમ ગ્રંથોમાંનો એક ગ્રંથ છે **'ઉપદેશમાળા.'** **'ઉવએસમાલા'** એનું પ્રાકૃત નામ છે. ચરમતીર્થપતિ શ્રમણભગવાન **શ્રી મહાવીરપરમાત્માના** સ્વહસ્તદીક્ષિત શિષ્યો પૈકીના એક **'પૂ. શ્રીધર્મદાસગણિક્ષમાશ્રમણજી'** કે જેઓશ્રી અવધિજ્ઞાની અને પૂર્વધર મહાત્મા હતા તેઓશ્રીએ આ ગ્રંથની રચના કરી છે. પૂર્વકાલીન રાજ્યાવસ્થાનો ત્યાગ કરીને તેઓ પરમવૈરાગ્યથી પ્રભુ વીર પાસે વિરતિધર બન્યા હતા અને એની વિશુદ્ધિના કારણે પૂર્વગત શ્રુત તેમજ અવધિજ્ઞાનની સંપત્તિ પામ્યા હતા. ઉપદેશમાળાગ્રંથની સંરચનાનો હેતુ પૂર્વાવસ્થાના પુત્ર-રાજા **રણસિંહને** અર્થ-કામના કલણમાંથી બહાર કાઢી ધર્મમહેલમાં સ્થાપિત કરી મુક્તિના પંથે પ્રગતિશીલ કરવાનો હતો.

જૈનશાસનમાં **'ક્ષમાશ્રમણ'** વિશેષણ પૂર્વધર મહર્ષિ માટે પ્રયોજાય છે, એથી તેઓશ્રીજી પૂર્વધર હતા તે નક્કી થાય છે, તો વળી ટંકશાળી વચનમુદ્રાના સ્વામી પૂ.મહોપાધ્યાયજી **શ્રીયશોવિજયજી**મહારાજે તેઓશ્રીના વચન માટે **'શ્રુતકેવલી જણાવે છે'** એમ કહી તેઓશ્રીના શ્રુતબોધને ચૌદ-ચૌદ પૂર્વ સુધી વિસ્તારે છે. 'શ્રુતકેવલી' વિશેષણ ચૌદપૂર્વધર ભગવંતો માટે વપરાય છે - એ પ્રસિદ્ધ છે. અનેક ગ્રંથકારો આ **'ઉપદેશમાળા'** મહાગ્રંથને **'આગમ'** સમાન પણ ગણાવે છે.

ઉપદેશમાળા મહાગ્રંથ, સાધનાજીવનમાં કેવું સમર્થ આલંબન પૂરું પાડે છે તે તો તેની પંક્તિએ પંક્તિઓ પથરાયેલી પરમાર્થપરાગને કોઈ શ્રુત-ચારિત્રધર્માનુરાગી ભ્રમર એકત્ર કરી એની સુમધુરપ તેમજ સોડમના આધારે પરમપદની પરમસુખાસિકાનો સતત અનુભવ કરે ત્યારે જ ખબર પડે. **'આનંદ કી ગત આનંદઘન જાને,'** અને **'જિનહિ પાયો તિનહિ છિપાયો...'** જેવી અનુભવજ્ઞાનીઓની વચનપંક્તિઓ ત્યાં સાર્થક બને છે.

ઉપદેશમાળા મહાગ્રંથમાં મોક્ષમાર્ગના જીવવિશેષને અનુસારે ઉપદેશેલા બે ઉપાયો : સાધુધર્મ અને શ્રાવકધર્મને અણિશુદ્ધ-નિરતિચાર-નિર્દોષપણે આચરી આત્મવિકાસને નિર્વિઘ્ન અને વેગવંતો બનાવવા માટેનાં સાધનાસૂત્રો ઝળકતા આધ્યાત્મિક મૌક્તિકોરૂપે બિરાજમાન છે. સુવિહિત સાધુભગવંતોનો સમાગમ જ્યારે ઉપલબ્ધ ન હોય ત્યારે સદ્બુદ્ધિદાયિકા અગર કલ્યાણમિત્રની જેમ હાથ પકડીને સન્માર્ગે ચલાવવાનું કામ સંભાળનાર **'ઉપદેશમાળા'** સુશ્રાવક વર્ગ માટે પરમ હિતકર બને છે. શ્રાવકના પાક્ષિકાદિ અતિચારસૂત્રમાં **'ઉપદેશમાળા'** ગ્રંથનો સમુલ્લેખ એનો સૂચક છે અને ખૂબ પ્રાચીન પરંપરા દ્વારા આ મહાગ્રંથની ઉપાદેયતાનો એ પરિચાયક પણ છે. માંડવગઢના મહામંત્રી **પેથડશા** રાજદરબારે જતા ત્યારે હાથીની અંબાડી પર **'ઉપદેશમાળા'**ની પ્રતિ રાખી એમાંથી ગાથાઓ ગોખતા. રાજસભામાં પણ સમયાવકાશ પામી આ ગ્રંથનો સ્વાધ્યાય કરતા. શાસનની આરાધના, પ્રભાવના અને સુરક્ષાનાં શુદ્ધ બીજકો આમાંથી પદે પદે સાંપડે છે.

**ઉપદેશમાલાગ્રંથની પરમ ઉપાદેયતા :-**

જૈન જ્ઞાનભંડારોમાં શ્રીકલ્પસૂત્ર-બારસાસૂત્રની વિવિધ પ્રકારની પ્રતિઓ કદાચ સૌથી વધારે ઉપલબ્ધ થાય છે, કારણ કે એ આગમગ્રંથ જૈનધર્મના ગ્રંથોમાં શિરમોર સ્થાન-માન ધરાવે છે. ત્યારબાદ વધુમાં વધુ સંખ્યામાં કોઈ ગ્રંથની પ્રતિઓ ઉપલબ્ધ થતી હોય તો બેહીચક કહેવું પડે કે તે **'ઉપદેશમાળા'** મહાગ્રંથની છે. સુશ્રાવકોના ઘરોમાં પણ દૈનિક સ્વાધ્યાયાદિ માટે આ ગ્રંથની લખાવેલી પ્રતિઓ ઉપલબ્ધ થતી હતી.

આ એક **'લોકમાન્ય'** મહાગ્રંથ છે, તેનો સબળ પૂરાવો, એના ઉપર અનેકાનેક મહાપુરુષોએ ટીકાગ્રંથો, વિવરણો, બાલાવબોધ (ટબ્બાઓ) વગેરેની કરેલી સંરચના ઉપરથી જેમ જાણવા મળે છે તેમ આ ગ્રંથની રચના-નિરૂપણશૈલીના અનુકરણ-અનુસરણરૂપે ય ઢગલાબંધ પરવર્તી ગ્રંથો-મહાગ્રંથોની અનેકાનેક પૂર્વર્ષિઓ દ્વારા થયેલી રચનાઓથી પણ સારી રીતે જાણવા મળે છે.

સુવિહિતશિરોમણિ, સમર્થશાસ્ત્રકાર પૂ.આ.**શ્રીહરિભદ્રસૂરીશ્વરજી** મહારાજે આ મહાન ગ્રંથને વિશિષ્ટ વૃત્તિ-અલંકારથી શોભાવ્યો હતો એવો એક ઉલ્લેખ તેઓશ્રીના જ **'યોગશતક'** ગ્રંથમાં પ્રાપ્ત થાય છે. સંઘનું સદ્ભાગ્ય ઓછું કે ઉલ્લેખાનુસારી એ વૃત્તિ અનુપલબ્ધ છે. જેમ યોગવિંશિકા અને યોગશતક જેવા ગ્રંથો સંઘના સદ્ભાગ્યથી પરઠવવા માટે મોકલાયેલ પ્રતિઓ-કાગળોમાંથી ઉપલબ્ધ થયા તેમ આ વૃત્તિ પણ જો ઉપલબ્ધ થાય તો કંઈ કેટલીય બાબતો પર મૌલિક પ્રકાશ સાંપડી શકે. તેઓશ્રીમદ્‌ને 'ઉપદેશદાન'ના નિમિત્તે પોતાના ગુરુસ્થાને સ્થાપિત કરનારા **ઉપમતિભવપ્રપંચાકથા** જેવા કાલજયી સંસ્કૃત મહાગ્રંથનું પ્રણયન કરનારા પૂ.**શ્રીસિદ્ધર્ષિગણિવરે** આ જ **'ઉપદેશમાળા'** ઉપર **'હેયોપાદેયા'** નામની પ્રગટ-પદાર્થા વૃત્તિ (ટીકા) બનાવી...પૂર્વવૃત્તિવિનાશની ખોટને મહદ્અંશે પૂર્ણ કરી છે. અદ્ભુત અર્થોદ્ઘાટન અને સન્માર્મિક કથાવિન્યાસથી એ વૃત્તિ અત્યંત તેજસ્વી બની છે.

**'ધર્મોપદેશમાળા'**કાર પૂ.આ.**શ્રીજયસિંહસૂરિજી** મહારાજે પણ **ઉપદેશમાળાને** સ્વતંત્ર વૃત્તિથી સુરક્ષિત કર્યાનો ઉલ્લેખ મળે છે. એ વૃત્તિ પણ આજે મળતી નથી. 'વાદિદેવસૂરિકુલોત્પન્ન' પૂ.આ.**શ્રીરત્નપ્રભસૂરિજી** મહારાજે પ્રાકૃત વિસ્તૃત કથાઓ સમેત **'દોઘટ્ટી'** નામની ટીકા બનાવી છે, તે સંઘમાં ખૂબ પ્રચલિત છે. ખરતરગચ્છીય પૂ. મુનિરાજ **શ્રીરામવિજયજી** મહારાજે ગદ્ય કથાઓ સમેત સરળ ભાષામાં એક ટીકા બનાવી છે, જે પ્રારંભિક અભ્યાસુઓ માટે સુંદર આલંબન બનેલ છે.

ઉપદેશમાળાની લોકપ્રિયતાથી આકર્ષાઈ અનેક પ્રાચીન-અર્વાચીન શ્રુતોપાસક સૂરિવરો-મુનિવરોએ એવાં જ નામસાદશ્યવાળા કે પદાર્થનિરૂપણશૈલીસાદશ્યવાળા અનેક પ્રકરણગ્રંથોની સંરચના કરેલી છે, તેમાં...મલધારી પૂ.આ. **શ્રીહેમચંદ્રસૂરીશ્વરજી** મહારાજા રચિત **'ઉપદેશમાળા-પુષ્પમાળા'**, પૂ. આ.**શ્રીજયસિંહસૂરીશ્વરજી** મહારાજા રચિત **'ધર્મોપદેશમાળા'**, પૂ.આ.**શ્રીપ્રભાનંદસૂરીશ્વરજી** મહારાજા રચિત **'હિતોપદેશ'** અગર **'હિતોપદેશમાળા'**, એ ઉપરાંત **દાનોપદેશમાળા, શીલોપદેશમાળા, ધર્મશિક્ષાપ્રકરણ, આખ્યાનકમણિકોશ, ઉપદેશરત્નાકર, ઉપદેશસાર, ઉપદેશસપ્તતિકા, સંબોધસિત્તરી** જેવા કેટલાય ગ્રંથો જૈનસંઘમાં સુપ્રસિદ્ધ છે.

**કર્ણિકાવૃત્તિકારશ્રીનો પરિચય :-**

અહીં **ઉપદેશમાળા** મહાગ્રંથ ઉપર નાગેન્દ્રગચ્છીય પૂ.આ.**શ્રીઉદયપ્રભસૂરીશ્વરજી** મહારાજાએ રચેલી **'કર્ણિકા'** નામની વૃત્તિ (ટીકા) સર્વપ્રથમ વાર સંશોધન-સંપાદન થઈને શ્રીસંઘ સમક્ષ પ્રકાશિત થઈ રહી છે.

વૃત્તિકાર મહર્ષિનો અલ્પાક્ષરી પરિચય **'પુરુષવિશ્વાસે વચનવિશ્વાસ'** ન્યાયે વૃત્તિની વરેણ્યતા ઉપર મહોરછાપ મારવા સમર્થ બનશે. વિક્રમના બારમા-તેરમા સૈકામાં થયેલા જૈનશાસનના ઝળહળતા નક્ષત્રોમાંના તેઓશ્રીજી એક સુનક્ષત્ર હતા. નાગેન્દ્રગચ્છના પ્રભાવક પૂ.આચાર્ય **શ્રીસેનસૂરીશ્વરજી** મહારાજ (જેઓએ **રેવંતગિરિરાસુ**ની રચના કરી છે.) તેઓશ્રીના ગુરુદેવ હતા. તે કાળના સમર્થ ધર્મપ્રભાવક મહામંત્રી **વસ્તુપાલ** અને દંડનાયક **તેજપાલ**ના તેઓશ્રી કુળગુરુ હતા. બાલ્યવયમાં જ દીક્ષિત બનેલા તેઓશ્રીનો જીહ્વા ઉપર શારદાનો વાસ હતો. તેઓશ્રીના પ્રજ્ઞાવિકાસ માટે તેઓશ્રીના ગુરુદેવે તેમજ મંત્રીશ્વર વસ્તુપાળે જબરદસ્ત જહેમત ઉઠાવી હતી. સાહિત્યના વિવિધ અંગોમાં તેઓ વિશારદ બન્યા હતા, એમ તેઓશ્રીના જ્યોતિષ વિષય **આરંભસિદ્ધિ**, વસ્તુપાલ મહામંત્રીના સુકૃતોની પ્રશસ્તિરૂપ **સુકૃતકીર્તિકલ્લોલિની** તેમજ **ધર્માભ્યુદયમહાકાવ્ય** અપર નામ **સંઘપતિચરિત્ર** જેવા ગ્રંથો સાખ પૂરે છે.

**કર્ણિકાવૃત્તિની વિશેષતા :-**

પ્રસ્તુત **'કર્ણિકા'** વૃત્તિમાં મૂળ પદાર્થ હેયાપાદેયાના ઉપજીવનરૂપે જ વિન્યસ્ત કર્યો હોવાનું વૃત્તિકારશ્રીજી સ્વયં જણાવે છે—પૂર્વવિસ્તૃત વૃત્તિમાં મહદ્અંશે મૂકાયેલા સંક્ષિપ્ત શૈલીનાં પ્રાકૃત કથાનકોના બદલે સાહિત્યિક સૌષ્ઠવયુક્ત વિસ્તૃતશૈલીનાં સંસ્કૃત કથાનકોની રચના કરીને તેઓશ્રીએ વૃત્તિયુક્ત ગ્રંથને બાળકથી લઈ વિદ્વદ્વર્ગ સુધીના હરકોઈ માટે રસાનુભૂતિનો સુવર્ણથાળ જ જાણે પીરસી દીધો છે.

આ વૃત્તિની ચમત્કૃતિ તો વાચન, મનન અને અન્ય વૃત્તિકારો દ્વારા વર્ણિત તે જ વિષયની તુલનાત્મક પરીક્ષાથી જ અનુભવાય તેવી છે. જ્યારે ગાથાગત પદાર્થ-ઉપદેશને સ્વજીવનમાં જીવી વિરલ અને વિશિષ્ટ આત્મિકસિદ્ધિ પામતા અગર તો એ ઉપદેશની અવગણના કરીને ભીમભવોદધિમાં મજ્જન કરવા ચાલ્યા જતા આત્માઓના પ્રેરક અને બોધક પ્રસંગો જ્યારે વાચીએ-વિચારીએ છીએ ત્યારે એક અજબની ઝણઝણાટી આત્માના પ્રત્યેક પ્રદેશને સુખાયિત કરી જાય છે.

આમાં જે સંસ્કૃતપદલાલિત્ય, અર્થના ભાર વિનાનું ગૌરવ, ઉપમાઓ અને ઉત્પ્રેક્ષાઓની પેશલતા અને કુશલતા આવા ઘણાં બધાં સાહિત્યાંગો શ્લોકે શ્લોકે જોઈને થાય છે કે શું મહાકવિ **કાલિદાસ, ભારવી** અને **દંડી** જ નહિ પણ એ ત્રણેનેય સંમિલિત બનાવી શિરમોર બનનારા કવિરાજ **માઘ**નો જ શું પુનઃ અવતાર વૃત્તિકારરૂપે થયો છે ! આ ગ્રંથના શ્લોકે શ્લોક - ત્રિષષ્ટિકાર કલિકાલસર્વજ્ઞ પૂ.આ.**શ્રીહેમચંદ્રસૂરીશ્વરજી** મહારાજાનું સંસ્મરણ કરાવે છે. આમાં રસ છે, ધ્વનિ છે, છંદ છે, અલંકારવૈશિષ્ટ્ય છે, વૈવિધ્ય છે, મૌલિકતા છે, મધુરતા છે, મસૃણતા છે, પ્રાસાદિકતા છે, પ્રાસ છે, અનુપ્રાસ છે અને...એવું ઘણું બધું છે સાથોસાથ કઠિન જણાતી રચનાઓમાં પણ કર્કશતા તો જરા પણ નથી. જે અધ્યાત્મ ઉપરાંત સાહિત્યના રસાસ્વાદીઓનું સંપ્રીણન કરી શકે છે.

**સંશોધન-સંપાદન અંગે :-**

મારા ગ્રંથ-સંશોધનાદિના ચાલુ કાર્ય દરમ્યાન **'ઉપદેશમાળા-કર્ણિકા**નું નામ કેટલીક વાર સાંભળવા-વાચવામાં આવેલું. પ્રશસ્તિસંગ્રહાદિ ઇતિહાસના ગ્રંથમાં પણ આ ગ્રંથની અંતિમ પ્રશસ્તિ છપાયેલી હતી એવો ખ્યાલ છે. બીજી કોઈ વિશેષતા ત્યારે જાણી ન હતી.

ખંભાતમાં પરમશ્રદ્ધેય પરમતારક પરમગુરુદેવશ્રીજીના શિષ્યરત્ન સિદ્ધહસ્તલેખક પૂ.આ. શ્રી**વિજયકનકચંદ્રસૂરીશ્વરજી** મહારાજાનો પડછાયો બનીને જીવતા પૂ. ઉપાધ્યાય **શ્રીમહિમાવિજયજી** મહારાજે **'હિતોપદેશ'** ગ્રંથનું સંશોધન કરતાં મને જોઈને ત્યાંના **શ્રીનીતિવિજયજ્ઞાનભંડાર**ની **ઉપદેશમાળા-કર્ણિકાવૃત્તિ**ની પ્રતિ ઉપરથી લખાયેલ એક પ્રેસકૉપી આપી. સંઘને હિતકારી બને એ માટે એનું ય સંશોધનાદિ કરવાનું જણાવ્યું.

એમણે જે લિપ્યંતર કરેલી પ્રેસકૉપી આપી તે એકદમ સુવાચ્ય અને મરોડદાર અક્ષરોમાં લખેલી હતી તે જોતાં જ મને કાર્ય સ્વીકારવાનું મન થયું અને મેં સ્વીકાર્યું પણ ખરું. પણ જેમ જેમ એ પ્રેસકૉપી વાચતો ગયો તેમ તેમ મારી મુંઝવણ વધતી ગઈ. કેમકે પ્રેસકૉપી કરનાર લેખકે પદવિચ્છેદો એવી વિચિત્ર ઢબે કર્યા હતા કે જેથી ન તો એ લખાણ બેસી શકતું અને ન એના ઉપરથી યથાર્થ અર્થબોધ થતો. એટલે તેની મૂળ હસ્તપ્રતિ કઢાવી તેના આધારે નવી પ્રેસકૉપી તૈયાર કરી. જોકે આ મૂળ પ્રતિ પણ ખૂબ જ અશુદ્ધ હતી. તેથી અન્ય હસ્તપ્રતિઓ મેળવીને સંશોધન-સંપાદનને આગળ વધારવાનું નક્કી કર્યું. અન્યાન્ય ભંડારોમાં તપાસ કરતાં કેટલીક હસ્તપ્રતિઓ મળી આવી. તે બધી એકત્ર કરી એના આઈનામાં જોઈ જોઈ શુદ્ધ પાઠનિર્ધારણાદિ કાર્ય પ્રારંભ્યું.

**સંપાદન-સંશોધનમાં સહયોગી બનેલનું કૃતજ્ઞભાવે સ્મરણ :-**

કાર્યનો વ્યાપ અને ઊંડાણ જોતાં મારાથી એકલહાથે પહોંચાય તેવું ન હતું. અન્ય-અન્ય શાસનના કાર્યોની જવાબદારીવશ પણ પ્રકાશન લંબાયું. મારી પાસે જ્યારે સમયનો અવકાશ ન રહ્યો ત્યારે પરમતારક, પરમગુરુદેવશ્રીજીના સામ્રાજ્યવર્તી અને પૂ.પ્રવર્તિની સાધ્વીશ્રી **રોહિતાશ્રીજી** મહારાજનાં શિષ્યરત્ના વિદુષી સાધ્વીજી **ચંદનબાળાશ્રીજી** મહારાજે મારી એ જવાબદારીને પોતાના શિરે લઈને પોતાની નાદુરસ્ત તબિયતમાં પણ અમાપ પરિશ્રમ લઈને આ કાર્યને ખૂબ ખૂબ આગળ વધાર્યું. મેટર કંપોજ થયું. બે વખતે પ્રૂફ-સંશોધન પણ થયું. નવી મળેલી હસ્તપ્રતિઓના આધારે પાઠભેદો નોંધવામાં

આવ્યા. એમાં અમુક સમય માટે તેમને પંડિત શ્રી**અમૃતભાઈ પટેલ**નો પણ સહયોગ સાંપડ્યો. આમ છતાં કાર્ય નાનું-સૂનું ન હતું, મળેલી પ્રતિઓમાં અશુદ્ધિઓ ઢગલાબંધ હતી, સમય લંબાતો ગયો, ફરી બીજી પ્રતિઓ માટે તપાસ કરાવતાં કેટલીક શુદ્ધપ્રાયઃ પ્રતિઓની પણ પ્રાપ્તિ થઈ તેથી ફરીથી એકડે એકથી બધા જ પાઠોનું સંકલન, શુદ્ધિકરણ, પાઠાંતર પૃથક્કરણ, ટિપ્પણાંકન અને પાઠનિર્ણયાદિ કાર્ય શરુ થયું. સંયોગવશ એ કાર્ય વળી પાછું અટકી ગયું. તેમનું સ્વાસ્થ્ય સારું ન હોવાના કારણે અને વચ્ચે વચ્ચે અન્યગ્રંથોના સંપાદનાદિ કાર્યને લઈને ય કામમાં રુકાવટ આવી.

**ઉપદેશમાળા ઉપર પ્રવચનો :-**

**વિ.સં. ૨૦૬૫**ની સાલમાં મારા પરમોપકારી પિતા ગુરુવર વર્ધમાનતપોનિધિ પૂ.આ.શ્રીવિજય**ગુણયશસૂરીશ્વરજી** મહારાજાની શુભનિશ્રામાં **મુંબઈ-લાલબાગ-શેઠ મોતીશા લાલબાગ જૈન ચેરિટીઝ** સંઘના આંગણે ચાતુર્માસ થયું. તેઓશ્રીનું એ અંતિમ ચાતુર્માસ થયું. ત્યારે ચાતુર્માસિક દૈનિક પ્રવચનો આ જ **'ઉપદેશમાળા'** મહાગ્રંથ ઉપર કરવાનાં થયાં. રોજ પ્રવચન કરવા નીચે જતો ત્યારે તેઓશ્રીના ખોળામાં માથું મૂકી આજ્ઞા-આશિષ લઈને જતો. તેઓશ્રી કહેતા કે 'હું પણ આવું.' સ્વાસ્થ્ય પ્રતિકૂળ હોવાથી ચિકિત્સકોની સૂચના મુજબ મારે ના કહેવી પડતી. પ્રવચનમાં અપૂર્વ સંવેગ-નિર્વેદના ભાવો પ્રગટતા. મારા દિવસ-રાત એ ભાવોને અનુભવવામાં પસાર થતા. પ્રવચન સાંભળનારાને પણ આનંદાનુભૂતિ થતી. પ્રવચન પૂર્ણ કર્યા બાદ પાછા તેઓશ્રીના ખોળામાં માથું મૂકીને નિવેદન કરવાનો મારો ક્રમ રહેતો. હું આવું તે પહેલાં અન્ય મુનિવરો અને શ્રાવકોના મુખે તે દિવસનો વ્યાખ્યાન-વિષયાદિ જાણીને તેઓ પ્રમુદિત બનેલા રહેતા. મને લખીને પૂછતા...આજે શું વિષય આવ્યો ? હું ટૂંકમાં પદાર્થ કહેતો. તેઓ ગદ્ગદ્ બની જતા તે હું રોજ અનુભવતો.

**આસો વદ ૪**ના દિવસે પણ ઉપર વર્ણવેલી દિનચર્યા કાયમ રહી. તે દિવસે યોગાનુયોગે વ્યાખ્યાનવિષયક ગાથા આવી :

**''ते धन्ना ते साहू, तेसिं नमो जे अकज्जपडिविरया ।**
**धीरा वयमसिधारं, चरंति, जह थूलभद्दमुणी ॥५९॥''**

**'તેઓ ધન્ય છે, તેઓ સાધુપુરુષો છે, તેઓને નમસ્કાર થાઓ ! કે જે ધીર સાધુઓ સ્થૂલભદ્રમુનિની જેમ અકાર્યથી દૂર રહીને તલવારની ધાર ઉપર ચાલવા સમાન વ્રતને અખંડ પાળે છે.'**

**''विसयासिपंजरम्मि व, लोए असिपंजरम्मि तिक्खंमि ।**
**सिंहा व पंजरगया, वसंति तवपंजरे साहू ॥६०॥''**

**'આ જગતમાં, પાંજરામાં પુરાયેલા સિંહો જેમ તીક્ષ્ણ એવા તલવારના પાંજરાથી ભયભીત બનીને લોઢાના સુરક્ષિત પાંજરામાં પુરાઈને જીવંત રહે છે, તેમ વિષયોરૂપી તલવારોથી બનેલા તીક્ષ્ણ પાંજરાથી ભીતિ પામેલા સાધુઓ તપોનુષ્ઠાનરૂપી પાંજરામાં પુરાયેલા રહી આત્માને સુરક્ષિત કરે છે.'**

તેઓશ્રીના જીવનમાં આ ઉપદેશમાળા પૂરેપૂરી ચરિતાર્થ થતી મેં જોઈ છે. એના પદેપદથી તેઓશ્રીનો અંતરાત્મા પળેપળ ભાવિત બનેલો હતો. હાથમાંનું સમ્યગ્દર્શન પુસ્તક મને બતાવીને કહ્યું કે 'આમાં આ જ વાતો છે, મને ઘણો સંતોષ છે.' ત્યારબાદ અચાનક જ પરિસ્થિતિએ પલટો લીધો અને ચતુર્વિધ શ્રીસંઘની સમુપસ્થિતિમાં 'અરિહંતે સરણં પવજ્જામિ'ના શ્રવણ-ઉચ્ચારણપૂર્વક પરમસમાધિભાવમાં લીન બની બપોરે ૩-૨૦ વાગે તેઓશ્રી પરમપદને પામવા પરલોકના પંથે પ્રયાણ કરી ગયા. ઉપદેશમાળાનો સ્વાધ્યાય આ રીત પણ મને ઉપકારક બન્યો.

આવી તો અનેક ટંકશાળી ગાથાઓ આ ગ્રંથરત્નમાં ઉપલબ્ધ થાય છે, તેથી મનમાં સતત ભાવના રહ્યા કરતી કે પ્રારંભેલું આ કાર્ય જલ્દી પરિપૂર્ણ થાય તો સારું, એમાં દીપકમાં સ્નેહ રેડવારૂપે નિમિત્ત મળ્યું **'દીક્ષાયુગપ્રવર્તક શાસનશિરતાજ સૂરિરામચંદ્ર દીક્ષાશતાબ્દી'**નું. **પાલિતાણા**ના ચાતુર્માસ દરમ્યાન (વિ.સં. ૨૦૬૭) દીક્ષાશતાબ્દીની વાર્ષિક ઉજવણીના વિવિધ આયોજનો અંગે ચતુર્વિધ શ્રીસંઘને માર્ગદર્શન અપાયું. દીક્ષાશતાબ્દીનો પ્રારંભ મહોત્સવ પણ અનુપમ રીતે ઉજવાયો. ત્યારે વિવિધ શ્રાવક-શ્રાવિકાવર્ગે જેમ દ્રવ્યાનુષ્ઠાનોના અભિગ્રહો કર્યા હતા, તેમ શ્રમણ-શ્રમણીવર્ગે ભાવાનુષ્ઠાનોના અભિગ્રહો ધાર્યા હતા. તે વખતે આદર્યા અધૂરાં રહેલાં કેટલાક કાર્યોમાંના એક - **ઉપદેશમાળા-કર્ણિકા**ના સંશોધનાદિ માટે મેં પ્રેરણા કરી

હતી. પરમતારકશ્રીજી પ્રત્યેની નિર્મળ ભક્તિથી પ્રેરાઈને તેઓશ્રીનાં સામ્રાજ્યવર્તિની પૂ.પ્રવર્તિની સા. **શ્રીદર્શનશ્રીજી**-મહારાજનાં શિષ્યરત્ના વિદુષી સા. **શ્રીત્રિલોચનાશ્રીજી**મહારાજનાં પરિવારવર્તી સ્થવિરા સાધ્વીજી **શ્રીજયમાલાશ્રીજી**-મહારાજનાં સાંનિધ્યવર્તી વિદુષી સાધ્વીજી મહારાજે આ કાર્યને પૂરા ઉત્સાહથી ઉપાડી લીધું અને પૂરા એક વર્ષ સુધી સતત, સખત અને સમ્યક્ સંપ્રયત્ન આદરી આ મહાન ગ્રંથને પ્રકાશનાર્હ બનાવવામાં તેમણે મુખ્યફાળો આપ્યો છે, જે અનુમોદનીય અને આવકાર્ય છે.આ સંશોધનકાર્યમાં છંદ-કાવ્યાદિ સંબંધિ ત્રુટિઓ પ્રસંગે તપાગચ્છાધિરાજ પરમગુરુદેવશ્રીજીના શિષ્યરત્ન કવિહૃદય મુનિવર **શ્રીમોક્ષરતિવિજયજી** મહારાજે સુંદર માર્ગદર્શન પૂરું પાડ્યું છે. આધ્યાત્મિક પ્રવચનકાર આચાર્યશ્રી વિજય **યોગતિલકસૂરિજી** મહારાજના શિષ્યરત્ન વિદ્વાન મુનિવરશ્રી **શ્રુતતિલકવિજયજી**મહારાજે ગ્રંથ જોતાં જ પ્રગટેલ ગ્રંથાનુરાગથી પ્રૂફસંશોધનાદિથી લઈને પાઠનિર્ધારણાદિમાં અનેકવાર અમૂલ્ય યોગદાન આપ્યું છે, એટલું જ નહિ અત્યંત સરળ છતાં રસાળ સંસ્કૃતમાં ગ્રંથ અને ગ્રંથકારનો પરિચય તેમજ ગ્રંથગત કેટલીક વિશિષ્ટતાઓનું બ્યાન આપતી પ્રસ્તાવના આલેખી આ કામને શોભાવ્યું છે. વચનસિદ્ધ, પરમતપોનિધિ પૂ.આ.શ્રીવિજય **સિદ્ધિસૂરીશ્વરજી**મહારાજાના સમુદાયવર્તી વિદુષી સાધ્વીજી **લલિતપ્રભાશ્રીજી** મહારાજે પણ આ કાર્યમાં પોતાનો અમૂલ્ય સમય આપી સહયોગ આપ્યો છે. વિદુષીરત્ના સાધ્વીજી **ચંદનબાળાશ્રીજી** મહારાજે આ બધું કાર્ય થયા પછી ફરી આદિથી અંત સુધી ગ્રંથનું પ્રૂફવાંચનાદિ કરી શુદ્ધિકરણ કરી આપ્યું અને પરિશિષ્ટો વગેરે તૈયાર કર્યા - કરાવ્યાં છે. આ રીતે પ્રારંભથી અંત સુધીના પ્રત્યેક તબક્કે આ સંશોધન-સંપાદન-પ્રકાશનના વિવિધ પાસાંઓને ચમકદાર બનાવવામાં તેઓ પૂર્ણરૂપેણ સહાયક બન્યાં છે. તે સર્વેની શ્રુતભક્તિની હું ખરા હૃદયથી અનુમોદના કરું છું.

પરમતારક પરમશ્રદ્ધેય પરમગુરુદેવશ્રીજીના દીક્ષાસ્વીકારક્ષણની શતાબ્દીના વર્ષારંભે દૃઢ પાયે પ્રકાશનનું પ્રણિધાન પામેલ આ ગ્રંથરત્ને પૂરા વર્ષભર આ કાર્ય સાથે સંકળાયેલ મારા સમેત પ્રત્યેક સાધુ-સાધ્વીવૃંદના હૈયામાં ઉછળતા સંવેગ-નિર્વેદના ભાવો જન્માવ્યા છે. તે બદલ મૂળગ્રંથકારપરમર્ષિ તેમજ વૃત્તિકારમહર્ષિનો કેટલો ઉપકાર માનીએ !

આ વૃત્તિગ્રંથના સંશોધન-સંપાદનાદિમાં વિવિધ રીતે સહભાગી બનનાર દરેકે તેના વાચન-સંપાદનાદિ કામમાં અપૂર્વ ભાવો અનુભવ્યા છે, અપાર તાત્ત્વિક આનંદ અનુભવ્યો છે, આ ગ્રંથના સંશોધન-સંપાદનકાર્યમાં સતત એક વર્ષ સુધી પૂરી દક્ષતાથી વ્યગ્ર રહી શ્રુતોપાસનાજન્ય અનન્ય આનંદાનુભૂતિ કરનાર એ સાધ્વીજી મહારાજે મને લખ્યું છે કે,

''આ ગ્રંથનું કાર્ય કરવાનો લાભ આપી આપશ્રીએ મારા-અમારા ઉપર મોટો ઉપકાર કર્યો છે, કેમકે, આ ગ્રંથનું કાર્ય કરતી વખતે જે સંવેદનો સ્પર્શ્યાં છે, જે આનંદ અનુભવાયો છે, વીતરાગપરમાત્મા તેમજ પ્રભુના શાસન પ્રત્યે જે અહોભાવ પ્રગટ્યો છે...એના કારણે મારા-અમારા કેટલાય ચીકણાં કર્મ તૂટ્યાં હોય - તેવી સાક્ષાત્ પ્રતીતિ થઈ છે. તે બધાનું નિમિત્ત પરમાતારકશ્રીજીની દીક્ષાશતાબ્દી અને આપશ્રીજી છો ! આ કાર્ય આપે આપ્યું તે બદલ હું આપશ્રીની ઋણી છું. આ રીતની શ્રુતોપાસના કરવાનું સૌભાગ્ય મળ્યું તે બદલ જાતને ધન્ય માનું છું. આ બધા જ ભાવો શુદ્ધ અને નિર્મળ અનુભવ્યા છે. આ ગ્રંથમાં મારું ક્યાંય નામ ન આવે તેવી આપશ્રીને ખાસ વિનંતિ છે, જેથી માન કષાયના પોષણ દ્વારા મારા નિર્મળ ભાવો કલુષિત ન થાય. જ્યારથી દીક્ષા લીધી ત્યારથી હું જિનશાસનને અને જિનશાસનના સૂરિવરોને સમર્પિત છું તો પછી મારા નામને છાપવાનો અવકાશ જ કયાં રહે ? આપશ્રીને અતિ વિનમ્ર કાકલૂદીભરી વિનંતિ કરું છું કે મારી આ ભાવના જળવાય. મારા હિત માટે શ્રુતની ઉપાસના દ્વારા શાસનસેવા થાય તેવું કાર્ય સોંપી કૃપાદૃષ્ટિમાં વધારો કરશોજી. મારા ગુરુભગવંતો પણ આ જ ભાવના ધરાવે છે જી.'' આ ગ્રંથરત્નના સ્વાધ્યાયાદિથી ચતુર્વિધ શ્રીસંઘ પણ એવા જ અનુપમ આનંદને અનુભવશે - એવો વિશ્વાસ છે.

**'ઉપદેશમાળા-કર્ણિકા'**ના સંશોધન-સંપાદન-પ્રકાશનાદિ કાર્યમાં છદ્મસ્થતાવશ જિનાજ્ઞાથી વિપરીત તથા મૂળ ગ્રંથકાર પરમર્ષિ અને કે વૃત્તિકાર મહર્ષિના આશયવિરુદ્ધ કોઈ પણ અક્ષરવિન્યાસ થયો હોય તો તે અંગે ત્રિવિધ ત્રિવિધ મિચ્છા મિ દુક્કડં આપવા સાથે બહુશ્રુતોને વિનંતિ કે આ અંગે જે પણ ત્રુટિઓ જણાય તે અવશ્ય જણાવે જેથી ભાવી પ્રકાશનોમાં એનું નિવારણ થઈ શકે.

પ્રાંતે સંયમજીવનની અધ્યાત્મકલ્પવેલીને હરી-ભરી રાખનારા મહામહિમ **શ્રીશંખેશ્વરપાર્શ્વનાથપરમાત્મા,** જેઓશ્રીના વદનકમલથી નિઃસૃત અમૃતના કુંભસમાન આ ઉપદેશમાળાનું અવતરણ થયું તે આસન્નોપકારી ચરમતીર્થપતિ શ્રમણ ભગવાન **શ્રીમહાવીરપરમાત્મા,** ગણધરભગવંતો, ગ્રંથકાર પરમર્ષિ શ્રુતકેવલી પૂ.શ્રી**ધર્મદાસગણિ**ક્ષમાશ્રમણજી વૃત્તિકાર મહર્ષિ નાગેન્દ્ર-ગચ્છીય પૂ.આ.શ્રી**ઉદયપ્રભસૂરીશ્વરજી**મહારાજા, ગ્રંથનું આલેખન-સંરક્ષણાદિ કરનાર-કરાવનાર પુણ્યાત્માઓ, ગુરુક્રમથી એ ગ્રંથનો પરમાર્થ પ્રદાન કરનારા પરમતારક, પરમશ્રદ્ધેય, પરમગુરુદેવ, તપાગચ્છાધિરાજ પૂ.આ.શ્રી. વિજય **રામચંદ્ર-સૂરીશ્વરજી**મહારાજા, મને આ ગ્રંથની પ્રથમ પ્રેસકૉપી સમર્પી કાર્ય માટે સંપ્રેરિત કરનાર સમર્પણતીર્થરૂપ પૂ.ઉપાધ્યાય શ્રી**મહિમાવિજયજી**ગણિવરશ્રી, જેઓશ્રીના તપ-સંયમ-વાત્સલ્ય-અનુશાસનસામ્રાજ્યમાં ઉછરી આ અને આવા અનેક ગ્રંથપદ્મોની પરાગનું આસ્વાદન કર્યું તે ભવોદધિતારક ગુરુદેવ, આજીવનગુરુચરણસેવી, ગુરુગચ્છવિશ્વાસધામ, વર્ધમાન-તપોનિધિ પૂ.આ.શ્રી વિજય**ગુણયશસૂરીશ્વરજી**મહારાજા આદિ પૂજ્યપુરુષોનો પરમોપકાર સતત સ્મરણપથમાં રાખી આવા સન્માર્ગપ્રેરક શ્રુતરત્નોનાં સંશોધન-સંપાદનાદિ કરવા-કરાવવા દ્વારા મારા અને સર્વ ભવ્યાત્માઓના મોહનીયાદિ કર્મરાશિને સમૂળ નષ્ટ કરવા-કરાવવામાં હું સમર્થ બનું એવી પ્રાર્થના કરું છું.

વિ.સં. ૨૦૬૯ ફાગણ સુદ-૨ બુધવાર
તા. ૧૩-૩-૨૦૧૩
**દીક્ષાયુગપ્રવર્તક શાસનશિરતાજ**
**સૂરિરામચંદ્રવડીદીક્ષાશતાબ્દીદિન**
**શ્રીભોરોલતીર્થ**

શ્રીજૈનશાસનશિરતાજ, વ્યાખ્યાન વાચસ્પતિ,
પૂ.આચાર્યદેવ શ્રીમદ્વિજય **રામચંદ્રસૂરીશ્વરજી**
મહારાજાનો ચરણચંચરી વર્ધમાન-
તપોનિધિ પૂજ્ય આચાર્યદેવ શ્રીમદ્વિજય
**ગુણયશસૂરીશ્વરજી** મહારાજાનો શિષ્યાણુ
**વિજયકીર્તિયશસૂરિ**

● ● ●

જૈનશાસનશિરતાજ, વ્યાખ્યાનવાચસ્પતિ, દીક્ષાયુગપ્રવર્તક સુવિશુદ્ધસિદ્ધાંતદેશનાદાતા,
તપાગચ્છાધિરાજ, પૂજ્યપાદ આચાર્યદેવ
શ્રીમદ્વિજય રામચંદ્રસૂરીશ્વરજી મહારાજાના

**દીક્ષાશતાબ્દીવર્ષમાં**

તેઓશ્રીમદ્દ્ના દીક્ષાયુગપ્રવર્તનાદિ ગુણોની અનુમોદનાર્થે
શાસનશિરતાજ સૂરિરામચંદ્ર દીક્ષાશતાબ્દી ગ્રંથમાળાના ૩૪મા પુષ્પરૂપે
નાગેન્દ્રગચ્છીય, મન્ત્રીશ્વરવસ્તુપાલ-તેજપાલના
ગુરુપદે સ્થાપિત પ.પૂ.આચાર્યવર્ય શ્રીઉદયપ્રભસૂરીશ્વરજીમહારાજારચિત

**'કર્ણિકા'વૃત્તિ સહિત**

શ્રુતકેવલી ચતુર્દશપૂર્વધર પ.પૂ.શ્રી ધર્મદાસગણિવરવિરચિત

# ઉપદેશમાલા

પુસ્તકના પ્રકાશનનો પુણ્યલાભ સંપ્રાપ્ત કરનાર

---

શ્રી સિદ્ધગિરિરાજની છત્રછાયામાં વિ.સં. ૨૦૬૭ની સાલે જૈનશાસનશિરતાજ, દીક્ષાયુગપ્રવર્તક, તપાગચ્છાધિરાજ, પૂજ્ય આચાર્યદેવ શ્રીમદ્ વિજય રામચંદ્રસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન ગુરુગચ્છવિશ્વાસધામ, વર્ધમાનતપોનિધિ, પૂ.આ.શ્રી.વિજય ગુણયશસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન પ્રવચનપ્રભાવક પૂ.આ.શ્રી.વિજય કીર્તિયશસૂરીશ્વરજી મહારાજાની નિશ્રામાં ૬૦ શ્રમણો, ૩૦૦ શ્રમણીઓ, ૧૭૦૦ જેટલા ચાતુર્માસ આરાધકો, ૧૦૬૦ જેટલા ઉપધાન આરાધકો અને ૫૮૫ જેટલા માળ આરાધકો આદિથી સભર ઐતિહાસિક ચાતુર્માસ તથા ઉપધાનતપનું આયોજન

કુળદીપિકા પૂ.સા.શ્રી રાજનંદિતાશ્રીજી મ.ના સદુપદેશથી ધાનેરા નિવાસી

**માતુશ્રી ચંપાબેન જયંતિલાલ દાનસુંગભાઈ અજબાણી**

**ધાનેરા ડાયમંડસ પરિવારે**

કર્યું હતું એ દરમ્યાન થયેલી જ્ઞાનખાતાની વિશિષ્ટ ઉપજમાંથી શાસનશિરતાજ સૂરિરામચંદ્રદીક્ષાશતાબ્દીની સ્મૃતિમાં વિવિધ પ્રાકૃત સંસ્કૃત-અનુવાદાદિ ગ્રંથોના પ્રકાશનનો પુણ્ય લાભ લેવામાં આવ્યો છે.

---

અમો એ સુકૃતની ભાવપૂર્વક અનુમોદના કરવા સાથે ભવિષ્યમાં પણ આવાં
સુંદર કાર્યો થતાં રહે એવી શુભકામના કરીએ છીએ.

લી. શાસનશિરતાજ સૂરિરામચંદ્રદીક્ષાશતાબ્દીસમિતિ

# कर्णिकावृत्तिसमन्वितताया उपदेशमालाया भूमिका

**देहिनां दुःखविच्छेदकारिणी धर्मदेशना ॥**

**१. विश्वस्य आधारः-**

अनादिकालीना इयमिच्छा सर्वेषामपि चेतनावतां जन्तूनां यद् दुःखं गच्छेत्, सुखं भवेत्। यावत्पर्यन्तं दुःखकारणानि रागादीनि आत्मनि संस्थितानि तावत्पर्यन्तं तु दुःखप्रहाणेच्छा दिवास्वप्नायते। यावत्पर्यन्तं च रागादिनिष्कासनोपायप्रतिबन्धकम् अज्ञानम् आत्मनि विलसति तावत्पर्यन्तं सुखाभिलाषः शशशृङ्गायते। धर्मदेशना तदेव करोति येन जीवस्य अज्ञानतिमिरं दूरीभवेत्। सकृद् वयं चिन्तयेम यद् अनन्तकरुणासागरैः तीर्थकरैः यदि धर्मदेशनामेघेन जगज्जीवानां कषायतापः निर्वापितः न स्यात् तर्हि विश्वस्य चित्रं कीदृग् स्यात्? ऊहातीतं तच्चित्रं कल्प्यमानमपि अन्तःकरणं कम्पयति। अत एव तीर्थकराणामुपदेशः विश्वस्यापि विश्वस्य सौख्यकृते अनन्यः आधारः इति तु सर्वथा संसिद्धम्। अनेनैव हेतुना धर्मोपदेशमाहात्म्यं वर्णयद्भिः अभ्यधायि सूरिपुरन्दरैः **श्रीहरिभद्रसूरिभिः** योगशतके ३१तमगाथायाः वृत्तौ यदुत-

"उत्तमः श्रुतधर्मः, मोहतमोरविः, पापवध्यपटहः, प्रकर्षः श्रव्याणाम्, सेतुः सुरलोकस्य, भावामृतमयम्, देशकः शिवगतेः, जिनभावबीजम्, अभिव्यक्तो जिनेन, नातः परं कल्याणम्।"

**२. धर्मोपदेशकाः श्रीधर्मदासगणिनः-**

कालः तु अनादिः अनन्तश्च। अनन्तोपकारिणः तीर्थङ्कराः तु कालैकदेशस्थायिनः। शेषकाले तत्तत्क्षेत्रे तीर्थकरशासनं संचाल्यते शुद्धप्ररूपकेण धर्मोपदेशकेन। गीतार्थः यतनावान् भवभीरुः महांश्च धर्मोपदेशकः जिनेश्वराणामनुपस्थितौ जिनेश्वरायते। उपाध्यायवर्याः **श्रीयशोविजयाः** स्पष्टं बोधयन्ति यत् कलिकालेऽपि तस्यैव प्रभावाद् धर्म एधते। एतादृशेषु सहस्रशः धर्मोपदेशकेषु श्रीवीरशासनापेक्षया प्रथमपङ्क्तिगतं परममहिमोपेतं पुण्यनामधेयं विराजते - **श्रीधर्मदासगणिनः**। एतेषां वैशिष्ट्यं किञ्चिद् अपूर्वमेव। श्रीवीरभगवता स्वहस्तदीक्षिताः चतुर्दशपूर्वज्ञानिनः एते। आम्, सुसाध्यम् एतेषां चतुर्दश-पूर्ववित्त्वम्। पठन्तु **योगविंशिकागतामिमां** पङ्क्तिम् **"तथा च श्रुतकेवलिनो वचनम्-जह सरणमुवगयाणं"** [उपदेशमाला गा० ५१८] तन्नाम **श्रीधर्मदासगणिनं** पूज्योपाध्यायवर्याः श्रुतकेवलित्वेन निर्दिशन्ति

अनेन च पूज्यपादानां समयविषयिणी पण्डितम्मन्यानाम् इतिहासविदां विविधा कल्पना दूरापास्ता एव। चतुर्दशपूर्वविदां [अवधिज्ञानिनां च] कृते तु समीपवर्त्तिभविष्यज्ज्ञानं करामलकायेत एव। अतः पश्चाद्वर्त्तिनां श्रीस्थूलभद्रादीनां जीवन-प्रसङ्गनिरूपणजन्यायाः श्रीधर्मदासगणिसमयविषयाया विप्रतिपत्त्या नास्त्येवावकाशः।

अत्र या **उपदेशमाला** संपाद्यते सा पूज्यपादैः स्वपुत्रस्य **रणसिंहस्य** वैराग्योत्पादनाय रचिता इति बोधितं **श्रीरत्नप्रभ-सूरिभिः** अस्याः एव **दोघट्टी**टीकाप्रारम्भे। स्वपुत्रस्य महामुनेः मनकस्य अल्पायुषि परमार्थसाधनाय पूर्वाब्धेः दशवैकालिकं समुद्धरद्भिः श्रीशय्यंभवसूरिभिः कदाचित्पूज्यपादेभ्यः एव प्रेरणा लब्धा न स्यान्नु? दशवैकालिकमाशासनम् - शासनस्य अन्तं यावत् स्थास्यति। उपदेशमाला आशासनम् - शासनस्य स्थापनायाः आरभ्य स्थिताऽस्ति। दशवैकालिकस्य अधिकारी तु द्विविधः सङ्घः। उपदेशमालायाः अधिकारी तु चतुर्विधोऽपि सङ्घः। **श्रीधर्मदासगणिभिः** स्वस्य धर्मोपदेशकत्वेन जैनशासनस्य या प्रभावना कृता सा निश्चयेन अनितरसाधारणी एव। अस्मादृशां लेखनी तत् परिपूर्णं प्रतिपादयितुं पङ्गु एव।

**३. उपदेशमालायाः अनुपमता-**

जैनसाहित्यस्य विशालता, व्यापकता, विशदता, विशिष्टता च सर्वैः सुज्ञैः विदिता एव । तत्र महत्तमभागः उपदेशसाहित्यस्य एव इत्यपि सुस्पष्टम् । यतः तत्त्वप्रधानं पदार्थप्रधानं वा साहित्यं तु विद्वज्जनग्राह्यं भवति प्रायः, उपदेशप्रधानं पुनः साहित्यं सर्वग्राह्यं भवति । तादृशेषु सहस्रशः ग्रन्थेषु ऐदम्प्राथम्येन विराजमानः ग्रन्थराजः कस्य चित्तं नाकर्षेत् ? उपदेशमालामवलम्ब्य कैः कैः विद्वद्भिः स्वलेखनी न प्रवर्त्तिता खलु ! उपदेशमणिमाला, उपदेशरत्नमाला, धर्मोपदेशमाला, उपदेशमाला-पुष्पमाला, उपदेशरत्नकोशः, दानोपदेशमाला, उपदेशपदम्, शीलोपदेशमाला, उपदेशरत्नाकरः, उपदेशतरङ्गिणी, उपदेशसारः, उपदेशप्रासादः, कियन्ति नामानि लिख्येरन् ? एते ग्रन्थाः तु नामतोऽपि उपदेशमालामवलम्बन्ते । शैलितः उपदेशमालामवलम्बमानानां ग्रन्थानामावली तु अतिदीर्घा स्यात् ।

उपदेशमालायाः ५४४ गाथासु वैराग्यस्य निधिः एव समुल्लसति । अनेका गाथाः श्रावकजीवनस्य साधुजीवनस्य च कृते दीपस्तम्भायन्ते । सारल्येन सहैव गाम्भीर्यस्य योगः-यः प्रायः विरलतया एव दृश्यते-स अत्र साधितो ग्रन्थकारैः । उपदेशमालायाः गाम्भीर्यस्य तु इदमेव प्रमाणं यत् भिन्नैः भिन्नैरनेकविद्वद्भिः उपदेशमालाया विवरणे लघुः बृहद् वा प्रयत्नः कृतः ।

परवर्त्तिग्रन्थेषु उपदेशमालाया गाथानामुद्धरणानि तु पृथक् संशोधनस्य विषयः अस्ति । नैकेषु ग्रन्थेषु तानि लभ्यन्ते । योगग्रन्थः भवतु पदार्थग्रन्थो वा, कथाग्रन्थः भवतु उपदेशग्रन्थो वा, उपदेशमालायाः उद्धरणं प्रायस्तत्र लप्स्यते एव । पूज्यपादानां वचनानि स्वतः प्रमाणानि सन्ति-इत्येतत् अनेन स्पष्टं भवति । पूज्योपाध्यायवर्यैः (श्रीयशोविजयपादैः) तु गूर्जरभाषानिबद्धेषु स्तवनादिषु अपि उपदेशमालायाः साक्ष्यं भूरिशः स्वीकृतम् ।

उपदेशमालाया अनुपमता एतेन सुष्ठु अभिलक्ष्यते । उपदेशमालाया विषयविवरणं तु अनुक्रमेण ज्ञास्यते, अतो न पुनरुच्यते ।

**४. उपदेशमालायाः टीकाग्रन्थाः-**

अस्य ग्रन्थस्य उपरि अद्यावधि यथा अग्रे सूचितं तथा प्रायः ३२ टीकाऽवचूरि-बालावबोधादिकं लभ्यते । सूरिपुरन्दर**हरिभद्रसूरिभिः** टीका रचिता इति **योगशतकस्य** ४९तमायाः गाथायाः विवरणेन ज्ञायते, किन्तु दौर्भाग्यात् सा टीकाऽधुना नोपलभ्यते । द्वितीया वि.सं. ९१३ मध्ये श्री**जयसिंहसूरिभि**रपि टीका रचिता इति ज्ञायते किन्तु साऽपि नोपलभ्यते । उपलब्धेषु विवरणेषु प्राचीनतमा उत्कृष्टा च **हेयोपादेया** नाम्नी टीकाऽस्ति, विश्वेऽनुपमाया उपमितिकथायाः सर्जकानां श्री**सिद्धर्षि**वर्याणाम् । सा च प्रायः वि.सं. ९६२तः प्रागेव रचिता स्यात् । एषैव टीका परवर्त्तिनां टीकाकाराणामाधारभूताऽस्ति । अत्र च या **कर्णिका** टीका ऐदम्प्राथम्येन संपाद्यते तस्यां प्रारम्भे एव टीकाकर्त्तारः श्रीमद्**उदयप्रभसूरयः** स्पष्टीकुर्वन्ति-

"**गाथास्ताः खलु धर्मदासगणिनः संजातरूपश्रियः किञ्चैष स्फुरदर्थरत्ननिकरः सिद्धर्षिणैवार्पितः**" । तन्नाम, अत्र यद् अर्थरूपं विवरणं लिख्यते तत्तु सिद्धर्षिवर्यानुसारितयैव ज्ञेयम् । हेयोपादेयाटीकायां कथानकानि संस्कृतगद्ये अतीवलाघववत्या शैल्या लिखितानि सन्ति । अतः वि.सं. १०५५तमे वर्षे श्री**वर्धमानसूरिभिः** तस्यामेव टीकायां प्राकृतबद्धानि दीर्घाणि कथानकानि योजितानि सन्ति । अनेन कारणेन केचन श्रीसिद्धर्षिभिः लघ्वी बृहती चेति द्वे टीके रचिते इति मन्यन्ते किन्तु अनवधानजा सा मान्यता ।

अपरा टीकाऽस्ति **दोघट्टी**नाम्नी । सा च १२३८तमे वर्षे श्री**रत्नप्रभसूरिभिः** रचिता । तस्यामपि प्राकृतमयानि कथानकानि सन्ति । तस्यां प्रारम्भे उपदेशमालायाः रचनाहेतुः सविस्तरं दर्शितः अस्ति ।

तदनु च स्थिता प्रस्तुता एव **कर्णिका**टीका यस्याः परिचयः अधः सविस्तरं दास्यते । अन्या च श्री**रामविजयैः** रचिता सरलसंस्कृतगद्यकथामयी टीकाऽस्ति । अपरं च बालावबोधादिकमपि वर्त्तते किन्तु तस्य विषये विशेषविवरणं ग्रन्थान्तरेभ्यो ज्ञेयम् ।

### ५. कर्णिकावृत्त्याः कर्त्तारः-

अत्र या टीका संपाद्यते साऽस्ति **कर्णिका**नाम्नी । तस्याः कर्त्तारः सन्ति श्रीमद्**उदयप्रभसूरयः** । ते नागेन्द्रगच्छीयाः सन्ति । टीकायाः रचना वि.सं. १२९९तमे वर्षे जाताऽस्ति । एकः महद्भूतः अंशः अयं यद् एषा टीका प्रसिद्धैः संशोधकैः टीकाकारसमकालीनैः **श्रीप्रद्युम्नसूरिभिः** संशोधिता । टीकाकारैः स्वस्य अन्यासु कृतिष्विव अस्यामपि टीकायां प्रशस्तिः दत्ता । यया पूज्यानां समुज्ज्वला गुरुपरम्परा ज्ञायते ।

### ५.१. समुज्ज्वला गुरुपरम्परा :-

नागेन्द्रगच्छे श्री**महेन्द्रप्रभ**सूरीश्वराणां पट्टे श्री**शान्ति**सूरीश्वराः संजाताः । येषां षड्दर्शनविषयको बोधः सागरायते स्म । तेषां पट्टे श्री**आनन्द**सूरीश्वराः श्री**अमरचन्द्र**सूरीश्वराश्च जाताः । तयोः सत्तर्ककर्कशधियोः अक्षोभ्यमगाधं च ज्ञानं दृष्ट्वा श्रीसिद्धराजजयसिंहः 'व्याघ्रशिशुः सिंहशिशुः' इति उपाह्वां (बिरुद) ताभ्यां दत्तवान् । सतीशचन्द्रविद्याभूषणनामा आधुनिकः प्रतिष्ठितः विद्वानेवं मन्यते यदेतौ सूरिवरौ एव मनसि निधाय न्यायदर्शने युगप्रवर्त्तकः पण्डितप्रकाण्डं गङ्गेशोपाध्यायः स्वस्य मणिभूते तत्त्वचिन्तामणिग्रन्थे सिंहव्याघ्रलक्षणं दत्तवान् । एतदेव बोधयति यद् सूरिवरयोः ज्ञानं कियद् विशिष्टं स्यात् । तत्पदे 'कलिकालगौतम'विशेषणविशिष्टाः श्री**हरिभद्र**सूरयः जाताः । तेषां पट्टे जाताः श्री**विजयसेन**सूरयः । ये मन्त्रीश्वर**वस्तुपालस्य** कुलगुरवः आसन् । तेषां शिष्याः सन्ति प्रस्तुतायाः **कर्णिका**टीकायाः स्रष्टारः श्रीमद्**उदयप्रभ**सूरीश्वराः । एषा समुज्ज्वला गुरुपरम्परा एव द्योतयति यद् टीकाकारैः वैदुष्यं तु गर्भलब्धमासीत् ।

### ५.२. वस्तुपालमन्त्रिणा सह सम्बन्धः :-

यथा अस्माभिः अधुनैव दृष्टं तथा टीकाकाराणां गुरुवराः श्री**विजयसेन**सूरीश्वराः श्री**वस्तुपाल**मन्त्रिणः कुलगुरवः आसन् । अत एव मन्त्रीश्वरा पूज्यान् प्रति परमभक्तिमान् आसीत् । **पुरातनप्रबन्ध**संग्रहगतेन प्रबन्धेन ज्ञायते यद् श्रीमद्**उदयप्रभ**सूरीश्वराणां प्रारम्भिके संयमजीवने तेषां विद्याध्ययनार्थं मन्त्रीश्वरेण समग्रस्य भारतस्य प्रत्येकं कोणेभ्यः चित्वा चित्वा पण्डिताः आहूताः आसन् । चाचरनाम्नः कस्यचित् कथाकारस्य कथाकथनशैलीं मुनिवराः यथा ज्ञातुं शक्नुयुः तदर्थं सहस्रशः सुवर्णमुद्राः मन्त्रीश्वरेण व्ययिताः आसन् । मन्त्रीश्वरैः कृतानां विविधानां सङ्घयात्राणां प्रशस्त्यादिकं रचितमाचार्यैः ।

मन्त्रीश्वरः सर्वेषु कार्येषु गुरूणां मार्गदर्शनेनैव प्रवर्त्तते स्म । एकदा शत्रुञ्जयतीर्थस्य द्रव्यव्यवस्थावलोकनार्थं तत् एकः मुनिवरः नियुक्तः । किन्तु कालादिदोषात् स साध्वाचारे शिथिलः जातः । शत्रुञ्जयं गतः मन्त्रीश्वरः यदा एतद् ज्ञातवान् तदा स्वदोषपश्चात्तापी स मुनिवरः अनशनं स्वीकृतवान् । धवलक्कं प्रति पुनरागतः मन्त्रीश्वरः आचार्येभ्यः एतद् ज्ञापितवान् । तदा श्री**उदयप्रभ**सूरिभिः कथितमितः परं द्रव्यव्यवस्थावलोकनाय कस्यापि मुनेः योजनं न कर्तव्यम् । यतः तत्र तादृशस्य आत्मार्थिनोऽपि मुनेः आचारशैथिल्यं जातमतः इतरेषां का कथा ? एवं मन्त्रीश्वरस्य जीवने पूज्यानां प्रभावातिशयः पूज्यानां जीवने च मन्त्रीश्वरस्य भक्त्यतिशयः निश्चीयते ।

### ५.३. टीकाकर्त्तॄणां कवनम् :-

एतां टीकां विहाय एतेषामेव पूज्यानामन्याः केचन एव रचनाः समुपलभ्यन्ते । तासु एकाऽस्ति **सुकृतकीर्त्तिकल्लोलिनी** । यस्यां मन्त्रीश्वरस्य **वस्तुपालस्य** सङ्घयात्रादिसुकृतानां प्रशस्तिः सविस्तृतं वर्णिता । एतादृशी एव किन्तु इतोऽपि अतीव विस्तृता कथानकादिमयी रचनाऽस्ति-**धर्माभ्युदय**महाकाव्यम् (अपरनाम-**सङ्घपतिचरित्रम्**) । तस्मिन् **वस्तुपालस्य** महायात्रया सह श्री**ऋषभजिना**दीनां कथानकानि अपि यथायोग्यं गुम्फितानि सन्ति । पूज्यानां नाम्ना, **नेमिनाथचरित्रम्** इत्यपि काचिद् रचना वर्ण्यते किन्तु सा वस्तुतः स्वतन्त्रा रचना नास्ति किन्तु धर्माभ्युदयमहाकाव्यादेव पृथक्कृतं तच्चरित्रमस्ति । जैनशासने विद्यमानेषु ज्योतिषविषयेषु ग्रन्थेषु सर्वाधिकतया प्रतिष्ठितः प्रमाणीकृतश्च ग्रन्थः अस्ति **आरम्भसिद्धिः**, एषाऽपि पूज्यानामेव रचना । एकतः अलङ्कारसादिमयानि काव्यानि रचयन् कविवरः अन्यतः एतादृशं शास्त्रमपि सृजेद् इत्येतत् निश्चयेन चेतश्चमत्कारि खलु । अन्तिमा च एषा प्रस्तुतैव **कर्णिकावृत्तिः** । तां विना एताः सर्वा अपि रचनाः प्रकाशिताः ।

६. **उपदेशमालाया: कर्णिकावृत्ति:** :-

अस्माभि: अग्रे दृष्टं यद् गाथा: खलु **धर्मदासगणिनाम्**, अर्थश्च **श्रीसिद्धर्षिवर्याणामेव** । अत: प्रस्तुतटीकारचनायां टीकाकाराणां हेतु: स्पष्ट एव । यथा - "**तेनैतामितिवृत्तसंस्कृतमयीमातन्वत: कर्णिकाम्**"....

तन्नाम, एतां कर्णिकाम्, कीदृशम् ? इतिवृत्तसंस्कृतमयीम् । प्राकृतकथानकानि तु पूर्वं रचितानि वर्तन्ते एव । संस्कृतकथानकगुम्फनार्थमेव अयं प्रयास: । तथाऽपि केषुचित्स्थलेषु टीकाकारै दत्तं विवरणं पूर्वटीकात: नितान्तं विस्तृतं विशिष्टं च । यथा- १०-११ गाथाया: टीकायां धर्माचार्यस्य गुणसम्पद्वर्णनम् । कुत्रचित् स्वकीयं चिन्तनमादौ दत्त्वा पश्चाद् वृद्धै: कृता व्याख्या दर्शिता यथा गा० २१३ । टीकाया: श्लोकमानमस्ति-१२२७४ । अस्या: टीकाया: रचनात: प्रागेव **धर्माभ्युदय**-महाकाव्यस्य रचना जाता । अत: तत्रत्यानि कानिचन कथानकानि अत्र बहुधा समानानि तत एव स्वीकृतानि वर्तन्ते । यथा ऋषभजिनकथा, भरतबाहुबलिकथा, जम्बूस्वामिकथा इत्यादि ।

किं कथ्येत अत्रत्यानां कथानकानां विषये ? कविवराणां शैली तावती प्रासादिकी अस्ति यथा कुत्रापि (पुनरपि, कुत्रापि) वाचक: तृप्तिं नानुभवेत् । मुख्यतया कविवरै: कृतस्य उत्प्रेक्षानुप्रासेत्यलङ्कारद्वयस्य उपयोगो नि:संशयमतुलनीयोऽस्ति ।

उत्प्रेक्षालङ्कारस्य कानिचन एव उदाहरणानि स्थालीपुलाकन्यायेन अत्र दर्श्यन्ते । यदा नवजातेन **वर्धमानप्रभुणा** अङ्गुष्ठेन मेरु: कम्पित: तदा कुलपर्वतानां शिखराणि भूमौ पतितानि अत्र कविवरा: उत्प्रेक्षन्ते-

"**यत्रेदृक् प्रभुरुत्पन्न: सा न वन्ध्या किमद्य भू: ?**
**प्रणिपेतुरितीवास्यां शिरांसि कुलभूभृताम् ॥३०७॥**" [महावीरचरिते]

यदा सङ्गमक: कालचक्रं क्षिपति तदा-

"**जिनस्त्वमज्जदाजानु तदा तद्घातपातत: ।**
**दुर्गतिस्थानिवोद्धर्तुं प्रस्थानप्रस्थितोद्यम: ॥८९१॥**" [महावीरचरिते]

यदा कोशायां लुब्ध: सिंहगुफावासी मुनि: चातुर्मास्यां नेपालं प्रति रत्नकम्बलाय गच्छति तदा-

"**नेपालाय चचालायमकालेऽपि द्रुतं तत: ।**
**पङ्के मज्जत्पदोऽभ्यस्यन्निवाधोगमनं मुनि: ॥१५१॥**" [स्थूलभद्रकथानके]

अधुना अनुप्रासविषयाणामुदाहरणानामवबोधात् प्राग् एक: अंश: ज्ञातव्य: अस्माभि: यद् काव्ये ते एव अलङ्कारा: सहृदयानामिष्टा ये रसस्य पोषका: स्यु:, रसानुभूतौ हान्युत्पादका अलङ्कारा नेष्टा: खलु सहृदयानां, किन्तु ये रसानुभूतौ हानिमनुत्पाद्य चमत्कृतिं जनयन्ति ते अनुप्रासादय: अभिमता: सहृदयानाम् ।

अत्र प्रस्तुतायां **कर्णिका**वृत्तौ अहं निश्चयेन कथयितुं शक्नुयाम् यद् अधुनावधि पठितेषु प्राय: २,००,००० श्लोकमितेषु भिन्नभिन्नेषु काव्येषु सर्वाधिकतया अनुप्रासस्य प्रयोग: दृष्टो मया । तथापि, एकस्मिन्नपि स्थले प्रयुक्तोऽनुप्रास: रसानुभूतौ हानिं न जनयति । एषा मन्मतेन सुनिश्चितं विरलतमा सिद्धि: । पुनश्च अत्र उदाहरणोपस्थापनेऽपि अहं भीतिमनुभवामि यद् तेन कविवराणां सिद्धिदर्शनं संकुचितं भविष्यति । यत: प्राय: प्रतितृतीयश्लोकं चित्तहारी अनुप्रास: राजते । अत: कियन्ति उदाहरणानि दद्याम ? तथापि उदाहरणद्वयं प्रदर्श्यते ।

यदा चण्डकौशिक: प्रभु दाहयितुं सूर्यं दृष्ट्वा स्वीयां दृशं क्षिपति तदा-

**विषाग्निकीलयाऽप्याप्तभानुसाहाय्यलीलया । तयाऽदाहि प्रभोरङ्गं**...एतावत्पठित्वा वयं चकिता भवेम यत् किमेतत् ? प्रभोरङ्गं तया दृष्ट्या अदाहि ? अग्रे कविवरा योजयन्ति-**कार्मणं, न तु चार्मणम्** ॥५२५॥ [महावीरचरिते]

तन्नाम प्रभोः कार्मणमङ्गमदाहि न तु चार्मणम् ।

यदा नन्दिषेणमुनिः वेश्याया गृहे धर्मलाभं ददाति तदा वेश्याया उक्तिं पश्यन्तु–

**वेश्याप्याह सहासेयं धर्मलाभेन किं मम । शर्मलाभं धनेनाहमीहेय प्रत्यहं यतः ॥५९॥** [नन्दिषेणकथानके]

अत्र प्रायः धर्मलाभस्थाने 'अर्थलाभ' शब्दः एव मनसि स्फुरेत् । किन्तु प्रासप्रेमिभिः सूरिभिः हृदयङ्गमः प्रासोऽत्र योजितः । एवंरीत्या बहुषु स्थलेषु तैः यत्शब्दचयनं कृतं तच्चेतश्चमत्कारि खलु ।

अपरं च केषुचित्स्थलेषु कविवरैः कृतं वर्णनं हृदयमार्द्रीकरोति यथा ऋषभप्रभोः निर्वाणानन्तरं भरतचक्रिणः स्थितिः विलापश्च, चण्डरुद्राचार्यस्य नूतनशिष्यस्य चिन्तनम्, वज्रस्वामिचरिते दुष्कालवर्णनमित्यादि ।

अत्रत्येषु कथानकेषु कुत्रचित् सर्वथा अज्ञातपूर्वः अंशः ज्ञायते अस्माभिः यथा – सत्यकिविद्याधरोऽपि वज्रस्वामिवत् साध्वीनामुपाश्रये तिष्ठन् एकादशाङ्गवित् जातः ।

यद्यपि एकः प्रयत्नः तादृशः अपि करणीयः स्यात् यस्मिन् उपदेशमालायाः विभिन्नासु टीकासु या याः कथाः सन्ति तासु कुत्र कुत्र मतान्तराणि सन्ति इति । स च करिष्यते केनचित्परिश्रमशीलेन अध्येत्रा इति आशास्महे ।

एवं सम्यग्दृष्ट्या उपदेशमालायाः **कर्णिकावृत्तिः** काव्यरसिकानाम्, ऐतिह्यगवेषकानाम्, कथारसपिपासूनां कृते च महत्युपलब्धिरूपेति सुनिश्चितम् ।

**७. उपसंहारः :-**

देवलोकीयमालातोऽपि विशिष्टायाः **उपदेशमालायाः** सौरभ्यम् अनन्ततो गत्वा तु न शब्दविषयं तत्तु अनुभवेनैव वेद्येत । सा देवमाला तु देवस्य च्यवनात् प्रागेव म्लाना भवति । इयमुपदेशमाला तु रचयितुः च्यवनानन्तरं २५००तोऽपि अधिकानि वर्षाणि अतीतानि चेदपि स्वसुरभिना दशापि दिशो वासयन्ती विराजते । न जाने अधुनावधि कियद्भिः साधकैः अस्या मालायाः सौरभेण कुवासनादौर्गन्ध्यं दूरीकृतं स्यात् ? तादृशी माला, स्वतः प्रायः चतुर्विंशतिगुणितप्रमाणया 'कर्णिकया' युक्ता (माला ५४४ गाथाप्रमाणा कर्णिका १२२७४ श्लोकप्रमाणा साधकानां कृते सुलभा भवेत् तदिदं कस्य परितोषाय न स्यात् ।

एतदवधेयमस्माभिः – यदेते एतादृशा वा अन्ये ग्रन्थाः न केवलं भाषाभ्यासाय कथावस्तुज्ञानाय, काव्यरसपानाय, ऐतिह्यसंकलनाय, प्रवचनकरणाय, चेतोविनोदाय वा पठनीया भवन्ति । अपि तु एतानि सर्वाणि आनुषङ्गिनि एव फलानि इति न विस्मर्तव्यम् । प्रधानं फलं तु तदेव यद् वयं श्रीऋषभवीरजिनवत् तपोनिष्ठाः श्रीगौतमगणधरवत् विनयप्रष्ठाः, श्रीसनत्कुमारवत् शरीररागबहिःष्ठाः, एवंकृत्वा च मोक्षनेदीष्ठाः भवेत ।

वयं सर्वे उपदेशमालां न केवलं कण्ठस्थामपि तु आत्मस्थां कृत्वा यावच्छीघ्रं शाश्वतसौरभ्यमयं परमपदं प्राप्नुयाम इत्येष एक एव शुभाभिलाषः ।

**पूज्याचार्यविजययोगितिलकसूरीश्वरचरणरेणुः**
**मुनिः श्रुततिलकविजयः ।**

●●●

# ઉપદેશમાલા કર્ણિકાવૃત્તિસંપાદન-સંશોધનની વેળાએ યત્કિંચિત્

શ્રીમાન્ પૂ.**ધર્મદાસ**ગણિવરે રચેલ **ઉપદેશમાળાગ્રંથ**ને શ્રીમાન્ પૂ.**ઉદયપ્રભ**સૂરિવિરચિત **કર્ણિકાવૃત્તિ** સાથે નવ હસ્તલિખિત પ્રતોના આધારે સંપાદિત સંશોધિત કરીને તત્ત્વજિજ્ઞાસુવર્ગ સામે પ્રસ્તુત કરતાં ઘણો આનંદ થાય છે.

જેમ શ્રી **શય્યંભવાચાર્યજી**એ સ્વપુત્ર મનક માટે **'દશવૈકાલિકસૂત્ર'**ની રચના કરી છે તેમ શ્રી**ધર્મદાસગણિ**એ સ્વપુત્ર **રણસિંહ**ને ભવિષ્યમાં ઉપયોગી બનશે એમ અવધિજ્ઞાનથી જોઈને-જાણીને **ઉપદેશમાળાગ્રંથ**ની રચના કરી છે.

ઉપદેશમાલાગ્રંથ અને ગ્રંથકાર શ્રી**ધર્મદાસગણી** માટે જૈનસંઘ સુપેરે પરિચિત છે તે અંગે અહીં વિશેષ ઉલ્લેખ કરવો નથી પરંતુ ઉપદેશમાળા ગ્રંથ ઉપરની **'કર્ણિકા'**વૃત્તિ જે અદ્યાવધિ અપ્રકાશિત હતી તે પ્રકાશિત થઈ રહેલ છે તેથી આ અવસરે વૃત્તિકારશ્રીનો પરિચય આપવો જરૂરી લાગે છે.

**નાગેન્દ્રગચ્છીય પૂજ્યાચાર્યવર્ય ઉદયપ્રભસૂરિમહારાજ :-**

નાગેન્દ્રગચ્છના [1]**વિજયસેનસૂરિ**મહારાજના શિષ્યરત્ન અને મહામંત્રી **વસ્તુપાલ**ના ગુરુ છે. તેમને વસ્તુપાલમંત્રીએ સૂરિપદથી સમલંકૃત કરાવેલા હતા. તેમણે **સુકૃતકીર્તિકલ્લોલિની** નામનું પ્રશસ્તિકાવ્ય રચ્યું છે તેમાં વસ્તુપાલ અને તેજપાલનાં સુકૃત્યો-ધાર્મિકકાર્યો અને યશનો ગુણાનુવાદ કર્યો છે. વસ્તુપાલે શત્રુંજયની યાત્રા કરી તે પ્રસંગે આ કાવ્ય રચાયું લાગે છે. વસ્તુપાલે પોતે બંધાવેલા ઇંદ્રમંડપમાં એક મોટી પથ્થરની તકતી ઉપર તે કોતરાવ્યું હતું. આમાં કાવ્યત્વના ઊંચા ગુણો હોવા ઉપરાંત ઐતિહાસિક દૃષ્ટિએ આપણને ઘણી માહિતી મળે છે. અરિસિંહના સુકૃતસંકીર્તન કાવ્યની માફક આમાં પણ વસ્તુપાલની વંશાવલી આપેલી છે અને ચાપોત્કટ (ચાવડા) અને ચૌલુક્યવંશના રાજાઓનું વર્ણન આપ્યું છે.

વિશેષમાં ઉક્ત સૂરિજીએ બહુ મોટા ગ્રંથો રચ્યા છે :-

(૧) **ધર્માભ્યુદયમહાકાવ્ય** વસ્તુપાલના યાત્રા પ્રસંગે 'લક્ષ્મ્યંક' રચ્યું છે. તેનું બીજું નામ **સંઘાધિપતિચરિત્ર**મહાકાવ્ય છે. તેમાં પ્રથમ તથા છેલ્લા સર્ગમાં વસ્તુપાલ તથા તેના ગુરુ અને બીજા જૈનાચાર્યો સંબંધી ઐતિહાસિક વૃત્તાંત છે, બાકીના ભાગમાં આદિનાથ અને નેમિનાથ વગેરે તીર્થંકરોના ચરિત્રો છે. પૂ. મલધારી **નરચંદ્રસૂરિ**મહારાજે તેને સંશોધ્યું છે.

(૨) **આરંભસિદ્ધ** - આ જ્યોતિષનો અદ્‌ભુત ગ્રંથ છે.

(૩-૪) **ષડશીતિ** અને **કર્મસ્તવ** એ બે કર્મગ્રંથો ઉપર ટિપ્પન રચેલ છે.

(૫) **ઉપદેશમાલાકર્ણિકાવૃત્તિ** - વિ.સં. ૧૨૯૯માં પૂ. ધર્મદાસગણિકૃત ઉપદેશમાલા ઉપર **ઉપદેશમાલાકર્ણિકા** નામની ટીકા ધોળકામાં રચી પૂર્ણ કરેલ છે.

(૬) **શબ્દબ્રહ્મોલ્લાસ** - અપૂર્ણ-૪૬ ગાથા ખેતરવસીભંડાર પાટણમાં છે.

(જૈ.સા.સં.ઈ. નવી આ. પેરા / ૫૫૩-પૃ. ૨૫૬)

**કર્ણિકાવૃત્તિ અંગે :-**

શરુઆતમાં જ ગાથા ૨-૩માં **આદિજિન** અને **ચરમજિન**ને મંગલાચરણરૂપે નમસ્કાર કરીને ત્યારપછી વૃત્તિકારે કવિવરશ્રી ૬૭૧ શ્લોકોમાં **આદિજિનચરિત** અને ૧૧૯૦ શ્લોકોમાં **વીરજિનચરિત** વિશાળ રીતે વર્ણવેલ છે. એમાં પ્રથમ આદિજિનચરિતમાં આદિનાથપ્રભુ શત્રુંજયગિરિ ઉપર પધારે છે ત્યાં કવિવરશ્રીએ શત્રુંજયગિરિનું વર્ણન કરતાં બે શ્લોકોમાં જે ઉત્પ્રેક્ષા કરી છે તે અતિ અદ્‌ભુત છે. જેમ કે,

**"अथ प्रथमसर्वज्ञः स विज्ञाय महाद्भुतम् । तमद्रिमिह माहात्म्यनिधानमिव पिण्डितम् ॥६१२॥**

**समारोहन्महामोहद्रोहाय भवभाजिनाम् । शत्रुवित्रासनायेव कुञ्जरं वीरकुञ्जरः ॥६१३॥"**

૬૨૧થી ૬૩૧ શ્લોકોમાં શત્રુંજયગિરિનું અતિ સુંદર માહાત્મ્ય વર્ણવ્યું છે, ત્યારપછી શ્લોક-૬૩૨માં **આદિનાથ** પ્રભુ **પુંડરીક**ને કહે છે કે,

---

૧. મંત્રીશ્વરવસ્તુપાલના કુલગુરુ નાગેંદ્રગચ્છના વિજયસેનસૂરિએ રેવંતગિરિરાસો સં. ૧૨૮૭ આસપાસ રચ્યો છે. (જૈ.સા.સં.ઇ. નવી આવૃત્તિ પેરા / ૫૦૫)

**''अतः शमसुधाकुण्ड ! पुण्डरीक ! त्वयाऽस्यताम् । अस्मिन् धराधरे सिद्धिलोलुभैः साधुभिः समम् ॥६३२॥''**

સ્વશિષ્ય માટે 'શમસુધાકુણ્ડ' આ વિશેષણનો પ્રયોગ પ્રભુની પરમોચ્ચકક્ષાને સૂચવે છે અને શિષ્યે પણ કેવી સમતા આત્મસાત્ કરી હશે કે ત્રણલોકના નાથ પ્રભુ આવા વિશેષણથી તેમને નવાજે છે. પ્રભુના વચનથી પુંડરીકસ્વામી અનેક સિદ્ધિકાંક્ષી સાધુઓ સાથે શત્રુંજયગિરિ ઉપર અનશન સ્વીકારે છે અને ચૈત્ર સુદ-૧૫ના પુંડરીકસ્વામીને કેવલજ્ઞાનની પ્રાપ્તિ થાય છે તે વખતે પુંડરીકાદ્રિ ઉપર ભરતમહારાજા આવે છે તેનું વર્ણન સુંદર પ્રાસવાળા શ્લોકથી કવિએ કર્યું છે -

**''मुमुक्षुपुण्डरीकस्य पुण्डरीकस्य निर्वृतौ । नृपुण्डरीको भरतः पुण्डरीकाद्रिमागमत् ॥६४७॥''**

ભરતમહારાજા ત્યાં રત્નમય ચૈત્ય કરાવે છે અને પુંડરીકસ્વામીની મૂર્તિ સહિત યુગાદિ જિનનાથની પ્રતિમા ભરાવે છે, તે ચૈત્યનું વર્ણન અતિસુંદર ઉપમા દ્વારા કવિ વર્ણવે છે -

**''तत्र रत्नमयं चैत्यमुदितं मुदितो व्यधात् । उदयाद्रिशिरश्चुम्बिरविबिम्बविडम्बकम् ॥६४८॥**

**जितस्तेनैव चैत्येन प्रभया सुरभूधरः । प्रस्वेदबिन्दुसन्दोहं धत्ते तारावलिच्छलात् ॥६४९॥''**

ત્યારપછી પ્રભુ પોતાનો નિર્વાણકાળ નજીક જાણીને દસ હજાર સાધુઓ સાથે અષ્ટાપદપર્વત ઉપર જાય છે. ત્યાં પ્રભુ અનશન સ્વીકારે છે ૬૬૩થી ૬૭૦ શ્લોકોમાં મન, વચન, કાયાના યોગોનું રુંધન, શૈલેશીકરણ વગેરે પ્રક્રિયા દ્વારા પ્રભુના નિર્વાણનું અનુપમ વર્ણન કરેલ છે. બીજા પણ ૧૦ હજાર મહાત્માઓ ક્ષપકશ્રેણી ઉપર આરોહણ કરીને પ્રભુની જેમ મુક્તિને પામ્યા. આદિજિનચરિતનો અંતિમ શ્લોક માલિની છંદમાં રોચક આપેલ છે -

**''प्रथममयमुदारां प्राप्य सम्यक्त्वलक्ष्मीम् , तदनु मनुजवर्गस्वर्गसाम्राज्यलक्ष्मीम् ।**

**अथ निरुपमसम्यग्ज्ञानचारित्रलक्ष्मीम् , त्रिभुवनपतिराप श्रेयसीं शर्मलक्ष्मीम् ॥६७१॥''**

આ રીતે ત્રિભુવનપતિ શ્રેયઃકારી એવી મોક્ષલક્ષ્મીને પામ્યા.

**મહાવીરજિનચરિત**માં વીરપરમાત્માના ૧થી ૨૭ ભવોનું વર્ણન, પ્રભુની ૧૨ાા વર્ષની ઘોર સાધનાનું વર્ણન, પ્રભુની મોક્ષપ્રાપ્તિપર્યંતનું વર્ણન ૧૧૯૦ શ્લોકોમાં અત્યંત સંવેદના પ્રગટાવે છે તો ચિત્તને પરિપ્લાવિત પણ કરે છે અને પ્રભુ પ્રત્યે અત્યંત અહોભાવ જન્માવે છે. ૨૫મા ભવમાં જિતશત્રુરાજાનો પુત્ર યુવરાજ નંદન વૈરાગ્યરૂપી જળથી સીંચાયેલો હોવાથી જન્મથી ૨૪ લાખ વર્ષ વીત્યા પછી પોટ્ટિલાચાર્ય પાસે દીક્ષા સ્વીકારે છે. ૧ લાખ વર્ષ સુધી સુખ-દુઃખમાં સમાન રહીને તપ તપે છે. વીશસ્થાનક તપની આરાધના કરી તીર્થંકરનામકર્મ ઉપાર્જે છે. શ્લોક-૧૭૩થી ૧૭૯ આ વર્ણન કરીને ત્યારપછી કવિવરે શ્લોક ૧૮૦થી ૨૫૭માં **નંદનઋષિ**ની અંતિમ દશધા આરાધનાનું વર્ણન વિશિષ્ટ રીતે કર્યું છે, તેમાં પાંચ નમસ્કારનું માહાત્મ્ય બતાવતાં કવિ જણાવે છે કે,

**''पञ्चाननवधूः पञ्चपरमेष्ठिनमस्कृतिः । विपद्द्विपान्निपात्योच्चैरत्रामुत्रापि त्रायते ॥२५२॥**

**अवसाने मुनीशानां सर्वपूर्वविदामपि । समग्रमंहः संहर्तुं नमस्कारः परं क्षमः ॥२५३॥**

**तीक्ष्णदात्री विपद्वल्लेः संप्रदात्री च सम्पदाम् । सा हि पुण्यश्रियां धात्री परमेष्ठिनमस्कृतिः ॥२५४॥**

**भावतः स्मरतः पञ्चपरमेष्ठिनमस्कृतिम् । यस्य प्राणाः प्रतिष्ठन्ते मृतोऽपि हि स जीवति ॥२५५॥''**

ભાવથી પંચપરમેષ્ઠિના સ્મરણનું મહત્ત્વ અહીં કવિએ સૂચવ્યું છે અને પછી કહ્યું છે કે આ દસ પ્રકારની આરાધના મહોદયને કરનારી છે. (પ્રત્યેક આત્માર્થીએ અવશ્ય આ દશધા આરાધના વાંચીને ભાવન કરવા યોગ્ય છે. **પુણ્યપ્રકાશ**ના સ્તવનમાં વર્ણવેલી દશધા આરાધનાના મૂળ બીજકો અહીં સંપ્રાપ્ત થાય છે.)

**ચંદનામહાસતી**ના પ્રસંગના વર્ણનમાં માથે મૂંડી, પગમાં બેડી, છઠ્ઠતપધારિકા ચંદનાને છઠ્ઠ તપના પારણે સૂપડાના ખૂણે અડદના બાકુળા ભોજન માટે આપીને ધનાવહશ્રેષ્ઠી બેડી તોડનારને બોલાવવા જાય છે તે વખતે ચંદના વિચારે છે કે સંવિભાગ કર્યા વગર કેવી રીતે ભોજન કરું ? બહાર દૃષ્ટિ કરે છે જગત્પૂજ્ય પ્રભુ વિચરતાં વિચરતા ચંદનાના આંગણે પધારે છે. પ્રભુને જોઈને ચંદનાએ જે સ્તુતિ કરી છે તે સ્તુતિના શબ્દો પરમ આહ્લાદની અનુભૂતિ કરાવે છે (શ્લોક-૧૦૬૭થી ૧૦૭૮)

ચંદના પ્રભુના કરમાં અડદના બાકુળા વહોરાવે છે ત્યારપછી શ્લોક ૧૦૮૪થી ૧૦૮૬માં કવિના ઉદ્‌ગારો જે નીકળે છે તે અતિસુંદર છે -

**''स्तुत्यस्तस्याः प्रभावोऽयमुत त्रिजगतीगुरोः । अथोभयस्य कुल्माषाः पणोऽजनि शिवस्य यत् ॥१०८४॥**

**केनापि कृतिना ज्ञाता सिद्धान्नस्यापि बीजता । सिद्धत्वफलदा क्षेत्रे पुण्यवल्ली यतो भवेत् ॥१०८५॥**

**दीप्ते माषाहुतीर्दत्त्वा तपोहुतभुजि प्रभोः । विपन्मयीं निजग्राह शाकिनीं सा नरेन्द्रसूः ॥१०८६॥''**

ચંદનાએ પ્રભુની દીપ્ત એવી તપરૂપી અગ્નિમાં અડદના બાકુળાની આહુતિ આપીને વિપત્તિરૂપી શાકિનીને વશ કરી. છેલ્લે કવિવર શ્રીઉદયપ્રભસૂરિમહારાજ વીરજિનચરિતના અંતિમ શ્લોકમાં કહે છે કે પરમાત્મા વીરની જેમ મહાસાધુઓએ પણ પરીષહ-ઉપસર્ગસહન કરવામાં નિષ્પ્રકંપ આશયવાળા થવું જોઈએ -

**''इत्थं निष्ठुरदुष्करे तपसि वा सृष्टेषु दुष्टैर्जनैः । दुर्वृत्तेषु तितिक्षयाऽथ भगवान् वीरोऽतिधीरो यथा ॥**

**किं चात्युग्रमहोपसर्गपवनास्कन्दैरकम्प्राशयः । प्राज्ञैस्तद्वदिहापरैरपि सदा भाव्यं महासाधुभिः ॥११९०॥''**

આ રીતે પ્રથમજિન અને ચરમજિનના ચરિત્રમાંથી નમૂનારૂપે બે વાનગીનો આસ્વાદ વર્ણવ્યો છે. ગ્રંથના પ્રત્યેક કથાનકો વિવિધતાસભર છે તેના અંશોનું પણ વર્ણન કરીએ તો એક સ્વતંત્ર પુસ્તક બની જાય તેવું છે.

શ્રી**વજ્રસ્વામી**ના કથાનકમાં ગૌતમસ્વામી અષ્ટાપદપર્વત ઉપર જાય છે અને ત્યાં ચોવીસ જિનની જે સ્તુતિ કરે છે તે ઉપજાતિવૃત્તાષ્ટક આપેલ છે. (શ્લોક ૧૯થી ૨૬ પૃ. ૧૪૭)

ગાથા - ૧૭૯ની ટીકામાં આપેલ મરુદેવીનું દૃષ્ટાંત '**મરુદેવીસ્તોત્રમ્**'રૂપે વસંતતિલકાષ્ટક કવિએ રચ્યું છે (શ્લોક ૧થી ૮ પૃ. ૩૩૩)

ગાથા - ૧૮૦માં જણાવેલ ચાર **પ્રત્યેકબુદ્ધ**ના દૃષ્ટાંતો ૭૧૨ શ્લોકોમાં વિશાળ રીતે આપ્યાં છે.

ગાથા - ૧૯૧માં **મથુરામંગુ**કથાનક ઉપજાતિછંદના ૨૦ શ્લોકમાં આપેલ છે. (શ્લોક ૧થી ૨૦ પૃ. ૩૭૦)

ગાથા - ૧૫૩માં **જંબૂસ્વામિ**ચરિત ૮૪૩ શ્લોકોમાં વિસ્તૃત રીતે વર્ણવેલ છે એનો અંતિમ શ્લોક શાલિની છંદમાં છે.

**સંપાદન અંગે :-**

સંપાદકીય લખાણમાં જણાવ્યા મુજબ આજથી ૧૬/૧૭ વર્ષો પૂર્વે આ ગ્રંથનું કાર્ય પ્રારંભ્યું હતું. પ્રવચનપ્રભાવક પૂ.આ. શ્રી**કીર્તિયશસૂરીશ્વરજી**મહારાજની શુભભાવનાનુસાર હિતોપદેશગ્રંથમાલાના કાર્યની પૂર્ણાહુતિ પછી આવી ૧૩મા સૈકાની શ્રેષ્ઠ અપ્રકાશિત કૃતિના સંશોધનનો અવસર પ્રાપ્ત થયેલ, તે વખતે મેટર જે કંપોઝ થયેલું હતું તે પ્રથમ પ્રૂફનું કાર્ય પ્રારંભ્યું, લિટીએ લિટીએ અનેક અશુદ્ધ પાઠો, ત્રુટિત પદચ્છેદો, ખંડિત સમાસો આ બધું દૃષ્ટિગોચર થવા લાગ્યું, આમ છતાં સંપૂર્ણ ગ્રંથની ટીકા તો એક વાર શુદ્ધ કરી પરંતુ કથાનકો ક્લિષ્ટ પ્રાસાનુપ્રાસવાળા હોવાથી પદચ્છેદો વગેરેના જોડાણ માટે અન્ય પ્રતિઓની આવશ્યકતા જણાઈ તે વખતે ફક્ત એક પ્રતિ ખંભાતની KH. શરૂઆતમાં સામે હતી તે પ્રતિમાં પણ અનેક અશુદ્ધ પાઠો, ભ્રષ્ટપાઠો વગેરે દૃષ્ટિગોચર થવાથી પૂ.આ.શ્રીને વાત કરી અને તેઓશ્રીના પ્રયત્નથી બીજી ચાર પ્રતિઓ જેની સંજ્ઞા B. L. H. K. આપેલ છે તે પ્રાપ્ત થઈ. પં. **અમૃતભાઈ પટેલ**ના સહયોગથી ફરીવાર બીજું પ્રૂફ ચાર પ્રતિઓના આધારે શુદ્ધ કરવાનો પ્રયત્ન કર્યો અને મેળવ્યું, શુદ્ધપાઠો વાચનામાં લઈ અન્ય પ્રતિઓના પાઠભેદો કેટલાક નોંધ્યા. ૫૦% જેવું શુદ્ધિકરણનું કાર્ય આ બીજા પ્રૂફમાં થયું. એ ચાર પ્રતિઓમાં પણ B. સિવાયની ત્રણે પ્રતિઓમાં ઢગલાબંધ અશુદ્ધિઓ રહેલી હતી તેથી કાર્ય ઊભું રાખ્યું અને હજુ બીજી પ્રતિઓ માટે તપાસ કરવા જણાવ્યું, તે અંગે તપાસ કરતા પાટણ-સંઘવીપાડાની ડા. ૨ની તાડપત્રીય પ્રત છે એમ જાણ થઈ તેથી એ પ્રતિની ઝેરોક્ષ નકલની પણ ઝેરોક્ષ નકલ કોબાથી પ્રાપ્ત થઈ. કુલ હવે ૬ પ્રતિઓ થઈ, ૬ પ્રતિઓમાંથી પાઠભેદો નોંધવા - તાડપત્રીયના આધારે વાંચના મેળવવી આ બધું એકલા હાથે અશક્ય પ્રાયઃ જણાયું અને વધુ માંદગીમાંથી પસાર થવાનું બન્યું તેથી અતિ પરિશ્રમસાધ્ય કાર્ય જણાવવાથી કાર્ય આગળ વધી ન શક્યું, બે પ્રૂફોનું જે વાચન કરેલું અને પાઠભેદો નોંધેલા તે એમને એમ પડ્યા રહ્યા.

ફરી વર્ષો પછી આ કાર્યનો અવસર સાંપડ્યો. પૂ.આ.શ્રી અમદાવાદ પધાર્યા અને પરમારાધ્યપાદશ્રી **રામચંદ્ર-સૂરીશ્વરજી**મહારાજની દીક્ષાશતાબ્દીનો અવસર આવ્યો. આ અવસરે આ ગ્રંથને પ્રકાશિત કરવાની ભાવના વ્યક્ત કરી અને કહ્યું કે કર્ણિકાનું કાર્ય હવે આગળ વધારો. મેં કહ્યું કે આપ મને છ પ્રતિના પાઠભેદો નોંધાવી આપો. તો એના આધારે અશુદ્ધપાઠોનું શુદ્ધિકરણ થઈ શકે તેથી આ કાર્ય અંગે પૂ.આ.શ્રીએ પાલિતાણા ચાતુર્માસમાં પોતાની ભાવના વ્યક્ત કરી અને પૂ.સાધ્વીજીશ્રી **ત્રિલોચનાશ્રીજીમ.**ના શિષ્યરત્ના સ્થવિરા સા.શ્રી **જયમાલાશ્રીજીમ.**ના પરિવારના એક સાધ્વીજીમહારાજે એ કાર્ય સહર્ષ સ્વીકાર્યું. તાડપત્રીય સહિત કુલ ૬

પ્રતો અને ત્યારપછી મળેલી ભાંડરકર-પૂનાની ૩ પ્રતો કુલ ૯ પ્રતો[૨] પ્રાપ્ત થયેલી. એ નવે પ્રતોના પાઠભેદો તેમણે નોંધ્યા.

તાડપત્રીય અને શુદ્ધ પ્રાયઃ B. પ્રતિ સાથે વાચના મેળવતા ગયા એમાંથી ઘણા શુદ્ધપાઠો મળવા લાગ્યા, પૂના-ભાંડારકરની C. પ્રતમાંથી પણ શુદ્ધપાઠો મળ્યા એના આધારે યથાશક્ય શુદ્ધિકરણ શક્ય બન્યું. ફરી નવેસરથી **વિરતિગ્રાફિક્સવાળા અખિલેશમિશ્રા** પાસે મેટર કંપોઝ કરાવ્યું. પાઠભેદો અલગ અને સંપાદકીય ટિપ્પણીઓ જે નવી બનાવી છે તે બંનેને અલગ અલગ સેટીંગ કરાવી ફરી નવેસરથી પ્રૂફવાચન કરીને પાંચ પાંચ પ્રૂફો સુધી પસાર થયા પછી આજે આ ગ્રંથ ચતુર્વિધ શ્રીસંઘના ચરણે અર્પણ કરતાં પરમાનંદની અનુભૂતિ થાય છે. બેશક, ગ્રંથને પરિપૂર્ણ કરવા માટે મુખ્ય ફાળો શ્રુતોપાસિકા એ સાધ્વીજી મહારાજનો છે. એમને અનેકશઃ અભિનંદન અર્પું છું. હું તો માત્ર આ ગ્રંથના કાર્યમાં નિમિત્તરૂપ છું. હા, દુઃખ જરૂર થાય છે કે સંપૂર્ણ ગ્રંથનું કાર્ય મારાથી શક્ય ન બન્યું, પરંતુ સંપાદકીય લખાણમાં જણાવ્યા મુજબ અનેક સાધુ-સાધ્વીજીભગવંતોના સહયોગથી આ કાર્ય પરિપૂર્ણ થઈને છ પરિશિષ્ટો વગેરેથી સમૃદ્ધ ગ્રંથ પ્રકાશિત થઈ રહ્યો છે તેનો આનંદ જરૂર વ્યક્ત કરું છું.

**કાંઈક હૈયાની વાત :-**

(૧) પૂ. ક્ષમાશ્રમણ **ધર્મદાસગણિની** (ગ્રંથકારશ્રીની) મૂળકૃતિ ગાથા-ગાથાર્થમાંથી પસાર થવાનું બન્યું છે. સંપાદકીયમાં જણાવ્યા મુજબ મુંબઈ-મોતીશા લાલબાગસંઘમાં **ઉપદેશમાળા** ગ્રંથના પ્રવચનો થયા ત્યારે શ્રોતાગણને ગાથાઓ કંઠસ્થ કરવા પુસ્તકની આવશ્યકતા ઊભી થઈ. પૂ.આ.શ્રીએ મને જાણ કરી અને ફક્ત ૪ દિવસના ટુંકા ગાળામાં એ કાર્ય કરી આપવાનો સુઅવસર પ્રાપ્ત થયો છે.

(૨) **ઉપદેશમાલા** ગ્રંથ ઉપરની પૂ.**સિદ્ધર્ષિગણિની હેયોપાદેયાટીકા** એના પણ સંશોધનાદિ કાર્યમાંથી પસાર થવાનું બન્યું છે. બે હસ્તપ્રતોના આધારે સળંગ ૧ વર્ષ સુધી એ કાર્યથી ભાવિત થવાનું બન્યું છે. (એ ગ્રંથ **શ્રુતજ્ઞાનપ્રસારકસભાથી** પ્રકાશિત થયેલ છે.)

(૩) **ઉપદેશમાલાકર્ણિકા**ના વૃત્તિકાર પૂ.શ્રી**ઉદયપ્રભસૂરિ**મહારાજની અન્ય રચના **ધર્માભ્યુદયમહાકાવ્ય** અને વૃત્તિકારશ્રીની રચેલી પ્રશસ્તિઓ **સુકૃતકીર્તિકલ્લોલિન્યાદિપ્રશસ્તિસંગ્રહ**માં છે એ બંને ગ્રંથના નવીનસંસ્કરણોનું સંપાદન કરેલ હોવાથી એ કાર્યમાંથી પણ પસાર થવાનું બન્યું છે. (આ બંને ગ્રંથો **ભદ્રંકરપ્રકાશન**થી પ્રકાશિત થયેલ છે.)

અંતે વૃત્તિકારશ્રીની અતિ અદ્ભુત કહી શકાય એવી આ **ઉપદેશમાલાની 'કર્ણિકા'** વૃત્તિના કાર્યમાંથી પણ અનેકવાર પસાર થવાનું બન્યું છે. તે માટે પૂ.આચાર્યશ્રી **કીર્તિયશસૂરિજી**મ.નો ઉપકાર માનું તેટલો ઓછો છે કે મને આવી તેરમા સૈકાની શ્રેષ્ઠ કૃતિના કાર્યમાં સહયોગી બનવાની અમૂલ્ય તક આપી.

પ્રાંતે અંતરની એક જ ભાવના વ્યક્ત કરું છું કે ચતુર્વિધ સંઘમાંથી સૌ કોઈ પ્રાકૃત-સંસ્કૃતભાષાના અભિજ્ઞજનો આ ગ્રંથને વાચવાનું રાખે. જેમને પ્રૌઢશૈલિના કથાનકોના અર્થો ન બેસે તેવાઓ ટીકાગ્રંથને વાચે અને પ્રાકૃત-સંસ્કૃતભાષાના અનભિજ્ઞજનો મૂળગાથા અને અર્થનો સ્વાધ્યાય કરવાનું રાખે તો અત્યંત પરિશ્રમસાધ્ય કરેલો અમ સૌનો આ પ્રયાસ સફળતા પામશે. વિશેષ તો વિદ્વજ્જનોને પ્રાર્થના કે પૂર્વના મહાપુરુષો પ્રત્યે ભક્તિથી પ્રેરાઈને આ સંશોધનક્ષેત્રમાં પા પા પગલી આગળ વધી છું. સંશોધન-સંપાદનાદિ કાર્યમાં જે કાંઈ પણ ક્ષતિઓ જણાય તે અંગે જરૂરથી જાણ કરજો.

સંપૂર્ણ ગ્રંથના કાર્ય દરમ્યાન અનેકવાર સંવેગગર્ભિત વૈરાગ્યના ભાવો ઉલ્લસિત થયા છે. ગ્રંથને ફરી ફરી વાંચ્યા જ કરીએ એવો અહેસાસ અનુભવાયો છે. આવા ભાવોની અનુભૂતિ ગ્રંથ વાંચનાર સૌ કોઈને અનુભવાશે એવી અનુપમ આ કૃતિ છે અને એ સંવેગગર્ભિત વૈરાગ્યના ભાવો દ્વારા અસંગદશાને પામી ક્ષપકશ્રેણી ઉપર આરોહણ કરી હું અને સૌ કોઈ લઘુકર્મી ભવ્યાત્માઓ કૈવલ્યદશાને પામી અંતે પરમસુખમય શાશ્વતસ્થાનમાં સાદિ અનંતભાગે વાસ કરીએ એ જ શુભકામના !

**વિ.સં. ૨૦૬૯, ફાગણ સુદ-૨**
**બુધવાર, તા. ૧૩-૩-૨૦૧૩**

**— પરમારાધ્યપાદપૂ.આ.શ્રીરામચંદ્રસૂરિમ.ના.**
**સામ્રાજ્યવર્તી તથા પ્રવર્તિની**
**પૂ.સા. રોહિતાશ્રીજીમ.ની શિષ્યા**
**સાધ્વી ચંદનબાલાશ્રી**

---

૨. સંપાદન-સંશોધનમાં ઉપયોગમાં લીધેલ નવે હસ્તપ્રતોનો પરિચય તથા નવે હસ્તપ્રતોના આદિ - અંત પત્રો આગળ પૃષ્ઠ ૨૩થી ૩૪ ઉપર આપવામાં આવેલ છે.

# સંપાદન-સંશોધનકાર્ય માટે ઉપયોગમાં લીધેલ હસ્તપ્રતોનો પરિચય

સંપાદન-સંશોધનનું આ કાર્ય હાથ ઉપર લીધા પછી અલગ-અલગ જ્ઞાનભંડારોમાંથી અમને ઉપદેશમાલા**'કર્ણિકા'**-વૃત્તિની કુલ નવ હસ્તપ્રતો પ્રાપ્ત થયેલ છે અને તે નવે પ્રતોનો આ સંપાદન-સંશોધનકાર્યમાં ઉપયોગ કરેલ છે.

(૧) **શ્રીહેમચંદ્રાચાર્યજૈનજ્ઞાનભંડાર-સંઘવી પાડાનો ભંડાર-પાટણ**ની તાડપત્રીય પ્રત છે. અમને પ્રાપ્ત થયેલ નવે પ્રતોમાં સૌથી પ્રાચીન આ પ્રત છે, પરંતુ આ પ્રત જીર્ણ-ખંડિત છે વિ.સં. ૨૦૫૮માં નાકોડાતીર્થમાં આગમસંશોધક મુનિરાજશ્રી **જંબૂવિજયજી**મ.સા. દ્વારા કરાવેલ આચાર્યહેમચંદ્રસૂરિજ્ઞાનમંદિર-પાટણની ઝેરોક્ષ પ્રતની પણ ઝેરોક્ષ નકલ **કૈલાસ-સાગરસૂરિજ્ઞાનભંડાર - કોબા**થી અમને પ્રાપ્ત થયેલ છે.

આ પ્રતમાં ઉપર કુલ પત્ર-૨૫૭ જીર્ણ ડા. ૨ આ રીતે લખેલું છે. આ પ્રત જીર્ણ થયેલ હોવાથી આદિનો ભાગ નથી ગાથા-૧માં વચનાતિશયનું વર્ણન છે ત્યાંથી પાઠ મળે છે - अतिशयस्त्रैलोक्यगुरुत्वाद् वचनातिशय इति... અંતે ગાથા ૩૨૯ સુધીનો પાઠ મળે છે. ઝેરોક્ષ નકલમાં ૨૪૦ પેજ નંબર સુધીનું લખાણ છે. તેમાં પણ વચ-વચમાં અમુક પત્રો પ્રાપ્ત થતાં નથી. ખંડિત પ્રત હોવાથી ઘણા સ્થાનોમાં અનુસંધાન થઈ શક્યું નથી. દરેક પત્ર ઉપર ૫ થી ૬ પંક્તિઓ લખેલી છે અંતિમ પ્રતિલેખન સંવત્-પુષ્પિકા વગેરે આ પ્રતના મળ્યાં નથી. સંભવિત ૧૪મા સૈકામાં લખાયેલી આ પ્રત લાગે છે. આ પ્રતમાંથી ઘણા શુદ્ધપાઠો મળ્યાં છે તેથી સંપાદનમાં આ તાડપત્રીયપ્રત ઘણી ઉપયોગી બનેલ છે. આ પ્રતની અમે P. સંજ્ઞા આપેલ છે.

(૨) આ પ્રતનો લે.સં. ૧૪૭૦ છે, પત્રો ૨૪૯-૨૫૦ પૂર્વાર્ધ છે. દરેક પત્ર ઉપર ૧૪ પંક્તિઓ છે અંતિમપત્ર ૨૫૦ પૂર્વાર્ધ ઉપર ૯ પંક્તિઓ છે. દરેક પત્ર ઉપર મધ્યમાં ચોરસમાં ગોળ ચંદ્રક આપેલ છે. ઉપરોક્ત તાડપત્રીય પ્રત પછી અમને પ્રાપ્ત થયેલ બીજી આઠ પ્રતોમાં સૌથી પ્રાચીન અને બીજી સાતપ્રતોની અપેક્ષાએ ઘણી શુદ્ધવાચનાવાળી આ પ્રત છે. આજથી લગભગ ૧૭ વર્ષો પૂર્વે આ પ્રતની ઝેરોક્ષ નકલ મળેલ હોવાથી તે અંગે કયા જ્ઞાનભંડારમાંથી આ પ્રત મળી છે તેની નોંધ ન હોવાથી એ માહિતી આપી શકાતી નથી. પ્રતની ઝેરોક્ષનકલ ઉપર કોઈ ભંડારનું નામ કે ક્રમાંકનંબર કશું નોંધેલું નથી. આ પ્રત શુદ્ધપ્રાયઃ હોવાથી અને સંપૂર્ણ હોવાથી સંપાદનમાં આ પ્રત વધુ ઉપયોગી બનેલ છે. ગ્રંથના અંતે આ પ્રતમાં પુષ્પિકા પ્રાપ્ત થાય છે તે અમે વાચનામાં આપેલ છે - ''यो राज्यं प्रथमं चकार''....પુષ્પિકાના આ શ્લોકમાં પૂ.આ.**નન્નસૂરિ**મ.નો ઉલ્લેખ છે - સંવત્ ૧૪૭૦માં જેઠ વદ-૧૦-બુધવારના **સ્તંભનતીર્થ**માં મહારાજાધિરાજ મુલતાન શ્રી**અહિમ્મદ**ના રાજ્યમાં શ્રી**વૃદ્ધતપાપક્ષ**માં શ્રી**જયશેખરસૂરિ**શિષ્ય શ્રી**જિનરત્નસૂરિ**ના અભ્યાસ માટે આ પ્રત લખાયેલી છે. આ પ્રતની અમે B. સંજ્ઞા આપેલ છે. ગ્રન્થાગ્ર ૩૭૧૪, સર્વગ્રન્થાગ્ર ૧૨૨૭૪ છે.

(૩) **શ્રીજૈનશાલાસ્થાપિતનીતિવિજયજૈનપુસ્તકાલય** મુ. **ખંભાત**ની આ પ્રત છે. પોથી ૪૫૪ પ્રત ક.૩૬૬૩ છે. લે.સં. ૧૪૭૮ છે. કુલ પત્ર ૪૦૫ છે દરેક પૃષ્ઠ ઉપર ૯ પંક્તિઓ છે, વચ્ચે ચોરસ ખાલી જગ્યા રાખેલ છે. અક્ષરો સુવાચ્ય-મોટા છે પરંતુ સંપૂર્ણ પ્રતમાં ઘણી અશુદ્ધિઓ છે.

અંતિમ પત્ર ઉપર પ્રતિલેખકની આ પ્રમાણે પ્રશસ્તિ છે સં. ૧૪૭૮માં ભાદરવા સુદ-૧૩ને રવિવાર, **વસુનક્ષત્ર**માં **પિપ્પલગચ્છ**માં શ્રી**ગુણદેવસૂરિ**એ આ પ્રત લખેલ છે. એક બાજુ હાંસીયામાં આડી લાઈનમાં આ રીતે ઉલ્લેખ છે -

श्रीक्षणमायुक्षेम० श्री**वीरप्रभसूरि** ॥

ગ્રંથાગ્ર ૩૭૧૪, સર્વગ્રંથાગ્ર ૧૨૦૨૭ છે. આ પ્રતની KH. સંજ્ઞા રાખેલ છે.

સંપાદકીય લખાણમાં જણાવ્યા મુજબ આ પ્રત ઉપરથી લિપ્યંતર કરેલી પ્રેસકોપી અમને મળેલ. પ્રેસકોપી કરનારે પદચ્છેદો વગેરે બરાબર કરેલ નહીં તેથી એ લખાણ ઉપયોગમાં આવ્યું નહીં. ફરી આ પ્રતની મૂળ હસ્તપ્રત મેળવી એના આધારે વાચના તૈયાર કરી આમ છતાં લહીયાની ભૂલના કારણે અનેક અશુદ્ધપાઠો, ખંડિતપાઠો આ પ્રતમાં હોવાથી એ વાચનાના આધારે મેટર કંપોઝ કરાવી જ્યારે સંશોધનનું કાર્ય પ્રારંભ્યું ત્યારે અન્ય પ્રતિઓની આવશ્યકતા જણાઈ ત્યારપછી બીજી પ્રતો માટે તપાસ કરાવતાં અન્ય અન્ય જ્ઞાનભંડારોમાંથી તાડપત્રીય સહિત કુલ ૫ પ્રતોની ઝેરોક્ષ નકલો પ્રાપ્ત થઈ અને છેલ્લે હમણાં બે વર્ષો પૂર્વે પૂના-ભાંડારકરની ૩ પ્રતોની ઝેરોક્ષ નકલો પ્રાપ્ત થઈ. સંપૂર્ણ વાચના ફરીથી તાડપત્રીય અને

સં.૧૪૭૦માં લખાયેલી B. પ્રતના આધારે મેળવીને શુદ્ધ કરેલ છે, તેમજ અન્ય પ્રતિઓમાંથી પણ જ્યાં વધુ શુદ્ધ પાઠો જણાયા તેનો વાચનામાં સમાવેશ કર્યો છે. બીજા પાઠભેદો નીચે ટિપ્પણીમાં આપ્યા છે.

અમને પ્રાપ્ત થયેલ ૯ પ્રતોમાંથી એક માત્ર ખંભાતની આ પ્રતની મૂળનકલ મળેલ છે બાકીની દરેક પ્રતોની ઝેરોક્ષ નકલો મળેલ છે અને એના આધારે આ સંપાદન-સંશોધનકાર્ય કર્યું છે.

(૪) **લાલભાઈદલપતભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર-અમદાવાદ**ની આ પ્રત છે. પ્રત ઉપર લા.દ.ભે. ૧૧૦૫૭ ક્રમાંક છે. લે.સં. ૧૫૩૮ છે કુલ પત્ર ૨૧૮ છે. પત્ર-૧ પૂર્વાર્ધ ઉપર ૧૬ લિટી છે, ત્યારપછી દરેક પત્રો ઉપર ૧૭ લિટી છે વચ્ચે અષ્ટકોણાકારે ખાલી જગ્યા છે.

અંતિમ પત્ર ૨૧૮ પૂર્વાર્ધ ઉપર સં. ૧૫૩૮ વર્ષે ફાગણ વદિ ૧૦ ગુરુવારે આ રીતે લે.સં. આપેલ છે ત્યારપછી પ્રતિલેખનની પ્રશસ્તિ શરૂ થાય છે તે આ પ્રમાણે છે -

श्रीप्राग्वाटवंशे परी० वइजाभार्या लांपूसुत परी० सहदेसुश्रावकेण भार्या.....આટલું લખાણ છે ત્યારપછીનું ૨૧૮ ઉત્તરાર્ધ પૃષ્ઠ પ્રાપ્ત થયું નથી તેથી ખંડિત પાઠ મળે છે.

ગ્રંથાગ્ર - ૧૨૨૭૪ છે. આ પ્રતની અમે L. સંજ્ઞા રાખેલી છે.

(૫) **હેમચંદ્રાચાર્ય જૈનજ્ઞાનમંદિર-લહેરુવકીલજૈનજ્ઞાનભંડાર-પાટણ**ની આ પ્રત છે. પ્રતક્ર. ૧૦૩૫૧, ડા. ૨૨૨ છે. લે.સં. ૧૫૪૭ છે. કુલ પત્રો ૨૫૪ છે. આ પ્રતની ઝેરોક્ષ નકલ પણ પૂ.આગમસંશોધક **જંબૂવિજયજી**મ.ના આયોજનની છે અને તે ઝેરોક્ષ નકલની પણ ઝેરોક્ષનકલ **કૈલાસસાગરસૂરિજ્ઞાનભંડાર-કોબા**થી અમને મળેલ છે. દરેક પૃષ્ઠ ઉપર ૧૩ લિટી છે. અક્ષરો સુવાચ્ય છે. દરેક પૃષ્ઠ ઉપર વચ્ચે અષ્ટકોણાકાર ખાલી જગ્યા છે.

અંતિમ પત્ર-૨૫૪ ઉપર આ પ્રમાણે પ્રતિલેખનસંવત્ અને પ્રતિલેખકનો ઉલ્લેખ છે -

સં. ૧૫૪૭ - ફાગણ સુદ - ૨ ગુરુવારે **પાટણ**માં ઉપદેશમાલાવૃત્તિ મુનિ **કર્મચંદ્રે** લખી છે. આ પ્રત્રની અમે H. સંજ્ઞા આપેલ છે.

(૬) **કૈલાસસાગરસૂરિજ્ઞાનમંદિર-કોબા**ની આ પ્રત છે તેનો ક્ર. ૧૧૯૮૭ છે. આ પ્રત ઉપર વિજયલક્ષ્મીજ્ઞાનમંદિર આગરા ૯૦૩ આ પ્રમાણેનો સીક્કો અંતિમપત્ર ઉપર છે. કુલ પત્ર ૨૪૪-૨૪૫ પૂ. છે. દરેક પત્રો ઉપર વચ્ચે અષ્ટકોણાકાર ખાલી જગ્યા છે. દરેક પૃષ્ઠ ઉપર ૧૫ લિટી છે. અંતિમપત્ર ૨૪૫ પૂ. ઉપર છેલ્લી લિટીમાં **मुक्तिसागर**वाचनाय એવો ઉલ્લેખ છે આ સિવાય પ્રતલેખન સંવત્ કે લખનાર-લખાવનારનો કોઈ ઉલ્લેખ કરેલ નથી. આ પ્રતની અમે K. સંજ્ઞા આપેલ છે.

**ખાસ નોંધ** - ઉપદેશમાલાગ્રંથની जाव य लवणसमुद्दो....ગાથા-૫૪૩ અને अक्खरमत्ताहीणं....ગાથા-૫૪૪ અને આ બે ગાથાની વૃત્તિ ફક્ત આ એક પ્રતમાં પ્રાપ્ત થાય છે. આ સિવાયની કુલ ૭ પ્રતોમાં "इत्थ समप्पइ इणमो....ગાથા ૫૪૨ સુધીની વાચના પ્રાપ્ત થાય છે.

(૭) **ભાંડારકર ઓ.આર.-પૂના**ની આ પ્રત છે પ્રત નં. ૧૧૦૩, લે.સં. ૧૫૬૬, કુલ પત્રો-૨૪૩ છે. દરેક પેજ ઉપર ૧૫ લિટી છે, અષ્ટકોણમાં વચ્ચે ચંદ્રક છે પ્રતની સ્થિતિ સારી છે. અંતિમ પૃષ્ઠ ૨૪૩ ઉપર ૩ લિટી છે તેમાં પ્રતિલેખન સંવત્ અને પ્રતિલેખકનો આ રીતે ઉલ્લેખ પ્રાપ્ત થાય છે -

સં. ૧૫૬૬ કાર્તિક વદિ ૮ રવિવારે, **અણહિલ્લપુર**નગરમાં મોઢજ્ઞાતીય ચાતુર્વેદ પં. **મહાવએ** પ્રત લખેલ છે. આ પ્રતની અમે A. સંજ્ઞા રાખેલ છે. ગ્રંથાગ્ર ૩૭૧૪, આદિતો ગ્રંથાગ્ર ૧૨૩૭૪ છે.

(૮) **ભાંડારકર ઓ.આર. - પૂના**ની આ પ્રત છે. પ્રત નં. ૩૬૯ છે, કુલ પત્રો ૧૭૪, દરેક પેજ ઉપર ૧૯ લિટી છે.

અંતમાં....मालाविशेषवृत्तौ तृतीयः परिवेषः संपूर्णः ॥ सर्वसंख्याग्रंथाग्रं १२२७४ ॥ छ ॥ संपूर्णा कर्णिकाख्या उपदेशमालाविशेषवृत्तिः ॥ લેખનસંવત્ કે પ્રતિલેખકનું નામ વગેરે કોઈ ઉલ્લેખ આ પ્રતમાં કરેલ નથી. અક્ષરો ઝીણા-મરોડદાર સુવાચ્ય A. D. H. L. K. KH. આ છ પ્રતોની અપેક્ષાએ આ પ્રતમાં વધુ શુદ્ધ વાચના જણાય છે. સંપાદનમાં શુદ્ધપાઠો આ પ્રતમાંથી પણ પ્રાપ્ત થયાં છે. સંભવતઃ ૧૭મા સૈકામાં લખાયેલી પ્રત લાગે છે. આ પ્રતમાં ૧૭૦ A-B થી ૧૭૪ A-B સુધીના પત્રો ખવાઈ ગયેલા હોવાથી ખંડિત પ્રાપ્ત થાય છે. આ પ્રતની અમે C સંજ્ઞા રાખેલ છે.

(૯) **ભાંડારકર ઓ.આર. - પૂના**ની આ પ્રત છે પ્રત નં. ૯૦, લે.સં. ૧૬૮૧, કુલ પત્રો ૨૪૧-૨૪૨ પૂ. દરેક પૃષ્ઠ ઉપર ૧૫ લિટી છે. અંતિમ પત્ર ૨૪૧ ઉપર ૧૪ લિટી છે. દરેક પત્રો ઉપર અષ્ટકોણાકારમાં વચ્ચે ૪-૪ અક્ષરો લખ્યા છે - સુંદર રીતે તેની ગોઠવણી કરેલ છે. અંતિમપત્ર ૨૪૨ પૂ. ઉપર ૫ લિટીમાં ગ્રંથ લખાવનારની પ્રશસ્તિનો આ રીતે સારાંશરૂપે ઉલ્લેખ છે -

સં. ૧૬૮૧માં શ્રાવણ સુદ-૬ના હસ્તનક્ષત્રમાં સૌરાષ્ટ્રદેશમાં **દ્વીપબંદર**ના રહેવાસી **સોમસી** અને **શ્રીબાઈ**ના સુપુત્ર **સૂરજી**એ આ પુસ્તક તપાગચ્છાધિરાજ **શ્રીવિજયદેવસૂરીશ્વર**ના રાજ્યમાં લખાવ્યું છે અને **શ્રીકલ્યાણકુશલગણિ**ના શિષ્ય **શ્રીદયાકુશળગણિ**-તેમના શિષ્ય **ભક્તિકુશલગણિ**ને સ્વપુણ્યની પુષ્ટિ માટે વાંચવા અર્પણ કર્યું છે. આ પ્રતની અમે D. સંજ્ઞા રાખેલ છે.

આ રીતે A. C. D. ત્રણે પ્રતો ભાંડારકર-પૂનાથી પ્રાપ્ત થયેલ છે અને જરૂર જણાઈ ત્યાં આ ત્રણે પ્રતોનો ઉપયોગ કરીને પાઠશુદ્ધિ કરેલ છે અને ત્રણેના પાઠભેદો પણ નોંધ્યા છે.

**નવ હસ્તપ્રતોનો સંક્ષિપ્ત પરિચય**

| સંજ્ઞા | પ્રતનંબર | લે.સં. | ભંડાર |
|---|---|---|---|
| P. | પ્રત નં.૨ | સંભવિત ૧૪મો સૈકો | હેમચંદ્રાચાર્ય જ્ઞાનભંડાર-પાટણ |
| B. | — | સં. ૧૪૭૦ | — |
| KH. | પોથી ૪૫૪/પ્રત ૩૬૬૩ | સં. ૧૪૭૮ | નીતિવિજય જૈનપુસ્તકાલય-ખંભાત |
| L. | ક્ર. ૧૧૦૫૭ | સં. ૧૫૩૮ | લાલભાઈ દલતપભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર |
| H. | ક્ર. ૧૦૩૫૧/ડા.૨૨૨ | સં. ૧૫૪૭ | લહેરુવકીલ જૈનજ્ઞાનભંડાર-પાટણ |
| K. | ક્ર. ૧૧૯૮૭ | સંભવિત ૧૬મો સૈકો | કૈલાસસાગરસૂરિજ્ઞાનમંદિર-કોબા |
| A. | પ્રત નં. ૧૧૦૩ | સં. ૧૫૬૬ | ભાંડારકર - પૂના |
| D. | પ્રત નં. ૯૦ | સં. ૧૬૮૧ | ભાંડારકર - પૂના |
| C. | પ્રત નં. ૨૬૯ | સંભવિત ૧૭મો સૈકો | ભાંડારકર - પૂના |

આ પ્રતો અમને હેમચંદ્રાચાર્યજ્ઞાનભંડાર-પાટણ, નીતિવિજયપુસ્તકાલય-ખંભાત, લાલભાઈ દલપતભાઈ ભારતીય-સંસ્કૃતિ વિદ્યામંદિર - અમદાવાદ, કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા તથા ભાંડારકાર ઓ.આર. ઇન્સ્ટિટ્યૂટ-પૂનાથી પ્રાપ્ત થયેલ છે. ગ્રંથાલયોના સદુપદેશક સર્વે પૂજ્યો, વહીવટદારો અને મેળવી આપનારા સુશ્રાવકોની શ્રુતભક્તિની અમે અનુમોદના કરીએ છીએ. શ્રુતભક્તિમાં કરેલ સહાયનિમિત્તે આભાર દર્શાવીએ છીએ.

**— સંપાદક**









**ઉપદેશમાલા વૃત્તિ કર્ણિકા P.**

શ્રી હેમચંદ્રાચાર્ય જૈનજ્ઞાનભંડાર, સંઘવી પાડાનો ભંડાર-પાટણ

પત્ર-૨૫૭, ડા. ૨, જીર્ણ ખંડિત તાડપત્રીય પ્રત, પાતા. સંઘવીજીર્ણ-૨

આયોજક : પૂ. ગુરુદેવ મુનિરાજ શ્રી ભુવનવિજયાન્તેવાસી

જમ્બૂવિજયજી મ.સા. સં. ૨૦૫૮, સ્થળ : નાકોડાજી તીર્થ

ઝેરોક્ષ નકલ : કોબા-કૈલાસસાગરસૂરિ જ્ઞાનભંડાર





ઉપદેશમાલા કર્ણિકાવૃત્તિ સહિત **B.**

પત્ર-૨૪૯ - ૨૫૦A, લે.સં. ૧૪૭૦

આદિ : ।।र्द० ।। अर्हं । ॐ नमः परमब्रह्मणे ।।

चिदानंदाय ऋषभस्वामिने भरताय च ।
श्रीगौतमसुधर्म्माभ्यां श्रीगीर्भ्यां गुरवे नमः ।।१।।

અંત : इत्याचार्य श्रीउदयप्रभदेवसंघटितायां उपदेशमालायाः
कर्णिकायां विशेषवृत्तौ तृतीयः परिवेषः सम्पूर्णः ।।
ग्रन्थाग्रं ३७१४ एतावता च सम्पूर्णा उपदेशमालायाः
कर्णिकाख्याविशेषवृत्तिरिति ।।श्रीः।। शुभं भवतु ।।
आदितो ग्रंथ १२२७४ सर्वसंख्या ।।

पुष्पिका - यो राज्यं प्रथम चकार जलधिं कृत्वाऽवधिं लीलया,
शस्त्रैर्वैरिगणं निहत्य सकलं बाह्यं ततोऽभ्यन्तरम् ।।
मत्वा जेतुमशक्यमेनमधिकैस्तैर्मात्रया साहसी;
यश्चक्रे वशिनामभूदिह पुरा श्रीनन्नसूरिप्रभुः ।।१।।

संवत् १४७० वर्षे ज्येष्ठ वदि १० बुधेऽद्येह श्रीस्तम्भतीर्थे महाराजादिराजमुलतानश्रीअहिम्मदस्येह विजयराज्ये श्रीवृद्धतपापक्षे श्री जयशेखरसूरिशिष्य श्रीजिनरत्नसूरीणां पठनाय।।

श्रीरस्तु।।





ઉપદેશમાલા કર્ણિકાવૃત્તિઃ **KH.**

શ્રી જૈનશાલાસ્થાપિતનીતિવિજયજૈનપુસ્તકાલય મુ. ખંભાત

પોથી ૪૫૪, પ્રત ૩૬૬૩, લે.સં. ૧૪૭૮, પત્ર-૪૦૫

આદિ : ।।र्द० ।।अर्हं ।। ॐ नमः परमब्रह्मणे ।।

चिदानंदाय ऋषभस्वामिने भरताय च ।
श्रीगौतमसुधर्म्माभ्यां श्रीगीर्भ्यां गुरवे नमः ।।

અંત : इत्याचार्यश्री उदयप्रभदेवसंघटितायां उपदेशमालायाः
कर्णिकायां विशेषवृत्तौ तृतीयः परिवेषः संपूर्णः ।।
ग्रंथाग्रं ३७१४ एतावता च संपूर्णा उपदेशमालायाः
कर्णिकाख्या विशेषवृत्तिरिति आदितो ग्रंथाग्रं १२०२७।।

मंगलमस्तु ।। सं. १४७८ वर्षे भाद्रपदमासे शुक्लत्रयोदश्यां रवौ वसुभे
पिप्पलगच्छे श्रीगुणदेवसूरीणामालेखि पुस्तकं । श्री क्षणमायुक्षेमं श्रीवीरप्रभसूरि









**ઉપદેશમાલા પ્રકરણ કર્ણિકાવૃત્તિ સહ L.**

લાલભાઈ દલપતભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર લા.દ.ભે. ૧૧૦૫૭, પત્ર ૨૧૮, લે.સં. ૧૫૩૮

ક.મૂ. ધર્મદાસગણી, વૃ. ઉદયપ્રભદેવસૂરિ નાગેંદ્રગચ્છીય આદિ : ।।દ૦।। ऐँ नमः परमब्रह्मणे ।।

અંત : इत्याचार्यश्रीउदयप्रभदेवसूरिसंघट्टितायां कर्णिकाख्यायामुपदेशमालाविशेषवृत्तौ तृतीयः परिवेषः संपूर्णः ।। सर्वसंख्याग्रंथाग्रं १२२७४ संपूर्णा कर्णिकाख्या उपदेशमालाविशेषवृत्तिः समाप्ता ।।

संवत् १५३८ वर्षे फागुण सुदि १५ भोमे ।।

।।द०।। स्वस्ति संवत् १५३८ वर्षे फाल्गुनवदि १० गुरौ श्री प्राग्वाटवंशे परी० वइजाभार्या लांपूसुत परी० सहदेसुश्रावकेण भार्या...





**ઉપદેશમાલાપ્રકરણ કર્ણિકાવૃત્તિસહિત H.**

લહેરુવકીલજૈનજ્ઞાનભંડાર, હેમચંદ્રાચાર્ય જૈનજ્ઞાનમંદિર-પાટણ
પ્રત ક. ૧૦૩૫૧ - ડા. ૨૨૨, પૃ. ૨૫૪, લે.સં. ૧૫૪૭
આયોજક : પૂ. ગુરુદેવ મુનિરાજ શ્રી ભુવનવિજયાન્તેવાસી
જમ્બૂવિજયજી મ.સા. સં. ૨૦૫૮ સ્થળ : નાકોડાજી તીર્થ
ઝેરોક્ષ નકલ : કોબા-કૈલાસસાગરસૂરિ જ્ઞાનભંડાર

આદિ : ।।र्द०।। अर्ह । ॐ नमः परमब्रह्मणे ।।

चिदानंदाय ऋषभस्वामिने भरताय च ।
श्रीगौतमसुधर्माभ्यां श्रीगीर्ष्या गुरवे नमः ।।१।।
અંત : संवत् १५४७ वर्षे फागुणसुदि २ गुरौ ।।
श्रीपत्तने श्रीउपदेशमालावृत्ति लिलिखे ।
मुनिकर्म्मचंद्रेण श्री ।। यादृशं पुस्तके दृष्टं तादृशं लिखितम् ।।





**ઉપદેશમાલાકર્ણિકા K.**

શ્રી કૈલાસસાગરસૂરિજ્ઞાનમંદિર - કોબા ક્ર.૧૧૯૮૭

વિજયધર્મલક્ષ્મીજ્ઞાનમંદિર આગરા-૯૦૩ પત્ર-૨૪૫

આદિ : अर्हं नमः

અંત : इत्याचार्यश्रीउदयप्रभदेवसंघट्टितायां उपदेशमालाया कर्णिकायां विशेषवृत्तौ तृतीयपरिवेषसंपूर्णः ।।

सर्वतो इत्येकाक्षरगणनेन ग्रंथाग्रश्लोकसंख्या १२१६८/१८

श्री शुभं भवतु कल्याणमस्तु ।। मुक्तिसागरवाचनाय ।।





**ઉપદેશમાલા સકર્ણિકા A.**

ભાંડારકર ઓ.આર.ઈન્સ્ટીટ્યૂટ-પૂના

પત્ર-૨૪૩ પ્રત નં. ૧૧૦૩, લે.સં. ૧૫૬૬

આદિ : ।।र्द ०।। श्री गुरुभ्यो नमः।। ।। अर्हं ।।

चिदानंदाय ऋषभस्वामिने भरताय च ।

श्रीगौतमसुधर्म्माभ्यां श्रीगीर्भ्यां गुरवे नमः ।।

અંત : इत्याचार्यश्रीउदयप्रभदेवसंघट्टितायां उपदेशमालायाः कर्णिकायां विशेषवृत्तौ तृतीयः परिवेषः संपूर्णः ।।

ग्रंथाग्रं ३७१४ ।। एतावता समं (सं)पूर्णा उपदेशमालाया कर्णिकाख्याविशेषवृत्तिरिति ।। आदितो ग्रंथाग्र १२३७४।।

संवत् १५६६ वर्षे कार्त्तिक वदि-८ रवौ दिने श्रीमदणहिल्लपुरे नगरे मोढज्ञातीयचातुर्वेद *पं० महावलिखितं ।।शुभं भवतु ।। कल्याणमस्तु।। ।। शिवमस्तु ।।*







**ઉપદેશમાલાકર્ણિકા D.**

ભાંડારકર ઓ.આર. ઈન્સ્ટીટ્યૂટ પૂના

પત્ર-૨૪૧ પ્રત નં. ૯૦, લે.સં. ૧૬૮૧

આદિ : ।।र्द०।। नमो जितायकाय ।।

અંત : इत्याचार्यश्रीउदयप्रभदेवसंघट्टितायां उपदेशमालायां कर्णिकायां विशेषवृत्तौ तृतीयष्परिवेषः संपूर्णः ।।

श्रीरस्तु ।। कल्याणमस्तु ।।

।। संवत् १६८१ वर्षे श्रावण सुदि ६ हस्तार्के । सौराष्ट्रजनपदे । द्वीपबंदिरवास्तव्य । सुश्रावका परमभक्त । वैराग्यवंत । दो० सोमसी । भार्या सुशीलवती । धर्मानुरागिणीबाई श्रीबाई । तयोः सुपुत्र दो० सूरजीकेनेदं पुस्तकं । सुपुण्यार्थं । लिखापितं तपागच्छाधिराजभट्टारक प्रभुभट्टारक श्री श्रीविजयदेवसूरीश्वरविजयराज्ये । सकलतार्किकचूडामणिपंडितोत्तंस पंडित श्री ५ श्रीकल्याणकुशलगणिशिष्य पंडितशिरोमणिपंडित श्री ३ श्रीदयाकुशलगणितच्छिष्यगणिभक्तिकुशलस्य स्वपुण्यपुष्ट्यै वाचनाय प्रदत्तं । वाच्यमानं चिरं जीयात् ।।

लेखकपाठकयोः ।। शुभं भवतु कल्याणमस्तु ।।श्रीरस्तु।। छ।। छ।। श्रीः।।





ઉપદેશમાલાકર્ણિકા C.

ભાંડારકર ઓ.આર.ઈન્સ્ટીટ્યુટ-પૂના

પત્ર-૧૭૪ પ્રત નં. ૩૬૯

આદિ : ।।द०।। नमः परमात्मने ।।

અંત : इत्याचार्यश्रीउदयप्रभदेवसूरिसंघट्टितायां उपदेशमालाविशेषवृत्तौ तृतीयः परिवेषः संपूर्णः ।। सर्वसंख्या ग्रंथाग्रं १२२७४ ।।

संपूर्णा कर्णिकाख्या उपदेशमालाविशेषवृत्तिः ।।

## कर्णिकावृत्तिसमन्विता उपदेशमालायाः

# विषयानुक्रमणिका


| विषयः | गाथाङ्कम् |
|---|---|
| **प्रथमः परिवेषः ॥** | |
| १. मङ्गलादिचतुष्टयसूचनम् ॥ | १ |
| २. प्रथमचरमतीर्थङ्करस्तुतिः ॥ | २ |
| ३. तेषां चरित्रद्वारेण तपःकर्मोपदेशः ॥ | ३ |
| ४. वीरप्रभुवत् क्षमा कर्तव्या ॥ | ४ |
| ५. प्रभोः निष्प्रकम्पता ॥ | ५ |
| ६. प्रथमगणधरोद्देशेन गुरुवचनश्रवणद्वारेण विनयोपदेशः ॥ | ६-७ |
| ७. गुरुगौरवम् ॥ | ८-९ |
| ८. गुरुस्वरूपम् ॥ | १०-११ |
| ९. गुरुगुणमार्गणायां हेतुः ॥ | १२ |
| १०. मानकषायजये चन्दनार्यादृष्टान्तेन साध्वीनां साधून् प्रति विनयोपदेशः ॥ | १३-१५ |
| ११. धर्मे लोके च पुरुषप्राधान्यख्यापने संवाहननृप-अङ्गवीरकथा ॥ | १६-१९ |
| १२. धर्मस्याऽऽत्मसाक्षिकत्वं न तु लोक-पङ्क्तिमात्रफलत्वम्-तत्र भरतचक्री प्रसन्नचन्द्रश्च दृष्टान्तौ ॥ | २० |
| १३. केवलवेषस्याऽप्रमाणता मनःशुद्धिरक्षणे उपयोगिता च ॥ | २१-२२ |
| १४. जीव एव स्वहितकर्त्ता, भावानुसारेण कर्मबन्धः ॥ | २३-२४ |
| १५. दुर्जेयाहङ्कारस्य परिहारोपदेशः ॥ | २५-२७ |
| १६. स्तोकहेतुना बोधार्हत्वे सनत्कुमारचक्रिकथा ॥ | २८ |
| १७. सर्वभावानां सुखस्य चानित्यत्वेन दुःखरूपत्वम् ॥ | २९-३० |
| १८. दुर्लभबोधिकत्वे ब्रह्मदत्त-उदायिनृपमारकदृष्टान्तः ॥ | ३१ |
| १९. तादृशाम् अधोगतिरूपविपाकः ॥ | ३२ |
| २०. कर्मणो दुर्वचत्वे जा सा सा सा कथा ॥ | ३३ |
| २१. अपराधक्षामणायां मृगावतीकथा ॥ | ३४ |
| २२. कषायजयो गुणाय ॥ | ३५ |
| २३. कषायाणामपायकारिता ॥ | ३६ |
| २४. कषायनिग्रहोपायभूतविषयपरित्यागे जम्बूः प्रभवश्च दृष्टान्तौ ॥ | ३७ |
| २५. परमघोरप्राणिप्रतिबोधे धर्ममाहात्म्ये चिलातीपुत्रकथा | ३८ |
| २६. दुर्वहप्रतिज्ञानिर्वहि ढण्ढणऋषिकथा ॥ | ३९ |
| २७. सर्वविषयप्रतिबन्धोपदेशः ॥ | ४० |
| २८. आपत्स्वपि दृढधर्मत्वं विधेयम्-तत्र च स्कन्दकाचार्यशिष्या दृष्टान्तः ॥ | ४१-४२ |
| २९. निर्विशेषं क्षमा कर्तव्या ॥ | ४३ |
| ३०. दुरनुचरतपश्चरणे विशिष्टकुलस्या-किञ्चित्करत्वम्-तत्र हरिकेशबलकथा ॥ | ४४ |
| ३१. संसारिजीवस्य नटसदृशत्वे कुलाभिमानः कुतः ? ॥ | ४५-४७ |
| ३२. सर्वस्यानवस्थितौ विवेकिनो मोक्षाङ्क्षा न तु धनाद्यभिलाषः-तत्र वज्रर्षिकथा ॥ | ४८-४९ |
| ३३. परिग्रहस्य सापायत्वे नैर्ग्रन्थ्यमेव श्रेयस्करम् ॥ | ५०-५२ |
| **द्वितीयः परिवेषः ॥** | |
| ३४. अभ्यन्तरग्रन्थकुलाभिमानत्यागे नन्दिषेण( वसुदेव )कथा ॥ | ५३-५४ |
| ३५. क्षमोपदेशे गजसुकुमालकथा ॥ | ५५-५६ |
| ३६. विनयोपदेशे चक्रवर्त्तिसाधुः ॥ | ५७-५८ |
| ३७. गुरुवचनम् अनुष्ठेयम्-गुरुवचनानादरे दोषदर्शने स्थूलभद्र-सिंहगुफावासिसाधुकथा ॥ | ५९-६१ |
| ३८. युवतिसङ्गप्रार्थनामात्रेऽपि दोषः ॥ | ६२-६४ |
| ३९. आलोचनापूर्वं निवर्त्तनाद् दोषशुद्धिः ॥ | ६५ |
| ४०. गुणेषु मत्सरिणां निर्विवेकतादोषः, तद्विषये पीठमहापीठर्षिकथा ॥ | ६६-६८ |
| ४१. परपरिवादे ऐहिकामुष्मिको दोषः ॥ | ६९-७० |
| ४२. विद्यमानदोषग्रहेऽपि दोषः एव ॥ | ७१ |
| ४३. आत्मस्तुत्यादिदोषपञ्चकदुष्टता ॥ | ७२ |
| ४४. परावर्णवादिनो दोषाधिक्याद् अद्रष्टव्यता ॥ | ७३ |
| ४५. ते च गुरूद्वेगकारकास्तेषां गुरुकुलवासेन न कोऽपि गुणः ॥ | ७४-७६ |
| ४६. सुविहितानां गम्भीरतावचनगुप्त्यादिगुणाः ॥ | ७७-८० |
| ४७. अज्ञानतपसोऽल्पफलत्वे संयमा-भावोन्मार्गप्रख्यापनम् ॥ | ८१ |
| ४८. बालतपस्विनां तपसोऽल्पफलत्वे तामलितापसकथा ॥ | ८२ |

४९. जिनवचनविधिज्ञा यथावस्थितपरिच्छेदात् प्राकृतलोकस्य दुर्वचनादीनि सहन्ते ॥ ८३
५०. मन्दबुद्धीनामसुन्दरेऽपि सुन्दरत्वबुद्धौ हेतुः ॥ ८४
५१. गृहिणामपि विवेकादुत्तरोत्तरफलावाप्तौ शालिभद्रकथा ॥ ८५-८७
५२. तस्य शरीरशोषणकष्टप्रस्तावाद्-अवन्तीसुकुमालकथा ॥ ८८
५३. सुविहितानां शरीरे निर्ममत्वम्, प्रव्रज्याफलम्, धर्मार्थं देहत्यागे मेतार्यकथा ॥ ८९-९१
५४. महर्षीणां समभावत्वम् ॥ ९२
५५. गुरुवचनश्रद्धानं सुखावहं ततश्च तदेव कार्यम् ॥ ९३-९६
५६. सुशिष्यस्तुतिः सुविनीतदुर्विनीतयोर्गुणदोषाः ॥ ९७-९८
५७. कारणादपवादसेविगुरुपरिभवदोषे दत्तकथा ॥ ९९
५८. गुरुप्रतिबन्धदार्ढ्ये सुनक्षत्रमहर्षिकथा ॥ १००
५९. भव्यसत्त्वा देवतामिव गुरुं पर्युपासते-तत्र केशि-प्रदेशिकथा ॥ १०१-१०३
६०. गुरुणा शिष्यः सम्यगनुशासनीयः ॥ १०४
६१. प्राणात्ययेऽप्यसत्यं न भाषितव्यम् , तत्र कालिकाचार्यकथा ॥ १०५
६२. वितथकथने बोधिलाभनाशः-तत्र मरीचिदृष्टान्तः ॥ १०६
६३. अल्पसंसारिणः प्राणसङ्कटेऽपि व्रते दृढता ॥ १०७
६४. आत्महिताचरन्तं प्रति अनुमोदनाऽपि बहुफला-तत्र बलदेव-रथकारक-मृगकथा ॥ १०८
६५. असद्विषयकष्टानुष्ठानमपि अल्पफलम्-तत्र पूरणश्रेष्ठिकथा ॥ १०९
६६. सर्वज्ञशासने यतनापूर्वम् अपवाद-सेव्यप्याराधकः-तत्र सङ्गमस्थविरकथा ॥ ११०
६७. निष्कारणनित्यवासे दोषाः ॥ १११-११२
६८. गृहस्थयुवतिसम्बन्धज्योतिषनिमित्तादि-दुरनुष्ठानैर्दोषाः, तत्र वारत्तर्षिकथा ॥ ११३-११६
६९. गुणेभ्यः प्रच्यावने स्तोकस्यापि प्रमादस्य बहुभावः ॥ ११७
७०. सदनुष्ठाने दृढतायां चन्द्रावतंसको राजा ॥ ११८
७१. यो विविधपरीषहान् सहते तस्यैव धर्मः ॥ ११९
७२. व्रतदार्ढ्ये सागरचन्द्रकथा-कामदेवकथा ॥ १२०-१२१
७३. अविवेकिनः कोपेनाभुक्तभोगा दुर्गतौ पतन्ति-भोजनप्रार्थककुपितद्रमककथा ॥ १२२
७४. प्रमादत्यागोपदेशः ॥ १२३
७५. प्रमादेषु दुरन्तौ रागद्वेषौ प्रथमं जेयौ तयोर्दोषा दुरन्तता च ॥ १२४-१२९
७६. रागद्वेषयोर्विकृतीभूतयोर्मानक्रोधयोः स्वरूपविपाकादि ॥ १३०-१३५
७७. क्षमोपदेशः-तत्र दृढप्रहारिकथा, सहस्रमल्लकथा ॥ १३६-१३८
७८. क्रोधावसरे अविवेकिनः-श्वानवृत्तिः विवेकिनश्च सिंहवृत्तिः ॥ १३९-१४१
७९. स्वजनस्नेहत्यागोपदेशः तत्र स्कन्दकुमारमहर्षिकथा ॥ १४२-१४३
८०. मातापितादिस्वजनानामिह अनर्थहेतुत्वम् ॥ १४४
८१. तत्र मातृद्वारे चुलनीकथा ॥ १४५
८२. तत्र पितृद्वारे कनककेतुकथा ॥ १४६
८३. तत्र भ्रातृद्वारे भरतचक्रिकथा ॥ १४७
८४. तत्र भार्याद्वारे सूर्यकान्ताकथा ॥ १४८
८५. तत्र पुत्रद्वारे कोणिककथा ॥ १४९
८६. तत्र सुहृद्द्वारे चाणक्यकथा ॥ १५०
८७. निजकस्नेहद्वारे परशुराम-सुभूमकथा ॥ १५१
८८. ईदृशे अव्यवस्थिते स्नेहे मुनिवृषभा नित्यमनिश्रया विहरन्ति, तत्रार्यमहागिरिकथा ॥ १५२
८९. व्रतिनां निर्लोभतायां जम्बूस्वामिकथा ॥ १५३
९०. गुरुनियन्त्रितगच्छे स्थातव्यम्-तत्र मेघकुमारकथा ॥ १५४
९१. गुरुकुलवासस्य दुष्करता तत्त्यागे च दोषबहुत्वम् ॥ १५५-१६१
९२. संविग्नानां सर्वापायपरिहारसामर्थ्यद्वारेण स्त्रीत्यागोपदेशः ॥ १६२-१६३
९३. सर्वविषयाणामपायहेतुत्वम्-तत्र सत्यकिकथा ॥ १६४
९४. साधूपास्तिपरस्य गुणानामविर्भावः, तत्र विनये दशार्ह( श्रीकृष्ण )कथा ॥ १६५
९५. विनयस्य फलम्, विनयेनाराध्यजनोपकारे चण्डरुद्रशिष्यकथा ॥ १६६-१६७
९६. सुशिष्याः जन्मान्तरेऽपि गुरोः पक्षपातिन एव तत्र अङ्गारमर्दकगुरुकथा ॥ १६८-१६९

९७. लघुकर्मकाः स्तोकेन बुध्यन्ते-तत्र पुष्पचूलाकथा ॥ १७०
९८. मुनिः पर्यन्तकालेऽपि अविकलतपसंयमानुष्ठानकारी-तत्र अन्निकासुतकथा ॥ १७१
९९. भोगपरित्यागे कर्मलाघवं प्रमाणं न तु सुखदुःखे ॥ १७२-१७३
१००. लघुकर्मणां देहोऽपि सुत्यजः, अपराधिष्वपि क्षमा ॥ १७४-१७६
१०१. पापफलम् ॥ १७७-१७८

तृतीयः परिवेषः ॥

१०२. मरुदेव्यालम्बनेन प्रमादपोषकाणां निराकरणमप्रमादोपदेशश्च-तत्र प्रत्येकबुद्धकरकण्ड्वादिकथा ॥ १७९-१८१
१०३. इन्द्रियग्रामदुर्जेयत्वे सुकुमालिकाकथा ॥ १८२
१०४. आत्मदमनोपदेशः, अदान्तात्मा आत्मनो महतेऽनर्थाय ॥ १८३-१८६
१०५. अनात्मनीन ऐहिकस्वार्थभ्रंशः ॥ १८७
१०६. धृतिदुर्बला विवेकिनां दयास्पदम् ॥ १८८
१०७. इच्छाया दुरन्तत्वं तृप्तेश्च दुरापत्वम् ॥ १८९
१०८. विषयसौख्यं स्वप्नोपमम् ॥ १९०
१०९. सौख्ये आस्थां कुर्वतां दोषाः-तत्र मङ्गुसूरिकथा ॥ १९१
११०. आत्मशिक्षणम् ॥ १९२-१९६
१११. दुःखनिर्वेदोपदेशः ॥ १९७-२०९
११२. सर्वग्रहाणां प्रभवः कामग्रहः, तस्य स्वरूपः, तेषां दोषाः ॥ २१०-२१४
११३. प्राप्तधर्माणां शैथिल्येऽपायः ॥ २१५-२१६
११४. उत्तमानां गुणः ॥ २१७
११५. मुक्तिहेतवः ॥ २१८-२१९
११६. आरम्भवतां महाननर्थः ॥ २२०-२२१
११७. उत्सूत्राचारवतां संसर्गोऽपि न कार्यः, तस्य दोषादि, तत्र गिरिशुक-पुष्पशुककथा ॥ २२२-२२७
११८. कारणे शिथिलसाधुवन्दना ॥ २२८
११९. शिथिलसाधोस्तन्निवारणम्, सुविहितान् वन्दयतो दोषाः ॥ २२९
१२०. गृहिधर्माचारविधिः ॥ २३०-२४२
१२१. श्रावकगुणाः ॥ २४३-२४५
१२२. गुणवतां श्रावकाणां निर्वाण-विमानसौख्यानि न दुर्लभानि ॥ २४६
१२३. शिथिलाचारे गुर्वादौ विधिः, तत्र शैलक-पन्थककथा ॥ २४७
१२४. श्रुतनिधेरपि शीतलत्वं नासम्भाव्यम्, तत्र नन्दिषेणर्षिकथा ॥ २४८
१२५. कर्मशक्तिसमर्थनम्-तद्विषये पुण्डरीक-कण्डरीकज्ञातम् ॥ २४९-२५२
१२६. सङ्क्लिष्टताया निवर्त्तनं दुष्करम् ॥ २५३
१२७. विशुद्धिपदस्य दुर्लभतायां हेतुः, तत्र शशिप्रभ-सुरप्रभकथा उपनयश्च ॥ २५४-२५९
१२८. जिनवचनाकरणे महादोषः ॥ २६०-२६१
१२९. दुर्गतिहेतुभूता चेष्टा ॥ २६२-२६३
१३०. रागादिनिग्रहे ज्ञानप्राधान्यम् , अतः ज्ञातदातृपूज्यता-तत्र शिवपुलिन्दीयकथा, श्रेणिक-श्वपाकीयकथा ॥ २६४-२६६
१३१. गुरुनिह्नुवानानां दोषः, तत्र भागवतकाश्यपीयकथा ॥ २६७
१३२. परमोपकारित्वाद् गुरोर्दुष्प्रतिकारत्वम् ॥ २६८-२६९
१३३. सम्यक्त्वमहिमा ॥ २७०-२७१
१३४. मोक्षसाधने रत्नत्रयप्राधान्यम् ॥ २७२
१३५. प्रमादेन सम्यक्त्वमालिन्यम्, प्रमादत्यागोपदेशः ॥ २७३-२७६
१३६. स्वर्गसौख्यवर्णनम् ॥ २७७-२७८
१३७. नरकतिर्यङ्मर्त्त्यदेवगतिषु दुःखवर्णनम् ॥ २७९-२८७
१३८. संसारिणां दासतुल्यत्वम् ॥ २८८
१३९. धर्मज्ञानमेवाभिलिप्सूनां लक्षणम् ॥ २८९-२९०
१४०. विशिष्टसंहननाभावे धृतिबुद्धिसत्त्वेनोद्यमनीयं न तु प्रमादनीयम् ॥ २९१-२९३
१४१. प्रेक्षावता यतनया प्रवर्त्तनीयम्, यतनायाः स्वरूपम् ॥ २९४-२९५
१४२. तत्र ईर्यादिसमितिद्वारे तत्स्वरूपम् ॥ २९६-३००
१४३. कषायद्वारे क्रोधादि-पर्यायस्वरूपदोषाः ॥ ३०१-३१५
१४४. हास्यादिस्वरूपम् ॥ ३१६-३२१
१४५. कर्मणो बलवत्त्वम् ॥ ३२२
१४६. गौरवद्वारे ऋद्ध्यादिलिङ्गस्वरूपम् ॥ ३२३-३२४

१४७. इन्द्रियद्वारे तदनिग्रहे दोषाः,
तज्जयोपायश्च ॥ ३२५-३२९
१४८. मदद्वारे जात्यादिमददोषाः-तत्र
जातिमददोषे मेतार्यकथा ॥ ३३०-३३३
१४९. ब्रह्मचर्यगुप्तिद्वारे तत्स्वरूपम् ॥ ३३४-३३७
१५०. स्वाध्यायद्वारे तत्करणे गुणाः
अकरणे च दोषाः ॥ ३३८-३४०
१५१. विनयद्वारे तत्प्राधान्यं गुणाश्च ॥ ३४१-३४२
१५२. तपोद्वारे तत्करणविधिः स्वरूपं च ॥ ३४३
१५३. शक्तिद्वारे संयमयतनायां
शक्त्यगोपनोपदेशः ॥ ३४४-३४५
१५४. कारणे चिकित्सायां न दोषः ॥ ३४६
१५५. संविग्नविहारिणां वैयावृत्त्यं सर्वादरेण
कर्तव्यम् ॥ ३४७
१५६. लिङ्गमात्रावशेषाणामप्युचितं कर्तव्यम् ,
अन्यथा प्रवचनमालिन्यम् ॥ ३४८
१५७. लिङ्गमात्रावशेषाणां लिङ्गदोषगुणादि,
तेषां सुसाधुहीलनया दोषः ॥ ३४९-३५०
१५८. सुसाधोः अवसन्नान् प्रति औचित्यं
यतना च ॥ ३५१-३५३
१५९. पार्श्वस्थादिस्वरूपं लक्षणानि च ॥ ३५४-३८२
१६०. कारणे अपवादसेवने न दोषः ॥ ३८३-३८४
१६१. कूटचरितस्य चेष्टा, तस्याऽपायः,
तत्र कपटक्षपककथा ॥ ३८५-३८६
१६२. कर्मवशात् पार्श्वस्थादयोऽनेकप्रकाराः ॥ ३८७
१६३. संयमाराधकानां लक्षणम् ॥ ३८८
१६४. सुविहितसाधूनामेकत्रावस्थानेऽपि न दोषः,
तेषां स्वरूपम् ॥ ३८९-३९१
१६५. प्रवचने न सर्वथाऽनुज्ञा न च सर्वथा निषेधः ॥३९२
१६६. शुद्धधर्मस्वरूपम् ॥ ३९३-३९४
१६७. कुत्रापि प्रवर्त्तने आयव्ययतुलनायाः
विषयभूतं गीतार्थादिपुरुषवस्तु ॥ ३९५
१६८. चारित्रातिचारे
मूलोत्तरगुणरूपविषयविभागः ॥ ३९६-३९७
१६९. अतिचारे हेतुभूतमज्ञानम् ॥ ३९८
१७०. अगीतार्थस्य गच्छप्रवर्त्तने महादोषः,
उत्सर्गापवादनिर्णये द्रव्यादिविचारणा,
तत्राऽगीतार्थस्य वैकल्यं तस्य
तपोज्ञानादेरसुन्दरत्वम् ॥ ३९९-४१८
१७१. ज्ञानार्थिनां गुरुराराधनीयः,
अन्यथा दोषः ॥ ४१९-४२०
१७२. क्रियाविकलस्य ज्ञानिनो न मोक्षफलम् ॥ ४२१
१७३. क्रियाविकलत्वे गौरवप्रतिबद्धत्वं हेतुः ॥ ४२२
१७४. ज्ञानक्रिययोर्ज्ञानस्य प्राधान्यम् ॥ ४२३
१७५. ज्ञानदर्शनचारित्राणां साधकत्वे
परस्परसापेक्षत्वम् ॥ ४२४-४२८
१७६. जीवदयाप्रधानो धर्मः ॥ ४२९-४३०
१७७. सर्वविरतिविराधनया बोधिनाशः ॥ ४३१-४३२
१७८. हतबोधेर्भवभ्रमणम्, इहलोके च
स्वपरापकारित्वम् ॥ ४३३-४३४
१७९. षट्कायरिपूणामसंयतानामसंयमः
असाधुता च ॥ ४३५-४३६
१८०. सुसाधुगुणाः, बहुदोषाणां कायक्लेशेऽपि
न कर्मक्षयगुणः ॥ ४३७-४३८
१८१. मरणजीवितयोः प्रशस्याप्रशस्यत्वेन
चतुर्भङ्गी, तत्र-दर्दुरदेवकथा ॥ ४३९-४४४
१८२. सुविदितमोक्षाध्वानानां प्राणत्यागेऽपि
परपीडावर्जनम्-तत्र सुलसकथा ॥ ४४५
१८३. अविवेकविलसितम् ॥ ४४६-४४७
१८४. अर्हन्तो हितोपदेशदातारः, न ते बलात्
कारयन्ति निवारयन्ति वा ॥ ४४८-४४९
१८५. उपदेशसामर्थ्यम् ॥ ४५०-४५२
१८६. हितकरणोपदेशः, हिताहितकारिणो
गुरुलाघवम् ॥ ४५३-४५५
१८७. गुणिनः पूज्यत्वम्, गुणहीनस्य दोषाः,
गुणिनां तदभाव एव ॥ ४५६-४५८
१८८. सन्मार्गस्खलने वचनीयता,
तत्र जमालिकथा ॥ ४५९
१८९. क्लिष्टपरिणामस्य सततं कर्मबन्धः, तस्य
च सुखभ्रान्त्या अरतिविनोदनमेव ॥ ४६०-४६१
१९०. मोहोपहताः आरम्भनिरताः,
अभयदानोपदेशः ॥ ४६२-४६३
१९१. जगति अशक्त एव व्यसनं प्राप्नोति ॥ ४६४
१९२. दुर्लभं तरतमयोगं प्राप्य उद्यम एव कार्यः,
अन्यथा शोचनीयावस्था ॥ ४६५-४६८
१९३. आकस्मिकमरणकारणानि ॥ ४६९
१९४. सुचरितानुष्ठातुर्नशोकः ॥ ४७०

१९५. अन्यथावादि-अन्यथाकारिणां स्वरूपम्, तत्र मा साहसपक्षिकथा ॥ ४७१-४७२

१९६. यथोक्तकारिणां चरितं न नटपठितानुकारि ॥ ४७३-४७४

१९७. सुविहिताचरणार्थमुपायः ॥ ४७५

१९८. आदररहितत्वे कारणानि ॥ ४७६

१९९. प्रमाददोषाः ॥ ४७७-४७८

२००. चिरदीक्षितत्वमप्रमाणम्, अप्रमादिता साध्यं निरतिचारत्वमेव प्रमाणम् ॥ ४७९

२०१. उपदिष्टमपि यो न प्रतिपद्यते तस्य दुश्चिकित्स्यत्वम् ॥ ४८१-४८२

२०२. लघुकर्मणः प्रति उपदेशोपनिषदम् ॥ ४८३

२०३. कायादिगुप्तिस्वरूपम्-तत्र कायगुप्तौ कूर्मकथा ॥ ४८४-४८६

२०४. गुरुकर्मणो विपरीतचारिता ॥ ४८७-४८८

२०५. प्रमादिनो दुश्चिकित्स्यत्वम् ॥ ४८९-४९०

२०६. द्वावेव पन्थानौ सुश्रमणः सुश्रावकश्च ॥ ४९१

२०७. द्रव्यभावार्चना स्वरूपम्, निरर्चनस्य दोषाः, तयोरन्तरम् ॥ ४९२-४९४

२०८. भावार्चनप्राधान्यं ज्ञात्वा तत्राप्रमादोपदेशः ॥ ४९५-४९९

२०९. उपदेशसर्वस्वम् ॥ ५००

२१०. भग्नव्रतपरिणामस्य सुश्रावकत्वं वरम्, तदकरणे दोषः ॥ ५०१-५०२

२११. उभयभ्रष्टस्य मिथ्यात्वसंभावना ॥ ५०३-५०४

२१२. आज्ञामहत्त्वम्, तद्भङ्गेऽनन्त-संसारितादिदोषाः ॥ ५०५-५०८

२१३. संयममनपेक्ष्य तपःकारिणो महामूढता, तस्य नौबोद्रोपमा ॥ ५०९

२१४. पार्श्वस्थजनविषये माध्यस्थ्यमेव श्रेयः ॥ ५१०

२१५. दुःस्थितानां हितोपदेशः ॥ ५११

२१६. चारित्रनाशे ज्ञानदर्शनभावाभावस्य निश्चयव्यवहारमतेन विचारणा ॥ ५१२

२१७. संविग्नपाक्षिकमार्गस्यापि कार्यसाधकत्वम्, तस्य लक्षणम् , निगमनम् , शेषाणां मिथ्यादृष्टित्वम् ॥ ५१३-५२०

२१८. सम्यग्ज्ञानादिविकलेन लिङ्गमात्रेण न किञ्चित् त्राणम् ॥ ५२१

२१९. यो लिङ्गत्यागं नाद्रियते तं प्रति कथनम् ॥ ५२२

२२०. तान् प्रति कृत्यम्, तस्य दुष्करत्वं मोक्षाङ्गता च ॥ ५२३-५२८

२२१. उपदेशमालाया अनधिकारिणः ॥ ५२९-५३३

२२२. उपदेशमालां श्रुत्वाऽपि धर्मे यस्य नोद्यमः सोऽनन्तसंसारी ॥ ५३४-५३५

२२३. अस्याध्ययनफलम् ॥ ५३६

२२४. सूत्रकारस्य स्वाभिधानम् ॥ ५३७

२२५. जिनवचनकल्पवृक्षस्य स्तवना ॥ ५३८

२२६. ग्रन्थाध्ययनाधिकारिणः ॥ ५३९

२२७. ग्रन्थोपसंहारः श्रोतॄणामाशीः, गाथामानम्, ग्रन्थाशीः, क्षामणा ॥ ५४०-५४४

परिशिष्टम् [ १ ] उपदेशमालायां मूलगाथानामकाराद्यनुक्रमः ॥ ४८३-४९०

परिशिष्टम् [ २ ] उपदेशमालाकर्णिकावृत्तौ उद्धरणानामकाराद्यनुक्रमः ॥ ४९१-४९३

परिशिष्टम् [ ३ ] उपदेशमालाकर्णिकावृत्तौ कतिपयसूक्तिनामकाराद्यनुक्रमः ॥ ४९४-४९५

परिशिष्टम् [ ४ ] उपदेशमालाकर्णिकावृत्तौ कथानककानामनुक्रमः ॥ ४९६-४९८

परिशिष्टम् [ ५ ] उपदेशमालाकर्णिकावृत्तौ विशेषनाम्नामकाराद्यनुक्रमः ॥ ४९९-५१८

परिशिष्टम् [ ६ ] उपदेशमालाटीकादिसाहित्यसूची ॥ ५१९-५२०


• • •

# उद्धरणसङ्केतसूचिः ॥

| | |
|---|---|
| अयोगव्यव. | अयोगव्यवच्छेदिका |
| आ. नि. | आवश्यकनिर्युक्ति |
| आ.वि. | आलोचनाविधान |
| उप.मा. | उपदेशमाला |
| ओ.नि. | ओघनिर्युक्ति |
| ओ.नि.भा. | ओघनिर्युक्तिभाष्य |
| द.वै. | दशवैकालिकसूत्र |
| द.वै.चू. | दशवैकालिकचूर्णी |
| दं.प. | दंसणसुद्धिपयरण-<br>[ दर्शनशुद्धिप्रकरण ] |
| नि.भा. | निशीथभाष्य |
| प.व.<br>पञ्च.व. | पञ्चवस्तुक |
| पञ्चा. | पञ्चाशक |
| पि.नि. | पिण्डनिर्युक्ति |
| पि.वि. | पिण्डविशुद्धि |
| प्र.र. | प्रशमरति |
| प्र.सा. | प्रवचनसारोद्धार |
| बृ.क. | बृहत्कल्पभाष्य |
| य.स. | यतिलक्षणसमुच्चय |
| सं.प्र. | संबोधप्रकरण |
| सि.हे.श. | सिद्धहेमशब्दानुशासन |
| स्था. | स्थानाङ्गसूत्र |

# कर्णिकासमन्विता
# उपदेशमाला

ॐ ह्रीँ अर्हं नमः ॥

ऐँ नमः ॥

धरणेन्द्र-पद्मावतीपरिपूजित-सर्ववाञ्छित-
मोक्षफलप्रदायक-श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

श्रीमद्-आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरीश्वरेभ्यो नमः ॥

## आचार्यवर्यश्रीउदयप्रभसूरिविरचितकर्णिकानामकविशेषवृत्तिसमन्विता
## चरमतीर्थाधिराजश्रीमहावीरप्रभुहस्तदीक्षितश्रीधर्मदासगणिविरचिता

# ॥ उपदेशमाला ॥

ॐ नमः परमब्रह्मणे ॥

★चिदानन्दाय ऋषभस्वामिने भरताय च ।
श्रीगौतमसुधर्म्माभ्यां श्रीगीर्भ्यां गुरवे नमः ॥

अर्हंस्तनोतु[१] भुवनाद्भुतकल्पवृक्षः, श्रेयःफलं निबिडबोधसुमप्रसूतम् ।
यस्यांऽह्रिपीठमभितः पतित[२]प्रसूनपुञ्जायते त्रिजगतामपि राजलक्ष्मीः ॥१॥ [वसन्ततिलकावृत्तम्]

देवः स वः शतमखप्रमुखामरौघ-[३][1]क्लृप्तप्रथः प्रथमतीर्थपतिः पुनातु[४] ।
मुक्तिक्रमो न किल केवल एव लोके, भुक्तिक्रमोऽपि यदुपक्रममेव भाति ॥२॥ [वसन्ततिलकावृत्तम्]

चिन्तातीतफलप्रदः स दिशतु श्रेयो युगादिप्रभु-र्भेजुर्जन्मनि यस्य कल्पतरवः सर्वेऽप्युपादानताम् ।
नेत्थं चेत् कथमन्यथा वसुमतीमस्मिन्नलङ्कुर्व्वति, त्रैलोक्यैकगुरौ न गोचरममी जग्मुर्जगच्चक्षुषाम् ॥३॥ [शा०]

तुङ्गेभभीममसितीव्रतरेण कर्म्मव्रातं व्रतेन विनिपात्य भवाटवीषु ।
[2]मुक्तावलि[५]श्रियमशिश्रिय[६]दात्मना यः, श्रेयःश्रियामतनुतां तनुतां स वीरः ॥४॥ [वसन्ततिलकावृत्तम्]

लीलासञ्चरणं च नूपुररणत्कारश्रियं च स्वयं, बोद्धुं साधु निषेव्यते [७]कविकुलोत्तंसेन हंसेन या ।
किञ्जल्कग्रसनप्रसक्तमनसस्तस्यैव हेतोः करे, कुर्व्वाणा कमलं सतां भवतु सा ब्राह्मी परब्रह्मणे ॥५॥ [शा०]

जीयाद् विजयसेनस्य प्रभोः [3]प्रातिभदर्प्पणः । प्रतिबिम्बितमात्मानं यत्र पश्यति भारती ॥६॥

---

१. ०मूलम० K, L, C । २. प्रसूनप्रायाः सुरासुरनराधिपसम्पदोऽपि L, K । ३. क्लृप्तः प्रथः K । ४. ०मेष K, L, KH, B । ५. ०मश्रिय H, KH । ६. ०दात्मनो KH । ७. खगकुलोत्तंसेन H, B, KH ।

टि. ★ अयं श्लोकः KH, B, A प्रतिषु । 1. ०विस्तारितकीर्त्तिः । 2. मुक्तानाम्=सिद्धानां या आवलिः तस्यां श्रीः ताम् । 3. प्रतिभा+अण् स्वार्थे, प्रातिभ एव दर्पणः ।

**सङ्घस्याद्भुतपुण्यपण्यविपणौ[1] सामान्यनीवी[१]परा, घण्टावाद्यमिदं सदा जिनमतप्रासादमासेदुषाम् ।**
**जैनोक्तामृतकुण्डतः श्रुतमहो श्रोतः सतां शैशवे[२], ज्ञीप्सूनामुपदेशपद्धतिरसौ सत्प्रातराशायते[३] ॥७॥** [ शा० ]
**गाथास्ता[४]: खलु धर्मदासगणिनः सञ्जातरूपश्रियः, किं चैष स्फुरदर्थरत्ननिकरः सिद्धर्षिणैवार्पितः ।**
**तेनैतामितिवृत्त[2]संस्कृत[५]मयीमातन्वतः कर्णिकां, वृत्तिं मेऽत्र सुवर्णकार[६]पदवीसीमाश्रम[७]श्चिन्त्यताम् ॥८॥** यतः–
**मरकतमणिर्मुक्तारत्नं हिरण्यमधिद्युति[3]प्रकृतिललितान्येवैतानि क्वचित् क्वचिदासते ।**
**मिलितमखिलं स्थाने स्थाने निवेश्य यथाविधिस्तबकघटनादुज्जृम्भन्ते यशांसि तु शिल्पिनः[८] ॥९॥** [ हरिणी० ]

तत्रेष्टदैवतप्रणिधानप्रधाना शिष्टानां सकलविशिष्टाभीष्टार्थप्रवृत्तिरिति । शिष्याणां शिष्टाचारमुपदेष्टुमिष्टदेवतानमस्कारोपनिबन्धाय प्रेक्षावत्प्रवृत्तिनिमित्तं सम्बन्धप्रयोजनसूचनाया[९]भिधेयावधारणाय चादिवाक्यगाथेयमभिधीयते—

**नमिऊण जिणवरिंदे इंदनरिंदऽच्चिए तिलोयगुरू ।**
**उवएसमालमिणमो वोच्छामि गुरूवएसेणं ॥१॥**

**नत्वा** नमस्कृत्य **जिनवरेन्द्रान्** रागादिजयात् जिनाः—क्षीणमोहाख्यद्वादशगुणस्थानवर्त्तिनश्छद्मस्थवीतरागास्तेभ्यः समुत्पन्नसार्वज्ञ्यतया वराः—प्रधानाः, सामान्येन सयोगाख्यत्रयोदशगुणस्थानशालिनः केवलिनस्तन्मध्ये महेन्द्रादिकृताष्टमहाप्रातिहार्यविराजितपरमैश्वर्य्यसंपन्नतया इन्द्राः प्रथमपरमेष्ठिनस्तीर्थकरास्तान् तथा । एवं च अर्हदादिपदान्युपेक्ष्य भङ्ग्यन्तरेण[१०] भगवदभिधानेन[११] तदन्तर्गताश्छद्मस्थवीतरागा जिनाः सामान्यकेवलिनो जिनवराश्च स्मृता भवन्ति । तेषां विशेषणम् **इन्द्रनरेन्द्रार्चितान्** इन्द्रैरूर्द्ध्वाधोव्यवस्थितलोकद्वयाधिपतिभिर्द्वात्रिंशद्भिश्चतुःषष्टिभिरसङ्ख्यैर्वा[4] नरेन्द्रैश्च भूलोकाधिपतिभिरर्चितान् पूजितान् । तथा **त्रैलोक्यगुरून्** त्रैलोक्यस्य—त्रिभुवनोदरवर्त्युपदेशार्हप्राणिगणस्य, गुरून्—यथावज्जीवादितत्त्वप्रतिपादनद्वारेण धर्मोपदेशकानित्यर्थः । अत्र च जिनत्वादपायापगमातिशयो जिनवरत्वात् ज्ञानातिशय इन्द्रनरेन्द्रार्च्चितत्वात् पूजातिशयस्त्रैलोक्यगुरुत्वाद् वचनातिशय इति भगवतो मूलातिशयचतुष्टयप्रणिधानानुवादपरोऽयं[१२] नमस्कारोपनिबन्ध इति तात्पर्यम् । **उपदेशमालां** हितार्थाभिधायकवाक्यपरम्परां **इणमो** त्ति इदं प्रकरणमिति विशेष्यस्य[१३] गम्यमानत्वात्[१४] । **वक्ष्ये** अभिधास्ये **गुरूपदेशेन** इति गुरुपारतन्त्र्येण न स्वेच्छासमुद्भूतविकल्पकल्पनामात्रेण । एतेन यथाच्छन्दैर्निह्नवादिभिर्मिथ्यादृष्टिभिः कल्पितोपदेशाभासानामनुपादेयतोपदेशोऽपि कृतो भवति । अत्र च विवक्षितोपदेशयोग्यहितार्थानामभिधेयत्वं

१. ०नीवीधनं H, B । २. शैशवात् H, B । ३. सत्प्रातिरा० H । ४. गणिना L, K, KH । ५. संस्कृति० K, L, KH । ६. सुवर्णवर्ण H । ७. श्रियं KH । ८. शल्पिनः L, KH । ९. सूचनार्थाभि० B । १०. भङ्गीभरेण B । ११. भगवदभिधाने H, B । १२. ०नुवादपरो जिननमस्कार० H, ०नुवादपरोऽयं जिननमस्कार० B । १३. विशेषस्य० L, KH । १४. गम्यत्वात्० L, H, KH, B, L ।

टि. 1. यथा ० विपणौ मूलधनं, ० प्रासादे घण्टा० ०कुण्डतः श्रोतः, शैशवे च प्रातराशं = प्रातर्भोजनं प्रारम्भिकं आवश्यकं तथा चासौ उपदेशपद्धतिः इत्यर्थः । 2. इतिवृत्तं=कथा, तदपेक्षया संस्कृतमयी कर्णिका ताम् , कथापेक्षया प्राकृतमयी वृत्तिस्तु विद्यत एव इति तात्पर्यम् । 3. अधिका अतिशायिनी वा द्युतिरेव प्रकृतिः स्वभावस्तेन हेतुना ललितानि मरकतमणिमुक्तारत्नहिरण्यानि पक्षे अर्थाः शोभां प्राप्तानि क्वचित् क्वचिद् जगति पक्षे आगमग्रन्थेषु आसते इत्यन्वयः कार्यः, शेषं सुगमम् । 4. दृश्यतां समवायाङ्गस्य (३२) द्वात्रिंशत्तमं सूत्रम् ।

साक्षादुक्तम् । [१]एषां चाभिधायकेन वचनरूपापन्नेनानेन प्रकरणेन सह वाच्यवाचकभावलक्षणः सम्बन्धः स्फुट एव । गुरुपर्वक्रमलक्षणस्तु सम्बन्धो गुरूपदेशेनेति पदेनाभिहितः । प्रयोजनं त्वनन्तरं हितार्थोपदेशानामुपकाररूपतया कर्तुः सत्त्वोपकारः श्रोतॄणां च तत्परिज्ञानं; परम्परं तूभयेषामपि शिवाधिगम एवेति गाथार्थः । इयं च गाथा [1]मूलवृत्तिकृता न व्याख्यातेति प्रक्षेपः सम्भाव्यते परमत्यन्तमुचितेति व्याख्याता ॥१॥

अथ हितार्थानां स्वयमासेवनपूर्वमस्यामवसर्प्पिण्यां **प्रथमोपदेष्टुः श्रीऋषभ**स्वामिनो वर्तमानतीर्थाधिपत्येन प्रत्यासन्नोपकारिणो भगवतो वर्धमानस्वामिनश्च सामान्येन कृतोऽपि विशेषतः प्रणामः कर्तुमुपदेष्टुं च समुचितः स च 'रतिर्देवादिविषया' इति वचनाद् रत्याख्यो भावः । अस्य च स्थायिभावतया 'रसादेः स्वशब्दोक्तिः क्वचित् संचारिवर्जं दोष' इति वचनान्नमस्करोमि नमामीत्यादि स्वशब्दैरेवाभिधाने सम्भाव्यमानदोषाऽऽशङ्कापरिहारायासाधारणगुणोत्कीर्त्तनेन प्रथम-पश्चिमतीर्थकरयोः स्तुत्याऽऽक्षिप्तं नमस्कारं व्याचकार सूत्रकारः —

**जगचूडामणिभूओ उसभो वीरो तिलोयसिरितिलओ ।**
**एगो लोगाइच्चो एगो चक्खू तिहुयणस्स ॥२॥**

**जगत**श्चतुर्दशरज्ज्वात्मकलोकस्य **चूडायां** सिद्धिक्षेत्रलक्षणायां **मणिभूतो** रत्नोपम **ऋषभो** युगादिजिनः । तथा **वीरः** पुनःशब्दस्य लुप्तनिर्दिष्टत्वात् । **त्रिलोकश्रिय**स्त्रिभुवनलक्ष्म्या**स्तिलको** [2]विशेषकः । तत्रानयो**रेकः** प्रथमो युगादौ प्रभात इव **लोकस्य** मोहनिद्रानिरासेन विवेकप्रबोधहेतुतया पदार्थोद्द्योतकत्वेन चाऽऽ**दित्यः** । तथा **एको**ऽन्यः पुनर्वीर**श्चक्षु**र्लोचनं **त्रिभुवनस्य** [२]तात्स्थ्यात् प्राणिगणस्य चक्षुर्भूतः प्रवचनार्थाभिधायकत्वादिति । अत्र चूडामण्याऽऽदित्यरूपऋषभरूपकद्वयापेक्षया क्रमेण तिलकचक्षूरूपवीररूपकद्वयस्य प्रत्यासन्नस्य साभिप्रायमभिधानात् साक्षाद् भगवतः शासने स्थित एव **वीरस्य** गुणस्तुतिमिमां चकार प्रकरणकार इति काक्वा गम्यते ॥२॥

अथैताभ्यामेव स्वयमासेवनादुपदेशाच्चारोपितमहिम्नस्तपःकर्मण उपदेशमाह—

**संवच्छरमुसभजिणो छम्मासा वद्धमाणजिणचंदो ।**
**इय विहरिआ निरसणा जइज्ज एओवमाणेणं ॥३॥**

**संवत्सरम् ऋषभजिन**स्तथा **षण्मासान् वर्द्धमानजिनचन्द्रो वर्द्धमान**नामा श्रुतादिजिननक्षत्रेषु प्रधानत्वेन चन्द्र इव चन्द्रः, **इति** एवं प्रवचनप्रसिद्धप्रकारेण **विहृतौ** परीषहोपसर्गसहनार्थं पर्यटितौ । **निरशनौ** आसेवितोपवासव्रतौ इति भगवतोः स्वरूपं प्रतिपाद्य शिष्यायोपदिशति—'**जइज्ज एओवमाणेणं**'ति **यतेत** भवा**नेतयोः** [३]**ऋषभवर्द्धमानयोरुपमानेन** प्रस्तावात्तपःकर्मणीति शेषः । अत्र च यतेतेति साभिप्रायं, ततो यदि नाम भगवन्तौ चरमदेहत्वाद्यथाकथञ्चित् सुनिष्टङ्किताऽप्रतिबद्धसिद्धिगमनावपि एवं विहृतौ ततोऽपरः सर्वोऽपि

---

१. एतेषां K, H । २. तात्स्थात् K, L, KH । ३. श्रीऋषभ० P ।

टि. 1. हेयोपादेयावृत्तिकृता श्रीसिद्धर्षिगणिना इयं गाथा न व्याख्याता । सम्पा० ॥ 2. तिलके.....विशेषकाः ॥ [अभि. मर्त्यकाण्ड-६५३]

संदिग्धसिद्धिगमनो मुक्तेरेकान्तिकात्यन्तिककारणे भगवदुक्ते तपसि यथाशक्ति सुतरामादरपरो भवेन्न पुनरशक्तोऽपि कुर्यादेवेति भावः । यतः–

**“[1]सो हु तवो कायव्वो [१]जेण मणो मंगुलं न चिंतेइ ।**
**जेण न इंदिअहाणी जेण य जोगा न हायंति” ॥१॥ [ पञ्चवस्तुक/गाथा-२१४ ]**

अनेन तपःकर्मोपदेशस्याऽशक्यानुष्ठानत्वं परिहृतं भवतीत्यक्षरार्थः ॥३॥ भावार्थो भगवच्चरिताभ्यामवसेयः । तत्र प्रथमतः पूर्वभवाख्यानपूर्वं श्री**ऋषभनाथचरितं** यथा–

**[ श्रीऋषभजिनचरितम् ॥ ]**

[२]विश्राणयतु वः श्रेयःश्रियं [३]श्री**ऋषभ**प्रभुः । भुक्तिमुक्ति[४]प्रदं यस्य शासनं पापनाशनम् ॥१॥
[2]दत्ता श्री**ऋषभो** [3]भुक्त्या मुक्त्या च स महोदयम् । प्रवृत्तौ च निवृत्तौ च येनादौ प्रणवायितम् ॥२॥
अस्ति **प्रत्यग्विदेहे**षु जन्मभूमिरिव श्रियः । **क्षितिप्रतिष्ठितं** नाम पुरं क्ष्मामुकुटोपमम् ॥३॥
सुरालयचयोत्तुङ्गशृङ्गरङ्गद्ध्वजव्रजैः । दत्तपत्रमिवाभाति यदमर्त्यपुरं प्रति ॥४॥
आसीदासीमभूमीशदासीकरणकौतुकी । **प्रसन्नचन्द्रः** क्ष्माचन्द्रस्तत्र क्षत्रशिरोमणिः ॥५॥
[4]कालः करालो यस्यासीन्निस्त्रिंशः संहरन्नरीन् । एतस्माद् दुःसहो जज्ञे प्रतापतपनः पुनः ॥६॥
पुरे तत्राभवल्लक्ष्मीनिवासभवनं **धनः** । सार्थवाहो यशोभिश्च वणिग्भिश्च [5]विगाढदिग् ॥७॥
चलाचलापि नो लक्ष्मीर्यत्कराम्भोजमत्यजत् । वाताहता पताकेव देवायतनकेतनम् ॥८॥
दृष्टे नृणामपूर्वार्थसुन्दरे यस्य मन्दिरे । बभूव शङ्के शङ्केति किमिदं जगदन्तरम् ॥९॥
क्षीराब्धेरिव ये तस्य दधिरे दानपात्रताम् । वारिदा इव ते जग्मुर्जगतोऽप्युपजीव्यताम् ॥१०॥
स **वसन्तपुरं** गन्तुं व्यवहारार्थमन्यदा । यात्रार्थिनः समाह्वातुं वादयामास डिण्डिमम् ॥११॥
यस्य यत्पूर्यते नैव स तद् याचतु हे जनाः ! । इत्युद्घोषणया पूर्णव्योमा सोमाकृतिर्धनः ॥१२॥
अक्षतान् शिरसा बिभ्रन् मङ्गलध्वनिपूर्वकम् । तस्थौ निवेशितावासः पुरीपरिसराऽवनौ ॥१३॥ युग्मम् ॥
अत्रान्तरे समायातं **धर्मघोष**मुनीश्वरम् । सत्कृत्य कृत्यविन्नम्रः किं कृत्यमिति सोऽवदत् ॥१४॥
धर्म्यां वाचमथोवाच वाचंयमशिरोमणिः । त्वया समं समेष्यामो **वसन्तपुर**पत्तनम् ॥१५॥
सार्थवाहस्तथेत्युक्त्वा प्राह सूपकृतः प्रति । अन्नाद्यमीषां सम्पाद्यं युष्माभिर्नित्यमित्यहो ॥१६॥

---

१. जह से जोगा० L, H । २. विश्राणयतु वः श्रेयः...इति श्लोक L, K, KH आदर्शेषु नास्ति । ३. श्रीऋषभः प्रभुः B । ४. ०प्रदं पापनाशनं यस्य शासनम् P ।

टि. 1. **छाया** : तद्धि तपः कर्तव्यं येन मनो मङ्गुलं न चिन्तयति । येन न इन्द्रियहानिः येन च योगा न हीयन्ते ॥ 2. दत्तां-'दा' धातोराज्ञार्थतृ० पु० एकवचनरूपम् । 3. भुक्त्या इष्टफलसिद्ध्या । 4. कालः=यमः, पुराणकथासु तपनात् (सूर्यात्) यमो जज्ञे, अत्र तु निस्त्रिंशयमानात् प्रतापतपनो जज्ञ इत्याश्चर्यम् । 5. सर्वादिग्व्यापी, इत्यर्थः ।

अत्रान्तरे च केनापि स्थालं सार्थपतेः पुरः । रसालफलसंभारसम्भृतं प्राभृतीकृतम् ॥१७॥
अथ सोत्कर्षहर्षाश्रुर्धन्यम्[१]मन्यमना धनः । **धर्म्मघोष**मुनिं प्राह सोत्साहकरकोरकः ॥१८॥
भगवन्ननुगृह्णीत गृह्णीत फलसञ्चयम् । धन्योऽस्मि कृतकृत्योऽस्मि भवत्[२]पादाब्जसेवया ॥१९॥
मूर्त्तिमानिव [३]धर्म्मोऽथ **धर्म्मघोषमुनिर्धनम्** । भाषते स्म महाभाग ! कल्पनीयमिदं न नः ॥२०॥
सिद्धमन्नं जलं प्रासु फलं निर्बीजतां गतम् । भवेन्मुनीनां कल्प्यं यन्न कृतं न च कारितम् ॥२१॥
वचनं स मुनीशस्य निशम्य शमितस्पृहम् । अवोचद् विस्मयस्मेरनेत्रनीलोत्पलो **धनः** ॥२२॥
अहो कष्टमहो धैर्यमहो दुष्करकारिता । एते विदधते यत्तन्नान्ये श्रोतुमपीशते ॥२३॥
अथ प्रतस्थे सार्थेन समं स रथमास्थितः । उद्दण्डभाण्डसंभारवाहिभिर्वाहनोर्मिभिः ॥२४॥
समं श्री**धर्म्मघोषो**ऽपि मुनिभिः परिवारितः । व्रजन्नतितरां रेजे [1]विक्कैरिव महागजः ॥२५॥
अश्वीयैरौक्षकैर्मानुष्यकै रथ्याभिरौष्ट्रकैः । **धन**श्चचाल वैपुल्यं विपुलाया विलोपयन् ॥२६॥
**धने** प्रचलिते [४]कम्पं भेजे विश्वम्भरा भरात् । विपरीतममुं सर्वाः सरितः परितः पुनः ॥२७॥
केकिपत्रातपत्रेषु वहत्सु जलदश्रियम् । दध्रे तडिल्लतालक्ष्मीं स्फुरन्ती कुन्तसंततिः ॥२८॥
धनदृष्ट्या सुधावृष्ट्या ग्रीष्मेऽपि ग्रस्ततापया । [५]न सार्थः प्रार्थयामास धारागृहमहोत्सवम् ॥२९॥
स यावदटवीं काञ्चित् कैश्चित् प्राप प्रयाणकैः । मार्ग एवाभवत् तावत् [2]कालो [६][3]मुदिरमेदुरः ॥३०॥
यथा यथा धरापीठे [७]धारा धाराधरोऽमुचत् । शरानुरसि पान्थानां मन्मथोऽपि तथा तथा ॥३१॥
वारां धाराभिराशङ्क्य शङ्के पङ्केरुहक्षयम् । अन्तर्दधे किल द्रष्टुमक्षमः पद्मबान्धवः ॥३२॥
साचिव्यं स्मरसाम्राज्ये किमस्य मयि गर्जति । इतीवाभ्युन्नतिं प्राप्य पयोदः पिदधे विधुम् ॥३३॥
खेदविस्फारसूत्कारा दुर्दिनश्यामलद्युतः । पान्थाश्चरन्तः पङ्कान्तर्भेजिरे [4]गूढपादताम् ॥३४॥
पान्थानां गच्छतामग्रे प्राणद्रव्योत्तमर्ण्णकैः । नद्यो गतिनिषेधाज्ञारेखा इव कृता घनैः ॥३५॥
चापं विस्फार्य पान्थेषु स्मराज्ञाभङ्गकारिषु । वीराः पयोमुचोऽमुञ्चन् धारानाराचदुर्दिनम् ॥३६॥
दुर्ग्राहैर्वाहिनीवाहैः पथिभिः पङ्कसङ्कुलैः । धारासारैरतिस्फारैः क्रमोऽप्यजनि योजनम् ॥३७॥
कष्टं दृष्ट्वाथ सार्थस्य ततः सार्थपतिर्धनः । सौस्थ्येनावासितस्तस्थौ तत्रोच्चैरटवी[८]तटे ॥३८॥
स्थिते सार्थपतौ तत्र जनानां सार्थवासिनाम् । पाथेयानि त्रुटन्ति स्म कियद्भिरपि वासरैः ॥३९॥
अथ सार्थस्तपस्वीव प्रविष्टः कष्ट[९]सङ्कटे । कन्दमूलफलप्रायैर्वृत्तिं कर्त्तुं प्रचक्रमे ॥४०॥

---

१. ०मन्यमानो H, मान्यमनो KH । २. ०पादाभिसेवया P । ३. धर्म्मोऽत्र B । ४. कष्टं KH । ५. स सार्थः प्रापयामासः P । ६. मुहिरमेदुरः P । ७. धारां L, B, KH, H । ८. तले K, L, KH । ९. सङ्कटम् P ।

टि. 1. विंशतिवर्षीयैः गजैः । 2. वर्षाकाल टि. A पार्श्वे । 3. मुदिरमेदुरः-मुदिरः मेघः, तेन मेदुरः व्याप्त इत्यर्थः । 4. गूढपादताम्-गूढः पादो यस्य सर्पः, तस्य भावः गूढपादता, ताम् भेजिरे इत्यर्थः ।

सार्थवाहस्तथा स्पष्टमाश्लिष्टश्चिन्तया तया । ईर्ष्ययेव यथा तस्मान्निद्रया विद्रुतं द्रुतम् ॥४१॥
यामिन्या: पश्चिमे यामे शुश्रावाथ श्रुतिप्रियम् । असौ परस्परालापं मन्दुरायामपालयो: ॥४२॥
तावत् परोपकारित्वमस्य लोकस्य दृश्यते । यावद् [1]दु:समयच्छद्मा [2]निकषो [3]निकषा न हि ॥४३॥
यथा यथा पुन: काल: करालोऽयं विजृम्भते । तथा तथाऽयं न: स्वामी प्रतिपन्नेऽतिनिश्चल: ॥४४॥
परित: प्रसरन्त्येता: पयोदचयवीचय: । प्रतिपन्नार्थ[१]वीरस्य प्रभोरस्य च कीर्त्तय: ॥४५॥
संलापमेतयो: सर्वं श्रुत्वा श्रुतवतां वर: । चित्ते संचिन्तयामास स [4]चिद्रूपशिरोमणि: ॥४६॥
ध्रुवमाभ्यामुपालम्भं लम्भितोऽस्मि स्तुतिच्छलात् । [5]यदीदृशि मया कष्टसंकटे पातितो जन: ॥४७॥
अथ संचिन्तयन् सार्थे सार्थेश: स सुखासुखे । सस्मार **धर्मघोषस्य** मुनेर्विमलमानस: ॥४८॥
अप्रासुकीकृतं धन्या: पयोऽपि न पिबन्ति ये । कथं तेषां मुनीन्द्राणां प्राणयात्रा भविष्यति ॥४९॥
अहो मे मन्दभाग्यस्य तथा निश्चेतनं मन: । यथा कथापि साधूनां नाकारि सहचारिणाम् ॥५०॥
अत्रान्तरे पपाठोच्चैर्बहिर्मङ्गलपाठक: । उदयानुगतं भानो: प्रात: [6]सुप्रातमङ्गलम् ॥५१॥
रुद्धोऽपि मेघै: सार्थेश ! भवानिव [7]विभाविभु: । अमुञ्चन्नयमुत्साहमुपकारार्थमुद्ययौ ॥५२॥
अथ प्राभातिकं कृत्यं विधाय विधिवद् **धन:** । **माणिभद्रा**भिधं मित्रं पप्रच्छ जन[२]वत्सल: ॥५३॥
**धर्मघोष**प्रभु: कुत्र कथं वा मित्र ! वर्त्तते । यदहो सुबहो: कालादद्य मे स्मृतिमागत: ॥५४॥
तेनाथ कथिते तेषामाश्रये समुपागत: । गुरूंश्च तत्पुरस्ताच्च स हृष्टो दृष्टवान् मुनीन् ॥५५॥
कायोत्सर्गस्थितान् कांश्चिदितरान् ध्यानबन्धुरान् । स्वाध्यायधन्यानन्यांस्तु प्रत्युपेक्षापरान् परान् ॥५६॥
स प्रणम्य क्रमादेतान् धर्मकर्मसु कर्मठान् । गुरो: पुरस्तादासीन: कृताञ्जलिरदोऽवदत् ॥५७॥ युग्मम् ॥
समायाता: स्वसार्थेऽस्मिन् वचनैर्मम निर्म्ममा: । चक्रे मया न चिन्ताऽपि सन्तापि हृदयं तत: ॥५८॥
महामोहस्य माहात्म्यात् तदिदं स्खलितं मम । सर्वं क्षन्तव्य[8]मव्यग्रमतिभिर्मुनिपुङ्गवै: ॥५९॥
अथो गुरुरभाषिष्ट कष्टमेतन्मुधैव ते । सार्थाधीश ! किम[३]स्माकं न हितं विहितं त्वया ॥६०॥
संसार इव [४]दुर्ल्लङ्घ्ये कान्तारेऽस्मिन्महामते ! । भवता दुष्टकर्म्मभ्यो दस्युभ्यो रक्षिता वयम् ॥६१॥
मुनीनामन्नपानादि सर्वमेते यथोचितम् । सार्थवाह ! प्रयच्छन्ति सार्थिकास्ते निरन्तरम् ॥६२॥
**धनो**ऽप्यूचे गुणमयं मन्यन्ते गुणिनो जगत् । वसुधा हि सुधाभानो: सुधाधौतेव भासते ॥६३॥
तत्कल्पनीयमाहारमिदानीं दित्सुरस्म्यहम् । मुनीन् प्रेषयतावासं प्रति सद्य: प्रसद्य मे ॥६४॥
वर्त्तमानेन योगेनेत्युक्ते भगवताथ स: । प्राप्त: स्वावासमासन्नबोधि: शोधितमानस: ॥६५॥

---

१. ०धीरस्य H । २. ०वत्सलं K । ३. ०ततो P । ३. ०स्माकमहितं P । ४. दुर्लङ्घ्ो H दुर्लंघे B, A ।

टि. 1. दु:समय एव छद्म (निभं) यस्य स । 2. कषपट: 3. आसन्नम् । 4. चिद्रूप:-ज्ञानी । 5. यद् ईदृशि इति सन्धिविग्रह: ! । 6. प्रभातमङ्गलम् । 7. विभा तेज: तस्या: विभु: स्वामी, सूर्य: । 8. अव्यग्रमतिभि:=अनासक्तमतिभि: ।

गुरोरथ समादेशाद् गृहायातं मुनिद्वयम् । कल्प्यान्तरस्याभावेन स[१] स्वभावेन शुद्धधीः ॥६६॥
श्रद्धया ग्राहयामास सर्प्पिरुत्सर्प्पिवासनः । सङ्ख्यातीतगुणं बोधिबीजं प्राप्येव निर्वृतः ॥६७॥ युग्मम् ॥
धर्म्मलाभोऽस्त्विति स्पष्टमिष्टमाशीर्वचो मुनी । दत्त्वा **धनाय** नम्राय जग्मतुर्गुरुसन्निधिम् ॥६८॥
अथाह्नायापराह्णेऽपि **धनो**ऽपूर्ण्णमनोरथः । गुरुपादान्तिकं प्राप निन्दन्नात्मानमात्मना ॥६९॥
अथारेभे मुनीन्द्रेण देशना क्लेशनाशिनी । त्वं नात्मनिन्दया दुःखं महात्मन् ! कर्तुमर्हसि ॥७०॥
स्वार्थीकृतपरार्थेन चरितेनामुना भवान् । लोकोत्तरश्रियां नूनं भविष्यति निकेतनम् ॥७१॥
महात्मनां ह्ययं पन्थाः क्षुण्णः पुण्यात्मभिर्नृभिः । यत् परप्रीणनं नाम प्राणैरपि धनैरपि ॥७२॥
दानं धनं क्षमा शक्तिरुन्नतिर्गुरुसन्नतिः । [२]स्वार्थः परार्थसंपत्तिर्मेने लोकोत्तरैर्नरैः ॥७३॥
सार्थवाह ! श्रियो मूलमालवालं यशस्तरोः । व्रतं परोपकाराख्यं मुनयोऽप्युत्तमं विदुः ॥७४॥
न शोच्यस्तत् त्वयाप्यात्मा पाप इत्यमलाशय ! । उपकारपरा बुद्धिः शुद्धां ब्रूते तवायतिम् ॥७५॥
उपयोगः परं कश्चिद् यन्नास्मत्तोऽभवत्तव । सार्थवाह ! क्रियाहीनं तन्मनोऽतिदुनोति नः ॥७६॥
तन्महात्मन् ! तवात्यर्थं सर्वथाप्युपकुर्वतः । [३]तत्त्वोपदेशमात्रेण वयमप्युपकुर्महे ॥७७॥
संसारे जन्तवः सन्ति [४]मिथ्यात्वमयनिद्रया । हिताहितमजानन्तो जीवन्तोऽपि मृता इव ॥७८॥
मिथ्यात्वतटिनीपूरप्लावितः सर्वथा जनः । रयात् दुस्तरसंसारपारावारे पतत्ययम् ॥७९॥
तन्मिथ्यात्वमयं ध्वान्तं सद्गति[५]स्खलनक्षमम् । जिघांसता जनेनोच्चैर्मृग्यः सम्यक्त्वभास्करः ॥८०॥
[६]स्मेरः सम्यक्त्वसूर्येण निगूढगुणगौरवम् । उत्तंसयति मुक्तिश्रीरजस्रं पद्मवज्जनम् ॥८१॥
सम्यक्त्वकौमुदीस्वादचकोराणां शरीरिणाम् । पुरोवर्तिनि मिथ्यात्वविषे दृष्टिर्विरज्यते ॥८२॥
रागादिविजयी देवः सच्चरित्रगुरुर्गुरुः । प्राणित्राणप्रधानश्च धर्म्मः सम्यक्त्वमुच्यते ॥८३॥
तत्तवायमलङ्कारो युज्यते पुरुषोत्तम ! । आधातुं हृदये श्रीमत् सम्यक्त्वं कौस्तुभः शुभः ॥८४॥
ऊचे **धनो**ऽथ भगवन् ! प्रतिपन्नमिदं मया । न हि श्रियं समायान्तीं पदेन प्रेरयेद् बुधः ॥८५॥
गुरूनथ नमस्कृत्य प्रीतः सम्यक्त्वसंपदा । तां [७][1]क्षपां क्षपयामास निजावासं गतो **धनः** ॥८६॥
प्रगेऽथ **माणिभद्रेण** विज्ञप्तः सुहृदा **धनः** । इयं प्रावृडतिक्रान्ता निशेवोद्भासिभास्करा ॥८७॥
विमुक्तं धनुरिन्द्रेण गृहीतं वसुधाधवैः । नभस्त्यक्तं घनैः श्लिष्टं [८]जिगीषुबलधूलिभिः ॥८८॥
कालेऽत्र प्रसरन्त्युच्चैर्व्यवसायिमनोरथाः । [९]प्रभो ! प्रतिदिशं प्रौढाः सहस्रांशोरिवांशवः ॥८९॥

---

१. सत्वभावेन K, D, KH, L स्वसभावेन H । २. स्वार्थपरार्थ० H, K, D । ३. तथोपदेश० B, P । ४. मिथ्यात्वमयि० K । ५. ०क्षलनक्षमम् K । ६. स्मेरसम्यक्त्व KH, K, L, H । स्मेरः D । ७. क्षपं H क्षिपां A, B, D, K । ८. जिगीर्षुबल – A, जिगीषुर्बल – K, D । ९. प्रभोः , L, KH ।

टि. 1. क्षिपा, क्षपा – रात्रिः, ताम् ।

एतदाकर्ण्य सार्थेशः समुल्लङ्घ्याटवीमिमाम् । गुरूणां गौरवं कुर्वन् **वसन्तपुर**माययौ ॥९०॥
तत्र भूपतिसत्कारद्विगुणोत्साहितो धनः । विक्रीय[१] स्वीयभाण्डानि प्रतिभाण्डान्युपाददे ॥९१॥
[२][1]ततस्थितमथापृच्छ्य **धर्मघोष**मुनीश्वरम् । **क्षितिप्रतिष्ठितं** प्राप कृतार्थः सार्थपः पुरम् ॥९२॥
अथ कालेन पूर्णायुरुत्तरेषु कुरुष्वसौ । कल्पद्रुपूर्णसङ्कल्पो जग्मिवान् युग्मि[३]धर्मताम् ॥९३॥
[2]ततश्च प्रथमे कल्पे भूत्वासौ भासुरः सुरः । अपरेषु **विदेहे**षु विजये **मङ्गला**भिधे ॥९४॥
**वैताढ्य**शैले **गन्धार**देशे **गन्धसमृद्धके** । पुरे **शतबल**क्ष्माभृत् पुत्रो विद्याधरान्वये ॥९५॥
**चन्द्रकान्ता**ङ्गसम्भूतो जज्ञे नाम्ना **महाबलः** । अङ्गावगणितानङ्गः शृङ्गार इव मूर्त्तिमान् ॥९६॥ विशेषकम् ॥
राज्यं महाबलायाथ दत्त्वा **शतबलो** नृपः । दीक्षां गृहीत्वा कृत्वा च तपांसि दिवमासदत् ॥९७॥
अथो **महाबल**क्ष्माभृत् यौवनोन्माददुर्द्धरः । अज्ञातधर्म्मा कर्म्माणि निर्म्ममे स यथारुचि ॥९८॥
**महाबल**महीपालमन्यदा सदसि स्थितम् । निर्भरस्फीतसङ्गीतरसनिर्मग्नमानसम् ॥९९॥
मन्त्रीशो धर्म्मतत्त्वज्ञः **स्वयंबुद्धो**ऽभिधानतः । वैराग्यवासनाविष्टमभाषिष्ट विशिष्टधीः[४] ॥१००॥ युग्मम् ॥
[५]अस्तु स्वादुफलश्रीकः कदलीद्रुरिवैकदा । विनैकं पुण्यबीजं तु जन्तुरुच्छेदमृच्छति ॥१०१॥
तत्तवापि श्रियां मूलं मुक्त्वा धर्म्मं कुलप्रभो ! । इत्थं न विषयग्रामो भोक्तुं तत्त्वज्ञ ! युज्यते ॥१०२॥
अभ्यधाद् भूपतिर्मन्त्रिन् ! किमप्रस्तुतमुच्यते । उवाच सचिवः स्वामिन् ! श्रूयतामत्र कारणम् ॥१०३॥
शुचिभिः सचिवैः स्वामिकुशलोदर्ककर्कशम् । अप्रस्तुतमपि प्रायो हितं वाच्यं हितैषिभिः ॥१०४॥
[६]तदद्य **नन्दनो**द्याने ज्ञानातिशयशालिनौ । भवदायुर्मया पृष्टौ चारणौ वाचमूचतुः ॥१०५॥
मासमात्रं भवद्भर्तुरायुः शेषमिति प्रभो ! । विज्ञ ! विज्ञप्यसे बाढमतस्त्वमिति मा मुहः ॥१०६॥
ऊचे **महाबलः** साधु साधु बुद्धिबृहस्पते ! । **स्वयंबुद्ध** ! गुरुस्त्वं मे त्वं मन्त्री त्वं च बान्धवः ॥१०७॥
यदित्थं पातकाम्भोधिपातुकं प्रति सम्प्रति । मामन्धमिव निर्बन्धाद् भुजालम्बं प्रयच्छसि ॥१०८॥
परं समीपमापन्ने मृत्यौ कृत्यं करोमि किम् । मूर्ध्नि दत्तपदे शत्रौ विक्रमः क्रमतां कुतः ॥१०९॥
प्रव्रज्यां दिनमप्येकं प्राप्यानन्यमना जनः । मोक्षं यदपि नाप्नोति कामं वैमानिको भवेत् ॥११०॥
इत्यमात्यगिरा चैत्यकृताष्टाहमहोत्सवः । अयं विचक्षणो दीक्षामुपाचार्यमुपाददे[७] ॥१११॥ युग्मम् ॥

---

१. विक्रीयाथ स्व० KH, K, L । २. ततः K । ३. युग्मधर्मताम् P । युग्मधर्मिताम् B, H । ४. विशुद्धधीः P । ५. अस्ति K । ६. यदद्य H, B । ७. ददौ H, B ।

टि. 1. अत्र व्यत्यये लुग् वा [१।३।५६] इति सूत्रेण विसर्गलोपः । 2. B आदर्शमध्ये पत्रोपरिभागे प्रथमभवे धनसार्थवाहः १। युगलीया २। प्रथमदेवलोकः ३। महाबलविद्याधरः ४। ईशाने ललिताङ्गो देवी स्वयंप्रभा ५। वज्रजङ्घराजा ६। युगलीया ७। सौधर्मकल्पे देवः ८। जीवानन्दवैद्यः ९। अच्युतदेवलोकः १०। वज्रनाभराजा ११। सर्वार्थसिद्धि १२। श्रीआदिनाथः १३। इति प्रभोः त्रयोदश भवा उल्लेखिताः ।

असावनशनं कृत्वा दिनान् द्वाविंशतिं ततः । **ईशान**कल्पे देवोऽभूद् विमाने **श्रीप्रभा**भिधे ॥११२॥
**ललिताङ्गा**भिधानस्य तत्र वैषयिकं सुखम् । भुञ्जानस्यान्यदाऽच्योष्ट प्रिया तस्य **स्वयम्प्रभा** ॥११३॥
हा प्रिये ! देहि मे वाचं प्रलपन्नित्यथोदितः । स्वसामानिकदेवेन सौहार्दाद् दृढधर्म्मणा ॥११४॥
यः पुरा मित्र ! [1]मन्त्रीशः स्वयम्बुद्धस्तवाभवत् । सोऽहं तव वियोगेन [2]प्रव्रज्यैनां श्रितः श्रियम् ॥११५॥
अहं त्वयि ततः स्नेहाद् विज्ञायावधिनाधुना । पुनः **स्वयम्प्रभा**मेनां भाविनीं कथयामि ते ॥११६॥
विद्यते **धातकीखण्डप्राग्विदेहै**कमण्डने । **नागिला**ख्यो गृहपतिर्**नन्दिग्रामे**ऽतिदुर्गतः ॥११७॥
तस्य **नागश्रियां** पत्न्यां पुत्रीषट्काद[3]नन्तरम् । सूताभून्मर्त्यलोकेऽपि नरकक्ष्मेव सप्तमी ॥११८॥
[4]एतस्यां जातमात्रायाममात्रोद्विग्नमानसः । नगरान्निरगाद् दूरं विरागा**न्नागिलः** किल ॥११९॥
दुर्भगत्वेन पुत्र्यास्तु नाम्नोऽप्यकरणादथ । **निर्नामिके**त्यभूत्तस्याः प्रसिद्धिर्जनिता जनैः ॥१२०॥
सा वर्द्धिष्णुः क्रमेणाथ समं दारिद्र्यकर्म्मणा । अगमद् दारुभारार्थं **नभस्तिलक**पर्वते ॥१२१॥
**युगन्धर**मुनिं तत्र सुरासुरनमस्कृतम् । दृष्ट्वा नत्वाथ तद्व्याख्यां श्रुत्वा संवेगतो जगौ ॥१२२॥
"दुःखिनः सन्ति भूयांसो भवेऽस्मिन् भगवन् ! जनाः । मत्तस्तु मन्दभाग्यायाः कोपि दुःखाधिकोऽस्ति किम्" ॥१२३॥
अथो **युगन्धरः** प्राह केवलज्ञानभास्करः । "वत्से ! धत्से मुधा दुःखाद्वैतवैतण्डिकं मनः ॥१२४॥
दुःखानि परतः सन्तु तावन्नरकवासिनाम् । श्रुतमात्राणि भिन्दन्ति हृदयं यानि देहिनाम् ॥१२५॥
परं प्रत्यक्षमेवैते वनेऽपि सुखमानिनः । विनापराधं बध्यन्ते पशवः पश्य पापिभिः ॥१२६॥
दृढं कशाभिस्ताड्यन्ते कर्क्कशाभिस्तुरङ्गमाः । बध्यन्ते चाद्भुतप्राणबन्धुरा अपि सिन्धुराः ॥१२७॥
परद्रव्यपरद्रोहपराः पश्य नरा नृपैः । क्रन्दन्तः करुणं मारैर्निहन्यन्ते नवैर्नवैः ॥१२८॥
स्वस्वामिभावसम्बन्धमुमुरैर्मर्म्मदाहिभिः । वत्से ! स्वर्गेऽपि ताप्यन्ते मरुतो विरतोत्सवाः ॥१२९॥
विलोक्यते न तल्लोके प्रदेशो निरुपप्लवः । आराध्यते न चेदेष धर्म्मः शर्म्मनिबन्धनम् ॥१३०॥
संसारदुःखसंमर्द्दकर्दमे पतताम् अयम् । धर्म एव भुजालम्बं दत्ते नान्यः शरीरिणाम् ॥१३१॥
आराद्धश्च विराद्धश्च चक्रवर्त्तीव देहिनाम् । धर्म्मस्तुष्टश्च रुष्टश्च सुखं दुःखं च यच्छति ॥१३२॥
सुखस्य वत्से ! तद् वाञ्छा यदि ते विद्यते हृदि । आराध्यतां ततो धर्म्मः कल्पनाकल्पपादपः" ॥१३३॥
उपदेशमिति श्रुत्वा मुनेस्त्रैकाल्यदर्शिनः । अनुज्ञां चास्य संप्राप्य दुःखौघक्षयकाङ्क्षया ॥१३४॥
उद्विग्ना निजदेहेऽपि गृहीतानशनाधुना । वर्त्ततेऽस्यास्ततो गत्वा [5]स्वरूपं दर्शय स्वयम् ॥१३५॥ युग्मम् ॥
तथा कृतेऽथ तेनैषा तस्मिन्नेवानुरागिणी । मृत्वा तस्याऽभवद् देवी प्रेमपात्रं **स्वयम्प्रभा** ॥१३६॥

---

१. मन्त्रीशस्वयम्बुद्ध K, L, KH । २. प्रव्रज्यैमां B । ३. नन्तरा A, B, C, P, H । ४. स तस्यां K, L, H, B, KH । ५. स्वं रूपं K, KH, D ।

भोगान् भुक्त्वा तया [1]साकं सौकम्पोऽथ दिवश्च्युतः । क्षेत्रे **महाविदेहे**ऽभूल्लो**हार्गलपुर**प्रभोः ॥१३७॥
सुतः **सुवर्णजङ्घ**स्य प्रतापजितभास्वतः । स **लक्ष्मी**कुक्षिमाणिक्यं **वज्रजङ्घ** इति श्रुतः ॥१३८॥ युग्मम् ॥
नगर्यां **पुण्डरीकिण्यां** च्युत्वा सापि **स्वयम्प्रभा** । चक्रिणो **वज्रसेन**स्य **श्रीमती**ति सुताऽभवत् ॥१३९॥
अन्यदा प्रमदोद्याने क्रीडन्ती समुपागतम् । मुनिं केवलिनं वीक्ष्य वन्दितं देवदानवैः ॥१४०॥
जातजातिस्मृतिर्ज्ञात्वा सा सर्वं पूर्वचेष्टितम् । धात्रेयीं **पण्डिता**माह रहो विश्वासभाजनम् ॥१४१॥ युग्मम् ॥
पुरा ममासी**दीशान**कल्पे हृदयवल्लभः । **ललिताङ्ग** इति ख्यातस्तत्प्रियाहं **स्वयम्प्रभा** ॥१४२॥
स च मच्च्यवनात् पूर्वं च्युतः क्वाप्यभवद् भुवि । न ज्ञायते ततस्तस्य प्रयत्नं प्राप्तये कुरु ॥१४३॥
**पण्डिता**पि श्रुताशेषवृत्तान्तानुगतं [२]पटम् । लेखयित्वा गतोपान्ते **वज्रसेन**स्य चक्रिणः ॥१४४॥
सेवागतानां सर्वेषां कुमाराणामदर्शयत् । दृष्ट्वैतद् **वज्रजङ्घो**ऽपि जातजातिस्मृतिर्जगौ ॥१४५॥ युग्मम् ॥
मम पूर्वभवः सोऽयं **पण्डिते** ! लिखितः कुतः । दिव्यज्ञानवता केन कथितं वा तवाग्रतः ॥१४६॥
एकैकशस्तया पृष्टः पर्वतादिविनिर्णयम् । प्राग्जन्मप्रत्यभिज्ञानात् स यथाभिधमभ्यधात् ॥१४७॥
अथौत्सुकतया वृत्तमनाख्यायापि **पण्डिता** । **श्रीमत्याः** पुरतो गत्वा तद् वृत्तान्तं व्यजिज्ञपत् ॥१४८॥
**वज्रसेनो**ऽपि विज्ञप्तः स्वयं **पण्डितया** तया । **सुवर्ण्णजङ्घ**पुत्रं तं कुमार्या पर्यणीनयत् ॥१४९॥
सोऽथ श्वशुरमापृच्छ्य **लोहार्गलपुरं** गतः । स्वयं जिघृक्षुणा दीक्षां पित्रा राज्ये निवेशितः ॥१५०॥
सुतं **पुष्कलपाला**ख्यं राज्ये कृत्वा स चक्रभृत् । **वज्रसेनो**ऽपि संजज्ञे मुनीभूयाथ तीर्थकृत् ॥१५१॥
अन्यदा **पुष्कल**क्ष्मापं श्रुत्वा शत्रुभिरावृतम् । **वज्रजङ्घो**ऽस्य साहाय्यं कर्त्तुं तन्नगरीं ययौ ॥१५२॥
तत्र शत्रून् विनिर्जित्य **श्रीमत्या** सहितोऽथ सः । व्रजन्निजं पुरं मार्ग्गे विलोक्य मुनिसत्तमौ ॥१५३॥
आत्मीयावेव सौदर्यौ केवलज्ञानशालिनौ । नमश्चक्रे कृती नाम्ना [३][2]**सेनान्तौ मुनिसागरौ** ॥१५४॥ युग्मम् ॥
अथैवं चिन्तयामास **वज्रजङ्घ**नरेश्वरः । अहो मे मन्दभाग्यत्वमहो मे मतिहीनता ॥१५५॥
यदहं प्राप्तवाँल्लक्ष्मीं पितुरुच्छिष्टशेषवत् । एतौ चारित्रसाम्राज्यं प्रापतुः सोदरौ तु मे ॥१५६॥
अधुनापि पुरं गत्वा दत्त्वा राज्यं स्वसूनवे । चारित्राशनिना कर्म्मद्रुमं भस्मीकरोम्यहम् ॥१५७॥
इति निश्चित्य भूपालो **लोहार्गलपुरं** गतः । प्रातर्दित्सुरयं राज्यं प्रसुप्तः **श्रीमती**युतः ॥१५८॥
अज्ञातपरमार्थेन राज्यलोभान्धचेतसा । विषधूमप्रयोगेण घातितो निशि सूनुना ॥१५९॥ युग्मम् ॥
अथो**त्तरकुरुष्वेव** [3]समं दयितया तया । नृपो युगलधर्म्मायुः पल्यत्रयमपालयत् ॥१६०॥
**सौधर्म**कल्पे सङ्कल्पोपनतैः प्रीणितौ सुखैः । स्नेहस्यूतावथाभूतामेककालमुभौ सुरौ ॥१६१॥

---

१. सकाम्यो KH । २. पदम् P, K । ३. सेनान्तमुनिसागरौ P ।

टि. 1. साकम् (अव्य०)=सार्द्धम् । 2. मुनिसेनः सागरसेनः इति नामानौ ।

[1]**वज्रजङ्घ**स्य जीवोऽथ **जम्बूद्वीपे** दिवश्च्युतः । **क्षितिप्रतिष्ठित**पुरे **विदेह**क्षेत्रमण्डने ॥१६२॥
वैद्यस्य **सुविधेः** सूनुर्जज्ञे सत्कर्म्मकर्म्मठः । **जीवानन्दा**ख्यया ख्यातो वैद्यविद्याविशारदः ॥१६३॥ युग्मम् ॥
**ईशानचन्द्र**भूभर्तुस्तत्रैव नगरे तदा । कान्तायां **कनकवत्यां** जज्ञे पुत्रो **महीधरः** ॥१६४॥
**लक्ष्म्यां** च जज्ञे कान्तायां **सुनासीरस्य** मन्त्रिणः । सुतः **सुबुद्धि**र्विख्यातो नाम्ना च क्रियया च यः ॥१६५॥
प्रियायां [१]**शीलवत्यां** च **धना**ख्यश्रेष्ठिनस्तदा । नन्दनो गुणरत्नानामाकरोऽभूत् **गुणाकरः** ॥१६६॥
बभूवा**भयमत्यां** च पत्न्यां सार्थपतेः सुतः । नाम्ना **सागरदत्त**स्य **पूर्णभद्र** इति श्रुतः ॥१६७॥
सोऽप्यत्र **श्रीमती**जीवश्च्युतः **सौधर्म**कल्पतः । बभू**वेश्वरदत्त**स्य श्रेष्ठिनः **केशवः** सुतः ॥१६८॥
एषामपि च पञ्चानां समानगुणशालिनाम् । **जीवानन्दे**न वैद्येन समं मैत्र्यमभूत्तदा ॥१६९॥
सङ्गतानामथामीषामन्येद्युर्वैद्यवेश्मनि । साधुर्माधुकरीं भिक्षां कुर्व्वन् नेत्रपथं ययौ ॥१७०॥
तं **पृथ्वीपाल**भूभर्तुः पुत्रं किल **गुणाकरम्** । तपोनिष्ठमकालान्नपारणैर्वीक्ष्य कुष्ठिनम् ॥१७१॥
**महीधर**कुमारस्तं वैद्यपुत्रं तदाऽवदत् । धिगिदं भिषजां जन्म धिक् तेषां शास्त्रकौशलम् ॥१७२॥
अनीहानां शरीरेऽपि परत्रैव रतात्मनाम् । यदीदृशानां साधूनां नोपकाराय जायते ॥१७३॥
यल्लोकमलमूत्रादिघ्राणान्मालिन्यमर्जितम् । तदिदं क्षाल्यतामद्य मुनेरारोग्यदानतः ॥१७४॥
**जीवानन्दो** जगादैवमथ राजेन्दुनन्दनम् । युवापि वृद्धबुद्धिस्त्वं युक्तमेवोक्तवानिदम् ॥१७५॥
किन्तु दीनारलक्षेण प्रत्येकमपि दुर्ल्लभैः । निगृह्यते यतेरस्य रोगोऽयं भेषजैस्त्रिभिः ॥१७६॥
एतेषु लक्षपाकाख्यं तैलमस्त्येव मद्गृहे । गोशीर्षचन्दनं रत्नकम्बलं च पुनर्न हि ॥१७७॥
इत्युक्ते तेन ते पञ्च विपणिश्रेणिमण्डनम् । कञ्चिन्महेभ्यमभ्येत्य [२]श्रेष्ठिनं श्रेष्ठमूचिरे ॥१७८॥
अपि दीनारलक्षाभ्यां देहि गोशीर्षकम्बलौ । यदाभ्यां कर्तुमिच्छामश्चिकित्सां रोगिणो मुनेः ॥१७९॥
तेषामिति वचः श्रुत्वा विस्मयस्मेरमानसः । जगाद सादरं श्रेष्ठी धन्याः ! शृणुत मद्वचः ॥१८०॥
कुष्ठरोगाभिभूतस्य योग्यावेतौ महामुनेः । राज्येनापि न लभ्येते दूरे दीनारदर्शनम् ॥१८१॥
सन्ति पुण्यनिदानानि यानि दानानि कोटिशः । एतैरारोग्यदानस्य शतांशेनापि नोपमा ॥१८२॥
तद् गृह्णीत विनामूल्यमनुगृह्णीत मां मुदा । श्रेष्ठीत्युक्त्वाऽर्पयामास रत्नकम्बलचन्दने ॥१८३॥
ततस्ते ते समादाय शकुनैः शुभशंसिभिः । **जीवानन्देन** सहिता मुनेरनुपदं ययुः ॥१८४॥
कायोत्सर्गासनासीनमधो न्यग्रोधभूरुहः । बाह्योद्यानेऽथ ते वीक्ष्य नमश्चक्रुर्मुनीश्वरम् ॥१८५॥
ततो मुनिमनुज्ञाप्य तैलेनाभ्यज्य वैद्यसूः । निश्चेतनेऽथ तद्देहे क्षिप्तवान् रत्नकम्बलम् ॥१८६॥

---

१. धनवत्यां P । २. श्रेष्ठिनः B ।

टि. 1. B आदर्शे दक्षिणपार्श्वे वैद्यजीवानंदः १ राजसुतमहीधरः २ मन्त्रिसुबुद्धिः ३ श्रेष्ठिगुणाकरः ४ सार्थपतिपूर्णभद्रः ५ केशवःश्रीमतीजीव इत्युल्लेखः ।

तैलतापेन तेनाथ व्याकुलास्तत्कलेवरात् । निःसृत्य शीतले लीनाः कृमयो रत्नकम्बले ॥१८७॥
अथ गोशबमानीय तस्योपरि दयापरः । कम्बलात् पातयामास कृमीन् वैद्यः कृती स्वयम् ॥१८८॥
गोशीर्षचन्दनस्यन्दैरिन्दुनिस्यन्दसुन्दरैः । शमिनः शमयामास स तापव्यापदं मुदा ॥१८९॥
त्रिर्विधाय क्रियामित्थं कृमीनतुलकौशलः । गोशबे पातयामास त्वङ्मांसास्थिगतानयम् ॥१९०॥
कैश्चिद् दिनैः शमिस्वामी चामीकरसमच्छविः । क्षमितस्तैर्विहाराय पुनर्नववपुर्ययौ ॥१९१॥
श्रेष्ठिप्रष्ठोऽपि भैषज्यदानप्रभववैभवात् । अन्तकृत्केवलीभावं तस्मिन्नेव भवेऽभजत् ॥१९२॥
तेऽपि कम्बलगोशीर्षशेषं विक्रीय काञ्चनैः । प्रासादं कारयामासुः स्वेन लक्षद्वयेन च ॥१९३॥
कियताप्यथ कालेन समं सञ्जातभावनाः । व्रतं प्राप्याच्युते कल्पे शिश्रियुस्त्रिदशश्रियम् ॥१९४॥
द्वाविंश[1]त्यतरायुष्कास्ते सर्वेप्यच्युताच्च्युताः । प्राग्द्वीपप्राग्विदेहेषु तटे **लवण**वारिधेः ॥१९५॥
विजये **पुष्कलावत्यां पुण्डरीकिण्य**धीशितुः । **वज्रसेन**नृपस्यासन् **धारिण्यां** पञ्च सूनवः ॥१९६॥ युग्मम् ॥
अभूत् तेषु भिषग्जीवो **वज्रनाभा**भिधोऽग्रजः । चतुर्दशमहास्वप्न[१]शिष्टसाम्राज्यवैभवः ॥१९७॥
**बाहुः सुबाहुः पीठो**ऽथ **महापीठः** क्रमादमी । जीवास्ततो नृपामात्यश्रेष्ठिसार्थेशजन्मनाम् ॥१९८॥
आसीत् **केशव**जीवोऽपि **सुयशा** राजपुत्रकः । प्राग्भवस्नेहतः सोऽपि **वज्रनाभ**मशिश्रियत् ॥१९९॥
तीर्थप्रवृत्त्यै विज्ञप्तस्ततो लोकान्तिकैः सुरैः । **वज्रसेन**नृपो राज्ये निवेश्य निजमात्मजम् ॥२००॥
सांवत्सरिकदानानि दत्त्वा देवेन्द्रवन्दितः । चारित्रसम्पदा साकं मनपर्याय[२]मार्जयत् ॥२०१॥ युग्मम् ॥
**वज्रनाभ**महीनाथो महीमथ [३]सहानुजः । **सुयश**स्सारथिः शक्रसमलक्ष्मीरपालयत् ॥२०२॥
केवलं **वज्रसेन**स्य तस्य तीर्थकृतस्तदा । चक्रं तु सममेवाभूद् **वज्रनाभ**स्य भूभुजः ॥२०३॥
**वज्रनाभो** विजित्याथ विजयं **पुष्कलावतीम्** । प्राप्तचक्रिपदः कामं धर्म्यकर्माणि निर्ममे ॥२०४॥
अन्यदा जातवैराग्यस्तातपादान्तमागतः । राज्यं न्यस्य सुते दीक्षां सबन्धुर्जगृहे नृपः ॥२०५॥
भवोपग्राहिकर्म्माणि क्षयं नीत्वाथ निर्वृतिम् । **वज्रसेन**प्रभौ प्राप्ते धरायां विजहार सः ॥२०६॥
द्वादशाङ्गधरस्यास्य सिद्धयः सकला अपि । **वज्रनाभ**मुनीन्द्रस्य पादपीठान्तिकेऽलुठन् ॥२०७॥
अन्येऽपि [४]बन्धवस्तस्य समं सुयशसाऽभवन् । एकादशाङ्गपारीणा धुरीणाः [५]शमधारिणाम् ॥२०८॥
[2]विंशत्याराधितैः स्थानैरर्हत्भक्तिपुरस्सरैः । **वज्रनाभ**मुनीन्द्रोऽथ तीर्थकृत्कर्म निर्ममे ॥२०९॥

---

१. ०दिष्ट० L, K । २. मासदत् P । ३. महाभुजः B, H । ४. बान्धवा० K । ५. ऋद्धिधा० K ।

टि. 1. सागरोपम इत्यर्थः । 2. B आदर्शे दक्षिणपार्श्वे अरिहन्तभक्ति १ सिद्धभक्ति २ सङ्घभक्ति ३ गुरुभक्ति ४ स्थविरभक्ति ५ बहुश्रुतभक्ति ६ तपस्वीभक्ति ७ वली वली भणीइ ८ शुद्ध सम्यक्त्व ९ गुणवंत विनय १० उभयप्रतिक्रमण ११ शुद्ध शील १२ सामाइक वली १३ विशेष तप १४ दान यथाशक्ति १५ देव प्रति वेयावच्च १६ पोसह १७ अपूर्वगाथा १८ पुस्तकपूजा १९ प्रभावना २० । इति विंशतिस्थानकनामानि उल्लिखितानि ॥

वैयावृत्त्येन साधूनां बाहुश्चक्रिपदप्रदम् । **सुबाहुस्तु** बलाधायि कर्म निर्मितवान् मुनिः ॥२१०॥
प्रशंसां च तयोश्चक्रे **वज्रनाभ**मुनीश्वरः । तेन **पीठमहापीठौ** प्रकामं दुर्मनायितौ ॥२११॥
तदीर्ष्याजनितं कर्म्म ताभ्यामालोचनां विना । स्त्रीभावफलदं चक्रे मायामिथ्यात्वयोगतः ॥२१२॥

एतच्चाधस्ताद् वक्ष्यते । यथा–

**अइसुद्धिओ त्ति गुणसमुइओ त्ति जो न सहइ जइपसंसम् ।**
**सो परिहाइ परभवे जहा महापीढपीढरिसी ॥२१३॥** त्ति [ उप.मा./गा.६८ ]

क्रमात् षडपि ते पूर्वलक्षान् दीक्षां चतुर्दश । पालयित्वाथ सर्वार्थसिद्धिश्रियमशिश्रियन् ॥२१४॥

इति पूर्वभवाः ।

इतश्च **जम्बूद्वीपे**ऽस्ति **विदेहे**ष्वपरेषु पूः । **ईशानचन्द्र**क्ष्माचन्द्रत्राता नाम्नाऽ**पराजिता** ॥२१५॥
तत्र **चन्दनदास**स्य श्रेष्ठिनो नन्दनोऽभवत् । ख्यातः **सागरचन्द्रा**ख्यो द्राक्षोपमवचस्ततिः ॥२१६॥
कौमुद्यां बाह्यमुद्यानमन्येद्युः सपुरे नृपे । सम्प्राप्ते**ऽशोकदत्ते**न समं मित्रेण सोऽप्यगात् ॥२१७॥
श्रेष्ठिनः **पूर्णभद्र**स्य नन्दिनीं बन्दिसङ्कटात् । असावत्रान्तरे दृष्ट्वाऽमोचयत् **प्रियदर्शनाम्** ॥२१८॥
तावन्योन्यसमालोकप्रमोदहृतमानसौ । छलैकदृष्टेः कन्दर्प्पपिशाचस्य वशङ्गतौ ॥२१९॥
स्वं स्वं गृहमथो[१] यातावन्योन्यविरहातुरौ । न रतिं प्रापतुः क्वापि **कामाज्ञा हि सुदुस्सहा** ॥२२०॥
अथ **सागरचन्द्र**स्य श्रुत्वा तद्विक्रमाद्भुतम् । पिता **चन्दनदासो**ऽस्मै सामधामगिरं जगौ ॥२२१॥
कृथा मा स्म वृथा वत्स ! विक्रमक्रममन्यदा । यतो न वणिजां क्वापि शौर्यमौचित्यमञ्चति ॥२२२॥
अपि **चाशोकदत्तो**ऽयं छद्मनः सद्म जङ्गमम् । सङ्गमस्तेन नैतेन समं कार्यः क्वचित् त्वया ॥२२३॥
ईर्ष्यालुः कोऽपि तातस्य मिथ्यैवेदं न्यवेदयत् । यन्मे वयस्यो मायावी मायावीतमना[1] अपि ॥२२४॥
स स्वच्छप्रकृतिश्चित्ते चिन्तयन्निति सागरः । तातादेशः प्रमाणं मे नित्यमित्यवदत् कृती ॥२२५॥
पराक्रमक्रमे नैव तातादेशव्यतिक्रमम् । करिष्यामीति नीतिज्ञः **सागरः** पितरं जगौ ॥२२६॥ युग्मम् ॥
**चन्दनः पूर्णभद्र**श्च चित्तज्ञौ सुतयोः स्वयोः । कारयाञ्चक्रतुः प्रीत्या पाणिग्रहमहोत्सवम् ॥२२७॥
पत्या **सागरचन्द्रेण** तुल्येन **प्रियदर्शना** । लक्ष्मीर्नारायणेनेव प्रीता नीता कृतार्थताम् ॥२२८॥
मित्रेऽन्यदा बहिर्याते सति तद्धामगामिना । प्रार्थिता**ऽशोकदत्ते**न त्यक्तलज्जेन साऽवदत् ॥२२९॥
त्वं मायातः समायातः किमु रे ! मम मन्दिरे । तुच्छ तद् गच्छ भर्त्ता मे स्वच्छस्त्वां मित्रमिच्छति ॥२३०॥
अथोद्विग्नो विनिर्गत्य **सागरा**ऽग्रेऽब्रवीदिदम् । पत्यास्ते दुश्चरित्रायाः सङ्कटेऽद्यापतं सखे ! ॥२३१॥
श्रुत्वेति **सागरो**ऽप्यूचे क्षणं विकृतमानसः । सखे ! न खेदस्ते दक्ष ! विधातुमुचितः क्वचित् ॥२३२॥

---

१. ०माथायाता० K, L ।

टि. 1. अमायी इत्यर्थः ।

स्नेहानुविद्धयोर्भ्रातरावयोर्मानसक्षितिः । भाविनी नाविनीतायाः कृते तस्याः कदाचन ॥२३३॥
ऋजुप्रकृतिना तेन स दुष्ट इति भाषितः । कामं मुदितचित्तोऽभूत् स्वभावोऽयं दुरात्मनाम् ॥२३४॥
स्वयोषायामदोषायामपि मित्रगिरा तया । **सागरो**ऽभूद् गतप्रेमा ज्ञापयामास तां न तु ॥२३५॥
**प्रियदर्शन**या साकं मृत्वा कालेन सागरः । **जम्बूद्वीपे**ऽत्र **भरत**क्षेत्रार्द्धे दक्षिणेऽभवत् ॥२३६॥
तृतीयारेऽवसर्प्पिण्यां **सिन्धुगङ्गा**न्तरक्षितौ । शेषे पल्योपमाष्टांशे युग्मधर्म्मा रविच्छविः ॥२३७॥ युग्मम् ॥
माय**याशोकदत्तो**ऽपि सञ्जज्ञेऽत्रैव कुञ्जरः । चतुर्दन्तसितच्छायकायस्तं दृष्टवान् भ्रमन् ॥२३८॥
अयं मया क्वचिद् दृष्ट इत्यन्योन्यं सचिन्तयोः । तयोः स्मृतिपथं यातः स्नेहः पूर्वभवोद्भवः ॥२३९॥
प्राग्भव[१]स्मरणात् ज्ञातनीतिः [२]स्कन्धाऽधिरोपितः । करिणा तेन स [३]ख्यातिं लेभे [1]**विमलवाहनः** ॥२४०॥
प्रभावादवसर्प्पिण्या युग्मिनां ममताजुषाम् । न ददुर्वाञ्छितं कल्पतरवः स्तोकतां गताः ॥२४१॥
ममायमिति कल्पद्रुविषये कलहाकुलाः । अभवन् [४]मार्गगास्ते तु तस्य **हाकारदण्डतः** ॥२४२॥
तस्य [५]**चन्द्रयशा**नाम्नि कलत्रेऽभवदन्यदा । धनुरष्टशतीतुङ्गं प्राच्यसंहननं [६]शिति ॥२४३॥
विलुप्तसङ्ख्यपूर्वायुः प्रथमं मिथुनं किल । **चक्षुष्मांश्चन्द्रकान्ता** चेत्यनयोर्नाम कल्पितम् ॥२४४॥ युग्मम् ॥
जरारोगौ विना मृत्वा ततो **विमलवाहनः** । **सुपर्णाख्य**कुमारेषु सुपर्वा समजायत ॥२४५॥
**नागलोके**ष्वभूच्च**चन्द्रयशा** अपि मृता ततः । आगान्**नागकुमारेषु** कुञ्जरोऽपि च्युतस्ततः ॥२४६॥
अन्त्य[७]कालेऽथ **चक्षुष्मान**पि युग्ममजीजनत् । **यशस्वी च सुरूपा** च **चन्द्रकान्ता**ङ्गसम्भवम् ॥२४७॥
**चक्षुष्मान्** स **सुपर्णे**षु मृत्वोत्पेदे[८]ऽमृताशनः । **चन्द्रकान्ता**पि **नागे**षु समानसमयं किल ॥२४८॥
अथो **यशस्विन**स्तस्य पितृवत् प्रभुताजुषः । धाष्टर्योल्लङ्घितहाकारनीतिभिर्मिथुनैः स्थितम् ॥२४९॥
तच्छासनाय **माकारदण्डं** चक्रेऽथ स प्रभुः । यथापराधं प्रायुङ्क्त नीतिद्वयमथ क्रमात् ॥२५०॥
**अभिचन्द्रो**ऽभवत् पुत्रः **प्रतिरूपा** च कन्यका । गौरश्यामरुची पत्न्यां **सुरूपा**यां यशस्विनः ॥२५१॥
**यशस्व्यब्धिकुमारो**ऽभूत् **सुरूपा** त्वस्य वल्लभा । विपद्य **समम**े**वाहिकुमारः** समजायत ॥२५२॥
पुत्रः **प्रसेनजिन्**नाम **चक्षुष्कान्ता** च नन्दिनी । **अभिचन्द्र**स्य जज्ञाते **प्रतिरूपा**ङ्गसम्भवौ ॥२५३॥
**अभिचन्द्रो** विप**द्याब्धिकुमारे**षूदपद्यत । सहैव **प्रतिरूपा** तु जज्ञे **नागकुमारकः** ॥२५४॥
पितृवद् युग्मिनां शास्ति **प्रसेनजिति** कुर्वति । सति हाकारमाकारलङ्घने धाष्टर्यतः पुनः ॥२५५॥
**धिक्कारनीतिं** निर्माय निर्मायः क्रमशस्त्रिभिः । दण्डैरमीभिश्चण्डाज्ञो मिथुनानि शशास सः ॥२५६॥ युग्मम् ॥

---

१. ०स्मरण० L । २. स्कन्धेधिरोपितः K, D । ३. ०ख्यातो जते K, L । ४. मार्गगाः सर्वे० P । ५. ०चन्द्रयशो B, K, H । ६. शितिः K । ७. ०काले च B, K, L, H । ८. सुधाशनः K, L ।

टि. 1. B आदर्शे पत्रोपरितनपङ्क्तौ विमलवाहन-चन्द्रयशा १। चक्षुःमान् चन्द्रकान्ता २। यशस्वी सुरूपा ३। अभिचन्द्र प्रतिरूपा ४। प्रसेनजित् चक्षुःकान्ता ५। मरुदेव श्रीकान्ता ६। श्रीनाभिमरुदेवा ७। इति सप्तयुगलिकनामानि उल्लिखितानि ।

**चक्षुष्कान्ता** च तत्कान्ता **मरुदेवं** तनूद्भवम् । सुतामसूत **श्रीकान्ता**भिधानां चेति युग्मिनौ ॥२५७॥
मृत्वा **प्रसेनजित् द्वीपकुमारे**ष्वथ निर्जरः । **चक्षुष्कान्ता** तु **नागेषु** समकालं बभूवतुः ॥२५८॥
पितृवन्**मरुदेव**स्य शासतोऽथ प्रजा निजाः । **श्रीकान्ता**यां सपादाग्रधनुःपञ्चशतोच्छ्रयौ ॥२५९॥
**नाभिः** [1]स्वर्णसनाभिश्री**मरुदेवा** प्रियङ्गुरुक् । समजायत पुत्रश्च पुत्री च यमजातकौ ॥२६०॥ युग्मम् ॥
[2]सङ्ख्यातपूर्वप्रमितं तयोरायुरजायत । स्वपित्रोरायुषः किञ्चिन् न्यूनमन्यूनपुण्ययोः ॥२६१॥
प्राप **द्वीपकुमारत्वं मरुदेवो** विपद्य सः । **श्रीकान्ता** तस्य कान्ता नु तदै**वाहिकुमार**ताम् ॥२६२॥
अथो विदधतो **नाभे**र्युग्मिनामनुशासनम् । तृतीयारस्य शेषेषु पूर्वलक्षेषु केषुचित् ॥२६३॥
आयुर्भुक्त्वा त्रयस्त्रिंशत्सागरोपम[3]संमितम् । जीवः श्री**वज्रनाभ**स्य च्युत्वा **सर्वार्थसिद्धि**तः ॥२६४॥
कृष्णाषाढचतुर्थेऽह्न्युत्तराषाढस्थिते विधौ । कुक्षौ श्री**मरुदेवा**याः स देवः समवातरत् ॥२६५॥ त्रिभिर्विशेषकम् ॥
अवतारे प्रभोस्तत्राऽत्यद्भुते भुवनत्रयम् । ध्वस्तध्वान्तं सुखिस्वान्तं शान्तदुःखमभूत् क्षणम् ॥२६६॥
वृषेभसिंहश्रीदामचन्द्रादित्यान् ध्वजं घटम् । सरोवार्द्धिविमानानि रत्नौघज्वलितानलौ ॥२६७॥
एतान् लोकोत्तरैश्वर्यप्रभावाद्भुतसूचकान् । तदा चतुर्दश स्वप्नान् **मरुदेवी** व्यलोकयत् ॥२६८॥ युग्मम् ॥
अथ प्रातः प्रबुद्धासौ **नाभेः** स्वप्नानचीकथत् । सोऽप्युवाचेति पुत्रस्ते भावी कुलकरोत्तमः ॥२६९॥
अथासनप्रकम्पेन विज्ञायावतरं प्रभोः । समं समन्तात्तत्रैत्य स्वप्नार्थं वज्रिणो जगुः ॥२७०॥
**मरुदेवीं** नमस्कृत्य ततः सर्वे सुरेश्वराः । जग्मुर्निजं निजं स्थानममन्दानन्दमेदुराः ॥२७१॥
निधानं रत्नगर्भेव बिभ्राणा गर्भमद्भुतम् । दिनेषु परिपूर्णेषु **श्यामे चैत्राष्टमीदिने** ॥२७२॥
**उत्तराषाढया** युक्ते विधावुच्चैः शुभग्रहैः । देवी युगलधर्म्माणं सुतरत्नमसूत सा ॥२७३॥ युग्मम् ॥
सुखैस्तदोदितं वातैर्मुदितं नारकैरपि । जगत्त्रयेऽपि तेजोऽभूदनदद् दिवि दुन्दुभिः ॥२७४॥
पीठकम्पावधिज्ञानात् ज्ञात्वादिजिनजन्म तत् । अष्टाधोलोकवासिन्यः समीयुर्दिक्कुमारिकाः ॥२७५॥
**भोगंकरा भोगवती तोयधाराप्यनिन्दिता । सुभोगा पुष्पमाला च विचित्रा भोगमालिनी** ॥२७६॥
आभिर्नत्वा च [4]नुत्वा च भेतव्यं नेत्युदीर्य च । हेतुरागमने स्वामिमातुस्तथ्यमकथ्यत ॥२७७॥ युग्मम् ॥
उत्तरस्यां दिशि स्तम्भसहस्रं प्राङ्मुखं च ताः । वातपूतद्विगव्यूति व्यधुः सूतिगृहं बृहत् ॥२७८॥
उत्तंसाम्भोजभृङ्गालिध्वानस्थानप्रदानतः । प्रीता गीतानि गायन्त्यो नत्वा प्रभुमभिस्थिताः ॥२७९॥
ज्ञात्वा कम्प्रासनादेत्य मेरुस्थास्तूर्ध्वलोकगाः । प्रणेमुर्दिक्कुमार्योऽष्टौ जिनं तज्जननीमपि ॥२८०॥
**मेघङ्करा वत्समित्रा सुवत्सा मेघमालिनी । सुमेघा मेघमाला च वारिषेणा बलाहिका** ॥२८१॥
क्लृप्ताम्बुदा मुदा हृत्वा रेणुं सुरभिवारिणा । आयोजनं ततः पुष्पैर्वृष्टिं पञ्चविधैर्व्यधुः ॥२८२॥ युग्मम् ॥

---

१. स्वर्णसमानश्रीर्मरु P । २. संजातपूर्वममितं P । ३. संस्थितं K, D । ४. स्तुत्वा L ।

अभ्येत्य दिक्कुमार्योऽष्टौ पौरस्त्य**रुचका**द्रिगाः । नेमुर्जिनं तदम्बां च करस्फुरितदर्प्पणाः ॥२८३॥
**नन्दानन्दोत्तरानन्दावैजयन्त्यपराजिताः । जयन्ती विजया** चैव किं चान्या **नन्दिवर्द्धना** ॥२८४॥
आयाता दिक्कुमार्योऽष्टावपाच्य**रुचका**द्रिगाः। नत्वा मात्रा समं नाथं सभृङ्गाराः सगीतयः ॥२८५॥
**लक्ष्मीवती चित्रगुप्ता समाहारा वसुन्धरा । सुप्रबुद्धा शेषवती सुप्रदत्ता यशोधरा** ॥२८६॥
अथ प्रतीची**रुचका**दुपेत्याष्टौ कुमारिकाः । नत्वार्हन्तं च देवीं च तस्थुर्व्यजनपाणयः ॥२८७॥
**भद्रा नवमिका सीता** [1]**एकनासा पृथिव्यथ । इलादेवी-सुरादेवी-पद्मवत्य** इति श्रुताः ॥२८८॥
उदीची**रुचका**दष्टावागता दिक्कुमारिकाः । नत्वा जिनं जिनाम्बां च चामराणि करे दधुः ॥२८९॥
**वारुणी पुण्डरीका** च **हासा ह्री श्रीरलम्बुसा** । ख्याताः **सर्वप्रभा** [2]**मुञ्जकेशी** चेत्यभिधानतः ॥२९०॥
अष्टाष्टदिक्कुमार्यस्ताः पौरस्त्य**रुचका**द्रितः । विज्ञप्य पूर्ववद् देवीं दिक्षु पूर्वादिषु स्थिताः ॥२९१॥
निपीतस्फीतपीयूषपूरोद्गारवरैः स्वरैः । तेनुर्जिनगुणग्रामगानमानन्दमन्दिरम् ॥२९२॥ दशभिः कुलकम् ॥
विदिशां **रुचका**देत्य चतस्रो दिक्कुमारिकाः । नत्वा देवं च देवीं च गायन्त्यो दीप्तदीपिकाः ॥२९३॥
[3]**सतेरा चित्रकनका चित्रा सौत्रामणी** तथा । विज्ञप्य पूर्ववत् तस्थुरैशान्यादिविदिक्षु ताः ॥२९४॥ युग्मम् ॥
चतस्रो दिक्कुमार्योथ **रुचक**द्वीपतोऽभ्ययुः । [4]**सुरूपारूपिकावत्यौ रूपारू**[5]**पासिके** तथा ॥२९५॥
चतुरङ्गुलतो बालनालं छित्त्वा न्यधुर्दरे । तत्र रत्नादिना पूर्णे दूर्वया पीठिकां व्यधुः ॥२९६॥
सिंहासनचतुःशालजुषस्त्रीन् कदलीगृहान् । चक्रुश्च मौलप्रासादात् प्राचीनोत्तरदक्षिणान् ॥२९७॥
अभ्यङ्गमुभयोश्चक्रुश्चतुःशालेऽथ [6]दक्षिणे । लक्षपाकेन तैलेन दिव्यमुद्वर्त्तनं च ताः ॥२९८॥
संस्नप्य प्राक्चतुःशाले लिप्त्वा गोशीर्षचन्दनैः । ताश्च व्यभूषयन् दिव्यचेलालङ्करणैरुभौ ॥२९९॥
ताश्चोत्तरचतुःशालपीठमानीतयोस्तयोः । हुत्वा हिमाद्रिगोशीर्षं रक्षापोट्टलिकां व्यधुः ॥३००॥
पर्वतायुर्भवेत्युक्त्वा कर्णाभ्यर्णे जिनस्य ताः । स्फारमास्फालयामासुराशु पाषाणगोलकौ ॥३०१॥
अथो जिनं जिनाम्बां च नीत्वा सूतिनिकेतने । मुदा तल्पे समारोप्य गायन्त्यस्तस्थुरन्तिके ॥३०२॥
नेदुर्दिवि तदा घण्टाश्चकम्पे वासवासनैः । अहो किमिदमित्येवमासदद् द्युसदां भयम् ॥३०३॥
क्रुद्धो बद्धोद्यमः पूर्वं शक्रो विक्रमकेसरी । सावधानोऽवधिज्ञानात् ज्ञात्वा जन्म जगद्गुरोः ॥३०४॥
कोपाटोपं समुत्सृज्य मुक्तसिंहासन[7]स्थितिः । द्राग् मिथ्या दुष्कृतं कृत्वा नत्वा च त्रिजगद्गुरुम् ॥३०५॥
समं समस्तैर्गीर्वाणैर्विधित्सुर्जिनमज्जनम् । आदिदेश निदेशस्थं सेनान्यं **नैगमेषिणम्** ॥३०६॥ विशेषकम् ॥
तद्वादित**सुघोषा**ख्यघण्टया सह सर्वतः । नादाद् विमानघण्टानामधावन्त सुधाभुजः ॥३०७॥

---

१. एकनाशा B, एकनाथा K, D । २. मिश्रकेशी त्रिषष्टि० द्वितीयसर्गः श्लोक-२९७ । मित्रकेशी C । मंजुकेशी D । ३. सुतारा L । ४. स्वरूपा L, K, H, B । ५. रुपांसिके L, B, रुपाशिका त्रिषष्टि० द्वितीयसर्गः श्लोक-३०१ । ६. प्रदक्षिणे L, K, H । ७. स्थितः P ।

पञ्चयोजनशत्युच्चं लक्षयोजनविस्तृतम् । पालकः पालकं यानं चक्रे शक्रनिदेशतः ॥३०८॥
महिषीभिः सहामात्यैः साकं नाकेश्वरस्ततः । भेजे विमानं व्योमेव विधुस्ताराग्रहावृतः ॥३०९॥
अथ **नन्दीश्वर**द्वीपे गत्वा **रतिकरे** गिरौ । विमानं तत्र सङ्क्षिप्य प्राप्तो जिनजनेर्गृहम् ॥३१०॥
[१]प्रदक्षिणिततीर्थेशसौधः **सौधर्म्मनायकः** । तद्विमानमुदक्प्राच्यां संस्थाप्य प्रभुमभ्यगात् ॥३११॥
दृष्टमात्रं जिनं मात्रा समं नत्वा सुरेश्वरः । त्रैधं प्रदक्षिणीकृत्य कृत्यवित् प्रणनाम च ॥३१२॥
मुदाथ द्युसदां नाथः प्राह सोत्साहमानसः । **मरुदेव्याः** पुरो जन्ममहिम्ने स्वं समागतम् ॥३१३॥
दत्त्वाऽवस्वापिनीं देव्याः प्रतिच्छन्दं जगत्पतेः । स्थापयित्वा तदन्ते च पञ्चमूर्त्तिर्बभूव सः ॥३१४॥
एकः पुरः सुरस्वामी भुवनस्वामिनं व्यधात् । गोशीर्षचन्दनामोदशस्ते हस्ताम्बुजद्वये ॥३१५॥
छत्रमत्र दधारैकश्चामरे परितोऽप्युभौ । एको वेत्रीव निर्दम्भो दम्भोलिं पुरतो हरिः ॥३१६॥
रङ्को रत्नमिवासाद्य माद्यन्[1]नृभुविभुः प्रभुम् । निधाय हृदये यत्नादगमन्मेरुमूर्द्धनि ॥३१७॥
शिलया **पाण्डक**वने **पाण्डुकम्बल**या [२]धृतम् । अध्यास्त वासवः स्नात्रपीठमुत्सङ्गितप्रभुः ॥३१८॥
अस्मिन्महे महोत्साहा घण्टानिर्घोषबोधिताः । इन्द्रास्त्रिषष्टिराजग्मुरपरे सपरिच्छदाः ॥३१९॥
**अच्युतेन्द्रो**ऽथ सौवर्णान् रौप्यान् मणिमयानपि । हेमरौप्यहेमरत्नरत्नरौप्यमयानपि ॥३२०॥
हेमरौप्यमणिमयान् भौमांश्च कलसान् सुरैः । अष्टोत्तरसहस्रं स तान् प्रत्येकमचीकरत् ॥३२१॥ युग्मम् ॥
कुम्भवत्पात्रिकारत्नकरण्डस्थालदर्प्पणान् । भृङ्गारपुष्पचङ्गेरीसुप्रतिष्ठानकारयत् ॥३२२॥
क्षीरोदपुष्करोदाभ्यामम्भः साम्भोरुहं तदा । समृत्स्नं चान्यतीर्थेभ्यो **भरतैरावता**दितः ॥३२३॥
आनिन्यिरे **पद्म**ह्रदादिके च **क्षुद्रहिमाद्रि**तः । [३]तुवरौषधिसिद्धार्थकुसुमानि च ते सुराः ॥३२४॥
**नन्दनात् पाण्डकाद् भद्रशालात् सौमनसाच्च** ते । गन्धद्रव्याण्युपानीय पानीयान्तर्निचिक्षिपुः ॥३२५॥
कुम्भानम्भोभिरापूर्य [४]स्फूर्जत्तूर्यरवोर्जितम् । क्षिप्त्वा पुष्पाञ्जलीन् शक्राः स्नात्रमासूत्रयन् विभोः ॥३२६॥
उन्मृज्य गन्धकाषाय्या व्यलिम्पन्नथ ते विभुम् । पात्रिकान्यस्तगोशीर्षद्रवैर्भावैरिवात्मनः ॥३२७॥
[५]अभ्यर्च्चितोऽङ्के दध्रेऽथ प्रभुरीशानवज्रिणा । **सौधर्माधिप**वद्भक्त्या मूर्त्तीः पञ्च वितन्वता ॥३२८॥
शृङ्गोच्छलज्जलान् दिक्षु चतुरश्चतुरो वृषान् । विधाय विदधे स्नात्रं **सौधर्म्मेन्द्रो**ऽप्यथ प्रभोः ॥३२९॥
पूजाविलेपनाकल्पैरनल्पा मोदमेदुरैः । विभुं विभूषयामास दासवद् वासवः स्वयम् ॥३३०॥
ततश्च पृथिवीपीठविलुठन्मौलिमण्डलः । नमस्कृत्य जगन्नाथं हृष्टस्तुष्टाव भावतः ॥३३१॥

---

१. प्रदक्षणित० H, P, B । २. वृतम् H, P, B । ३. तुंवरौ K, तुबरौ P । ४. स्फूर्यत्तूर्य० L । ५. अभ्यश्चिताङ्के D, K, L, C ।

टि. 1. ऋभुः (पु०)-देवः, तेषाम् विभुः =इन्द्रः ।

''नमस्ते विश्वनाथाय विश्वानन्दप्रदायिने । विश्वोत्तरचरित्राय विश्वताताय तायिने ॥३३२॥
श्री**युगादि**जगन्नाथ ! कृतावतरणे त्वयि । अद्याभूद् **भरत**क्षेत्रं पवित्रं त्रिदिवादपि ॥३३३॥
गते काले महामोह[१]मेघव्यूहतमोमये । दिष्ट्या दृष्टा भवन्मूर्त्तिर्नेत्रकैरवकौमुदी ॥३३४॥
अस्मिन्जन्मनि मन्येऽहं धन्यमद्यतनं दिनम् । यत्र त्वत्पदपद्माभ्यां शिरः सुरभितं मम ॥३३५॥
श्रीजिनेश ! दिनेशस्त्व[२]मपूर्वः प्रथितोदयः । उर्व्यां सर्वज्ञ ! कुर्व्वीथाः शाश्वतं सुदिनोत्सवम्'' ॥३३६॥
**ईशानेशा**दथो नाथं गृहीत्वा पञ्चरूपभाक् । यथागतं **सुधर्म्मेन्द्रः** सूतिकासदनं ययौ ॥३३७॥
विनिवर्त्य प्रतिच्छन्दं विभुं तल्पे निवेश्य च । वाससी कुण्डले चात्र मुमुचे [1]नमुचे रिपुः ॥३३८॥
अस्तन्यपाननिष्ठस्य निजाङ्गुष्ठशिखालिहः । सुधा सुधाभुजां भर्त्रा न्यधायि स्वामिनोऽङ्गुले ॥३३९॥
अथ धाम्नि प्रभोः स्वर्णरत्नवस्त्रासनादिकम् । सारं सांसारिकं सर्वं **श्रीदे**नैष [३]न्यधापयत् ॥३४०॥
जिनस्य जिनमातुर्वा योऽवद्यं चिन्तयिष्यति । तन्मूर्द्धा शतधा भावीत्युच्चैर्गिरमुदीर्य सः ॥३४१॥
धात्रीकर्म प्रपञ्चाय तत्पञ्चाप्सरसो हरिः । आदिदेश [2]सदेशस्थाः शश्वद्विश्वत्रयीगुरोः ॥३४२॥ युग्मम् ॥
**सौधर्मेन्द्र**स्तदानन्दी **नन्दीश्वर**वरं गतः । स्पष्ट[४]मष्टा[५]ह्निकां चक्रे परैः सह पुरन्दरैः ॥३४३॥
परेऽपि सर्वे सर्वेषु शाश्वतार्हतसद्मसु । यथाविधि महं कृत्वा यथागतमगुः सुराः ॥३४४॥
ऋषभश्चिह्नमूरुस्थं स्वप्ने [६]प्रागृषभोऽप्यभूत् । प्रभो **ऋषभ** इत्याख्यां चक्रतुः पितरौ ततः ॥३४५॥
[७]बाल्यस्थः पाल्यमानोऽथ सुरस्त्रीभिः स पञ्चभिः । दधौ वृद्धिं समितिभिः साक्षात् संयमवत्प्रभुः ॥३४६॥
तद्युग्मजन्मधन्यायाः कन्याया नाम चक्रतुः । **सुमङ्गले**ति [८]सम्प्रीतौ नितरां पितरावथ ॥३४७॥
वत्सरे स्वामिनः पूर्णे जनकोत्सङ्गसङ्गिनः । **सौधर्मेन्द्रो**ऽन्वयस्थित्यै सेक्षुयष्टिः पुरोऽभ्यगात् ॥३४८॥
प्रभुर्ज्ञातेन्द्रसङ्कल्पो जग्राहेक्षुलतां च ताम् । **इक्ष्वाकु**संज्ञं कृत्वेति वंशं भर्तुर्ययौ हरिः ॥३४९॥
विभुर्भक्त्याऽऽगतैर्देवैरेव रम्यमरम्यत । नित्यमत्यद्भुतानेकरूपनिर्माणकर्मठैः ॥३५०॥
प्राप्य प्रभुरथाङ्गुष्ठपानावस्थातिगं वयः । अप्रीयत फलैर्दिव्यैस्तै**रुत्तरकुरू**द्भवैः ॥३५१॥
स्वामी क्रमात् प्रवर्द्धिष्णुः स्पर्द्धिष्णुः कल्पपादपम् । सौभाग्यरूपभूपालभवनं यौवनं ययौ ॥३५२॥
पद्मन्यत्कार[९]सातङ्कसकुटुम्बेन्दुसेविते । प्रभोर्नखमणिव्याजात् पादपद्मे [१०]विराजतः ॥३५३॥
भुजौ भातः प्रभोः [3]श्राद्धसाधुधर्मधरो[११]द्धृतौ । भुजगेन्द्राविवोन्निद्रनखरत्नाङ्गुलीफणौ ॥३५४॥
अन्योन्यमुपमीयन्ते करांह्रिनयनादयः । प्रभोर्[4]मुकुरबिम्बे तु नाभिहृद्वदनादयः ॥३५५॥

---

१. ०मेघद्यूत० K, D, । २. ०मपूर्वप्रथितोदयः C, H, B, ०मपूर्वं प्रथितो० A । ३. व्यधापयत् P, B, A, H । ४. ०ष्टाम० K, B । ५. ०न्हिकां० A । ६. प्राग्वृष० A, B । ७. कल्पस्थ P । ८. सप्रीतौ० K, L, D । ९. सामंत P । १०. विराजितः A । ११. ०रोद्वृतौ C, L, A, B, P, ०रोद्भृतौ K, D ।

टि. 1. इन्द्रः । 2. सदेशः (पु०)-समीपम् । 3. श्राद्धसाधुधर्म एव धरा, पृथ्वी, तस्याः उद्धृतिः, तद्विषये भुजगेन्द्रौ इव भुजौ । 4. मुकुरः (पु.) दर्पणः ।

कारुण्यशाली तारुण्यचारुण्यङ्के जगद्गुरुः । अपीप्यत द्युतिपयस्[१]तृषिता जनतादृशः ॥३५६॥
बालकेलिरसोत्तालस्तालद्रुमतलेऽन्यदा । दारकः फलपातेन कुतोऽपि मिथुनान्मृतः ॥३५७॥
अथान्यमिथुनैर्बाला [1]परासुपितृवल्लभा । [2]जातरूपसदृग्जातरूपश्रीर्नाभयेऽर्प्पिता ॥३५८॥
साऽपि शापच्युतेव श्रीर्नयनानन्दकौमुदी । नन्दिनीव सुनन्दाख्या नाभिना साभिनन्दिता ॥३५९॥
[२]त्र्यशीतिः पूर्वलक्षाणि यावद्भोगफलोदयम् । प्रभुः स्वस्यावधिज्ञानाज्जानन् शक्रकृतोत्सवः ॥३६०॥
[३]**सुमङ्गला-सुनन्दे** ते रतिप्रीतिनिभे ततः । निरस्तदर्प्पः कन्दर्प्पवर्यः पर्यणयज्जिनः ॥३६१॥ [युग्मम्]
अधादपूर्णषट्पूर्वलक्षा गर्भे **सुमङ्गला** । तौ **बाहु-पीठयो**र्जीवौ च्युतौ सर्वार्थसिद्धितः ॥३६२॥
**सुनन्दा**पि कृतानन्दा तदानीमुदरे दधौ । तौ **सुबाहु-महापीठौ** तत एव दिवश्च्युतौ ॥३६३॥
दृष्ट्वा चतुर्दशस्वप्नानथ देवी **सुमङ्गला** । स्वाम्युक्तचक्रिमातृत्वप्रीता युग्ममसूत सा ॥३६४॥
सुतो **भरत** इत्यस्या **ब्राह्मीति** च सुताऽभवत् । **सुनन्दा बाहुबलिनं सुन्दरीम**प्यजीजनत् ॥३६५॥
पुनरेकोनपञ्चाशत्पुत्रयुग्मानि [3]जीवसूः । असूत भूतलस्यूतमङ्गलानि **सुमङ्गला** ॥३६६॥
तदा च स्वामिनो [4]दानाद्भुतादिव विलज्जितैः । कल्पद्रुमैरदृश्यत्वं तैर्जग्मे युग्मधर्म्मिणाम् ॥३६७॥
मिथोऽथ मिथुनैः कालयोगात् कलिकदर्थितैः । एत्य व्यज्ञप्यत स्वामी समन्तादसमञ्जसम् ॥३६८॥
ज्ञानत्रययुतो वाचमुवाचेति ततो विभुः । जनान् विनयते राजा न्यायवर्त्मातिवर्त्तिनः ॥३६९॥
सोऽर्प्यतामिति तैरुक्ते पिता दातेति सोऽवदत् । **नाभिना**पि समादिष्टं भूयस्तं भूपमभ्यगुः ॥३७०॥
वाचा तस्याभिषेकाय विवेकायत्तचेतसः । ते जग्मुर्युग्मिनस्तूर्णं पयसे नयसेविनः ॥३७१॥
तदा चासनकम्पेन शक्रोऽप्यवधिबोधितः । कालं मत्वाभिषेकस्य प्रभोरभ्यर्णमभ्यगात् ॥३७२॥
क्लृप्तकल्याणवेद्यन्तर्स्सिंहासनजुषः प्रभोः । चक्रे शक्रस्ततो राज्याभिषेकं तीर्थवारिभिः ॥३७३॥
गङ्गावीचीवरैः प्रीतश्चीवरैस्तं शचीवरः । विभुं व्यभूषयद् विश्वभूषणं भूषणैरपि ॥३७४॥
युग्मान्यप्यब्जिनीपात्रैस्तोयमानीय चिक्षिपुः । भूषितस्य विभोर्योग्यं न मूर्ध्नीति पदाब्जयोः ॥३७५॥
तानि मत्वा विनीतानि मिथुनानीति नीतिवित् । **धनदेन विनीता**ख्यां शक्रः पुरमचीकरत् ॥३७६॥
विस्ताराऽऽयामसम्पूर्णनवद्वादशयोजनाम् । **अयोध्ये**त्यन्यनामानं स दिव्यां नगरीं व्यधात् ॥३७७॥
विंशतौ पूर्वलक्षाणां पूर्णायां जन्मतो विभुः । **अयोध्याया**मभूद् भूपः प्रजापालनपण्डितः ॥३७८॥
रूक्षस्निग्धेन कालेन जातेऽग्नौ तरुषु स्वयम् । स्वामिना चक्रिरे कुम्भकारप्रमुखकारवः ॥३७९॥
**भरताय** कला **बाहुबलये**ऽश्वादिलक्षणम् । **ब्राह्म्यै** लिपीश्च **सुन्दर्यै** गणितं चादिशत् प्रभुः ॥३८०॥

---

१. तृषितान् लोकदृग्मृगान् H, लोकदृग्मुखान् A, B । २. त्र्यशीति KH, D, त्र्यशीतिं B, A, H । ३. निरस्तदर्पकन्दर्पवर्यः H, निःस्तदर्पः कन्दर्पवर्यः L ।

टि. 1. परासुः= मृताः पितरौ वल्लभश्च यस्याः सा इत्यर्थः । 2. जातरूप....सुवर्णसदृशं जातं रूपं शोभा च यस्याः । 3. जीवसूः जीवन्तः सुताः यस्या सुमङ्गलाया विशेषणम् । 4. दानविषये अद्भुतः दानाद्भुतः तस्मात् स्वामिनः ।

विधाय विधिवद्विश्वान् विश्वनाथो नियोगिनः । अदैन्यानि च सैन्यानि राज्यं प्राज्यमपालयत् ॥३८१॥
निःशङ्का निर्विपत्पङ्का निरातङ्का निरागसः । निरीतयः प्रजास्तस्मिन् बभुर्वसुमतीपतौ ॥३८२॥
सस्यान्य[1]कृष्टपच्यानि धेनवः कामधेनवः । विसृष्टवृष्टयः काले जलदाः फलदा द्रुमाः ॥३८३॥
[2]राजन्वत्यां तदा तेन भुवनस्वामिनाऽवनौ । जातः [१][3]शूरोऽपि न क्रूरः कराक्रान्तिकृतौ कृती ॥३८४॥
आज्ञामात्रे धरित्रीशान् [२]कुर्वत्यस्य वशंवदान् । स स्मरो यदि सस्मार केवलं चापचापलम् ॥३८५॥
इत्थं त्रिवर्गसंसर्गसुभगंभावुकाः प्रजाः । त्रिषष्टिः पूर्वलक्षाणां जज्ञे पालयतः प्रभोः ॥३८६॥
अन्यदा शिशिराक्रान्तं जगदानन्दयन्नयम् । वसन्तर्तुर्जगद्भर्तुः सेवां कर्त्तुमिवाययौ ॥३८७॥
मधुर्विधाय वासन्तीं पुष्पाभरणभूषिताम् । चक्षुर्दोषभिया [4]भृङ्गमषीबिन्दुसखीं व्यधात् ॥३८८॥
सहकारं सहुङ्कारं किल कोकिलकूजितैः । पथिकाः पथि कामस्य भृत्यं मृत्युममंसत ॥३८९॥
कन्दर्प्पो दर्प्पवानाज्ञाभङ्गवध्यान् वियोगिनः । पश्यत्यन्तर्वणं कुर्व्वन्नुच्चैश्चम्पकदीपकान् ॥३९०॥
सारो मधुरसैरन्तरुद्भिन्नमधुभाण्डवत् । मधुपानां कलकलैर्व्याकुलो बकुलोऽभवत् ॥३९१॥
पुष्पोल्लासैः सहासेव सगीतेवालिनिःस्वनैः । वधूरिव मधून्मत्ता वनलक्ष्मीरलक्ष्यत ॥३९२॥
[5]हल्लीसकलयाद्वल्लीर्वेल्लत्पल्लवपाणिभिः । अनीनटन् नटाचार्यकलया मलयानिलः ॥३९३॥
तदोत्कण्ठितचेतोभिः प्रेरितो **भरता**दिभिः । जगाम जनितानन्दं नन्दनं **नाभिनन्दनः** ॥३९४॥
पिकीनां पञ्चमोच्चारैर्भृङ्गीसङ्गीतनिःस्वनैः । असमैः कुसुमैर्भर्त्तुर्वनश्रीः स्वागतं व्यधात् ॥३९५॥
पुष्पवेश्मकृतावासे पुष्पभूषणभूषिते । तत्र पुष्पासनासीने [6]पुष्पमास इव प्रभौ ॥३९६॥
यशोभिर्वासिते विश्वे विश्वतः स्वामिनामुना । किमेतैरिति पुष्पाणि चिन्वन्ति स्म विलासिनः ॥३९७॥ युग्मम्॥
[३]अस्त्रप्रपञ्चं पञ्चेषोरन्यं न हि सहामहे । इतीव पुष्पावचयं रचयन्ति स्म सुभ्रुवः ॥३९८॥
कोऽपि प्रियास्तनस्तम्बे स्तम्बेरममिव स्मरम् । बबन्ध निदधत्पुष्पमालामालानसन्निभाम् ॥३९९॥
प्रियोपनीतं सावज्ञं श्वासैर्भून्मा स्म भस्मसात् । इतीव कुसुमं कान्ता नासिकान्तादपातयत् ॥४००॥
पाणिः पुष्पाणि चिन्वत्याः कस्याश्चित् कोमलाङ्गुलिः । उच्चैश्चुचुम्बे रोलम्बकुटुम्बैरम्बुजभ्रमात् ॥४०१॥
कपोलेऽताडयत् काञ्चिदुद्यत्पल्लवपाणिना । अशोकः पादघातस्य कृतप्रतिकृतेः कृती ॥४०२॥
लताभ्यः पुष्पसर्वस्वं हृत्वा यात्यङ्गनाजने । स्वनन्तोऽनुपदीभूता भृङ्गास्तदुपजीविनः ॥४०३॥
पञ्चवर्णसुमस्तोमसर्वाङ्गीणविभूषणाः । विरेजुर्जङ्गमाः कामशस्त्रशाला इव स्त्रियः ॥४०४॥

---

१. सूरोपि D, H, KH । २. 'कुर्वन्त्यस्मिन्' - A । ३. असु C ।

टि. 1. अकृष्टपच्यानि-अकृष्टक्षेत्रे पच्यते, इति । 2. प्रशस्तो राजा अस्ति यस्याः सा राजन्वती, तस्याम्, अवनेर्विशेषणम् । 3. शूरः-शूरवीरः सूर्यश्च । 4. भृङ्गः भ्रमरः स एव मष्या कृतो बिन्दुः मषीबिन्दुः, स एव सखी यस्याः सा, भृङ्गमषीबिन्दुसखी, ताम् । 5. हल्लीसकं-'रासक्रीडा' इति भाषायां; तस्य लयात् । 6. पुष्पमासः-वसन्तकालः ।

सुस्थितैर्मिथुनैरित्थं परितः परिवारितः । बभौ त्रिभुवनस्वामी तदानङ्ग इवाङ्गवान् ॥४०५॥
अथैकतः कृतोत्तालतालमानानुगामिभिः । मृदङ्गपणवातोद्यवेणुवीणादिनिःस्वनैः ॥४०६॥
कीर्णकर्णसुधावर्षं यतिमानलयान्वितम् । भावहस्तकदृक्कारी चारुनृत्तमनोहरम् ॥४०७॥
ग्रामरागोज्ज्वलस्फीतगीतप्रीतजगज्जनम् । सङ्गीतकं दृशा तत्र प्रीत्यात्यर्थं कृतार्थयन् ॥४०८॥
अन्यतः प्रमदोद्दामप्रमदाजनचच्चरीः । परतः पौरलोकानामापानकमहोत्सवम् ॥४०९॥
अपरत्रापि लोलाक्षीर्दोलान्दोलनखेलिनीः । पश्यन् प्रमुदितः स्वामी चिन्तयामासिवानिति ॥४१०॥ पञ्च०कुल० ॥
किं कदापि मया क्वापि सुखमीदृक्षमीक्षितम् । ददर्श विमृशन्नेवमवधिज्ञानतः प्रभुः ॥४११॥
आत्मनैवानुभूतं यत्पुरा वैषयिकं सुखम् । **अनुत्तर**विमानान्तस्त्रिदिवेषूत्तरोत्तरम् ॥४१२॥ युग्मम् ॥
विभुर्विभावयामास स्वभावं भविनां ततः । जानन्तोऽपि हि मोहेन जीयन्ते हन्त जन्तवः ॥४१३॥
यदनन्तभवाभ्यस्तं सुखं विषयसम्भवम् । अपूर्वमिव मन्यन्ते बुभुक्षव इवाशनम् ॥४१४॥
दुःखहेतुषु तत्त्वेन सुखेच्छा विषयेषु या । सापि मोहस्य माहात्म्यं सुधाबुद्धिर्विषेष्विव ॥४१५॥
अर्थ्यमानोऽपि नोपैति नोपेतोऽप्यवतिष्ठते । स्थितोऽपि न सुखं दत्ते मत्तेभो विषयव्रजः ॥४१६॥
मलमूत्रादिपात्रेषु गात्रेषु मनुजन्मनाम् । सचेतसामसावस्तु वस्तुतः कैव काम्यता ॥४१७॥
अस्थिखण्डेषु दन्तेषु कुन्दसुन्दरतामतिम् । मलक्षेत्रेषु नेत्रेषु नीलोत्पलदलभ्रमम् ॥४१८॥
श्लेष्मादिदोषवृक्षाणां कानने वनिताननने । सुधांशुबुद्धिं बध्नन्ति धिगमी मोहमोहिताः ॥४१९॥ युग्मम् ॥
किं चात्र चक्रिशक्राद्यैरप्यनाक्रान्तविक्रमे । नित्यमत्यन्तमुद्युक्ते मृत्यौ स्वैरिणि वैरिणि ॥४२०॥
जरायां रूपसर्वस्वहरायामस्खलद्गतौ । यौवनं वनवद् भस्मीकुर्वत्यां पलितच्छलात् ॥४२१॥
अशेषसुखसन्तानकाननाशनिसन्निभे । विविधव्याधिसम्बन्धे बाधामाधातुमुद्धते[1] ॥४२२॥
विभवे विघ्नसङ्घातघातसम्पातकातरे । उत्पातवातनिर्द्धूतपताकाञ्चलचञ्चले ॥४२३॥
संसारचारकक्षिप्तो महामोहतमोहतः । ध्वस्ताऽऽलोकः कथं लोकः क्रीडारसवशंवदः ॥४२४॥ पञ्चभिः कुलं० ॥
ततः संसारकाराऽन्तर्निवासं प्रति सम्प्रति । विरज्य युज्यते मुक्तेरध्वन्यध्वन्यतैव मे ॥४२५॥
तदा पदान्तिकप्राप्तैर्नत्वा लोकान्तिकैः सुरैः । समयज्ञोऽपि कल्पज्ञैर्व्यज्ञप्यत जगत्पतिः ॥४२६॥
"राज्यवत् प्रथमं नाथ ! धर्मतीर्थं प्रवर्त्तय । कृतिन् ! कृत्यं जगज्जन्तुहितं स्मर जितस्मरः" ॥४२७॥
इति विज्ञप्य यातेषु तदा तेषु जगत्पतिः । सानन्दो **नन्दनो**द्यानादासदत् सदने सदः[2][टि.1] ॥४२८॥
अथाऽऽकार्य तदा हर्षभरतो **भरतं** सुतम् । समं समेतसामन्त**बाहुबल्या**दिनन्दनैः ॥४२९॥
आदिदेश विभुर्वत्स ! भव राज्यधुरन्धरः । भावयन्तो वयं तोषं ग्रहीष्यामो हि संयमम् ॥४३०॥

---

१. मुद्यते D । २. 'ततः' इति L ।

टि. 1. सदः - सभाम् ।

विचक्षणः क्षणं वीक्ष्य विभोर्मुखमवोचत । सादरं **भरतः** स्वामिसेवारम्भरतस्ततः ॥४३१॥
त्वदग्रे गच्छतः [1]क्षोणिपरागैरङ्गसङ्गिभिः । प्रथते मे यथानन्दश्चन्दनैरपि नो तथा ॥४३२॥
प्रीता नित्यं भवत्पादसेवासुखसुधारसैः । स्वामिन् ! साम्राज्यभोगाय रमते न मतिर्मम ॥४३३॥
जगदे जगदेकाधिनाथेनाऽथेदमङ्गजः । वत्स ! सेवा पितुः सेयमाज्ञाऽवज्ञायते न यत् ॥४३४॥
अङ्गजा अपि ये कुर्युर्गुर्वाज्ञां तेऽत्र नन्दनाः । अन्ये तु स्नेहभाजोऽपि त्याज्या एव मला इव ॥४३५॥
एकदेहविनिर्माणादधमर्णीकृतैः सुतैः । यशोधर्ममयं देहद्वयं पित्रोर्वितीर्यते ॥४३६॥
श्रुत्वा सुरासुरैर्मान्यामाज्ञामिति जगत्पतेः । न्यग्मुखो **भरत**स्तस्थावदत्तपुनरुत्तरः ॥४३७॥
हृष्टाः स्वामिसमादिष्टाः सचिवास्तदनन्तरम् । **भरतं** परतन्त्रेच्छमभ्यषिञ्चन् पितुः पदे ॥४३८॥
तद्**बाहुबलि**मुख्यानामपि [१]बाहुबलस्पृशाम् । विभुर्विभज्य भूभागान्नन्दनानां मुदा ददौ ॥४३९॥
ततश्च वार्षिकं दानं निदानं पुण्यसम्पदाम् । प्रभुः प्रवर्त्तयामास वित्तैर्वित्तेशपूरितैः ॥४४०॥
अष्टलक्षाधिकां तत्र कोटिमेकां च काञ्चनीम् । प्रातः प्रारभ्य मध्याह्नं यावद्देवोऽन्वहं ददौ ॥४४१॥
भागेऽह्नः पश्चिमे **चैत्रश्यामाष्टम्याम**थ प्रभुः । चन्द्रमस्यु**त्तराषाढा**भाजि भेजे व्रतोद्यमम् ॥४४२॥
व्रताय विपिने गन्तुमथ प्रथमपार्थिवः । [2]याप्ययानं समारोहन्मोहराजपराजयी ॥४४३॥
शिबिका सविकासाऽन्तःश्रद्धाबन्धोद्धुरैर्नरैः । ऊढा प्रौढैश्च गीर्वाणैर्दासवद्वासवादिभिः ॥४४४॥
दिव्यैरातोद्यनिर्घोषैर्नृणां जयजयस्वनैः । सिंहनादैर्दिविषदां मागधध्वनिवर्द्धितैः ॥४४५॥
शब्दाद्वैतमयीं कुर्व[२]न्नुर्वीं गुर्वीं वहन्मुदम् । विभुर्जम्भारिरम्भादिनृत्ते दत्तेक्षणः क्षणम् ॥४४६॥
प्रीणन्दिदृक्षुदृग्[३]भृङ्गीरङ्गे चम्पकसम्पदि । **भरताद्यैः** समं स्वामी **सिद्धार्थ**वनमागमत् ॥४४७॥ त्रिभिर्विशेषकम् ॥
शिबिकायास्तदोत्तीर्य [3]**किङ्किल्लि**द्रुतले द्रुतम् । स्वयं जगदलङ्कारोऽलङ्कारानत्यजद् विभुः ॥४४८॥
शक्रःस्कन्धेऽथ देवस्य देवदूष्यं न्यवेशयत् । निर्मलं [4]निर्मलध्यानाग्रयानमिव मूर्त्तिमत् ॥४४९॥
तीर्थंकरः कराम्भोजे भृङ्गतां बिभ्रतः क्षणम् । मूर्ध्नश्चतसृभिः केशानुच्चखानाऽथ मुष्टिभिः ॥४५०॥
केशाः सुवर्ण[४]वर्णेऽङ्गे सन्तु नीलमणिश्रियः । इत्युक्तः पञ्चमीं मुष्टिममुचन्नमुचिद्विषा ॥४५१॥
लज्जया मज्जयन्नीलरत्नानि [५]क्षीरनीरधौ । शक्रेणाथ तदक्षेपि केशमुष्टिचतुष्टयम् ॥४५२॥
आगत्याथ द्युनाथेन तुमुले मुकुलीकृते । [5]चीर्णाष्टमतपाः स्वामी कृत्वा सिद्धनमस्कृतिम् ॥४५३॥
सर्वसावद्ययोगानां प्रत्याख्यानमुदीरयन् । भवाब्धिपोतश्चारित्रं [6]तदारित्रमिवाददे ॥४५४॥ [युग्मम्]
नारकाणामपि प्रीतिस्फीतं विरचयन्मनः । तन्मनःपर्ययज्ञानमुत्पेदे त्रिजगत्पतेः ॥४५५॥

---

१. बाहुबलिस्पृशाम् L, P । २. ०न्नुर्वमुर्वीं B । ३. भृंगी K, B, H, C । ४. ०वर्णाङ्गे K, L, D । ५. क्षीरसन्निधौ K, D, ।

टि. 1. क्षोणिपरागैः धूलिभिः इत्यर्थः । 2. शिबिकाम् इत्यर्थः । 3. अशोकवृक्षतले इत्यर्थः । 4. निर्मलध्यानेऽग्रगमनं इव इत्यर्थः । 5. दीक्षाग्रहणकाले प्रभुरष्टमतपाः इति मतान्तरम् । 6.अरित्रं-इयर्ति अनेन नौः, 'इत्र' प्रत्ययः [५।२।८७] ।

चतु:सहस्रसङ्ख्यैश्च समं भर्त्रा समन्ततः । भूपैः **कच्छ-महाकच्छ**मुख्यैर्दीक्षा तदाददे ॥४५६॥
स्तुत्वा नत्वा च यातेषु सुतेषु त्रिदशेषु च । विहर्तुमिह मौनेन स भूचक्रे प्रचक्रमे ॥४५७॥
प्रभुणा भ्रमता भिक्षा प्रापि न क्वापि पारणे । भिक्षानभिज्ञः स्वर्णादि तदा लोको ह्यढौकयत् ॥४५८॥
यां निर्वास्य चिरस्यापि[1] वसन्तीं जनवेश्मसु । यः श्रियं वासयामास सा भिक्षा किमुपैतु तम् ॥४५९॥
तथाप्यनार्त्तः क्षुत्तृष्णाद्यार्त्तैः **कच्छा**दिभिः प्रभुः । आलोच्यामोचि तस्थे च **गङ्गा**प्रस्थे फलाशिभिः ॥४६०॥
अथ **कच्छ-महाकच्छ**सुतौ पूर्वनियोजितौ । तथा **नमि-विनम्या**ख्यौ पित्रोः पादान्तमीयतुः ॥४६१॥
अथैतौ प्रेषितौ ताभ्यां सेवितुं **भरतं** प्रभुम् । ऊचतुश्चतुरं साभिमानमानसविक्रमौ ॥४६२॥
विभुं विहाय नाभेयं नाऽऽवां सेवावहे परम् । को हि रोहणमासाद्य प्रपद्येतापरं गिरिम् ॥४६३॥
इति प्रतिज्ञामाधाय प्रणिपत्य पितृक्रमान् । प्रभुं गत्वा च नत्वा च तौ व्यजिज्ञपतामिति ॥४६४॥
क्षेत्रमात्र्यपि किं तात ! भागेऽस्माकं न भूरभूत् । विज्ञप्तोऽपीति नैताभ्यां वाचं वाचंयमो ददौ ॥४६५॥
व्यधत्तामतिभक्त्या तावप्यवक्तरि भर्त्तरि । सेवामेवान्वहं के वा हेवाकं[2] मोक्तुमीशते ॥४६६॥
बभौ विभुः स्थितो मध्ये स तत्पाणिकृपाणयोः । परास्तयोरिव शिवपुरद्वारकपाटयोः ॥४६७॥
अपरेद्युः परश्रद्धाधरणो **धरणो**रगः । अपश्य**न्नमिविनमी** सेवकौ विनमन् जिनम् ॥४६८॥
कौ युवां संश्रितौ किं वा मौनध्यानधनं जिनम् । कर्त्ता किमर्यः[3] कार्यं वामित्युक्तौ भोगिभूभुजा ॥४६९॥
तावूचतुश्चतुर्बाहुविक्रमौ भोगिनां विभुम् । सेवैव सेवकैः कार्या किं तया चिन्तया प्रभौ[१] ॥४७०॥ युग्मम् ॥
एतस्य मौनयुक्तस्य धनमुक्तस्य सेवया । यद्भवेत् तेन नौ कार्यमेकः सेव्यो हि मानिनाम् ॥४७१॥
सेविते तत्किमन्यत्र निर्द्धनेऽप्यत्र यत्फलम् । क्व तद्दीपे जगद्दीपे मेघच्छन्नेऽपि यन्महः ॥४७२॥
**प्रज्ञप्ति**मुख्या प्रीतेन फणीन्द्रेण तयोर्ददे । पाठसंसिद्धविद्याष्टचत्वारिंशत्सहस्र्यथ ॥४७३॥
विद्याः किलैता **वैताढ्य**मेखलादक्षिणोत्तरे । प्राभवं[२][4] प्रथयिष्यन्ति भवतोरित्युवाच सः ॥४७४॥
प्रभुप्रभावसम्प्राप्तविद्यौ ह्यौजसाविमौ । गतौ **वैताढ्य**मावेद्य पितृभ्यां **भरत**स्य च ॥४७५॥
वर्षं वसुन्धराहारो निराहारोऽप्यथ प्रभुः । भ्रमन् बहुषु देशेषु क्षुधाक्षामीकृताकृतिः ॥४७६॥
अवधिज्ञानतो ज्ञात्वा तदा पारणकारणम् । पुरं **गजपुरं** प्राप द्विपस्तप्त इवांह्रिपम् ॥४७७॥ युग्मम् ॥
तत्र **बाहुबलेः** पौत्रः स्वप्ने **सोमप्रभात्म**भूः । **श्रेयांसो** धूसरं **मेरुं** क्षीरैरक्षालयत् तदा ॥४७८॥
प्रापि **सोमप्रभेणा**पि स्वप्नः किल महाभटः । रिपुभ्योऽमोचि रोचिष्णुः **श्रेयांसे**नाद्भुतश्रिया ॥४७९॥
अदर्शि भास्करः स्वप्ने श्रेष्ठिनापि **सुबुद्धिना** । भ्रश्यद्भिरुस्रैः[5] **श्रेयांस**योजितैरपि भास्वरः ॥४८०॥

---

१. प्रभोः C । २. प्रभावं K, D ।

टि. 1. चिरस्य (अव्ययः) चिरात् इत्यर्थः । 2. हेवाकः (पुं) – तीव्रस्पृहा तम् । 3. अर्यः(पुं)–स्वामी । 4. प्राभवं–स्वामित्वम् । 5. उस्रः (पुं) – किरणः, तैः ।

विचाराय प्रगे **सोमप्रभ**क्ष्मापसभान्तरे । स्वप्नार्थं तेष्वजानत्सु मिलितेषु समन्ततः ॥४८१॥
पुरं त्रिभुवनस्वामी व्योमदेशमिवांशुमान् । विहर्त्तुं प्रविवेशाथ [1]धिष्ण्याद् धिष्ण्यान्तरं चरन् ॥४८२॥ युग्मम् ॥
अगृह्णति जिने भिक्षां हस्त्यश्ववसनादिकाम् । लोलाः कोलाहलं चक्रुः प्रजाः सायं व्रजा इव ॥४८३॥
प्रेषितस्तुमुलं ज्ञातुं प्रत्यागत्य व्यजिज्ञपत् । प्रतीहारः कुमाराय वेगादागमनं प्रभोः ॥४८४॥
नाऽऽपदस्तापदायिन्यः प्रभवन्ति प्रभोः पुरः । **श्रेयांस** इति निर्मुक्तच्छत्रोपानहमागमत् ॥४८५॥
नमस्कृतप्रभुः सोऽथ किंकर्त्तव्यविमूढधीः । **श्रेयांसः** शिश्रिये जातिस्मृत्याब्धिरिव वेलया ॥४८६॥
पूर्वं **पूर्वविदेहे**ऽसौ **वज्रसेन**जिनाङ्गजः । **वज्रनाभो**ऽभवच्चक्री सोऽहमेतस्य सारथिः ॥४८७॥
महाव्रतं मया साकमीदृग्मुद्राभृतस्तदा । पार्श्वे पितुरवापाऽयमनपायसुखेच्छया ॥४८८॥
**वज्रसेन**जिनेन्द्रेण तदादिष्टमिति स्वयम् । भविता **वज्रनाभो**ऽयं **भरते** प्रथमो जिनः ॥४८९॥
तदयं स दयाराशिः पयोराशिगभीरिमा । दिष्ट्या दृष्ट्या मया दृष्टश्चकोरेणेव चन्द्रमाः ॥४९०॥
निश्चित्यैनं तदा [१]जानन् भिक्षाकल्पमनल्पधीः । ददाविक्षुरसं भर्तुः **श्रेयांस**स्तत्क्षणागतम् ॥४९१॥
प्रभुणा पाणिपात्रेण साक्षादिक्षुरसो धृतः । आरूढः शिखया व्योम जेतुमिन्दुकरानिव ॥४९२॥
तदा ददत्कुमारोऽयं मुदा रोमाञ्चमेचकः । बभौ मुक्तिश्रिया साक्षात्कटाक्षैरिव वीक्षितः ॥४९३॥
पुण्यैरिव कुमारस्य दिवमिक्षुरसैर्गतैः । उत्सवाय समाहूताः पुरुहूतादयः सुराः ॥४९४॥
हतदुन्दुभयो रत्नपुष्पगन्धोदकादिकम् । विधाय भूतले देवाश्चेलोत्क्षेपमथ व्यधुः ॥४९५॥
प्रभोः **शुक्लतृतीयायां वैशाखे**ऽजनि पारणम् । तद[२]**क्षयतृतीया**ख्यं पर्व सर्वत्र विश्रुतम् ॥४९६॥
तत्रोपेताय किं त्वेतदिति स्वच्छाय पृच्छते । राज्ञे प्राज्ञेन विज्ञप्तं तेन प्राग् वृत्तमात्मनः ॥४९७॥
कल्प्याकल्प्यविचारं च जातजातिस्मृतिः कृती । अपशोकाय लोकाय श्रेयांसः श्रेयसेऽदिशत् ॥४९८॥
नाथपारणकेनाऽथ श्रेयांसजनितेन ते । स्वप्नाः स्पष्टार्थतां प्रापुस्त्रयेऽपि पुरुषत्रये ॥४९९॥
अथ प्रभौ गते पापवारणे कृतपारणे । चकार पारणस्थाने रत्नपीठं नृपाङ्गजः ॥५००॥
एतदादिकृतं पीठमिति लोकाय सोऽवदत् । जनोऽपि जिनभिक्षायाः स्थाने तत्तादृशं व्यधात् ॥५०१॥
[2]तदादित्यकृतत्वेन तदादित्यस्य मण्डलम् । जनेन जानताऽद्यापि नित्यं कृत्वापि पूज्यते ॥५०२॥
नाथोऽन्यदोपकारैकदक्ष**स्तक्षशिलां** पुरीम् । सायं बाहुबलेः प्राप **बहली**देशमण्डनम् ॥५०३॥
ज्ञात्वा तमागतं **बाहुबलि**श्चक्रे पुरोत्सवम् । पादारविन्दं वन्दिष्ये [3]सुप्रातेऽहं प्रभोरिति ॥५०४॥
नृपोऽङ्गेनातिरम्येण भूषणान्यपि भूषयन् । समं समन्तात्सामन्तैः प्रातरानन्दमेदुरः ॥५०५॥

---

१. ज्ञानभिक्षाकल्पः सकल्पधीः K, C, D । २. 'क्षिया' L ।

टि. 1. धिष्ण्यम् (नपुं)-नक्षत्रः । 2. आदित्यः (पुं) -देवः । 3. प्रभाते ।

यावत्पुरन्दरप्रायः पश्यन् शृङ्गारितां पुरीम् । भगवान् विषयत्रासी यत्रासीत्तत्र यातवान् ॥५०६॥ युग्मम् ॥
विजहारान्यतस्तावत् प्रभञ्जन इव प्रभुः । श्रवद्बाष्पं नृपं प्राह सचिवः शुचिवागथ ॥५०७॥
[1]हृद्ये करोति हृद्येव देवस्तव सदा पदम् । तद्विषादनि[2]षादस्य [3]सुखदस्योर्वशेऽसि किम् ॥५०८॥
पदानि पद्मकुलिशाङ्कुशाङ्कानि जगद्गुरोः । एतानि तानि भूखण्डमण्डनानि नमस्कुरु ॥५०९॥
सचिवस्य वचः कृत्वा तत् तथा पृथिवीपतिः । धर्मचक्रमिह त्रुट्यत्कर्मचक्रः प्रचक्रमे ॥५१०॥
नभोरत्नसपत्नोरुरत्नराजिविराजितम् । तद् विधाय व्यधादेष स्पष्टमष्टाह्निकामिह ॥५११॥
अष्टयोजनविस्तीर्णे चक्रेऽस्मिन् योजनोन्नते । सहस्रारे सहस्राणि यामिकानां नृपोऽमुचत् ॥५१२॥
ततश्च भगवान् भास्वांस्तमःशमनकर्मठः । विहरन् म्लेच्छदेशेषु पङ्कशेषमशोषयत् ॥५१३॥
अथ वर्षसहस्रान्ते घस्रान्त इव चन्द्रमाः । पुरं **पुरिमताला**ख्यं प्राचीमुखमिवागमत् ॥५१४॥
अयोध्याया महापुर्यास्तस्मिन् शाखापुरे स्थितः । **फाल्गुने मासि कृष्णायां प्रभुरेकादशीतिथौ** ॥५१५॥
तदानी**मुत्तराषाढा**वस्थिते सितदीधितौ । अवाप केवलज्ञानं शुक्लध्यानधनो जिनः ॥५१६॥
ततश्चासनकम्पेन समीयुस्तत्र वासवाः । अथाऽकारि चमत्कारि त्रिदशैर्देशनासदः ॥५१७॥
प्रविश्य पूर्वद्वारेण नत्वा तीर्थं च तीर्थकृत् । भेजे भद्रासनं सिंहलक्षणं सप्रदक्षिणम् ॥५१८॥
यथास्थानं निविष्टेसु सभालोकेषु वासवः । एत्यान्तरुत्तरद्वारा चकार त्रिःप्रदक्षिणाम् ॥५१९॥
अथ स्तुत्वा नमस्कृत्य कृतकृत्यः सुरेश्वरः । प्रभोरुपासनाहेतोरासन्नासनमासदत् ॥५२०॥
इतश्च भरतो भक्तिभरतो मातरं पितुः । तदाऽगमन्नमस्कर्त्तुं स्वकुलस्येव देवताम् ॥५२१॥
तां च पुत्रवियोगेन श्रवदश्रूपयःप्लवैः । उन्मीलन्नीलिकालुप्तदर्शनां जननीं प्रभोः ॥५२२॥
पौत्रो ज्यायानयं मातर्नमति त्वत्पदाम्बुजम् । विज्ञप्यैवं नमस्कृत्य भरतः पुरतोऽभवत् ॥५२३॥ युग्मम् ॥
अथ पुत्रप्रवासेन समं प्रोषितसंमदा । उच्छलच्छोककल्लोलकुल्यया साऽवदद् गिरा ॥५२४॥
वत्स ! स्वच्छन्दमानन्दमेदुरां त्वं श्रितः श्रियम् । मदीयपुत्रको गात्रमात्रस्तु वनवास्यभूत् ॥५२५॥
शरीरं सुकुमारं तद्यत्तेन तपसोऽर्प्पितम् । रम्भास्तम्भो गृहस्थूणास्थाने तद्विनिवेशितः ॥५२६॥
क्व तास्तस्य सुरश्रीणामास्पदं सुखसम्पदः । क्वेदानीं शीतवातादिपुष्टा कष्टपरम्परा ॥५२७॥
नैवाशनं न वसनं न गृहं न परिच्छदम् । अवगच्छामि वत्सस्य जीवाम्यद्यापि पापिनी ॥५२८॥
तामित्थमथ [१]शोचन्तीममुञ्चन्तीं कदाग्रहम् । अभ्यधाद् भरतो मातस्तातस्य त्वं जनन्यसि ॥५२९॥
विज्ञाऽपि किमविज्ञेव सुतवात्सल्यमोहिता । विचिन्तयसि ताते‌ऽपि मातर्मानवमात्रताम् ॥५३०॥

---

१. शोचन्तीं न मुञ्चन्तीं C, D ।

टि. 1. तव हृद्ये हृदि देवः सदा पदं करोति एव इत्यन्वयः । 2. निषादः-चण्डालः तस्य । 3. सुखदस्योः=सुखस्य चौरः, तस्य इत्यर्थः ।

स हित्वा लौकिकीं लक्ष्मीं लिप्सुर्लोकोत्तरां श्रियम् । यद्विधत्तेऽधुना मातः ! फलं त्वं तस्य पश्यसि ॥५३१॥
हृद्यामिति समासाद्य वाक्सुधां वसुधाभुजः । मरुदेवाऽभवद्यावन्निर्विषादविषोदया ॥५३२॥
ज्ञापितौ वेत्रिणा तावत्पुरुषौ द्वावुपेयतुः । तयोराद्योऽवदन्नाम्ना **यमको** घटिताञ्जलिः ॥५३३॥
दिष्ट्याद्य [१]वर्द्धसे देव ! कानने **शकटानने** । उत्पेदे केवलज्ञानं युगादिजगदीशितुः ॥५३४॥
व्यजिज्ञपत् द्वितीयोऽथ ख्यातः **शमक**संज्ञया । आविरासीत्प्रभो ! चक्ररत्नमद्यास्त्रमन्दिरे ॥५३५॥
महःसहजमाहात्म्यविध्वस्तात्मविरोधिनः । पूर्वं प्रभोर्वा कुर्वेऽहमर्चां चक्रस्य वा स्वयम् ॥५३६॥
क्व वा जगत्त्रयत्राता तातः शातितकल्मषः । क्व चैनसांनिधिश्चक्रं भुवनैकभयङ्करम् ॥५३७॥
ध्यात्वेति तुष्टिदानेन विसृज्य मुदितौ च तौ । **मरुदेवा**मुवाचैवं भरतो हर्षनिर्भरः ॥५३८॥ विशेषकम् ॥
मातः ! सुतवियोगेन त्वं सदा दुःखतः पुरा । रूक्षाक्षरं समादिक्षः [२]पश्याद्य तु सुतश्रियम् ॥५३९॥
पितामहीं महीनाथस्तदेत्युक्त्वाऽधिरोप्य च । कुञ्जरे स्वयमारोहत् कृतकौतुकमङ्गलः ॥५४०॥
अथ व्रजन् गजारूढो **मरुदेवी**मुवाच सः । मातराकर्ण्यतामेतत्पुत्रस्य विभुताद्भुतम् ॥५४१॥
रूप्यकल्याणमाणिक्यमयवप्रत्रयावृतम् । देशनासदनं चक्रुः शक्रादेशेन नाकिनः ॥५४२॥
अयं वृन्दारकैर्बन्दिवृन्दैरिव जयध्वनिः । त्वत्पुत्रस्य पुरो मातः ! क्रियमाणो विभाव्यते ॥५४३॥
अयमम्भोधरध्वानगम्भीरो दुन्दुभिध्वनिः । मातस्तनोति सोत्सेकाः केकाः काननकेकिनाम् ॥५४४॥
श्रुत्वेति मरुदेवायास्तदानन्दाश्रुवारिभिः । नेत्रयोर्नीलिकापङ्कशङ्कापि क्षालिता क्षणात् ॥५४५॥
स्वयमेवाथ पश्यन्त्यास्तस्यास्तद्वैभवं विभोः । विलीनं [1]मनसा सद्यः परानन्दाऽमृतद्रवैः ॥५४६॥
तदैव केवलज्ञानं तस्याः प्रादुरभूत् ततः । तपोभिः प्राप्य मात्रे [३]नु प्रभुणा प्राभृतीकृतम् ॥५४७॥
अन्तकृत्केवलीभूय लोकान्तमथ साऽगमत् । मन्ये मुक्तिपुरद्वारमपसारयितुं पुरः ॥५४८॥
अस्यामस्यावसर्प्पिण्यां [४]प्राच्यसिद्धस्य तद्वपुः । त्रिदशैर्निदधे तूर्णं सत्कृत्य क्षीरनीरधौ ॥५४९॥
ततःप्रभृति लोकेषु वृत्तं मृतकपूजनम् । सर्वो हि दर्शितां पूर्वै[५]र्वर्त्तनीमनुवर्त्तते ॥५५०॥
व्याप्तोऽथ [६]शोक-हर्षाभ्यां बद्धस्पर्द्धं धराधवः । निशाप्रान्त इव ध्वान्तप्रकाशाभ्यामभूत् समम् ॥५५१॥
पत्तिर्विमुक्तच्छत्रादिर्दूरादुरीकृताञ्जलिः । देशनासदनस्यान्तः प्रविवेश विशाम्पतिः ॥५५२॥
त्रिश्च प्रदक्षिणीकृत्य नमस्कृत्य जगद्गुरुम् । यथास्थानं निविष्टोऽथ प्रहृष्टो **भरतेश्वरः** ॥५५३॥
अथाऽऽयोजनगामिन्या सर्वभाषानुरूपया । गिरा जगद्गुरुस्तत्र विदधे धर्मदेशनाम् ॥५५४॥
"असावसारसंसारविषोद्गारैकसारणिः । दूरेण युज्यते त्यक्तुं मोहनिद्रा महात्मनाम् ॥५५५॥
मोहभिल्लेश[७]पल्लीव त्याज्यं च भवकाननम् । पुण्यरत्नहरैः क्रूरैश्चौरै रागादिभिर्वृतम् ॥५५६॥

---

१. वर्त्तसे P । २. परां पश्य तु P । ३. तु K, D । ४. प्राच्यासिद्ध० K, D । ५. र्वर्तिनी० K, D । ६. हर्ष-शोकाभ्यां P । ७. ०पल्लीवत् त्याज्यं P । टि. 1. मनसा इति कर्तृपदम् । सम्पा० ।

अनाविले कुले जन्म दुर्ल्लभेभ्योऽपि दुर्ल्लभम् । चिन्तारत्नमिव प्राप्य हार्यते किं मुधा बुधैः ॥५५७॥
यतध्वमपवर्गाय तन्निर्विण्णा भवाद्यदि । स हि सर्वापदां पार[१]मपारानन्दमन्दिरम् ॥५५८॥
प्राप्यते प्राणिभिर्नायं धर्मस्याराधनां विना । किं कदापि क्वचिद् दृष्टो विना वृक्षं फलोद्गमः ॥५५९॥
तस्य सुश्रमणो वा स्यान्मूलोत्तरगुणोत्तरः । सुश्राद्धो [२]वास्पदं सम्यक् [३]सम्यक्त्वाणुव्रतादिभृत् ॥५६०॥
एतौ मोक्षस्य पन्थानौ मन्थानौ भववारिधेः । कामं श्रामण्य-गार्हस्थ्यधर्मौ शाश्वतशर्म्मदौ ॥५६१॥
शक्रचक्रिपदादीनि स्पृहणीयानि यानि तु । असौ कुसुमसम्पत्तिस्तस्य धर्ममहीरुहः ॥५६२॥
फलं तु परमानन्दरसनिस्यन्दसुन्दरम् । महोदयमयं साक्षात् लोकोत्तर[४]मनश्वरम्'' ॥५६३॥
श्रुत्वेति देशनां भर्तु**र्भरत**स्याङ्गजन्मभिः । शतैः पञ्चभि**रानन्दा**न्नप्तृभिः सप्तभिः शतैः ॥५६४॥
सहोदर्या तथा **ब्राह्मया** परब्रह्मार्पितात्मभिः । तैस्तै**र्ऋषभसेना**द्यैः साग्रहैर्जगृहे व्रतम् ॥५६५॥ [युग्मम्]
दीक्षां तदाददे किं च मरीचिश्चक्रिनन्दनः । सादरं **सुन्दरी** किन्तु चक्रिणा वारिता व्रतात् ॥५६६॥
व्रतिनः **पुण्डरीका**द्याः साध्व्यो **ब्राह्मी**पुरःसराः । श्राद्धाः [1]**सोमात्मज**प्रष्ठाः श्राविकाः **सुन्दरी**मुखाः ॥५६७॥
इत्थं चतुर्विधः सङ्घः स्थापितः प्रभुणा तदा । पूज्यतेऽद्यापि विश्वेऽस्मिन् देवदानवमानवैः ॥५६८॥ [युग्मम्]
श्री**पुण्डरीक**मुख्यानां यतीशानां जगद्गुरुः । ततश्चतुरशीतेरप्यादिदेश पदत्रयीम् ॥५६९॥
तेऽप्युत्पादव्ययध्रौव्यरूपां प्राप्य पदत्रयीम् । वितेनुरद्भुतप्रज्ञा द्वादशाङ्गानि लीलया ॥५७०॥
शक्रानीतैरथो दिव्यैस्तूर्णं चूर्णैर्जगत्प्रभुः । अनुयोगगणानुज्ञे यच्छंस्तानभ्यषिञ्चत ॥५७१॥
जातेऽथ पौरुषीकाले सकलैर्निस्तुषाक्षतैः । सिद्धः समङ्गलाचारं बलिः पूर्वदिशाऽविशत् ॥५७२॥
क्षिप्तः पतन् सुरैः सोऽर्द्धमर्द्धार्द्धं चक्रिणा पुनः । यथाविभागमन्यैश्च जगृहे गृहमेधिभिः ॥५७३॥
अथ द्वितीयपौरुष्यां देवच्छन्दं गते प्रभौ । **पुण्डरीक**मुनेर्व्याख्यां श्रुत्वा जग्मुर्जना गृहान् ॥५७४॥
सदा **गोमुखयक्षेण** देव्या **चाप्रतिचक्रया** । अमुक्तसन्निधिः स्वामी सर्वातिशयभाजनम् ॥५७५॥
पावनीमवनीं कुर्वन् कोटिदैवतसेवितः । धर्मामृतघनः श्रीमान् विजहारान्यतस्ततः ॥५७६॥ युग्मम् ॥
अथ दिग्जयतः प्राप्ताभिषेके चक्रवर्त्तिनि । व्रतीभूयार्जितज्ञाने **भरत**स्यानुजव्रजे ॥५७७॥
आरोहदन्यदा स्वामी स्प**ष्टमष्टापदा**चलम् । समं मुनीन्द्रैः पूर्वाद्रिं नक्षत्रैरिव चन्द्रमाः ॥५७८॥ युग्मम् ॥
त्रिविष्टपसदस्तत्र विदधुर्देशनासदः । प्रभुश्चतुर्मुखीभूय तस्मिन् धर्ममुपादिशत् ॥५७९॥
ततः समं समायातौ भरतेशसुरेश्वरौ । निन्यतुः [2]कर्णपूरत्वं विभोर्वचनपल्लवान् ॥५८०॥
देशनान्ते ततश्चक्री बन्धूनालोक्य वत्सलः । तेषां भोगविभागाय जिनराजं व्यजिज्ञपत् ॥५८१॥

---

१. ०मपरानन्द० P । २. वापदं P । ३. सम्यक्त्वादिव्रता P । ४. ०मनुत्तरम् P ।

टि. 1. श्रेयांसः इत्यर्थः । 2. कर्णपूरः (पुं)-कर्णस्याभूषणम्, तस्य भावः तम् ।

अथाऽदिशज्जिनाधीशो भरतक्ष्मापतिं प्रति । भोगानभिलषन्त्येते किमभङ्गुरसङ्गराः[1] ॥५८२॥
आनाय्य न्यायवित् क्षोणीपती रसवतीमथ । हेतवे निजबन्धूनामन्धूनां[2] प्रशमाम्भसः ॥५८३॥
विज्ञो विज्ञपयामास सानन्दो **नाभिनन्दनम्** । भोजनायादिश स्वामिन् ! शमिनो बान्धवानिति ॥५८४॥ युग्मम् ॥
[१]आदिदेशाऽथ तीर्थेशः कारितं कल्पते न यत् । भुञ्जते तत्कुतो ज्ञानबन्धुरास्तव बन्धवः ॥५८५॥
पुनर्विज्ञपयामास नृपस्तर्हि जगत्प्रभो ! । स्वामिन्नकारिताऽन्नाय प्रेष्यन्तां मद्गृहानमी ॥५८६॥
तमादिदेश तीर्थेशो यथार्थमथ पार्थिवम् । राजन्न कल्पते राजपिण्डः शमभृतामिति ॥५८७॥
नरेन्द्रेऽस्मिन् जिनेन्द्रेण निषिद्धे सर्वथेत्यथ । पराभवभवन्मानम्लानिश्यामलितानने ॥५८८॥
माऽसौ खेदस्य पात्रं भूदित्यवेत्य मरुत्वता । अवग्रहविदा पृष्टः स्पष्टमूचे जगद्गुरुः ॥५८९॥ युग्मम् ॥
शक्रस्य चक्रिणो राज्ञः स्थानेशस्य गुरोरिति । पञ्चधावग्रहो भावात् पञ्चानामपि पुण्यकृत् ॥५९०॥
अथ शक्रः प्रणम्याह प्रभो ! क्षेत्रेऽत्र **भारते** । मया वासाय साधूनां प्रदत्तोऽयमवग्रहः ॥५९१॥
आकर्ण्य **भरतो**ऽपीति प्रीतो नत्वा जगद्गुरुम् । अनुजज्ञे निवासाय साधूनां भारतीं भुवम् ॥५९२॥
अथाऽपृच्छन्महीभर्त्ता द्युभर्त्तारं ससम्मदः । देयं कस्यान्नमानीतमिदमेवं निवेद्यताम् ॥५९३॥
गुणाधिकेषु कर्त्तव्या पूजेत्युक्ते बिडौजसा । साधून् विना गुणी कोऽस्ति मत्तोऽपीति व्यचिन्तयत् ॥५९४॥
ज्ञातं सन्तितरां सन्तः श्रावका मद्गुणाधिकाः । तेभ्यः पूजा विधेयेति निश्चयं भरतो व्यधात् ॥५९५॥
अथ प्रणम्य तीर्थेशं ययौ दिवि दिवस्पतिः । भरतस्तु विनीतायां पुर्यां धुर्यो मनस्विनाम् ॥५९६॥
अन्यतो विजहाराथ प्रभु**रष्टापदा**चलात् । निर्दम्भं लम्भयन् लक्ष्मीं पुराम्भोजानि भानुवत् ॥५९७॥
**भरतो**ऽपि रतो धर्मे श्राद्धानाहूय भूरिशः । इदं जगाद भोक्तव्यं भवद्भिर्मम मन्दिरे ॥५९८॥
क्रियासु कृषिमुख्यासु कार्यं चेतोऽपि न क्वचित् । भवद्भिः केवलं भाव्यं धर्मकर्मैककर्मठैः ॥५९९॥
इदं च पाठ्यं निःशाठ्यं भोजनान्ते मदग्रतः । **जितो भवान् वर्द्धते भीस्ततो मा हन मा हन** ॥६००॥
मत्वेदमथ ते श्राद्धा भवने तस्य भुञ्जते । पठन्ति च वचस्तत्ते सम्मोहगरगारुडम् ॥६०१॥
प्रमादी मेदिनीशोऽपि मग्नो रतिमहानदे । नित्यमाकर्ण्य तद्वाक्यं विचिन्तयति किञ्चन ॥६०२॥
अहं केन जितो ? ज्ञातं कषायैस्तेभ्य एव भीः । वर्द्धते दुर्द्धरा तेन न घात्याः प्राणिनो मया ॥६०३॥
नित्यं ते स्मारयन्तीति नीतिशक्राय चक्रिणे । विरागसागरोल्लासनिशाकरनिभं वचः ॥६०४॥
प्रमादपादपाकीर्णे तस्मिन् **भरत**भूभृति । तद्वाक्यैः [२]पवमानैस्तैर्धर्मध्यानानलोऽज्वलत् ॥६०५॥
श्राद्धाश्राद्ध[३]विवेकाज्ञैः सूदैर्विज्ञपितो नृपः । चक्रेऽणुगुणशिक्षाख्यव्रतैस्तेषां परीक्षणम् ॥६०६॥

---

१. ०आदिदेश स० P । २. पठमानै० - C, A । ३. विवेकज्ञैः K, C, D, P ।

टि. 1. अभङ्गुरसङ्गराः अभङ्गुरः =मोक्षः तमवाप्तुं सङ्गरः = प्रतिज्ञा येषां ते । 2. अन्धुः(पु) - कूपः ।

श्रावकाणां तदा चक्रे निर्व्यूढानां परीक्षणे । रेखात्रयं स काकिण्या रत्नत्रितयसूचकम् ॥६०७॥
स्वाध्यायहेतवे तेषां वेदानार्यान्नृपार्यमा । स चकार परार्था हि प्रवृत्तिः स्यान्महात्मनाम् ॥६०८॥
जिनान्तरेषु तीर्थस्य व्यवच्छेदे कदाग्रहात् । अनार्यत्वममी मोहान्मिथ्यात्वं च प्रपेदिरे ॥६०९॥
लोकानामन्यदा कर्मशत्रुच्छेदाय तीर्थकृत् । पुनानः पृथिवीं पादैः **शत्रुञ्जय**गिरिं ययौ ॥६१०॥
क्षमानाथस्य धर्मस्य त्रैलोक्यान्तर्विलोक्य तम् । गिरिं मेने महादुर्गं मुनीन्द्रो निरुपद्रवम् ॥६११॥
अथ प्रथमसर्वज्ञः स विज्ञाय महाद्भुतम् । तमद्रिमिह माहात्म्यनिधानमिव पिण्डितम् ॥६१२॥
समारोहन्महा[१]मोहद्रोहाय भवभाजिनाम् । शत्रुवित्रासनायेव कुञ्जरं वीरकुञ्जरः ॥६१३॥ [युग्मम्]
मुनयः **पुण्डरीका**द्याः सहैवारुरुहुर्गिरिम् । सोपानमिव निर्वाणसौधस्यात्यन्तमुत्सुकाः ॥६१४॥
बभौ स तं समारूढः शैलं त्रैलोक्यनायकः । मुक्तिद्वीपमिव प्राप्तस्तीर्त्वा संसारवारिधिम् ॥६१५॥
पिङ्गः प्रभोः प्रभाभारैः कीर्णः कुसुमवृष्टिभिः । ताराकुलाकुलस्वर्गशैललीलामगाद् गिरिः ॥६१६॥
पवित्रयति मूर्द्धानं तदा त्रिजगतीगुरौ । प्रभावप्रणमद्वृक्षभुजाग्रैर्नृत्यति स्म सः ॥६१७॥
प्रभुदृष्ट्या सुधावृष्ट्या पुनः प्रोद्गतपक्षतिः । अभितः स समारोहल्लोललोकनिभा[२]दभात् ॥६१८॥
विबुधास्त्रिविधास्तूर्णं देवं सेवितुमाययुः । स्वस्थानस्था निरायासं ज्योतिष्कास्तु सिषेविरे ॥६१९॥
जन्तूनां पापभीतानां दुर्गभूतस्य भूभृतः । मौलौ वप्रत्रयं रत्नस्वर्णरूप्यैः सुरा व्यधुः ॥६२०॥
प्राकारद्वारदम्भेन सज्जितानि कुतूहलात् । दिग्वधूभिर्मुखानीव स्मेराणि जिनमीक्षितुम् ॥६२१॥
सर्वतः पर्वतेष्वेकः पवित्रोऽहमिति ब्रुवन् । अशो[1]कानोकहव्याजादयमूर्ध्वं व्यधाद् भुजम् ॥६२२॥
माहात्म्येन महीध्रेषु गिरिर्गुरुरसाविति । रत्नसिंहासनव्याजादस्योष्णीषं व्यधुः सुराः ॥६२३॥
चतुर्मूर्त्तिभृतस्तत्र स्थितस्याऽऽस्येन्दुभिर्विभोः । सञ्जज्ञे पर्वतः पूर्वः सर्वासामप्यसौ दिशाम् ॥६२४॥
सद्देशनां समारेभे स मारेभैककेसरी । विभु[३]र्भविकलोकानां कर्णामृतकिरा गिरा ॥६२५॥
महीरुहेषु कल्पद्रुः स्वयंभूरमणोऽब्धिषु । ज्योतिष्केषु रविः सोऽयं शैलः शैलेषु शस्यते ॥६२६॥
तुङ्गतां सर्वतः सर्वपर्वतेषु [४]दधात्ययम् । यन्मौलिवर्त्तिनां हस्तप्राप्यं मुक्तिलताफलम् ॥६२७॥
जलकान्तमणिश्रेणिनिर्मितः प्रतिभात्ययम् । विघटन्ते झटित्येव भवाब्धेर्यत्र वीचयः ॥६२८॥
नृणामिहाधिरूढानां शुक्लध्यानविभानिभात् । हस्तावलम्बनं दत्ते मुक्तिश्रीः कुन्दसुन्दरा ॥६२९॥
भ्रूणब्रह्मर्षिघातादिपातकान्यपि तत्क्षणात् । व्यपोहत्यस्य महिमा हिमानीवाऽहिमत्विषः ॥६३०॥
व्यक्तं विमुक्तकाठिन्यमिह क्रूरात्मनां मनः । प्रयाति खादिराङ्गारतप्तायःपिण्डवत् द्रवम् ॥६३१॥
अतः शमसुधाकुण्ड ! **पुण्डरीक** ! त्वया[2]ऽस्यताम् । अस्मिन् धराधरे सिद्धि[3]लोलुभैः साधुभिः समम् ॥६३२॥

---

१. महान्मोह० LB । महान् इति वीरकुञ्जरः पदस्य विशेषणम् सम्पा० । २. दधात् A । ३. ०र्भाविक० K । ४. दधावायं A ।
टि. 1. अनोकहः (पुं) =वृक्षः । 2. अस् ग.१ उभयपदी गत्यर्थकधातोः कर्मणि । 3. लोलुभः = लोलुपः ।

इत्यासाद्य प्रभोराज्ञां तं नत्वा तत्र भूधरे । अस्थायि **पुण्डरीके**ण मुनिहंसैः सहामलैः ॥६३३॥
ततश्च विहृतेऽन्यत्र जगत्त्रितयनेतरि । शुचाऽमुचदयं शैलः शालादिमणिमण्डनम् ॥६३४॥
तत्रादिगणभृद् दुर्गे श्रीजिनेशनिदेशतः । सहितः साधुभिः सैन्यैः सैन्याधिप इव स्थितः ॥६३५॥
अथोवाच मुदा साधूनग्रणीर्गणधारिणाम् । मनःसंवेगसंवेगगौरगौरवया गिरा ॥६३६॥
तपःश्रीदूतिकाक्लृप्तसिद्धिसम्बन्धकाङ्क्षिणाम् । इदं केवलसङ्केतनिकेतनमहो गिरिः ॥६३७॥
अस्मिन्नाकारणं मुक्तेस्तद्वः केवलमेष्यति । तदात्मा तपसा शुद्धो वास्यतां ध्यानसौरभात् ॥६३८॥
इति संवेगसश्रीक**पुण्डरीक**गिराऽचिरात् । सर्वेऽप्यालोचनारोचमाना मानादिमाथिनः ॥६३९॥
क्षणक्षामितनिःशेषजन्तवो[१]ऽनन्तबोधयः । कर्मदानवभेदाय साधवो माधवोपमाः ॥६४०॥
गृहीतानशनाः शुक्लध्याननिर्द्धूतकल्मषाः । बभूवुर्भूभृतस्तस्य ते लीलामौलिमण्डनम् ॥६४१॥ त्रिभिर्विशेषकम् ॥
गणभृन्मुक्तिनिःश्रेणिं क्षपकश्रेणिमाश्रितः । क्षीणमोहगुणस्थानं साधुभिः सार्द्धमासदत् ॥६४२॥
मासान्ते **चैत्रराकायामथ** प्रथमतोऽभवत् । केवलं **पुण्डरीक**स्य ततोऽन्येषां तपोभृताम् ॥६४३॥
अथैतान् मुक्तिवनिता नितान्तमनुरागिणी । निर्मुक्तकर्मावरणानात्मसादकृत स्वयम् ॥६४४॥
गीर्वाणास्तत्र निर्वाणगमनोत्सवमुत्सुकाः । आगत्य चक्रिरे तेषां हर्षसोत्कर्षचेतसः ॥६४५॥
तदेष प्रथमं तीर्थं **शत्रुञ्जय**धराधरः । बभूव **पुण्डरीका**दिसाधुसिद्धिनिबन्धनम् ॥६४६॥
मुमुक्षुपुण्डरीकस्य **पुण्डरीक**स्य निर्वृतौ । नृपुण्डरीको **भरतः पुण्डरीका**द्रिमागमत् ॥६४७॥
तत्र रत्नमयं चैत्यमुदितं मुदितो व्यधात् । उदयाद्रिशिरश्चुम्बिरविबिम्बविडम्बकम् ॥६४८॥
जितस्तेनैव चैत्येन प्रभया सुरभूधरः । प्रस्वेदबिन्दुसन्दोहं धत्ते तारावलिच्छलात् ॥६४९॥
**पुण्डरीक**प्रभोर्मूर्त्या युतामत्र नृपो व्यधात् । **युगादि**जिननाथस्य प्रतिमां [1]मतिमानसौ ॥६५०॥
विहरन्नथ देशेषु विविधेषु जगद्गुरुः । भविनां मुक्तिमार्गाय धर्म्यं [2]युग्यमिवार्पयत् ॥६५१॥
पूर्वलक्षं परिक्षिप्य दीक्षाकालात् त्रिकालवित् । निर्वाणकालं विज्ञाय स्पष्ट**मष्टापदं** ययौ ॥६५२॥
**अष्टापदा**द्रिमारूढः परीतः स्फटिकांशुभिः । शुशुभे स विभुः शुभ्रैः सिद्धैरालोकनैरिव ॥६५३॥
प्रत्यपद्यत साधूनां सहस्रैर्दशभिः सह । चतुर्दशतपोयोगात्पादपोपगमं जिनः ॥६५४॥
तथावस्थितमद्रीन्द्रपालो व्यालोक्य तं प्रभुम् । गत्वा विज्ञपयामास **भरतं** भूमिवासवम् ॥६५५॥
श्रुत्वा चतुर्दशाहारपरिहारं जगद्गुरोः । न चतुर्दशभिर्भेजे रत्नैरपि नृपः सुखम् ॥६५६॥
ततश्चरणचारेण चचाल **भरतेश्वरः** । परिवारैर्दिशो रुन्धन्नष्टाव**ष्टापदं** प्रति ॥६५७॥
[२]अनुयातोऽपि वातेन वेगादचलचीवरः । आजगाम गिरेर्मौलिमाकृष्टो मनसेव सः ॥६५८॥

---

१. ०नन्तबुद्धयः P । २. अनुयाताऽपि A ।

टि. 1. मतिमान् असौ । 2. युग्यं =वाहनम् ।

अप्राप्तपूर्वावाजन्म चरणौ प्राप्य चक्रिणः । मार्गभूर्दुर्भगेव स्त्री रक्ताऽभूत् क्षरताऽसृजा ॥६५९॥ अशक्तेऽपि सहागन्तुं छत्रधारिणि चक्रिणः । अपनिन्ये मनस्तापस्तपनातपवेदनाम् ॥६६०॥ अथ**अष्टापद**मारूढस्तं तथावस्थितं प्रभुम् । अपश्यत् प्रसभोन्मीलद्बाष्पाविलविलोचनः ॥६६१॥ स प्रणम्याभवद् यावदुपास्तिन्यस्तमानसः । अपश्यत् तावदायातान् सर्वान् गीर्वाणनायकान् ॥६६२॥ भक्तिशोकभराभोगभङ्गुरीकृतकन्धरः । तैः समं शमिनामीशमुपासामासिवानसौ ॥६६३॥ **माघकृष्णत्रयोदश्यां** पूर्वाह्णेऽ**भीचिगे** विधौ । समाहितमनाः काययोगे स्थित्वाऽथ बादरे ॥६६४॥ अरौत्सीद् बादरौ शब्दचित्तयोगौ जगद्गुरुः । कायस्य बादरयोगं सूक्ष्मेणैव रुरोध सः ॥६६५॥ [युग्मम्] तेनैव वाङ्मनोयोगौ सूक्ष्मौ रुद्ध्वा तमप्यथ । तार्त्तीयीकं सितध्यानं सूक्ष्मक्रियमसाधयत् ॥६६६॥ अथोच्छिन्नक्रिये तुर्ये शैलेशीं समशिश्रियत् । पञ्चह्रस्वाक्षरोच्चारकालमानां जिनाग्रणीः ॥६६७॥ प्रक्षीणशेषकर्मौघः परित्यक्ततनुत्रिकः । स्वभावसिद्धोर्ध्वगतिर्ज्वालावदृजुनाध्वना ॥६६८॥ अस्पृष्टाकाशगमनः सिद्धानन्तचतुष्टयः । एकेन समयेनाऽऽप मुक्तिलक्ष्मीवतंसताम् ॥६६९॥ [युग्मम्] क्षपकश्रेणिमारुह्य परेऽपि परमर्षयः । तदा दशसहस्राणि मुक्तिं प्रभुवदभ्ययुः ॥६७०॥

प्रथममयमुदारां प्राप्य सम्यक्त्वलक्ष्मीम्, तदनु मनुजवर्गस्वर्गसाम्राज्यलक्ष्मीम् ।
अथ निरुपमसम्यग्ज्ञानचारित्रलक्ष्मीम्, त्रिभुवनपतिराप श्रेयसीं शर्मलक्ष्मीम् ॥६७१॥ [**मालिनीवृत्तम्**]

एतेन श्री**ऋषभनाथचरित्रं** दिग्मात्रकीर्त्तनेन '**संवच्छरमुसभजिणो**' त्ति प्रपञ्चितम् ।

**इति श्रीऋषभनाथचरितम् ॥**

सम्प्रति '**छम्मासा वद्धमाणजिणचंदो**'त्ति श्री**वीरचरितं** संक्षिप्तकीर्त्तनेन प्रकाश्यते । तथाहि—

**[ श्रीवीरजिनचरितम् ॥ ]**

वीरः श्रियेऽस्तु व्याख्यासु यद्दन्तकिरणाङ्कुराः । दधुर्मौलिषु नम्राणां मङ्गल्यामक्षतश्रियम् ॥१॥ **जम्बूद्वीपे प्रतीचीनविदेहै**कविभूषणे । **जयन्ती**ति **महावप्र**संज्ञेऽस्ति विजये पुरी ॥२॥ अखण्डोद्दण्डदोर्दण्डकण्डूतिश्चण्डविक्रमः । **शत्रुमर्दन** इत्यासीत् तत्र पार्थिवपुङ्गवः ॥३॥ तस्य **पृथ्वीप्रतिष्ठान**नामग्रामनियोगभृत् । **नयसारो**ऽभवत्साधुसङ्गहीनोऽपि धर्मधीः ॥४॥ दानश्रद्धाविशुद्धान्तःकरणः करुणानिधिः । उपकारी प्रियगुणः स सदासीत् प्रियंवदः ॥५॥ सोऽन्यदा चारुदारुभ्यो राजशासनगौरवात् । सपाथेयः सशकटश्रेणिराट[2] महाटवीम् ॥६॥ तं वृक्षच्छेदनोद्युक्तं युक्तं वृक्षालयो[१]ऽनलः । क्षुन्मिषो[3]ऽतीतपन्मध्ये[4] मध्याह्नेऽर्कमिषो बहिः ॥७॥

---

१. वृक्षोद्भवोबलः C ।

टि. 1. मनःतापः-कर्तरि प्रथमा । 2. ०श्रेणिः आट महाटवीम् । 3. अतीतपत्-'तप्'धातोः प्रेरकाद्यतनी तृ.पु.एकवचनम् । 4. मध्ये-उदरमध्ये, इत्यर्थः ।

तत्कृते भृतकैः स्वादवती रसवती तदा । आनिन्ये मण्डपाभस्य तले कस्यापि शाखिनः ॥८॥
**नयसार**स्तदा दध्यौ धर्म आजन्म यः कृतः । ममारण्येऽपि तेनाऽद्य मा भूदनतिथिस्तिथिः ॥९॥
एवं चिन्तयतस्तस्यारण्येऽप्यसुलभातिथौ । धर्म एवातिथीभूतः साक्षादागान्मुनिव्रजः ॥१०॥
क्षुधितान् तृषितान् श्रान्तान्मुनीनालोक्य तानसौ । मुमुदे च ववन्दे च दुःस्थः कल्पतरूनिव ॥११॥
कुतो यूयमिहाटव्यामिति पृष्टाश्च तेन ते । आहुः सहैव सार्थेन स्थानतः प्रस्थिता वयम् ॥१२॥
सार्थो भिक्षार्थमस्मासु ग्रामान्तःस्थेषु सोऽचलत् । अनात्तभिक्षा एवानुयान्तोऽत्र पतिता वयम् ॥१३॥
श्रुत्वेत्यसौ कृती सार्थं निन्दन् पुण्यं स्तुवन् निजम् । स्वार्थे सज्जीकृतैरन्नपानैस्तान् प्रत्यलाभयत् ॥१४॥
तान्मुनीन् विधिवद् भुक्तान् ग्रामेशः कृतभोजनः । पुर्या दर्शयितुं मार्गं गत्वा सममचालयत् ॥१५॥
दर्शिते पूःपथे स्थित्वा साधवस्ते तरोरधः । ग्रामवित्तस्य तस्याख्यन्धर्मं धीरः स चाददे ॥१६॥
अटवीपातिनां तेषां तेनादर्शि पुरीपथः । भवाटवीजुषो मुक्तिपुरीमार्गस्तु तस्य तैः ॥१७॥
स च ते च मिथोदिष्ट[१]तत्तत्पथविहारिणः । जनमानन्दयामासुर्दयाभासुरचेतसः ॥१८॥
सोऽभ्यस्यन् कर्ममर्माविद्धर्मनिर्माणमन्वहम् । सम्यक्त्वं पालयन् कालं निनाय ग्रामनायकः ॥१९॥
साधिताराधनः सोऽन्ते स्मृतपञ्चनमस्कृतिः । पल्योपमायुः **सौधर्मे नयसारः** सुरोऽभवत् ॥२०॥
च्युत्वाऽथ सोऽस्मिन् **भरते भरत**स्यादिचक्रिणः । **ऋषभस्वामि**पुत्रस्य पुत्रो**ऽयोध्या**पतेरभूत् ॥२१॥
**मरीचि**नामा सद्धामा पितृभ्रात्रादिभिः सह । गतः स प्रथमे व्याख्यावसरे **वृषभप्रभोः** ॥२२॥
महिमानं सुरैस्तन्यमानं प्रेक्ष्य प्रभोरसौ । धर्मं श्रुत्वा च सम्यक्त्वयुतधीर्व्रतमाददे ॥२३॥
स्थविराणां पुरोऽङ्गानि पठन् सोऽङ्गेऽपि निस्पृहः । सम्यक्ज्ञातमहाधर्मो व्यहरत्स्वामिना सह ॥२४॥
ग्रीष्मेऽन्तर्बहिरूर्ध्वाधस्तापव्या[२]प्ते कदाप्यसौ । स्वेदार्द्रस्तर्षितो दध्यौ चारित्रावरणोदयात् ॥२५॥
धीरधार्यं क्षमो धर्तुं नाहं व्रतमतः परम् । महाधीरकुलोत्पन्नः क्षुद्रो लज्जे त्यजन्नपि ॥२६॥
सम्प्रत्येनमुपायं तत्कुर्वे दुर्वेधसा जितः । येन स्याद् व्रतमप्यङ्गीकृतमङ्गेऽपि न क्लमः ॥२७॥
सर्वत्र साधवः सर्वे त्रिदण्डविरता मताः । त्रिदण्डीदण्डितस्यास्तु त्रिदण्डी मम लक्ष्म तत् ॥२८॥
अमी लुञ्चितमूर्द्धानो लोचकष्टाक्षमस्य मे । क्षुरेण मुण्डिते मुण्डे शिखैकाऽस्तु कलङ्कवत् ॥२९॥
ते [1]निःकिञ्चनताभूषा भूषाऽऽस्तां मुद्रिकादि मे । सुगन्धयोऽमी शीलेन पुण्ड्रैः सौगन्ध्यमस्तु मे ॥३०॥
ते शुक्लवस्त्रा वासोऽस्तु कषायं मे कषायिणः । ते मुक्तिदर्शिनो नाहमित्यूर्द्ध्वं छत्रमस्तु मे ॥३१॥
चरन्ति [2]चरणत्राणं सत्त्वं ते दधतः सदा । चार्मणं [3]चरणत्राणं [4]तद्वियुक्तस्य मेऽस्तु तत् ॥३२॥

---

१. तत्पथप्रविहारिण P । २. ०व्याप्तः P, K, A ।

टि. 1. निःकिञ्चनता एव भूषा येषां ते । 2. चरणत्राणं संयमस्य रक्षणमित्यर्थः । 3. चरणयोः त्राणमित्यर्थः । 4. सत्त्वेन वियुक्तस्य ।

पवित्रास्ते चरित्रेण नाहमित्युपदेशकम् । करिष्ये पयसा स्नानं बहुजीवोपमर्द्यपि ॥३३॥
इति लिङ्गं विकल्प्यात्मधिया **क्लेशैककातरः** । पारिव्राज्यमसौ भेजे **मरीचिर्मो**हवीचिभाग् ॥३४॥
जैनमेवादिशत् धर्म्मं तादृग्वेषोऽप्ययं जने । **मषीलिप्तोऽपि कुरुते न हंसः काककूजितम्** ॥३५॥
किं धर्मं नाचरस्येनमिति पृष्टः स्वयं जनैः । क्वेभवाह्यं खरो भारमर्हतीत्ययमभ्यधात् ॥३६॥
व्रतार्थमुदितान् धर्म्मव्याख्यानमुदितानसौ । शिष्यान् सदाऽर्प्पयामास स्वामिने नाभिजन्मने ॥३७॥
विजहारेदृगाचारः सोऽन्वहं स्वामिना सह । कदाचिदप्**ययोध्यायां** स्वामी च समवासरत् ॥३८॥
प्रणम्य पृष्टस्तत्रादिचक्रिणा भाविनोऽभ्यधात् । तीर्थकृच्चक्रभृद्विष्णुप्रतिविष्णुबलान् विभुः ॥३९॥
पुनश्चक्रायुधोऽपृच्छत् पर्षदीहाऽस्ति कोऽपि किम् । नाथ ! त्वमिव यो जीवः शम्भुर्[1]भाव्यत्र भारते ॥४०॥
**मरीचिं** दर्शयन्नूचे भगवानत्र भारते । चरमस्तीर्थकृद् भावी **वीराख्यः** सूनुरेष ते ॥४१॥
**त्रिपृष्ठो** विष्णुराद्योऽत्र भविता **पोतने** पुरे । **प्रियमित्रो विदेहेषु मूकापूर्यां** च चक्रभृत् ॥४२॥
इत्याकर्ण्य प्रभुं पृष्ट्वा **मरीचिं भरता**धिपः । गत्वा प्रदक्षिणीकृत्य ववन्दे च जगाद च ॥४३॥
जिनस्त्वं चरमो भावी विष्णुराद्यश्च भारते । **विदेहे**षु च चक्रीति विदितं भगवद्गिरा ॥४४॥
तत्प्राव्राज्यं न ते वन्दे भाव्यर्हत्त्वं नमामि ते । इत्येनमुक्त्वा नाथं च नत्वाऽ[१]गाद् **भरतः** पुरीम् ॥४५॥
इत्याकर्ण्य त्रिरास्फोट्य **मरीचि**र्मद[२]वीचितः । उच्चैरूचे भविष्यामि हरिश्चक्री जिनोऽप्यहम् ॥४६॥
अहं शाङ्र्गभृतामाद्यः पिता चक्रभृतां मम । पितामहो जिनेन्द्राणामहो श्लाघ्यं कुलं मम ॥४७॥
इत्यास्फालयता बाहू जातेरातन्वता मदम् । उच्चै**र्मरीचि**ना नीचैर्गोत्राख्यं कर्म निर्ममे ॥४८॥
विहरन् साधुभिः सार्द्धमूर्ध्वं **नाभेय**निर्वृतेः । स्वयं प्रबोधितान् शिष्यान् साधुभ्यः श[३]श्वदार्पयत् ॥४९॥
ग्लानोऽप्यपाल्यमानः सोऽसंयमीति सुसंयमैः । कदाचिच्चिन्तयामास दुःखव्यासक्तमानसः ॥५०॥
धिग् मुनीन् निष्कृपानेतान् यदेकगुरुदीक्षितम् । ईक्षन्तेऽपि न मां ग्लानं दूरेऽस्तु परिपालनम् ॥५१॥
धिग् वा ध्यातं ममैवेदममी नि[४]र्वेदवे[2]दयः । निरीहा निजदेहेऽपि क्व भ्रष्टं पालयन्तु माम् ॥५२॥
विमुक्तो व्याधिनानेन लिङ्गेनानेन दीक्षितम् । स्वस्य शिष्यं करिष्यामि कञ्चन प्रतिचारकम् ॥५३॥
इत्यस्य ध्यायतो दैवादव्याधेः **कपिला**भिधः । अमिलद् धर्मबोधेच्छाचटुलः कुलपुत्रकः ॥५४॥
स धर्मं बोधितो जैनं शुचिवाचा **मरीचि**ना । किं स्वयं न करोषीति पप्रच्छ कुलपुत्रकः ॥५५॥
न क्षमोऽहमिमं कर्तुमित्युक्तेऽथ **मरीचिना** । अपृच्छत् कुलपुत्रः किं धर्मो नास्ति भवत्पथे ? ॥५६॥
तमथार्हत्पथे मन्दं मत्वा शिष्यं चिकीर्षुणा । ऊचे **मरीचि**ना धर्मस्तत्राप्यत्रापि विद्यते ॥५७॥

---

१. गत्वा-P । २. ०नीचित-P । ३. सर्वदार्प्पयत्- C । ४. निर्वेदनादयः K, D ।

टि. 1. जिनः इत्यर्थः अभिधानचिन्तामणौ श्लोकाङ्कः १/२४॥ 2. वेदिः(पुं) परिष्कृतभूमिः, निर्वेदभावेन समीकृतान्तःकरणभूमयः इत्यर्थः ।

इत्थं मिथ्यात्वधर्मोक्तेस्तच्छिष्यः **कपिलो**ऽभवत् । स च सागरकोटीनां कोटीं संसारमार्जयत् ॥५८॥
अनालोच्य **मरीचि**स्तद्रचितानशनो मृतः । दशतोयधितुल्यायुर्देवोऽभूद् **ब्रह्मलोकभूः** ॥५९॥
**आसुर्यादी**नसौ शिष्यान् कृत्वा स्वाचारचारिणः । विपद्य **ब्रह्मलोके**ऽभूत्**कपिलो**प्यमरः किल ॥६०॥
स स्वां जानन् जनिं पूर्वामुर्व्वीमुत्तीर्य मोहतः । स्वयं कृतं मतं **साङ्ख्यमासुर्यादीन**बोधयत् ॥६१॥
तदाम्नायान्मतं **साङ्ख्यं** तदाद्युर्व्यामवर्त्तत । **कातरा नितरां धर्मं सुखसाध्यं हि तन्वते ॥६२॥**
च्युत्वा **मरीचि**जीवस्तु **कौशिका**ख्योऽजनि **द्विजः** । अशीतिपूर्वलक्षायुः **कोल्लाके** सन्निवेशने ॥६३॥
धनार्जनाशया हिंस्रो विषयी सोऽचरच्चिरम् । अन्ते त्रिदण्डी भूत्वा च मृत्वाऽभ्राम्यद् भवान् बहून् ॥६४॥
**स्थूणा**ख्ये सन्निवेशेऽथ **पुष्यमित्रो**ऽभवद् **द्विजः** । भेजे च पूर्वलक्षद्वासप्तत्यायुस्त्रिदण्डिताम् ॥६५॥
मृत्वा **सौधर्म**कल्पेऽथ मध्यमायुः **सुरो**ऽभवत् । च्युत्वा**ऽग्निद्योत** इत्यासीद् **द्विजश्चैत्ये** निवेशने ॥६६॥
स त्रिदण्डी चतुःषष्टिपूर्वलक्षस्थितिः स्थितः । मृत्वा ततोऽसा**वीशाने** मध्यायु**र्विबुधो**ऽभवत् ॥६७॥
च्युत्वाऽभू**दग्निभूत्या**ख्यो **मन्दिरे** सन्निवेशने । षट्पञ्चाशत्पूर्वलक्षायुष्को **विप्रस्त्रिदण्ड्य**सौ ॥६८॥
मृत्वा **सनत्कुमारे**ऽभूत् **सुरो**ऽयं मध्यमस्थितिः । च्युत्वा च **भारद्वाजा**ख्यः **श्वेतव्यां** पूर्यभूद् **द्विजः** ॥६९॥
पूर्वलक्षचतुश्चत्वारिंशदायुःस्थितिः स तु । प्रव्रज्य **तुर्यकल्पे**ऽभूत् मध्यमायुः **सुधाशनः** ॥७०॥
सोऽभूद् भ्रान्त्वा भवं **राजगृहे**ऽथ **स्थावरो द्विजः** । पारिव्राज्यं चतुस्त्रिंशत्पूर्वलक्षायुराददे ॥७१॥
स **ब्रह्मलोक**मध्यास्त मध्यायु**र्विबुध**स्ततः । कर्मपूरी भवान् भूरीनभ्राम्यच्च ततश्च्युतः ॥७२॥
इतश्च **विश्वनन्दी**ति राजा **राजगृहे**ऽभवत् । अभूद् **विशाखनन्दी**ति नन्दनोऽस्य **प्रियङ्गु**भूः ॥७३॥
बभूव भूपतेस्तस्याऽवरजो यौवराज्यभाक् । **विशाखभूति**रित्याख्यो **धारिणी**[१]रमणीप्रियः ॥७४॥
**मरीचि**जीवः प्रक्षीणाशुभकर्मवशादभूत् । **विशाखभूतेर्धारिण्यां विश्वभूतिः** सुतोऽद्भुतः ॥७५॥
उद्यौवनो वने **पुष्पकरण्डे** विश्वमण्डनः । **विश्वभूतिः** कदाप्येष रेमे रामाकुलाकुलः ॥७६॥
विशन्**विशाखनन्दी**ह रिंसुर्नृपनन्दनः । श्वेव श्राद्धक्षणेऽवारि द्वारि दौवारिकैस्तदा ॥७७॥
तन्मत्वा **पुष्पदासी**भ्यः **प्रियङ्गु**र्नृपवल्लभा । कुपिता नृपतेराख्यत् परं पुत्रपराभवम् ॥७८॥
प्रियं प्रियाया निर्म्मातुं मायावी नृपतिस्ततः । रिपुभूपतिभीपात्रं यात्राभेरीमवादयत् ॥७९॥
वीरः **पुरुषसिंहा**ख्य उद्वृत्तः[1] सिंहपौरुषः । तज्जयाय प्रयामीति[२] सभायामवदच्च सः ॥८०॥
ऋजुः श्रुत्वेदमागत्य भक्त्या भूपं निषिध्य च । ययौ **पुरुषसिंहाय विश्वभूति**र्बलोद्भटः ॥८१॥
तं दृष्ट्वाऽऽज्ञावशं प्राप्तो वने भूयः **करण्डके** । **विशाखनन्दी** मध्येऽस्तीत्युक्तो द्वास्थैर्बहिः स्थितः ॥८२॥

---

१. धारणी K, D । २. ०प्रयास्यामि सभायामिति चाभ्यधात् । C ।

टि. 1. उद्धत इत्यर्थः ।

स्वं वनान्मायया कृष्टं मत्वैष द्वास्थमभ्यधात् । मुष्ट्या हतकपित्थद्रुफलाढ्यां दर्शयन् भुवम् ॥८३॥
एवं शिरोभिर्भवतां भूषयामि भुवस्तलम् । न चेद्भक्तिर्भवेत्ताते ज्येष्ठे ज्येष्ठतमा मम ॥८४॥
ममेदृग्वञ्चनाभोगैर्भोगैः पूर्णमिति ब्रुवन् । गत्वैष व्रतमादत्त **सम्भूति**मुनिसन्निधौ ॥८५॥
मत्वा प्रव्रजितं **विश्वभूतिं** भूपः सहानुजः । गत्वा नत्वा च राज्यार्थं मुहुरर्थयते स्म तम् ॥८६॥
तं मत्वाथ जगद्भोगाऽस्पृहं यातो गृहं नृपः । विजहार सहाचार्यैः स धन्यः पुनरन्यतः ॥८७॥
गुरोरनुज्ञयैकाकिविहारी विहरंश्च सः । पारणाय पुरीं मासोपवासी **मथुरा**मगात् ॥८८॥
तदैष तत्र तद्भूपपुत्रीमुद्वोढुमीयुषः । **विशाखनन्दिनो**ऽदर्शि सैन्याभ्यर्ण्णे चरन्नरैः ॥८९॥
तं विप्रियमिव प्रेक्ष्य कुपितश्च प्रियङ्गुभूः । तदा गवैकयोदस्तः पपात च महातपाः ॥९०॥
कपित्थपातनं क्वौज इत्येनमहसच्च सः । क्रुधा शृङ्गग्रहाद् विश्वभूतिरभ्रमयच्च गाम् ॥९१॥
तपसानेन तीव्रेण तीव्रवीर्योऽस्य मृत्यवे । प्रभवेयं भवेऽन्यत्र निदानमिति चाकरोत् ॥९२॥
समाप्तवर्षकोट्यायुस्ततोऽनालोच्य तन्मृतः । **महाशुक्रे** प्रकृष्टायु**र्विश्वभूति**रभू**न्मरुत्** ॥९३॥
इतश्च **भरते**ऽत्रैव पत्तने **पोतना**भिधे । [1]**रिपुप्रतिरिपु**र्नाम जज्ञे राजन्यकुञ्जरः ॥९४॥
**भद्रा**कुक्षिसमुद्रैकचन्द्रमास्तस्य नन्दनः । बलभद्रश्चतुःस्वप्नीसूचितो**ऽचल** इत्यभूत् ॥९५॥
**मृगावती**ति नाम्ना च कामास्त्रं दुहिताऽजनि । उद्यौवना [१]मनोज्ञश्रीः सा नन्तुं जनकं ययौ ॥९६॥
वीक्ष्य जातानुरागस्तामङ्के पङ्केरुहाननाम् । न्यस्य पाणिग्रहोपायमाध्याय विससर्ज च ॥९७॥
पप्रच्छ च पुरीवृद्धानुपाहूय महीपतिः । यद् रत्नं रत्नगर्भायां भवेद् भोः कस्य तद् भवेत् ॥९८॥
तत्तवैवेति तेऽप्यूचुस्त्रिरभ्युच्चार्य तद्वचः । पुत्रीमानाययत्तत्र परिणेतुं **मृगावतीम्** ॥९९॥
ते ययुर्लज्जिताः सर्वे गान्धर्वेण नृपः सुताम् । विवाहेन व्युवाहैनां निशामिव निशाकरः ॥१००॥
[2]गोपं कोप[२]त्रपाटोपभाग् **भद्रा** परिहृत्य तम् । ययौ सुतयुता कृत्यदक्षिणा दक्षिणापथम् ॥१०१॥
**बलस्तत्राचलः** कृत्वा नवां **माहेश्वरीं** पुरीम् । न्यस्यात्र मातरं **भद्रां** पितुरन्तिकमाययौ ॥१०२॥
स्वप्रजायाः पतित्वेन **प्रजापति**रिति क्षितौ । स तु क्षितिपतिः ख्यातः **को बध्नाति जगन्मुखम्** ॥१०३॥
**विश्वभूति**श्च्युतः **शुक्रा**त्सप्तस्वप्नाभिसूचितः । अथाभूत्प्रथमो **विष्णुर्मृगावत्यु**दरोद्भवः ॥१०४॥
ख्यातस्त्रिवंशपृष्ठत्वात् **त्रिपृष्ठ** इति स क्रमात् । खेलन् बलेन तारुण्यं भेजेऽशीतिधनुस्तनुः ॥१०५॥
**विशाखनन्दिनो** जीवस्तदा भ्रान्तभवोऽभवत् । **सिंहस्तुङ्गगिरौ शङ्खपुर**देशोपमर्दकः ॥१०६॥
**अश्वग्रीवेण** भूपेन तदैव प्रतिविष्णुना । कुतो मे मृत्युरित्युक्तः कोऽपि नैमित्तिकोऽवदत् ॥१०७॥

---

१. मनोन्यश्रीः K, मनोज्ञाश्रीः C । २. त्रपाटोपा द्राग - C, B ।

टि. 1. रिपुप्रतिशत्रुः इति नाम त्रिषष्टिदशमपर्वे महावीरचरिये च । 2. भूपं इत्यर्थः ।

यश्चण्ड**श्चण्डवेगा**ख्यभवद्दूताभिभूतिकृत् । यस्**तुङ्गगिरि**सिंहस्य हन्ता हन्ता स हन्त ते ॥१०८॥
उप्त्वा **शङ्खपुरे** शालीन् वारकेणाभिरक्षितुम् । तदादि **चण्डवेगे**न नृपतीनाजुहाव सः ॥१०९॥
राज्ञः प्रजापतेः पुत्रौ मत्वा सत्त्वाधिकौ च सः । तत्र कार्याय कस्मैचिच्**चण्डवेग**मुपादिशत् ॥११०॥
सङ्गीतं कारयन् राजा तमकस्मादुपागतम् । अभ्युत्तस्थावथ क्रुद्धौ तत्पुत्रौ रङ्गभङ्गतः ॥१११॥
**हयग्रीव**स्य तं दूतं मत्वा मन्त्रिजनाच्च तौ । व्रजन् कथ्योऽयमित्थं स्वानूचतुर्बलशार्ङ्गिणौ ॥११२॥
सन्मान्य राज्ञा प्रहितं तं यान्तमपरेऽहनि । मत्वा गत्वार्द्धमार्गे तौ कुट्टयामासतुर्भटैः ॥११३॥
नेशुस्तस्यानुगास्तच्च मत्वा भीतः प्रजापतिः । गृहे तं दूतमानाय्य सत्कृत्याधिकमभ्यधात् ॥११४॥
नाख्येयः स्वामिने कामं तिरस्कारः कुमारजः । **बालदुर्विनयः प्रीत्यै महता[1]महतान्तरः** ॥११५॥
ओमित्युक्त्वा गतो दूतः सत्यमाख्यत् पुनः प्रभोः । प्राग्त्रस्तस्वजनख्यातवृत्तालीकत्वकातरः ॥११६॥
**हयग्रीवेण** निर्दिष्टो विशिष्टोऽन्यः प्रजापतिम् । गत्वा चचक्षे संरक्ष [2]हर्यक्षा[3]त्कलमानिति ॥११७॥
युष्मद्दुर्विनयेनायं समायातो महाश्रमः । इति पुत्रावुपालभ्य तत्राचालीत्प्रजापतिः ॥११८॥
निषिध्याथ महीनाथं संहतौ **शङ्ख**पत्तनम् । गतौ रामहरी कामं हरिसङ्ग्रामकौतुकात् ॥११९॥
कथं कियच्चिरं सिंहमरक्षन्नपरे नृपाः । इति पृष्ट**स्त्रिपृष्ठे**न शालिलाली जनो जगौ ॥१२०॥
प्राकाराकारभृत्सैन्यैर्वर्षवारकमागतैः । अन्यैः शालिरिहाऽपालि भूपालैर्लवनावधि ॥१२१॥
श्रुत्वेति हरिराचष्ट कः कुर्यात्कष्टमीदृशम् । हरिं दर्शयतैकाकी यमशाकीकरोमि[4] तम् ॥१२२॥
अथ तेऽदर्शयन् सिंहगुहामिह महारथौ । बलभद्रहरी चक्रध्वानाहूतहरी गतौ ॥१२३॥
प्रपञ्चितास्यः पञ्चास्यो गुञ्जन् कुञ्जादथोत्थितः । तं वीक्ष्य पत्तिमुत्तीर्णो रथाच्चर्मासिभाग् हरिः ॥१२४॥
[5]तनुचर्मैव [6]चर्मास्य नखा एवायुधानि च । इति ध्यात्वाऽमुचन्मानी विष्णुरप्यसिचर्मणी ॥१२५॥
तत् पश्यन् केशरी जातिस्मरणाज्जातविस्मयः । दध्यौ तद्धार्ष्ट्यमस्यैकं यदेको मामिहागतः ॥१२६॥
द्वितीयं स्यन्दनत्यागस्तृतीयं शस्त्रमोचनम् । इत्युन्मदं पदं स्थाम्नस्तदेनं हन्मि हेलया ॥१२७॥
इतिधीः फालयोत्पत्य कण्ठे कण्ठीरवः पतन् । धृत्वौष्ठौ विष्णुना जीर्ण[१]भस्त्रादारमदारि सः ॥१२८॥
अवर्षन् हर्षिता विष्णौ जिष्णौ पुष्पाण्यथामराः । नरास्तु विस्मयस्मेराः सुधासारद्युतीः स्तुतीः ॥१२९॥
अहो कथं नरेणाहमाहतोऽस्मीत्यमर्षतः । तदा तस्थौ स्फुरन्नेव द्विधादीर्णोऽपि केसरी ॥१३०॥
तं स्फुरन्तं हरिं **वीर**जिनजीवस्य शार्ङ्गिणः । श्री**गौतम**गणाधीशजीवः सारथिरभ्यधात् ॥१३१॥

---

१. वस्त्रदार....A ।

टि. 1. अहतान्तरः=न हतं अन्तरं मनः येन सः अहतान्तरः न हृदयपीडाकारीत्यर्थः बालदुर्विनयस्य विशेषणम् । सम्पा० । 2. हर्यक्षः=सिंहः । अभिधानश्लोकाङ्कः १२८४ । 3. कलमः व्रीहिः, तान् । 4. च्वि प्रत्ययः । 5. तनोश्चर्म=त्वक् इति विग्रहः । 6. चर्मन्=ढालफलकः इत्यर्थः । अभिधानश्लोकाङ्कः-७८३ ॥

पशुसिंह ! नृसिंहेन हतोऽसीति मुदं श्रय । **अपमानो हि हीनेन हतानां महतां मतः** ॥१३२॥
तया वाचा नयाचारशुद्धया बोधितस्तदा । प्रीतो मृतो मृगपतिश्चतुर्थं नरकं गतः ॥१३३॥
हृच्छल्यं ते हतः सिंहः शालीन् खाद सुखादिति । **हयग्रीवं** प्रति ग्राम्यान् वक्तुमादिश्य तत्क्षणम् ॥१३४॥
आदाय सिंहचर्माथ कुमारौ पोतनं गतौ । तद्वृत्तज्ञ**हयग्रीवा**दिष्टो दूतश्च पृष्ठतः ॥१३५॥ युग्मम् ॥
स प्रजापतिमाचष्ट तुष्टः सिंहवधेऽधिपः । त्वत्पुत्रावाह्वयत्याशु राज्यं दातुं पृथक् पृथक् ॥१३६॥
श्रुत्वेति नृपतिर्दध्यौ मत्पुत्रौ हन्तुमाह्वयेत् । सोऽमर्षी दूतघर्षेण भीतः सिंहवधौजसा ॥१३७॥
अथाब्रूत नृपो दूत ! नूतनौ तनयौ मम । सेवानीतिं न जानीतस्तदेमि स्वामिनं स्वयम् ॥१३८॥
ततो दूतोऽभ्यधाद् भूप ! भर्तुराज्ञा न भज्यते । पुत्रौ वा प्रेषय रयाद् योद्धुं सज्जो भवाऽथवा ॥१३९॥
इत्युक्तिविषजीमूतं दूतं स्फूतहृदौ रुषा । कुमारौ [1]मारुतबलौ निरवासयतां रयात् ॥१४०॥
ततः क्रुद्धो **हयग्रीवो** युद्धोत्कौ च बलाच्युतौ । अभ्येयुः [2]पृतनावर्त्ते **रथावर्त्त**महागिरौ ॥१४१॥
यमोदरदरीपूरशूरं दूरगकातरम् । तदा दीप्रजगज्जज्ञे धीराणां [3]प्रधनं घनम् ॥१४२॥
मज्जतां स्वस्वसैन्यानां प्रतिकेशवकेशवौ । रणाब्धेः पथिनौ भावं रथिनौ भेजतुस्ततः ॥१४३॥
क्लीबे कान्ताचटूनीव मोघान्यस्त्राणि शार्ङ्गिणि । वीक्ष्याश्वकण्ठो द्विट्कण्ठविक्रमं चक्रमक्षिपन् ॥१४४॥
हरेरुरसि चक्रेण चक्रे निपततामुना । सप्रेमकोपवीरश्रीक्षिप्तताडङ्कताडनम् ॥१४५॥
तेनैवाथ कराऽऽत्तेन कण्ठं कमलनालवत् । चक्रेण निचकर्तार्द्धचक्री प्रत्यर्द्धचक्रिणः ॥१४६॥
विजयेतामुभावेतौ प्रथमौ सीरिशार्ङ्गिणौ । सपुष्पवृष्टिवाग्सृष्टिरेवं देवैस्तता दिवि ॥१४७॥
ततस्तयोर्भयोद्रेकात्प्रणतिं भूभुजो ययुः । गृहप्राङ्गणवत्ताभ्यां **भरतार्द्ध**मसाधि च ॥१४८॥
**त्रिपृष्ठः** [१]पिदधन् [4]शूरमण्डलस्य महन्महः । शिलां **कोटिशिलां** दध्रे दोर्दण्डेनातपत्रवत् ॥१४९॥
ततो गतो जितारातिजातिः **पोतन**पत्तनम् । सदेवैश्च नृदेवैश्चार्द्धचक्रित्वेऽभ्यषिच्यत ॥१५०॥
तदा दूरेप्यभूद्रत्नं यद्यत्तत्तमाश्रयत् । ततो गायनरत्नानि तमीयुः केऽपि गायनाः ॥१५१॥
शय्यापालं कदाप्येषु गायत्सु क्षणदाक्षणे । त्वया मयि शयानेऽमी प्रेष्या इति हरिर्जगौ ॥१५२॥
हरौ सुप्तेऽपि न प्रैषीद् गीतप्रीतस्तु तानसौ । **विषयेण विषेणेव मूर्च्छन्मूर्छाः स्मरन्ति किम्** ॥१५३॥
उत्थितस्तेषु गायत्सु हरिः पप्रच्छ ताल्पिकम् । किं नाऽमी प्रहितास्तेनाभिहितं [२]श्रुतिसौख्यतः ॥१५४॥
ततः क्रुद्धेन हरिणा स्वात्मेव नरकाध्वनि । तत्कर्णयोस्त्रपूस्तप्तमक्षेपि च मृतश्च सः ॥१५५॥
वेद्यं न्यकाचयत् कर्म कर्मणा तेन केशवः । ऐश्वर्यादन्यदप्युग्रमबध्नात्कर्म दुर्मदः ॥१५६॥
एवं चतुरशीत्यब्दलक्षायुः क्रूरकर्मकृत् । महारम्भैकधीर्मृत्वा स गतः **सप्तमावनिम्** ॥१५७॥

---

१. पिदधत् C, A, KH २. श्रुतिचापलात् - P ।

टि. 1. मारुतः प्रचण्डवायुः तेन सदृशं बलं ययोः, यद् जीमूतहरणे समर्थम् । 2. पृतना-सेना । 3. प्रधनं-युद्धम् । 4. शूरः (पुं)-सूर्यः ।

तद्विप्रयोगात्प्रव्रज्य प्रययावचलः शिवम् । बभूव नरकोद्वृत्तः केशवस्तु स **केशरी** ॥१५८॥
पूर्णायुः स हरिः **पृथ्वीं चतुर्थीं** पुनरप्यगात् । बभ्राम च भवान् भूरीन् स तिर्यग्मनुजादिकान् ॥१५९॥
अवाप्य मानवं जन्म स कालपरिणामतः । कृतदुष्कर्मनिर्मन्थं धर्मकर्म विनिर्ममे ॥१६०॥
**अपरेषु विदेहेषु** सोऽथ **मूकापुरी**पतेः । **धनञ्जयस्य** कामिन्या **धारिण्याः** कुक्षिमासदत् ॥१६१॥
ततश्चतुर्दशस्वप्नसूचितः सुषुवे सुतः । तया चारित्रलक्ष्म्येव केवलाभ्युदयोऽद्भुतः ॥१६२॥
**प्रियमित्र** इति ख्यातिं पितरौ तस्य तेनतुः । यौवनं नाम कामस्य धाम भेजे च स क्रमात् ॥१६३॥
**प्रियमित्रम**थ न्यस्य राज्ये राजा धनञ्जयः । धर्मद्रुमसुधां दीक्षां भेजे भवदवाकुलः ॥१६४॥
**प्रियमित्र**स्य भूरक्षाचतुरस्य चतुर्दश । उदपद्यन्त रत्नानि चक्रमुख्यानि च क्रमात् ॥१६५॥
अथ दिक्जैत्रयात्रोऽसौऽचलच्चक्रपथानुगः । षट्खण्डविजयं प्राप **भरतं भरतो** यथा ॥१६६॥
ततो लब्ध्वा नवनिधीनधीनविजयावनिः । चक्री चिक्रीड चक्रानुचारी **मूकापुरी**मनु ॥१६७॥
अमुं देवा नृदेवाश्च हर्षाश्रुजलमिश्रितैः । द्वादशाब्दीमभ्यषिञ्चन् चक्रित्वे तीर्थवारिभिः ॥१६८॥
रक्षतस्तस्य षट्खण्डां महीं गृहमिवाज्ञया । कदाचित्**पोट्टिलाचार्यः** पुरान्ते समवासरत् ॥१६९॥
धर्मतत्त्वं ततः श्रुत्वा कृत्वा राज्येऽङ्गजं निजम् । प्रव्रज्य नृपकोटीरो वर्षकोटीमधात्तपः ॥१७०॥
पूर्वलक्षा चतुरशीत्यायुः संन्यासतो मृतः । गीर्वाणोऽजनि **सर्वार्थविमाने शुक्र**मण्डने ॥१७१॥
च्युत्वेह **भरते भद्रा**कुक्षिभू**र्नन्दना**भिधः । **छत्राख्यनगर**भर्तु**र्जितशत्रोः सुतो**ऽभवत् ॥१७२॥
राज्ये न्यस्य युवानं तं **नन्दनं** मेदिनीपतिः । वैराग्यवारिसिक्तोऽभूद् व्रतव्रतति[1]भूरुहः ॥१७३॥
**जितशत्रुतनूजस्य** कृतपूजस्य पार्थिवैः । आसीदाज्ञाकरी तस्य सतीव जगतीवधूः ॥१७४॥
ततोऽतीत्य चतुर्विंशत्यब्दलक्षीं स जन्मतः । प्रव्रज्यां **पोट्टिलाचार्य**पदोपान्ते समाददे ॥१७५॥
मासोपवासैः स वपुर्लघूकुर्वन्निवान्वहम् । नित्योदितविहारोऽभूद् भवारण्यं विलङ्घितुम् ॥१७६॥
भूषयन् क्रियया ज्ञानं ज्ञानेन द्योतयन्मनः । मनसा लासयन् ध्यानं ध्यानेनाभिभवन् भवम् ॥१७७॥
परीषहसहस्राणामप्यसह्य[१]परीषहः । स दुःखसुखयोस्तुल्यो वर्षलक्षं व्यधात् तपः ॥१७८॥ युग्मम् ॥
विंशत्यापि तपोराशिरर्हद्भक्त्यादिभिः शुभैः । स्थानैः संप्राप दुष्प्रापं तीर्थकृन्नामकर्म सः ॥१७९॥
मूलतोऽप्यकलङ्का[२]त्मश्रामण्यमभिपाल्य सः । इत्थमाराधनावर्यं पर्यन्तसमयं व्यधात् ॥१८०॥
[2]अर्हद्भट्टारकं देवं धर्माचारगुरुं गुरुम् । अभेदबुद्ध्याऽनुध्यायाऽऽतनोम्याराधनामहम् ॥१८१॥
[१]व्रतान्या[२]लोचना [३]पापगर्हा [४]श्रेयोऽनुमोदनम् । [५]क्षामणा[६]नशनं [७]पापस्थानोत्सर्गः [८]सुभावनाः ॥१८२॥
[९]चतुःशरणसम्प्राप्तिः [१०]परमेष्ठिनमस्कृतिः । महोदयकरी सेति दशधाराधनाऽस्तु मे ॥१८३॥ युग्मम् ॥

---

१. परिग्रहः K । २. ०त्माश्रामण्य० K, D ।

टि. 1. व्रततिः(स्त्री)=लता । 2. नन्दनमुनेः अन्तिमाराधना - श्लोक-१८१ तः २५८ पर्यन्तम् ।

विघ्नान् विजित्य वीरत्वं धीरत्वं मनसाऽऽश्रय । आत्मन् ! साध्योऽवधानेन चन्द्रवेध्यक्षणोऽधुना ॥१८४॥
देहो गृहं कुटुम्बं श्रीः प्रतिष्ठा सर्वमाप्यते । अर्हदुक्तस्तु धर्मोऽयं सुकृतैर्यदि लभ्यते ॥१८५॥
सम्यग्दर्शनमूलानि श्रीगुरूणां पुरः पुरा । स्वीकृतान्यपि भूयोऽपि व्रतानि स्वीकरोम्यहम् ॥१८६॥
पञ्च ज्ञानानि कालादिज्ञानाचाराश्च योऽष्टधा । ज्ञानपात्राण्यथ ज्ञानोपस्करास्तेषु यन्मया ॥१८७॥
अश्रद्धानान्यथाव्याख्यागर्होपहसितादिभिः । कुन्यासाद्यैरवज्ञातं यत्तदालोचयाम्यहम् ॥१८८॥ युग्मम् ॥
अष्टधा दर्शनाचारे मया निःशङ्कितादिके । सम्यक्त्वमतिचीर्णं यत्तदप्यालोच्यतेऽधुना ॥१८९॥
गुरौ गच्छे गणे सङ्घे शासने परमेष्ठिषु । अर्हच्चैत्यरथार्चादौ द्वेषाद्यालोचये त्रिधा ॥१९०॥
चारित्रस्यापि चाचारे मूलोत्तरगुणोत्तरे । यन्नैवाचरितं चारु सर्वमालोचयामि तत् ॥१९१॥
या रागाद् द्वेषतो मोहाच्चक्रे सूक्ष्माथ बादरा । हिंसा षड्विधजीवानां तां गुरुभ्यो निवेदये ॥१९२॥
उपरोधभयक्रोधलोभक्षोभकुतूहलैः । यन्मिथ्यागदितं तन्मे मिथ्याऽस्त्वालोचनादितः ॥१९३॥
प्रणयोन्मेषविद्वेषविशेषविषयार्त्तिभिः । आत्तं वित्तमदत्तं यत्तत्प्रायश्चित्तमस्तु मे ॥१९४॥
मैथुनं मानवं दिव्यं तैरश्चं[1] यत्पुरा मया । विदधे व्युत्सृजाम्येष त्रिविधं त्रिविधेन तत् ॥१९५॥
पशुधान्यधनादीनां परिग्रहमहं बहुम् । यं प्राग् लोभविकारेण चकारालोचयामि तत् ॥१९६॥
द्रव्ये क्षेत्रे[2] च काले वा भावे वा मोहदोषतः । अकारि ममकारो यस्तत्प्रतिक्रान्तिरस्तु मे ॥१९७॥
त्रेधा त्रिधा मूढमना घनाऽघसदनं निशि । यं चतुर्विधमाहारं भेजिवानुत्सृजामि तम् ॥१९८॥
अथोत्तरगुणेष्वीर्यामुखे समितिपञ्चके । योगगुप्तित्रिके चापि पापमालोचयाम्यहम् ॥१९९॥
बाह्यमाभ्यन्तरं चापि मया द्वादशधा तपः । शक्तेनापि विराद्धं यत्तदप्यालोचये गुरोः ॥२००॥
धर्मकर्माणि कर्तुं च प्रतिकर्तुं च तद्द्विषः । यद्वीर्यं शाठ्यतोऽगोपि तस्याप्यालोचनास्त्विति ॥२०१॥
रक्तो द्विष्टोऽथ मूढोऽहं यदकार्षं त्रिधा त्रिधा । स्मृतं वाऽप्यस्मृतं[3] वा तत्सर्वं मिथ्याऽस्तु दुष्कृतम् ॥२०२॥
दुष्कृतं यत्कृतं चात्र भवे पूर्वभवेषु वा । तच्च तस्य च कर्त्तारं निन्दाम्यात्मानमात्मना ॥२०३॥
प्राप्यापि भगवद्बोधिमबुद्धिर्यदहारयम् । हहा महाप्रमादेन गर्हामि तदहं त्रिधा ॥२०४॥
तथा देवे गुरौ धर्मे सम्यग् नाचरितं च यत् । विपरीतेऽन्यथा यच्च सर्वं गर्हामि तत् त्रिधा ॥२०५॥
तीर्थे मार्गे तथोत्सूत्रं वृत्तं दिष्टं च यन्मया । तत्त्वेषु निह्नुतं वा यत्तन्मिथ्या मेऽस्तु दुष्कृतम् ॥२०६॥
परमेष्ठिषु सङ्घेऽथ जिनचैत्ये जिनागमे । न भक्तिं चकाराऽभक्तिं चक्रे च व्युत्सृजामि तत् ॥२०७॥
जिनगुर्वागमार्थेषु[टि. 1] यद्भक्षितमुपेक्षितम् । उदासितं च धर्मार्थे तद् गर्हामि त्रिधा त्रिधा ॥२०८॥
देहोपकरणाऽस्त्रादि यदिहामुत्र वा मम । पापाधिकरणं जज्ञे गर्हामि तदहं त्रिधा ॥२०९॥

---

१. तैरच्यं P, A, KH, B । २. क्षेत्रेऽथ C, P । ३. वाप्रस्मृतं – A, K, वाप्रसृतं – D चाथस्मृतं – B ।

टि. 1. अर्थः-द्रव्यम् (देवद्रव्यादि) ।

मिथ्यात्वेनाविरत्याथ प्रमादैरखिलैश्च मे । कृतं कषायैर्योगैश्च सर्वं मिथ्यास्तु दुष्कृतम् ॥२१०॥
रागाद् द्वेषात्तथामोहात्कर्मबन्धस्य हेतुताम् । यदन्यस्य जगामाऽहं तद् गर्हाम्यात्मनोऽखिलम् ॥२११॥ द्वारम् ॥
रत्नत्रयात्मके धर्मे मया मार्गानुसारि यत् । कृतं च सुकृतं किञ्चित्तत्सर्वमनुमोदये ॥२१२॥
यन्मम ज्ञातमज्ञातं धनं धर्म्येषु कर्मसु । परेण स्वेन वा नीतमनुमन्येऽखिलं च तत् ॥२१३॥
आर्हन्त्यमर्हतामर्हं सिद्धानां सिद्धताश्रियम् । आचार्याणां सदा चारुसमाचारप्ररूपणाम् ॥२१४॥
अध्यापकानां स्वाध्यायं साधूनां धर्मसाधनाम् । श्राद्धानामपि सद्धर्मं प्रमोदेनानुमोदये ॥२१५॥ युग्मम् ॥ द्वारम् ॥
यन्मयाऽऽशातितं किञ्चिन्मनोवचनकर्मभिः । श्रीसङ्घं क्षमयाम्येष तन्मौलितुलिताञ्जलिः ॥२१६॥
धर्माचार्यः पिता माता स्वामी स्वोऽन्यः सखा द्विषन् । सधर्माथ विधर्मा यत् खेदितः क्षमयामि तत् ॥२१७॥
हतो दुरुक्तोऽपकृतः सुकृतं कृन्तता मया । यः कोऽपि क्वापि स मयि क्षाम्यतु क्षमयामि तम् ॥२१८॥
चतुर्गतौ भवेऽभूवन् सुहृदोऽसुहृदोऽपि वा । मयि क्षाम्यन्तु ते सर्वे तेषु सर्वेष्वहं समः ॥२१९॥
स्वजना नोपकाराय नापकाराय दुर्जनाः । स्वं कर्म्मैव तयोः कर्तृ तोषरोषौ तदेषु कौ ॥२२०॥ द्वारम् ॥
यो यं षड्विधजीवानां विनाऽऽरम्भं न जायते । तं चतुर्विधमाहारं यावज्जीवं त्यजाम्यहम् ॥२२१॥
अनादाविह संसारे कुलाचलकुलातुलैः । तृप्तो न जातु यैरन्नैस्तेषु मे का स्पृहाऽधुना ॥२२२॥
भावितानशनः प्राणी मुक्तिं न लभते यदि । दुर्लभा नाऽस्य जम्भारिलक्ष्मीस्तेन श्रयामि तत् ॥२२३॥ द्वारम् ॥
पञ्चाश्रवान्[1]निशाभक्तं क्रोधादीं[१]श्चतुरस्तथा । रागं मायामृषां द्वेषं कलिं पिशुनतां तथा ॥२२४॥
अभ्याख्यानं परीवादं मिथ्यादृग्शल्यमित्यपि । व्युत्सृजामीत्यहं पापस्थानानि जिनसाक्षिकम् ॥२२५॥
सावद्यमान्तरं योगं सर्वं बाह्यं तथोपधिम् । व्युत्सृजामि समुच्छ्वासे चरमे वपुरप्यदः ॥२२६॥ द्वारम् ॥
नवां नवां तनुकुटीं कारं कारं क्षणं क्षणम् । क्वापि क्वापि भवारण्ये जन्तुपान्थो वसत्यसौ ॥२२७॥
लोके कालादसङ्ख्येयप्रदेशात्मनि जन्मिनाम् । अनन्ताः पुद्गलावर्त्ताः पूरिता जन्ममृत्युभिः ॥२२८॥
देहेन्द्रियादितोप्यात्मा यः परः परमार्थतः । तस्यान्यबन्धुसम्बन्धो [२]बन्धुरत्वं कथं भजेत् ॥२२९॥
एको जन्मजराव्याधिमृत्युभिः परिभूयते । तदर्जितानां वित्तानां भोक्तारस्तु परःशताः ॥२३०॥
सर्वाशुचि[३]समाविष्टं वपुर्भूषकदूषकम् । पुनःसङ्गनिरुत्साहो मोक्तुमुत्कण्ठते सुधीः ॥२३१॥

---

१. श्चतुरःकलिं । सूचाद्याख्यापरीवादान् रतिं प्रीतिं च सेतरं ॥२२४॥
मायामृषां च मिथ्यादृक् शल्यं च जिनसाक्षिकम् ।
व्युत्सृजामीति पापानां स्थानान्यष्टादशाप्यहम् ॥२२५॥ C । २. ०मधुरत्वं-P । ३. समादिष्टं B ।

टि. 1. **तुलना**–प्रवचनसारोद्धार-२३७तमे द्वारे ५१तमी गाथा, प्रचलिताष्टादशपापस्थानकसूत्रस्तु स्थानाङ्गस्य ४८तमेन ४९तमेन सूत्रेण संगच्छति तट्टीका स्थानाङ्गे च रात्रिभोजनं पापस्थानमध्ये न पठितं किन्तु परपरिवादाग्रतो 'रति-अरति' नामकं पापस्थानकं पठितम् ।

'निशाभक्तम्'–इति अष्टादशपापस्थानकसूत्रे नास्ति ।

जीवितं चारुता भूतिर्यौवनं प्रियसङ्गतम् । चलत्वेनाम्बुधेर्वीचीरपि नीचीकरोत्यहो ॥२३२॥
मृत्यु-जन्म-जरा-व्याधिबाधाविधुरितात्मनाम् । जिनादिष्टं विना धर्मं कः शरण्यः शरीरिणाम् ॥२३३॥
पापाश्रवनिरुद्धान्तःकरणः पुण्यमाश्रवम् । कदाचित्काकतालीयन्यायेन लभते भवी ॥२३४॥
संवरासंवृताशेषाश्रवद्वारो भवार्णवे । अनस्ताघोऽयमस्ताघे जीवपोतो निमज्जति ॥२३५॥
क्षान्त्याद्यैर्दशधा धर्ममुपपन्नं जगुर्जिनाः । तमप्येते प्रमाद्यन्तो जन्तवो हारयन्ति हा ॥२३६॥
सकामनिर्जराहेतुर्द्वादशात्मतपोबलात् । शोषायाश्रवपङ्कस्य कस्यापि क्षमते मतिः ॥२३७॥
अपायपात्रं कायादि सर्वमन्यद् वियुज्यताम् । चिन्तारत्नमिवैकं मे बोधिरत्नं तु मा स्म गात् ॥२३८॥
[1]भवो लोकोऽन्यतैकत्वाशौचानित्याशरण्यता । आश्रवः संवरो धर्मो निर्जरा बोधिरित्यमूः ॥२३९॥
भावयन् भावनाः श्रित्वा जिनजैनजिनागमान् । अवस्करममुं जाने शेषं संसारविस्तरम् ॥२४०॥ युग्मम् ॥
अहो पृथक् पृथग् देहकुटीषु क्षणवासिभिः । पृथक्कर्मवशैरात्मा रागद्वेषपरोऽस्तु कैः ॥२४१॥
सहचारिणि नित्योपकारिणि श्रेयसि सुधीः[१] । आरज्येत विरज्येत पापे नित्यापकारिणि ॥२४२॥
साधवः सोदराः साधर्मिकाः सर्वेऽपि बन्धवः । गुरुः पिताऽऽगमार्थोक्तिर्माता मेऽन्यन्न किञ्चन ॥२४३॥ द्वारम् ॥
अर्हन्तो मङ्गलं सर्वे सर्वे सिद्धाश्च मङ्गलम् । मङ्गलं साधवः सर्वे जैनो धर्मश्च मङ्गलम् ॥२४४॥
जिनान् सिद्धान् मुनीन् धर्ममहं लोकोत्तमानमून् । शरण्यान् शरणं भक्तिचतुरश्चतुरः श्रये ॥२४५॥ द्वारम् ॥
अर्हद्भ्यो भवभङ्गैकभासुरेभ्यः प्रतिक्षणम् । भवद्भूतभविष्यद्भ्यः शाश्वतेभ्यश्च मे नमः ॥२४६॥
मुहुर्नश्वरदेहौकःकारिकर्म निरस्य तत् । सिद्धिसौधं प्रयातेभ्यः सिद्धेभ्योऽस्तु नमो नमः ॥२४७॥
ये च पञ्चविधाचारनिरता निर्वृतौ रताः । तेभ्यः सिद्धान्तसिद्धेभ्य आचार्येभ्यो नमो नमः ॥२४८॥
धर्माध्वगेषु शिष्येषु ज्ञानामृतनदा[2]श्चये[3] । निष्पङ्का भान्त्युपाध्यायास्तेभ्यः कुर्वे नमस्क्रियाम् ॥२४९॥
तपःश्रीणां परिमलै रोचमानान् विलोकते । यान्मुक्तिः कौतुकात् तेभ्यः साधुभ्योऽस्तु नमो नमः ॥२५०॥
एष पञ्चनमस्कारः सर्वपापप्रणाशनः । मङ्गलानां च सर्वेषां प्रथमं मेऽस्तु मङ्गलम् ॥२५१॥
[4]पञ्चाननवधूः पञ्चपरमेष्ठिनमस्कृतिः । विपद्द्विपान्निपात्योच्चैस्त्रामुत्रापि त्रायते[२] ॥२५२॥
अवसाने मुनीशानां सर्वपूर्वविदामपि । समग्रमंहः संहर्तुं नमस्कारः परं क्षमः ॥२५३॥
तीक्ष्णदात्री विपद्वल्लेः संप्रदात्री च सम्पदाम् । सा हि पुण्यश्रियां धात्री परमेष्ठिनमस्कृतिः ॥२५४॥
भावतः स्मरतः पञ्चपरमेष्ठिनमस्कृतिम् । यस्य प्राणाः प्रतिष्ठन्ते मृतोऽपि हि स जीवति ॥२५५॥
व्रतोच्चारादिकाः पञ्चनमस्कारावसानिकाः । दशधाऽऽराधनास्त्वेषा महोदयकरी मम ॥२५६॥

---

१. प्रधीः K । २. तायते-A, C ।

टि. 1. द्वादशभावनानां नामानि । 2. नदः (पुं)=समुद्रः । 3. चयः- संस्कारसिञ्चनम् तस्मिन् । 4. पञ्चाननवधूः-सिंही ।

विधाय **नन्दनः** सैष दशधाऽऽराधनामिति । धर्माचार्यान् सुधीः साधून् साध्वीश्चाक्षमयत् क्षमी ॥२५७॥
पालयित्वा ततः षष्टिं दिनान्यनशनं मुनिः । पञ्चविंशतिलक्षाब्दीपूर्णायुः स व्यपद्यत ॥२५८॥
**पुष्पोत्तर**विमानेऽथ स **प्राणत**विभूषणे । महाद्युतिर्महाशक्तिर्महाभाग्यः **सुरो**ऽभवत् ॥२५९॥
स कृती तीर्थकृद्यात्राद्युत्सवेषु पुरस्सरः । आयुः सौख्यैकभूर्विंशत्यब्धिमानमपूरयत् ॥२६०॥
आसन्नतीर्थकृल्लक्ष्मीभाग्यस्यैव प्रभोदयात् । शेषायुरप्ययं कान्तिविशेषोन्मेषभूरभूत् ॥२६१॥
इतश्चात्रैव **भरते जम्बूद्वीपा**भिदीपिनि । अस्ति **ब्राह्मणकुण्डे**तिनामा ग्रामो द्विजन्मनाम् ॥२६२॥
तस्मिन्**नृषभदत्तो**ऽभूत् विप्रः **कोडालसा**न्वयः । **जालन्धर**सगोत्राऽभूद् **देवानन्दा** च तत्प्रिया ॥२६३॥
**सितषष्ठ्यां शुचौ**[1] **हस्तोत्तरा**नक्षत्रगे विधौ । स च्युत्वा नन्दनो **देवानन्दा**याः कुक्षिमासदत् ॥२६४॥
सुखसुप्ता महास्वप्नान् सा ददर्श चतुर्दश । उत्थिता पत्युराचख्यौ व्याचख्यौ च मुदा द्विजः ॥२६५॥
भविता रवितारश्रीश्चतुर्वेदीविदां वरः । सुतस्तव वंशाशेषरमः[2] परमनैष्ठिकः ॥२६६॥
देवानामपि देवेशे **देवानन्दो**दरस्थिते । आसन्नृषभदत्तस्य सद्मन्यच्छद्मसम्पदः[१] ॥२६७॥
स्वामिन्ययोग्यस्थानस्थे द्व्यशीतिदिवसात्यये । घृणार्द्रमिव **सौधर्मपतेः** पीठमकम्पत ॥२६८॥
मत्वा द्विजवधूगर्भेऽवधिज्ञानादधीश्वरम् । नत्वा तत्र द्रुतं देवपतिरेवमचिन्तयत् ॥२६९॥
कदापि न जनिर्धर्मचक्रिचक्र्यर्द्धचक्रिणाम् । भवेत् तुच्छकुले हीनकुले भिक्षुकुलेऽपि वा ॥२७०॥
यन्मरीचिभवे जातिमदान्नीचैःकुलाभिधम् । कर्मार्जयत् प्रभुस्तेनाधुना नीचकुलेऽभवत् ॥२७१॥
अर्हतां कर्मतो नीचकुलस्त्रीगर्भवर्त्तिनाम् । अधिकारोऽस्ति नस्तुङ्गकुलस्त्रीगर्भयोजने ॥२७२॥
भरते कोऽस्ति सद्वंशो राजा राज्ञी च सम्प्रति । यत्रैष न्यस्यते स्वामी मणिश्चामीकरे यथा ॥२७३॥
आ ज्ञातं **भरते**ऽत्रैव महीमण्डलमण्डनम् । अस्ति **क्षत्रियकुण्ड**ग्रामाख्यं मत्पुरवत्पुरम् ॥२७४॥
यच्चैतन्यमिव क्षोणेः सर्वस्वमिव सम्पदाम् । अस्मादृग्पदवीजानां[२] पुण्यानां क्षेत्रभूरिव ॥२७५॥ युग्मम् ॥
तस्मिन्**निक्ष्वाकु**वंश्योऽस्ति **सिद्धार्थ** इति पार्थिवः । ज्ञेषु दानिषु शूरेषु धार्मिकेषु च शेखरः ॥२७६॥
अस्ति प्राज्यकला धर्मकुशला **त्रिशला**भिधा । रूपश्रीपरमैश्वर्य[३]प्रियशीलैव तत्प्रिया ॥२७७॥
विवेकद्वारपालेन यच्चित्ते धर्मधामनि । प्रविशन्तोऽप्यवार्यन्त मायामोहमदादयः ॥२७८॥
साऽप्यस्ति साम्प्रतं गुर्वी ततः कुर्वीय[४] लीलया । तस्याश्च द्विजपत्न्याश्च गर्भयोर्व्यत्ययं रयात् ॥२७९॥
इत्ययं व्यत्ययं ध्यात्वा सेनान्या **नैगमेषिणा** । तयोरचीकरत्काचरत्नयोरिव गर्भयोः ॥२८०॥
प्राग् लब्धान्निर्यतः स्वप्नान् मुखात्प्रेक्ष्योत्थिता द्विजी । हृतः केनाऽपि मद्गर्भ इत्यरोदीत्तरां तदा ॥२८१॥

---

१. मत्तासद्मनिसंपदः - K, D, L । २. पदबीजानां-K, D, KH । ३. परमैश्वर्यं - C, B, A । ४. कुर्वीन्-L कुर्वीथ-A ।
टि. 1. शुचिः- अषाढमासः । 2. सर्वस्त्रीषु वल्लभः ।

**श्यामाश्विनत्रयोदश्यामिन्दौ हस्तोत्तरा**चरे । न्यधत्त **त्रिशला**गर्भे निभृतं स [1]ऋभुर्विभुम् ॥२८२॥
गजो वृषो हरिर्लक्ष्मीः स्रक्चन्द्रार्कमहाध्वजाः । सम्पूर्णकलशः पद्मपूरपूर्णं सरोऽम्बुधिः ॥२८३॥
विमानं रत्नसन्तानं निर्धूमोऽग्निरिति क्रमात् । **त्रिशला** विशतः स्वप्नान् ददर्शास्ये चतुर्दश ॥२८४॥ [युग्मम्]
इन्द्रै राज्ञा च तज्ज्ञैश्च सर्वज्ञजनिलक्षणे । ख्याते स्वप्नफले देवी दधौ सा मुदमद्भुताम् ॥२८५॥
अवर्द्धन्त निधानानि महान्तोऽप्यनमन्नृपाः । प्रभौ गर्भस्थिते वृद्धिं **सिद्धार्थ**स्याभजत् कुलम् ॥२८६॥
मातुरातुरता मा भून्मम स्पन्दैरिति प्रभुः । गर्भेऽस्थान्निभृतं योगवर्णिकामिव दर्शयन् ॥२८७॥
प्रभोरङ्गातिनैश्चल्याच्चकिता त्रिशला ततः । दध्यौ किं गलितो गर्भो हृतः पिष्टोऽथ केनचित् ॥२८८॥
यद्येवं तदभाग्याया जीवितेनापि किं मम । इति देवी रुरोदैव दैवोपलम्भिनी मुहुः ॥२८९॥
श्री**सिद्धार्थो**ऽपि मत्वेदं खेदं सत्रासमासदत् । तदपत्ये च ते **नन्दिवर्द्धनो**ऽथ **सुदर्शना** ॥२९०॥
तद्विज्ञाय प्रभुर्गर्भज्ञापनायाङ्गुलीदलम् । अचालयच्च माता च मुदिताऽमोदयन्न कम् ? ॥२९१॥
ज्ञानत्रयोदधिः स्वामी पित्रोः स्नेहं निरीक्ष्य तम् । सप्तमे मासि गर्भस्थो जग्राहाभिग्रहं हृदि ॥२९२॥
अहं परिव्रजिष्यामि न पित्रोः खलु जीवतोः । बध्नीतो मद्वियोगार्त्तिध्यानात्कर्माशुभं [१]ह्यमू ॥२९३॥
अथाशासु प्रसन्नासु मारुते लब्धचारुते । उच्चस्थेषु ग्रहेषूच्चैर्मुन्मये भुवनत्रये ॥२९४॥
**मधौ शुक्लत्रयोदश्यां** विधौ **हस्तोत्तरा**चरे । सुषुवे स्वामिनी स्वर्णवर्णं सिंहाङ्कमङ्गजम् ॥२९५॥ [युग्मम्]
एत्य **भोगङ्करा**द्याः षट्पञ्चाशद्दिक्कुमारिकाः । जिने जिनजनन्यां च सूतिकर्माणि निर्ममुः ॥२९६॥
मत्वार्हज्जन्म तत्कालं शक्रोऽप्यासनकम्पतः । एत्य सूतिगृहं स्वामिस्वाम्यम्बे दूरतोऽनमत् ॥२९७॥
उपसृत्य ततो मातुर्दत्त्वावस्वापिनीं हरिः । पार्श्वेऽस्या विश्वनाथस्य प्रतिरूपं न्यवेशयत् ॥२९८॥
विधाय पञ्चधात्मानं पञ्चत्वायाऽऽत्मपाप्मनाम् । अधत्ताऽथ जगन्नाथमेकोऽङ्के नाकिनां पतिः ॥२९९॥
एको मूर्ध्नि दधौ छत्रं चामरे पार्श्वयोरुभौ । एकः प्रभोः पुरो वज्रं सामोदमुदलालयत् ॥३००॥
स **पाण्डुकम्बला**ख्यायां शिलायां मेरुमूर्द्धनि । गत्वाऽभूषयदङ्कस्थजिनः सिंहासनं हरिः ॥३०१॥
त्रिषष्टिरपरेऽपीन्द्रास्तीर्थाहृतपयश्चयाः । ईयुर्जिन[2]जनुःस्नानकृतेऽहम्पूर्विका जवात् ॥३०२॥
जिनेन्दुर्योजनास्येभ्यः कलशेभ्यः पतत्पयः । [२]कृशाकृतिः कथं सोढेत्यशङ्कत तदा हरिः ॥३०३॥
प्रभुस्तद्भ्रमभङ्गायाङ्गुल्या **मेरु**मपीडयत् । तच्छक्तिविस्मितस्येव शिरोभिस्तस्य कम्पितम् ॥३०४॥
प्रभुपादाग्रसंस्पर्शपूतस्य सुरभूभृतः । सङ्गेन सुभगम्मन्याऽनृत्यत् कम्पच्छलादिला ॥३०५॥
उच्छलन्ति स्म कल्लोला दूरं कल्लोलमालिनाम् । शैलोपरि मुखं भर्तुर्वीक्ष्येव विधुबन्धुरम् ॥३०६॥

---

१. 'ह्यमूः' P, L, A, B, D । २. अल्पाकृतिः K, D ।

टि. 1. ऋभुः (पुं)-देवः । 2. जनुस् (नपुं)०जन्म ।

यत्रेदृक् प्रभुरुत्पन्नः सा न वन्द्या किमद्य भूः । प्रणिपेतुरितीवास्यां शिरांसि कुलभूभृताम् ॥३०७॥
किमेतदित्यथ ध्यायन् मत्वा लीलायितं प्रभोः । हरिर्निन्दन् कुतर्कं स्वं मिथ्यादुष्कृतमाचरन् ॥३०८॥
अथो यथाविधि स्नात्रपूजारात्रिककर्मतः । उक्त्वा शक्रस्तवं शक्रो देव्याः पार्श्वेऽनयत् प्रभुम् ॥३०९॥ युग्मम्॥
हृत्वावस्वापिनीं मातुः प्रभोः प्रतिकृतिं च ताम् । हरिरुच्छीर्षके क्षौमं कुण्डले चामुचत् प्रभोः ॥३१०॥
श्रीदामगेन्दुकं दृश्यमुपर्यङ्कुष्ठके पुनः । शक्रः सुधारसं न्यस्य कृतकृत्यो दिवं ययौ ॥३११॥
पुरेऽत्र प्रभुपुण्याब्धिच्छटोज्ज्वलजने[१] किल । ववृषुर्वसुधाराभिः प्रकामं **जृम्भकामराः** ॥३१२॥
योऽभूद् विश्वत्रयस्यापि प्रमोदः प्रभुजन्मना । चूलासीत् क्वापि तस्यापि कृते राज्ञा महोत्सवे ॥३१३॥
ववृधे स्म कुलं गर्भस्थितेऽप्यस्मिन् विभूतिभिः । इतीशितुः पिता नाम **वर्द्धमान** इति व्यधात् ॥३१४॥
उपसर्गैर्निसर्गोग्रैर्न कम्प्योऽयमिति व्यधात् । द्वितीयकं हरिर्नाम **महावीर** इतीशितुः[२] ॥३१५॥
इच्छारूपधरैर्भक्त्या सेव्यमानः सुरासुरैः । अष्टोत्तरसहस्रात्मलक्षणो ववृधे विभुः ॥३१६॥
न्यूनाष्टवत्सरः साकं सवयोभिः कुमारकैः । वयोनुरूपया स्वामी क्रीडितुं क्रीडया ययौ ॥३१७॥
मध्येविश्वं महावीर इव धीरोऽस्ति न क्वचित् । तदा पाकारिणाऽकारि सदसीति प्रभुस्तुतिः ॥३१८॥
स्तुतिं कोऽप्यसहिष्णुस्तां सुरः क्षोभयितुं प्रभुम् । काममामलकीकेलिमाचरन्तमुपाययौ ॥३१९॥
मृत्युखड्गवदुत्तुङ्गभुजङ्गीभूय स स्थितः । क्रीडातरुतलेऽन्ये च कुमारास्तत्र तत्रसुः ॥३२०॥
क्रीडापशकुनं पाणौ तमादाय विभुर्विभीः[1] । दूरे मूर्तं सुहृत्सङ्गावरणीयमिवाक्षिपत् ॥३२१॥
ते कुमारा धृतव्रीडाः क्रीडार्थं पुनराययुः । कुमारीभूय भूयोऽपि सोऽप्यायातः सुरः पुनः ॥३२२॥
सर्वेभ्यः पूर्वमारोहेच्चूलामुर्वीरुहोऽस्य यः । सोऽन्यान् वाहवदारुह्य वाहयेदिति निर्णयात् ॥३२३॥
ते सर्वे तरुमारोहन् प्राग् तेभ्योऽग्रशिखां विभुः । लोकाग्रं लीलया भर्तुर्यास्यतो वा किमद्भुतम् ॥३२४॥
प्रभुर्वाह्यवदारुह्य कुमारानथ वाहयन् । पृष्ठं सुरकुमारस्याप्यारुरोह कुतूहली ॥३२५॥
अथ प्रोत्तालवेतालकरालं स्वं विधाय सः । नाभौ नदे[३]ऽम्बुजीकर्तुमिवादित्यम[४]वर्धत ॥३२६॥
नाथेनाथ जगद्वीरान् क्षोभयन्निर्भयेन सः । वर्द्धिष्णुः पर्वतस्पर्द्धी खर्वितो मुष्टिताडनात् ॥३२७॥
इति धैर्यं सहस्राक्षाख्यातं साक्षान्निरीक्ष्य सः । प्रभुं सुरः स्वरूपेण नत्वा स्वाश्रयमाश्रयत् ॥३२८॥
उपोपाध्यायमानीते पित्राथ त्रिजगद्गुरौ । हरेः पीठमनौचित्याचरणेनेव कम्पितम् ॥३२९॥
मत्वावधेस्तमविधिं गत्वा नत्वा च जिष्णुना । पृष्ठेऽध्यास्य गुरोः पीठं शब्दविद्यां जगौ प्रभुः ॥३३०॥
इन्द्रायेदं जिनेन्द्रेणोपदिष्टमिति विष्टपे । **ऐन्द्राख्यं** तदुपाध्यायोऽख्यापयत् शब्दशासनम् ॥३३१॥
सप्तहस्तमितः स्वामी पर्यस्तमितशैशवः । ततोऽधत्त क्रमादङ्गमनङ्गभ्रमदङ्गनम्[2] ॥३३२॥

---

१. ०छटाविल० P, L, K । २. हि सः P । ३. नाभिकूपे- P । ४. निशाकरः - C, L ।

टि. 1. विगता भीः यस्माद् विभीः इति समासविग्रहः । 2. अनङ्गभ्रमदङ्गनम्-अनङ्गस्य भ्रमद् अङ्गनं-वाहनम्, प्रभोरङ्गस्य विशेषणम् ।

यौवनद्योतिताङ्गेन भोगभागपि योगभाक् । प्रभुर्बभूव चित्तेन दधता वार्द्धकं शमात् ॥३३३॥
अनिच्छन्नप्यथ स्वामी पित्रोरेवोपरोधतः । अतिष्ठद् गृहवासे च पाणिग्रहममंस्त च ॥३३४॥
राज्ञः **समरवीरस्य यशोदां** नन्दिनीमथ । प्रभुः पर्यणयन्मुक्तेः प्रियायाः सेर्ष्यतां सृजन् ॥३३५॥
[1]असक्तोऽपि तया साकं रेमे पितृमुदे प्रभुः । त्रैलोक्यनयनानन्दो निशयेव सुधाकरः ॥३३६॥
कालेनाभूत् प्रभोः पुत्री सत्याख्या **प्रियदर्शना** । व्यूढेयं राजपुत्रेण सत्कुलेन **जमालिना** ॥३३७॥
पितरौ जन्मतो भर्तुरष्टाविंशेऽथ वत्सरे । कल्पितानशनौ मृत्वा कल्प**मच्युत**मीयतुः ॥३३८॥
क्षेत्रे**ऽपरविदेहे** तावुत्पद्याच्युतविच्युतौ । मोक्षमारोक्ष्यतस्तादृग् वीतरागतरोः फलम् ॥३३९॥
कृतपित्रङ्गसंस्कारः पितृशोकेन विह्वलः । [१]ज्येष्ठोऽथ बोधितो बन्धुः स्वामिना **नन्दिवर्द्धनः** ॥३४०॥
अनिच्छति च वैराग्याद् विभौ राज्यं स मन्त्रिभिः । राजा चक्रे जनानन्दवर्द्धनो **नन्दिवर्द्धनः** ॥३४१॥
स्वामिनाऽथ भवोद्वेगात् व्रतमादातुमिच्छता । आपृष्टः शोकसंक्लिष्टवाग् जगौ **नन्दिवर्द्धनः** ॥३४२॥
निर्दग्धे पितृशोकेन मयि लोके च केवलम् । त्वन्मुखालोकपीयूषसेकोऽनेकोऽस्ति भेषजम् ॥३४३॥
भ्रातः ! शोकच्छिदे [2]ध्यातः क्षिपसीति कथं मयि । तरौ दावभिदे प्राप्तस्तडितं तोयदो यथा ॥३४४॥
भ्रातुः शोकातुरस्येति वाग्भिरार्द्रीकृतः प्रभुः । सर्वसावद्यमुग् भावयतीभूय स्थितो [२]गृहम् ॥३४५॥
इति वर्षं स्थितः स्वामी गृहे सद्ध्यानमानसः । तीर्थं प्रवर्त्तयेत्यूचे ततो लोकान्तिकैः सुरैः ॥३४६॥
ततः क्लृप्ताब्ददानस्य प्रभोर्दीक्षाभिषेचनम् । शक्राद्यैरमरैर्नन्दिवर्द्धनाद्यैर्नृपैः कृतम् ॥३४७॥
मनसा वचसा चाथ शिबिके द्युनराधिपौ । कारयामासतुर्बिम्बप्रतिबिम्बनिभे शुभे ॥३४८॥
प्रभोः प्रभावादेकस्यां ममज्ज शिबिकाऽपरा । लीना तारेव तारायां [३ 3]भवस्योत्पातकारणम् ॥३४९॥
नरदेवैश्च देवैश्च वाह्यामारुह्य तां प्रभुः । दूरान्मुक्तिमिव द्रष्टुं सिंहासनमभूषयत् ॥३५०॥
प्राङ्मुखस्थः सेव्यमानो देवदानवमानवैः । राजद्राजकुलस्त्रैणधृतच्छत्रादिलाञ्छनः ॥३५१॥
दिव्यतूर्यस्वनाहूताऽस्तोकलोकमुदप्रदः । **ज्ञातखण्डवनं** नाम तरुखण्डमगात् प्रभुः ॥३५२॥ [युग्मम्]
प्रभोर्यानावतीर्णस्य मण्डनादिमुचो न्यधात् । हरिरंसेंऽशुकं दिव्यं पावित्र्यस्येव वर्णिकाम् ॥३५३॥
द्वारि चारित्रसम्राजः सुतां वोढुस्तपःश्रियम् । क्षिप्तं धृत्येव तद् दुष्यं [४]जिनस्यांसेऽत्यशोभत ॥३५४॥
पञ्चभिर्मुष्टिभिः केशान् दुष्कर्माणि व्रतैरिव । तदोद्दध्रे प्रभुस्तांश्च क्षीराब्धौ हरिरक्षिपत् ॥३५५॥
ततो निषिद्धे लोकानां शक्रेण तुमुलेऽतुले । यामेऽह्नश्चरमे स्वामी कृतसिद्धनमस्कृतिः ॥३५६॥
[4]**सहे दशम्यां श्यामायां सोमे हस्तोत्तरा**चरे । षष्ठेन स व्रतं भेजे मनःपर्यायमाप च ॥३५७॥ [युग्मम्]

---

१. दृष्टो P । २. गृहे A, C । ३. भविष्योत्पातकारणम् KH, H, B । ४. रेजे जिनवरांसगम् । P ।

टि. 1. अनासक्तः इत्यर्थ । 2. यथा दावभिदे प्राप्तः तोयदः तरौ तडितं (क्षिपति) तथा शोकछिदे ध्यातः भ्रातर ! कथं मयि (तडितं) क्षिपसि इति अन्वयः । 3. भवस्य शुभत्वात् पक्षे जगतः अपशकुनत्वात् विनाशस्य कारणम् । 4. सहे-मार्गशीर्षे इत्यर्थः ।

मर्त्यामर्त्येषु यातेषु विहारप्रस्थितं प्रभुम् । एत्य तातसुहृद्विप्रो वृद्धः **सोमा**भिधोऽभ्यधात् ॥३५८॥
विश्वेश ! मयि निर्भाग्ये श्रियै देशान्तरं गते । दानं तवाब्दिकं पूर्णं पूर्णविश्वमनोरथम् ॥३५९॥
किञ्चिदद्यापि मे यच्छ दरिद्रस्य दयां कुरु । अन्यथा हृदयं नाथ ! दुःखादद्य स्फुटिष्यति ॥३६०॥
अथाचष्ट विभुर्देयं त्यक्तसङ्गस्य कुत्र मे । तथाप्यंसगतस्यास्य चीरस्यार्द्धमुरीकुरु ॥३६१॥
सोऽपि वासोऽर्द्धमादाय कुविन्दाय मुदा द्विजः । अदीद्दशद्दशाबन्धकृते विक्रेतुमुत्सुकः ॥३६२॥
दृष्ट्वाऽथ दिष्टतत्प्राप्तिः कुविन्देनाभ्यधायि सः । गच्छ तत्र द्रुतं यत्र स चारित्रनिधिश्चरेत् ॥३६३॥
कदाप्यस्य च्युतं स्कन्धादन्यद्वासोर्द्धमानय । उभे संयोज्य विक्रीते मूल्यस्यार्द्धार्द्धमस्तु नौ ॥३६४॥
तेनैवमुदितः स द्राग् मुदितः प्रभुमन्वगात् । क्षीणे दिने जिनेशोऽपि **कुर्मारग्राम**मागमत् ॥३६५॥
तद्ग्रामसीमनि स्वामी ततः प्रतिमया स्थितः । कोऽपि भूरिवृषो गोपस्तदोपजिनमागमत् ॥३६६॥
सायं वृषानिहैवायं मुक्त्वा [1]संवसथेऽविशत् । कृत्वा [2]सुरभिसन्दोहदोहमत्राऽऽययौ पुनः ॥३६७॥
तानप्रेक्ष्य वृषाः क्वेति प्रभुं संपृच्छ्य तुच्छधीः । तं वीक्ष्य मौनिनं नाऽसौ वेत्तीत्येष गतोऽन्यतः ॥३६८॥
इतस्ततश्चरन्तोऽथ [3]सुहिताः [4]संहिता वृषाः । उपाधीशमुपाविक्षन्नेत्य रोमन्थमन्थराः ॥३६९॥
प्राप्तः कुतोपि गोपोऽपि वृषान्वीक्ष्य रुषातुरः । चौरोऽयमित्यधाविष्ट दाम्ना हन्तुं जगत्पतिम् ॥३७०॥
तच्च विज्ञाय जम्भारिः स्तम्भयित्वाऽऽशु तद्भुजम् । एत्य गोपं च निर्भर्त्स्य श्रीसर्वज्ञं व्यजिज्ञपत् ॥३७१॥
द्वादशाब्दीं खिदासर्गानुपसर्गान् भविष्यतः । निषेद्धुं भवतो नाथ ! भवाम्यनुचरः स्वयम् ॥३७२॥
मौनं संसारपारीणः पारयित्वाऽब्रवीदिति । अर्हन्तो हन्त ! नेहन्ते साहाय्यं परतः क्वचित् ॥३७३॥
[5]अथ रागी हरेराशामभासयत भास्करः । [१]वीतरागस्तु नः स्वामी जगत्त्रितयभास्करः ॥३७४॥
[6]पामरेन्द्रेऽमरेन्द्रे च गोपे दाम्नाग्रतोऽञ्चति । समताऽममताधीरो **वीरो** विजयते जिनः ॥३७५॥
व्यन्तरामरतां प्राप्तं मातृष्वस्रीयमीशितुः । **सिद्धार्थं** प्रभुरक्षार्थं निर्दिश्याऽथ ययौ हरिः ॥३७६॥
प्रभुर्गत्वाथ **कोल्लाक**निवेशे षष्ठपारणम् । सिताज्य[7]पायसैश्चक्रे **बहुलाख्य**द्विजौकसि ॥३७७॥
वसुधारादिदिव्यानि पञ्च प्रापञ्चयन् सुराः । इहैवात्यर्थपुण्यानां फलं धाम्नि द्विजन्मनः ॥३७८॥
ततः सर्वगुरुः सर्वसमः सर्वगुणोदयः । विजहार महारण्यनगग्रामपुरां धराम् ॥३७९॥
एवं दीक्षादिनाद् देवः साग्रं मासचतुष्टयम् । सेहे तपःश्रीस्नेहेन परीषहपरम्पराम् ॥३८०॥
**मोराक**संज्ञमन्येद्युर्विश्वेशः सन्निवेशनम् । जगाम तापसैर्व्याप्तं [8]**दूयमानक**नामभिः ॥३८१॥

---

१. वीतरागस्तुतः L । टि. 1. संवसथे-ग्रामे । 2. सुरभिः धेनुः, सन्दोहः-दुग्धम् धेनोर्दुग्धस्य दोहं कृत्वा इत्यर्थः । 3. सुहिताः-सुतृप्ताः । 4. संहिताः-संमिलिताः । 5. अथ रागी भास्करः हरेराशाम्=पूर्वदिशाम् अभासयत, नः स्वामी तु वीतरागः जगत्त्रितयभास्करः इत्यन्वयः । 6. पामरः मूर्खः । पामरेन्द्रे दाम्नाऽग्रतोऽञ्चति गोपे समता, अमरेन्द्रे अममता इति अन्वयः । 7. शर्करापायसैः=पायस—अतप्ततण्डुलो धौतः परिभृष्टो घृतेन च । खण्डयुक्तेन दुग्धेन पाचितः पायसो भवेत्, स्कन्दे काशीखण्डे २७ अ० । 8. दुइज्जन्त इति प्रसिद्धं नाम ।

प्रभुं कुलपतिस्तत्र पितुः सुहृदुपस्थितः । पूर्वाभ्यासात्प्रभुस्तस्मिन्नपि तेने ततं भुजम् ॥३८२॥
तेनैव तापसेनैकनिशावासकृतेऽर्थितः । स्थिरस्तत्रैकरात्रिक्या स्थितः प्रतिमया प्रभुः ॥३८३॥
आर्य ! कार्यस्त्वयाऽत्रैव प्रावृट्काल इति प्रगे । व्याजहार विहारोत्कमाग्रही तापसः प्रभुम् ॥३८४॥
भानुतप्तां भुवं स्वामी पदपद्धतिपङ्कजैः । पिधातुमिव कारुण्याद् विहरन् ग्रीष्ममत्यगात् ॥३८५॥
गिरं **सिद्धार्थ**मित्रस्य स्मरन् कुलपतेस्ततः । प्रावृट्कालाय मोराकग्रामं स्वामी जगाम तम् ॥३८६॥
प्रभुः कुलपति[1]प्रत्तमध्यास्यैकं तृणोटजम् । तपःश्रीवि[2]भ्रमैस्तब्ध इव प्रतिमया स्थितः ॥३८७॥
क्षुत्क्षामकुक्षयः कामं ग्रीष्मक्षीणतृणे वने । गावोऽधावंस्तदा भोक्तुं तापसानां तृणोटजान् ॥३८८॥
तापसैरकृपैरेतास्ताडिता यष्टिलोष्टुभिः । [१]एत्याखादन् कुटीं भर्त्तुः प्रतिमानिभृताकृतेः ॥३८९॥
तद्वीक्ष्य तापसाः कोपाद् गत्वा कुलपतिं जगुः । अलसो नीरसोऽनीहस्तवाऽयं क इवातिथिः ॥३९०॥
भक्षितं पश्यतोऽप्यस्य गोभिस्तृणकुटीरकम् । धर्मयोग्योटजत्राणात् तत्त्वतः [3]कावकीर्णिता ॥३९१॥
तवात्मेव प्रियोऽसौ तन्नास्माभिः किञ्चिदुच्यते । उन्मार्गगामिनां किं न शिक्षादानक्षमा वयम् ? ॥३९२॥
ततः कुलपतिर्गत्वा भ्रष्टं वीक्ष्योटजं स्वयम् । दध्यौ सत्यं वदन्त्येते तापसा न रुषा मृषा ॥३९३॥
अथाचष्ट प्रभुं तात ! त्रातः स्वोप्युटजो न किम् । तापसाश्रमलक्षाणि ररक्ष भवतः पिता ॥३९४॥
वीक्ष्येदक्षं तवालस्यमनालस्यमना न तु । कुप्येत्तापसलोकोऽयमोको रक्ष्यं प्रयत्नतः ॥३९५॥
इतीरयित्वा **सिद्धार्थ**सौहार्दधृतमार्दवः । ययौ कुलपतिर्विश्वपतिश्चेदमचिन्तयत् ॥३९६॥
स्यादेषामप्रियं कर्मबन्धकृन्मन्निबन्धनम् । न स्थातुमपि तल्लोके हितकर्तुर्ममोचितम् ॥३९७॥
अद्यप्रभृति न स्थेयं तदप्रीतिमतां गृहे । स्थातव्यमेव कायेन कायोत्सर्गजुषान्वहम् ॥३९८॥
प्रायः स्थेयं च मौनेन भोज्यं च करभाजने । विनयो न गृहस्थस्य रचनीयः कदाचन ॥३९९॥
इति वैराग्यतः पञ्चाभिग्रहमग्रहीत् प्रभुः । वर्षास्वप्य**स्थिकग्रामं** मासार्द्धानन्तरं गतः ॥४००॥
अधिवस्तुं तदा **शूलपाणे**र्यक्षस्य सद्मनि । तत्रानुज्ञापयन् स्वामी ग्रामीणैरभिभाषितः ॥४०१॥
ग्रामोऽयं **वर्द्धमानो**ऽस्मिन्नस्ति **वेगवती नदी** । जम्बालमण्डली दुर्गमूलकूलद्वयोदया ॥४०२॥
इहाऽऽययौ धननिधिर्धनदेवोऽन्यदा वणिक् । सहस्रार्द्धमितैर्भार[२]विकटैः शकटैर्वृतः ॥४०३॥
एको महोक्षस्तस्याभून्यस्य धुर्यं स तं धुरि । निखिलान्यखिलात्पङ्काच्छकटान्युदतीतरत् ॥४०४॥
अथातिभारविधूरो रुधिरोर्मीन् वमन् मुखात् । स पपात वृषः क्ष्मायां कृतकृत्य इवा[4]शुगः ॥४०५॥
तत्पालनाय ग्रामाय वणिग् दत्त्वाधिकं धनम् । स्तुत्वापृच्छ्य वृषं दुःखवाहः सार्थमवाहयत् ॥४०६॥

---

१. अखादन्नुटजं C, L, A । २. ०संकटैः-A, B, D ।

टि. 1. प्रदत्तं इत्यर्थः । सम्पा० । 2. ०भ्रमैः स्त० व्यत्यये लुग् वा [१।३।५६] इत्यनेन सन्धिः । 3. अवकीर्णिता-व्रतभङ्गस्य भावः । 4. आशुगः बाणः ।

ग्रामीणैरघृणैरेष गृहीतद्रविणैरपि । वृषः पयोऽपि नापायि दूरे पालनलालना ॥४०७॥
स्वामिदत्तं स्मरन्वित्तं ग्रामे कामितमत्सरः । उक्षा तृषाबुभुक्षार्त्तो मृत्वेह व्यन्तरोऽभवत् ॥४०८॥
स्मृतप्राग्जन्मवृत्तेन व्यन्तरेणामुना ततः । व्यकारि मारिरत्रारिरूपग्रामीणमारिणी ॥४०९॥
अश्रान्तविलसन्मारिक्रीडारजतपर्वताः । इहाऽस्थ्नां कोटिशः कूटास्तदेते परितोऽभवन् ॥४१०॥
न्यवर्त्तत यदा मारिर्न शान्तिकशतैरपि । ततोऽभीतिवधूकाम्या ग्राम्या ग्रामान्तराण्यगुः ॥४११॥
यतो यतोऽगमन् ग्राम्या दुःखतापौघदायिनी । क्रूरा करगृहीतेव ययौ मारिस्ततस्ततः ॥४१२॥
भक्त्या प्रसादयिष्यामः कुपितं किञ्चिदित्यथ । महोद्वेगात्पुनर्वेगाद् ग्रामं तेऽमुं समागमन् ॥४१३॥
स्नाता धौतांशुका मुक्तकेशाः क्लेशाकुलाश्च ते । वर्त्मन्यवर्त्मन्युद्याने खे क्षिपन्तो बलिं जगुः ॥४१४॥
यः कोऽपि कोपितोऽस्माभिरज्ञानेन मदेन वा । असुरो वा सुरो वाऽसौ प्रसीदतु नता वयम् ॥४१५॥
गैर्वाणी खेऽभवद्वाणी युष्माभिरधमैस्तदा । प्रागुपात्तं वणिग्वित्तं महोक्षस्तु न पालितः ॥४१६॥
स मृत्वा वः[१] शिरःशूलं शूलपाणिः सुरोऽभवम् । कामं निष्ठापयिष्यामि युष्मन्नामापि वैरतः ॥४१७॥
श्रुत्वेति ते दिवि क्षिप्तधूपधूमबलिस्रजः । क्षितौ लुठन्तो दीनास्या जनिताञ्जलयो जगुः ॥४१८॥
अपराद्धं पुरास्माभिः सम्प्रत्याराध्यसे प्रभो ! । **क्षाम्यं सर्वं प्रणामान्तः कोपो हि महतां मतः** ॥४१९॥
इति तद्भक्तिभिः शाम्यदन्तरो व्यन्तरो जगौ । अस्थ्नां कूटं विरच्यैषां कुरुध्वं तत्र धाम मे ॥४२०॥
उक्षरूपानुसारेण सारपूजनराजिनीम् । मन्मूर्त्तिं कुरुत क्रोडेऽमुष्य तुष्यामि तेन वः ॥४२१॥
कृत्वाथ तद्गिरं ग्राम्याः सम्प्रीताः स्फीतवेतनम् । आदिशन्**निन्द्रशर्म्माणं** तत्पूजाकर्मणि द्विजम् ॥४२२॥
निवृत्तमारिव्यसनो विस्तारिश्रीस्तदाद्ययम् । अस्थिकूटमिहास्तीति ग्रामोऽभूदस्थिकाह्वयः ॥४२३॥
रात्रावत्र तु यः शेते व्यन्तरायतने जनः । स मृतः प्रेक्ष्यते प्रातस्तन्न स्थातुमिहोचितम् ॥४२४॥
पृथक् पृथगिति ग्राम्यैरुक्तो दत्तेतराश्रयः । स्वामी बोध्यं विदन् यक्षं तमेवार्थयताऽऽश्रयम् ॥४२५॥
देवार्य ! वार्यमाणोऽपि यदि तिष्ठसि तिष्ठ तत् । त्वां हन्ति व्यन्तरश्चेत्तन्नानुज्ञादूषणानि नः ॥४२६॥
तैरित्युक्ते यथाकामी स्वामी प्रतिमया स्थितः । यक्षायतनकोणैकदेशे स्तम्भ इवाबभौ ॥४२७॥
सायं विधाय यक्षार्चामर्चाकृत् प्रभुमभ्यधात् । हन्त्येष[२] व्यन्तरो नक्तं स्थाता नाहमपीह तत् ॥४२८॥
युष्माभिरपि न स्थेयमित्युक्त्वा मौनिनि प्रभौ । निर्वास्य पथिकानन्या**निन्द्रशर्मा** गृहं गतः ॥४२९॥
क्रुद्धो दध्यौ तदा यक्षः कः क्षयं स्पृहयत्ययम् । योऽविशद् वार्यमाणोपि यमास्य इव मद्गृहे ॥४३०॥
तदेनं मङ्क्षु हन्मीति यक्षः स क्षणदामुखे । जगत्रयभियाम[1]ट्टमट्टहासमिहासृजत् ॥४३१॥
असङ्ख्याम्भोनिधिध्वानपिधानं तज्जनिध्वनिः । योगनिद्रानिलीनस्य गीतिकेवाभवत् प्रभोः ॥४३२॥

---

१. च-D । २. हंतैष A, L । टि. 1. अट्टं-अत्यन्तोच्छ्रितम् ।

तद्रवश्रवणे रीणा[1] ग्रामीणा जगदुर्मिथः । व्यन्तरेणैष देवार्यो मार्यतेऽनार्यचेतसा[१] ॥४३३॥
परिव्राडुत्पलः पार्श्वतीर्थसाधुचरस्तदा । श्रुत्वाष्टाङ्गनिमित्तज्ञस्तां देवार्यकथां जनात् ॥४३४॥
अधृतिं धारयन् दध्यौ शङ्कासन्तापकातरः[२] । सैष दुःखौघपरमो मा जिनश्चरमोऽस्त्विति ॥४३५॥ युग्मम् ॥
संक्षेपो गगनस्येव विन्ध्याद्रेरिव विस्तरः । व्यकारि करिणो रूपमथ यक्षेण भीषणम् ॥४३६॥
व्यभादिभो विभोरग्रे श्यामः कामं तपःश्रियाम् । गुलिका कज्जलस्येव दृष्ट्यलङ्कारकारणम् ॥४३७॥
अथ व्योमपथव्यापि वेतालोत्तालरूपभाग् । व्यन्तरः सुतरां द्वेष्टा चक्रे चेष्टां भयङ्करीम् ॥४३८॥
अत्रस्यतो भगवतस्तद्भयेऽपि स्थिराकृतेः । कर्मभिर्विरलीभूतैः कातरानुचरायितम्[३] ॥४३९॥
यक्षोऽथ फणिरूपेण कुर्वन् वेष्टनचेष्टनम् । [2]तपःश्रीभुजवद् भेजे कङ्कणालिप्रभां प्रभौ ॥४४०॥
विषं विषधरे वर्षत्येकं कष्टमभूत् प्रभोः । यदस्य योगरोमाञ्चदण्डैरव्यथि तद्वपुः ॥४४१॥
तनौ तेनाऽथ नाथस्य व्यन्तरेण विचक्रिरे । श्रोत्र-नेत्र-शिरो-नासा-दन्त-पृष्ठ-नखव्यथाः ॥४४२॥
एकापि या मृतिकृते प्राकृतेषु नृषु व्यथा । सेहे सहेलं ताः सप्ताप्यतप्तात्मा समं विभुः ॥४४३॥
कारं कारं निकाराणां[3] निकरानित्ययं सुरः । निर्विण्णो निरहङ्कारश्चकार प्रणतिं प्रभोः ॥४४४॥
जगाद च वचः स्वामिन् न मत्वा तव वैभवम् । यदकारि मयाऽरित्वं तत् क्षमस्व क्षमानिधे ! ॥४४५॥
**सिद्धार्थ**व्यन्तरः स्वार्थव्यग्रः स्मृत्वेन्द्रशासनम् । तदागत्य कृताकृत्यं शूलपाणिं क्रुधाभ्यधात् ॥४४६॥
सुराधम ! विराद्धः किं त्वयाराध्यो जगद्गुरुः । विज्ञायैवमिदं[४] भक्तो[५] मोक्ता त्वयि पविं हरिः ॥४४७॥
इत्याकर्ण्य भयाकीर्णः शूलपाणिः पुनः प्रभुम् । क्षमयामास निःश्वासगर्भस्तत्कृत[६]निन्दकः ॥४४८॥
शान्तं तं वीक्ष्य **सिद्धार्थो** धर्मार्थप्रथनैरथ । जिनेन्द्रदर्शने रक्तं दर्शनेऽप्यधित[4] स्थिरम् ॥४४९॥
नत्वाऽथ नाथमुन्माथकृते दुष्कृतकर्मणाम् । स सम्यक्त्वगुणासङ्गी सङ्गीतमसृजत् पुरः ॥४५०॥
ग्रामीणास्तेन गीतेन सुखेनाप्यसुखं दधुः । आर्यं यक्षोऽद्य विक्षोद्य[5] क्रीडतीत्यभिशङ्किनः ॥४५१॥
चतुरः प्रहरान् किञ्चिदूनान् दूनो जिनोऽप्यथ । निद्रामेत्य दशस्वप्नान् सद्यो वीक्ष्य व्यबुध्यत ॥४५२॥
तमरागं सरागोऽथ रविर्द्रष्टुमिवोदितः । **इन्द्रशर्मोत्पलौ** ग्राम्याश्चापुस्ते पापशङ्किनः ॥४५३॥
[6]प्रतीक्ष्यं तेऽर्चितं प्रेक्ष्योत्प्रेक्षन्ते स्म सविस्मयाः । दिष्ट्याद्य शमितो देवो देवार्येणेति हर्षिणः ॥४५४॥
**उत्पलो**ऽपि सुधीर्बुद्ध्वा ननाम स्वामिनं मुदा । निषसाद च तत्पादमूले कूले भवाम्बुधेः ॥४५५॥
कायोत्सर्गात्यये ज्ञानी पुनर्नत्वेशमाह सः । त्वं वेत्स्येव स्वभक्त्या नु त्वत्स्वप्नानां फलं ब्रुवे ॥४५६॥

---

१. ०तेजसा- A, P । २. ०संपात B, K, L, C, P । ३. कातरैः कातरायितम्-P । ४. ०येदमिदं L, A । ५. भक्त्या L । ६. ०स्तत्कृति L ०स्वकृत KH ।

टि. 1. रीणाः दुःखिताः । 2. यथा तपःश्रीभुजा प्रभौ कङ्कणालिप्रभां भेजे तथा यक्षोपि फणिरूपेण ताम् भेजे इत्यर्थः । 3. निकाराणां निकरान्=अपकाराणां समूहान् । 4. अधित धा धातु 'धारणे' अद्यतनी तृ.पु. एकवचनम् । 5. वि+क्षुद् धातुः । 6. प्रतीक्ष्यं =पूज्यम् ।

विश्वोत्ताल ! स्वयं तालपिशाचो यत्त्वया हतः । आक्रान्तलोकसन्दोहं मोहं तेन हनिष्यसि ॥४५७॥
शुक्लचित्रौ त्वया दृष्टौ सेवमानौ च यत् पिकौ । तत् ते भावि सितध्यानं द्वादशाङ्गीं च देक्ष्यसि ॥४५८॥
गोसङ्घदर्शनात् सङ्घश्चतुर्द्धा ते भविष्यति । यत्तु पद्मसरोऽदर्शि त्रिदशैस्तेन सेव्यसे ॥४५९॥
दोर्भ्यामब्धिर्यदुत्तीर्णस्तदुत्तीर्णस्त्वया भवः । आलोक्यत यदर्क्कस्तदुदर्क्कस्तव केवलम् ॥४६०॥
यन्मानुषोत्तरः स्वान्त्रैर्बद्धस्तत्तेऽद्भुतं यशः । मेरोरारोहणाद्वक्ता धर्मं सिंहासनस्थितः ॥४६१॥
नवानामिति जानामि स्वप्नानामियतीं दशाम् । दृष्टे सुगन्धिनी दाम्नी यत्तु वेद्मि न तत्फलम् ॥४६२॥
अथाचष्ट विभुः स्पष्टमिदं दामद्वयीफलम् । गृहस्थानां यतीनां च धर्मौ वक्ष्यामि निर्मलौ ॥४६३॥
नत्वाथ ते जिनं सर्वे ययुर्वेश्म सुविस्मिताः । तत्रार्द्धमासक्षपणैश्चतुर्मासीं जिनोऽत्यगात् ॥४६४॥
अर्हन् ! विषहमानेन क्लेशावेशान् स्वयं त्वया । अहं मज्जन् भवाम्भोधौ बोधौ नावीव रोपितः ॥४६५॥
निःसन्धिबन्धो ! निस्सङ्ग ! सङ्गमोऽस्तु त्वया पुनः । क्व वा मुहुरियद्भाग्यं के वा न स्युर्मनोरथाः ॥४६६॥
इत्यादिवादिना भक्त्या प्रणतः शूलपाणिना । प्राणिनामभयं यच्छन्नगच्छत् प्रभुरन्यतः ॥४६७॥ [त्रिभिर्वि०]
दीक्षातोऽब्दे गते स्वामी **मोराके**ऽगान्निवेशने । तदुद्याने प्रतिमया विश्वकल्पतरुः स्थितः ॥४६८॥
**अच्छन्दकस्य** ज्योतिष्कमन्त्रपाखण्डजीविनः । तत्रासहिष्णुर्माहात्म्यमर्हदर्चाभिलाषुकः ॥४६९॥
**सिद्धार्थ**व्यन्तरः स्थित्वा सिद्धार्थसुतवर्ष्मणि । सद्यः कालत्रयाख्यानैः सम्यग् ग्राम्यानमोदयत् ॥४७०॥ युग्मम् ॥
ग्राम्याश्चाऽभिदधुर्ग्रामे युष्मत्तुल्योऽस्ति भाववित् । **सिद्धार्थः** स्माह तस्येयमकिञ्चिज्ज्ञस्य जीविका ॥४७१॥
गत्वाऽथ कौतुकाद् ग्रामं ग्राम्या अच्छन्दकं जगुः । न किञ्चिद्वेत्सि देवार्यः सर्वं वेत्त्यागतोऽत्र यत् ॥४७२॥
स जगौ सत्सु युष्मासु स ज्ञानी न मयि स्थिते । तमस्सु सत्सु खद्योतो द्योतते नोदिते रवौ ॥४७३॥
ज्ञास्यामि यद्यसौ ज्ञानं मत्पृष्टः कथयिष्यति । इत्युक्त्वा सोऽगमत् प्रष्टुं ग्राम्यैः कौतुकिभिर्वृतः ॥४७४॥
माहात्म्यभङ्गभीर्बिभ्रन् तृण**मच्छन्दकः** करे । धियाऽन्यथा करोम्यस्य ज्ञानमित्याशया हसन् ॥४७५॥
प्रभुं पप्रच्छ केनेदं वद भङ्क्ष्यामि पाणिना । स्वामिस्थः स्माह **सिद्धार्थो** नेदं भो ! भज्यते त्वया ॥४७६॥ युग्मम् ॥
श्रुत्वेत्यावेशतो भङ्क्तुं तृणमभ्युद्यतश्च सः । कथं विहरते स्वामी दध्यौ चेदं तदा हरिः ॥४७७॥
दृष्ट्वा तच्चरितं मा वाग् जिनास्योत्था मृषाऽस्त्विति । **अच्छन्दकस्य** चिच्छेद वज्रेणेन्द्रो दशाङ्गुलीः ॥४७८॥
अथाऽच्छिन्नतृणश्छिन्नाङ्गुलिरच्छन्दकोऽन्यतः । हस्यमानो जनैः शून्यमना मूढ इवागमत् ॥४७९॥
अनारतं नमन् पुष्पमालामलयजादिभिः । जनः प्रीतिमना ग्राम्यः स्वाम्यर्चामसृजत् ततः ॥४८०॥
अतृप्तः स्वामिपूजायामिवाच्छन्दकभर्त्सने । **सिद्धार्थः** पुनरप्याह ग्राम्यान् स्वाम्याननस्थितः ॥४८१॥

---

१. प्रीतमना – L, A ।

टि. 1. असम्बन्धबन्धुः, तत्संबोधने । अवधिरहितः टि० B पार्श्वेऽर्थो बोधितः । 2. चित्तवित् टि० B पार्श्वेऽर्थो लिखितः । 3. ज्ञानम् अस्ति अस्य इति ज्ञानः तं ज्ञानं ज्ञानिनम् इत्यर्थः । सम्पा० ।

**वीरघोषेन्द्रशर्म्माणौ** कर्मकृत्-गृहिणौ किमु । तिष्ठतोऽत्रेति तौ श्रुत्वास्त इत्युक्त्वाग्रतः स्थितौ ॥४८२॥
तौ **सिद्धार्थो**ऽभ्यधात्पूर्वं नष्टं पात्रं हुडश्च वाम् । **अच्छन्दक**स्तयोश्चौरः क्रूरात्मा ज्ञानदाम्भिकः ॥४८३॥
भाजनं गृह्यतां गत्वा पश्चाद्भागे तदौकसः । तदस्ति हस्तमात्रेण क्षिप्तं **शिग्रु**तरोरधः ॥४८४॥
भुक्तस्तु पापिना तेना[1]ऽऽखण्ड्य पाखण्डिना हुडुः । तदस्थिपुञ्जस्तत्रास्तेऽवकरे बदरीतले ॥४८५॥
गत्वाथ कौतुकाद् ग्राम्यास्तद्वीक्ष्यागत्य विस्मयात् । न त्वद्वाक् क्वाप्यसत्येति प्रणमन्तोऽवदन् जिनम् ॥४८६॥
पुनर्देवो जगौ किञ्चिदन्यत् तस्यास्ति चेष्टितम् । जल्पतां शृण्वतां वा यत् पापं नः शङ्कते मनः ॥४८७॥
ग्राम्यैरथाग्रहात्पृष्टः स जगौ न वदाम्यहम् । यदि वः कौतुकं श्रोतुं तत्तद्भार्यैव पृच्छ्यताम् ॥४८८॥
गतैश्च तद्गृहे [१]चारुदती सा रुदती जनैः । दृष्टा पृष्टा च तद्दुःखहेतुमेतदभाषत ॥४८९॥
अच्छन्दकेन स्वच्छन्दचारिणा पापकारिणा । स्वां स्वसारम[2]सारेण भजता भर्त्सितास्म्यहम् ॥४९०॥
स्वसुर्भर्त्तरिति क्रोधादुक्तः संताड्य सोऽद्य माम् । गतः साध्वङ्गुलिच्छेदं जनात् खेदं च लब्धवान् ॥४९१॥
इति दुश्चरितं तस्य [२]ख्यातं चौर्यादि पापिनः । इष्टदैवतवद्यूयं चिन्तयन्त्या ममागताः ॥४९२॥
श्रुत्वेति ते कलकलोद्दामा जग्मुः स्वधामसु । न च पापीति स क्वापि भिक्षामप्याप भिक्षुकः ॥४९३॥
जिनेशं विजने गत्वा दीनो नत्वाऽभ्यधत्त सः । स्वामिन् ! मयापराद्धं यत्तत्क्षमस्व व्रजाऽन्यतः ॥४९४॥
त्वं सर्वत्रापि पूज्योऽसि पूजात्रैव पुनर्मम । त्वयि स्थिते क्व पूज्योऽहं खद्योत इव भास्वति ॥४९५॥
अप्रीतिमत्क्षितित्यागाभिग्रही भवविग्रही । प्रभु**रुत्तरचावाल**निवेशायाचलत् ततः ॥४९६॥
द्वौ दक्षिणोत्तरौ ख्यातौ यौ चावालौ तदन्तरे । **सुवर्णवालुकारूप्यवालुके** सरितौ मते ॥४९७॥
दक्षिणादुत्तरं यातश्चावालं कण्टकेऽलगत् । **सुवर्णवालुका**तीरे देवदूष्यार्द्धमीशितुः ॥४९८॥
किञ्चिद् गत्वाथ मा भ्रष्टमिदमस्थण्डि[३]ले स्म भूत् । इति व्यालोक्य वस्त्रार्द्धं गन्तुं प्रावर्त्तत प्रभुः ॥४९९॥
[3]पृष्टिलग्नः समं भ्रान्तः स तु मासांश्चतुर्दश । च्युतं चीरार्द्धमादाय प्रभुं नत्वा ययौ द्विजः ॥५००॥
तन्तुवायस्तु ते अर्द्धे अयोजयदसन्धिवत् । दीनारलक्षं तन्मूल्यमर्द्धमर्द्धमभूत्तयोः ॥५०१॥
**श्वेतवीं** तु व्रजन्नीशो गोपालैर्जगदे मुहुः । मा कथञ्चन देवार्य ! [4]निगमेनामुना गमः ॥५०२॥
इतोऽस्ति शून्यः **कनकखला**ख्यस्तापसाश्रमः । तदन्तर्दृग्विषो व्यालः कालरात्रेरिवोद्यमः ॥५०३॥
दृग्पाते तस्य सञ्जाते जन्तुजातेः कथामुषि । [४]ज्वलत्यमूर्त्तिमद्व्योम क्षित्यादेः का कथा पुनः ॥५०४॥
तन्मार्गमृजुमप्येनं त्यज क्रूराहिवक्रितम् । **श्वेतवीं** व्रज वक्रेणाप्यविघ्नमृजुनामुना ॥५०५॥

---

१. चारुदन्ती - D, K । २. ख्याति- A, B । ख्यातुं KH, H । ३. लेऽप्य P । ४. ज्वलत्यरूपमाकाशं-A, B, KH, H । ज्वलत्यत्यसदपि...का कथा सतः-P, D, K ।

टि. 1. चूर्णीकृत्य टि० B पार्श्वे । 2. असारः तुच्छता तया । 3. पृष्टिः (स्त्री०) पृष्ठः । 4. मार्गेण टि० K ।

जिनोऽथ दध्यौ बोधार्हः पन्नगोऽयमयं[1] यतः । क्षपकः पारणार्थं प्राग्जन्मनि व्यहरत् पुरे ॥५०६॥
पथि तस्यांह्रिणा भेकी मृता क्षुल्लेन दर्शिता । ऊचे सोऽन्या मृताः प्रेक्ष्य मयैता अपि किं हताः ॥५०७॥
निश्यालोचयितैवायमित्यास्त क्षुल्लकस्तदा । आवश्यकेप्यनालोच्य क्षपकस्तु निषेदिवान् ॥५०८॥
विस्मारितमनेनेति स्मारितः क्षुल्लकेन तत् । तद्वधाय क्रुधा धावन् स स्तम्भस्खलितो मृतः ॥५०९॥
ज्योतिष्कोऽभूत् ततश्च्युत्वा सहस्त्रार्द्धं तपस्विनाम् । स पत्युः **कनकखला**श्रमे सूनुरजायत ॥५१०॥
आसन् **कौशिक**गोत्रत्वात् तत्र सर्वेऽपि कौशिकाः । स तु ख्यातोऽद्धुतक्रोधत्वाच्चण्ड**श्चण्डकौशिकः** ॥५११॥
तापसानां कुलपतिः सोऽभूत्कुलपतौ मृते । पुष्पमूलाद्यसौ नाऽदादादातुं कस्यचिद्वने ॥५१२॥
पर्णाद्यमपि शीर्णं योऽगृह्णात् तं यष्टिमुष्टिभिः । असौ चकार कारुण्यहीनः कीनाशगोचरम् ॥५१३॥
इति संत्रासिताशेषतापसस्तत्र कानने । एक एवास्त विस्रस्तगुणे मोह इवाङ्गिनि ॥५१४॥
कदापि हि बहिर्याते **कौशिके** कण्टिकाकृते । **श्वेतव्या** एत्य राजन्यैस्तद्वनं विद्रुतं द्रुतम् ॥५१५॥
व्यावृत्तस्तच्च गोपेभ्यः श्रुत्वोद्धूतपरश्वधः[2] । त्रासयन् राजपुत्रान् स क्रोधान्धः कूपकेऽपतत् ॥५१६॥
निजोऽपि सन्मुखीभूतः कूपेऽस्य पततः शिरः । क्रौर्यातिवैरवैरस्यादिवाऽकृन्तत्परश्वधः[3] ॥५१७॥
स विपद्यैष सर्पोऽभूत् तद्बोध्योऽयमिति प्रभुः । ऋजुनैव पथाऽयासीदुदासीनः स्ववर्ष्मणि ॥५१८॥
क्षीणभूतगणे तत्र स्थलीभूतोटजे वने । प्रभुः प्रतिमया तस्थौ यक्षमण्डपिकान्तरे ॥५१९॥
तदा च दृग्विषो भोगी नियोगी पापकर्मणाम् । निर्ययौ नरकद्वारादिव मध्याद् बिलस्य सः ॥५२०॥
स्वैरं खेलन् वने कालदण्डस्येवाधिदेवता । स भोगी भक्षयन् जन्तून् लोकनाथमलोकत ॥५२१॥
दध्यौ च मामवज्ञाय वनोद्देशं[१] विवेशकः । निर्भीक इव निष्कम्पो मय्यायातेऽप्ययं स्थितः ॥५२२॥
आस्तामस्तं नयाम्येनमिति ध्यात्वा क्रुधोद्धतः । दृशं दग्धलतावृक्षान्[4]दृग्विषोऽहिर्जिनेऽक्षिपत् ॥५२३॥
[5]प्रभावप्रभविष्णुं तां प्रभावभृतिपन्नगः । शाणेनैवास्त्रमर्केण समुत्तेज्याऽमुचन्मुहुः ॥५२४॥
विषाग्निकीलया[6]ऽप्याप्तभानुसाहाय्यलीलया । तयादाहि प्रभोरङ्गं कार्मणं न तु चार्मणम् ॥५२५॥
निष्फलाक्षिविषः क्रोधाद्ददंशांह्रौ मुहुः प्रभुम् । अपासर्पच्च सर्पोऽयं माऽपतत् मय्यसाविति ॥५२६॥
विषाण्यकृतकृत्यानि जिनस्याहसतां पदौ । गोक्षीरधाराधवलक्षरत्क्षतजकैतवात् ॥५२७॥
ततः किमेतदित्यग्रे भूत्वा भोगी सविस्मयः । प्रभुदृष्टिं सुधावृष्टिं पश्यन् विध्यातदृष्ट्यभूत् ॥५२८॥
उपशान्तदृशो दीप्तं शमं नेतुं मनोऽप्यहेः । **चण्डकौशिक** ! बुध्यस्वेत्यवर्षद्वाक्सुधां विभुः ॥५२९॥
ऊहापोहेन तद्वाचः स्मरन् जातीः कषायमुक् । नत्वा नाथं त्रिधा भोगी हृदाऽनशनमासदत् ॥५३०॥

---

१. वनोद्देशे A ।

टि. 1. अयमयं=अयम्+ अयम्, प्रथमः 'अयम्' पन्नगस्य विशेषणं द्वितीयः' 'अयम्' क्षपकस्य विशेषणं बोद्धव्यम् । सम्पा० । 2. परश्वधः परशुः इत्यर्थः । 3. विरसस्य भावः वैरस्यम्, तस्मात् । 4. दग्धाः लतावृक्षाः यया सा दग्धलतावृक्षा, तामिति समासविग्रहः । सम्पा० । 5. प्रभौ अप्रभविष्णुं-इति वाच्यम् । 6. कीला-अग्निशिखा, तया (दृशः विशेषणम्) ।

अनुज्ञातोऽथ नाथेन गृहीतानशनः फणी । विषोग्रस्वाक्षिरोधाय तुण्डं क्षिप्त्वा बिले स्थितः ॥५३१॥
समतालीनचित्तस्य ममतारहितस्य च । कृपया तस्य तत्रैव स त्रैलोक्यगुरुः स्थितः ॥५३२॥
नाथं तथास्थितं वीक्ष्य गोपालैरेत्य विस्मितैः । वृक्षान्तरचरैर्जघ्ने यथेष्टं लेष्टुभिः फणी ॥५३३॥
तथाप्यविकृतं वीक्ष्य विश्रम्भादेत्य तेऽभितः । यष्टिभिर्घट्टयामासुर्[१]वासोमयमिवोरगम् ॥५३४॥
जनश्रुतिं जनः श्रुत्वा तत्रैत्यावन्दत प्रभुम् । तं चातिविस्मयादस्तौदस्तौग्र्यमुरगोत्तमम् ॥५३५॥
तक्रविक्रयकारिण्यः सञ्चारिण्यः पथामुना । विनीता नवनीतेनालिम्पन् पस्पृशुरप्यहिम् ॥५३६॥
हूता हैयङ्गवीनस्य नवीनस्य रसेन तम् । तेनिरे [1]तितउप्रायं तीव्रतुण्डाः पिपीलिकाः ॥५३७॥
[2]मद्दुर्गतिमुषामासामङ्गभङ्गः स्म मा भवत् । इत्यल्पमपि नाचालीत् फणी पातुं पिपीलिकाः ॥५३८॥
[3]या कृतेवामृतेनोच्चैर्यत्कृतेवैन्दवीतनुः । तत्राक्षिपत्कृपालुस्तां स्वामी स्वामीदृशीं दृशम् ॥५३९॥
अथ पक्षान्तपूर्णायुः **सहस्रार**महिर्ययौ । इति तस्योपकृत्यागाच्चावालं चोत्तरं प्रभुः ॥५४०॥
देशान्तरचिरायातसुतस्योत्सवकारिणः । गृहिणो **नागदत्त**स्य भोजितस्वजनाविले ॥५४१॥
गृहे विवेश पक्षान्तपारणाय जगद्गुरुः । भक्त्याभ्युत्थाय सोऽपीशं पयसा प्रत्यलाभयत् ॥५४२॥ युग्मम् ॥
अहो दानमहोदानमित्यथाऽऽनन्दिनः सुराः । तद्गृहं रत्नवृष्ट्यादिपञ्चदिव्यैरदिव्ययन् ॥५४३॥
गतोऽथ **श्वेतवीं** स्वामी तदीशेन **प्रदेशिना** । महोत्सवभृता भक्तिधृतानन्देन वन्दितः ॥५४४॥
सम्प्राप्तः **सुरभिपुरं** पुरं विश्वगुरुस्ततः । अगादध्व[२]न्यगाहच्च तत्त्वर्द्धिमिव **जाह्नवीम्** ॥५४५॥
तां तितीर्षुः प्रभुः **सिद्धदत्त**नाविकसज्जिताम् । आरूढश्चरणोत्तीर्णभवाब्धिरपि [4]मङ्गिनीम् ॥५४६॥
[5]आरूढाध्वन्यलोका च नौश्चचाल चुकूज च । तटे घूकस्ततः **क्षेमिला**ख्यः शाकुनिको जगौ ॥५४७॥
आसाद्यं सद्य एवाद्य नौजनैर्व्यसनं महत् । तस्मात् मोक्षामहे मोक्षाध्वगस्यास्य प्रभावतः ॥५४८॥
अदस्तस्मिन्वदत्येव नदीगर्भं जगाम नौः । **सुदाढा**ख्यस्तदा **नागकुमारः** प्रभुमैक्षत ॥५४९॥
त्रिपृष्ठभवनिष्पिष्टः सिंहजीवः स वैरतः । दध्यौ वध्यो मयाद्यैष द्वेषपारं गमिष्यता ॥५५०॥
प्रत्यासन्नोऽपि मे मृत्युर्भृशमद्य भयाय न । काममेतन्निपातेन गमिष्यामि कृतार्थताम् ॥५५१॥
इति निश्चित्य निश्चेष्टान् जन्तून् कोलाहलैः सृजन् । रे तिष्ठाद्य क्व यासीति नभस्थः प्रभुमभ्यधात् ॥५५२॥
अथ लोलन्महीगोलश्चलाचलकुलाचलः । उच्छलज्जलधिस्तेन वितेने कोऽपि मारुतः ॥५५३॥
अथोग्रलहरिन्यञ्चदुदञ्चन्नौचरा नराः । यमाञ्जलिगतंमन्याः स्वं स्वं दैवतमस्मरन् ॥५५४॥

---

१. वासो नवमिव...A, P, H, B । २. न्यगाधाम्बु तत्त्वर्धि...KH । न्यगाधवत्वतत्वर्द्धि-B ।

टि. 1. चालणीप्रतिमं टि० K । चालणीसदृशं टि० B । 2. मम दुर्गतिं मुष्णाति इति मद्दुर्गतिमुट्, तासाम् । 3. या दृष्टिरुच्चैरमृतेन कृता इव यया च (दृष्ट्या) कृता ऐन्दवीतनुः=चन्द्रस्य तनुः, इदृशीं तां स्वां दृशं कृपालुः स्वामी तत्राऽक्षिपत्, इत्यर्थः । 4. नावं K टि० । 5. आरूढाऽध्वन्यलोकाः यस्यां सा नौः इति बहुव्रीहिः ।

इतश्च **जिनदासो**ऽभून्**मथुरायां** पुरा वणिक् । प्रत्याचख्यौ स धर्मात्मा चतुष्पदपरिग्रहम् ॥५५५॥
तत्प्रियाया विवेकिन्याः **साधुदास्या** दधिक्रये । आनयन्ती दधिश्रेष्ठमाभीरी काऽपि सख्यभूत् ॥५५६॥
तयैकदा सुतोद्वाहे श्रेष्ठिनौ तौ निमन्त्रितौ । ऊचतुर्न क्षणो भद्रे ! कश्चिदागन्तुमावयोः ॥५५७॥
अथास्यै ददतुर्वित्तचीरालङ्करणादि तौ । तेनाप्तस्वजन[१]क्षोभः शोभनोऽभून्महोत्सवः ॥५५८॥
आभीरीबन्धवः प्रीतिबन्धुरास्तरुणौ ततः । अनन्यतुल्यावन्योन्यतुल्यौ च वृषभावुभौ ॥५५९॥
**कम्बलः शम्बल**श्चेति ख्यातौ श्रेष्ठ्यर्थमानयन् । श्रेष्ठिनोऽनिच्छतोप्येते द्वारि बद्ध्वा बलादगुः ॥५६०॥ युग्मम् ॥
श्रेष्ठी दध्यौ च मुञ्चेऽमू यदि क्लेश्यौ तदाधमैः । न मुञ्चेऽथ ततो भङ्गः प्रत्याख्यानस्य मे भवेत् ॥५६१॥
पातितोऽहं महामूर्खैः स्नेहेनेहातिसङ्कटे । पुष्यामि कृपयैवैतावपरिग्रहधीस्ततः ॥५६२॥
प्रासुकेन तृणेनाथ पाथसा गलितेन सः । परिग्रहीव कृपयाऽपुष्यत् तावपरिग्रही ॥५६३॥
सुधीः पर्वसु सर्वेषु धर्मशास्त्रमवाचयत् । श्रेष्ठीन्दुरुपवासात्तपौषधः शृण्वतोस्तयोः ॥५६४॥
धर्मोक्तिभिः प्रभूताभिरभूतां भद्रकौ च तौ । तत्राह्न्यचरतां नै[२]तौ श्रेष्ठी नाभुङ्क्त यत्र सः ॥५६५॥
तदाद्यपशुबुद्ध्या तौ साधर्मिकधियाऽपुषत् । श्रेष्ठी पशुग्रहप्रत्याख्यानभङ्गभयोज्झितः ॥५६६॥
[1]अण्डीरैस्तत्र **भण्डीरमण**यक्षस्य यात्रिकैः । प्रारेभे वाहनव्यूहवाहकेलिर्मुदान्यदा ॥५६७॥
अपृष्ट्वा जिनदत्तस्य वयस्यः कौतुकी तदा । वृषभौ वाहवादाय तावादाय द्रुतं गतः ॥५६८॥
[2]अंह्री वेगगुणस्येव रूपश्रिय इवाम्बके । वाहिन्यां योजयामास जिनदासस्य तौ सुहृत् ॥५६९॥
माहात्म्यं सौकुमार्यं च मन्दधीरविदंस्तयोः । उत्प्राजनप्रहाराभिराराभिः स व्यथां व्यधात् ॥५७०॥
चित्रीयमाणसञ्चारौ चारौ तत्र जयोदये । चरमीचक्रतुश्चक्रवर्त्तिनोऽपि वृषानिमौ ॥५७१॥
त्वराभिस्त्रुटितावन्तराराभिश्छुटितासृजौ । जितपौरः स तौ श्रेष्ठिधाम्नि बद्ध्वाऽधमोऽगमत् ॥५७२॥
श्रेष्ठी तौ वीक्ष्य तादृक्षौ निजगाद विषादवान् । कः साधर्मिकबन्धू मे निन्येऽवस्थामिमाविमाम् ॥५७३॥
जनान्मित्रचरित्रं तन्मत्वा हाहेति भाषकः । स तौ पस्पर्श पाणिभ्यां सान्त्वनोक्तीस्ततान च ॥५७४॥
अढौकयत् पर्य[3]स्तृण्यां दुग्धमन्नादि च स्वयम् । नाजिघ्रतां च घ्राणेन दृशा नापश्यतां च तौ ॥५७५॥
हृद्भावज्ञस्तयोर्दत्त्वाऽनशनं तत्र स स्थितः । भवप्रपञ्चं कथयन् ददत् पञ्चनमस्कृतीः ॥५७६॥
सुसमाधी च तौ मृत्वा जातौ नागकुमारकौ । श्री**वीरं** सङ्कटे मत्वा तदा तत्रेयतुर्द्रुतम् ॥५७७॥
योद्धुमेकेन रुद्धोऽथ **सुदाढो** गाढविक्रमः । अपरेण करे कृत्वा सरित्तीरमनायि नौ ॥५७८॥
नद्यामिवापदि स्वामिंस्त्वत्प्रभावोऽद्य नौरभूत् । इदं वदन्तोऽवन्दन्ताऽऽनन्दिनो नौजना जिनम् ॥५७९॥
कम्बलः शम्बलश्चाहिकुमारौ तु जिताहितौ । नत्वेशं पुष्पगन्धाम्बुवर्षिणौ हर्षिणौ गतौ ॥५८०॥

---

१. जनाक्षोभः L । २.नेमौ B, K ।

टि. 1. बलिष्ठैः इत्यर्थः श० र० म०भा० १ पृ० ३७ । दुर्विनीतैः K टि० पार्श्वे । 2. अङ्घ्रवतः वेगगुणस्य द्वौ अंह्री इव, अतिवेगवन्तौ इत्यर्थः, तथा अङ्गिन्याः रूपश्रियः द्वे नेत्रे इव, अतिरूपवन्तौ इत्यर्थः । 3. तृण्या(स्त्री)-तृणसमूहः ।

उत्तीर्य तर्याः कृत्वेर्यापथस्याथ प्रतिक्रमम् । विजहार विभुः कुर्वन् पदैः सैकतमङ्कितम् ॥५८१॥
तां **पुष्यो** नाम सामुद्रवेदिता पदपद्धतिम् । चक्राद्यङ्कां प्रभोः प्रेक्ष्य दध्यौ चक्रीह कोप्यगात् ॥५८२॥
अलब्धलक्ष्मीरद्यापि हृतश्रीरथवा भ्रमन् । एकाकी लभ्यते सोऽद्य क्व सेवावसरः प्रभोः ॥५८३॥
इत्यगात् तत्पदालोकी स **स्थूणाके** निवेशने । **अशोक**स्य तलेऽपश्यत् प्रभुं च प्रतिमास्थितम् ॥५८४॥
उत्तरोत्तरसर्वाङ्गलक्षणे लक्षिते प्रभौ । विस्मितश्च विषण्णश्च पुष्योऽचिन्तयदित्ययम् ॥५८५॥
अहो लक्षणसामग्रीं चक्रित्वाधिकसूचिनीम् । दधदप्येष हा भिक्षुर्धिक् शास्त्रं धिग् च तत्श्रमम् ॥५८६॥
अयं भिक्षुरभाग्यैर्वा ममैवाश्रयतोऽभवत् । कृष्णाङ्गारत्वमायाति निष्पुण्यस्य न किं निधिः ॥५८७॥
कथं विहरति स्वामीत्युपयुक्तस्तदा हरिः । पुष्यं वीक्ष्य विषीदन्तं महद्धर्याऽद्भुतमाययौ ॥५८८॥
प्रभुं नत्वा च नुत्वा च पुष्यं प्रोवाच वासवः । किमु निन्दसि शास्त्राणि सत्यं सत्यानि तानि भोः ॥५८९॥
वीक्षसे लक्षणव्यूहं बाह्यं चक्रित्वहेतुकम् । न त्वान्तरं प्रभोरस्य त्रिविश्वैश्वर्यसूचकम् ॥५९०॥
अदृश्याहारनीहारं [1]हारगौरास्रजङ्गलम् । अनामयं मलस्वेदहीनमस्य प्रभोर्वपुः ॥५९१॥
यद्यद् भवति दुर्गन्धिद्रव्यं मध्येऽङ्गमङ्गिनाम् । तदप्यस्य सुरभ्येव दिश्यते श्वाससौरभैः ॥५९२॥
सेव्योऽयं फलमिच्छद्भिश्चक्रिशक्रादिभिः सदा । तत्याज राज्यमेकाकी जिगीषुर्दुर्जयं भवम् ॥५९३॥
स्वमभाग्यं च मा मंस्था निर्भाग्यैर्नैष वीक्ष्यते । इत्युक्त्वा च कृतार्थं तं कृत्वा च द्यां ययौ हरिः ॥५९४॥
नाथोऽपि विहरन् प्राप पुरे **राजगृहे** गृहम् । **नालन्दायां** बहिः क्ष्मायां तन्तुवायस्य कस्यचित् ॥५९५॥
तन्तुवायं तमापृच्छ्य वर्षास्थितिकृते विभुः । तद्गृहैकतटे तस्थौ मासक्षपणभासुरः ॥५९६॥
इतश्च **मङ्खलिमङ्खो**ऽभवद् **भद्रा** च तत्प्रिया । भुवं व्यहरतां चित्रपट्टिकां दधतौ च तौ ॥५९७॥
सुतं **गोबहुलाह्व**स्य गोशालायामसूत सा । **भद्रा शरवण**ग्रामे **गोशालो** विश्रुतः स तत् ॥५९८॥
अभ्यस्तमङ्खशिल्पोऽयं शठो नित्यं कलिप्रियः । प्रकोप्य पितरौ निर्यन्नहार्षीच्चित्रपट्टिकाम् ॥५९९॥
भिक्षाभुक् स भ्रमन्नेत्य तमापृच्छ्य कुविन्दकम् । तच्छालायां विशालायां समीपे स्वामिनः स्थितः ॥६००॥
नाथोऽपि पारणेऽविक्षद् **विजय**श्रेष्ठिनो गृहम् । शुद्धभक्तेन तेनातिभक्तेन प्रतिलाभितः ॥६०१॥
सुरव्यूहैरहोदानं सुदानं चेति भाषिभिः । पञ्चभिर्वसुवृष्ट्याद्यैर्दिव्यैरद्योति तद्गृहम् ॥६०२॥
गोशालोऽपि निशम्येदं दध्यौ कोऽप्येष सन्मुनिः । यस्मै दानं ददानस्य श्रीरायात्यालयं स्वयम् ॥६०३॥
अद्य पाखण्डमाखण्ड्य तच्चित्रफलकं निजम् । भविष्याम्यस्य शिष्योऽहं फलत्येवेदृशो गुरुः ॥६०४॥
तत्रेति [१]चिन्तयत्येत्य स्थितः प्रतिमया प्रभुः । नत्वा चोवाच गोशालः शिष्योऽहं त्वं गुरुः प्रभो ! ॥६०५॥

---

१. चिन्तयन्नेत्य स्थितं प्रतिमया प्रभुं-B, A, L ।

टि. 1. हार इव गौरे अस्रजङ्गले=शोणितमांसे यस्य तद् इति समासविग्रहः । सम्पा० ।

सुविज्ञेनाऽप्यविज्ञाय प्रमादाद् वैभवं तव । यन्मया न पुराऽकारि भक्तिस्तेनाऽस्मि वञ्चितः ॥६०६॥
प्रभौ तूष्णीक एवेदमुक्त्वा प्राप्य च शिष्यताम् । न पार्श्वममुचद् भिक्षाकुक्षिम्भरिरहर्निशम् ॥६०७॥
द्वितीयमासक्षपणे प्राप्तः सद्मनि खाद्यकैः । प्रत्यलाभि गृहस्थेनाऽऽ**नन्देना**नन्दिना प्रभुः ॥६०८॥
ततस्तृतीयमासान्तपारणे पारितः प्रभुः । **सुनन्द**गृहिणाऽऽहारैः सर्वकामगुणाभिधैः ॥६०९॥
अथ कार्त्तिकराकायां **गोशालो**ऽसावचिन्तयत् । श्रूयतेऽसौ गुरुर्ज्ञानी ज्ञानं विज्ञास्यतेऽस्य तत् ॥६१०॥
अथापृच्छत् प्रभुं किं किं भिक्षायां लप्स्यते मया । पुरान्तर्वर्त्तमानेऽद्य वर्षपर्वणि सर्वतः ॥६११॥
अथाभ्यधित **सिद्धार्थ**स्तीर्थङ्करतनूचरः । सौवीरं कौद्रवं कूरं कूटं रूपकमाप्स्यसि ॥६१२॥
अथ बभ्राम सद्वल्भाकामो[1] धामनि धामनि । आदिनान्तं[2] क्वचित्किञ्चिन्नापत् क्षुत्तापभागसौ ॥६१३॥
हर्म्ये कर्मकृतः कस्याप्यपराह्णेऽभ्युपेयुषा । **सिद्धार्थ**वाचां संवादि सर्वमासादि तेन तत् ॥६१४॥
अद्वितीयो द्वितीयां तामतीत्य प्रावृषं प्रभुः । **कोल्लाके** सन्निवेशेऽगान्**नालन्दा**सन्निवेशतः ॥६१५॥
ब्राह्मणान् बहुलान् गेहे ब्राह्मणो **बहुला**भिधः । तदा चाऽभोजयत् तत्र भिक्षायै चागतः प्रभुः ॥६१६॥
प्रत्यलाभि प्रभुस्तेन क्षैरेयीशर्क्कराघृतैः । द्युसदः सदने तस्य पञ्चदिव्यानि चक्रिरे ॥६१७॥
इतश्च तादृग्लाभेन लज्जमानः शनैः शनैः । तां सायं तन्तुवायस्य शालां गोशाल आययौ ॥६१८॥
अपश्यन् स प्रभुं तत्र लोकान् पृच्छन् पदे पदे । **नालन्दा**न्तः परिभ्रान्तः प्रवृत्तिं नाऽप तु क्वचित् ॥६१९॥
भूयोऽभूवं वराकोऽहमेकाकीति स चिन्तयन् । आमुण्ड्यमुण्डमुन्मुक्तचीरो वीरोत्सुकोऽचलत् ॥६२०॥
स **कोल्लाके** गतः श्रुत्वा रत्नवृष्टिं द्विजौकसि । पश्यन्निपुणमेकत्र प्राप प्रतिमया प्रभुम् ॥६२१॥
नत्वाऽथ स प्रभुं प्राह नाहं शिष्यीकृतः पुरा । निःसङ्ग ! मुक्तवस्त्रादिसङ्गं स्वीकुरु सम्प्रति ॥६२२॥
न त्वां विना दिनाधीशमिवाब्जस्य रतिर्मम । तत्स्वीकारात् कुरु दयां निर्ममोऽपि ममोपरि ॥६२३॥
त्वया दृशाब्जसदृशा स्वीकृतोऽपि न वेद्मि किम् । सुधाकिरा यदि गिरा स्वीकरोषि पृणोमि तत् ॥६२४॥
तद्भवान् भाविनोऽनर्थान् विदन्नप्यममोऽपि च । स्वीचक्रे तद्वचः स्वामी क्वामी न किल वत्सलाः ॥६२५॥
विहरन् सह नाथेन स पथि प्रेक्ष्य पायसम् । संपच्यमानं गोपालैः प्राह नाथेह भुज्यते ॥६२६॥
**सिद्धार्थो**ऽभिदधेऽमीषां भाण्डं खण्डीभविष्यति । ऊचे स तानुखास्फोटं[3] सर्वविद्वक्ति मद्गुरुः ॥६२७॥
तत्तैर्भिया वंशदलैर्बद्ध्वाप्यधिकतन्दुला । उखाऽस्फुटत् तदप्यादन् पायसं कर्परेषु ते ॥६२८॥
तदलाभे विधिं निन्दन् **मङ्खः** स्वामिनमन्वगात् । कमपि **ब्राह्मण**ग्रामं जगाम च जगद्गुरुः ॥६२९॥
द्वौ विभागाधिपौ **नन्दोपन्दौ** तत्र सोदरौ । नन्दस्य पाटके स्वामी प्रविष्टः षष्ठपारणे ॥६३०॥
दधिकूरकरम्भेण प्रभुर्नन्देन पारितः । अकारि तद्गृहे देवैः पञ्चदिव्यमहोत्सवः ॥६३१॥

---

टि. 1. सद्वल्भा-सुभोजनम् इत्यर्थः । 2. दिनस्यान्तं यावत् । 3. उखा स्त्री० 'रांधवानुं पात्र' 'हांडली' 'तपेली' इति भाषायाम् श० र० म० भा० १ पृ० ३७१ ।

**उपनन्द**गृहं **मङ्खो**ऽविक्षद्भिक्षार्थमुत्सुकः । **उपनन्दं** निनिन्दाऽयमुषिते ढौकितेऽन्धसि[1] ॥६३२॥
उपनन्दाज्ञया दासी न्यासीचक्रेऽस्य मूर्द्धनि । तं कूरं क्रूरधीः सोऽपि क्रोधान्धो भिक्षुरभ्यधात् ॥६३३॥
मद्गुरोः सद्गुरोः किञ्चित् तपस्तेजोऽस्ति वा यदि । तेनेदं दह्यतां गेहं ज्वलन्मत्स्वान्तशान्तये ॥६३४॥
मा वन्ध्योऽस्यापि शापो भूत्स्वामिनामग्रहादिति । अधाक्षुर्मङ्क्षु तद्धाम तत्प्रदेशचराः सुराः ॥६३५॥
अथ द्विमासक्षपणद्वितयस्य प्रतिज्ञया । चकार पुरि **चम्पायां** तृतीयां प्रावृषं प्रभुः ॥६३६॥
कायोत्सर्गेण तैस्तैश्चासनैरुत्कटिकादिभिः । स्थिरः प्रभाभृन्नाथोऽभान्नानारीतिस्थसिद्धवत्[2] ॥६३७॥
द्वितीयं पारणं पूर्या बहिः कृत्वा गतः प्रभुः । **मङ्खेन** सह **कोल्लाके** स्थितः शून्ये गृहे निशि ॥६३८॥
**विद्युन्मत्या** समं दास्या रन्तुं ग्रामेशजस्तदा । **सिंह**स्तद्गृहमागत्य कोऽप्यस्तीहेत्यभाषत ॥६३९॥
तदा प्रतिमया तिष्ठन् न मौनममुचत्प्रभुः । द्वास्थितोऽदित **मङ्खो**ऽपि नोत्तरं कपटोत्तरः ॥६४०॥
चित्रं तत्र विलस्याथ निर्याति मिथुने चिरात् । **विद्युन्मतीं** मन्दमति**गोशालः** पाणिनाऽस्पृशत् ॥६४१॥
स्वामिन् परस्पर्श कोपीह मामित्युक्ते तयोच्चकैः । तं सिंहः कुपितो धृत्वा चिरमुत्कुट्य यातवान् ॥६४२॥
ऊचेऽथ नाथं **गोशालो** हतोऽहं पश्यतोऽपि ते । **सिद्धार्थः** स्माह दुःशील ! सर्वमेतत् तवाल्पकम् ॥६४३॥
[१]**पत्रपाले** प्रभुर्ग्रामे प्राग्वत् शून्यगृहे निशि । द्वितीयेऽह्नि स्थितस्तत्र **मङ्खः** कोणेऽविशद् भयात् ॥६४४॥
एत्य **दन्तिलया** दास्या **स्कन्दो**ऽत्र ग्रामणीसुतः । उक्त्वा सिंह इवानाप्योत्तरं रेमे रसोत्तरम् ॥६४५॥
स्कन्देऽथ याति गोशालोऽहसदुच्चैस्ततः क्रुधा । छन्नोऽपश्यस्त्वमित्युक्त्वा तं संकुट्य च सोऽगमत् ॥६४६॥
शिष्योऽभ्यधात् प्रभुं किं मां कुट्यमानमुपेक्षसे । सिद्धार्थः स्माह किं वध्यो मुखदोषान्न तित्तिरिः ? ॥६४७॥
**चम्पकरमणीया**ख्यं **कुमारग्राम**भूषणम् । अथोद्यानं श्रितो विश्वपतिः प्रतिमया स्थितः ॥६४८॥
ऋद्धः **कूपनय**स्तत्र कुलालोऽभूत् सुराप्रियः । तच्छालायां स्थितः **पार्श्व**शिष्यः शिष्यवृतस्तदा ॥६४९॥
स सूरि**र्मुनिचन्द्रा**ख्यः स्वं शिष्यं **वर्द्धना**ह्वयम् । गच्छे न्यस्य जिनकल्पप्रतिकर्मण्यभूद्रतः ॥६५०॥
इतश्च नाथं मध्याह्ने भिक्षायै शठ आह्वयत् । **सिद्धार्थो**ऽभ्यदधादद्योपोषिता वयमास्महे ॥६५१॥
भिक्षार्थमथ गोशालो ग्रामेऽगाच्चित्रचीवरान् । पार्श्वशिष्यानिहालोक्य के यूयमिति सोऽब्रवीत् ॥६५२॥
श्रीपार्श्वस्य वयं शिष्या निर्ग्रन्थास्तैरितीरिते । स ऊचे वस्त्रपात्रादिभृतां निर्ग्रन्थता क्व वः ॥६५३॥
स्वस्मिन् देहेऽपि निस्नेहो वस्त्रादिग्रन्थवर्जितः । मम धर्मगुरुर्यादृग् निर्ग्रन्थस्तादृगुच्यते ॥६५४॥
अजानन्तो जिनं तेऽपि जगुर्यादृग् भवान् किल । आत्तलिङ्गः स्वयं तादृग् धर्माचार्योऽपि ते किमु ? ॥६५५॥
स क्रुधोचे तपस्तेजो मद्गुरोर्यदि तेन वः । दह्यतामाश्रयो नेदं स्यात्त्वद्वाचेति तेऽवदन् ॥६५६॥
एत्य **मङ्खो** विलक्षोऽथ प्रभुमूचे मयाऽऽश्रयः । त्वन्निन्दिनां दह्यतामित्युक्ते न किमदह्यत ॥६५७॥

---

१. पात्रपाले-P । टि. 1. अन्धस्-अन्नं, तस्मिन् । 2. विविधया रीत्या स्थिताः सिद्धवत् इत्यर्थः ।

**सिद्धार्थो**ऽपि जगौ **पार्श्व**शिष्यास्ते तदुपाश्रयः । न पविः पावकेनेव दह्यते त्वादृशां गिरा ॥६५८॥
वीक्ष्य नक्तं वियद्दीप्तं **गोशालो**ऽथाभ्यधात् प्रभुम् । दह्यते मम शापेनाश्रयस्त्वन्निन्दिनामयम् ॥६५९॥
इत्थमूचे च **सिद्धार्थ** इह प्रतिमया स्थिताः । उपाश्रयाद्बहिर्भूय **मुनिचन्द्रा**ख्यसूरयः ॥६६०॥
मत्तः [1]**कूपनयो** वीक्ष्य कुलालस्तस्करभ्रमात् । तानग्रहीद् गले गाढं ते विपद्य दिवं ययुः ॥६६१॥ युग्मम् ॥
तत्तनौ तन्वतां मूढ ! महिमानमिहाद्भुतम् । पश्यसि द्युसदां देहद्युतीर्नेदं प्रदीपनम् ॥६६२॥
तत्कौतुकादगात् तत्र **गोशालो**ऽन्तर्दधुः सुराः । सोऽपश्यत् पुष्पगन्धाम्बुवृष्टिस्पृष्टं मृतं मुनिम् ॥६६३॥
तच्छिष्यानाश्रये सुप्तान् स गत्वेत्युच्चकैर्जगौ । भो ! भुक्तशायिनो ! मुण्डा ! जानीथ न मृतं गुरुम् ॥६६४॥
पिशाचस्येव कस्येयमुक्तिरित्युत्थिताश्च ते । दृष्ट्वाचार्यं तथात्मानमनिन्दन् मान्द्यमन्दिरम् ॥६६५॥
**चोराक**सन्निवेशेऽथ गत्वा प्रतिमया स्थितः । इतस्ततः परिभ्राम्यद्**गोशाला**नुसृतः प्रभुः ॥६६६॥
[2]भाषितानुत्तरस्तत्र प्रतिचक्रभयाकुले । अधारि हेरिकधियाऽऽरक्षैः स्वामी समङ्खकः ॥६६७॥
उदञ्च्यमानकर्म्माणं स्वं जानन् कूपके प्रभुः । घटीवत् कारितो बद्ध्वा न्यञ्चनोदञ्चनानि तैः ॥६६८॥
**सोमा-जयन्तिके पार्श्व**शिष्ये **उत्पल**सोदरे । साध्वीवर्यौ परिव्राजौ ग्रामभाजौ जनात् तदा ॥६६९॥
[१]तादृग्नृक्लेशमाकर्ण्य किन्नु ? स्याच्चरमो जिनः । इत्याऽऽगत्याऽशु वीक्ष्येशं रक्षकानिदमूचतुः ॥६७०॥ युग्मम् ॥
मूढा ! न किमिमं [२]वित्थ **सिद्धार्थ**नृपनन्दनम् । श्रुत्वेति ते भयान्मुक्त्वा नत्वा चाक्षमयन् प्रभुम् ॥६७१॥
स्थितोऽथ प्रावृषं तुर्यां **पृष्ठचम्पा**गतः प्रभुः । नानात्मप्रतिमाधारी चतुर्मासोपवासभृत् ॥६७२॥
चतुर्मासीमतीत्येह बहिः कृत्वा च पारणम् । नगरं जगतां स्वामी जगाम कृतमङ्गलम् ॥६७३॥
**दरिद्रस्थविरा**ख्यानां सारम्भाणां कुटुम्बिनाम् । पाखण्डिनां पाटके तत्कुलदेवकुलं गतः ॥६७४॥
स्थितः प्रतिमया स्वामी नक्तं पाखण्डिभिश्च तैः । चक्रे देवकुले तत्र मदमत्तैर्महोत्सवः ॥६७५॥
तान्वीक्ष्योच्चैर्जगौ **मङ्खः** केऽमी पाखण्डिनो बत । कलत्रपुत्रिणः पानमत्ता नृत्तादिकारिणः ॥६७६॥
श्रुत्वेति तैर्गले धृत्वा क्षिप्तोऽसावाश्रयाद् बहिः । [3]कालं प्रति प्रकोपीव शीतार्त्तोऽवादयद् रदान् ॥६७७॥
तैर्मध्यं दयया नीतः कृष्टोऽसौ विब्रुवन् पुनः । इति त्रिवारं तस्याऽभूदेहिरेयाहिरा क्रिया ॥६७८॥
विब्रुवाणे पुनस्तस्मिन् क्रुद्धान् वृद्धा जगुर्जनान् । देवार्यस्य तपो[३]राशेः शिष्योयमिति सह्यताम् ॥६७९॥
अक्षमाः श्रोतुमस्योक्तिं वाद्यं वादयतोच्च[4]कैः । तथेतिकारिणस्तेऽथ शर्वरीं निरवाहयन् ॥६८०॥
स्वामी गतोऽथ **श्रावस्तीं** कायोत्सर्गी बहिः स्थितः । मध्याह्नेऽभाषि भिक्षायै गन्तुं **मङ्खलिसूनु**ना ॥६८१॥
सिद्धार्थोऽवददस्माभिः प्रत्याचख्येऽद्य भोजनम् । **मङ्खः** पप्रच्छ किं भावी भोज्यं मेऽद्य निवेद्यताम् ॥६८२॥

---

१. तादृग्भृक्लेश B, L । २. वेत्थ - C, L, P, A । ३. राशेरस्यायमिति - C, A, B ।

टि. 1. 'कूपनयः' इति कुलालस्य नाम । 2. भाषितोऽपि य उत्तरं न ददाति इति भाषितानुत्तरः स्वामिनः विशेषणम् । 3. कालः-शीतकालः तं प्रति । 4. इत्यस्य 'वृद्धा जगुः' इत्यनेन पुनः अन्वयः कार्यः ।

नृमांसभोजने ख्याते **सिद्धार्थेन** जगाम सः । न यत्र मांसगन्धोऽपि भोज्यं तत्रेति निश्चयात् ॥६८३॥
इतश्चापि **नृदत्तस्य श्रावस्त्यां** गृहिणः प्रिया । **श्रीभद्रा** निन्दुरपृच्छन्नैमित्तं **शिवदत्तकम्** ॥६८४॥
जीवेत् कथं ममापत्यमित्याकर्ण्याथ सोऽब्रवीत् । शिशुं जातमृतं पिष्ट्वा सर्वाङ्गं पायसं सृजेः ॥६८५॥
तदुद्धूलितपादाय [1]समध्वाज्यं सुभिक्षवे । भोज्यं देयास्ततोऽपत्यं जीविताऽवश्यमेव ते ॥६८६॥
भिक्षौ भुक्त्वा गते तस्मिन् द्वारं कार्यं गृहेऽन्यतः । स ज्ञातभोज्यवृत्तान्तः क्रुद्धो धक्ष्यति वा जवात् ॥६८७॥
**श्रीभद्रया**ऽथ [2]भद्रायाः सूनुः सद्म तदागतः । भक्त्या मृता[3]त्मभूकायपायसेन स भोजितः ॥६८८॥
भुक्त्वा गतः प्रभूपान्ते भ्रान्तोऽसीति जगाद सः । **सिद्धार्थो**ऽपि तथाजातमाख्यन्**मङ्खा**य पायसम् ॥६८९॥
तदुद्वम्याङ्गुलिक्षेपान्नखादिलववीक्षणात् । क्रुद्धो गतः स नाऽबोधि द्वारान्यत्वेन तद्गृहम् ॥६९०॥
अथाह **मङ्खो** यद्यस्ति तपस्तेजश्च मद्गुरोः । तज्ज्वलत्वेष देशोऽथ तज्जैना व्यन्तरा व्यधुः ॥६९१॥
गत्वा **हरिद्रुकग्रामे हरिद्रु**द्रुतले ततः । स्वामी प्रतिमया तस्थौ तपोहुतभुजः [4]शमी ॥६९२॥
तत्र नक्तं स्थितेनाग्निः सार्थेन हिमभीरुणा । प्रज्वालितः प्रमादेन शमितो न [5]यता प्रगे ॥६९३॥
मुखस्थिततृणं क्षोणिलुठनैरेत्य स ज्वलन् । ध्यानाग्निना जित इव प्रभोः पादद्वयेऽलगत् ॥६९४॥ युग्मम् ॥
प्राप्तोऽग्निर्नाथ ! नश्याव इत्युक्त्वा **मङ्खको**ऽनशत् । तोयं कर्माग्नितापेषु मत्वाग्निं तु स्थितः प्रभुः ॥६९५॥
शान्तेऽग्नौ हा कथं तूर्णं शान्तोऽयं कर्मशान्तिकृत् । इति दुःखादिव श्यामौ किञ्चिज्जातौ प्रभोः क्रमौ ॥६९६॥
गत्वाथ **लाङ्गलग्रामे** तस्थौ नाथो**ऽच्युतौ**कसि । **गोशालो** बालकांस्तत्राऽभीषयद् विकृताकृतिः ॥६९७॥
एत्य तत्पितृभिः क्रुद्धैस्ततोऽकुट्टि स कूटधीः । देवार्यस्यास्य दासोऽयमिति वृद्धैश्च मोचितः ॥६९८॥
स्वत्राणार्थमुपालब्धे नाथे तेनाऽथ नाथगः । **सिद्धार्थः** स्माह दौष्ट्येऽस्मिन् जीवसीति न सुष्ठु किम् ॥६९९॥
गत्वाऽथ प्रभु**रावर्त्तग्रामे रामौ**कसि स्थितः । तत्राप्यभापयड्डिम्भान् भद्रासूनुरभद्रकः ॥७००॥
कुपिताः पितरस्तेषामेत्योत्कुट्य च तं गताः । पुनः सोऽभापयड्डिम्भान् **प्रकृतिः खलु दुस्त्यजा** ॥७०१॥
पुनस्तत् पितरोऽभ्येत्य चण्डा दण्डायुधाः क्रुधा । दण्ड्यो भृत्यागसि स्वामीत्यधावन्त प्रभुं प्रति ॥७०२॥
तान् राममूर्त्तिरुत्सीरमुशला मूर्त्तरामवत् । तत्रस्थाऽऽर्हतयक्षाधिष्ठिता हन्तुमथोत्थिता ॥७०३॥
भयविस्मयसंपातकातरस्मेरमानसैः । नत्वा स्वामी तदामीभिर्ग्रामीणैः क्षमितो मुहुः ॥७०४॥
ततो विहृत्य **चोराकग्रामे** प्रतिमया स्थितः । **मङ्खेना**ऽभाषि भिक्षायै गन्तुमन्तस्तदा जिनः ॥७०५॥
**सिद्धार्थे**नेदमाचख्ये प्रत्याचख्येऽद्य भोजनम् । ततो गतोऽथ क्षुधितो ग्रामं गोशालको रयात् ॥७०६॥
क्वाऽप्यन्ने राध्यमानेऽसौ भिक्षाकालप्रतीक्षया । बहिःस्थो [6]हेरयंश्चौरधिया ग्राम्यैरकुट्यत ॥७०७॥

---

टि. 1. स=सह मधु आज्यं इति सन्धिविच्छेदः । 2. भद्रायाः सूनुः-गोशालः । 3. ०आत्मभूकायः-स्वापत्यशरीरम् तेन मिश्रितं पायसं तेन । 4. शमी-वृक्षविशेषः, यस्मिन् हुतभुक्=अग्निरुत्पद्यते । 5. 'इ'धातोः वर्त० कृदन्त-तृ० एकवचनम् सार्थस्य विशेषणम् । 6. हेरयन् = इतस्ततो निरीक्षमाण इत्यर्थे देश्योऽयम् 'हेर' धातोः वर्तमानकृदन्तप्रयोगः । सम्पा० ।

तपोऽस्ति मद्गुरोश्चेत्तज्ज्वलत्वेतज्जनाश्रयः । इति शप्तेऽमुना जैनैर्दग्धस्तन्मण्डपोऽमरैः ॥७०८॥
व्रजन् **कलम्बुग्रामे**ऽथ नाथः कोऽसीति भाषितः । सेनान्या पथि चौरानुधाविना **कालहस्तिना** ॥७०९॥
मुनिं मौनेन शाठ्येन **मङ्खं** चानुदितोत्तरौ । स ज्येष्ठबन्धोर्**मेघस्य** बद्ध्वा चौरधियार्पयत् ॥७१०॥
**मेघः कलम्बुक**ग्रामपतिः **सिद्धार्थ**सेवकः । उपलक्ष्य प्रभुं नत्वा क्षमयित्वा च मुक्तवान् ॥७११॥
कर्मरोगमहावैद्यैः पूरितं क्रूरपुरुषैः । अथाऽनार्यं ययौ देशमत्यर्थक्लेशधीः प्रभुः ॥७१२॥
ताडितो मुण्ड इत्येकैः स्पश इत्यपरैर्धृतः । प्रबद्धश्चौर इत्यन्यै राढादेशचरैर्गुरुः ॥७१३॥
दध्ना लिप्त्वा प्रभुं केऽपि कौतुकेन शुनोऽमुचन् । प्रकोप्य मत्तवृषभान् केऽप्यन्तः प्रभुमक्षिपन् ॥७१४॥
या याः किलार्यदेशस्य चण्डालैरपि दुष्कराः । तास्ता विडम्बनाश्चक्रुः प्रभौ तद्विषयोत्तराः ॥७१५॥
तान् पुंसः स्वभवच्छेदहेतून् पीडाकृतः स्तुवन् । स्वं तेषां भवहेतुं च निन्दन् सेहे विभुर्व्यथाः ॥७१६॥
गेहे गेहे व्रजन् सेहे देहेन विविधा व्यथाः । जनेन जनिता **मङ्खो**ऽप्यलर्क्क[1] इव कर्कशाः ॥७१७॥
तद्देशपुरुषक्रौर्यच्छिन्नोच्चैःकर्मबन्धनः । स्वैरी करीव प्राचालीदार्यदेशं प्रति प्रभुः ॥७१८॥
द्वौ **पूर्णकलश**ग्रामोपान्ते दुःशकुनभ्रमात् । लाढायां तौ प्रभुं चौरौ प्रेक्ष्याग्रे हन्तुमुद्यतौ ॥७१९॥
नाथोऽद्य कथमस्तीति[2]र्ध्यान[१]स्ता[3]वुदसी तदा । प्रेक्ष्याधिपाय धावन्तौ वज्रेण प्राहरद्धरिः ॥७२०॥
गत्वाऽथ **भद्रिलपुरे** पञ्चम्यां प्रावृषि प्रभुः । चतुर्मासीमुपावासी(त्सी)द् विविधप्रतिमास्थितिः ॥७२१॥
संसारतारणः क्वापि बहिर्विहितपारणः । ग्रामं क्रमेण **कदलीसमागम**मथाऽऽगमत् ॥७२२॥
विलोक्याऽऽस्तारिकाभक्तं दीयमानमिहार्थिनाम् । भोजनाय जिनाधीशं गोशालस्तूर्णमाह्वयत् ॥७२३॥
सिद्धार्थोऽभ्यधितास्माभिरद्योपावासि वासरम् । अथैकोऽपि स गत्वा द्रागभुङ्क्तातिबुभुक्षितः ॥७२४॥
पिशाचमिव भुञ्जानमतृप्यन्तं निरूप्य तम् । मुहुर्ग्राम्याः समग्रान्नपरिवेषैरतोषयन् ॥७२५॥
संतृप्तेनामुना भोक्तुमशक्तेनाऽन्नपूरितम् । त्यक्तं पात्रं तदस्यैव मूर्ध्नि ग्राम्याः क्रुधा न्यधुः ॥७२६॥
**जम्बूखण्डमथ** ग्रामं गते नाथे पुरेव सः । आस्तारिकान्नदानेषु लेभे [4]भोजनभर्त्सने ॥७२७॥
क्रमाद् गत्वाथ **तत्त्वाकग्रामं** कामविरामकृत् । बहिः प्रतिमया तस्थौ **मङ्खो** भिक्षाकृते गतः ॥७२८॥
**मुनिचन्द्र**वदारब्धक्रियान् श्री**पार्श्व**दीक्षितान् । निरीक्ष्य **नन्दिषेणा**ख्यसूरीनुच्चैर्जहास सः ॥७२९॥
चतुष्के प्रतिमाभाजो **नन्दिषेण**महर्षयः । नक्तं चौरधिया [5]पौररक्षानिघ्नेन जघ्निरे ॥७३०॥
तेषामलोलध्यानानां द्यां गतानां सुरैः कृतम् । [6]महिं प्रेक्ष्य स **मङ्खु**स्तच्छिष्यान् गत्वा व्यभर्त्सयत् ॥७३१॥
**समङ्खुः कूपिकाग्राम**गामी स्वामी धृतस्ततः । कदर्थितस्तदारक्षैरदक्षैः स्पशशङ्कया ॥७३२॥

१. ध्यातस्ता....A, K ।

टि. 1. अलर्कः=मत्तश्वानः । 2. इति ध्यानं अस्य इतिध्यानः हरेर्विशेषणम् । 3. ऊर्ध्वीकृतः असिः याभ्यां तौ उदसी इति समासविग्रहः कार्यः । 4. भोजनञ्च भर्त्सना च इति विग्रहः । 5. पौरजनस्य रक्षायै निर्योजितेन इत्यर्थः । 6. महिः (स्त्री)–महिमा ।

साधुचर्यौ परिव्राजौ शिष्ये **पार्श्व**जिनेशितुः । **प्रगल्भाविजये** नाम तदा तद्ग्रामधामगे ॥७३३॥
युवार्यमूर्त्तिर्देवार्यः क्लेश्यमानोऽस्त्यदस्त्वमू । श्रुत्वा जनाज्जिनो **वीरः** स्यात् त्विति द्रुतमागते ॥७३४॥
नाथं मत्वा च नत्वा च पूरक्षानिदमूचतुः । रे नामुं वित्थ **सिद्धार्थ**सुतं **वीरं** सुरस्तुतम् ॥७३५॥
इत्याकर्ण्य भयाकीर्णास्ते नत्वाऽक्षमयन् प्रभुम् । विज्ञाय वज्री वज्रेण माऽस्मान् भस्मीकरोत्विति ॥७३६॥
**वैशालीं** प्रत्यचालीच्च नाथः पथि पथान्तरम् । प्रेक्ष्याह **मङ्खो** याम्यस्मिन् पथि नैमि त्वया समम् ॥७३७॥
कुट्यमानं न मां पासि कुट्ये त्वत्कुट्टकैरपि । त्वां च मे सेवितुः कष्टाद् भोज्यं भवति वा न वा ॥७३८॥
मयि सेवाकलादक्षे [१]स्वविपक्षे च तुल्यधीः । इति त्वामविशेषज्ञं मूढोऽहमिव कः श्रयेत् ॥७३९॥
सेवा देवार्य ! पूर्वं ते या कृता तां स्मरिष्यसि । नातः परं करिष्यामि गमिष्यामि पथाऽमुना ॥७४०॥
अथाभ्यधित **सिद्धार्थः** स्वचित्तरुचितं कुरु । **वज्रलेपमयी चेयं शैली** नः केन लुप्यते ॥७४१॥
ययौ सिंह इवाथैको **वैशाली**वर्त्मना विभुः । यूथभ्रष्ट इव क्रोष्टा **मङ्खो राजगृहा**ध्वना ॥७४२॥
परमाधार्मिकैर्भीमं भवीव नरकं [२]ततः । गोशालः प्राविशत् पञ्चशतचौरैर्वृतं वनम् ॥७४३॥
नग्नोऽपि निष्फलो मा भूदिति चौराः पृथक् पृथक् । मातुलोक्त्यैनमाहूयाऽऽरुह्य चाऽवाहयन् मुदे ॥७४४॥
तत्कुतूहलनिर्विण्णैस्तैर्मुक्तोऽन्यत्रगामिभिः । महावाहनया श्वासशेष एष व्यचिन्तयत् ॥७४५॥
प्रथमा स्वामिहीनस्य दीनस्येयं विपन्मम । अल्पीकृतमृतिर्मातृवियुक्तस्य शिशोरिव ॥७४६॥
तत्र प्रभुप्रभावो वा शक्राद्यो वा सुरव्रजः । उन्मूलयत्यापदं मे लतां दन्तीव लीलया ॥७४७॥
[1]कल्पद्रुः स्नुहिवच्चिन्तामणिः कर्करवन्मया । पशुवत् कामधेनुर्धिग् जनवन्मुमुचे गुरुः ॥७४८॥
योगीव परमात्मानं पश्यन् द्रक्ष्यामि चेत् प्रभुम् । तल्लयं तन्न मोक्ष्यामि कण्ठस्थेऽपि हि जीविते ॥७४९॥
इति ध्यात्वा प्रभुप्रेक्षामतिर्बभ्राम स क्षितिम् । श्रेयसां जङ्गमः [३]शैलो **वैशालीं** चागमत् प्रभुः ॥७५०॥
स्थितः कर्मारशालायां तत्रेशस्तदनुज्ञया । षण्मासरोगी [2]कल्यः संस्तत्राऽगात् कोऽपि कर्मकृत् ॥७५१॥
प्रभुं संप्रेक्ष्य दुष्कर्मा कर्म्मारः कोपकर्मठः । पाखण्ड्यशकुनायेति घनमुत्पाट्य धावितः ॥७५२॥
क्व स्वामीति तदा दत्तावधिर्विभुवधोत्सुकम् । हरिर्घनेन तेनैव तं कर्म्मारममारयत् ॥७५३॥
गत्वा **बिभीलकोद्यानं ग्रामाके**ऽथ निवेशने । **बिभीलकस्य** यक्षस्य धाम्नीशः प्रतिमां स्थितः ॥७५४॥
प्रभुं प्राक्तनसम्यक्त्वदक्षो यक्षो **बिभीलकः** । दिव्यैरपूजयद् द्रव्यैरात्मानं सुकृतैरिव ॥७५५॥
गत्वाथ **शालिशीर्षाह्व**ग्रामारामभुवं विभुः । हिमोर्मिनिर्मितश्लाघे माघे प्रतिमया स्थितः ॥७५६॥
भार्या **विजयवत्याख्या** त्रिपृष्ठत्वे प्रभोरभूत् । अतादृगुपचाराप्तितप्तैवेयं व्यपद्यत ॥७५७॥

---

१. त्वं C, L । २. गतः- K । ३. शालो० C, L, P ।

टि. 1. यथा स्नुहिबुद्ध्या कल्पद्रुः मुमुचे, कर्करबुद्ध्या चिन्तामणिः मुमुचे, पशुबुद्ध्या कामधेनुः, (तद्वद्) सामान्यजनबुद्ध्या गुरुः मया मुमुचे । इत्यर्थः । स्नुहिः(स्त्री) 'थोर'वृक्षः इति भाषायाम् । 2. कल्यः- नीरोगी ।

भ्रान्त्वा भूरीन् भवान्मर्त्यीभूय बालं तपोऽकरोत् । मृत्वेयं व्यन्तरी जज्ञे वनेऽस्मिन् **कटपूतना** ॥७५८॥
तदासौ तापसीभूय पापशीला हिमैर्जलैः । स्वं सिक्त्वा पूर्ववैरेण श्री**वीर**स्योपरि स्थिता ॥७५९॥
विकृत्य वायुं सा कायं [1]शललीवाऽधुनोद् घनम् । पत्युः पेतुस्तनौ तीव्राः शलवज्जलबिन्दवः ॥७६०॥
मरुत्प्रदीप्तध्यानाग्निर्जलशाम्यद्भवानलः । सेहे स्वाम्युपसर्गं तं सामान्यस्यासुनाशनम् ॥७६१॥
श्रुताख्यमवधिश्चास्य [2]सर्वलोकावलोकनम् । प्रभोस्तत्सहनाज्जज्ञे ज्ञानं पूर्वभवाधिकम् ॥७६२॥
शान्ता निशान्तावसरे सापि [3]सानुशया स्वयम् । तिरोभूद् व्यन्तरी भक्तिप्राग्भाराभ्यर्चितप्रभुः ॥७६३॥
गत्वाऽथ **भद्रिका**पुर्यां विविधाभिग्रही प्रभुः । चकार प्रावृषं षष्ठीमनेकप्रतिमागतिः ॥७६४॥
षष्ठात्तत्राऽमिलन्मासाद् गोशालोऽस्थाच्च पूर्ववत् । अर्हन्निह बहिश्चक्रे चतुर्मास्यन्तपारणम् ॥७६५॥
मासान्निरुपसर्गोऽष्टौ विहृत्य **मगधक्षितौ** । प्रभु**रालभिकापुर्यां** सप्तमीं प्रावृषं स्थितः ॥७६६॥
पारयित्वा बहिस्तत्र **कुण्डाकं** सन्निवेशनम् । गत्वा प्रतिमया तस्थौ **विष्णो**रायतने विभुः ॥७६७॥
तत्र स्थितोऽग्रतोऽवज्ञां तन्वन् **गोशालको** हरेः । ग्रामटैः कुट्टितोऽमोचि वृद्धैर्ग्रहिल इत्ययम् ॥७६८॥
गत्वाऽथ **मर्दन**ग्रामं **राम**धाम्नि प्रभुः स्थितः । ग्राम्यैः प्राग्वत् कुचेष्टाकृद् **गोशालो**ऽत्रापि तापितः ॥७६९॥
**बहुशालं** प्रभौ ग्रामं गते **शालवन**स्थिते । उपसर्गान् निसर्गोग्रान् **शालार्या** व्यन्तरी व्यधात् ॥७७०॥
व्यन्तर्या श्रान्तिमत्याऽथ नाथः **शालार्यया**ऽर्चितः । **जितशत्रु**नृपत्रातं यातो **लोहार्गलं** पुरम् ॥७७१॥
पुरे परभयव्यग्रे प्रभुः [१]प्रश्नेष्वनुत्तरः । **जितशत्रो**श्चरैस्तत्रोपाढौकि स्पशशङ्कया ॥७७२॥
तत्रेयुषा**ऽस्थिक**ग्रामा**दुत्पले**नाऽर्चितः प्रभुः । ततो विज्ञाय राज्ञाऽपि पूजितो **जितशत्रु**णा ॥७७३॥
पुरे **पुरिमताला**ख्ये गत्वाऽथ प्रतिमां श्रितम् । आगत्याऽनमदी[4]शानमीशानसुरनायकः ॥७७४॥
**उण्णाक**सन्निवेशेऽथ गच्छतः सन्मुखौ विभोः । सद्योविवाहौ सर्वाङ्गविरूपौ दम्पती इतौ ॥७७५॥
उद्घोष्योद्घोष्य वैरूप्यं साट्टहासस्तयोः पुरः । मयूरबन्धैराबद्धो **मङ्खु**स्तत्पुरुषै रुषा ॥७७६॥
**गोशालः** स्माह मां बद्धं कृपाब्धे ! किमुपेक्षसे । **सिद्धार्थो**ऽभिदधे जातं तव दुश्चरितोचितम् ॥७७७॥
गत्वा नाथोऽप्यदूरेऽस्थात् तत्प्रतीक्षणतत्परः । तपोऽब्धेरयमस्येति **गोशाल**ममुचंश्च ते ॥७७८॥
समं तेन ततः स्वामी गोभूमिमगमत् क्रमात् । **गोशालः** स्माह गोपान् भो ! म्लेच्छा ! मार्गः क्व यात्ययम् ॥७७९॥
तेऽप्यूचुर्नासि नः [5]शालः किमाक्रोशसि भो ! मुधा । स ऊचे किं मयाऽऽक्रुष्टं म्लेच्छत्वं सहजं हि वः ॥७८०॥
क्रुद्धैर्बद्ध्वाऽथ संकुट्ट्य क्षिप्तस्तैर्वेणुगह्वरे । कैरप्यमोचि **गोशालः** कृपाशालिभिरध्वगैः ॥७८१॥

---

१. प्रश्नेष्यनुत्तरः P ।

टि. 1. शलली इति कण्टकाकीर्णपृष्ठः 'साहुडी' इत्याख्यः चतुष्पादः लघुजीवः तस्य पृष्ठकण्टका 'शल' इत्युच्यते । 2. प्रभोः लोकावधिज्ञानं समुत्पेदे इत्यर्थः । 3. पश्चात्तापेन सह वर्त्तते । 4. प्रभुम् । 5. शालः-नृपविशेषः । त्वं शालः न असि, मुधा नः किं आक्रोशसि ? इत्यन्वयः ।

अथ **राजगृहं** गत्वा विविधाऽऽतापनः प्रभुः । अष्टमीं प्रावृषं चक्रे चतुर्मासोपवासकृत् ॥७८२॥
पारयित्वा बहिः स्वामी स**गोशालः** पुनर्ययौ । कर्मनिर्ज्जरणाहेतो**र्वज्रलाढादि**भूमिषु ॥७८३॥
बद्धः कैश्चिदिह स्वामी कर्मबन्धमभि(तु)त्रुटत् । गलहस्तं भवस्याऽदात्कैश्चिच्च गलहस्तितः ॥७८४॥
कुट्टितो यष्टिभिर्कैश्चिदन्तरारीनकुट्टयत् । पातितः कैरपि प्रेर्य पातयामास पातकम् ॥७८५॥
इत्युच्चैरुपसर्गेषु क्रियमाणेषु दुर्नरैः । तप एवाभवत् तप्तं न तु विश्वपतिः स्वयम् ॥७८६॥
पदकम्पितमेरुस्तानुपसर्गकरान् जिनः । अतिमेरूणि कर्माणि घ्नतो मेने स्वतोऽधिकान् ॥७८७॥
तेष्वनार्येषु देशेषु वसतीरप्यनाप्नुवन् । धर्मजागरिकां घर्मशीताद्युग्रां विभुर्व्यधात् ॥७८८॥
शून्यालये द्रुमूले वा स्थितो ध्यानैकधीरधीः । अत्यगात् प्रावृषं तत्र नवमीं [1]भवमीलनः ॥७८९॥
**सिद्धार्थसूनुः सिद्धार्थपुरी**मथ पवित्रयन् । **कूर्मग्रामा**भिधग्रामाभिमुखः प्राचलत् पथि ॥७९०॥
तत्र प्रेक्ष्य तिलस्तम्बमयं निष्पत्स्यते न वा । इति पप्रच्छ **गोशाल**स्त्रिकालज्ञानिनं जिनम् ॥७९१॥
भवितव्यतया [2]नुन्नोऽ[3]नुन्नमौनो विभुः स्वयम् । ऊचे निष्पत्स्यते सोऽयं तिलोऽनन्यफलोदयः ॥७९२॥
पुष्पाणामस्य सप्तानामेषां जीवाश्च सप्त ये । तैरत्रैवैकशिम्बायां तावद्भिर्भविता तिलैः ॥७९३॥
वचस्तदन्यथा कर्तुं **मङ्खो** मूढः [4]प्ररूढधीः । तिलस्तम्बं समुन्मूलं तमुत्खायाऽन्यतोऽ[१]व्रजत् ॥७९४॥
स्वामिवाक्सत्यताहेतोः सृष्टा वृष्टिरिहामरैः । आर्द्रोर्व्यां गोखुराक्रान्तः स तिलोऽभूच्च रोपितः ॥७९५॥
विश्वत्रयहितो **मङ्ख**सहितो महितोऽमरैः । अथ प्राप प्रभुः **कूर्मग्रामं** कामविरामकृत् ॥७९६॥
तदा तत्रोद्ध्र्वदोर्दण्डश्चण्डमण्डलदत्तदृक् । आतापनापरश्चासीत् **वैशङ्कायन**तापसः ॥७९७॥
यूकां [5]शूकाम्बुधिर्भानुतापतः पतितां भुवि । भूयो भूयो क्षिपन् मूर्ध्नि सुकृते सुकृतोद्यमः ॥७९८॥
तमेत्योवाच **गोशाल**स्तत्त्वं किञ्चन वेत्सि भोः ! । तपोऽथ यूकासन्तापि यूकाशय्यातरस्य ते ॥७९९॥
इत्यस्मिन् लपति क्षन्ता स नाऽवोचत किञ्चन । **मङ्खो** मुहुस्तदेवाह शठे शाठ्यौषधं वधः ॥८००॥
क्रुद्धोऽथ तापसस्तेजोलेश्यां **गोशालके**ऽमुचत् । घर्षणोत्कर्षसन्तप्तश्चन्द्रोपल इवानलम् ॥८०१॥
तज्ज्वालाजालवित्रस्तो **गोशालः** प्रभुमश्रयत् । भवाग्नि[6]कीलाभीतानामप्येकः शरणं हि सः ॥८०२॥
तां शीतलेश्यया तेजोलेश्यां गोशाल[२]पालनः । विभुर्बिभेद वृष्ट्येव दवानलततिं घनः ॥८०३॥
इति पश्यंस्तपस्वी स शान्तोऽभ्येत्य प्रभुं जगौ । अयं वो न मया जज्ञेऽपराद्धं क्षम्यतां मम ॥८०४॥
इत्युक्त्वाऽस्मिन् गते स्वामिन् ! स्याल्लेश्या तैजसी कथम् । पृष्टो **गोशालके**नेति विश्वप्रभुरभाषत ॥८०५॥

---

१. मुच...C, L, A, B । २. पालकः-P ।

टि. 1. भवसङ्कोचकः, प्रभोर्विशेषणम् । 2. प्रेरितः । 3. स्वभावेन मौनी । 4. कदाग्रही । 5. शूकाम्बुधिः-दयासागरः । 6. कीला(स्त्री)०अग्निशिखा ।

शान्तः सनखकुल्माषमुष्ट्याम्बुचुलुकेन यः । षण्मासान् पारयेत् षष्ठं तेजोलेश्यां लभेत सः ॥८०६॥
व्रजन् पुरेऽथ **सिद्धार्थपुरे सिद्धार्थ**भूः पथि । **मङ्खे**नोचे भवत्ख्यातो निष्पन्नः स तिलोऽत्र न ॥८०७॥
निष्पन्नोऽयमितोऽस्तीति प्रभोरश्रद्दधद् वचः । शिम्बां विदार्य स प्रेक्ष्य तिलान् सप्त चमत्कृतः ॥८०८॥
**श्रावस्त्या**मथ **गोशालः** कुलालसदनं गतः । तपसा स्वामिदिष्टेन तेजोलेश्यामसाधयत् ॥८०९॥
परीक्षार्थं गतः कूपे दास्याः कुम्भं बभञ्ज सः । आक्रोशन्तीं च तां कोपात् तेजोलेश्यार्चिषाऽदहत् ॥८१०॥
इत्यात्तप्रत्ययः कौतूहलाल्लोकप्रियोऽथ सः । भीतैः कौतुकिभिर्लोकैः पूज्यमानोऽभ्रमद् भुवि ॥८११॥
तस्याष्टाङ्गनिमित्तज्ञा भ्रष्टाः षट् पार्श्वशिष्यकाः । क्वचित्सङ्गतितोऽष्टाङ्गनिमित्तज्ञानमादिशन् ॥८१२॥
अथाष्टाङ्गनिमित्तज्ञस्तेजोलेश्यातिदुस्सहः । जने जिनोऽहमस्मीति व्याहरन् व्यहरद् धराम् ॥८१३॥
**वैशालीमथ सिद्धार्थ**पुरान्नाथोऽपि जग्मिवान् । आनर्च्च गणराजोऽत्र **शङ्खः** पितृसुहृत् प्रभुम् ॥८१४॥
अथाऽतो विहरंस्तीर्णो नावा **मण्डपिकां** नदीम् । आतराय धृतो वीरस्तीरे संतप्तवालुके ॥८१५॥
चरणोत्पिष्टनिःशेषशाम्यद्द्रवदवानलः । जिनः पुलिनतापेऽत्र स्थितः स्थिरतरक्रमः ॥८१६॥
नौसैन्यैः कार्यतः **शङ्ख**गणराजस्वसुः सुतः । **चित्र**स्तत्रागतोऽनिन्दन्नाविकान् प्रभुमार्चयत् ॥८१७॥
विमुक्तस्तैरथ स्वामी ग्रामं **वाणिजकं** गतः । बहिः प्रतिमया सीममहास्तम्भ इव स्थितः ॥८१८॥
**आनन्द**श्रावकस्तत्र नित्यषष्ठतपोनिधिः । जातावधिर्विभुं नत्वा जजल्प जनिताञ्जलिः ॥८१९॥
वज्रसारमये स्वामिन् ! किं तनुश्च मनश्च ते । परीषहोप[१]सर्गौघैरैर्भिबिभिदतुर्न यत् ॥८२०॥
हृद्यमन्दो ममानन्दस्तवासीदति केवले । पारावारस्य पारीणे स्वामिनीवाऽनुजीविनः ॥८२१॥
इत्युदित्वाऽथ वन्दित्वा श्रावकेऽस्मिन् गते विभुः । **श्रावस्ती**मेत्य दशमीं शमीन्द्रः प्रावृषं व्यधात् ॥८२२॥
पारयित्वा बहिरिह ग्रामेऽगात् **सानुयष्टिके** । प्रतिमां प्रतिपेदेऽत्र **भद्रां** त्रिभुवनप्रभुः ॥८२३॥
अहोरात्रद्वयं तस्थावेकपुद्गलदत्तदृक् । प्रभुः प्राग्दक्षिणाप्रत्यगुत्तराऽभिमुखः क्रमात् ॥८२४॥
षष्ठेन प्रतिमामेवं स्थित्वा भद्रामपारणः । दशमेन **महाभद्रां** प्रतिमामभजत् प्रभुः ॥८२५॥
स्थित्वा चतुरहोरात्रीं तत्र पूर्वादिदिक्क्रमात् । **सर्वतोभद्रया**ऽऽथास्थाद् द्वाविंशतितमेन सः ॥८२६॥
अहोरात्राणि तत्राऽस्थाद् दशदिक्षु दशस्वपि । प्रभुरैक्षिष्ट तूर्ध्वाऽधो द्रव्याण्यूर्ध्वाध आशयोः ॥८२७॥
इति तिस्रोऽपि निर्माय प्रतिमाः पारणोन्मुखः । अविशद् विभुरानन्दाभिधस्य गृहिणो गृहम् ॥८२८॥
तदा च **बहुली**चेटी क्षालयन्ती [1]चरूच्चयम् । त्यक्तुकामोषितं धान्यं धन्याऽग्रे प्रभुमैक्षत ॥८२९॥
किमिदं कल्पते तुभ्यमिति पप्रच्छ सा प्रभुम् । ईशः प्रासीसरत् पाणिं दासी भक्त्या च तद् ददौ ॥८३०॥

---

१. पसर्गाद्यैरैभि....C, B, K ।

टि. 1. चरुः(पुं)-भाण्डविशेषः तेषां उच्चयः समूहः ।

तद्वेश्मनि द्युवेश्मानः पञ्च दिव्यानि चक्रिरे । दासी चाऽमोचि सा दास्याद् भवास्यादिव भूभुजा ॥८३१॥
संसारतारणः कर्मदारणः कृतपारणः । ततः स्वेच्छाङ्कितम्लेच्छां **दृढभूमिं** ययौ प्रभुः ॥८३२॥
अन्तः**पेढालकोद्यानं पेढालग्राम**सन्निधौ । **पोलाश**माविशच्चैत्यं तत्र स्वामी कृताष्टमः ॥८३३॥
अधिष्ठाय शिलापीठमिह निर्जन्तुसन्ततिः । स्थिरहृत् निर्निमेषाक्षो रूक्षद्रव्यैकवीक्षणः ॥८३४॥
प्रभुः प्रतिमया तस्थौ क्रष्टुं नरकतो नरान् । हस्तावलम्बनायेव लम्बमानप्रलम्बदोः ॥८३५॥ युग्मम् ॥
पुरुहूतस्तथाभूतमभिभूतभवं विभुम् । दृष्ट्वा हृष्टो लघुत्यक्तपीठो निर्मुक्तपादुकः ॥८३६॥
अभिसृत्योत्तरासङ्गी रुद्धसङ्गीतकादिकः । [१]नुतिं कृत्वा नतिं चक्रे शिरसा पूतभूतलः ॥८३७॥ [युग्मम्]
अथोत्थायोच्चरोमाञ्चसुन्दरश्रीः पुरन्दरः । ऊचे भ्रूचेष्टितै [२]रम्यः सुधर्मावासिनः सुरान् ॥८३८॥
अहो अत्रैकरात्रिक्या महाप्रतिमया स्थितः । दृश्यतां दृश्यतां स्वामी [1]चामीकरगिरिस्थिरः ॥८३९॥
ग्रहादिवातिदोषज्ञो ध्यानादद्यैष सर्ववित् । नाऽलं चालयितुं शक्यः सुरासुरनरोरगैः ॥८४०॥
श्रुत्वेति [2]कोपक्लृप्तभ्रूभङ्गः **सङ्गमका**भिधः । [३]शोणाक्षो कूणयन्[४]नक्रं[3] शक्रसामानिकः सुरः ॥८४१॥
अभव्यो भवपाथोधिमिथ्यात्वाम्बु[4]महातिमिः । व्याजहार महाक्षारोद्[५]गाररूक्षं हसन्मुहुः ॥८४२॥ युग्मम् ॥
भेद्यगात्रं तृणेनापि मर्त्यमात्रं सुरैरपि । ध्यानादचाल्यं दिशतो भाति ते प्रभुताद्भुता ॥८४३॥
देवा कन्दुकयन्त्यद्रीनब्धीन् गोष्पदयन्ति ये । तेषामेष कियान् अस्य ध्यानं विध्यापयाम्यहम् ॥८४४॥
इत्याहत्य करेणोर्वीमौर्वाग्निक्रूरया दृशा । पिबन् सुरौघधैर्याब्धिमास्थानादयमुत्थितः ॥८४५॥ [युग्मम्]
परमं परसाहाय्यात् तपः स्यादर्हतामपि । इति मा भूदिति ध्यात्वा शक्रोऽपि तमुपैक्षत ॥८४६॥
अथैष दुर्मतिर्वेगमारुतोड्डीनतारकः । स्ववैरादिव मोहाद्यैः प्रणुन्नोऽगादभिप्रभुम् ॥८४७॥
मोहादिबालमित्रस्य मोहादिद्रोहिणं प्रभुम् । पश्यतस्तस्य सावेशं विशेषादभवन्मनः ॥८४८॥
[६]प्रभोः स्थगयितुं ध्यानमथाऽसौ सुरपांशनः । ववर्ष पांशुभिः क्रौर्यपांशुकेलिर्महाऽधमः ॥८४९॥
आशिरश्चरणं रेणुसंच्छन्नवपुषि प्रभौ । ध्यानाग्निपुटपाकेनापचत् कर्मचयं रयात् ॥८५०॥
अपनीयाथ तां रेणुं करेणुः [5]पुण्यभूरुहाम् । स्वामिनि व्यकृत क्रूरो वज्रतुण्डाः पिपीलिकाः ॥८५१॥
ततस्तितउवत् ताभिश्छिद्रितेऽङ्गेऽ[७]स्र[6]कैतवात् । ध्यानानलद्रवीभूतः कर्मलेपोऽगलद् गुरोः ॥८५२॥
विचक्रे वक्रहृदयो दंशस्तोमानथामरः । पेतुः प्रभौ शिरामोक्षसूचीतीक्ष्णैर्मुखैरिमे ॥८५३॥
क्षरत्क्षीराभ[7]कीलाल[८]धाराभिर्निश्चलः प्रभुः । कीर्तिकल्लोलिनीशैलः सनिर्झर इवाबभौ ॥८५४॥

---

१. स्तु...A, C, L । २. रन्य... KH, K, D । ३. शोणाख्यो B । ४. नासिकं B सं० । ५. गारो रूक्षं A, D, K । ६. प्रभौ D, KH, । ७. असृक्कै....C, K । ८. धारलि A । धारालिनि K ।

टि. 1. मेरुगिरिः इव स्थिरः । 2. कोपेन रचितः भ्रूभङ्गः येन स । 3. नक्रम् (नपुं) नासिका तम् संकोचयन् इत्यर्थः । 4. महामत्स्यविशेषः । 5. पुण्यवृक्षाणां उन्मूलने करेणुः हस्तीः इत्यर्थः । 6. अस्रं(नपुं)०शोणितम् । ७ कीलालम् (नपुं)०रुधिरम् ।

ततः प्रतेनिरे तेन विकृतेन घृतेलिकाः । ता मग्नास्यास्तनौ रोमस्तोमा इव बभुः प्रभोः ॥८५५॥
यत्र यत्र व्यधुच्छिद्रं प्रभोरङ्गे घृतेलिकाः । तत्र तत्र सवीकाशो जज्ञे ध्यानामृतार्णवः ॥८५६॥
सुवक्रकण्टकाकृष्टैर्बद्धैरिव [१]जनासुभिः । सग्रन्थिपुच्छानकरोदतुच्छान् सोऽथ वृश्चिकान् ॥८५७॥
तत्कण्टकप्ररोहोत्थैर्विषैः कर्मविषक्षये । ध्यानौषधस्य साहाय्यमतन्यत जगत्पतौ ॥८५८॥
नकुलानकुलीनात्मा [1]ततानथ ततान सः । तेऽत्रोटयन् प्रभोरङ्गात् पिशितं निशितै रदैः ॥८५९॥
कोणे कोणे क्वचिल्लीनान् ध्यानदीपोज्ज्वले प्रभौ । दर्शं दर्शं निजघ्नुस्ते कर्माहीन् नकुलाः किल ॥८६०॥
सजीवयमदण्डाभैश्चण्डैस्तेन कृतैस्ततः । आमौलिपदमावेष्ट्य दष्टो दुष्टाहिभिः प्रभुः ॥८६१॥
सर्पैर्मुहुः प्रहारेण फूत्कारेण च तैः प्रभोः । अज्वालीवाधिकं ध्यानवह्निः कर्मेन्धनं दहन् ॥८६२॥
सोऽथ वज्ररदान् दुःखजनकान् खनकान् व्यधात् । स्वाम्यङ्गे तेऽक्षिपन्मूत्रं क्षारं नखमुखक्षते ॥८६३॥
स्वामी तत्कर्म दुष्कर्ममहागुल्ममहौषधम् । अपुनर्भूतये क्षारक्षेपरूपममन्यत ॥८६४॥
हस्तीभूयाऽथ हस्तेन सदूरमुदलालयत् । मुहुर्दन्तैरहन् भूमिपतितं च जगत्पतिम् ॥८६५॥
तद्दन्तघातैरुत्तस्थुः स्फुलिङ्गा अङ्गतः प्रभोः । चूर्ण्यमानस्य दुष्कर्माङ्गारराशेः कणा इव ॥८६६॥
भूयः करेणुकाभूयमनुभूय सुरो गुरोः । गात्रे तुण्डकराघातैश्चक्रे मूत्रेण च व्यथाम् ॥८६७॥
दुष्टदुर्दान्तकर्माष्ट[2]दन्तावलमृगाधिपे । जिनाधिपे जगज्जैत्रे सा करेणुः करोतु किम् ॥८६८॥
भूत्वाऽथ भैरवाकारः स पिशाचो निशाचरः । अधावद् भर्त्तरीर्ष्यालुः कर्त्तिकां नर्त्तयन् करे ॥८६९॥
नक्तंचरस्य तस्याऽस्तु क्व प्रभावः [२]प्रभावति । महामोहनिशाभानुध्यानदीप्तात्मनि प्रभौ ॥८७०॥
कृतव्याघ्राकृतिः पुच्छाच्छोटैः क्ष्मां त्रोटयन्निव । दारयन्निव बूत्कारैर्द्यां सोऽथ प्रभुमापतत् ॥८७१॥
दाढाभिर्वज्रगाढाभिस्तप्तशूलसखैर्नखैः । ईशं संक्लेशयन् ध्यानवह्निं वीक्ष्येव विद्रुतः ॥८७२॥
सिद्धार्थरूपत्रिशलारूपभागथ स प्रभुम् । बभाषे भवतस्तात ! कतरोऽयमभिग्रहः ॥८७३॥
मतिस्तेऽभूत् परिव्रज्या न पित्रोर्जीवतोरिति । तिष्ठावो यावदावां तत्तावदावासमाश्रय ॥८७४॥
त्यज व्रतं भज प्रीतिं पाहि नौ वत्स ! वत्सलौ । करोषि नेदं चेत्तन्नौ सखेदं हृद् द्विधा भवेत् ॥८७५॥
जिनेशं प्रति वाक्यानि स्निग्धस्निग्धानि तान्यपि । ध्यानाग्नेर्दीप्तिदैर्घ्याय प्रत्युताऽऽहुतयोऽभवन् ॥८७६॥
आवासितं स मोहान्धः स्कन्धावारं विधाय तत् । न क्वापि दृषदस्तीह सूदीभूतोऽवदन्नदः ॥८७७॥
अत्युत्सुकोऽन्नपाकाय [3]पाकारिनतियोग्ययोः । जिनेन्दुपदयोः स्थालीं न्यस्याधोऽग्निमजिज्वलत् ॥८७८॥ युग्मम् ॥
प्रिया मे मुक्तिरेवेति दिव्यं कर्तुरिव प्रभोः । न तेन तापलेशोऽपि वह्निनाऽकारि पादयोः ॥८७९॥

---

१. जनांशुभिः B । जनाश्रुभिः A । २. प्रभाविति - B, H, A ।

टि. 1. ततः=व्याप्तः, तान्, 'नकुलान्' इति अस्य विशेषणम् । 2. दन्तावलः (पुं) हस्ती । 3. पाकारिः इन्द्रः, तस्य नतिः नमनं तस्याः योग्यौ, तयोः ।

भूत्वाऽथ शबरः क्रूरः पक्षिपञ्जरकव्रजम् । स बबन्ध श्रुतिस्कन्धभुजोरुषु जगद्गुरोः ॥८८०॥
बभौ पक्षिनख[1]त्रोटित्रोटितिच्छिद्रितं विभोः । वपुस्तपःश्रीलीलौक इव जालकजालभृत् ॥८८१॥
खरवातं खातङ्कवित्रसत्त्रिदशं ततः । प्रचलत्पर्वतं पुण्यश्रीसंहारश्चकार सः ॥८८२॥
उत्पाट्योत्पाट्य तैर्वातैः स्फालितस्य शिलातले । नैर्मल्यमद्भुतं जज्ञे ध्यानामृतभृतः प्रभोः ॥८८३॥
अप्यद्रीन् खाऽर्णवाऽऽवर्त्त इव भ्रमयितुं क्षमः । तेने तेनाधमेनाऽथ द्राक् कलंकलिकानिलः ॥८८४॥
[2]भवकूपोद्धृतं तेन भ्रम्यमाणं स्वमीशिता । मेने सर्वाङ्गनिर्गच्छत्कृत्स्नकर्मावलीजलम् ॥८८५॥
वज्रसारं मनोऽस्यैष न विक्षुभ्येत् कथञ्चन । कथं च नयनाध्वानं [3]भग्नागूर्यामि नाकिनाम् ॥८८६॥
नासुनाशं विना शक्यः सैष मोचयितुं खलु । ध्यानं गाढग्रहोदग्रः कृपणो द्रविणं यथा ॥८८७॥
अमुं हत्वाऽपि याम्यद्य प्रतिज्ञापारमित्यथ । ध्यात्वा विबुधचण्डालः कालचक्रं चकार सः ॥८८८॥
उच्चैः शब्दगुणेनाऽनुमेयं व्योमेव मूर्त्तिमत् । लोहभारसहस्रेण कृतमावर्त्तवद् भ्रमत् ॥८८९॥
तत्कालचक्रमुद्यम्य स चिक्षेपोपरि प्रभोः । मांसासृक्पङ्क एषोऽभूदिति चापश्यदुत्सुकः ॥८९०॥
जिनस्त्वमज्जदाजानु क्षितौ तद्घातपाततः । दुर्गतिस्थानिवोद्धर्त्तुं प्रस्थानप्रथितोद्यमः ॥८९१॥
कष्टानन्त्यं भवानन्त्यात् [4]तस्मिन् पश्यन् ददौ तदा । याः कृपार्द्रा दृशः स्वामी ता नमामि जयन्ति ताः ॥८९२॥
[5]क्षमामग्ने तदाजानुवपुषि त्रिजगत्पतेः । मनः [6]क्षमान्तर्निशेषं ममज्ज स्पर्द्धयाऽधिकम् ॥८९३॥
प्रतिकूलैः किमप्यस्य नोपसर्गैर्भृशं भवेत् । अनुकूलैर्यदि क्षुभ्येदिति ध्यात्वाऽथ सोऽधमः ॥८९४॥
विमानस्थः पुरः स्थित्वा निजगाद जगद्गुरुम् । मुने ! तुष्टोऽस्मि सत्त्वेन सर्वाङ्गीणेन तेऽमुना ॥८९५॥
ततस्त्यज तपःक्लेशं त्वां लोकेशं करोमि किम् । नयेऽङ्गेनाऽमुना किं द्यां हृद्यां मुक्तिं ददामि किम् ॥८९६॥
अप्राप्तप्रतिवागेभिरपि लोभवचोभरैः । उपायमीशक्षोभाय सोऽध्यायत्काममायया ॥८९७॥
षट् चकार ऋतूनेष पुष्पषाड्गुण्यचिन्तकान् । त्रिलोकीजयकामस्य कामस्य सचिवानिव ॥८९८॥
भाग्यं भूषणभूतीनां पुण्यं नैपुण्यसम्पदाम् । धर्मो नर्मश्रियां तेने तेनेह द्युवधूगणः ॥८९९॥
अथ सारीकृतासारसंसारं ताः पुरः प्रभोः । असारीकृतसारौघं नार्यस्तूर्यत्रिकं व्यधुः ॥९००॥
मौक्तिकानीव शृङ्गाररसाकूपारजान्यथ । गीतामृतोर्मिलुलितान् दशनान् काप्यदीदृशन् ॥९०१॥
मृदङ्गवादनोत्तुङ्गहृदुत्सङ्गघनोन्नतौ । शृङ्गारद्धारकलसौ कुचौ काचिददर्शयत् ॥९०२॥
दरवक्रीकृतग्रीवा वीणारणनकेलिषु । [7]कर्णपूरीभवत्कान्ति कपोलं काप्यलोलयत् ॥९०३॥

---

टि. 1. त्रोटिः (स्त्री) चञ्चुः । 2. यथा यो हि कूपात् उद्धृतः, तस्य शरीरगतजलं निष्काशनाय स भ्राम्यते, तथा प्रभुरपि सर्वाङ्गनिर्गच्छत्कृत्स्नकर्मावलीजलं निष्काशनाय भ्रम्यमाणं स्वं मेने । 3. भग्ना आगूः प्रतिज्ञा यस्य स भग्नागूः । 4. सङ्गमदेवे । 5. क्षमा-पृथ्वी । 6. क्षमा-समता । 7. कर्णपूरः (पुं) कर्णाभूषणम् ।

नृत्यन्ती काचिदुन्मीलल्लीलं नृत्यकलाच्छलात् । किं किमङ्गमनङ्गस्य राज्याङ्गं न व्यकासयत् ॥९०४॥
रागं नस्त्यक्तरागोपि हृत्पीडायै प्रदत्तवान् । सदङ्गोऽनङ्गतो नाङ्गं दत्त्वा पासि क्व ते दया ॥९०५॥
प्रसीद नाथ ! पीयूषवर्षं मुञ्चेह लोचनम् । स्वामिन् ! शाम्यतु कामाग्निज्वालाजालं जवेन नः ॥९०६॥
स्मरार्त्ता म्रियमाणा नो भवदायत्तजीविताः । उपेक्षितुर्न ते व्यर्थं दयाशून्यस्य किं तपः ॥९०७॥
इति सङ्गीत[1]हावाङ्गस्फुटीकारचतुष्वपि । अदत्तहृदि नाथेऽभूत् स वैलक्ष्यातुरः सुरः ॥९०८॥
स निसर्गाधमः कृत्वोपसर्गानिति विंशतिम् । विभातायां विभावर्यामवर्यात्मा व्यचिन्तयत् ॥९०९॥
स्थानान्मेरुरिव ध्यानात् कथञ्चिन्न चलत्यसौ । तत्किं यामि दिवं वक्ष्ये सहस्राक्षेऽथ तत्र किम् ॥९१०॥
चिरादप्येष विक्षोभ्य इति निश्चित्य स स्थितः । प्रतिमां पारयित्वा च विजहारान्यतः प्रभुः ॥९११॥
अथ [2]पापपुरीपौरश्चौरपञ्चशतीं पथि । चक्रे भूरिं च नरकपतयालुः स वालुकाम् ॥९१२॥
ते चौरा मातुलेत्युच्चैरुक्त्वाऽऽलिङ्गन् प्रभुं तथा । झटित्यपि [3]यथा सारगिरिसारगिरिः स्फुटेत् ॥९१३॥
शुष्कसंसृतिनद्यन्तर्देशवत्कष्टतोऽथ ताम् । विलङ्घ्य वालुकां स्वामी **वालुकाग्राम**मासदत् ॥९१४॥
भिक्षार्थी यत्र यत्रागादधिपस्तत्र तत्र हा । सद्मन्यनेषणामेष व्यदधादधमाधमः ॥९१५॥
क्वचिच्च विकृतं रूपमाविष्कृत्य महेशितुः । अकृत्यनिविडो व्रीडां पापिष्ठः प्रापयत् प्रजाः ॥९१६॥
अनिवृत्तं तमधमं मत्वा दत्तावधिः सुरम् । अभिक्षार्थो बहिर्नाथः प्रतिमागतिमाददे ॥९१७॥
वन-देश-पुर-ग्राम-सन्निवेश-विहारभाक् । नेता तेनेति षण्मासानुपसर्गैरुपद्रुतः ॥९१८॥
षण्मासीमुपवासी तामतीत्यासन्नपारणः । स्वामी महेन केनापि व्याकुले गोकुलेऽगमत् ॥९१९॥
परिणामविरामः किं जातोऽस्येत्युपयुक्तधीः । सुराधमश्चमच्चक्रे निरीक्ष्याऽक्षुभितं विभुम् ॥९२०॥
[१]विलक्षः क्षीणसंरम्भो दुर्दम्भारम्भशोचनः । प्रभुं नत्वाऽथ पाप्मेव जङ्गमः **सङ्गमो**ऽवदत् ॥९२१॥
कथितोऽसि द्युनाथेन यथा नाथ ! तथेक्षितः । तत् क्षमस्वापराद्धं यत् तद्वचोऽश्रद्धया मया ॥९२२॥
भग्नागूर्याम्यहं स्वर्गमुपसर्गपराङ्मुखः । प्रभो ! पूर्णप्रतिज्ञस्त्वं विशङ्को विहराऽवनौ ॥९२३॥
अगदज्जगदीशोऽथ मच्चिन्तां मुञ्च **सङ्गम** ! । [4]विधेरप्यविधेया हि विहरामो वयं भुवि ॥९२४॥
सोऽगाज्जिनं विनम्याऽथ **सुधर्मा**यामधार्मिकः । तस्थुः कालं तु तावन्तमन्तर्दुःखातुराः सुराः ॥९२५॥
विमुक्ता[5]लेपनेपथ्यभङ्गिः सङ्गीतकादिमुक् । तदा दिविषदामीशोऽप्यचिन्तयदिदं शुचा ॥९२६॥
मत्कृतायां स्तुतौ भर्त्तुः स चुक्रोध सुराधमः । अस्योपसर्गवर्गस्य हा गतोऽहं निमित्तताम् ॥९२७॥

---

१. विलक्ष्य-P विलक्षक्षीण...A, C, B ।

टि. 1. हावः (पुं)-स्त्रीणां शृङ्गारिकचेष्टा । 2. पापपुरी-नरकः, तस्य पौरः, वास्तव्यः सङ्गमदेवः । 3. प्रथमः 'सारगिरिः' इति सारयुक्तः बलवान् गिरिः द्वितीयः 'सारगिरिः' इति मेरुः, ततः सारगिरिश्चासौ सारगिरिश्च इति विग्रहः । 4. विधिः-भाग्यः तस्यापि अनधीनः । 5. आलेपः =लिम्पनम् ।

पापैरिहान्तरे [1]तान्तरेखारूपः स पापधीः । पपाता[2]ऽमन्दमन्दाक्षः [3]मन्दाक्षः शक्रदृक्पथे ॥९२८॥
ततः शक्रो भृशं क्रोधपरः स्थित्वा पराङ्मुखः । उवाच भो भो ! मद्वाचमाकर्णयत नाकिनः ! ॥९२९॥
[१]अधर्मोऽयं **सुधर्मा**यां न स्थाप्यः पापपङ्किलः । [4]अङ्ग ! सङ्गच्छते तेन यः सोपि मलिनः खलु ॥९३०॥
दृष्टेऽस्मिन् कर्मचण्डाले दृष्टेर्यत्पातकं भवेत् । द्रष्टव्यस्तद्व्ययाय द्राग् जिनेश्वरदिनेश्वरः ॥९३१॥
न तपः परसाहाय्यात् तप्यन्तेऽर्हन्त इत्यसौ । नोपसर्गक्षणेऽशिक्षि शिक्षणीयोऽधुना पुनः ॥९३२॥
इत्युक्त्वा वज्रिणा वज्रेणेव वामांह्रिणा हतः । सोऽद्रिशृङ्गवदभ्रश्यदभ्रश्यद्दुर्यशोधनः ॥९३३॥
सहर्षै[5]रात्तसंहर्षैः स शचीशचमूचरैः । हतो नानास्त्रदण्डाग्रैरग्रे [२]कन्दुकवद् ययौ ॥९३४॥
द्युस्त्रीभिर्मोटितरणत्कराङ्गुलिभिरीक्षितः । क्षिप्तः सामानिकस्तोमै[३]**र्यानका**ख्यविमानतः ॥९३५॥
सुरो मेरोर्ययौ चूलां स शिष्टैकाब्धिजीवितः । इन्द्रेणानुमता दीनास्तन्महिष्योऽन्वगुश्च तम् ॥९३६॥
नाथोऽन्येद्युर्विवेशाऽथो भिक्षायै तत्र गोकुले । वत्सपालकवृद्धायाः कस्याश्चिद् भाग्यतो गृहम् ॥९३७॥
पायसेनोषितेनेयं भक्त्या प्रभुमपारयत् । पञ्च दिव्यान्यधुस्तत्र विशेषाऽऽनन्दिनः सुराः ॥९३८॥
पुरीं **मालवतीं** गत्वा प्रतिमास्थमथेश्वरम् । एत्य **विद्युत्कुमारेन्द्रो हरि**र्नत्वेदमब्रवीत् ॥९३९॥
सोढास्त्वयोपसर्गास्ते येषामाकर्णनाद् गुरो ! दीर्यमाणं हृदस्माकममरत्वेन रक्षितम् ॥९४०॥
अल्पेनाप्युपसर्गेण घातिकर्माभिघातिनः । तव भाव्यचिरादेव देवदेवेश ! केवलम् ॥९४१॥
इत्युक्त्वास्मिन् गते गत्वा विश्वेशं **श्वेतवीं** स्थितम् । **विद्युदिन्द्रो हरिसहो** नत्वोक्त्वा हरिवद्ययौ ॥९४२॥
**श्रावस्तीं** प्रभुरासाद्य प्रतिमामाश्रितस्ततः । प्रारेभे तत्र च स्कन्दरथयात्रोत्सवो जनैः ॥९४३॥
[४]पूजापटलिकाभाजः प्रभुमुल्लङ्घ्य पूर्जनाः । स्कन्दं ययुस्तमर्चित्वा रथे नेतुमसज्जयन् ॥९४४॥
क्व स्वामीति तदा ध्यायन् मघवा स्वामिलङ्घिनम् । स्कन्दगामिनमालोक्य लोकं मुग्धमगर्हत ॥९४५॥
[6]प्रभुप्रभावनोक्तेन शक्रेणाधिष्ठिता ततः । सा स्कन्दप्रतिमा पद्भ्यामेत्य रीत्याऽनमज्जिनम् ॥९४६॥
पूज्योऽयमस्य पूज्यस्याप्यत्यक्रामि पुरा जडैः । ध्यात्वेति विस्मितैः पौरैर्महिमा विदधे विभोः ॥९४७॥
**कौशाम्ब्यां** पुरि गत्वाऽथ गृहीतप्रतिमः प्रभुः । समेत्य [५]सविनयाभ्या**मर्केन्दुभ्या**मवन्द्यत ॥९४८॥
**वाराणसीं** गतोऽभ्येत्य **शक्रेण** प्रणतः प्रभुः । **ईशानस्वामिना राजगृहे** च विहृतो नतः ॥९४९॥
**मिथिलाया**मथ गतः प्रभु**र्जनक**भूभुजा । नमस्कृतः सुकृतिना **धरणेन्द्रेण** चेयुषा ॥९५०॥
**वैशाल्याः सगरोद्याने बलौ**कसि गतस्ततः । उपोषितः स्थितः प्रावृट्कालमेकादशं विभुः ॥९५१॥

---

१. अधमोऽयं-C, K । २. कंदुकं ययौ-D, P, K, C, कंदुकवन्...KH । ३. यानिका K । ४. पूजापाट B । ५. सविमानाभ्याम...B, KH, C, L, A, H, K, D ।

टि. 1. तान्तः-ग्लानिं प्राप्तः । तान्तरेखारूपः-अत्यन्तग्लानः । 2. अमन्दमन्दाक्षः-अमन्दं=अत्यन्तं मन्दे अक्षिणी नेत्रे यस्य स । 3. मन्दाक्षः-मन्दः=अज्ञानः अक्षः=आत्मा इत्यर्थः । 4. अङ्ग (अव्य०)-सम्बोधनार्थः अव्ययः । 5. आत्तसंहर्षः-प्राप्तःसंहर्षः=स्पर्धा यैः, ते । 6. प्रभोः प्रभावना उक्ता येन स तेन इति विग्रहः ।

प्रभूतानन्दभूर्**भूतानन्द**स्तत्रैत्य नागराट् । नत्वा जिनेशमाख्याय चाऽऽसन्नं केवलं ययौ ॥९५२॥
तत्र वित्तक्षयात् ख्यातो **जीर्ण**श्रेष्ठीति शुद्धहृत् । परम: श्रावक: कायोत्सर्गस्थं प्रभुमैक्षत ॥९५३॥
लक्षणैरुपलक्ष्याऽसौ जिनं जिनमतस्थिर: । ननाम नाम रोमाञ्चरोचन: साश्रुलोचन: ॥९५४॥
दध्यौ च प्रतिमाधारी प्रभुरद्याऽस्त्युपोषित: । श्व: कुर्यात् पारणं चेन्मे भवने तद्भवेच्छुभम् ॥९५५॥
इत्याश: स चतुर्मासीं नित्यं देवमसेवत । जिनं दिने तदन्त्ये च निमन्त्र्य निलयं ययौ ॥९५६॥
प्रासुकान्येषणीयानि वीक्ष्याऽन्नानि स्थितोऽङ्गणे । जिनाध्वदृष्टिर्दध्यौ स समेष्यत्यधुना विभु: ॥९५७॥
यास्यामि सन्मुखो नाथं वन्दिष्ये त्रिप्रदक्षिण:[१] । अमीभिर्पारयिष्येऽन्नैर्भविष्यामि भवान्तक: ॥९५८॥
इति ध्यायन् विशुद्धात्मा स स्थित: स्मितलोचन: । भगवानगमद्धाम **नवीन**श्रेष्ठिन: पुन: ॥९५९॥
आदिष्टा श्रेष्ठिना मिथ्यादृष्टिनाऽवज्ञयाऽमुना । कुल्माषान् किङ्करी दारुहस्तहस्ता[1] ददौ प्रभो: ॥९६०॥
तदा तदालये रत्नपुष्पगन्धाऽम्बुवर्षिभि: । आस्फालि दुन्दुभिश्चक्रे चेलोत्क्षेपश्च दैवतै: ॥९६१॥
स्वाम्याऽऽगमनचित्तस्तु **जीर्ण**श्रेष्ठी तथास्थित: । दिव्यदुन्दुभिनिनादं निशम्येदमचिन्तयत् ॥९६२॥
हा धिग् धिग् मन्दभाग्यं मां भाग्याधिकमनोरथम् । स्वामी मदौकोऽतिक्रामी यदपारयदन्यत: ॥९६३॥
विजहेऽथाऽन्यत: स्वामी **पार्श्व**शिष्यस्त्विहागत: । तं प्रणम्य नृपोऽपृच्छन्मत्पुरे कोऽतिपुण्यभाक् ॥९६४॥
स केवली जगौ येन पारितो भावतो जिन: । अर्जितं चाऽच्युते कल्पेऽनल्पं सौख्यं भवादत: ॥९६५॥
केवलज्ञानकृद्ध्यानविघ्नोऽभूद्देवदुन्दुभि: । यस्याऽसौ **जिनदत्ता**ख्यो **जीर्णश्रेष्ठ्य**तिपुण्यभाक् ॥९६६॥
द्रव्यत: पारित: स्वामी येन श्रेष्ठी स नूतन: । अल्पपुण्योऽल्पमापेह रत्नवृष्ट्यादिकं फलम् ॥९६७॥
श्रुत्वेति विस्मितो भूप: सपौर: स्वपुरीमगात् । क्रमाच्च विहरन्नाऽऽर[2] **सुंसुमारपुरं** प्रभु: ॥९६८॥
तत्रा**ऽशोक**तले**ऽशोकखण्डो**द्याने शिलास्थित: । स्वामी कृताष्टम: प्राप प्रतिमामेकरात्रिकीम् ॥९६९॥
इतो भरतविन्ध्यान्त:**पेढाल**[२]ग्रामणी: पुरा । कुटुम्बी **पूरणो** नाम **प्राणामं** व्रतमाददे ॥९७०॥
बाढं बालतप: कृत्वा स मासाऽनशनी मृत: । आसी**च्चमरचञ्चायां चमरेन्द्रो**ऽब्धिजीवित: ॥९७१॥
जातमात्रोऽवधिज्ञानात् पश्यन् विश्वान्युदैक्षत । समर्द्धिं **सुधर्मेन्द्रं** स्वमूर्द्ध्न उपरि स्थितम् ॥९७२॥
क्रुद्धोऽभ्यधादथैष स्वान् मुग्धो मन्मूर्द्ध्नि क: स्थित: । हरिणो[3] हरिणेवा[4]ऽयं हन्यमानो मयेक्ष्यताम् ॥९७३॥
अथाऽमात्यास्तमित्यूचुर्भुङ्क्ष्व भोगान् प्रभो ! निजान् । त्वत्त उच्चपदौज:श्रीरुच्चै: पुण्यैरयं कृत: ॥९७४॥
मानेन विग्रही[5] श्लाघ्य: स्वसमानेन विग्रही[6] । न हस्य:[३] कस्य खद्योत: प्रद्योतनजयोन्मुख: ॥९७५॥
इदं निगदतोऽमात्यान् प्रहसन् दर्पदर्पण: । समुत्पतिष्णु: स दिवे विवेकादित्यचिन्तयत् ॥९७६॥

---

१. त्रिप्रदक्षिणं-KH, C । २. वेभाल L, KH, C, A । ३. हास्य:....KH, L हस्य...D ।

टि. 1. दारुहस्तहस्ता-दारुहस्त=काष्ठदर्वी, सा हस्ते यस्या: सा । 2. आर-ऋधातोर्गत्यर्थकस्य परोक्षकर्त्तरि तृ. पु. एकवचनरूपम् । 3. हरिण: (पुं) =मृग: । 4. हरि: (पुं)०सिंह:, तेन । 5. विग्रही = देहवान् । 6. विग्रही-योद्धा ।

विषमः समरस्योक्तः प्रपञ्चश्चेत् कथञ्चन । जीयेऽहं तेन तत्कस्य [१]चरणः शरणं मम ॥९७७॥
इतिदत्तोपयोगः स योगभाजं जगद्गुरुम् । **संसुमारपुरे** प्रेक्ष्य श्रयणीयं श्रितो मुदम् ॥९७८॥
गत्वोत्तालोऽस्त्रशालायां घोरं परिघमग्रहीत् । उद्दण्डं चण्डदोर्दण्ड आखण्डलचिखण्डिषुः ॥९७९॥
उच्चैरु[२]ल्लासितं नीचैर्लालितं दिक्षु चालितम् । परिघं परि[३]घट्यांसे यत्रेशस्तत्र सोऽगमत् ॥९८०॥
मुक्त्वाऽसौ परिघं भक्त्या जिनं नत्वा व्यजिज्ञपत् । यामि द्युस्वामिनं जेतुं त्वत्प्रभावात् प्रभो ! दिवम् ॥९८१॥
इत्युक्त्वाऽस्त्रं करे धृत्वा कृत्वाङ्गं लक्षयोजनम् । स भीमोऽभूज्जगज्जालक्षयकाल इवाङ्गवान् ॥९८२॥
मा भून्मद्भार[1]भुग्ना भूर्मत्पुरभ्रंशभाजनम् । द्रागितीवाऽयमुत्पत्य द्युपतेरासदत् सदः ॥९८३॥
ज्वालाजिह्वालवक्त्रोऽयं कालाङ्गो भैरवाऽऽरवः । द्यां प्लावयितुमुद्भ्रान्तः सवाडव इवार्णवः ॥९८४॥
त्रस्ताऽर्वाचीनगीर्वाणः पुरः प्राचीनबर्हिषः । आरोपयत् पदद्वन्द्वं पद्मवेदीसुधर्मयोः ? ॥९८५॥
चलिताः स्खलिताः केचित्त्रस्ताः श्र(स्र)स्ताऽऽयुधाः परे। व्रीडां क्रीडां च शक्रस्य जनयन्ति स्म नाकिनः ॥९८६॥
रौद्राख्यश्चमरेन्द्रेण नाकिभिश्च भयानकः । अङ्गीचक्रे रसस्तत्र तिरस्कृतरसान्तरः ॥९८७॥
कोपकम्प्रकपोलास्यः सलास्याऽधरपल्लवः । मल्लवच्चरणाऽऽघातैः कम्प्रोत्पिष्टत्रिविष्टपः ॥९८८॥
हत्वा त्रिः परिघेणेन्द्रकीलं भ्रकुटिभीषणः । प्राहेति हेतिवत्तीव्राः स दुर्वाक्यपरम्पराः ॥९८९॥ युग्मम् ॥
एवंविधैर्भयाधीनहीनदीननिलीनकैः । वृतः कस्य बलेन त्वं हरे ! मदुपरि स्थितः ॥९९०॥
करात् क्षिप्त्वेदमस्त्रं त्वां पातयाम्यधुनाप्यहम् । दुःखदं वायसमिव स्वाऽऽवासशिरसि स्थितम् ॥९९१॥
चमरेन्द्रमवेत्यामुममरेन्द्रस्ततोऽमुचत् । [४]स्वं मूर्त्तमिव कोपाग्निं स्फुलिङ्गितरविं पविम् ॥९९२॥
द्रष्टुमप्यक्षमो घूक इव तीव्रच्छविं पविम् । सोऽथ द्रागसुरोऽनेशज्जिनेशशरणेच्छया ॥९९३॥
द्राग् [५]लघूकृतदेहं तं हन्त गेहं तदा भियाम् । [2]अशनैरशनिः सर्पमिव तार्क्ष्योऽन्वधावत ॥९९४॥
शक्रोऽथ दध्यौ दैत्यस्य शक्तिरस्य कुतोऽभवत् । आगन्तुं मत्सभां पङ्गोरिव शृङ्गोन्नतं गिरिम् ॥९९५॥
प्रभुप्रभावादायातं प्रभौ यान्तं च तं तदा । मत्वेन्द्रो हा धिगित्युक्त्वा वज्रं रोद्धुमधावत ॥९९६॥
कथञ्चित् प्राप सम्प्राप्तप्रायवज्रस्तु सोऽसुरः । शरणं शरणमिति ब्रुवन् **वीरपदान्तरम्** ॥९९७॥
चतुर्भिरङ्गुलैः स्वामिपादेभ्योऽन्तरितं हरिः । द्रुतमन्वेत्य जग्राह वज्रं स्वास्थ्यमुवाह च ॥९९८॥
त्वद्भक्तेऽनुपयुक्तेनापराद्धमिह यन्मया । तन्मे क्षन्तव्यमित्युक्त्वा ननाम स्वामिनं हरिः ॥९९९॥
ईशान्यां कोपनाशाय त्रिः प्रहत्यांह्रिणा भुवम् । स्वामिभक्तो विमुक्तोऽसीत्यूचेऽथ चमरं द्युराट् ॥१०००॥
गते नाकमथो नाकनाथे नाकसदो बुधाः । अवोचत विचार्येति धर्मनीत्यर्थवेदिनः ॥१००१॥

---

१. चरणाः L, K । २. ल्लालितं - A, B, KH, L । ३. घट्याशे - A, B, L । ४. 'स्वमूर्त्ति...' P । ५. देवेशं हंत...D ।

टि. 1. भुज्-धातुः कौटिल्ये मम भारेण भुवः कौटिल्यं मा भूत् इत्यर्थः । 2. न शनैः इति अशनैः शीघ्रं इत्यर्थः ।

यत्र देवर्षिपूज्यानां क्रियतेऽतिक्रमः क्वचित् । तच्च [१]संसहते राजा घोरं तत्र भयं भवेत् ॥१००२॥
[२]विभावभक्तः शक्रेण यत्सङ्गम[1]जनङ्गमः । चिरं सोढः स उत्पातभयहेतुर्दिवोऽभवत् ॥१००३॥
इति गीर्वाणवृद्धेभ्यः श्रुत्वा [2]वृद्धश्रवाः स्वयम् । शान्तिं सानुशयश्चक्रे सिद्धायतनपूजया ॥१००४॥
स्वःप्राप्तद्युपतौ भक्तिभासुरश्चमरासुरः । नत्वा जिनं जगौ स्वामिन् ! मम मोहो महोपकृत् ॥१००५॥
मोहेनैवाऽसमानेन्द्रविग्रहं दिशता मम । स्वनाशमप्युरीकृत्य दर्शितस्त्वं प्रभुः प्रभो ! ॥१००६॥
सौधर्मादिसदो दूरेऽनुत्तरद्युसदोप्यहम् । नैव स्वतोऽधिकान् मन्ये भवद्भक्तिभवन्मदः ॥१००७॥
[3]धर्मसर्वस्वहा गर्वः सर्वथान्यत्र दूषणम् । त्वां नु स्वामिनमासाद्य माद्यतो मेऽस्तु भूषणम् ॥१००८॥
इत्युक्त्वा स्वपुरीं गत्वा ख्यात्वा पौरेषु सोऽखिलम् । तांश्चानीय पुरो भर्तुर्भक्त्या सङ्गीतकं व्यधात् ॥१००९॥
प्रभुः प्रभाते संहृत्य प्रतिमां विहरन्नथ । क्रमतो ममतोन्मुक्तः पुरं **भोगपुरं** ययौ ॥१०१०॥
हन्तुं जिनेन्द्रं **माहेन्द्रक्षत्रिय**स्तत्र दुर्मतिः । अदूरीभूय खर्जूरीयष्टिमूरीचकार हा ॥१०११॥
प्राप्तः **सनत्कुमारेन्द्र**श्चिरोत्कण्ठावशस्तदा । तं निर्भर्त्स्य प्रभुं नत्वा सुखं पृष्ट्वाऽगमद्दिवम् ॥१०१२॥
विहरन् पितृमित्रेण **नन्दिग्रामे**ऽथ **नन्दिना** । आनन्दिना वन्दितोऽगान्**मेढाकग्राम**मीशिता ॥१०१३॥
तत्प्रहाराय गोपालमात्तोद्यद्वालरज्जुकम् । [4]द्रुतागतो निवार्येन्द्रस्तीर्थेन्द्रमनमन्मुदा ॥१०१४॥
ततः पवित्रयामास **कौशाम्बीं त्रिशलासुतः** । यत्राभूद् [5]द्विट्शतानीकः **शतानीक**महीपतिः ॥१०१५॥
[6][३]चेटकल्पारिचक्रस्य **चेटकस्य** महीपतेः । सुता **मृगावती** नाम तत्प्रियार्हन्मतप्रियाः ॥१०१६॥
तस्य मन्त्री धरित्रीन्दोः **सुगुप्तो** नाम तत्प्रिया । **नन्दाख्या** जिनभक्तेति **मृगावत्या** महासखी ॥१०१७॥
तच्चरित्रपवित्रायां तत्पुर्यामित्यभिग्रहम् । अग्रहीद् दुर्ग्रहं **पौषशितिप्रतिपदि** प्रभुः ॥१०१८॥
मुण्डिता प्रेष्यतां प्राप्ता षष्ठान्ते राज्यकन्यका । अयोनिगडबद्धांह्रिर्मन्युतो रुदती सती ॥१०१९॥
सुदेहा देहलीमध्यबहिःस्थितपदद्वया । निकेतनान्निवृत्तेषु सर्वतः सर्वभिक्षुषु ॥१०२०॥
सूर्पकोणेन कुल्माषान् भक्त्या दास्यति मे यदि । तदाहं पारयिष्यामि चिरादपि हि नान्यथा ॥१०२१॥
इत्यात्तजगदज्ञाताभिग्रहोऽनुगृहं प्रभुः । बभ्रामाऽनुदिनं काले न तादृक् भैक्षमैक्षत ॥१०२२॥ [कलापकम्]
अनात्तभिक्षो वैलक्ष्यदुःखार्त्तैर्वीक्षितो जनैः । नाथोऽत्यगाद् भ्रमन्नित्यं चतुर्मासीं चतुर्थवत् ॥१०२३॥
**सुगुप्त**मन्त्रिणो वेश्म प्रविवेशैकदा प्रभुः । अभ्युत्तस्थौ च सानन्दा **नन्दा** विभुनिभालनात् ॥१०२४॥
धन्याऽहं मद्गृहं प्राप्तश्चरमोऽद्य जिनः स्वयम् । इति ब्रुवाणा [४]शुद्धानि तज्ज्ञा साऽन्नान्यढौकयत् ॥१०२५॥
अथ साभिग्रहे भिक्षामगृहीत्वा गते विभौ । चिरान्नन्दा निरानन्दा निनिन्दात्मानमेककम् ॥१०२६॥

---

१. संहरते – C । २. विभावसक्तः-K, D । ३. चेटकाद्वैरि...K, D । ४. सिद्धानि A ।

टि. 1. जनङ्गमः (पुं)-चाण्डालः । 2. वृद्धश्रवस् (पुं) – वृद्धेषु श्रवो यशो यस्य इति वृद्धश्रवाः । 3. धर्मसर्वस्वं हन्ति इति क्विप् धर्मसर्वस्वहा गर्वः । 4. द्रुतं शीघ्रं आगतः द्रुतागतः । 5. द्विट्शतानीकः वैरिकेशरी – B पार्श्वे टी० । 6. चेटः दासः तत्तुल्यः रिपुसमूहः यस्य सः ।

**नन्दाया** दु[1]:खदायादीत्यवादीद्दासिका तदा । नित्यमित्ययमायाति याति चाऽनात्तकिञ्चनः ॥१०२७॥
**नन्दा**ऽथ दध्यौ नाथेऽस्ति विशिष्टः कोऽप्यभिग्रहः । पारणं कारयिष्यन्त्या बोद्धव्यः स कथं मया ॥१०२८॥
इत्यात्तचिन्ता पत्याऽसौ पृष्टा चिन्तानिबन्धनम् । सर्वमाख्याय दुःखौघभागिनं तमपि व्यधात् ॥१०२९॥
**मृगावत्यपि** तां बुद्ध्वा तद्वार्त्तां वेत्रिणीमुखात् । स्वयं वोढुमशक्तेव वामधुर्यं नृपं व्यधात् ॥१०३०॥
प्रभोरभिग्रहं ज्ञातुं भूपेनाऽऽलोच्य मन्त्रिणा । **धर्मो**पाध्याय आपृष्टः सत्यवादीदमभ्यधात् ॥१०३१॥
द्रव्यक्षेत्रकालभावैर्भूरिशः स्युरभिग्रहाः । विना विशेषज्ञानेन क्व ज्ञेयः स्वाम्यभिग्रहः ॥१०३२॥
अघोषयदघोच्छेदी खेदी भूपः पुरेऽथ यत् । विविधाग्रे विधातव्या भिक्षाऽभिग्राहिणः प्रभोः ॥१०३३॥
श्रद्धाद्वितीयया लोकस्तच्चक्रे राज्ञ आज्ञया । न तु क्वचित् प्रभुर्भिक्षामपूर्णाभिग्रहोऽग्रहीत् ॥१०३४॥
वीक्षितो नागरैर्लज्जोज्जागरैः खेदसागरैः । ध्यानसुस्थस्तथाप्यस्थादम्लानाङ्गप्रभः प्रभुः ॥१०३५॥
इतश्च प्राक् शतानीको नावनीकैर्निशैकया । **चम्पा**यामपतत् [2]सम्पाझम्पासंपातजित्वरः ॥१०३६॥
विदधे तदधिष्ठाता **दधिवाहन**भूपतिः । पलायनं छलाक्रान्तः क्व करोतु बलायनम् ॥१०३७॥
अघोषि तोषिणाऽनीके शतानीकेन यद्ग्रहः । **चम्पा** कम्पाऽऽकुलाऽलुण्टि तद्भटैरुद्भटैस्ततः ॥१०३८॥
**वसुमत्या** समं पुत्र्या **दधिवाहन**भूपतेः । दधार **धारणीं** राज्ञीं तदानीं कश्चिदौष्ट्रिकः ॥१०३९॥
ययावथ **शतानीकः** स्मितानीकः पुरीं निजाम् । व्रजन् पथि जनानुच्चैरिदमूचे स औष्ट्रिकः ॥१०४०॥
सेयं रूपवती प्रौढा रचनीया मया प्रिया । एतद्भोगार्थमर्थार्थी विक्रेष्ये कन्यकां पुनः ॥१०४१॥
धारणी सत्कुलोत्पन्ना परिणीताऽथ सत्कुले । इति तद्वाक्यवज्रेण सद्यः स्फुटितहृन्मृता ॥१०४२॥
तां मृतां वीक्ष्य स क्षीणस्पृहोऽचिन्तयदौष्ट्रिकः । हहा महासती सेयं दुर्वाचैवाऽजनि [3]व्यसुः ॥१०४३॥
तप्ता पितृवियोगेन प्रतप्ता मातृमृत्युना । कन्यकापीयमल्पेऽपि दुर्वाक्तापे मरिष्यति ॥१०४४॥
ध्यात्वेति मृदुवाचैव कन्यकां सान्त्वयन् मुहुः । स **कोशाम्ब्यां** गतो दध्रे तां विक्रेतुं चतुष्पथे ॥१०४५॥
तां [१]कन्यां तत्पुरश्रेष्ठी धनाधीशो **धनावहः** । श्रीणामालिभिरक्रीणादप्रीणाच्च सुताधिया ॥१०४६॥
त्वं पुत्रि ! कस्य पुत्रीति सा पृष्टा श्रेष्ठिना ततः । न किञ्चिदूचे स्वकुलमाहात्म्याख्यानलज्जया ॥१०४७॥
**मूला**ह्वयां प्रियां प्रोचे ततः श्रेष्ठी कृतादरः । सुतेयमावयोः कान्ते ! पाल्या यत्नेन रत्नवत् ॥१०४८॥
तस्या विनयवाक्शीलैः सलीलैः स वणिग्वरः । सानन्दश्चन्दननिभैश्**चन्दने**त्यभिधामधात् ॥१०४९॥
[4]रूपस्य तनुभूषाया लावण्यं नाम भूषणम् । यौवनेन नवीनेन भूषयामास सा क्रमात् ॥१०५०॥

---

१. कन्यांतःपुरः श्रेष्ठी...P ।

टि. 1. दुःखदायादी–नन्दाया विभजनीयं दुःखमादत्ते इति दुःखदायादः स्त्रीलिङ्गे दुःखदायादी, दास्या विशेषणम् । 2. सम्पा०–विद्युत्० इत्यर्थः सम्यक् अतर्कितं पतति श.र.म.भा.३/पृ. ३००७ । 3. विगताः असवः यस्या सा व्यसुः=मृता इत्यर्थः । 4. तनोर्भूषा रूपः, तस्य भूषणं लावण्यं, तं नवीनेन यौवनेन सा क्रमाद् भूषयामास इत्यन्वयः ।

श्रेष्ठी क्रीतसुतां रूपक्रीतोऽमूं विवहत्यपि । इत्यल्पधीः [1]कुकूलाग्निरिव **मूला**ऽन्तरज्वलत् ॥१०५१॥
कदापि [2]तापरुग्णस्यागतस्य श्रेष्ठिनः क्रमौ । अक्षालयन्निषिद्धापि पितृभक्त्यैव **चन्दना** ॥१०५२॥
निस्सहाङ्ग्याः पतन्पङ्के तस्याः केशोच्चयस्तदा । पित्रेव श्रेष्ठिना लीलायष्ट्योद्धृत्य न्यबध्यत ॥१०५३॥
पत्नीत्वलक्षणं केशबन्ध इत्यादि चिन्तया । विकल्पं निश्चिकाय स्वं मूला तद्वीक्ष्य रोषणा ॥१०५४॥
बहिः श्रेष्ठिनि यातेऽथ **मूलया** प्रतिकूलया । नापितस्तापितहृदाऽऽनीयाऽमुण्ड्यत **चन्दना** ॥१०५५॥
बद्धांह्रिर्निबिडैर्लोहनिगडैस्ताडिताऽथ सा । क्षिप्त्वाऽपवरिकामध्ये [१]ददे च द्वाःकपाटिका ॥१०५६॥
अथाऽभाषि भवाबद्धमूलया मूलया जनः । य इदं श्रेष्ठिने वक्ता स भोक्ता मत्क्रुधः फलम् ॥१०५७॥
श्रेष्ठी च सायमायातोऽपृच्छत् क्व किल **चन्दना** । स मौनिनि जने दध्यौ रमते क्वापि पुत्रिका ॥१०५८॥
निशायां चागतः पुत्री शेत एतदचिन्तयत् । द्वितीयमप्यहः श्रेष्ठी नीतवानेवमेव सः ॥१०५९॥
अवीक्ष्याह्नि तृतीयेऽपि तामुत्कण्ठी धनावहः । जगौ जनान् कुतोऽप्याशु समानयत चन्दनाम् ॥१०६०॥
[3]यद्वदेष्ववदत्तेषु कोपकम्पी वणिक् ततः । रे रे पुत्री क्व मे ब्रूत हुतिर्मा [4]भूत मत्क्रुधः ॥१०६१॥
जीविष्यामि कियत्कालं **मूला** किं मे करिष्यति । ध्यात्वेति दासी वृद्धैका श्रेष्ठिने तथ्यमाख्यत ॥१०६२॥
तत्तद्बद्धं गृहद्वारं द्रागुद्घाट्य **धनावहः** । रुदतीं क्षुत्पिपासार्त्तां दीनां चैक्षत चन्दनाम् ॥१०६३॥
श्रेष्ठी साश्रुरथाऽऽनीय सद्योदृष्टान् महानसात् । कुल्माषान् सूर्पकोणस्थांस्तस्यै भोज्यार्थमार्पयत् ॥१०६४॥
विश्वस्ता भव पुत्रीति स गदित्वा सगद्गदम् । [5]अन्दुभेदाय कर्मारमाकारयितुमाश्वगात् ॥१०६५॥
**चन्दना**प्युत्थिता दध्यौ कथं षष्ठस्य पारणे । असंविभज्य भुञ्जेऽहमित्यक्षि बहिरक्षिपत् ॥१०६६॥
तदा च जगता[6]मर्य्यः पर्यटन् प्रतिमन्दिरम् । आगमज्जङ्गमः पुण्यरोहणस्तद्गृहाङ्गणम् ॥१०६७॥
तं विलोक्य त्रिलोक्यन्तरेकनेतारमीश्वरम् । आत्मसम्भावनाप्रीत्या प्रणनाम नुनाव च ॥१०६८॥
नमोऽस्तु ते महावीर ! महादेव ! नमोऽस्तु ते । महेश्वर ! नमस्तुभ्यं नमस्तुभ्यं महामुने ! ॥१०६९॥
अहोपात्रमहोपात्रमहो मे पूर्णपात्रता । न ध्यातमात्रमिन्द्रोऽपि पात्रमीदृग् विलोकते ॥१०७०॥
अद्य चिन्तामणिः पाणावद्य कल्पद्रुमोऽङ्गणे । अद्य मे कामधुग् धेनुः साक्षादेवोपतिष्ठते ॥१०७१॥
कपाट इव भिन्नेऽद्य कर्मग्रन्थौ त्वमीक्षितः । मोहान्धकारकारान्ते जिनेश्वर ! दिनेश्वरः ॥१०७२॥
महामोहमयी मेऽद्य सा विभाता विभावरी । साक्षाद्दिनो जिनो जज्ञे यन्नेत्राम्बुजबोधनः ॥१०७३॥
सम्पूर्णदोहदं श्रेयःकल्पद्रुवनमद्य मे । यस्याऽर्हद्दर्शनं पुष्पमभून्मोक्षफलप्रदम् ॥१०७४॥
ननाम त्वामहं स्तौमि परं परमदैवतम् । स्तुवेतमां तमात्मानं यद्भाग्यानां वशे भवान् ॥१०७५॥

---

१. ददे बद्धाः कपाटिकाः L, वचो बद्धाकपाटिका D, वचो बद्धाकपाटिका K ।

टि. 1. कुकूलाग्निः-तुषाणां अग्निः । 2. तापपीडितस्य B पार्श्वे । 3. यद्वदेषु-यथातथा वक्ता इति यद्वदः, तेषु यद्वदेषु। अनुत्तरेषु सं० B । 4. 'भू'धातोः अद्यतनी द्वि.पु. बहुवचनरूपः । 5. निगडविदारणाय B पार्श्वे । अन्दुः (स्त्री) = निगडः । 6. अर्य्यः (पुं)-पूज्यः ।

अहो अहं [१]नमो मह्यं मह्यमेव नमो नमः । मयि प्रभुः प्रसन्नो यद्योगिनामप्यगोचरः ॥१०७६॥

[२][1]मान्या विपदधर्मोत्था विपद्धर्मप्रसूस्त्वसौ । यत्प्रसादान्मयाप्तस्त्वं सम्पदां प्रभवः प्रभुः ॥१०७७॥

तथा प्रसीद मे भर्त्तर्दयाकर ! दयां कुरु । महोदयप्रभुर्येन भवामि भवभेदतः ॥१०७८॥

अथ त्रस्ताघकाकोला लोलांह्रिनिगडारवैः । हर्षाकुला चचालाऽसौ बाला कुल्माषसूर्पभृत् ॥१०७९॥

संसारस्येव देहल्या एकं मध्ये बहिः परम् । कृत्वांह्रिं चलितुं [2]नैष्ट कर्मणेवान्दुकेन सा ॥१०८०॥

इहस्थैवाऽऽह सा भक्त्या स्वामिन्नैवोचितं यदि। तथाप्यन्नं गृहाणेदं मदनुग्रहणैकधीः ॥१०८१॥

[३]सम्पूर्णाभिग्रहः स्वामी भिक्षार्थित्वच्छलादथ । ततान तद्भवोत्तारावलम्बनकरं करम् ॥१०८२॥

धन्यंमन्या स्वयं कन्या सानन्दमथ **चन्दना** । सूर्पाच्चिक्षेप कुल्माषान्मोक्षमूल्यान् प्रभोः करे ॥१०८३॥

स्तुत्यस्तस्याः प्रभावोऽयमुत त्रिजगतीगुरोः । अथोभयस्य कुल्माषाः पणोऽजनि शिवस्य यत् ॥१०८४॥

केनापि कृतिना ज्ञाता सिद्धान्नस्यापि बीजता । सिद्धत्वफलदा क्षेत्रे पुण्यवल्ली यतो भवेत् ॥१०८५॥

दीप्ते माषाहुतीर्दत्त्वा तपोहुतभुजि प्रभोः । विपन्मयीं निजग्राह शाकिनीं सा नरेन्द्रसूः ॥१०८६॥

स्वाम्यभिग्रहपूर्त्याथ प्रीता नृत्यादिकारिणः । तद्धामनि द्युधामानः पञ्च दिव्यान्यजीजनन् ॥१०८७॥

तदा च भग्न[3]हिञ्जीरां [4]तदात्वोद्गतकुन्तलाम् । सर्वाङ्गसर्वाभरणां चक्रिरे **चन्दनां** सुराः ॥१०८८॥

[5]व्यगलन्निगडान्यस्याः स्वयं तत्कौतुकं न नः । अर्हन्महिम्ना हन्यन्ते यत्कर्मनिगडा अपि ॥१०८९॥

**शतानीको मृगावत्या सुगुप्तो नन्दया** सह । इहाऽऽगच्छन् प्रभुं नन्तुं महेन्द्रोऽपि द्रुतं द्युतः ॥१०९०॥

कारामुक्तस्तदेवैत्य **दधिवाहन**कञ्चुकी । **सम्पुलो** वीक्ष्य तां कन्यामरुदद् रोदयन्निमाम् ॥१०९१॥

पृष्टेन तत्कुले तेन ख्यातेऽथ क्ष्मापतिर्जगौ । मा रोदीर्विपदप्यस्या वन्द्या श्रीवीरपारणात् ॥१०९२॥

पञ्चाहन्यूनषण्मासोपवासोपात्तपारणम् । कृत्वा **धनावहा**गारा[6]दनगाराधिपोऽप्यगात् ॥१०९३॥

वृष्टिरत्नानि भूपेऽथ जिघृक्षति हरिर्जगौ । **चन्दना** प्रभुरेतेषां यस्मै यच्छति लातु सः ॥१०९४॥

नभोरत्नसपत्नानि तानि रत्नानि **चन्दना** । लालनात् पालनात् पित्रे श्रेष्ठिनेऽथ मुदा ददौ ॥१०९५॥

पुनराह नराधीशं **शतानीकं** शतक्रतुः । बाला चरमदेहेयं नेहते गेहजं सुखम् ॥१०९६॥

आवीरकेवलोत्पत्ति ततो रक्ष्याऽतियत्नतः । यद् भविष्यति शिष्येयं प्रथमा स्वामिनस्तदा ॥१०९७॥

---

१. नमो नमः L । २. सान्या L, K । ३. एतच्छ्लोकस्य पूर्वे एते श्लोकाः 'C' आदर्शे प्राप्ताः न तु शेषेषु ।

मच्चित्तकठिना माषा रूक्षा मद्भक्तिवत् प्रभो ! सकका मद्दशावच्च मद्भाग्यमिव नीरसाः ॥

सकषाया निरास्वादाः कठोराः स्नेहवर्जिताः । कुल्माषाः खलमूर्खारिसपत्नीहृन्निभाः प्रभोः ॥

निजगात्रतो वियुक्ता विक्रीता खण्डिता तुलाग्रमिता । जगतस्तथापि वन्द्या चन्दनमिव चन्दना भाति ॥

टि. 1. (सामान्यतः) विपद् अधर्मोत्था मान्या, असौ विपद् तु धर्मप्रसूः इत्यन्वयः । 2. न ऐष्ट=न अशक्नोत् । 3. हिञ्जीरा=पादपाशः दे. ६/११६ । 4. तदेत्यस्य भाव तदा+त्व तस्मिनकाले इत्यर्थः । श.र.म.भा.२/पृ० ९६६ । 5. 'निगड' शब्दः पुंलिङ्गे नपुंसकलिङ्गे च । 6. महात्मनां स्वामी यातः B पार्श्वे ।

गतेऽथ नाथं नत्वेन्द्रे नीता भूपेन **चन्दना** । कन्यकान्तःपुरे तस्थौ ध्यातार्हत्केवलोदया ॥१०९८॥
पुण्यपादपमूलाग्नि**र्मूला** तु श्रेष्ठिना गृहात् । निर्वासिताऽऽप्तदुर्ध्याना विपद्य प्राप दुर्गतिम् ॥१०९९॥
**सुमङ्गलाख्यसुक्षेत्र**ग्रामयोर्विहरन्नथ । **सनत्कुमारमाहेन्द्र**महेन्द्राभ्यां जिनोऽर्च्चितः ॥११००॥
प्राप्तोऽथ **पालक**ग्रामं प्रभुर्यात्राभिसर्पिणा । वणिजा **वायला**ख्येन दृष्टोऽशकुनशङ्किना ॥११०१॥
पतत्विहैवाऽशकुनमित्यस्यापततः प्रभुम् । कृष्टखड्गस्य चिच्छेद **सिद्धार्थ**व्यन्तरः शिरः ॥११०२॥
[1]**स्वामिदत्त**द्विजस्याग्निहोत्रवेशमन्यथ प्रभुः । द्वादशीं प्रावृषं चक्रे प्राप्य **चम्पा**मुपोषितः ॥११०३॥
अभ्येत्य **पूर्णभद्र**श्च **माणिभद्र**श्च भक्तिभिः । पर्यपूजयतामर्यमिह यक्षौ [2]प्रतिक्षिपम् ॥११०४॥
देवार्यः सेव्यते देवैः किञ्चिद्वेत्तीति वेदितुम् । स्वामिदत्तद्विजोऽपृच्छत् कोऽङ्गे जीव इति प्रभुम् ॥११०५॥
योऽहंकरोति यः सूक्ष्मः पृथग्रूपः शरीरतः । यो ग्राह्यो नेन्द्रियैर्जीवः स इत्यथ जिनो जगौ ॥११०६॥
इति प्रश्नोत्तराद्विप्रो मत्वा तत्त्वैकवेदिनम् । आनर्च्च नाथं नाथश्चाऽबोधयद् भव्य इत्यमुम् ॥११०७॥
[3]ऊर्ज्जाऽन्ते स्वामिनः **शक्रो जृम्भक**ग्रामगामिनः । प्रदर्श्य नाट्यमासन्नमाचख्यौ केवलोदयम् ॥११०८॥
विहरन्**मेण्ढक**ग्रामे **चमरेन्द्रे**ण वन्दितः । षण्मासान् ग्रामगस्तस्थौ कायोत्सर्गी बहिः प्रभुः ॥११०९॥
वेद्यं विष्णुभवोत्कीर्णं कर्मोदीर्णं तदा विभोः । शय्यापालश्रवोनालक्षिप्ततप्तत्रपूद्भवम् ॥१११०॥
स शय्यापालजीवस्तद्ग्रामगोपालतां गतः । नष्टेषु गोषु पप्रच्छ क्व मे गाव इति प्रभुम् ॥११११॥
प्रभौ मौनिन्यथो कोपाटोपाद् गोपाधमोऽभ्यधात् । न किं शृणोषि ? तत्कर्णरन्ध्रयुग्मेन किं तव ? ॥१११२॥
इत्युक्त्वा स्वामिनः काशशलाके कर्णरन्ध्रयोः । स क्षिप्त्वाऽताडयद् ग्राव्णा तच्चान्तर्मिलिते यथा ॥१११३॥
मा कोऽपि कीलकावेतौ कृषदित्येष दुष्टधीः । तौ निर्भग्नबहिर्भागौ कृत्वा द्रष्टुं जगाम गाः ॥१११४॥
तत्कीलकप्रतिष्टब्धमिवातिस्थिरतां गतम् । बिभ्रत् प्रभुः शुभध्यान**मपापां मध्यमा**मगात् ॥१११५॥
पारणार्थं च **सिद्धार्थ**वणिग्गृहमिह प्रभुः । जगाम भक्तियुक्तेन तेन च प्रतिलाभितः ॥१११६॥
**सिद्धार्थ**वणिजो मित्रमत्र पूर्वागतः कृती । **खरका**ख्यः प्रभुं प्रेक्ष्य वैद्योऽवदददस्तदा ॥१११७॥
सर्वलक्षणसम्पूर्त्तिरहो मूर्त्तिर्महामुनेः । सेयं ज्ञेया पुनः शल्यवती म्लानवती यतः ॥१११८॥
अथेशं पश्यता रोगरिपुणा निपुणात्मना । स कर्णकीलकानर्थः **सिद्धार्थाय** प्रदर्शितः ॥१११९॥
**सिद्धार्थो** दुःखसार्थेन दुःस्थावस्थोऽभ्यधादथ । कर्णयोः कीलकौ भर्तुरर्त्तिजागर्त्ति मित्र मे ॥११२०॥
भवाभीतेन केनापि क्षिप्तावेतौ दुरात्मना । महात्मन् ! भवभीतस्त्वं कर्ष कर्षाऽऽशु कीलकौ ॥११२१॥
तयोरिदं निगदतोर्निरपेक्षो जगद्गुरुः । जगाम बहिराराममादृतप्रतिमास्थितः ॥११२२॥

---

१. कीलिका K, L ।

टि. 1. 'स्वातिदत्त' इति नाम्ना द्विजः त्रिषष्टिदशमपर्वे । 2. प्रतिरात्रिम् इत्यर्थः । 3. चतुर्मास्यन्ते इत्यर्थः 'B' पार्श्वे ।

वृतौ श्रद्धाकुलैर्लोकैः **सिद्धार्थखरकौ** रयात् । भेषजाद्यमथासाद्य गतावनुजिनं वनम् ॥११२३॥
तैलद्रोण्यां निवेश्याङ्गे तैलाभ्यङ्गं विधाय च । ताभ्यामुद्वाहुभिः संवाहकैः संवाहितो विभुः ॥११२४॥
अथ श्लथेषु नाथस्य सन्धिष्वोजस्विभिर्नृभिः । आकृष्यतां श्रवःशल्ये तुल्यं सन्दंशदंशनात् ॥११२५॥
बभौ सन्दंशकाकृष्टं सासृक्शल्यद्वयं विभोः । प्राग्लूनकर्मविटपिशिष्ट[1]सोदकमूलवत् ॥११२६॥
शल्योद्धारे व्यथा कापि साऽभवत् भवभेदिनः । [2]क्षयाब्दशब्दसंवादी ययाऽभूद् भैरवो रवः ॥११२७॥
प्रभावेन प्रभोरेव न भग्ना भूस्ततो ध्वनेः । उद्भ्रान्तोऽपि कृपाम्भोधिः प्रलयाय न जायते ॥११२८॥
संरोहिण्याऽथ संरोह्य श्रवणव्रणमाशु तौ । प्रभुमभ्यर्च्य सिद्धार्थखरकौ धाम जग्मतुः ॥११२९॥
कृत्वापि वेदनां भर्तुरुभावपि शुभाशयौ । तावभूतां द्युभूतीनां प्रभूतानां विलासभूः ॥११३०॥
स्वामिभैरवनादेन **महाभैरव**नामकम् । तदुद्यानमभूद्देवकुलं चेह कृतं जनैः ॥११३१॥
महोपसर्गान् विषहमानो दीक्षादिनादिति । द्वादशाब्दीं सषण्मासां सपक्षां प्रभुरत्यगात् ॥११३२॥
इयत्कालमनम्भांसि तपांसि सततं चरन् । नित्यभक्तं चतुर्थं च कदाचिन्नाऽऽचरद् गुरुः ॥११३३॥
विहरन् विगतारम्भो **जृम्भकं** सन्निवेशनम् । **ऋजुपालिकया** नद्या हृद्यं प्राप स पापभित् ॥११३४॥
**श्यामाक**गृहिणः क्षेत्रे तत्र **शालतरो**स्तले । **अव्यक्तचैत्य**स्यासन्न उत्तरे **सिन्धु**रोधसि ॥११३५॥
मुहूर्ते **विजये षष्ठतपसो**त्कटिकासनी । स्थितः स्मितसितध्यानः प्रभुरातापनापरः ॥११३६॥
केवलालोकनिःश्रेणिक्षपकश्रेणिगामिनः । स्वामिनस्तुत्रुटे घातिकर्मभिर्जीर्णरज्जुवत् ॥११३७॥
अथ यामे चतुर्थेऽह्नश्चन्द्रे **हस्तोत्तरा**चरे । उत्पेदे **शुभ्रवैशाखदशम्यां** केवलं विभोः ॥११३८॥
तन्मत्वाऽऽसनकम्पेन सहस्राक्षः सहाऽमरैः । एत्य तत्रोत्सवं चक्रे क्रीडद्भिर्भूरि[१]विक्रियैः ॥११३९॥
यथोक्तां **समवसृतिं** विबुधा विदधुस्ततः । यथाकल्पमथैनां चाऽलञ्चक्रे चरमो जिनः ॥११४०॥
न सम्यग् विरतेः कश्चिदर्होऽत्रेति विदन्नपि । कल्पत्वात् कल्पयामास जिनेशस्तत्र देशनाम् ॥११४१॥
**मातङ्ग**नामा यक्षोऽथ देवी **सिद्धायिका** तथा । जिनेन्दोः सन्निधानायोत्पन्ने शासनदेवते ॥११४२॥
अथाऽसङ्ख्याभिरमर[२]कोटिकोटिभिरावृतः । सुरैः सञ्चार्यमाणेषु हेमाब्जेषु ददत्पदौ ॥११४३॥
परीवारमरुद्भाभिर्निशि वासरतास्पृशि । दूरे द्वादशयोजन्या जिनो**ऽपापां** पुरीमगात् ॥११४४॥ युग्मम् ॥
तत्रादूरे **महासेन**वनोद्याने द्युवासिभिः । कृते समवसरणे सर्वातिशयभाक् प्रभुः ॥११४५॥
पूर्वसिंहासनासीनः सुनासीरकृतस्तुतिः । सुरासुरनरैः प्रेक्ष्यमाणास्यो योजनध्वनिः ॥११४६॥
भव्यप्राणिप्रबोधाय जगत्कर्णसुधार्णवः । श्रामण्यश्रावकत्वार्हं द्विविधं धर्ममादिशत् ॥११४७॥ त्रिभिर्विशेषकम् ॥
इतश्च **गोबरग्रामे** ग्रामे मगधमण्डने । भूषा **गौतम**गोत्रस्य **वसुभूति**रभूद् द्विजः ॥११४८॥

---

१. 'विक्रमैः' B, A, L । २. रमरकोटिभिः प्रभुरावृतः KH, रमरप्रभुकोटिभिरावृतः B ।

टि. 1. उदकेन सहितं० सोदकं । 2. प्रलयकालमेघस्य शब्दानुकारी शब्दोऽभूत् इत्यर्थः ।

**इन्द्रभूत्यग्निभूत्याख्यौ वायुभूतिश्च** सूनवः । पत्न्यां **पृथिव्यां** तस्यासन् गोत्रतस्तेऽपि **गौतमाः** ॥११४९॥
**कोल्लाके धनमित्रोभूद्धम्मिलश्च** द्विजस्तयोः । सुतौ **व्यक्तः सुधर्मा** च **वारुणीभद्रिला**भवौ ॥११५०॥
**धनदेवाख्यमौर्याख्यौ मौर्याख्ये** सन्निवेशने । द्विजावजनिषातां द्वौ मातुष्वस्त्रीयकौ मिथः ॥११५१॥
पत्न्यां **विजयदेवायां धनदेवस्य मण्डिकः** । पुत्रोऽभूत् तत्र जातेऽपि **धनदेवो**ऽजनि व्यसुः[1] ॥११५२॥
**मौर्यो विजयदेवां** तद्भार्यां भार्यामभार्यकः । चकार देशाचारेण तत्र नैतत् त्रपाकरम् ॥११५३॥
**मौर्याद्विजयदेवा**यामजायत सुतस्ततः । स **मौर्यपुत्र** इत्येवं प्रथया भुवि पप्रथे ॥११५४॥
**मिथिलायां** तथा **देव**नाम्नो विप्रस्य नन्दनः । **अकम्पिता**भिधानोऽभूज्**जयन्ती**कुक्षिसम्भवः ॥११५५॥
द्विजस्य **वसु**नाम्नस्तु **कोशला**पुरवासिनः । नाम्नाऽभू**दचलभ्राता नन्दायां** नन्दनः स्त्रियाम् ॥११५६॥
**तुङ्गिका**सन्निवेशेऽथ **वत्स**देशे द्विजन्मनः । सूनु**र्दत्तस्य मेतार्य**नामाऽभूद् **वरुणात्म**भूः ॥११५७॥
पुत्रः **प्रभास** इत्यासीद् **बला**ख्यस्य द्विजन्मनः । गृहिण्या**मतिभद्रा**यां पुरे **राजगृहे** पुनः ॥११५८॥
एकादशाप्यमी जाताः शिष्यजातैर्वृताः पृथग् । उपाध्यायाश्चतुर्वेदीचतुरा **गौतमा**दयः ॥११५९॥
यष्टुं पुर्या**मपापायां** तानध्वरधुरन्धरान् । सोमपः **सोमिलो** नाम समृद्धः श्रद्धयाऽऽनयत् ॥११६०॥
तदा च वन्दितुं **वीरं** देवेष्वायात्सु **गौतमः** । ऊचे मन्त्रप्रभावैर्नः साक्षादायान्त्यमी मखम् ॥११६१॥
तेषु यात्सु जिनं लोका जगुः प्राप्तोऽस्ति सर्ववित् । उद्याने यान्ति तं नन्तुं सुराः पौराश्च हर्षिणः ॥११६२॥
श्रुत्वेति **गौतमः** कोपादगदज्जगदग्रिमे । मयि स्थितेऽत्र सर्वज्ञे क्व पाखण्डिनि यान्त्यमी ॥११६३॥
कस्यापि दाम्भिकस्याहो दम्भो दम्भोलिभृन्मुखाः । मूर्खा येन प्रतार्यन्ते नरा इव सुरा अपि ॥११६४॥
तदस्य पश्यतामेषां छिन्दे सर्वज्ञतामिति । पञ्चशत्यावृतः शिष्यै**र्गौतमो**ऽगाद् विभोः सभाम् ॥११६५॥
स्वस्वशिष्यवृताः सर्वे सर्ववेदाः परेऽपि ते । ईदृग्धिया ययुस्तत्र हृष्यन्तः शकुनैः शुभैः ॥११६६॥
प्रभोः प्रभावमृद्धिं च रूपं च विनिरूप्य ते । स्तब्धतां विस्मया[१]दापुर्मुक्तत्वस्येव वर्णिकाम् ॥११६७॥
[२]सम्पृष्टा नामगोत्राभ्यां न चमच्चक्रिरेऽपि ते । अस्मान् को वेद नो [2]वेदमुच्चैः सम्भाव्य गर्विताः ॥११६८॥
स्वयं जीवादिसन्देहान् भङ्क्त्वा तेषां हृदि स्थितान् । सम्यक्तत्त्वार्थबोधेन प्रभुणाऽमी प्रबोधिताः ॥११६९॥
प्रव्रज्यापूर्वमेतेषां त्रिपदीमुपदिश्य च । द्वादशाङ्गीं जिनः सङ्गनिर्ममो निरमापयत् ॥११७०॥
तीर्थमित्थं प्रतिष्ठाय चरमो धर्मचक्रभृत् । [३]मोहाब्धिमग्नमुद्धर्तुमिलाचक्रं स चक्रमे ॥११७१॥
पद्माभिरामहस्तेन महस्तेन प्रतन्वता । रविणेव तमस्तोमः समस्तो महता हतः ॥११७२॥
गाः केवलसुधाम्भोधिबोधिका इति तन्वतः । जिनेन्दोर्भव्यकुमुदमुदे विहरतोऽभितः ॥११७३॥
परिवारे प्रभोः साधुचतुर्दशसहस्र्यभूत् । शुद्धाः साध्व्यश्च षट्त्रिंशत्सहस्राणि गुणोल्बणाः ॥११७४॥

---

१. दीयुर्मु D, K, H । दानुः मु...KH । २. आपृष्टा L, B, P, A । ३. 'मोहाग्नि'....D, P ।

टि. 1. विगताः असवः प्राणाः यस्य स व्यसुः मृतः इत्यर्थः । 2. वा इदं उच्चैः इति सन्धिविग्रहः ।

श्रावकाणां लक्षमेकं चैकषष्टिसहस्रयुक् । त्रिलक्षी श्राविकाणां च साऽष्टादशसहस्रिका ॥११७५॥ विशेषकम् ॥
मुक्तिं नवसु यातेषु गणभृत्सु ततः प्रभुः । **सगौतमसुधर्मो**ऽगाद**पापां** त्रिदशैर्वृतः ॥११७६॥
त्रिप्राकारं सदश्चक्रुर्द्युसदस्तत्र च प्रभुः । आयुरन्तं विदित्वाऽन्त्यदेशनार्थमुपाविशत् ॥११७७॥
गोपाले[1][1] **हस्तिपाले** च ततो**ऽपापापुरी**पतौ । नत्वा स्तुत्वा विरतयोर्विदधे देशनां विभुः ॥११७८॥
**पुण्यपाला**ख्यराजन्यपृष्टाष्टस्वप्निकाफलम्[2] । विभुर्दुःसमयाद्धर्मशैथिल्यं भाव्यथादिशत् ॥११७९॥
भङ्क्त्वा सन्देहसन्दोहं ततः सन्देहिदेहिनाम् । आतृतीयारपर्यन्तं भाव्यादिश्**येन्द्रभूतये** ॥११८०॥
मत्वा तद्दिनयामिन्यामात्मानो मुक्तिसङ्गमम् । **हस्तिपाल**महीपालशुल्कशालामगात् प्रभुः ॥११८१॥ युग्मम् ॥
अस्मासु भासुरः स्नेहः केवलज्ञानविघ्नकृत् । **गौतम**स्याऽद्य विच्छेद्य इति ध्यात्वाऽथ तीर्थकृत् ॥११८२॥
परस्मिन् **देवशर्मा**ऽस्ति ग्रामे विप्रः स च त्वया । प्रबोधं प्राप्स्यतीत्युक्त्वा तत्र प्रायुङ्क्त **गौतमम्** ॥११८३॥ युग्मम् ॥
अथेशः **कार्त्तिके दर्शक्षणदापश्चिमक्षणे । षष्ठेन स्वातिनक्षत्रे** समसज्जत मुक्तये ॥११८४॥
पीठकम्पात् ततः सर्वे सुपर्वेशा इहाऽऽययुः । व्यजिज्ञपत् **सुधर्मेश**स्तीर्थेशं सास्रलेशदृग् ॥११८५॥
हस्तोत्तराख्यं त्वज्जन्मनक्षत्रं भस्मकग्रहः । क्रामन्नस्त्यधुना नाथ ! तन्मुहूर्तं प्रतीक्ष्यताम् ॥११८६॥
चेत् तत्सङ्क्रमणे वः स्यान्निर्वाणं दुर्ग्रहः स तत् । भवद्गोत्रमुभे वर्षसहस्रे पीडयिष्यति ॥११८७॥
अथाभ्यधात् प्रभुः कोऽपि नायुः सन्धातुमीश्वरः । विदन्नपीदं किं मोहाद्वदसि द्युसदांवर ! ॥११८८॥
इति प्रबोध्य पर्जन्यं[2] पर्यङ्कासनभाक् प्रभुः । तृतीयशुक्लध्यानादियोगात् सोऽगात्परं पदम् ॥११८९॥

इत्थं निष्ठुरदुष्करे तपसि वा सृष्टेषु दुष्टैर्जनैः ।
दुर्वृत्तेषु तितिक्षयाऽथ भगवान् **वीरो**ऽतिधीरो यथा ॥
किं चात्युग्रमहोपसर्गपवनास्कन्दैरकम्प्राशयः ।
प्राज्ञैस्तद्वदिहापरैरपि सदा भाव्यं महासाधुभिः ॥११९०॥ [ शार्दूल० ] [आदितो ग्रन्थाग्रम्-१९६०]

**इति श्रीमहावीरचरितम् ॥**

अथ[3] भगवद्दृष्टान्तेनैव आचार्यः क्षमामुपदर्शयति–

**जइ ता तिलोयनाहो वि, सहइ बहुआइं असरिसजणस्स ।**
**इय जीयंतकराइं, एस खमा सव्वसाहूणं ॥४॥**

**यदि तावत् त्रिलोकनाथः** प्रकमान्**महावीरो**ऽपि **सहते** तितिक्षते **बहूनि** नानाविधानि **असदृशजनस्य** नीचलोकस्य **इतीति** भुवनविदितानि[4] **जीवान्तकराणि** सोपक्रमायुर्जीवापेक्षया प्राणविच्छेदकारीणि दुश्चेष्टितानीति गम्यते । **एषा** अनन्तरोदिता **क्षमा** क्षान्तिरपराधिनमप्युद्दिश्य माध्यस्थ्यलक्षणा **सर्वसाधूनां** समस्तयतीनां उपदेशाधिकारात् कर्तुमुचितेत्युपनीयते ॥४॥

---

१. गोपालहस्तिभूपाले ततो KH । २. दृष्ट B, L, A । ३. अर्हं अथ L । ४. लोकविदि...P ।
टि. 1. गो (पुं.) स्वर्गः तं पालयति इति गोपालः इन्द्रः । 2. पर्जन्यः (पुं.) इन्द्रः तम् ।

अथोपसर्गेषु निष्प्रकम्पतां परमेश्वरस्तुतिद्वारेणोपदिशति—

**न चइज्जइ चालेउं, महइ महावद्धमाणजिणचंदो ।**
**उवसग्गसहस्सेहि वि, मेरु जहा वायगुंजाहिं ॥५॥**

**न चइज्जइ** त्ति **न** शक्यते शुभध्यानात् **चालयितुं** [१]कम्पयितुं **महदतिमहान्** महतामपि सर्वजनपूजनीयानां शक्रादीनामप्यतिशयेन तीर्थकरलक्ष्मीप्रणयलक्षणेन **महान्** पूज्यः, स तथा **वर्द्धमानश्चासौ जिनचन्द्रश्चेति** पूर्ववत्। स तथा कैः ? इत्याह—उपसृज्यते सन्मार्गात् प्रेर्यते जन्तुरेभित्युप**सर्गाः** कदर्थनानि तेषां **सहस्त्रैरपि**। [२]अत्रौपम्यमाह **मेरुः** शैलराजो **यथा वायुगुञ्जाभिः** सशब्दप्रबलवातोत्कलिकाभिः कम्पयितुं न शक्यते, तथा भगवानपीत्यर्थः ॥५॥

अथ धर्मस्य विनयमूलत्वात् गणधरोद्देशेन विनयमुपदिशति—

**भद्दो विणीय[३]विणओ, पढमगणहरो समत्तसुयनाणी ।**
**जाणंतो वि तमत्थं, विम्हियहियओ सुणइ सव्वं ॥६॥**

**भद्रः** कारणे कार्योपचारात् कल्याणः सुखश्च, **विनीतविनयः** सदनुष्ठितभक्तिः, **प्रथमगणधरः** एतत्तीर्थापेक्षया भगवा**निन्द्रभूतिः**। समाप्तं सम्पूर्णं श्रुतज्ञानं यस्येति **'सर्वादेरिन्'** [सि.हे.श. ७-२-५९] इति आकृतिगणत्वादिनि **समाप्तश्रुतज्ञानी**, अत्र चतुर्दशपूर्वधराणामपि मिथः षट्स्थानपतितत्वात् समाप्तेति विशेषणस्य नानर्थक्यं **जानन्नपि तं** भगवदभिधेय**मर्थं सर्वं** निशेषं **विस्मितहृदयो**ऽपूर्वमिव बहिः प्रत्यक्षरोमाञ्चोत्फुल्ललोचनतामुखप्रसादादिकार्यलिङ्गानुमितकौतुकाक्षिप्तचित्तः **शृणोति** आकर्णयति, एवमन्यैर्विद्वद्भिरपि गुरुवचः श्रोतव्यमिति भावः ॥६॥

इदमेव लौकिकदृष्टान्तेन स्पष्टयति—

**जं आणवेइ राया, पगईओ तं सिरेण इच्छंति ।**
**[४]इय गुरुजणमुहभणियं, कयंजलिउडेहि सोअव्वं ॥७॥**

**यदाज्ञापयति** आदिशति **राजा** प्रभुः, **प्रकृतयः** पौरजानपदास्**तदा**दिष्टं **शिरसा** उत्तमाङ्गेन **इच्छन्ति** साभिलाषं गृह्णन्ति। दार्ष्टान्तिकयोजनामाह—**इत्येवमनेनैव** क्रमेण **गुरुजनमुखे**न [५]शास्तृलोकद्वारेण अन्येनापि **भणित**मुक्तं **गुरुजनभणितं** तत्**कृताञ्जलिपुटै**र्विनयावर्जितकरकोरकैः **श्रोतव्य**माकर्णनीयम्। अत्र गुरुजनादेशोऽयमिति येन तेन सन्दिष्टेऽप्येष विधिर्यत्पुनः स्वयमेवादिशन्ति गुरवस्तद्विशेषतः श्रोतव्यमिति भावः ॥७॥

गुरोरेव गौरवं विशेषतः प्राह—

**जह सुरगणाण इंदो, गहगणतारागणाण जह चंदो ।**
**जह य पयाण नरिंदो, गणस्स वि गुरू तहाणंदो ॥८॥**

**यथा** इत्यौपम्यार्थे **सुरगणानां** देवसमूहानाम् **इन्द्रः** शक्रस्तथा। **ग्रहाणा**मष्टाशीतिसङ्ख्यानां मङ्गलादीनां; 'गण्यन्ते' ज्योतिषव्यवहारे शेषताराचक्रादष्टाविंशतिसङ्ख्यया पृथक् स्थाप्यन्ते इति व्युत्पत्त्या **'युवर्ण...'** [सि.हे.श.

१. 'कंपितुं' B। २. अत्रोपमामाह। ३. विणीअ० B। ४. इति शब्दस्य इयाऽऽदेशः प्राकृतलक्षणात्। ५. शास्त्रलोकनद्वारेण L।

५-३-२८] इत्यलि **गणानाम**भीच्यादिनक्षत्राणां, ताराणां शेषतारिकाणां च गणाः समूहा**स्तेषां ग्रहगणतारागणानां यथा चन्द्रः । यथा च प्रजानां** पौरजनानां **नरेन्द्रः** । गणस्यापि साधुसंहतिरूपस्य **गुरुराचार्यस्तथा आनन्द**स्तद्धेतुत्वात् । अनुस्वारस्यार्षत्वाद्वा आज्ञां ददातीति **आज्ञादो** वाऽनुल्लङ्घ्यादेश इति भावः ॥८॥

अथ शेषयत्यपेक्षया बालस्याप्याचार्यस्य महत्त्वमेवेत्याह—

**बालु त्ति महीपालो[1], न पया परिहवइ एस गुरुउवमा ।**
**जं वा पुरओ काउं, विहरंति मुणी तहा सो वि ॥९॥**

**महीपालो राजा 'बाल' इति** शिशुरिति मत्वा **न** नैव **प्रजा** मन्त्रिमहत्तमादिर्लोकः **परिभवति** अवजानाति । उक्तं च—

**"बालोपि नावमन्तव्यो मनुष्य इति पार्थिवः ।**
**महती देवता ह्येषा नररूपेण तिष्ठति" ॥ [ ]**

महीपालरूपा गुरोराचार्यस्योपमा सादृश्यमित्यर्थः । अनाचार्योपि यो मुख्यः कृतः सोप्याचार्यवद् द्रष्टव्य इत्याह— **यं वा** सामान्यसाधुमपि वयःपर्यायाभ्यां हीनमपि, गीतार्थतया प्रदीपकल्पम् **पुरतः कृत्वा**ऽग्रतो विधाय **विहरन्त्य**प्रतिबद्धविहारेण **मुनयः** साधवः । **सोपि तथा** आचार्य इव न परिभवनीय इति ॥९॥

अथ गुरोः स्वरूपयोग्यतां गाथाद्वयेनाह—

**पडिरूवो तेयस्सी, जुगप्पहाणागमो महुरवक्को ।**
**गंभीरो धीमंतो उवएसपरो य आयरिओ ॥१०॥**

**अपरिस्सावी सोमो, संगहसीलो अभिग्गहमईय ।**
**अविकत्थणो अचवलो पसंतहियओ गुरू होइ ॥११॥**

प्रतिनियतं विशिष्टसंस्थानवद् रूपं यस्य **प्रतिरूपः** प्रविभक्ताङ्गः । अथवा प्रधानगुणयोगितया तीर्थकरस्य प्रतिबिम्बमिव रूपं यस्य स **प्रतिरूपो** दृष्टमात्र एवागमप्रमाणानुभूततीर्थकरमूर्त्तिप्रत्यभिज्ञानहेतुरित्यर्थः । अनेन शरीरसम्पदुक्ता । **तेजस्वी** दुर्द्धर्षदीप्तिमान् अनेन प्रयोगसम्पदुपक्षेपः । युगे वर्त्तमानकाले शेषजनापेक्षया प्रधानः सूत्रार्थतदुभयैरुत्कृष्ट **आगमः** श्रुतं यस्य स **युगप्रधानागमः** । एतेन श्रुतसम्पदभ्युपगमः । **मधुरवाक्यो** मनोहारिवचन इति वचनसम्पदमाह । **गम्भीरो**ऽतुच्छतया परैरलब्धमध्यः । **धृतिमान्** निष्प्रकम्पचित्तो मतिसम्पत् परिग्रहाय **धीमान्** वा शिष्यादीनामैहिकामुष्मिकापायेभ्यो रक्षणोपायबुद्धिमान् । **उपदेशपरो** धर्ममार्गप्रवर्त्तकवचनस्वभाव इति वाचनामतिसम्पत्परिग्रहः । **च**ः समुच्चये, **आचार्यो** ज्ञान-दर्शन-चारित्र-तपो-वीर्यभेदभिन्ने आचारे साधुः ॥१०॥

तथा **अप्रतिश्रावी अपरिश्रावी** वा जलादेस्तथाविधभाजनविशेष इव परकथितात्मगुह्यार्थस्याऽप्रतिश्रवणशीलोऽक्षरणस्वभावः । **सौम्यः** आह्लादसम्पादकमूर्त्तिमान् । **सङ्ग्रहशीलो** गणोपग्रहहेतूनां शिष्याणां वस्त्रपात्राद्युपकरणानां वा[1]ऽऽदानस्वभावः इति सङ्ग्रहपरिज्ञासम्पदमुपक्षिपति । अभिग्रहा द्रव्यक्षेत्रकालभावविषया

---

१. चाऽऽदान B, L, K । टि. 1. 'महीपालो'त्ति द्वितीयास्थाने प्रथमा, प्राकृते विभक्तीनां व्यत्ययात् ।

नियमास्तेषु स्वयं ग्रहीतुं परान् ग्राहयितुं मतिर्मनः परिणामो यस्य सोऽ**भिग्रहमतिक** इत्याचारसम्पत्-सम्पन्नतामाह । **अविकत्थनो** नात्मश्लाघको बहुभाषी वा । **अचपलः** स्थिरस्वभावः । **प्रशान्तहृदयः** कषायाग्न्युपशमेन शीतचित्तः । एतेनार्थतश्चतुर्द्धापि विनयोपग्रह इति एवं गुणसम्पन्नो **गुरुस्**तृतीयपरमेष्ठी **भवतीति** । अनेन गाथाद्वयेन सूचितानां षट्त्रिंशतः सूरिगुणानां सङ्ग्रहगाथेयं–

"**काय[१]प्पयोग[२]सुय[३]वयण[४]मइ[५]वायण[६]संगहेसु[७] आयारे[८] ।**
**इय संपयऽट्ठ विणओ[९] चउह त्ति गुणा इमे गणिणो**" ॥ [ ]

अस्य व्याख्या–काय त्ति प्रथमा **शरीरसम्पच्**चतुर्द्धा–[१]आरोहपरिणाहयुक्तता प्रमाणोपेतत्वं, [२]अनवत्राप्यता अलज्जनीयता सुघटाङ्गत्वेन, [३]परिपूर्णेन्द्रियत्वं, [४]स्थिरसंहननता अशक्तित्यागेन ।

प्रयोग इति सूचनात् **प्रयोगमतिसम्प**द्वादजयार्थं प्रमाणोपन्यासव्यापारकौशलरूपा द्वितीया, सापि चतुर्धा–[१-२]आत्मज्ञानं पुरुषज्ञानं च स्वपरयोः सामर्थ्यविमर्शः, [३]क्षेत्रज्ञानं प्रतिकूलानुकूलादिबाहुल्यविमर्शः,[४]वस्तुतत्त्वज्ञानमायतिहिताहितादिविमर्श इति ।

तृतीया **श्रुतसम्पद**पि चतुर्द्धा [१]बहुश्रुतता [२]परिचितसूत्रता अविस्मरणतया, [३]विचित्रसूत्रता–आदेरन्तं यावत् अन्तादादिं यावच्च विविधाधिगमरूपा, [४]घोषविशुद्धिकरणता उदात्तादिस्वरशुद्धिविधायकत्वमिति ।

चतुर्थी **वचनसम्प**दपि चतुर्द्धा–[१]आदेयता सुप्रतिष्ठवाक्यत्वं, [२]माधुर्यं परुषाप्रियत्यागेन [३]अनिश्रितत्वं समताभावेनेति, [४]असन्दिग्धत्वमिति ।

पञ्चमी **मतिसम्प**दपि सम्यग[१]वग्रहे[२]हा[३]पाय[४]धारणाभेदाच्चतुर्द्धा ।

षष्ठी **वाचनासम्प**दपि चतुर्द्धा–[१]विदित्वोद्देशनं [२]शिष्ययोग्यतानुसारेण विदित्वा समुद्देशनं च, [३]परिनिर्वाप्य वाचना पूर्वप्रदत्तालापकानन्तरमुत्तरालापकदानरूपा, [४]अर्थनिर्यापना अर्थस्य पूर्वापरसाङ्गत्येन निर्वाहनमिति ।

सप्तमी सङ्ग्रह इति सूचनात् **सङ्ग्रहपरिज्ञाख्या** सम्पच्चतुर्द्धा [१]निर्वाहयोग्यक्षेत्रस्वीकारः, [२]पीठफलकोपादानं, [३]यथासमयं स्वाध्यायप्रत्युपेक्षणाभिक्षाटनोपधिसमुत्पादनानि, [४]यथायोग्यं वैनयिकाचारविधापनं चेति ।

अष्टमी **आचारसम्पद**पि चतुर्द्धा संयमध्रुवयोगयुक्तता चारित्रसमाधानोपेतत्वं [१]सूत्रार्थसततोपयुक्ततेति यावत् , [२]असम्प्रग्रहो जात्यादिभिरनुत्सेकः [३]अनियतवृत्तिरप्रतिबद्धविहारशीलता, [४]मनसि वपुषि च निर्विकारत्वमिति ।

तथा नवमो **विनयो**ऽपि चतुर्द्धा–तत्र प्रथम **आचारविनयः** [१]संयमे [२]तपसि [३]गणे [४]एकाकिविहारे च सामाचारीरूपश्चतुर्द्धा, द्वितीयः **श्रुतविनयो**ऽपि सूत्र १ अर्थ २ हित ३ निःशेषवाचनारूपश्चतुर्द्धा, तृतीयो **विक्षेपणाविनयो**ऽपि [१]मिथ्यादृष्टिं सम्यक्त्वं ग्राहयति, [२]सम्यग्दृष्टिं [२]प्रव्राजयति, [३]रत्नत्रयाद् भ्रष्टं तत्रैव प्रत्यानयति, [४]स्वयं चारित्रधर्ममभिवर्द्धयति देशनायुक्तिभिर्विक्षिप्येति चतुर्द्धा । चतुर्थो **दोषनिर्घातनाविनयो**ऽपि क्रोधात् १, कषायविषयभेदात् २, भक्त–पान–परसमयाद्या–काङ्क्षायाश्चोपदेशादिभिर्निर्विवर्त्तनं ३, स्वयं च क्रोधादिदोषा–काङ्क्षामुक्तस्य प्रवर्त्तनमिति ४ चतुर्द्धा । तदेवं नवचतुष्काः सर्वेऽपि षट्त्रिंशद् गुणा इमे व्याख्यातरूपा गणेर्भवन्तीति ।

---

१. परिव्राज...A । २. निःसृतत्वं-K, D निःसूतत्वं-C ।

अथवा अमी षट्त्रिंशत् सूरिगुणाः सूच्यन्ते तथाहि—

"[१]देस[२]कुल[३]जाति[४]रूवी[५]संघयण[६]धिईजुओ[७]अणासंसी ।
[८]अविकत्थणो [९]अमाई [१०]थिरपरिवाडी [११]गहिअवक्को ॥१॥ [ सं.प्र./६०० ]

[१२]जिअपरिसो [१३]जियनिद्दो [१४]मज्झत्थो [१६]देसकाल[१७]भावन्नू ।
[१८]आसन्नलद्धपइभो [१९]नाणाविहदेसभासण्णू ॥२॥ [ सं.प्र./६०१ ]

पंचविहे आयारे [२४]जुत्तो [२५]सुत्तत्थतदुभयविहिन्नू ।
[२६]आहरण[२७]हेउ[२८]कारण[२९]नयनिउणो [३०]गाहणाकुसलो ॥३॥ [ सं.प्र./६०२ ]

[३१]ससमय[३२]परसमयविऊ [३३]गंभीरो [३४]दित्तिमं [३५]सिवो [३६]सोमो ।
गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं" ॥४॥ [ सं.प्र./६०३ ]

आसामर्थः **कल्पादवसेयः** । प्राथमिकव्याख्यातृणामनुग्रहाय तु लेशत उच्यते । (१) **आर्यदेशोत्पन्नः** सुखावबोधवाक्यो भवति । (२) पैतृकं कुलं, **विशिष्टकुलोत्पन्नो** यथोत्क्षिप्तभारवहने न श्राम्यति (३) मातृकी[१] **जातिः, तत्सम्पन्नः** सुशीलतया विनीतो भवति । (४) **रूपवानादेयवाक्यो** भवति । आकृतौ च गुणा वसन्ति । (५-६) **संहनन-धृतिभ्यां** युक्तो व्याख्यान-तपोऽनुष्ठानादिषु न खिद्यते । (७) **अनाशंसी** श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति । (८) **अविकत्थनो** बहुभाषित्वाभावान्न जञ्जपूको न वा आत्मश्लाघी । (९) **अमायी** न शाठ्येन शिष्यान् वाहयति । (१०) **स्थिरपरिपाटिः** स्थिरपरिचितग्रन्थस्तस्य न सूत्रं गलति । (११) **जितवाक्यो**ऽप्रतिघातिवचनो भवति । (१२) **जितपरिषन्न** परप्रावादुकैः क्षोभ्यते । (१३) **जितनिद्रो**-ऽप्रमत्तत्वाद् व्याख्यानरतिर्भवति प्रकामनिकामशायिनः शिष्यांश्च प्रेरयति । (१४) **मध्यस्थो**ऽपक्षपातेन संवाहको भवति । (१५) **देश** (१६) **काल** (१७) **भावज्ञो** देशादिगुणानवबुध्य यथानिर्वाहमप्रतिबद्धं विहरति देशनां च करोति । (१८) **आसन्नलब्धप्रतिभः** परेण जात्युत्तरादिना निगृहीतः सद्यः प्रत्युत्तरदानसमर्थो भवति । (१९) **नानाविधदेशभाषाविधिज्ञो** नानादेशजविनेयप्रत्यायनपटुर्भवति । (२०-२४) **ज्ञानादिपञ्च-विधाऽऽचारयुक्तः** श्रद्धेयवचनो भवति । (२५) **सूत्रार्थोभयज्ञः** सम्यगुत्सर्गापवादप्ररूपको भवति । (२६) **उदाहरणे** धूमाद्यनुमानेषु महानसादिरूपे दृष्टान्ते । (२७) **हेतौ** ज्ञापकवह्न्यादिसिद्धौ धूमवत्त्वादिके । (२८) **कारणे** कुम्भादेर्मृत्पिण्डवदुपादानरूपे सूत्रखण्डदण्डचक्रचीवरादिवन्निमित्तरूपे च साधके । (२९) **नयेषु** च एकादशविशिष्टार्थवाचिषु नैगमादिषु **निपुणः** कुशल उदाहरणहेतुकारणनयनिपुणस्तद्गम्यान् भावान् सम्यक्प्रपञ्चेन प्ररूपयति नागममात्रमेव । (३०) **ग्राहणाकुशलः** शिष्यान् यथोचितमन्वयव्यतिरेकाभ्यामनेकधा ग्राहयति । (३१) **स्वसमय** (३२) **परसमयवित्** परमताक्षेपेण स्वसमयं सुखं प्ररूपयति । (३३) **गम्भीरो** महत्यपि कार्ये न रुष्यति । (३४) **दीप्तिमान्** दृष्टमात्रोपि परप्रवादिनां क्षोभमुत्पादयति । (३५) **शिवो** मारिरोगाद्युपद्रवविघातकृद् भवति । (३६) **सौम्यः** प्रशान्तदृष्टितया सकलजनप्रीत्युत्पादको भवति । एवम्भूतै-

---

१. मात्रिकी-D, A, C, H, K ।

रपरैश्च लोकोत्तरैर्**गुणशतैः कलितः** समन्वितो **युक्तोऽर्हत्प्रवचनसारमागम**रहस्यं **परिकथयितु**मुपदेष्टुमिति । तदेवं नव चतुष्काः सर्वेपि षट्त्रिंशद्गुणार्गुरोर्भवन्ति । अथवा–

**''दंसण-नाण-चरित्ताऽऽयारा अट्ठऽट्ठभेअभिन्नाओ ।**
**बारसविहतवजुत्ता छत्तीस गुणा इमे हुंति''** ॥१॥ [ आ.वि./१४ ]

एवंविधानेकगुणगणगरिष्ठो हि गुरुरनेकभव्यजनप्रबोधहेतुर्भवतीति । यतः–

**''गुणसुट्ठियस्स वयणं घयमहुसित्तो व्व पावओ भाइ ।**
**गुणहीणस्स न सोहइ नेहविहूणो जइ पईवो''** ॥१॥ [ ]

तथा– **''शीतेऽपि यत्र[1] लब्धो, न सेव्यतेऽग्निर्यथा श्मशानस्थः ।**
**शीलविपन्नस्य[2] वचः पथ्यमपि न गृह्यते तद्वत्** ॥१॥ [ ]
**चारित्रेण विहीनः, श्रुतवानपि नोपजीव्यते सद्भिः ।**
**शीतलजलसम्पूर्णः कुलजैश्चण्डालकूप इव''** ॥२॥ [ ] इति ॥११॥

अथ किमर्थमियती गुणसम्पद् गुरोर्मृग्यते इत्याह–

**कइया वि जिणवरिंदा, पत्ता अयरामरं पहं दाउं ।**
**आयरिएहिं पवयणं, धारिज्जइ संपयं सयलं ॥१२॥**

**कदापीति** प्रभूतकालार्थः तेन कस्मिन्नपि चिरातिक्रान्ते काले **जिनवरेन्द्रा**स्तीर्थकराः **प्राप्ता** यातवन्तोऽ**जरामरं** मोक्ष**पथं** सम्यग्दर्शनज्ञानचारित्ररूपं सन्मार्गं **दत्त्वा** उपदिश्य भव्येभ्य इति शेषः, तत्काले च तत्प्रभावादेव प्रवचनं मर्यादया व्यवस्थितम् । तेषु पुनर्भगवत्सु परमपदप्राप्तेष्व**ाचार्यैः** सूरिभिः **प्रवचनं** तीर्थं चतुर्वर्णश्रीश्रमणसङ्घरूपमागमरूपं च **साम्प्रत**मिति युक्तं **धार्यते** मर्यादावर्त्तितया लोके व्यवस्थाप्यते । चित्ते चाऽविच्युतिरूपया धारणया स्मर्यते **सकलमि**ति सविज्ञानं सम्पूर्णं च प्रवचनधारणं च न गुणविकलैः कर्त्तुं शक्यमिति भावः ॥१२॥

अथ **चन्दना**ऽर्याया मानकषायजयप्रशंसाद्वारेण साधून् प्रति शेषव्रतिनीनां विनयमुपदिशति–

**अणुगम्मइ भगवई, रायसुअज्जा सहस्सविंदेहिं ।**
**तह वि न करेइ माणं, परियच्छइ तं तहा नूणं ॥१३॥**

**अनुगम्यते भगवती राजसुता आर्या** चन्दना **सहस्रवृन्दै**रनेकभरणपोषणसमर्थतया वृन्दार्हैः पूजितलोकैरिति गम्यते **तथापि** न करोति **मानं** गर्वं, **परीच्छति** परिबुध्यते **तत्तथा नूनं** निश्चितं यद्गुणानामयं प्रभावो न ममेति यद्वा **तं** मानं **तथा** नीचैर्गोत्रहेत्वादिदुर्विपाकप्रकारं **नूनं** जानीत इति समासार्थः ॥१३॥

व्यासार्थः कथानकादवसेयः तच्चेदम्–

**[ चन्दनाकथानकम् ॥ ]**

**चम्पेशाद्धारिणी**जानेर्**दधिवाहन**तः सुता । **कौशाम्ब्यां वसुमत्या**ख्या ववृधे या वणिग्गृहे ॥१॥
**धनावहेन** पित्रेव **चन्दने**ति कृताभिधा । पारणानन्तरं भर्त्तुर्**मृगावत्य**न्तिके स्थिता ॥२॥

१. 'यत्र' A, K, B, H । २. शीलविहीनस्य-KH ।

स्वप्रतिबोधितभूपालकन्यकानां शतैर्वृता । ज्ञानोत्पत्तौ जगद्भर्तुः शक्रेणाऽऽनीय चाऽर्पिता ॥३॥
दीक्षिता शिक्षिताचारं तीर्थेऽत्र स्वामिना स्वयम् । सच्चारित्रपवित्रा सा प्रथमाऽभूत् प्रवर्त्तिनी ॥४॥ कलापकम् ॥
**कौशाम्ब्यां** चिन्तया चान्तश्चम्पातः कश्चिदन्यदा । निस्वः **श्वेतबको**नाम दुस्थितः समुपस्थितः ॥५॥
स राजाऽध्वनि साध्वीभिर्वृतां पौरजनार्चिताम् । शान्तिं मूर्त्तामिवाद्राक्षी**च्चन्दनां** नेत्रनन्दनाम् ॥६॥
श्रुत्वा लोकाच्च तद्वार्त्तां विस्मृतार्त्तिः सविस्मयात् । तद्वृन्दानुपदं गच्छन् **सुस्थितं** सूरिमासदत् ॥७॥
वन्दित्वा **चन्दना** सूरिं स्वोपाश्रयमथाऽऽश्रयत् । दुःस्थितः **सुस्थिता**चार्यमुपासीनः स तु स्थितः ॥८॥
ज्ञानेन योग्यतां ज्ञात्वा **सुस्थितेन** स सूरिणा । संसिच्याऽऽलापपीयूषैः परमान्नेन भोजितः ॥९॥
[१]व्रतेच्छुर्दीक्षयित्वाऽथ धर्मस्थैर्याय सूरिभिः । स प्रैषि साधुभिः सार्द्धं **चन्दनार्या**प्रतिश्रये ॥१०॥
बहिस्थैः साधुभिः सोऽन्तर्विधिनाऽथ प्रवेशितः । अभ्युत्तस्थे समं साध्वीसन्दोहै**श्चन्दनार्य**या ॥११॥
आसने [1]चापरीभोगे सन्निवेश्याऽथ वन्दितः । आनीतमार्यिकाभिश्च विष्टरं नेष्टमेतया ॥१२॥
पृष्टश्च भगवन् ! किं वः समागमनकारणम् । चेतसा विस्मितेनाऽन्तरचिन्तयदयं मुदा ॥१३॥
अहो धर्मप्रभावोऽयमियमेवंविधापि यत् । मम द्रमकमात्रस्य विनयं तनुतेतमाम् ॥१४॥
विचिन्त्योवाच वाचं च चञ्चद्विस्मयमानधीः । युष्माकं वार्त्तमन्वेष्टुं गुरुभिः प्रेषितोऽभवम् ॥१५॥
अथाऽऽपृच्छ्य बहिः प्राप्तः समन्तैरेष साधुभिः । गाढानुरक्तश्चारित्रे गुरूणामाश्रमेऽगमत् ॥१६॥
कुले रूपे श्रुते माने **चन्दनार्या**ऽजयन्मदान् । इमास्तदूनास्तदूना: किमार्याः साधुभक्तिभिः ॥१७॥

**इति चन्दनाकथानकम् ॥**

एतदेवाह—

**दिणदिक्खियस्स दमगस्स, अभिमुहा अज्जचंदणा अज्जा ।**
**नेच्छइ आसणगहणं, सो विणओ सव्वअज्जाणं ॥१४॥**

दिनं दीक्षितस्य यस्य तस्य **दिनदीक्षितस्य द्रमकस्य** रङ्कस्या**भिमुखा** कृताभ्युत्थाना **आर्या** सदाचरणपवित्रा **चन्दनार्या** चन्दना स्वामिनी 'आर्यः स्वामी'ति वचनात्, **नेच्छति आसनग्रहणं स विनयः सर्वाऽऽर्याणां** समस्तव्रतिनीनामिति ॥१४॥

तस्मात् स्थितमेतदित्याह—

**वरिससयदिक्खियाए अज्जाए अज्जदिक्खिओ साहू ।**
**अभिगमण-वंदण-नमंसणेण विणएण सो पुज्जो ॥१५॥**

**वर्षशतदीक्षितया आर्यया अद्यदीक्षितः साधुः** अभिगमनमागतादावभ्युत्थानं, वन्दनं-स्तवनं गुणोत्कीर्त्तनरूपं द्वादशावर्त्तादिरूपमभिवादनं वा, नमस्करणमा[२]न्तरः प्रीतिप्रतिबन्धः; एषां द्वन्द्वैकत्वे

१. 'व्रतेन' K । २. 'मान्तरप्रतीतिः प्रतिबन्धः' KH, L ।

टि. 1. अपरीभोगे-अविद्यमानः परिभोगो यस्य, तस्मिन् आसने बहुमानतयाऽन्येनाऽपरिभुक्तमासनं दत्तम् ।

**अभिगमनवन्दननमस्करणेन** तथा **विनयेना**सनदानादिना, छन्दोवशाद् व्यस्तनिर्देशः, **स पूज्य** इति ॥१५॥

कस्मादेवमित्याह—

**धम्मो पुरिसप्पभवो, पुरिसवरदेसिओ पुरिसजिट्ठो ।**
**लोए वि पहू पुरिसो, किं पुण लोगुत्तमे धम्मे ॥१६॥**

दुर्गतिप्रपतत्प्राणिधारणा**द्धर्मः** श्रुतचारित्ररूपः **पुरुषप्रभवः** पुरुषेभ्यः शेषजनापेक्षया प्रधाननरेभ्यो गणधरेभ्यः प्रभवस्तत्रोत्पत्तिर्यस्य स तथा **पुरुषवरै**स्तीर्थकृद्भि**र्देशितो**ऽर्थतः कथितः, **पुरुषज्येष्ठः** पुरुषस्वामिकत्वात् पुरुषप्रधानः **लोकेपि** तुच्छमतावपि जने **प्रभुः पुरुषः, किं पुनर्लोकोत्तमे** तत्त्वज्ञजनाभ्यर्च्चिते **धर्म** इति ॥१६॥

सोदाहरणं लोकेषु पुरुषप्राधान्यं गाथाद्वयेनाह—

**संवाहणस्स रन्नो, तईया वाणारसीए नयरीए ।**
**कण्णासहस्समहियं, आसी किर रूववंतीणं ॥१७॥**

**तह वि हु सा रायसिरी, उल्लटन्ती न ताईया ताहिं ।**
**उयरट्ठिएण एक्केण, ताईया अंगवीरेण ॥१८॥**

**संवाहननाम्नो राज्ञस्तदा** तत्परलोकगमनान्तरं **वाराणस्यां नगर्यां किले**ति परोक्षाप्तागमवादसंसूचकः, रूपवतीनामन्तःपुरसुन्दरीणां सम्बन्धिजातं **कन्यासहस्रमधिकमासीत्** यद्वा राज्ञः किल रूपवत् सुरूपं स्त्रैणमित्यन्तःपुरस्त्रीनिकुरम्बं कन्यासहस्रेण **महितं** पूजितमासीत् अथवा कन्यासहस्रमधिक**मासीत् किल रूपवतीना**मिति रूपवतीषु सुन्दरीषु मध्ये सौन्दर्यातिशयेन नमीश्वरमिवेत्यर्थः ॥१७॥ **तथापि च सा राजश्रीरुल्लटन्ती** [1]पर्यसेरिति उपलक्षणत्वादुत्पूर्वादपि असेर्लोट्टादेशः । **उदस्यन्ती** भ्रश्यन्ती **न तायता** न त्राता **ताभि**रन्तःपुरस्त्रीभिस्तासां कन्याभिश्च **उदरस्थितेनैकेन तायिताऽङ्गवीरणे**त्यक्षरार्थः ॥१८॥

भावार्थः कथानकादवसेयः । तच्चेदम्—

**[ संवाहनकथानकम् ॥ ]**

पुरा पुरि नरेन्द्रोऽभूत् **काश्यां संवाहना**भिधः । बह्व्योऽन्तःपुरिकास्तस्य तासां पुत्र्यश्च भूरिशः ॥१॥
दैवादपुत्रे त्रिदिवं गते तत्र पुरे नृपाः । विरोधिनः पुरीरोधं चक्रुर्विक्रमिणो बलैः ॥२॥
राज्ञीं च गुर्विणीमेकां मन्त्री निश्चित्यलक्षणैः । भाविपुत्रामिमामेवाऽभ्यषिञ्चत् **कुशला**भिधः ॥३॥
राजाऽय**मङ्गवीरो**ऽभूदिति ख्यातिं विधाप्य च । विजिग्ये विद्विषः सर्वानुत्साहप्रतिभानवान् ॥४॥
स्त्रीः सकन्याः पुरं राज्यं त्रायते स्म तदापि यः । **अङ्गवीरः** स वीरोऽभूत् पश्चादपि नृपाधिपः ॥५॥

**इति संवाहनकथानकम् ॥**

अन्यच्च—

**महिलाण सुबहुयाण वि मज्झाओ इह समत्तघरसारो ।**
**रायपुरिसेहिं निज्जइ जणे वि पुरिसो जहिं नत्थि ॥१९॥**

---

टि. 1. पर्यसेरिति-परि+अस् धातोः 'लट्ट' आदेशः इति वचनात् उद्+अस् धातोरपि बोद्धव्यः ।

**महिलानां सुबहूनामपि मध्यादिह जनेऽपी**ति सम्बन्धः, **समस्तगृहसारः** सर्वद्रव्यसञ्चयादिः **राजपुरुषै**रमात्यादिभि**र्नीयते** राजकुले प्राप्यते **यस्मिन्** गृहे **पुरुषो नास्ति** निःस्वामिकत्वादिति ॥१९॥

धर्मस्य पुरुषप्रधानत्वं लौकिकनीत्या स्थापितम् । तद्वत् किं सुकृतमपि लोकपङ्क्तिमात्रफलमित्याशङ्का[1]व्यपोहाय प्राह—

**किं परजणबहुजाणावणाहिं वरमप्पसक्खियं सुकयं ।**
**इय भरहचक्कवट्टी, पसन्नचंदो य दिट्ठंता ॥२०॥**

**किं परजनानां बहुभिर्ज्ञापनाभिः** प्रकटनाप्रकारै**र्वरं** प्रधान**मात्मसाक्षिकमेव सुकृतम्, इती**त्यवधारणे, तेनैवमेवैतन्नान्यथा '**इह**' अस्मिन्नर्थे **भरतचक्रवर्ती प्रसन्नचन्द्रश्च दृष्टान्ता**वित्यक्षरार्थः ॥२०॥

**भरतकेवलज्ञानकथा** चैवम् —

## [ भरतकेवलज्ञानकथानकम् ॥ ]

**अष्टापदा**द्रौ **नाभेय**प्रभोर्मोक्षक्षणे पुरा । सम्मोहान्मूर्च्छितश्चक्री **भरतः** क्ष्मातलेऽलुठत्[2] ॥१॥
शोकग्रन्थिविभेदाय रुदितं शिक्षयन् हरिः । तस्य कण्ठमथाऽऽलम्ब्य पूत्कारं तारमातनोत् ॥२॥
लब्धसञ्ज्ञोऽथ राजापि रुदन्नुच्चैःस्वरं पुरः । विह्वलः शोकपूरेण विललापेति बालवत् ॥३॥
नाथ ! त्यक्तः कुतो दोषादनाथोऽयं त्वया जनः । युष्मद्विना कथं भावी भवारण्येऽशरण्यकः ॥४॥
वियोगः सह्यते भानोः पुनरुद्गमनाशया । अनावृत्तिपदस्थस्य भवतस्तु सुदुस्सहः ॥५॥
मूलतोऽसि न यैर्दृष्टस्तेऽप्यस्मत्तः प्रभो ! वरम् । **अदृष्टेऽर्थे न तद्दुःखं दृष्टनष्टे तु यद्भवेत्** ॥६॥
बन्धवोऽप्यनुगन्तारस्त्वाममी मम सर्वथा । एक एवाहमत्राऽस्मि त्वया पङ्क्तिबहिष्कृतः ॥७॥
भूत्वा तस्य सुतः श्रीमन्निति शोकवशंवदः । अपि मुक्तिपदं प्राप्तं किं व्रीडयसि तं प्रभुम् ॥८॥
नृपः प्रलापान् कुर्वाणो गीर्वाणपतिना स्वयम् । इत्थं प्रबोधितः शोकशङ्कुं किञ्चित् मुमोच सः ॥९॥
अथादिष्टाः सुरेन्द्रेण चन्दनैर्नन्दनाहृतैः । पूर्वस्यां दिशि याम्यायां प्रतीच्यामपि च क्रमात् ॥१०॥
वृत्तां प्रभोः कृते त्र्यस्रा**मिक्ष्वाकु**कुलजन्मनाम् । चतुरस्रां परेषां तु चितां चक्रुर्दिवौकसः ॥११॥ युग्मम् ॥
ततो मुक्तशरीराणि निवेश्य शिबिकान्तरा । चितासमीपमानिन्युस्ते महेन महीयसा ॥१२॥
अथो यथोचितं तेषु निहितेषु चितान्तरे । वह्निं विचक्रुर्वायुं च **वह्निवायुकुमारकाः** ॥१३॥
तं च व्यधापयद् वह्निमह्नाया**ऽब्दकुमारकाः** । सुगन्धिभिरुपानीतैः क्षीरवारिधिवारिभिः ॥१४॥
ततः सर्वेऽपि देवेन्द्रा देवाश्च जगृहुर्मुदा । दंष्ट्रादन्तादिकान्यस्थिशकलानि यथोचितम् ॥१५॥
याचमानाश्च देवेभ्यो लब्धकुण्डत्रयाग्नयः । श्रावकास्तत्प्रभृत्येवमभूवन्नग्निहोत्रिणः ॥१६॥
भस्मभूषणतां प्रापुः परे तद्भस्मवन्दकाः । ततश्चितात्रयस्थाने रत्नस्तूपान्यधुः सुराः ॥१७॥

---

१. व्यपोहायाथाह-A । २. लुठन् KH, D, C ।

इन्द्राश्चाष्टाह्निकां **नन्दीश्वरे** कृत्वाऽञ्जनाद्रिषु । न्यस्य माणवकस्तम्भे दंष्ट्रा भर्तुरपूपुजन् ॥१८॥
**भरतो**ऽपि प्रभोरङ्गसंस्कारासन्नभूतले । त्रिगव्यूतोच्छ्रयं चैत्यं चक्रे योजनविस्तृतम् ॥१९॥
रत्नाश्मनिर्मितेनाऽथ तेन चैत्येन भासुरः । आविर्भूतो बभौ [1]रत्नगर्भागर्भ इवाचलः ॥२०॥
तत्र चैत्ये चतुर्द्वारि प्रतिद्वारं स मण्डपान् । विचित्रान् सूत्रयामास प्रभापल्लविताम्बरान् ॥२१॥
प्रत्येकं तत्पुरः प्रेक्षामण्डपानां चतुष्टयम् । अक्ष-पाटक-चैत्यद्रु-पीठ-पुष्करिणीयुतम् ॥२२॥
तं गिरिं दण्डरत्नेन समीकृत्य नृपो व्यधात् । **अष्टापदं** स सोपानैरष्टभिर्मेखलानिभैः ॥२३॥
लोहयन्त्रमयानेष्यज्जनताऽऽशातनाभयात् । रक्षकानार्षभिस्तत्राऽकार्षीत् कीनाशदासवत् ॥२४॥
तस्य **सिंहनिषद्या**ख्यप्रासादस्य च मध्यतः । देवच्छन्दं व्यधाच्चक्री रत्नपीठप्रतिष्ठितम् ॥२५॥
यथामानं यथावर्णं यथालाञ्छनमत्र च । **बिम्बानि ऋषभा**दीनां चतुर्विंशतिमातनोत् ॥२६॥
कृत्वा रत्नमयीः सर्वभ्रातॄणां प्रतिमा अपि । तत्रोपास्तिपरां भूयः स्वमूर्त्तिमपि निर्ममे ॥२७॥
बहिश्चैत्यं यथास्थाने प्रभोः स्तूपमपि व्यधात् । भ्रातॄणामपि च स्तूपान् नवतिं सनवाधिकाम् ॥२८॥
प्रतिष्ठाप्याथ बिम्बानि तत्र चैत्ये यथाविधि । पयोभिः स्नपयामास [2]मांसलाऽऽमोदमेदुरैः ॥२९॥
प्रमृज्य गन्धकाषाय्या चन्दनेन विलिप्य च । अर्च्चयामास माणिक्यसुवर्णकुसुमांशुकैः ॥३०॥
तत्र चागुरुकर्पूरधूप[3]धूम्याघना[१]वृते । कुर्वन् घण्टारवै[4]र्गर्जि विद्युतं भूषणद्युता ॥३१॥
तूर्यचामरसोत्कर्षं पुष्पवर्षमनोहरम् । कर्पूरारात्रिकं चक्री चक्रे शक्रेण सन्निभः ॥३२॥ युग्मम् ॥
तदन्ते च विधायोच्चैर्विधिवच्चैत्यवन्दनाम् । महीमहेन्द्र[२]स्तुष्टावादुष्टावनिपतिस्ततः ॥३३॥
अहो सहोत्थितज्ञानत्रयो विश्वत्रयीपतिः । दुःखत्रयात् परित्राता त्रिकालज्ञो जयत्ययम् ॥३४॥
जयत्येष स्वपरयोर्निर्विशेष[३]मना मुनिः । समीपदीपस्त्रैलोक्येऽप्युच्चैस्तमतमश्छिदे ॥३५॥
अयं जयति कन्दर्प्पसर्प्पदर्प्प[5]पतत्पतिः । सुरासुरशिरोरत्नराजिनीराजितक्रमः ॥३६॥
जयत्यसावसामान्यधामधामजिनाग्रणीः । समग्रजगदम्भोजविकासन[6]विभाविभुः ॥३७॥
असौ दिशतु विश्वेऽपि हर्षमुत्कर्षयन् गुणान् । स्पष्टमष्टमहाकर्ममर्मनिर्मन्थकर्मठः ॥३८॥
संपिष्टविष्टपाऽशिष्टदुरितोऽङ्कुरितोत्सवः । जयत्ययं [7]महामायात्रियामाया दिवाकरः ॥३९॥
असावपारसंसारसमुत्तारतरण्डकः । जयतादुज्ज्वलज्ञानमुक्ताऽऽधानकरण्डकः ॥४०॥
सिद्धिसौधोन्मुखप्राणिश्रेणिनिश्रेणिसन्निभः । रोहन्मोहद्रुमद्रोहलोहपर्शुर्जयत्ययम् ॥४१॥

---

१. 'वृत्ति' A, H । २. स्तुष्टाव तुष्टावनिपतिस्तुतः C । स्तुष्टवदुष्टावनिपतिस्तुतः B, KH, A । ३. महा A ।

टि. 1. रत्नगर्भा-पृथ्वी, तस्याः गर्भ इव रत्नमयचैत्यमण्डितत्वादचलो बभौ । 2. मांसलः अत्यन्तः । 3. धूम्या-धूमसमूहः । 4. गर्जिः (पुं)-मेघशब्दः, तम् । 5. पतत्पतिः गरुड इत्यर्थः । 6. विभाविभुः - विभायाः तेजसः विभुः स्वामी सूर्यः इत्यर्थः । 7. महामाया एव त्रियामा तस्या ध्वंसे सूर्य इव ।

**आदिनाथ**मिति स्तुत्वाऽपरानपि जिनेश्वरान् । पुनः पुनर्नमन् चैत्यान् कथञ्चिन्निर्ययौ नृपः ॥४२॥
गिरिं विलोकयन् वारं वारं वलितकन्धरः । भोक्तुं मोक्तुं चाऽसमर्थो निधानमिव तद्धनः[1] ॥४३॥
वस्त्रान्तमार्ज्जितोन्मज्जद्[१]बाष्पप्लुतविलोचनः । निभृतैर्मौनिभिर्भूपैर्वृतोप्येक इव व्रजन् ॥४४॥
मन्दमन्दांह्रिसञ्चारमुत्ततार गिरेस्ततः । नृपः शोकतमःपूरैरपश्यन्निव वर्त्तनीम्[2] ॥४५॥ विशेषकम् ॥
असौ सैन्यजनैः स्वस्ववाहनत्वरणाऽलसैः । शोकप्रच्छादितोत्साहमयोध्यामविशत् पुरीम् ॥४६॥
नाभेयप्रभुपादानां दिवानिशमसौ स्मरन् । त्यक्तान्यव्यापृतिस्तत्र तस्थावस्वस्थमानसः ॥४७॥
तममात्यजनो वीक्ष्य सर्वकृत्यपराङ्मुखम् । इति प्रबोधयामास पितृभ्रातृशुचाऽऽकुलम् ॥४८॥
जगतोपि कृतालोकं लोकोत्तरपदास्पदम् । तातं हृतविपत्पातं शोचितुं तव नोचितम् ॥४९॥
तद्वचःकुसुमाऽऽसारसारसौरभसम्भृतः[२] । शोच्यस्त्वया न चात्मापि पुण्यलक्ष्मीस्वयंवर ! ॥५०॥
मूर्खो दुःखार्दितोऽभ्येति लोकः शोकस्य वश्यताम् । सेवते न पुनर्धर्मं तत्प्रतीकारकारणम् ॥५१॥
त्वमप्याक्रान्तलोकेन शोकेन यदि जीयसे । शौण्डीर्यगर्जितं तत् ते न धत्ते ध्रुवमूर्ज्जितम् ॥५२॥
शक्रोऽप्यक्रीडयत् पीडाविस्मारणविधित्सया । एनं[३] प्रतिदिनं नानाविनोदैरात्तसम्मदम् ॥५३॥
जलैर्जितामृतैः स्वामिदेशनाबन्धबन्धुभिः । सह मित्रसमूहेन चक्रे केलिं कदापि च ॥५४॥
आदायाऽऽदाय पद्मानि तत्र मूर्द्धनि धारयन् । नृपः प्रमोदमाप्नोति प्रभोरंह्रिभ्रमादिव ॥५५॥
कदाप्युपवनोत्सङ्गे धत्ते मुदमसौ लसन् । पुष्पाणि वासिताशानि पश्यन्नीशस्य[3] कीर्तिवत् ॥५६॥
वहन् स कौसुमीं मालां हृदि तत्र प्रमोदते । प्रभोर्व्याख्याक्षणोन्मीलद्दशनद्युतिकौतुकात् ॥५७॥
भूनेता नित्यमित्यादिकेलिकल्लोलकौतुकी । मुदा निर्गमयामास वासरान् घटिकार्द्धवत् ॥५८॥
सांसारिकसुखाम्भोधिमग्नो भरतभूपतिः । विभोर्मोक्षदिनात् पञ्च पूर्वलक्षाण्यवाहयत् ॥५९॥
अन्येद्युः स्नात्रनिर्निक्तगात्रो धात्रीभृतांवरः[४] । अन्तरन्तःपुरावासं भूरिभूषणभूषितः ॥६०॥
रत्नादर्शगृहं प्राप प्रियाभिरभितो वृतः । **भरतेशो** नभोदेशं विभाभिरिव भास्करः ॥६१॥ युग्मम् ॥
शुशुभे सुस्थितस्तत्र दर्पणप्रतिबिम्बितः । विजितेन स्मरेणैव सेवितुं कृतसन्निधिः ॥६२॥
तदा विलोकमानस्य नृपस्य मणिदर्पणम् । अभवद् द्विगुणा मूर्त्तिः कान्तिः कोटिगुणा पुनः ॥६३॥
न्यस्तं मोहेन हिञ्जीर[५][4]मिव तस्य महीशितुः । तदा लीलालुलत्पाणेर्निर्जगालाऽङ्गुलीयकम् ॥६४॥
विना तेनाऽङ्गुलीयेन दृष्टा तेनाऽङ्गुली ततः । निःश्रीका निःपताकेव मणिकेतनयष्टिका ॥६५॥
सौभाग्यं भूषणैरेव बिभर्ति वपुरङ्गिनाम् । निश्चेतुमिति मोक्तुं स प्रारेभे भूषणावलीम् ॥६६॥

---

१. बाष्पलुप्त K, D, H, L । २. संवृतः A, B । ३. एवं-K । ४. धात्रीभृतांबरः...KH । ५. हंजीर – KH ।

टि. 1. कृपणः । 2. पद्धति वर्त्म वर्तनी 'इति अभिधानचिं. श्लो. ९८३ । 3. ईशस्य-प्रभोः । 4. 'हिञ्जीर' देश्यशब्दः निगडः ।

विमुच्य मुकुटं हेममयं मौलिं व्यलोकयत् । श्रिया विरहितं चैत्यमिव निष्कलसं नृपः ॥६७॥
मुक्ते मुक्तावलीनद्धे कुण्डलद्वितयेऽथ सः । [1]शताङ्गमिव निश्चक्रं स्वाऽऽस्यं निःश्रीकमैक्षत ॥६८॥
व्यालोकयत् परित्यक्तहारां स हृदयावनिम् । संशुष्कनिर्झरोद्गारां स्वर्णाचलतटीमिव ॥६९॥
ग्रीवामुत्तारितस्मेरमणिग्रैवेयकामसौ । अतारापरिधिं मेरुमेखलामिव चैक्षत ॥७०॥
स भुजौ च्युतलक्ष्मीकौ निरैक्षत निरङ्गदौ । प्रतिमानविनिर्मुक्तौ सुरेभदशनाविव ॥७१॥
हस्तावपास्तमाणिक्यकङ्कणौ पश्यति स्म सः । द्वारस्तम्भाविवोद्वात्याहृतवन्दनमालिकौ ॥७२॥
शेषा अप्यङ्गुलीर्मुक्ताङ्गुलीयाः स्रस्ततेजसः । शाखा इव परिभ्रष्टपल्लवाः स व्यलोकयत् ॥७३॥
एवं विमुक्तालङ्कारं सोऽपश्यद् वपुरप्रभम् । शुष्कं सर इव भ्रष्टहंसराजीव कैरवम् ॥७४॥
अचिन्तयच्च [2]ही देहो भूषणैरेव भासते । पङ्कोत्कर्षाकुलो वर्षाकालः सस्योद्गमैरिव ॥७५॥
शरीरं मलमञ्जूषा बहिर्दुर्गन्धिभीरुभिः । मूढैः कर्पूरकस्तूरीचन्दनैरधिवास्यते ॥७६॥
[3]मलोत्पन्नान्मलैः पूर्णादतोऽङ्गाल्लीनमन्तरा । धौतं बोधिजलैर्ज्ञानरत्नमाद्रियते बुधैः ॥७७॥
स्वकीयान् बान्धवानेव मन्ये धन्यतमांश्च तान् । यैरिदं राज्यमुत्सृज्य लेभे लोकोत्तरं पदम् ॥७८॥
अहं तु विषयातङ्कपङ्कनिःशूकशूकरः । गणयामि दुरात्मानं नाऽऽत्मानं मानुषेष्वपि ॥७९॥
चिन्तयन्नित्ययं धीमानपूर्वकरणक्रमात् । भावनां भवनाशाय भावयामास भूपतिः ॥८०॥
अथोच्चैःसिद्धिसौधाग्रसङ्गजाग्रन्मनोरथः । क्षितीशः क्षपकश्रेणीनिःश्रेणीमारुरोह सः ॥८१॥
मुनिस्तदानीमानीतकेवलश्रीकरग्रहः । उत्सवोत्सुकचित्तेन सुरेन्द्रेणाभ्यगम्यत ॥८२॥
ख्यापयित्वा बलीयस्त्वं व्यवहारनयस्य सः । शक्रेणाऽभिदधे दीक्षावेषग्रहणहेतवे ॥८३॥
केशसम्भारमुत्पाट्य मुष्टिभिः पञ्चभिर्नृपः । दत्तं देवतया शेषं मुनिवेषं तदाददे ॥८४॥
सममेव महीशानां सहस्रैर्दशभिस्तदा । साऽऽग्रहैर्जगृहे दीक्षा दक्षैः स्वाम्यनुवर्तने ॥८५॥
तदानीं केवलज्ञानमहिमानं महामनाः । व्यधत्त तस्य नाभेयप्रभोरिव [4]ऋभुप्रभुः ॥८६॥
**भरतो**पि ततस्तातवर्त्तनीमनुवर्त्तयन् । असिञ्चद् देशनासारसुधाभिरवनीवनीम् ॥८७॥
अतिक्रम्य ततः पूर्वलक्षं दीक्षादिनादसौ । आरोहन्मुषिताशेषक**ष्टमष्टापदा**चलम् ॥८८॥
कृत्वा मासोपवासक्षपणमकृपणध्यानशुद्धान्तरात्मा ।
शैलेशीं प्राप्य योगव्यतिकरहरणोपात्तसौस्थ्यामवस्थाम् ॥
तत्रायं [5]त्रातपाताकुलसकलजगज्जन्तुजातः प्रयातः ।
सिद्धिं [6]**सौधर्मनाथ**प्रथितपृथुमहःश्लाघ्यनिर्वाणलक्ष्मीः ॥८९॥ [स्रग्धरावृत्तम्]

**इति भरतकेवलज्ञानकथानकम् ॥**

---

१. 'भिस्ततः' C, KH ।

टि. 1. शताङ्गः (पुं) – रथः । 2. ही खेदार्थकः अव्ययः । 3. मलोत्पन्नात् मलैः पूर्णात् अतः अङ्गात् अन्तरा लीनं बोधिजलैः धौतं ज्ञानरत्नं बुधैः आद्रियते इत्यन्वयः । 4. ऋभुः-देवः तेषां प्रभुः, इन्द्रः । 5. त्रातः पाताकुलसकलजगज्जन्तुजातःयेन सः । 6. सौधर्मनाथेन प्रथितपृथुमहसा श्लाघ्या निर्वाणलक्ष्मीः यस्य सः ।

**प्रसन्नचन्द्रराजर्षिकथानकं** त्वेवं । तथा हि–

## [ प्रसन्नचन्द्रराजर्षिकथानकम् ॥ ]

अस्ति स्वस्तिकरैः पात्रैर्भुवः स्वस्तिकभूषणम् । उद्दामसम्पदां धाम **पोतनं** नाम पत्तनम् ॥१॥
तत्राऽमित्रतमस्तोमध्वंससोमः[1] श्रियांपदम् । **सोमचन्द्रो**ऽजनि क्ष्मापः प्रजानाममृताञ्जनम् ॥२॥
**धारिणी सोमचन्द्रस्य** सोमस्येवास्ति रोहिणी । गेहिनी देहिनीव श्रीस्तस्य राज्ञः पदं मुदाम् ॥३॥
रहस्थस्यान्यदा भर्तुर्मूर्ध्नि केशान् विवृण्वती । जरानासीर[2]तुलितं पलितं सा व्यलोकयत् ॥४॥
साऽऽथ सस्मितमाहैवमये ! दूत इवागतः । राज्ञि क्व सेति सम्भ्रान्ते भूयोऽप्यूचे सुविस्मिता ॥५॥
रूपान्तकृत् जराकुन्तो धर्मदूतः सुमार्गवाक्[१] । रागाहिविषमूर्च्छाज्ञासूत्रं पलितमीक्ष्यताम् ॥६॥
विषादकलितः क्ष्मापः पलितप्रेक्षणादथ । पुनरूचे तया देव ! लज्जसे वार्द्धकेन किम् ॥७॥
राजाऽऽह वार्द्धकात् व्रीडा न मे किं तु कुलक्रमात् । तप्यन्ते स्म तपः सर्वे पूर्वेऽर्वाक् पलितोदयात् ॥८॥
नाधमानां जरा स्वान्ते मध्यानामेति मूर्द्धतः । स्वान्तात् मूर्द्धनि धन्यानामारोहति पुनः सताम् ॥९॥
लज्जयाऽहं तया हन्त ! विषीदे वार्धकं कियत् । अखण्डकुलधर्माणां मृत्युः सोऽपि महोत्सवः ॥१०॥
इत्युदित्वा सुतं बालमानाय्य न्याय्यधर्मधीः । राज्ये **प्रसन्नचन्द्रा**ख्यमभ्यषिञ्चन्महीपतिः ॥११॥
वनाय व्रजता पत्याऽनुव्रजन्ती निवारिता । धारिण्यपि समं धात्र्या प्राचलन्निश्चलाशया ॥१२॥
**सोमचन्द्रो** महारण्ये शून्याश्रमपदे क्वचित् । स गत्वा व्रतयामास दिक्प्रोक्षित[3]तपस्विनाम् ॥१३॥
ज्योत्स्ना चन्द्रं रुचिर्दीपं प्रभा सूर्यं तडित् घनम् । छायेव चान्वगात् कायं धारिणी धरणीधवम् ॥१४॥
तस्यास्ताः पुत्रसाम्राज्यसम्पदो न मुदे तथा । पत्युर्यथास्य राजर्षेर्वरिवस्या[4] व्रतोचिता ॥१५॥
उटजः सौधमिङ्गुद्यास्तैलैर्माणिक्यदीपिकाः । श्रद्धैवान्तःपुरं श्रेष्ठं प्रीतिः पक्षिमृगाश्रया ॥१६॥
सर्वासनजयो योग्या[5] चमूः शमदमादयः । फलदाः[6] फलदाः सूदा निग्राह्याश्चान्तरारयः ॥१७॥
क्षणः परस्य पुंसोऽर्च्चा ध्यानं षाड्गुण्यचिन्तनम् । **सोमचन्द्रस्य** राजर्षेः प्रव्रज्या राज्यवद्बभौ ॥१८॥ विशेषकम् ॥
प्राग्वृत्तवृद्धगर्भाथ प्रसूततनयाऽनया । प्रसवार्त्त्या दिवं भेजे धारिणी शीलधारिणी ॥१९॥
वल्कलैः प्रावृतं बालमालपत् सैष तापसः । वत्सस्य शैशवेऽप्येवं साधु वल्कलचीरिता ॥२०॥
देवभूयं गता राजमहिष्यवेत्य साऽऽश्रमे । कान्तारमहिषीभूय सुतं स्तन्यमपाययत् ॥२१॥

---

१. 'समागमत्' C ।

टि. 1. अमित्रः-शत्रुः स एव तमः, तेषां स्तोमः समूहः तस्य ध्वंसे सोमः चन्द्र इव । 2. नासीरं (नपुं) अग्रेसरः । 3. दिक्प्रोक्षितः व्रतविशेषः । 4. वरिवस्या-सेवा । 5. योग्या(स्त्री) शस्त्रकलाभ्यासः । 6. फलदाः-वृक्षाः, फलदाः-फलं ददाति इति फलदः, वृक्षस्य विशेषणम् , त एव सूदाः- सूपकाराः ।

तं धात्र्यपि दिनान् कांश्चित्पालयामास बालकम् । उत्कण्ठितेव तामेव [1]**धारिणी**मन्वगादथ ॥२२॥
तमपीप्य[2]न्महीस्तन्यं महीपतिमुनिः सुतम् । [3]यानासीनः शयानोऽङ्के स्वयमेव दधार च ॥२३॥
धान्यैरन्यैश्च तैर्वन्यैः पोष्यमाणः फलैः क्रमात् । स शैशवोत्तरं भेजे वयो गर्भस्थतापसः ॥२४॥
[4]राशेरव्यवहार्यस्य जीवानां कोपि सोऽस्तु वा । स्वकोऽथवाऽस्तु सिद्धानामार्जवेनाऽतिभूयसा ॥२५॥
श्रुत्वा **प्रसन्नचन्द्र**स्तं सोदरं पितुरन्तिके । अमंस्त शून्यमात्मानमसहायतया तदा ॥२६॥
सोत्कण्ठ[5]श्चित्रकैश्चित्रे तमानीतं दृशा पिबन् । पितरं वा स्वमेवाथ पुनर्नवममंस्त तम् ॥२७॥
तं वनेचरनेपथ्यं नृपतिः सोदरं स्मरन् । स्वं निर्व्रीडं खलं धृष्टं कुक्षिंभरिममंस्त च ॥२८॥
मायोपनिषदां शास्त्रं क्षेत्रं वैशिकवीरुधाम् । नृपो गाणिक्यमाणिक्यं पणस्त्रीगणमादिशत् ॥२९॥
सिंहपोतवदानेतुं [१]याति नातिहठादसौ । तस्मादुपप्रलोभ्यस्तु तथाभ्येति यथा स्वयम् ॥३०॥
[२]भूत्वा समानशीलाभिः स विश्वास्यः कथञ्चन । नान्यं तातर्षिपादेभ्यो व्यवहारं हि वेद सः ॥३१॥
द्रष्टव्यश्च स युष्माभिस्तातादूरतरे चरन् । सोऽन्यथा धक्ष्यति क्रुद्धः शापेनाऽपेशलाशयः ॥३२॥
इत्यादिष्टा नरेन्द्रेण ऋषिवेषाः पणाङ्गनाः । [6]सितोपलाफलालीभिरात्ताभिर्जग्मुराश्रमम् ॥३३॥
तं जन्मजटिलं तत्र क्षत्रियब्रह्मचारिणम् । वेश्या ददृशुरायान्तं बिल्वामलकभारिणम् ॥३४॥
आद्याश्रमं श्रितः किन्तु [7]भवभीतो मनोभवः । दधौ वल्कलचीरित्वमिति दध्युर्निरीक्ष्य ताः ॥३५॥
सोऽपि मत्वा मुनीनेतानूचे ताताऽभिवादये । के यूयं क्वाश्रमो वा वः पृच्छन्नित्याभिरौच्यत ॥३६॥
वयं [8]परपुमर्थानुरक्ता दयितभूतयः । मुनयो वीतरागाः स्मः साम्यतः **पोतना**श्रमे ॥३७॥
इहातिथ्यविवेकं ते विलोकितुमुपागताः । सपर्ययाऽतिथीनां हि तपोवृद्धिस्तपस्विनाम् ॥३८॥
सोप्युवाच फलान्येतान्यानीतानि वनान्मया । गृह्णीत स्वेच्छया भूयोप्यानेष्येऽहं बहून्यपि ॥३९॥
ताः प्रोचुर्नेदृशेष्विच्छा नीरसेषु फलेषु नः । **पोतना**श्रमजातानां फलानां पश्य वर्णिकाम् ॥४०॥
इत्युक्त्वा क्वचिदासित्वाऽऽ[३]नायित्वा द्रुतले च तम् । सितोपलाफलान्येनं प्राशयामासुराशु ताः ॥४१॥
सोऽथ बिल्वादिषूद्विग्नोऽभूत्तदास्वादसादरः । तासामासाद्य चाङ्गेन सङ्गं स्पर्शहृतोऽब्रवीत् ॥४२॥

---

१. 'यावन्नैति'...C । २. 'गत्वा' A, H । ३. शयित्वा P ।

टि. 1. धात्री मृता इत्यर्थः । 2. मही-गौः, तस्याः स्तन्यं दुग्धम् । 3. यान्-गच्छन्, आसीन उपविष्टो वा शयानश्चाङ्के पार्श्वे दधार तं सुतम् इत्यर्थः । 4. अतिभूयसा आर्जवेन स अव्यवहारस्य राशेः जीवानां कोऽपि अस्तु वा सिद्धानां स्वकः अस्तु अथवा इत्यन्वयः । 5. चित्रकारैश्चित्रे आलेखयित्वाऽऽनीतं तम् इत्यर्थः । 6. सितोपला-शर्करा । 7. भवः महादेवः, तस्माद्भीतः इति भवभीतः मनोभवः =कामदेवः । 8. वेश्यापक्षे-परपुरुषे धने चानुरक्ताः, दयिता-वल्लभा धनादिभूतिर्यासां ताः, साम्यतः-पुरुषमात्रे समानभावाद् विगतः पुरुषविशेषे रागो याभ्यस्ताः । मुनिपक्षे तु परपुमर्थे परमपुरुषार्थे मोक्षपुरुषार्थेऽनुरक्ताः, दयिता वल्लभा मलादि भस्म वा भूतिर्येषां ते ।

अहो मार्दवमङ्गे वः शशोदरसहोदरम् । हृदि हृद्यं किमेतच्च सुस्पर्शं वेदिकाद्वयम् ॥४३॥
ताः प्रोचुर्मुनयोऽस्माकं ये पोतनतपोवने । ते सर्वे मार्दवोद्दामाः क्व तपो मार्द्दवं विना ॥४४॥
[1]वेद्यौ हृद्ये च [2]हृद्येते सप्रियस्य स्वयंभुवः । पाणिपद्मा[१]श्चनै[२]रिष्ट्या प्रीयतेऽत्र परः पुमान् ॥४५॥
पोतनाश्रमजैरेतैः फलैरास्वादितैः स्वयम् । सौकुमार्यमिदं देहे वेदिद्वन्द्वं च जायते ॥४६॥
तदमुं त्वमपि त्यक्त्वा केवलश्रममाश्रमम् । **पोतना**श्रममेत्याऽस्मन्मैत्रीं सफलतां नय ॥४७॥
समं ताभिः स सङ्केतं तत्तल्लिप्सुस्ततोऽग्रहीत् । जन्मिनोऽनादिरिच्छादिर्बलीयान् सहभूर्गणः ॥४८॥
आपृच्छ्य तास्ततो गत्वा तापसोपस्करानयम् । सर्वानेकत्र सङ्गोप्य भूयोऽप्यागात्तदन्तिकम् ॥४९॥
तदा च सोमचन्द्रर्षिश्चैरस्तरुशिरश्चैरः । आगच्छन् दूरतस्तासां दृष्ट्वाऽज्ञाप्यत योषिताम् ॥५०॥
[३]सतापतापसत्रासादमिलन्त्यो मिथोप्यथ । वेश्यास्ता जग्मुरेकाकी कुमारस्तु वनेऽभवत् ॥५१॥
संसारमृगतृष्णानां तासामेवाथ स स्मरन् । मृगपोत इवारण्ये बम्भ्रमीति स्म सम्भ्रमी ॥५२॥
धावन् मृग इवाऽऽलोक्य रथिकं पथि कञ्चन । ताताऽभिवादयामीति मुनिमानी जगाद सः ॥५३॥
[3]रथ्यपृच्छत् क्व गन्तासि [4]मुनिपाकं तमादरात् । सोप्यूचे तात ! गन्ताऽहं तत्पोतनतपोवनम् ॥५४॥
तदेवाहमपि प्रेप्सुरित्युक्ते रथिनाऽथ सः । तमेवानुव्रजन् मार्गे जगौ तातेति तत्प्रियाम् ॥५५॥
अस्त्रीकाश्रमधामाऽयं मन्ये मुनिकिशोरकः । वेद स्त्रीपुंसयोर्भेदं नेत्यभूद्रथिनोऽद्भुतम् ॥५६॥
रथ्यान् प्रतोद्यमानांश्च वीक्ष्याऽऽह रथिनं मुनिः । मृगाः किं तात ! दूयन्ते नर्षीणामिदमर्हति ॥५७॥
रथ्याह क उपालम्भो नृणामिह तपस्विनाम् । यदेषां कर्मपाकेन मुनिपाकेदृशी जनिः ॥५८॥
रथी [४][5]सर्वपथीनेनार्जवेनाऽस्य वशीकृतः । मोदकानदितैषोऽपि तानास्वाद्याऽब्रवीदिति ॥५९॥
हुं हुं ज्ञातानि तान्येव फलान्येतानि साम्प्रतम् । प्राप्तानि सम्मुखीनानि पोतनाश्रमशाखिनाम् ॥६०॥
रणे रथी [6]पथीतं चाजैषीत्कमपि तस्करम् । दत्तं तेनाभितुष्टेन वित्तं पुष्टं च सोऽग्रहीत् ॥६१॥
रथे रथी सपत्नीकः समं वल्कलचीरिणा । आरोप्य [7]भूरि तद्भूरि पुरं पोतनमागमत् ॥६२॥
रथिकः पथिकः स्मित्वा तस्मै तस्माद्धिरण्यतः । दत्त्वा किञ्चित् जगादेति सोऽयं ते पोतनाश्रमः ॥६३॥
अत्रोटजफलाद्यर्थैर्विना किञ्चिन्न चाप्यते । [8]आपृष्टोऽसि सुखं तिष्ठेरित्युक्त्वा सोऽन्यतोऽव्रजत् ॥६४॥
प्रतिप्रतोलि प्रत्यट्टं प्रत्यावासं च सञ्चरन् । दध्यौ निध्याय तिष्ठामि क्व याचे कमथोटजम् ॥६५॥

---

१. ०पद्मं च B । २. नैर्दिष्ट्य KH, B, C, D । ३. सतापसभयत्रा...P । ४. सर्वपथी तेन KH ।

टि. 1. वेद्यौ ='वेदी' इति ईकारान्तस्त्रीलिङ्गशब्दस्य प्रथमायाः द्विवचनान्तं रूपम् । 2. हृदि एते इति विग्रहः । 3. रथी अपृच्छत् । 4. पाकः-बालः मुनिश्चासौ पाकश्च, तम् । 5. सर्वपथीनः हे०श० [७।१।९४] सूत्रेण ईन प्रत्ययः 'व्याप्नोति' इत्यर्थे । 6. पथि इतं-मार्गे प्राप्तम् । 7. भूरि (नपुं) सुवर्णम् । भूरि-प्रभूतम् । 8. आपृष्टोऽसि-क्षेमकुशलपृच्छा ।

स्त्रीपुंसदर्शं ताताभिवादयामीति वादिनम् । तं हसन्ति स्म वातूलं नूतनं पत्तने जनाः ॥६६॥
वेश्यां कामपि वीक्ष्याऽथ [१]मुनिमान्यभिवाद्य ताम् । अयाचन्मूल्यमादत्स्व मुनेऽर्पय ममोटजम् ॥६७॥
सा प्रवेश्यान्तरेऽनिच्छुमपि तत्तदकारयत् । नखादिकल्पनाऽभ्यङ्गस्नानालङ्करणादि तम् ॥६८॥
सोऽप्यन्यथो[२]टजोऽनाप्तिशङ्काऽऽतङ्काकुलाशयः । वेश्यायास्तत्कृतं सेहे समग्रमुपसर्गवत् ॥६९॥
सोऽकारि वेश्यया पुत्र्या पाणि[३]ग्रहणमङ्गलम् । तमातिथ्योपचारं च मेने मुनिजनोचितम् ॥७०॥
तदा कौतुकगानानि स स्वाध्यायमिवाऽशृणोत् । उच्चैर्गर्जति तूर्ये च [४]चकितः[1]प्यधित श्रुती ॥७१॥
इतश्चाहनि तत्रैव ता नियुक्ताः पणस्त्रियः । राज्ञे **प्रसन्नचन्द्रा**य सम्भूयैत्य व्यजिज्ञपत् ॥७२॥
[५]त्रातस्तातर्षिपादानां शापात् त्रासाकुलात्मनाम् । [2]सङ्केतस्थानमाप्तोऽपि सो नो भ्रष्टः कुमारकः ॥७३॥
[६]राजाऽनुशयतो दध्यौ धिग्मामहृदयं खलम् । वियोज्य तातपादेभ्यो हारितः स हहाऽनुजः ॥७४॥
निवार्यावसरान् सर्वांस्तेन शोकेन भूपतिः । सशल्य इव नैवाप रतिं देहेऽप्यनादरः ॥७५॥
अत्रान्तरे प्रदोषेऽपि निशीथ इव शोकतः । निर्ध्वनौ नगरेऽश्रावि स राज्ञा मुरजध्वनिः ॥७६॥
ऊचे च प्रियतूर्यश्रीर्धन्यः कोऽयमलौकिकः । योऽतिशेते विमर्शेन निस्तापस्तापसानपि ॥७७॥
तां निशम्य गिरं राज्ञः स्वयमेवाथ कश्चन । तद्वेश्यावेश्मयाष्टीकष्टीकते स्म नृपालयात् ॥७८॥
तस्मान्निशम्य तामाख्यां भीरुर्वेश्या वचस्विनी । **प्रसन्नचन्द्र**राजायोपेत्य प्राञ्जलिरब्रवीत् ॥७९॥
सदनं स्वयमाप्ताय कुमारमुनये मया । सुताऽद्य दयिताऽदायि देव ! दैवज्ञवार्त्तया ॥८०॥
तद्विवाह[3]क्षणेनाऽद्य [4]क्षणो देवस्य योऽजनि । तदज्ञानकृतं सर्वं सर्वंसह ! सहस्व मे ॥८१॥
तामाकर्ण्य कथां कर्ण्यां विस्फुरद्दक्षिणेक्षणः । निश्चिकाय स एवायमिति प्रतिभया नृपः ॥८२॥
स्वयमेवाथ तत्रैत्य प्रत्यभिज्ञाय चाऽनुजम् । चक्रे महीपतिः पूर्णं तद्विवाहमहोत्सवम् ॥८३॥
अथाऽऽदित्योदये राज्ञा महेनातिमहीयसा । निन्ये सौधं समं वध्वा करेणुमधिरोप्य तम् ॥८४॥
तत्तद्विज्ञजनादेष सम्प्रदायप्रदायकात् । राज्ञा मितैर्दिनैश्चक्रे व्यवहारबृहस्पतिः ॥८५॥
लिपिसङ्ख्यानयोर्दक्षः पदवाक्यप्रमाणवित् । स कलाकुशलो जज्ञे प्राज्ञो राज्ञोऽभियोगतः ॥८६॥
लोप्त्रविक्रयिणं पौरारक्षैर्बद्धं नृपात्मजः । रथिकं मार्गमित्रं तं प्रेक्ष्याऽमोचयदन्यदा ॥८७॥
भ्रुवोर्लक्ष्मीर्दृशोर्गौरी रसनाग्रे सरस्वती । हृदये च दया तस्याऽवसन् **वल्कलचीरिणः** ॥८८॥
अन्याभिरपि राजकन्याभिः परिणाय्य तम् । युवराजं विधायाऽथ कृतार्थः पार्थिवोऽभवत् ॥८९॥

---

१. मुनिमान्याभि–B । २. टजोनास्ति–P, C, KH, D । ३. पीडन...KH, A, D । ४. चकिताचथितः KH । ५. भ्रात H, B । ६. राज्ञा P ।

टि. 1. प्यधित (अपि + धा धातुः)-अछादयन् श्रुती कर्णौ । 2. नः अस्माकं सङ्केतस्थानं इत्यन्वयः कार्यः । 3. उत्सवेन । 4. अवसरः ।

सहितः [1]सहिताभिश्च वशाभिर्नवयौवनः । गजेन्द्र इव राजेन्द्रप्रीतयेऽवरजोऽजनि ॥९०॥
इतश्च **सोमचन्द्रर्षिः** कुमारमनवेक्ष्य तम् । जटावल्किनमात्मानम[2]स्त्रैर्द्रुममसिञ्चत ॥९१॥
राज्ञा प्रसन्नचन्द्रेण तद्वृत्तं सोऽथ बोधितः । चेतसा निर्वृतोप्यासीद्विद्दृष्टिरतिरोदनात् ॥९२॥
अश्रुवर्षी स [3]वर्षीयान् सदा सब्रह्मचारिभिः । तपोऽन्ते तापसोऽकारि पारणं वनजैः फलैः ॥९३॥
इतः **प्रसन्नचन्द्रो**ऽपि समं **वल्कलचीरिणा** । इन्द्रः कालमुपेन्द्रेण न यान्तमपि वेद सः ॥९४॥
अथ द्वादशवर्षान्ते हर्षाद्भूभर्तुरेकदा । अङ्कादुत्तीर्य पुत्रोऽगादङ्कं **वल्कलचीरिणः** ॥९५॥
ललन्तं बालमालोक्य तं च **वल्कलचीर्य**पि । स्वस्यैव शैशवस्याऽथ सस्मार पितुरन्तिके ॥९६॥
विपुण्यस्य विपन्नायां जातमात्रस्य मातरि । [4]कुमारभृत्यां मातेव निर्माति स्म स मे पिता ॥९७॥
वने वेश्माश्रमस्तुर्यो यजमाना महीरुहः । वार्द्धके तत्तपः सोऽहं तत्र तातेन लालितः ॥९८॥
लोकद्वितयदातॄणां पातॄणां सकलापदाम् । निष्कृत्रिमोपकर्तॄणां पितॄणां केऽनृणा नराः ॥९९॥
शैशवान्मुद्रिते तत्रोन्मुद्रिते येन मे दृशौ । दृशौ मुद्रयता तस्य तातस्याऽपकृतं मया ॥१००॥
धिग् धिग् ममाकृतज्ञत्वमजितेन्द्रियतां च धिक् । विस्मार्य यदहं तातमपि तिष्ठामि निष्ठुरः ॥१०१॥
चित्ते चिरं विचिन्त्येति तातं द्रष्टुमथोत्सुकः । **प्रसन्नचन्द्र**माप्रष्टुमूचे **वल्कलचीर्य**दः ॥१०२॥
भ्रातः ! प्रातरहं तातप्रणिपातमपातकम् । कृत्वैव भोक्ष्ये तत्तत्र प्रेषणेन प्रसीद मे ॥१०३॥
नृपस्तेनेति विज्ञप्तः स्वयमप्यनुजन्मना । सममुत्कण्ठितोऽयासीत्तन्मुनेः पावनं वनम् ॥१०४॥
विमुच्य यानं राजानमन्तराश्रमयायिनम् । जगौ हर्षाश्रुभिर्धौतकल्कं **वल्कलचीर्य**दः ॥१०५॥
सारण्यः पाद्यपाथोभिः प्रसूनार्घैर्महीरुहः । सूक्तगानैर्द्विजाश्चात्र तवातिथ्यं वितन्वते ॥१०६॥
मृगभेदा गलत्खेदा वेदान्तोद्गारिणः शुकाः । कुर्वन्ति कौतुकं चात्र विनीताः कपयोऽप्यमी ॥१०७॥
धात्र्यो मम महिष्योऽमूर्मृगाः क्रीडासखाश्च मे । अहो महीरुहोऽप्येते मया बाल्येऽत्र रोपिताः ॥१०८॥
[१]तत्तत्समुत्समुद्भूतप्रीतिः प्रेक्ष्याश्रमान्तरे । सोऽन्वभूत्परमानन्दसम्पदामिव वर्णिकाम् ॥१०९॥
गत्वोटजमथो दृष्ट्वा नत्वा तातपदाम्बुजम् । **प्रसन्नचन्द्र**राजेन्द्रः स चातिमुमुदेतमाम् ॥११०॥
**सोमचन्द्र**मुनिस्त्वेनमङ्कमारोप्य पूर्ववत् । अजिघ्रन्मूर्ध्नि पस्पर्श सर्वाङ्गं किञ्च पाणिना ॥१११॥
तदा कवोष्णैः **सोमर्षे**र्दशोरानन्दवारिभिः । प्रक्षालितः क्षणादान्ध्यपङ्कस्तद्विरहप्रसूः ॥११२॥
तावथ स्वयमालोक्य मुदा विशदचक्षुषः । सन्तोषिणोऽपि सन्तोषविशेषः कोऽप्यभूत्पुनः ॥११३॥
गोपितान् पर्णशालान्तस्तापसोपस्करानसौ । प्रत्युपेक्षितुमभ्यागाद्वेगाद् **वल्कलचीर्य**थ ॥११४॥

---

१. तत्तत्संमुखमुद्भूतप्रीतिः C ।

टि. 1. सम्यग् हितकारिणी सहिता, ताभिः वशाभिः, स्त्री हस्तिनी च । 2. अस्रैः-अश्रुभिः । 3. अतिवृद्धः । 4. कुमाररक्षणोपाये ।

तत्तत्तापसभाण्डं स गुण्डितं रजसा रसात् । स्वोत्तरीयाञ्चलेनैव प्रत्युपेक्षितवांस्तदा ॥११५॥
प्रागेवं यतिपात्राणि प्रत्युपैक्षिषि कर्हिचित् । इत्यूहापोहतः पूर्वां सोऽस्मरज्जातिमात्मनः ॥११६॥
श्रामण्यं स भवे प्राचि कृत्वा दिवि यथाऽगमत् । तथाह्यःकृतवत् विश्वं स्मृत्वा वैराग्यमाश्रयत् ॥११७॥
बुधा बोधिं हहाऽध्यास्य मुधाऽमी हारयन्ति धिक् । भ्राम्यन्ति धिक् च दिक्चक्रमसमाप्त[१]समाप्तयः ॥११८॥
नेदं राज्यं न [२]चैश्वर्यं तथा हरति मे मनः । आत्मसंवेदनीयं तद् यथा श्रामण्यमुत्तमम् ॥११९॥
अन्तरायैरियत्कालं वञ्चितोस्मि हहा कियत् । आसन्नमपि येनेदं न श्रामण्यमबोधिषि ॥१२०॥
क्षान्त्यादिर्दशधा धर्म्मो येषामेषोऽभिरोचते । अमर्त्यान् मर्त्यमूर्त्या तान् महिम्ना मन्यते न कः ॥१२१॥
[1]सेत्यथ क्षपकश्रेणिसुधासारणिवारिणि । ध्यानं धौतमि[३]वा[2]चार्यचातुर्यस्तुर्यमादधे ॥१२२॥
द्वितीयस्याऽद्वितीयस्य सितध्यानस्य योगतः । केवलज्ञानमध्यासामासे **वल्कलचीरिणा** ॥१२३॥
देवतादत्तलिङ्गोऽथ महिम्ना महितः सुरैः । स **सोमेन्दु-प्रसन्नेन्दो**रिति धर्ममुपादिशत् ॥१२४॥
मोहभूतकुलाऽऽक्रान्ते रागद्वेषबिभीषके । क्रोधाख्योत्तालवेताले लोभविक्षोभराक्षसे ॥१२५॥
प्रेतायितेन्द्रियग्रामे विषये[3]द्धचितानले । मिथ्यात्वाख्यमहागृध्रे मायागोमायुयोषिति ॥१२६॥
अभिमानमहाशूले मनोभवपिशाचिनि । जरारुग्मृतिजात्यादिशाकिनीकुलसङ्कुले ॥१२७॥
संसारनामनि महाश्मशानेऽत्र [४]भयावहे । कथं नियतिनिश्चिन्ता रमन्ते हन्त जन्तवः ॥१२८॥ चतुर्भिः कलापकम् ॥
अस्माददूरे सर्वज्ञशासनं ब्रह्मपत्तनम् । निर्भयं यात निर्वाणपुर[4]शाखापुरोपमम् ॥१२९॥
यत्र प्रोतमिदं ब्रह्मसूत्रे विश्वं चराचरम् । तदेतद्वासिनो लोकाः सर्वदा दधते हृदि ॥१३०॥
सेवमाना [5]अनूचानान् वेदगीतार्थवेदिनः । [6]स्वयंभुवः सरस्वत्यां सदा स्नानं च कुर्वते ॥१३१॥
ते च रत्नत्रय[7]त्रेतान् तर्पयन्त[8]स्त्रयीजुषः । सुखं शिवपदं यान्ति सम्पन्नब्रह्मसम्पदः ॥१३२॥
श्रुत्वेति धर्मसम्बोधिं महोदययियासया । मुनिभूपावभूतां तौ जैनशासनवासनौ ॥१३३॥
तदा च **पोतनपुरोद्याने** नाम्ना **मनोरमे** । **श्रीवीरो** दुरितध्वान्तवासरः समवासरत् ॥१३४॥
जिनं नत्वा [9]परीय त्रिः स स्वयंबुद्धकेवली । अर्पयामास तं राजतापसं प्राप्तसंवरम् ॥१३५॥
[५]बुद्धः **प्रसन्नचन्द्रो**ऽपि प्रणन्तुं परमेश्वरम् । उपागच्छत् पपावच्छसुधादेश्यां च देशनाम् ॥१३६॥

---

१. समाधयः D, A, B । २. स स्वर्गस्तथा - C । ३. वाचार्यस्तुर्यमाचर्य शुद्धधीः - C । ४. महाभये- H, A । ५. प्रसन्नचन्द्रस्तीर्थेन्द्रं, प्रणन्तुं पोतनेश्वरः L, K ।

टि. 1. [तदः सेः स्वरे पादार्था] १।३।४५ इति सूत्रेण 'स इति' इत्यस्य सन्धिः । 2. आचारे साधु आचार्यं; आचार्यं चातुर्यं यस्य स=आचार्यचातुर्यः । 3. इद्धा-प्रदीप्ता । 4. शाखापुरः-पुरस्य शाखा शाखेव पुरं वा । 5. अनूचानः-वेदप्ररूपणायां समर्थाः विनयिनो वा, तान् । 6. ब्राह्मणपक्षे स्वयंभूः=ब्रह्मा तस्य पुत्री सरस्वती नदी, तस्याम् । जैनपक्षे तु स्वयंभूः=तीर्थङ्करः तस्य सरस्वती=वाणी, तस्याम् । 7. त्रेता-दक्षिणः, गार्हपत्यः, आह्वनीयः इति वह्नित्रयस्य संज्ञा । 8. त्रयीजुषः-ऋग्वेदः, यजुर्वेदः, सामवेद इति त्रयीभिः समन्विताः । 9. परीय-परि+ई+(त्वा=) य=प्रदक्षिणां कृत्वा ।

प्रबुद्धो बालमप्येष न्यस्य राज्येऽङ्गजं निजे । भेजे व्रतं भवाम्भोधौ पोतवत्**पोतनाधिपः** ॥१३७॥
[1]विश्वाब्जग्रहनाथेन सह नाथेन पर्यटन् । क्रमाज्जज्ञे स राजर्षिः समुत्कर्षितपोगुणः ॥१३८॥
ययौ जिनोऽन्यदा **राजगृहं** राजगृहेश्वरः । तत्प्रणामाय सामात्यश्रेणिकः **श्रेणिको**ऽचलत् ॥१३९॥
तपःकृशं रविदृशं पादेनैकेन भूस्पृशम् । **प्रसन्नचन्द्र**राजर्षिं मार्गे हर्षी ननाम सः ॥१४०॥
अहो महर्षेरुत्कर्षे ध्यानं महति वर्त्तते । इति ध्यायन्नयं गत्वा ननाम स्वामिनं नृपः ॥१४१॥
पप्रच्छ च प्रभुं स्वामिन् ! महर्षिर्वन्दितो मया । यदा तदा विपद्येत यद्युत्पद्येत [१]कुत्र तत् ॥१४२॥
सप्तमीं भुवमित्युक्ते प्रभुणाऽथ भुवः प्रभुः । दध्यौ साधोर्गतिः क्वेदृग् न तु सम्यग् मया श्रुतम् ॥१४३॥
क्षणान्तरेण भूयोऽपि भूपोऽपृच्छत् प्रभो ! यदि । स म्रियेताऽधुना साधुः साधयेत् कां गतिं ततः ॥१४४॥
**सर्वार्थसिद्ध**मित्युक्ते जिनेनाऽथ जगौ नृपः । मया नेश ! श्रुतं सम्यक् किं वः किं वा [२]द्विधोदितम् ॥१४५॥
प्रभुरभ्यधिताऽस्मद्वाग्भेदस्तद्ध्यानभेदतः । तपोभृतामपि ध्यानं सदसद्गतिकारणम् ॥१४६॥
तदा हि त्वदनीकस्य मुखे **सुमुख-दुर्मुखौ** । द्वौ नरावीयतुर्मिथ्यादृशौ स्वैरकथादिशौ ॥१४७॥
तथास्थं तं मुनिं वीक्ष्य **सुमुखो** दुर्मुखं जगौ । अस्येदृक्तपसः स्वर्गापवर्गौ किल हस्तगौ ॥१४८॥
प्रत्यूचे **दुर्मुखो** मैतत् कथामपि वृथा कृथाः । दर्शनं स्पर्शनं नामाप्यस्य पापकृते सताम् ॥१४९॥
असौ हि सुखसौहित्यं भूरक्षादुःखतः श्रितः । [2]केशभाराऽसहशिरस्युर्वीभारं सुते न्यधात् ॥१५०॥
स्वयं क्ष्माभारशक्तोऽपि सैष पाखण्डपण्डितः । राज्यभारादपि त्रस्तो ही रजोहरणं श्रितः ॥१५१॥
राज्यादिदानीं **चम्पेशदधिवाहन**संहतैः । सूनुः सोऽस्य शिशुः क्रूरैः सचिवैश्च्यावयिष्यते ॥१५२॥
इत्थं मिथ्यात्वदावाग्निशिखाभि**र्दुर्मुखो**क्तिभिः । दग्धध्यानतरुर्दध्यौ स महर्षिरमर्षितः ॥१५३॥
मया ये रमिता बाल्ये गमिता यौवने श्रियम् । हहा तेऽपि महामात्या ममोच्छिन्दन्ति नन्दनम् ॥१५४॥
भवेयं यद्यहं तत्र हन्त त्रस्यद्द्रुजौजसाम् । तेषां कुर्यामनार्याणां निधनं [3]प्रधनेन तत् ॥१५५॥
इत्यादिमलिनध्यानसञ्जातव्रतविस्मृतिः । मनसा राजमानी स मानी तान् योद्धुमुद्यतः ॥१५६॥
स ईदृक् समरारम्भसंरम्भनिभृतस्त्वया । अवन्दि मन्दितशुभोत्करको नरकोचितः ॥१५७॥
त्वय्यागते रणोत्क्षेपक्षीणास्त्रं स्वममंस्त सः । हन्तुं शत्रुं [4]शिरस्त्रेण मूर्ध्नि हस्तमुदस्तवान् ॥१५८॥
स निष्केशशिरः स्पर्शप्रतिबुद्धः स्मृतव्रतः । धिग् धिग् धियं ममेति स्वं निरानन्दो निनिन्द च ॥१५९॥
अथाऽऽलोच्य प्रतिक्रम्य सम्यग् ध्यानमयं श्रितः । **सर्वार्थसिद्धि**योग्यत्वं प्राप प्रश्नान्तरे तव ॥१६०॥
इदमम्भोदगम्भीरशब्दं निगदतः प्रभोः । प्रतिशब्द इवाकाशे दिव्योऽभूद् दुन्दुभिध्वनिः ॥१६१॥

---

१. कुत्रचित् - A, P । २. वान्यथोदितं - C ।

टि. 1. विश्व एव अब्जं, तद्विकासने ग्रहनाथः सूर्यः नाथस्य विशेषणम् । 2. केशस्य भारमपि न सहते शिरो यस्य स केशभारासहशिराः, तस्मिन् । 3. प्रधनम्-युद्धं, तेन । 4. शिरस्त्राणम् तेन ।

किमेतदिति पृष्टेऽथ भूपेनाऽभाषत प्रभुः । **प्रसन्नचन्द्रः** शुद्धेन ध्यानेनाऽजनि केवली ॥१६२॥
अमी ते दुन्दुभिध्वानाहूतभूतसमुच्चयाः । महिमानं द्युधामानः सानन्दास्तस्य तन्वते ॥१६३॥
एवं निशम्य सम्यक्त्वगृहं **राजगृहा**धिपः । दध्यौ[१] नास्ति विना ध्यानं किञ्चिन्मुक्तिकरं क्वचित् ॥१६४॥
अनधीनाधियोक्षाणां सम्यग् लिङ्गं न तासु च । ध्यानज्ञानं क्व तत्किन्तु लिङ्गमेव तु पूजयेत् ॥१६५॥
[1]खारतर्यं क्वचित् बाह्यं शैथिल्यं वाऽथ लिङ्गिनाम् । न प्रमाणं बुधः कुर्याल्लिङ्गमेव तु पूजयेत् ॥१६६॥

**इति प्रसन्नचन्द्रकथानकम् ॥** [आदितो ग्रन्थः २४१५]

अथ न केवलं **भरतस्य** शृङ्गारभुवनप्रवेशादिरूपं **प्रसन्नचन्द्र**स्यातापनादिरूपं च बाह्यजनरञ्जनापरम-कुशलकुशलस्वरूपमप्रमाणं यावता जनज्ञापनोपायभूतो वेषोऽप्येवमेवेत्याह—

**वेसो वि अप्पमाणो, असंजमपएसु वट्टमाणस्स ।**
**किं परियत्तियवेसं, विसं न मारेइ खज्जंतं ? ॥२१॥**

**वेषोऽपि** शिरस्तुण्डमुण्डनरजोहरणधारणादिरूपो**ऽप्रमाणो**ऽविद्यमानयुक्तिरयुक्तो न स्वार्थसाधक इति भावः । कस्येत्याह—**असंयमपदेषु** विहिताऽकरण-प्रतिषिद्धाचरणरूपेषु **वर्त्तमानस्य** सतः पुंसः ? यतः **किं परिवर्त्तितवेषमिति** कर्मविशेषणं किं कृतगरुडादिनेपथ्यान्तरं सन्तं पुरुषमिति गम्यं **विषं** कर्तृ **न मारयति खाद्यमानम्** ? अपि तु मारयत्येव, ततो यथा खाद्यमानाद्विषाद्वेषेण न कापि प्रतिक्रिया तथा संयम-जीवितान्तकरादसंयमपदादपीति भावः ॥२१॥

तर्हि मनःशुद्धिरेवास्तु परस्तावदास्तां वेषः [इति चेत्] न, निश्चयनय एष व्यवहारतस्तु वेषः प्रमाणमेव मनःशुद्धेरपि प्रायस्तदालम्बनत्वादित्याह—

**धम्मं रक्खइ वेसो, संकइ वेसेण दिक्खिओ मि अहं ।**
**उम्मग्गेण पडंतं, रक्खइ राया जणवउ व्व ॥२२॥**

**धर्मं रक्षति वेषो,** गृहीतदीक्षावेषस्य हि सत्पुरुषस्याऽकृत्यप्रवृत्त्यदर्शनात् तथा प्रवर्त्तितुकामोऽपि हि स **शङ्कते**—यथा **वेषेणो**पलक्षितो **दीक्षितोऽस्मि** भवाम्य**हम्** एवं **चोन्मार्गेणा**ऽकृत्याचरणलक्षणेन, **पतन्तं** विवेकगिरिशिखरात् भ्रश्यन्तं यथा पुमांसं इति गम्यम् । **रक्षति** मर्यादया स्थापयति, **राजा** दुष्टनिग्रहशिष्ट-परिपालनेन रञ्जनाद्यथार्थो दण्डधारः**जनपदो** वा धिक्कारपङ्क्तिबाह्यत्वादिभिः प्रकारैर्यथा रक्षति, तथा वेषोऽपीति व्यवहाराभिप्रायाद् वेषः सर्वैरपि प्रमाणमेव कार्यः ॥२२॥ निश्चयतस्तु—

**अप्पा जाणइ अप्पा, जहट्ठिओ अप्पसक्खिओ धम्मो ।**
**अप्पा करेइ तं तह, जह अप्पसुहावहं होइ ॥२३॥**

**आत्मा** शुभपरिणामोऽशुभपरिणामो वा **यथास्थितस्तदात्मैव जानाति** नापरः परचेतोवृत्तेरतीन्द्रिय-

---

१. वन्द्यो नास्ति विना ध्यानं किञ्चित्किञ्चित् क्वचित्क्वचित्-C किञ्चित्किञ्चित्करं क्वचित्-P, KH ।

टि. 1. अतिखरं खरतरं अतिकठोरं, तस्य भावः खारतर्यम् ।

त्वादिङ्गितादितल्लिङ्गानां कपटतोऽपि सम्भवेनाऽनवधारणीयप्रतिबन्धत्वात् । अत आत्मा स्वयमेव साक्षी प्रत्यायनीयो यस्य स **आत्मसाक्षिको धर्मः** । ततश्चात्मा विवेकवान् जीवः **करोति तत्** सदनुष्ठानादिकं **तथा यथा आत्मसुखावहं** स्वहितनिरतं **भवति** ॥२३॥ इदमेव व्यापकमाह—

**जं जं समयं जीवो, आविसइ जेण जेण भावेण ।**
**सो तंमि तंमि समए, सुहासुहं बंधए कम्मं ॥२४॥**

**यं यमि**ति वीप्साया व्यापकत्वात् सर्वं **समयम**पि क्षणमात्रमपि **जीव आविशति** आस्कन्दति, **येन येन** सदसद्रूपेण **भावेना**ऽध्यवसायेन । **स** जीवस्**तस्मिन् तस्मिन् समये शुभाशुभं** तत्तद्रूपभावानुरूपं **बध्नाति,** आत्मसम्बद्धं करोति **कर्म** पुण्यपापरूपम् ॥२४॥ अथाहङ्कारस्य विशेषदुर्जयत्वात् तत्परिहारमुपदिशति—

**धम्मो मएण हुंतो, तो न वि सीउण्हवायविज्झडिओ ।**
**संवच्छरमणसिओ, बाहुबली तह किलिस्संतो ॥२५॥**

'यदि' इत्यध्याहारात्, यदि **धर्मो मदेनाभविष्यत्, ततः** सम्भाव्यते । एतत् **नापि शीतोष्णवातैः** प्राकृते शदेर्झडादेशे **'विज्झडिओ'** त्ति विशन्नः **संवत्सरम**भिव्याप्**यानशितो** निर्भोजनो, **बाहुबलिः सुनन्दा**-नन्दस्**तथा**प्रसिद्धप्रकारेणा**ऽक्लेशिष्यत्** क्लेशमन्वभविष्यदिति गाथार्थः ॥२५॥

कथा चेयं "**जह बाहुबलिस्स भरहवई**" इत्यत्र बोद्धव्येति ।

समदश्च गुरूपदेशनिरपेक्षो न स्वार्थसाधको भवति इत्येतदेवाह—

**नियगमइविगप्पिय-चिंतिएण सच्छंदबुद्धिरइएण ।**
**कत्तो पारत्त हियं, कीरइ गुरुअणुवएसेणं ॥२६॥**

**निजकमतिविकल्पितचिन्तितेन** स्वकीयाभिमतसङ्कल्पावधारितेन **स्वच्छन्दबुद्धिरचितेनो**पदेश-बाह्यस्वमनीषिकानिर्मितेन । **कुतः परत्र हितं क्रियते** उपायाभावान्न कुतोऽपीति । केन ? आह—**गुर्वनुपदेश्येन** मदावलिप्तत्वाद् गुरूपदेशानर्हेण शिष्येणेति शेषः ॥२६॥ किञ्च—

**थद्धो निरोवयारी, अविणीओ गव्विओ निरवणामो ।**
**साहुजणस्स गरहिओ, जणे वि वयणिज्जयं लहइ ॥२७॥**

**स्तब्धो**ऽनीचैर्वृत्तिर्वपुषापि दर्शितमानविकारः । **निरुपकारी** कृतघ्नः । **अविनीतो**ऽभ्युत्थाना-ऽऽसनदानाऽञ्जलिकरणादिविनयरहितः । **गर्वित** उत्सेकादात्मबहुमानी । **निरवनामः** पूज्येष्वपि न प्रणतिमान् । **साधुजनस्या**ऽदोषदृष्टिलोकस्य **गर्हितो** निन्दितः सन् **जनेऽपि** तदपेक्षया नीचलोकेपि, **वचनीयतां** 'दुष्टशील' इत्यश्लाघां **लभत** इति ॥२७॥

अथ दुर्विनयव्यपनयनाय किमिति बहूपदिष्टम् ? उच्यते-गुरुकर्मप्राणिनां बहुत्वात्, ते चासकृदुप-दिष्टेऽपि न बुध्यन्ते, एतदेव व्यतिकरेण काक्वा प्रथममाह—

**थेवेण वि सप्पुरिसा, सणंकुमारो व्व केइ बुज्झंति ।**
**देहे खणपरिहाणी, जं किर देवेहिं से कहियं ॥२८॥**

**स्तोकेनापि** हेतुनेति, शेषः, **सत्पुरुषाः सनत्कुमारवत् केऽपि बुध्यन्ते,** न सर्वेऽप्येवं लघुकर्मका इति भावः । **देहे** क्षणेन स्वल्पकालेन परिहाणी रूपह्रासः **क्षणपरिहाणिरिति यत्किल देवाभ्यां, 'से'** तस्य सनत्कुमारस्य **कथितं** तावतैव स महात्मा प्रतिबुद्ध इति समासार्थः ॥२८॥

व्यासार्थः कथानकादवसेयः । तच्चेदम्—

**[ सनत्कुमारचक्रिकथानकम् ॥ ]**

द्युसदामप्यनासाद्यमस्त्यल्पश्रेयसामिव । उर्वीं कुर्वदतिश्रीकां श्री**काञ्चनपुरं** पुरम् ॥१॥
श्री**विक्रमयशाः** प्रौढश्रीविक्रमयशा नृपः । तत्राऽभवद् भुवो भाग्यैर्दिवः शक्र इवागतः ॥२॥
चन्द्रस्येव रुचस्तस्य कान्ताः पञ्चशतीमिताः । स्पर्शामृतमुचोऽभूवन् भूषिताखिलभूतलाः ॥३॥
**नागदत्ता**ख्यया ख्यातः सार्थवाहोऽत्र पत्तने । अभवद्विभवैः स्वर्णशैलस्येवाधिदैवतम् ॥४॥
उत्थितेव सुधाम्भोधेर्नयनानन्दकौमुदी । नवेव प्रभुविष्णुश्री**विष्णुश्री**स्तत्प्रियाऽजनि ॥५॥
जगत्त्रितयसाम्राज्यभाजनादप्यसौ जनात् । आत्मानमुत्तरं मेने माद्यन् दयितया तया ॥६॥
कदापि प्राप भूपस्य दृक्पथं सा कथञ्चन । हृद्विमर्शविहीनस्य [1]तमसश्चन्द्रमूर्तिवत् ॥७॥
मन एव तया तस्य हृतं तेनाऽखिलैव सा । **उपकारापकारेषु मानिनो ह्यधिकक्रियाः** ॥८॥
अन्तरन्तःपुरं न्यस्य तामयं रमयन् मुदा । महानन्दधिया ब्रह्मचर्यस्थान् योगिनोऽहसत् ॥९॥
चेतनामिव तां भूपपिशाचे हृतवत्यसौ । उन्मत्त इव बभ्राम सार्थवाहः [१]प्रमोहवान् ॥१०॥
कालो जगाम लक्ष्म्येव तया युक्तवियुक्तयोः । सुखदुःखमयावेशः क्षितिभृत्सार्थवाहयोः ॥११॥
सेर्ष्याः प्रियापहारिण्यामथ प्राणापहारकम् । कार्मणं निर्ममुस्तस्यां विष्णुश्रियि नृपस्त्रियः ॥१२॥
कार्मणेन क्षीयमाणा ययौ साऽऽलेख्यशेषताम् । क्रमेण श्यामपक्षेण हिमधामतनूरिव ॥१३॥
नृपस्तन्मृत्युनोन्मत्तः स प्रेमकलहा मयि । [२]धृतमौनेयमित्यग्नौ क्षेप्तुं नाऽदित तद्वपुः ॥१४॥
वञ्चयित्वा विचारज्ञा महीशमथ मन्त्रिणः । वने वनेचरबलिं व्यधु**र्विष्णुश्रियो** वपुः ॥१५॥
तामप्रेक्ष्य प्रिये ! क्वाऽगा नर्म्मणा किं तिरोभव । न हास्यमपि तत्कार्यं वश्यो येनातितप्यते ॥१६॥
प्रियाऽसि त्वद्वियोगाग्निरप्ययं प्रिय एव मे । त्वदाश्रयं तु हृदयं दहतीत्यहमाकुलः ॥१७॥
किमगाः केलये क्वापि केलिः का तत्र मां विना । इत्यादि प्रलपन् भूपोऽभ्राम्यल्लीलावनादिषु ॥१८॥
इति त्यक्त्वान्नपानस्य भूपतेर्मृत्युशङ्कया । अदर्शयत तृतीयेऽह्नि मन्त्रिभिस्तत्कलेवरम् ॥१९॥

---

१. प्रमोदवान्-C । २. भृतमौ...P, D । मृतमौ....B ।

टि. 1. राहोः इत्यर्थः ।

मांसादैर्दारितं स्पष्टमलमूत्रादिभृत् स्फुटम् । शीर्णोपरित्वगुत्कीर्णदृष्टिदृष्टान्त्रकीकशम् ॥२०॥
तद् **विक्रमयशा विष्णुश्री**वपुर्वीक्ष्य लज्जितः । अचिन्तयदहो ! मोहो यदनेनाऽप्यहं जितः ॥२१॥ युग्मम् ॥
स्त्रीणां स्मरस्य शस्त्रीणां यदि वेद्मीत्यसारताम् । इयत्काले न भग्नः स्यात् तत्तदेकभये[१] भवः ॥२३॥
भवमित्थमुदीक्ष्याऽसौ दीक्षासौरभभासुरः । **सुव्रताचार्य**पादान्ते दान्तेन्द्रियचयोऽभवत् ॥२४॥
तपोभिर्दुस्तपैः सोऽङ्गं संसारमिव शोषयन् । **सनत्कुमार**कल्पेऽभूत् कालेन प्रवरः सुरः ॥२५॥
च्युत्वा ततः पुरे **रत्नपुरे** [२]सम्यक्त्वरत्नभाक् । **जिनधर्मा**भिधः सोऽभूद् धर्म्मभूषामणिर्वणिक् ॥२६॥
आर्त्तध्यानान्मृतो **नागदत्तो**ऽपि विरहातुरः । तिर्यग्भवेषु भ्रान्त्वाऽभूत् पुरे **सिंहपुरे** द्विजः ॥२७॥
[1]षट्कर्मा सो**ऽग्निशर्मा**ऽऽख्यः कालेनाऽऽप्य त्रिदण्डिताम् । द्विमासादितपोयत्नः पुरं **रत्नपुरं** ययौ ॥२८॥
**हरिवाहन**नाम्ना तत्पुरेन्द्रेण निमन्त्रितः । स पारणादिनेऽपश्यज्जिनधर्मं नृपौकसि ॥२९॥
ततः प्राग्जन्मवैरेण स त्रिदण्डी नृपं जगौ । न्यस्तेऽस्य श्रेष्ठिनः पृष्ठे स्थालं भुञ्जेऽन्यथा न तु ॥३०॥
गुर्वाज्ञा न विलङ्घ्येति राज्ञा भागवतेन सः । दिष्टः श्रेष्ठी ददौ पृष्ठं भाजनाय त्रिदण्डिनः ॥३१॥
तप्तपायसपात्रेण पृष्ठिचर्म्म च कर्म च । प्रादाहि जिनधर्मस्य न मनस्तु मनागपि ॥३२॥
भुक्ते तत्रोद्धृते पात्रे निस्त्वक् तस्य तनुर्बभौ । धीरस्य नश्यता क्लृप्तपश्चाद्द्वारेण कर्मणा ॥३३॥
गत्वाऽयमोकः स्वं लोकमथाऽऽहूय यथाविधि । कृत्वा चैत्याऽर्चनं भेजे जिनधर्मो जिनव्रतम् ॥३४॥
आरुह्य शैलशृङ्गाग्रमुत्तुङ्गपदलिप्सया । कायोत्सर्गं वितेनेऽसौ सर्वतोऽप्यनिवर्त्तकम् ॥३५॥
गृध्राद्यैश्चञ्चुभिश्चर्व्यमाणोऽप्यविचलद्वपुः । नमस्काररतिर्मृत्वा स **सौधर्मा**[2]**ऽधिभूर**भूत् ॥३६॥
त्रिदण्डी सोऽपि मृत्वेन्द्रयुग्यमैरावणोऽभवत् । ततश्च्युत्वा भवे भ्रान्त्वा **सिताक्षो**ऽजनि गुह्यकः ॥३७॥
इतश्च **जम्बूद्वीप**श्रीनेत्रे क्षेत्रेऽस्ति **भारते** । **कुरुजाङ्गल**देशान्तः पत्तनं **हस्तिनापुरम्** ॥३८॥
**अश्वसेना**भिधस्तत्राऽजनि राजन्यशेखरः । कलानां च गुणानां च यस्तीर्थं **प्रियमेलकम्** ॥३९॥
बभूव **सहदेवी**ति महादेवी महाद्युतिः । तस्य भूपस्य रूपेण प्राप्ता देवीव काचन ॥४०॥
स जीवो **जिनधर्मस्य** काले **सौधर्म**कल्पतः । तत्कुक्षिमासदद्भानोर्भानूपलमिवानलः ॥४१॥
चतुर्दशमहास्वप्नसूचितं सर्वलक्षणम् । रम्यं रत्नावनी रत्नमिव सूनुमसूदसौ ॥४२॥
महीयसा महेनाऽथ महीनाथो महीमुदे । **सनत्कुमार** इत्यस्य कुमारस्याभिधां व्यधात् ॥४३॥
जगन्नयनपीयूषकलशैरनिशं भृशम् । सिच्यमानः क्रमेणाऽयं ववृधे कल्पवृक्षवत् ॥४४॥
स शस्त्रशास्त्रयुग्यादिकलासु सकलास्वपि । क्रमाद् ज्ञानविशेषेण गुरूणामप्यभूद् गुरुः ॥४५॥

---

१. देकभये-P देकाभये-KH देकपटो L देकभवो-H । २. सम्यक्त्वतत्त्व-C, L, B, A, KH सम्यक्तत्त्व- D, K ।

टि. 1. षट्कर्मा-यजनयाजनोध्ययनाध्यापनदानप्रतिग्रहं इत्यादिषु षट्सु कर्मसु रतो ब्राह्मणः षट्कर्मा उच्यते । 2. अधिभूः - प्रभुः ।

स विश्वतरुणीनेत्रतोरणस्रग्विभूषणः । यौवनेनाऽऽश्रितः सा[1]र्द्धचत्वारिंशद्धनुस्तनुः ॥४६॥
धीमान् **महेन्द्रसिंहा**ख्यः कालिन्दीसूरनन्दनः । धर्मस्येव विवेकोऽस्य वयस्यः समजायत ॥४७॥
स वसन्ते समं तेन विलासाय समासदत् । **मकरन्दा**ख्यमुद्यानं पुण्येनात्मेव वैभवम् ॥४८॥
[2]तदैवाश्वपतिक्ष्मापप्राभृतप्रहितं हयम् । प्रैषी**दब्धितरङ्गा**ख्यमश्वसेनः स्वसूनवे ॥४९॥
ततो मुक्तवनक्रीडः पवनव्रीडदं रयात् । कुमारो हयमारोहन्मनोऽस्येव मनोरथः ॥५०॥
शरदभ्रनिभे क्वापि सकुमारे हरौ गते । तडिल्लेखायितं तत्र तद्भूषाधामभिः क्षणम् ॥५१॥
दधावे पुत्रमन्वेष्टुमश्वसेनोऽश्वसेनया । तत्तुरङ्गपदस्वेदफेनलालानुसारतः ॥५२॥
तदैव दैवतोऽरोधि विरोधिन्या जगद्दृशाम् । आकाशं कालरजनीजात्यया चण्डवात्यया ॥५३॥
एतया वात्यया लुप्ततद्वाहपथचिह्नया । राज्ञः प्रोन्मूलिता सूनुदर्शनाशालताऽपि सा ॥५४॥
ततो **महेन्द्रसिंहेन** महेन्द्रः किंक्रियाजडः । विज्ञप्तः पादलग्नेन मग्नो व्यसनवारिधौ ॥५५॥
क्वाऽन्यदेशे हयः क्वेह कुमारः क्वेदृशो मरुत् । तदीश ! दुर्घटं किञ्चिद् विधिनेदमघट्यत ॥५६॥
प्राप्यस्तदात्मना क्वापि [3]भ्रमता सुचिरं भुवि । कुमारोऽयं भवेद्दूरभव्यैर्धर्म्म इवाऽऽर्हतः ॥५७॥
तन्नाथ ! स्थीयतां तेन त्वया च रहिता मही । चन्द्रार्क्कहीना खिद्येत तमिस्रैरिव शत्रुभिः ॥५८॥
अहं त्वेकाग्रदृक् पश्यन् गुरोरिव तवाऽऽज्ञया । योगीव दैवं निर्जित्य मित्रं ज्ञानमिवानये ॥५९॥
इत्याग्रहेण तेनोक्तः कष्टाद् भूपोऽविशत् पुरीम् । सारवीरपरीवारः स च वीरवरोऽटवीम् ॥६०॥
हरिव्याघ्रकरिक्रूरां चिरं तामटतोऽटवीम् । विशीर्णं तस्य सैन्येन बन्धनेनेव योगिनः ॥६१॥
जलस्थलादिषु भ्राम्यन् मुक्तो बन्धुभिरप्ययम् । क्षीणपुण्यः पुमान् वित्तमिव मित्रमनाप्नुवन् ॥६२॥
मित्रलब्धियशोभागी न मे कश्चिद् भविष्यति । इति ध्यायन् स मुमुदे परित्यक्तः परिच्छदैः ॥६३॥
एकाकी कार्मुकी भ्राम्यन् मित्रं पश्यन् वने वने । मनसाऽनुभवन् तापमत्युग्रं तद्वियोगजम् ॥६४॥
शीतकालं हिमोत्तालमुष्णकालं दवाकुलम् । वर्षाकालं जलोत्फालं खेदहेतुं न वेद सः ॥६५॥ युग्मम् ॥
सर्वर्तुजं पिकवधू-चम्पकादिगुणोद्भवम् । कुमारगतहृद्वृत्तिः सुखमप्यन्वभून्न सः ॥६६॥
इत्थं दुःखे च सौख्ये च तुल्योऽरण्येऽचरच्चिरम् । स योगी परमं तत्त्वमिव मित्रं निरूपयन् ॥६७॥
मत्वैवं दक्षिणत्वेनाऽऽसन्नं मित्रसमागमम् । कदापि तस्य तैरङ्गैः स्पन्दितं मन्दिताऽसुखैः ॥६८॥
अथाऽयमायतोत्फुल्लदृगन्तोद्घट्टनादिव । सावधानीभवत्कर्णो मनसा व्याप्तवान् दिशः ॥६९॥
श्रुतहंसरवो लब्धपद्मगन्धिहिमानिलः । सरः किञ्चिदितोऽस्तीति स चचाल तदाऽऽकुलः ॥७०॥

---

१. सद्धि चत्त्वा...C, B, A । २. तदैवभूपतिः क्ष्मापप्राभृतप्रहितं हयम् । प्रैषीदश्वतरंगाख्यं मत्वा सारं स्वसूनवे - C । ३. भ्रमद्भिः - P, C, KH, L ।

स व्रजन् पल्वलोपान्ते कान्तकान्ताऽऽवलीवृतम् । पुरो ददर्श सुहृदं हृदयादिव निर्गतम् ॥७१॥
स्नपितौ हर्षदृग्तोयैः स्मितार्चिस्रग्भिरर्चितौ । ततः **सनत्कुमारस्य** स क्रमौ सहसाऽनमत् ॥७२॥
कुमारोऽप्यथ हर्षाश्रुशान्ततद्विरहानलः । उत्थायोत्थाप्य सुहृदं हृदि दोर्भ्यामपीडयत् ॥७३॥
द्वावप्युद्यन्महानन्दावकस्मात्प्राप्तिविस्मितौ । दृग्सुधानिर्झरैस्तापं शमयामासतुर्मिथः ॥७४॥
सुहृत्सङ्गसुधामेव नयन् वचनतामथ । **महेन्द्रसिंह**माचष्ट स्मयमानो नरेन्द्रभूः ॥७५॥
मद्वियोगानलज्वालाजालेन परितापितैः । अस्थीयत पितुः पादकमलैः कोमलैः कथम् ॥७६॥
त्वया कथं वा निस्तीर्णा विस्तीर्णा दुस्तराऽटवी । मद्विलोकनलोलेन क्वेयान् कालो विलम्बितः ॥७७॥
अथाऽऽदितः कथामेष कथयित्वा यथा तथा । हयापहारमारभ्य वार्त्तां पप्रच्छ भूपजात् ॥७८॥
ततो नृपसुतादेशाद् विद्याधरवधूजनैः । सोऽयं संस्नप्य सम्भोज्य सम्भूष्याऽऽनीयताऽग्रतः ॥७९॥
पुनः पृच्छति मित्रेऽस्मिन् न कथ्या [१]स्वकथा स्वयम् । इति ध्यात्वा नृपसुतः प्रियां प्रोवाच पार्श्वगाम् ॥८०॥
विद्यया विदितं वेद्यं विद्याधरसुते ! तव । तदस्मै मद्वयस्याय मद्वृत्तं देवि ! दिश्यताम् ॥८१॥
इदं निर्दिश्य निद्रालुरसौ रतिगृहेऽविशत् । विद्याधरी सा च **कुलवती** नाम्नाऽवदच्च तम् ॥८२॥
तदा प्रतीपशिष्येण जह्रेऽश्वेन सुहृत्तव । तेन [1]वल्गासमाकर्षोत्कर्षद्विगुणरंहसा ॥८३॥
कुञ्चितोप्युच्चलन्मूर्ख इवैष प्रतिषिद्धकृत् । मृत्युं दिनद्वयेनाऽऽप महाटव्यामटन् हयः ॥८४॥
पित्सोस्तुरङ्गमात्तूर्णमुत्तीर्णोऽयं सुहृत्तव । दर्शयन् लाघवं हस्तिहतात् पक्षीव वृक्षतः ॥८५॥
क्वाऽऽप्यनाप्य पयःपूरं दूरं तृष्णाकुलश्चलन् । एष पृथ्वीशभूः पृथ्व्या धृतोऽङ्के मूर्च्छितः पतन् ॥८६॥
ततो यक्षः कृपादक्षः कोपि तद्वनदैवतम् । सिषेचाऽमुं जलैर्म्लानं यथेन्दुः कैरवं करैः ॥८७॥
प्राग्जन्मबन्धुनाऽनेन [2]धुनानेन तनुक्लमम् । अमूर्च्छो मूर्त्तिमत्पुण्यमिवायं पायितः पयः ॥८८॥
तमुत्तस्थे सखाऽपृच्छत् कस्त्वं निष्कारणः सुहृत् । कुतश्चेदं पयः स्वादु मुधाकृतसुधारसम् ॥८९॥
आचचक्षे स यक्षोऽहं वीक्ष्य त्वां मोहमागतम् । आनयं मानसादम्भो दम्भो यस्य सुधारसः ॥९०॥
आर्यपुत्रो जगादाऽथ तत्पाथः प्रविशामि चेत् । तन्मे श्रमार्क्कतापोत्थो दाहो देहस्य नश्यति ॥९१॥
श्रुत्वेति मङ्क्षु यक्षेण क्षिप्त्वा कदलिसम्पुटे । सुधाकुण्डमिवोद्धूतं नीतोऽसौ मानसं सरः ॥९२॥
यक्षेण गुरुणेवाऽयं सरः श्रेय इवार्पितः । संसारजमिवाऽमुञ्चत् तापं कान्तारचारजम् ॥९३॥
म्लानस्तपनतापेन शीतले तज्जले ललन् । नागवल्लीदलमिवाऽभवदेष पुनर्नवः ॥९४॥
**असिताक्ष**स्तदा यक्षो विपक्षः पूर्वजन्मनः । हन्तुं हन्त भवन्मित्रं [२]मर्त्त्यंमृत्युरिवाऽऽपतत् ॥९५॥

---

१. सुकथा-P । २. मृत्यं-P, L, KH मत्युं-A मृत्युं-K मृत्युः D मृत्यु-C ।

टि. 1. वल्गा-अश्वनियन्त्रणोपयोगिरज्जुविशेषः, 'लगाम' इति भाषायाम् । 2. धू धातोः (आ०) कर्तरिवर्तमानकृदन्तः, तृतीया एकवचनरूपः ।

अरे रे ! तिष्ठ तिष्ठाऽद्य मया दृष्टः क्व यास्यसि । इत्युक्त्वैकं भवन्मित्रे यक्षोऽयं वृक्षमक्षिपत् ॥९६॥

द्रुमोऽयमार्यपुत्रेण पाणिना परिताडितः । स्नानात्ययोचितं पुष्पचयं दत्त्वाऽन्यतोऽपतत् ॥९७॥

अथ तस्मिन् भविष्यन्त्या दुष्कीर्त्तेर्वर्णिकामिव । विचकारान्धकारालीं यक्षोऽस्य क्षोभकाङ्क्षया ॥९८॥

तदन्तर्दन्तसङ्घट्टोच्छलज्ज्वलनविद्युतः । घोरघोषान् विचक्रेऽसौ पिशाचान् कालमेघवत् ॥९९॥

पद्मावबोधसोत्साहसततोल्लासितेजसि । त्वन्मित्रे नाऽन्धकारादिविकारोऽभूद्भयङ्करः ॥१००॥

अथ प्रयुक्तान् यक्षेण नागपाशानति(तु)त्रुटत् । स्वस्मिन् लगत[१] एवाऽयं ज्ञानी कर्मचयानिव ॥१०१॥

अथ यक्षो विलक्षोऽयं दोर्भ्यां द्विर्भावितोद्यमः । कुमारेण समारेभे हरिणेव रणं करी ॥१०२॥

त्रस्यद्दिक्करि विभ्रश्यद्गिरि स्रस्यन्महाकिरि । युद्धमुद्धतयोरासीत् तयोः स्वर्गिदृगुत्सवम् ॥१०३॥

त्वन्मित्रमुष्टिघातेन नीतोऽपि शतखण्डताम् । यक्षः **क्षीणबलो** नाम नाऽमरत्वान्ममार सः ॥१०४॥

यक्षेऽत्र क्षेत्रतो नष्टे त्वन्मित्रे पुष्पवृष्टयः । पेतुस्तत्कीर्त्तिसंरुद्धा[२]न्नभस्त इव तारकाः ॥१०५॥

जैत्रो गज इव क्रीडासरसः सरसस्ततः । अपराह्णे ययावन्यां वन्यां तव सुहृद्भुवम् ॥१०६॥

वीक्ष्येह कन्यकाः काश्चिदष्ट दष्टः स्मराहिना । कम्प्रो रोमाञ्चवानेष मूर्द्धानमधुनान्मुहुः ॥१०७॥

कान्तिमत्यः स्मरस्यैता अष्टदिग्जयभल्लयः । अष्टदिग्पतिरेवैष भावीत्यस्याऽविशन् हृदि ॥१०८॥

कामतुल्यतनुं वीक्ष्य कटाक्षविशिखैरमुम् । निघ्नन्त्यस्ता अपि शरैर्युक्तं कामेन जघ्निरे ॥१०९॥

स्वरूपं भूपभूस्तासां जिज्ञासुरुपसृत्य ताः । पप्रच्छ का वने यूयं वनदेव्य इव स्थिताः ॥११०॥

ता जगु**र्भानुवेगस्य** विद्याधरपतेः सुताः । भाग्यैस्त्वां द्रष्टुमाकृष्टाः क्ष्मामिमां वयमागताः ॥१११॥

अदूरेऽस्ति वनादस्मादस्मदीयपितुः पुरी । तां भूषय भुवो भूषां मुक्तालीमिव नायकः ॥११२॥

इत्याग्रहेण जगृहे ताभिः स्वां नगरीमयम् । अनायि पितुरग्रे च तदानीमेव सौविदैः ॥११३॥

अभ्युत्थानं व्यधादस्य विद्याधरविभुर्मुदा । **धन्यानामाकृतिज्ञातगुणानां क्व न गौरवम्** ॥११४॥

अथैनमभ्यधाद्भानुवेगो मे गोचरं[३] दृशाम् । मद्दुःखानामभाग्यैश्च मद्भाग्यैश्च त्वमागमः ॥११५॥

महावंशत्वमाख्याति कृतिन्नाकृतिरेव ते । ज्ञेयः परिमलेनैव दिव्योद्यानभवो मरुत् ॥११६॥

भवादृशा दृशां भाग्यं न स्युरर्थिपराङ्मुखाः । इति त्वामर्थयेऽष्टापि धन्याः कन्या ममोद्वह ॥११७॥

इत्थमभ्यर्थितस्तेन हस्ते जग्राह तत्सुताः । व्यसनेऽपि तदैवायमदैवायत्तपौरुषः ॥११८॥

असौ लीलागृहे तासां सुप्तो हृत्वाऽन्यतः क्वचित् । द्विषताऽक्षेपि यक्षेण **निर्बलानां छलं बलम्** ॥११९॥

निद्रान्तेऽसौ वनान्ते स्वं पश्यन्नेकाकिनं भुवि । स्वप्नोद्वाहभ्रमं बद्धकङ्कणाऽऽलोकतोऽमुचत् ॥१२०॥

भ्रमन् सप्तक्षणं[1] वीक्ष्य प्रासादं तत्र विस्मितः । शुभ्रेऽविशदभ्रेऽस्मिन् शरदभ्रे शशीव सः ॥१२१॥

---

१. गलत-P । २. संरुद्धान-KH । ३. गोचरे-KH ।

टि. 1. सप्त क्षणा-भागा यस्मिन् प्रासादे, तम् ।

सनत्कुमार ! कौरव्यकलावलिकलागुरो ! । भवान्तरेऽपि भर्त्ता मे भवानेव भवेदिति ॥१२२॥
रोदसी रोदयन्तीह [1]कुरुरीकरुणैः स्वरैः । रुदती [2]सुदती कापि शुश्रुवे सुहृदा तव ॥१२३॥ युग्मम् ॥
सप्तमीं भुवमारुह्य रूपस्येवाधिदेवता । तेन दृष्टा च पृष्टा च कासि किं रोदिषीति सा ॥१२४॥
दृष्ट्वा दृष्टिद्वयाकालसुधावृष्टिममुं च सा । सोत्कर्षहर्षात् कर्षन्ती हृदः शल्यमदोऽवदत् ॥१२५॥
अहं **चन्द्रयशो**देवीभर्तुः **साकेत**भूपतेः । **सुराष्ट्रनाम**धेयस्य **सुनन्दा** नाम नन्दिनी ॥१२६॥
राज्ञः कुरुकुलारामकल्पवृक्षस्य सूनवे । पित्रा **सनत्कुमाराय** दत्ताऽस्म्युदकपूर्वकम् ॥१२७॥
अहं कन्यैव केनापि हृता विद्याधरेण तत् । निर्विघ्नाः कस्य सिध्यन्ति महत्यो हन्त वृद्धयः ॥१२८॥
इमं विकृत्य प्रासादं मामत्रैव विमुच्य सः । ययौ विद्याधरः क्वापि न जाने किं करिष्यति ॥१२९॥
अथाऽऽचष्ट तथाकष्टगतामेतां सुहृत्तव । मा भैषीः सुभगे ! सोऽस्मि कौरवः स्मरसीह यम् ॥१३०॥
सनत्कुमारं कौरव्यकुमारमथ साऽप्यमुम् । मत्वा हर्ष-त्रपामग्ना कैः कैर्नाकुलिता रसैः ॥१३१॥
तदा विद्याधरो **वज्रवेगाख्योऽशनिवेगसूः** । प्राप्तः सरोषादुत्पाट्य खे चिक्षेप [3]कुरूद्वहम् ॥१३२॥
हा हा नाथ ! हतास्मीति रुदती साऽपतत् क्षितौ । तदा तरौ गजोत्क्षिप्ते वल्लीव खगनादिनी ॥१३३॥
आर्यपुत्रस्तु खे तेन क्षिप्तस्तडिदिव ज्वलन् । शत्रोरेवोपरि प्राणापहारी हेलयाऽपतत् ॥१३४॥
हत्वैष द्विषमानन्द्य तां कन्यां तूर्णमूढवान् । निवेदिता निमित्तज्ञैः स्त्रीरत्नं हि पुरैव सा ॥१३५॥
पतिस्ते भ्रातृभिद्भावीत्यामृश्य ज्ञानिनो वचः। तदा **सन्ध्यावली** वव्रे **वज्रवेग**स्य साऽप्यमुम् ॥१३६॥
जनको **वज्रवेगस्याशनिवेगा**भिधः क्रुधा । विद्याधराधिपोऽचालीदमुं प्रत्युद्धलैर्बलैः ॥१३७॥
आश्वसेनेः स्वजामातुः साहाय्याय महाबलैः । **भानुवेगो**ऽभ्ययाच्च**न्द्रवेगेन** सह बन्धुना ॥१३८॥
विद्यां प्रियाय प्रज्ञप्तिमदात् **सन्ध्यावली** तदा । **स्त्रीणां भ्रातृ-पितृभ्योऽपि पतिवृद्धिर्यतः प्रिया** ॥१३९॥
तदाऽऽशु **चन्द्रवेगेन भानुवेगेन** चाऽर्पितम् । सन्नाहं च रथं चाऽङ्गीचक्रे हृष्यन् सुहृत्तव ॥१४०॥
सुहृत्ते **चन्द्रवेगा**दिविद्याधरचमूगतः । बभौ मरीचिमालीव [4]वीचिमालिनि बिम्बितः ॥१४१॥
प्रसस्रुरश्रुमुक्नारीनयनाऽस्खलितोद्यमाः । रसादशनिवेगस्या[5]शनिवेगभृतो भटाः ॥१४२॥
लोलद्ध्वजकरोद्धूतिमिथःसंहूतयोरिव । उभयोर[6]भयोद्दामः सङ्ग्रामः सैन्ययोरभूत् ॥१४३॥
ततः करिकरोत्क्षिप्तभटक्ष्वेडार्त्तदिग्गजम् । द्विट्घातनिर्यदन्त्रच्छित्खुरधावत्तुरङ्गमम् ॥१४४॥
त्रुटत्स्वाङ्गायुधीकारयुध्यमानमहाभटम् । घातत्रुट्यद्गुणस्थाननीतस्वान्त्रस्फुरद्रथि ॥१४५॥
कबन्धनृत्यव्यालोकहर्षहुङ्कारिमस्तकम् । गलद्दर्पैश्चलत्शीर्षैरीक्ष्यमाणं सुरासुरैः ॥१४६॥
बिभ्यद्द्वयं त्रसत्त्रासं कुप्यत्कोपं बलद्वयम् । अहङ्कुर्वदहङ्कारमभूत्तत्प्रधनं घनम् ॥१४७॥ कलापकम् ॥

---

टि. 1. कुरुरी-पक्षीविशेषः । 2. सुदती-शोभनाः दन्ताः यस्याः सा 'दन्त' शब्दस्य दत् आदेशः । 3. कुरुनन्दनम् इत्यर्थः । 4. वीचिमालिन्-समुद्रः । 5. अशनिः विद्युत्, तस्याः वेगः इव वेगः तं बिभ्रति । 6. भयरहितेन हेतुना उद्दामः प्रचण्डः ।

व्यक्तरक्ताब्धिनिर्मज्जत्[१]सज्जसिन्धुरभूधरे । व्यसुधीरतनूकूटकोटरालीनकातरे ॥१४८॥
क्षणेऽस्मिन् **वज्रवेगा**रिः क्व स इत्युन्नदन् रुषा । विवेशाऽ**शनिवेग**स्तां [२]सव्यधन्वा भुवं रथी ॥१४९॥ युग्मम् ॥
अहं स **वज्रवेगा**रियमस्मीति निर्नदन् । धुन्वन्धनुः पुरस्तस्य तस्थौ कुरुकुलाङ्कुरः ॥१५०॥
अथ तौ विस्मयोत्कर्षविस्मृतात्मात्मसङ्गरैः । साक्षिवद्वीक्षितौ सैन्यैरयुध्येतां समुद्धतौ ॥१५१॥
अपरायुधसम्पातैरपराजितयोस्तयोः । अभूद्दिव्यास्त्रसंरम्भो जगद्भङ्गभयप्रदः ॥१५२॥
अफलाखिलदिव्यास्त्रः स निस्त्रिंशधरो रिपुः । आर्यपुत्राय हस्तात्तकृतान्त इव तत्वरे ॥१५३॥
दूरस्रस्तायुधं काममारटत् कङ्कणारवैः । मत्प्रियेणार्द्धचन्द्रेण भुजार्द्धं तस्य चिच्छिदे ॥१५४॥
क्षणं सह्योऽङ्घ्रिभारोऽरीन् यावद् हन्मीति पातिना । सान्त्वयन्निव हस्तेन तेनोर्वीं सोऽभ्यधावत ॥१५५॥
उद्धालरेख[1]मुद्भूकं दन्तदष्टौष्ठमुग्रहक् । विद्यार्पितेन चक्रेण मत्प्रियस्तच्छिरोऽच्छिदत् ॥१५६॥
व्यसोरशनिवेगस्य राज्यश्रीरश्रयत्तदा । मत्पतिं **चण्डवेगा**द्यैर्नुन्ना विद्याधराधिपैः ॥१५७॥
**वैताढ्य**गिरिमानीय पुरः श्रेणिद्वयाधिपैः । एष खेचरचक्रित्वेऽभिषिक्तो [३]विक्रमाज्जितैः ॥१५८॥
आश्वसेनिः शाश्वतार्हत्प्रतिमानां कृती ततः । अष्टाहिकामष्टकर्मास्कन्दी **नन्दीश्वरे** व्यधात् ॥१५९॥
मत्पित्रा **चण्डवेगेन** प्रणम्याभ्यर्थितस्ततः । व्युवाह मन्मुखं कन्याशतं स तव बान्धवः ॥१६०॥
सुखमग्नमना गीत[४]नृत्तनाटककौतुकैः । अभिरामनगारामसरिन्नीरादिखेलनैः ॥१६१॥
विद्याधरीवधूवृन्दवृतः कालं नयन्नयम् । आनीतो भवदालोकं दैवेनैवेह सम्प्रति ॥१६२॥ युग्मम् ॥
उक्ते च कुलमत्येति **महेन्द्रे** विस्मय[५]स्थिते । विद्याधरेन्द्रो विद्राणनिद्रः पर्यङ्कमत्यजत् ॥१६३॥
समं **महेन्द्रसिंहेन** महसेव [2]महःपतिः । पूर्वाद्रिमिव [६]रौप्याद्रिमाससादाश्वसेनभूः ॥१६४॥
कृतकृत्यमिवात्मानं विदन् विद्याधराधिपः । ऋध्या परमया मित्रं रमयामास तत्र सः ॥१६५॥
अपरेद्यु**र्महेन्द्रेण** विज्ञप्तः खेचराग्रणीः । अर्कांशुतापिताम्भोजमधुबन्धुरया गिरा ॥१६६॥
त्वल्लक्ष्मीमीक्षमाणस्य मनो मे तुहिनायते । पितरौ त्वद्वियोगार्त्तौ स्मरतः परितप्यते ॥१६७॥
अर्धोदकेऽर्कतापस्थमिव मां विद्धि बान्धव ! । तपसोऽस्य फलं यच्छ प्रभो ! पितृनिरूपणात् ॥१६८॥
इत्थमुक्तेऽचलत् सोपि सोत्कण्ठः पितृदर्शने । सकलत्रः समन्त्रीशः समित्रः खेचरैर्वृतः ॥१६९॥
विमानौघैः सहस्रांशुसहस्रमयमम्बरम् । कुर्वन् **सनत्कुमारः** [७]स्राक्[3] पुरं **हस्तिपुरं** ययौ ॥१७०॥
जगदुद्द्योतकं राजा नन्दनं सपरिच्छदः । योगीव परमात्मानं तं पश्यन्मुमुदेतराम् ॥१७१॥

---

१. राजसि॰ K, KH । २. सज्ज-C । ३. विक्रमार्जितैः- C, B, A, K, D । ४. नृत्य L, K, दृप्त- KH । ५. स्मिते - A, B, C, K । ६. रूप्य- KH । ७. द्राक् B ।

टि. 1. उद्भूकं-उद्घाटितं भूकं छिद्रं यस्मिन् तद्, शिरोविशेषणम् । 2. सूर्यः । 3. स्राक् (अव्य०) शीघ्रम् ।

आनन्दी नन्दनालोके महानन्दोन्मुखो नृपः । व्रतमस्पृहयल्लाभे न कोऽधिकमनोरथः ॥१७२॥
राज्ये न्यस्य सुतं दूरनिर्वाणनगरोत्सुकः । **धर्मतीर्थेश**तीर्थे स प्रव्रज्यामाददे कृती ॥१७३॥
रसां सनत्कुमारस्य रक्षतश्चक्रिलक्षणम् । [1]उदपद्यन्त रत्नानि चक्रादीनि चतुर्दश ॥१७४॥
चक्रमार्गानुगो वर्षसहस्रजितभारतः । लब्ध्वा नवनिधीन् हृष्टः स **हस्तिपुर**मागमत् ॥१७५॥
ततोऽस्य चक्रवर्तित्वाभिषेके **धनदः** स्वयम् । आगत्य विचकारैकयोजनां रत्नवेदिकाम् ॥१७६॥
माणिक्यमण्डपं तत्र, तत्र पीठं मणीमयम् । नानारत्नमयं तस्य मध्ये सिंहासनं महत् ॥१७७॥
[2]पूर्वप्रीत्यैव सम्प्राप्तं **सुधर्मा**ख्यं सदस्तदा । तत् **कुबेरेण** विज्ञप्तोऽलञ्चकाराश्वसेनसूः ॥१७८॥
दिव्याः कोटीर-ताडङ्क-[3]हार-चीवर-पादुकाः । सच्छत्र-चामरास्तस्मै ढौकयाञ्चक्रिरे सुराः ॥१७९॥
क्षीरनीरनिधेर्नीरैः सशरीरैः शुभैरिव । आश्वसेनाय चक्रित्वाभिषेकं चक्रिरे सुराः ॥१८०॥
गीत-नर्तन-वाद्यादि-मङ्गल्यं नाटकादि च । तारं तुम्बरुरम्भाद्यैः समारभ्यत तत्पुरः ॥१८१॥
स श्रीमानभिषिच्यैवं दिव्यैराभूष्य भूषणैः । सुरैः प्रावेशि रत्नेन हस्तिना हस्तिनापुरम् ॥१८२॥
पुरेऽस्मिन् विस्मयं यच्छन् पौराणां क्षितिपूरणैः । जलैरिवाथ जलदः प्रावर्षद्धनदो धनैः ॥१८३॥
**सौधर्मेन्द्र**स्तव प्राच्यसौधर्मेन्द्रस्य सौहृदात् । मयेत्यकारयत्सर्वं किञ्चिदादिश्यतां पुनः ॥१८४॥
इदं विज्ञप्य **धनदः** सर्वं भव्यमभूदिति । सत्कृतश्[4]चक्रिचिह्नेन द्यां ययौ द्योतयन् दिशः ॥१८५॥ युग्मम् ॥
नृपैर्मुकुटिभिः कामं सामन्तैश्चाथ निर्ममे । लक्ष्मीलतापयःसेकोऽभिषेको भरतेशितुः ॥१८६॥
उज्झितां दण्डशुल्कादिक्लेशलेशैरपि क्षितिम् । अपालयदयं बालमिवाऽप्रकुपितः पिता ॥१८७॥
**ईशान**कल्पतो भाभिर्भर्त्सयन् भासुरान् सुरान् । **सङ्गमाह्वः** सुरः प्राप **सौधर्मेन्द्र**सदस्तदा ॥१८८॥
गते **सौदामिनी**संज्ञमस्मिन्नालोक्य नाटकम् । सुरैः सुराधिपः पृष्टः किमस्येदृक् महन्महः ॥१८९॥
अथाऽऽचष्ट हरिः कष्टं तेनेऽनेन पुरा तपः । आचाम्लवर्धमानाख्यं तेनाऽसौ विश्वजैत्ररुक् ॥१९०॥
ईदृक्रुचिः क्वचित् कश्चित् अस्तीत्युक्ते पुनः सुरैः । शक्रोऽभ्यधान्नभात्येष पुरस्तुर्यस्य चक्रिणः ॥१९१॥
**विजयो वैजयन्तश्च** तदश्रद्धापरौ सुरौ । क्ष्मां श्रितौ विप्ररूपेण चक्रिरूपनिरूपणे ॥१९२॥
आरब्धमज्जनस्तैलाभ्यक्तस्तौ मुक्तभूषणः । तदैवाऽवीविशच्चक्री द्वाःस्थौ द्वाःस्थनिवेदितौ ॥१९३॥
तौ रूपं तस्य भूपस्य पश्यन्तौ विस्मयस्थितौ । शिरोऽकम्पयतां रूपं, निषेधन्ताविवान्यतः ॥१९४॥
नृपेणाऽऽगमने हेतुमेतौ पृष्टावशंसताम् । त्रैलोक्योत्तरविख्यातत्वद्रूपेक्षाकुतूहलम् ॥१९५॥
रूपमालोकनीयं मे स्नातस्य स्थीयतां क्षणम् । इत्यादिश्य नरेशस्तौ प्राविशत् मज्जनालयम् ॥१९६॥
निर्वृत्तमज्जनः सज्जचन्दनादिविलेपनः । अदूष्यदूष्यभृन्मुक्तदूषणः स्फारभूषणः ॥१९७॥

---

१. समुपद्यन्त - D, KH । समपद्यन्त A, C, B । २. पूर्वरीत्यैव - P । ३. महाचीवर-P । ४. श्चक्र- C, A, KH, B, K ।

आजुहाव द्विजावेतौ समेतौ सममेव तौ । प्रम्लानवदनाम्भोजावभूतां राजदर्शनात् ॥१९८॥
पूर्ववत्किं न वां प्रीतिरितिपृष्टेऽथ चक्रिणा । तावूचतुः स्तुतिं चक्रे त्वद्रूपस्य दिवस्पतिः ॥१९९॥
आवामश्रद्दधानौ तद्वीक्षितुं क्षितिमागतौ । शक्रस्तुतेरप्यधिकं पूर्वं न्यधायि धाम ते ॥२००॥
देहद्युतिलताखण्डखण्डनोद्दण्डदन्तिनः । त्वयि भूकान्त ! सङ्क्रान्ताः सम्प्रति व्याधयोऽधिकम् ॥२०१॥
तनुस्तरुणिमारूपं श्रीरित्यादिमदप्रदम् । सन्ध्यारागस्थिरं धीरा [१]नीरागत्वेन बिभ्रति ॥२०२॥
इत्युक्त्वा त्रिदशीभूय द्राक् तिरोहितयोस्तयोः । स्वं विच्छायं नृपोऽपश्यन्निस्तैलमिव दीपकम् ॥२०३॥
स दध्यौ च हहा ! स्वैरमनालोचितगामिषु । अस्नेहेषु सुधास्नेहो देहादिषु शरीरिणः ॥२०४॥
देहे गेहे वसन् धीमान् मलव्यग्रे विनश्वरे । [1]तदर्जत्याप्नुयात् धाम येन निर्मलमक्षयम् ॥२०५॥
इति ध्यात्वा सुधीः सूनुं न्यस्य राज्ये नराधिपः । व्रतं जग्राह विनयी **विनयन्धर**सूरितः ॥२०६॥
समवृत्तेर्विहरतस्तस्य प्रकृतिमण्डलम् । सान्ध्यं महो दिनस्येव पृष्ठेऽगादतिरागभृत् ॥२०७॥
निर्ममं निर्मलं स्वर्णशैलजङ्गमशृङ्गवत् । षण्मासान् समुपास्यैनं तत्क्रमेण न्यवर्त्तत ॥२०८॥
कोद्रवाम्लकरम्भं स भैक्ष्यं षष्ठान्तपारणे । अभुङ्क्त वपुषोऽपथ्यं पथ्यं क्वाकारिताहृतम् ॥२०९॥
अस्य भूयोऽपि षष्ठान्ते तादृक्पारणकारिणः । व्याधयोन्तस्तपोनुन्ना इवाभूवन् बहिस्तनोः ॥२१०॥
कच्छूशोषज्वरश्वासारुचिकुक्ष्यक्षिवेदनाः । देहे सेहेतरां सप्त सप्तवर्षशतानि सः ॥२११॥
एवं परीषहानस्य सहमानस्य दुस्सहान् । अभूवन् लब्धयः सर्वौषधीभूततनूमलाः ॥२१२॥
तदा दिवस्पतिर्देवानुद्दिश्यानन्द[२]कन्दभूः । आचष्ट तच्चरित्रेण पवित्रेण चमत्कृतः ॥२१३॥
चक्री तुर्यस्तपोलब्धसर्वलब्धिरपि स्वयम् । अहो देहानपेक्षत्वं रुजः [३]स्वान्न चिकित्सति ॥२१४॥
तदश्रद्धाय **विजयो वैजयन्त**श्च तौ सुरौ । वैद्यरूपं समासाद्य तमेत्य मुनिमूचतुः ॥२१५॥
महाभाग ! महारोगैः परितः परितप्यसे । वद कायं चिकित्सावः स्वैरं स्वैरौषधैस्तव ॥२१६॥
ऊचे मुनिर्युवां वैद्यौ जन्मौघसहचारिणाम् । लोभादिभावरोगाणां यदि तन्मां चिकित्सताम् ॥२१७॥
वैद्यौ द्रव्यरुजां चेत् तद् दृश्यतामितिवाग् मुनिः । पामाशीर्णां कफेनैकां [2]निष्कवद्विदधेऽङ्गुलीम् ॥२१८॥
तामङ्गुलीं तपोऽर्कस्य करमेकमिवोद्यतम् । भास्वतीं वीक्ष्य विस्मेरौ मुनिं नत्वेदमूचतुः ॥२१९॥
लब्धीर्लब्ध्वापि रुग्बाधाः सहमानस्तपस्यति । आश्वसेनिर्महात्मेति चक्रे शक्रस्तव स्तवम् ॥२२०॥
आवां तावेव गीर्वाणौ भवद्रूपनिरूपकौ । आगत्येद[४]मपश्याव शंसित्वेति तिरोहितौ ॥२२१॥
ज्ञातावसानसमयो गृहीतानशनस्ततः । **सनत्कुमार**स्त्रिदिवे स्वनाम्नि त्रिदशोऽभवत् ॥२२२॥

**इति सनत्कुमारकथानकम् ॥**

---

१. नीत्वागत्वेन-K । २. कन्दलः KH । ३. स्वानयिकि...C, KH । ४. मपश्यावः- KH, K, P, A, B ।
टि. 1. तद् अर्जति धीमान् येन निर्मलं....धाम आप्नुयात् इत्यन्वयः । 2. निष्कं-सुवर्णम् ।

अथ देहे क्षणपरिहाणिरिति समर्थनार्थं सर्वभावानामभावावसानत्वं सोपपत्तिकमाह–

**जइ ता लवसत्तमसुर-विमाणवासी वि परिवडंति सुरा ।**
**चिंतिज्जंतं सेसं, संसारे सासयं कयरं ॥२९॥**

**यदि तावल्लवसप्तमसुराणाम**नुत्तरगीर्वाणविशेषाणां विमानेष्वनुत्तराख्येषु ये वसन्ति तिष्ठन्ति ते **लवसप्तमसुरविमानवासिनो**ऽनुत्तरविमानवासिन इत्यर्थः । अत्र ये क्षपकश्रेणिसमुचितविशुद्ध्यमानविशिष्ट-तमसंयमपरिणामवन्तोऽपि प्रान्तकाले आयुःकर्मणः सप्तभिर्लवैरपूर्यमाणतया देवेषूपपद्यन्ते ते समयपरिभाषया लवसप्तमा उच्यन्ते । उक्तं च '**सत्तलवा जइ आउं**' [ ] इत्यादि तेषां चावश्यमनुत्तरोपपातित्वाच्च तदीयत्व-निर्देशोऽनुत्तरविमानानामिति । ततश्च तद्वासिनोऽपि त्रयस्त्रिंशत्सागरोपमायुषोऽपि **सुराः परिपतन्ति** आयुःक्षयेण च्यवन्ते । **चिन्त्यमानं शेषं** स्वल्पायुष्कजीवसत्कं **संसारे** आकलङ्कलीभावे **शाश्वतं कतरत्** ? न किमपीत्यर्थः ॥२९॥ अथाऽशाश्वतद्वारेणैव सुखस्य दुःखात्मिका आयतिरित्युपदिशति–

**कह तं भन्नइ सोक्खं, सुचिरेणवि जस्स दुक्खमल्लियइ ।**
**जं च मरणावसाणे, भवसंसाराणुबंधि च ॥३०॥**

**कथं तद् भण्यते सौख्यं** गुणगुणिनोरभेदोपचारात् कथं स भण्यते सुखी **सुचिरेणापि** त्रयस्त्रिंशत् सागरोपमप्रान्तेपि **यस्य दुःखं** गर्भजन्मादिरूपं प्रतिकूलवेदनीय**मालीयते** आश्लिष्यति । एतेनानुत्तर-वैमानिकादीनां पुण्यानुबन्धिपुण्यप्रभवसुखस्य गर्भजन्मादिदुःखमयी आयतिरुक्ता । अथ पापानुबन्धिपुण्योत्थ-सुखस्यायतिमाह **यच्च** मरणेनावसानं **मरणावसानं तस्मिन्** सति **भवसंसारानुबन्धि** भवो नरकादिपर्यायस्तेन संसरणं भ्रमणं भवसंसारस्तमनुवर्तितुं शीलं यस्य तत्तथा । **चः** समुच्चये तेन न केवलं दुःखात्मकं भव-संसारनुबन्धि चेति भावः ॥३०॥

अथवा पापानुबन्धिपुण्यशालिनामपि पापानुबन्धिदुष्कर्मवतामिव तुल्यं दुर्ल्लभबोधिकत्वमाह–

**उवएससहस्सेहिं वि, बोहिज्जंतो न बुज्झई कोइ ।**
**जह बंभदत्तराया, उदाइनिवमारओ चेव ॥३१॥**

**उपदेशसहस्रैरपि बोध्यमानो न बुध्यते कश्चिद्** गुरुकर्मा, कथम् ? इत्याह –**यथा ब्रह्मदत्तराजा उदायिनृप-मारकश्च एवा**वधारणे, स च कश्चिदेव न बुध्यते न सर्व इति व्यवहितः सम्बध्यते इति समासार्थः ॥३१॥ व्यासार्थः कथानकाभ्यामवसेयस्ते चेमे–

**[ ब्रह्मदत्तकथानकम् ॥ ]**

सुत**श्चन्द्रावतंसस्य साकेतनगरे**शितुः । **मुनिचन्द्रा**भिधश्चन्द्रादप्यभूदतिनिर्म्मलः ॥१॥
स्वं नाम सत्यतां नेतुं सेतुं संसारवारिधेः । दीक्षामयमुरीचक्रे सूरेः **सागरचन्द्रतः** ॥२॥
स विहारक्रमे सूरिः सार्थाद् भ्रष्टोऽटवीमटन् । चतुर्भिः क्षुत्तृषाग्लानः पर्यचर्यत वल्लवैः ॥३॥

भवभ्रमिक्लमच्छेददीर्घपीयूषदीर्घिकाम् । चकाराऽयमृषिस्तेषामुपकाराय देशनाम् ॥४॥
द्राक् चत्वारोऽपि ते सत्त्वारोपितेन हृदाऽभवन् । धर्मस्य [1][१]सर्वदिग्जेतुः सेनान्य इव दीक्षिताः ॥५॥
ते शमामृतकासारपालयोऽपालयन् व्रतम् । उभौ त्वनिन्दतां धर्मं **सर्वा नाऽङ्गुलयः समाः** ॥६॥
दान्तौ च तपसि द्यां तौ ज्ञानहीनावपीयतुः । **यात्यन्धोऽपीहितं स्थानं लगितः सरले पथि** ॥७॥
तौ तच्च्युतौ सुतौ युग्मरूपौ **साण्डिल्य**विप्रतः । दास्यां **जयवती**नाम्नि जातौ **दशपुरे** पुरे ॥८॥
क्षेत्ररक्षाकृते पित्रा नियुक्तौ शयितौ निशि । तौ दष्टौ दुष्टसर्पेण दर्पेणेव मृतेर्मृतौ ॥९॥
[२]कालिञ्जरेऽचले जातौ तौ मृगौ युगरूपिणौ । मृतौ च तुल्यमेकेन विद्धौ व्याधेन पत्रिणा ॥१०॥
तज्जातौ **मृतगङ्गायां** [2]चक्राङ्गौ युग्मरूपिणौ । जालेन जालिकः कृष्ट्वा ग्रीवां पिष्ट्वा जघान तौ ॥११॥
अभूतां **भूतदत्तस्य चित्रसम्भूत**संज्ञकौ । **वाराणस्यां** वराकारौ तौ मातङ्गेशितुः सुतौ ॥१२॥
सचिवं **नमुचिं** नाम्ना **शङ्खो वाराणसी**पतिः । प्रच्छन्नं **भूतदत्त**स्य हन्तु[3]मुन्मन्तुमार्प्पयत् ॥१३॥
अमायी भूगृहस्थायी मत्पुत्रौ सकलाः कलाः । अध्यापयसि चेद् वध्यावनिं न त्वां नयामि तत् ॥१४॥
इति मातङ्गराजस्य वचनं सचिवो शुचिः । जीवन्नरो भद्रशतं पश्यतीत्यन्वमंस्त सः ॥१५॥
प्रभूता**श्चित्रसम्भूतौ** विचित्राः पुत्रवत्कलाः । अध्यापयन्नयं रेमेऽनुरक्तां मातरं तयोः ॥१६॥
अय[4]मालब्धुमारब्धो **भूतदत्ते**न तद्विदा । आकृष्याऽमोचि शिष्याभ्यां प्राणदाभ्यां कलागुरुः ॥१७॥
प्राप्तः **सनत्कुमारेण** चक्रिणा **हस्तिनापुरे** । **नमुचिः** सचिवीचक्रे क्वचित्काचोऽपि रत्नति ॥१८॥
कलाः [5]सुपर्वगन्धर्वगर्वसर्वस्वखर्विणीः । [३]चुम्बन्तौ **चित्रसम्भूतौ** [6]निध्यायाऽध्यायि नागरैः ॥१९॥
प्राप्ते प्रकर्षं पुंस्त्वं च [7]वाणीनारदसेवया । वीणे अभूतां गीतेषु प्रवीणौ तदिमावुभौ ॥२०॥
येषामेवोपमानेन संसारो भात्यसारवत् । तैरेवैतत्कृतैर्नाट्यैः सार एवैष वीक्ष्यते ॥२१॥
धन्याः **काशिपुरी**लोकश्रुतयो रसयन्ति याः । [४]सुधां सशुषिरैर्वंशैरनयोरास्यकुण्डतः ॥२२॥
स्तूयमानौ जनैरेवं तौ मातङ्गपतेः सुतौ । [५]कलाश्रमोदयान्नित्यं मोदयामासतुः पुरम् ॥२३॥
चच्चरीपर्वणि जनास्त्यक्त्वा नागर[६]चच्चरीः । मातङ्गचच्चरीमीयुस्तयोर्गीतादिकौतुकात् ॥२४॥
तच्च राज्ञा चराद् ज्ञात्वा पुरारक्षो रुषाऽऽज्ञपि । दूरे स्थाप्यं पुरस्यास्य तन्म्लेच्छतनयद्वयम् ॥२५॥

---

१. सर्वदृग्...KH । २. कालिजराचले- C, L, A । ३. चुम्बितौ- B, A, C, । ४. सुधांशु-A, K । ५. कलाक्रम...B, KH, D, A, L । ६. चच्चरीं- KH, C ।

टि. 1. सर्वदिग्जेता-चक्रवर्त्ती, तस्य । 2. चक्राङ्गः-हंसः । 3. उन्मन्तुः- अपराधस्य उन्मुखः उन्मन्तुः तम् । सचिवस्यविशेषणम् । 4. आ + लभ धातुः हिंसायाम् । 5. सुपर्वन् (पुं) देवः । 6. नि+ध्यैधातुः दर्शने-दृष्ट्वा इत्यर्थः । 7. वाणी सरस्वती च नारदश्च वाणीनारदौ तौ करे वीणां दधतः इत्यपेक्षया तयोः सेवया यथाक्रमं प्रकर्षं पुंस्त्वं च प्राप्ते वीणे अभूतां, तस्माद् इमौ उभौ प्रकर्षं पुंस्त्वं च प्राप्तौ गीतेषु प्रवीणौ इति श्लेषः ।

स्पर्शात्कौतुकिनः पौरान्मलिनीकुरुते ह्रदः । गुणैराकृष्य गीताद्यैः पङ्कः[१] पङ्केरुहैरिव ॥२६॥
वाच्याः पौराश्च ताभ्यां यः सङ्घट्टं घटयिष्यति[२] । स तद्वन्मलिनः पूर्या वासान्निर्वासयिष्यते ॥२७॥
राज्ञ इत्याज्ञया कोऽपि तयोर्लोकम्पृणो गुणः । प्रावृट्मेघावृतव्योमसोमवद्विफलोऽभवत् ॥२८॥
अन्येद्युः कौमुदीपर्वोत्सवश्रीभासुरे पुरे । गुप्तं निशि प्रविष्टौ तौ गामिगेहे[1] बिडालवत् ॥२९॥
कृतावगुण्ठनौ गुप्तं गीतं वक्रितवक्त्रगम् । जगतुर्जगती[2]प्रीतिकरं मन्द्रस्वरेण[3] तौ ॥३०॥
मृदुगीतरसास्वादादासन्नासन्नगैर्नरैः । उपलक्ष्योपलकशायष्ट्याद्यैरभिताड्य तौ ॥३१॥
स्वमालिन्यभिया तादृग्गुणावपि बहिष्कृतौ । **न मद्यभाण्डविन्यस्तं गङ्गाम्भोऽपि प्रियं सताम्** ॥३२॥ युग्मम् ॥
पौरैः प्रताड्यमानौ तौ विमानौ गहनं वनम् । कथञ्चिदापतुर्व्याधैरुद्धौ शूकराविव ॥३३॥
तावचिन्तयतां जातिमालिन्यादावयोः कला । नोज्ज्वलाऽपीड्यते[4]ऽमेध्यशूकर्या दुग्धवज्जनैः ॥३४॥
नव्यं कलाढ्यमपि तज्जातिमालिन्यदूषितम् । त्यजावः प्रियमप्यङ्गं लीनव्यालमिवालयम् ॥३५॥
इति प्रध्याय तीर्थाय कस्मैचित् प्रस्थितौ पथि । तावम्बरतरुस्तम्बमिवाचलमपश्यताम् ॥३६॥
अङ्गभङ्ग इहोत्तुङ्गशृङ्गपाताद्भवत्विति । तौ हस्तिनं हस्तिपकाविवारुरुहतुर्गिरिम् ॥३७॥
ताभ्यां कश्चिन्मुनिस्तत्रादर्शि चावन्दि चादरात् । निर्मलं मलिनेऽप्यङ्गे मत्वा ताभ्यां स्वदृक्शिरः ॥३८॥
ध्यानं मुक्त्वाऽथ पृष्टाभ्यां ताभ्यां दिष्टे स्वचेष्टिते । स मुनिर्वक्तुमारब्धः सुधासंरब्धया गिरा ॥३९॥
य[5] आत्मा मलिनः सोऽङ्गं मलिनं मलिनं भजेत् । मक्षिका पूयमुन्मुच्य पूयमेति न चन्दनम् ॥४०॥
भग्नेऽङ्गे मलिने मोहान्नायमात्मा विशुद्ध्यति । सुरया दूषिते पात्रे ध्वस्ते किं सैति पूतताम् ॥४१॥
विशुद्धप्रकृतेः कर्ममलिनस्यास्य शोधनम् । पावकेनेव तपसा कार्यं हेम्न इवात्मनः ॥४२॥
आत्मशोधनमूषे[6]यं मानुषी दुर्लभा तनुः । रक्ष्यस्तदस्याः शृङ्गादिपाताद् भङ्गोऽतियत्नतः ॥४३॥
अथाप्तशुद्धबोधौ तौ धौतौ तद्वचनामृतैः । व्रतं जगृहतुश्चित्रसम्भूतौ तत्पदान्तिके ॥४४॥
हरन्तौ देहिनां पापं विहरन्तौ महीतले । तपः[7]सिद्धमहासिद्धी तौ गतौ हस्तिनापुरम् ॥४५॥
भोगयोग्ये तदुद्याने तौ तेपाते तपोऽद्भुतम् । तपः[8]श्रीविस्मयेनेव लयेऽलीयत तन्मनः ॥४६॥
मासान्ते पारणे शान्तमनाश्चित्रानुजो मुनिः । पुरं प्रविष्टो दृष्टोऽथ चरन्नमुचिमन्त्रिणा ॥४७॥
अत्र मातङ्गपुत्रोऽयं मत्कथां कथयिष्यति । तद् द्राग् निर्वासयाम्येनमित्यस्मिन् सोऽदिशद् भटान् ॥४८॥

---

१. पङ्कं-C । २. घट्टयि...P, L ।

टि. 1. गामिनः गेहं=गामिगेहम्, तस्मिन्-शून्यगृहे इत्यर्थः । 2. जगती(स्त्री) भुवनम् । 3. मन्द्रस्वरेण-गम्भीरस्वरेण । 4. उज्ज्वला अपि कला न ईड्यते श्लाघ्यते इति वाच्यम् । 5. य आत्मा मलिनः स मलिनं अङ्गं उन्मुच्य मलिनं भजेत् (यथा) मक्षिका पूयं (उन्मुच्य) पूयं (भजेत्) न चन्दनं एति । 6. मूषा-धातुगालनाय साधनविशेषः । 7. तपसा सिद्धाः महासिद्धयः ययोः तौ इत्यर्थः । 8. तपः एव श्रीः, तत्प्राप्तये विस्मयः उत्कण्ठा तेन इव तयोः मनः लये-समाधौ अलीयत ।

तैर्भटैः कुट्यमानोऽथ मुनिस्तूर्णमपासरत् । मैषामनन्तसंसारहेतुतां गममित्ययम् ॥४९॥
सन्तापितोऽनुगच्छद्भिर्निर्गच्छन्नपि तैर्दृढम् । मुनिश्चुकोप शान्तोऽपि सूर्योपल इवातपैः ॥५०॥
तदा तदतिघातार्त्तं तपस्तेज इवान्तरम् । तेजोलेश्यामिषादस्य मुखात्तान् दग्धुमुद्गतम् ॥५१॥
क्षयाग्निदेश्यया तेजोलेश्यया तस्य खं ज्वलत् । वीक्ष्य चक्री च पौराश्च तत्प्रसादार्थमागमन् ॥५२॥
**चित्रो**ऽप्यत्रााययौ तस्य वचनैरथ रोचनैः । पौराणां करुणारावैश्चटुभिश्चक्रवर्त्तिनः ॥५३॥
स शान्तः कान्तदेहोऽभूत्पुनर्मुनिशिरोमणिः । दावानलाकुलः शैलो वारिभृद्वारिभिर्यथा ॥५४॥ युग्मम् ॥
नत्वा च क्षमयित्वा च क्षमाभुजि गते ततः । तावीयतुस्तदुद्यानं निदानं तपसां मुनी ॥५५॥
कदर्थनं यदर्थं स्यात्तेनाऽङ्गेनाऽशनेन च । अलमित्याददे ताभ्यां विधिनानशनव्रतम् ॥५६॥
मयि नीत्या महीं पाति केनाघाति महामुनिः । इत्यालपन्नृपोऽज्ञापि केनचित्कर्म मन्त्रिणः ॥५७॥
चौरवत् [1]पौरचक्राग्रे बद्धः सञ्चार्य भूभुजा । निन्येऽथ **नमुचि**स्तत्र पवित्रौ यत्र तौ मुनी ॥५८॥
नत्वा मुनी सुनीतिज्ञो जगाद जगतीपतिः । अयमद्य फलं भुङ्क्तां भवत्परिभवोचितम् ॥५९॥
इत्युक्त्वा दर्शितः पापगन्त्री मन्त्री नियन्त्रितः । ताभ्यां च मोचितः कुत्रोचितस्तद्दर्शने वधः ॥६०॥
स्त्रीरत्नं चक्रिणः पत्नी सपत्नीचक्रमध्यगा । तौ **सुनन्दा** ववन्देऽथ [2]नमन्मौलिचलालका ॥६१॥
तदा तदलकस्पर्शं **सम्भूत**स्त्वनुभूतवान् । उद्भूतपुलकश्चाभू[3]न्मनोभूश्छलदृग् यतः ॥६२॥
सान्तःपुरे पुरस्यान्तर्गते नत्वाऽथ पार्थिवे । सम्भूतरागः **सम्भूतो** निदानं व्यदधादिति ॥६३॥
तपसो दुस्तपस्याऽस्य तप्तस्यास्ति फलं यदि । स्त्रीरत्नभोगभोक्ताऽहं तद्भूयासं भवान्तरे ॥६४॥
स्थिराऽनन्यमनोज्ञश्रीमुक्तिसङ्केतहेतुना । अस्थिरामस्थिराश्यङ्गीं तपसेच्छसि हा स्त्रियम् ॥६५॥
मुञ्च मोहमिदानीमप्यनिदानीकुरु व्रतम् । इदमालोच्यतां मिथ्यादुष्कृतं च त्वयोच्यताम् ॥६६॥
दिशद्भिः शिवसाम्राज्यमप्येभिश्चित्रभाषितैः । न निदानं मुमोचाऽयं [4]मोचाफलमिवार्भकः ॥६७॥ विशेषकम् ॥
कृतायुःकर्मनिर्वाहौ निर्व्यूढानशनौ च तौ । जातौ विमाने **सौधर्म**त्रिदिवे त्रिदशावुभौ ॥६८॥
च्युत्वा **चित्रस्य** जीवोऽथ महेभ्यस्याऽङ्गभूरभूत् । माद्यत्**पुरिमताला**ख्यपुरबालाक्षिचन्द्रमाः ॥६९॥
च्युतः **सम्भूत**जीवस्तु **काम्पील्यपुर**भूपतेः । **ब्रह्मा**भिधस्य भार्याया[१]**श्चुलन्या** गर्भमभ्यगात् ॥७०॥
सुतश्चतुर्दशस्वप्नसूचितोऽस्यास्ततोऽभवत् । तस्य च **ब्रह्मणा** नाम **ब्रह्मदत्त** इतीरितम् ॥७१॥
स भाग्यमिव बन्धूनामभाग्यमिव विद्विषाम् । आश्चर्यमिव मध्यानामवर्द्धत सुतः क्रमात् ॥७२॥

---

१. चुलिन्या० L, B, K ।

टि. 1. पौराणां चक्रं-समूहः पौरचक्रम् तस्याग्रे इत्यर्थः । 2. नमतः मौलेः चलाः अलकाः केशाः यस्याः सा इत्यर्थः । 3. मनोभूः कामदेवः, छलं पश्यति इति छलदृग् इत्यर्थः । 4. मोचाफलं-कदलीफलम् ।

दन्ता ऐरावणस्येव **ब्रह्मणः** सुहृदोऽभवन् । **कणेरुदत्तः**[१] **कुर्वीशः कटकः काशि**भूपतिः ॥७३॥
**कोशलाधिपतिर्दीर्घः पुष्पचूलोऽङ्ग**देशराट् । पञ्चापि वर्षवारेणाऽवसन्नेकस्य पत्तने ॥७४॥
कदाप्येते जगज्जैत्राः सुकुमाराः सुगन्धयः । तस्थुः पञ्चापि काम्पील्ये कामहस्ते शरा इव ॥७५॥
वर्षद्वादशदेशीये **ब्रह्मदत्ते** शिरोरुजा । पश्चान्मुक्तचतुर्मित्रोऽप्यथ ब्रह्माऽऽप पञ्चताम् ॥७६॥
कृतायामौद्ध्र्वदेहिक्यां क्रियायामवनीशितुः । न्यधायि **ब्रह्मदत्तोऽङ्के** तत्सुहृद्भिः सदश्रुभिः ॥७७॥
वर्षक्रमागतैरीदृग् बालः पाल्यः सुहृत्सुतः । अस्माभिरिति चक्रेऽथ निश्चयः कटकादिभिः ॥७८॥
इति संयुज्य संयोज्य ते **दीर्घं** बालपालने । यथास्थानं ययुर्दुःखघटकाः कटकादयः ॥७९॥
**दीर्घ**स्त्वदीर्घदृग् ब्रह्मराज्यद्रव्याणि विद्रवन् । रेमे स्वरामामिव हा ! मलिनश्चुल[२]नी[३]मपि ॥८०॥
प्रथमोऽथ कृतज्ञानां द्वितीयं ब्रह्मणो मनः । राज्यश्रियस्तृतीया दृग् दध्यौ मन्त्री **धनु**स्ततः ॥८१॥
तैर्मित्रैर्दुर्विचारस्य मार्जारस्येव धिक् पयः । चण्डालस्येव गौस्त्रातुमस्य सर्वस्वमर्पितम् ॥८२॥
हा हारितसुहृत्प्रेमा विलङ्घितकुलक्रमः । उपेक्षितयशोधर्मः कथमेष विजृम्भते ॥८३॥
सकोशान्तःपुरे राज्ये लुब्धोऽयमधमो यदि । यौवनाभिमुखं देवं हन्ति हन्त ! हतास्ततः ॥८४॥
ध्यात्वेति **ब्रह्मदत्त**स्य यत्नार्थं सेवनाच्छलात् । धनु**र्वरधनु**संज्ञं मन्त्री पुत्रं नियुक्तवान् ॥८५॥
तेन तज्ज्ञापितः सर्वं ब्रह्मभूः सन्तम[1]न्तरा । शनैः प्राकाशयत्कोपं बालो रविरिवातपम् ॥८६॥
पिक्या साकमसौ काकमायोज्यान्तःपुरेऽवदत् । एताविव मया वध्यौ वर्णसङ्करकारिणौ ॥८७॥
अयं काकपिकीव्याजात् वधं नौ ख्यातवानिति । दीर्घेणोक्ते जगौ राज्ञी बालवाक्याद्बिभेषि किम् ? ॥८८॥
सङ्गमय्यैकदा भद्रहस्तिन्या मृगहस्तिनम् । ऊचे पूर्ववदेवोच्चैर्बालः कालोचितं वचः ॥८९॥
अब्रूत दीर्घः साकूतमस्य संश्रूयतां वचः । आचष्ट **चुलनी** किं स्यादस्य वाग्भिर्बिभेषि किम् ॥९०॥
हंस्या सह बकं बद्ध्वा कदाचिदयमूचिवान् । रमते सोऽयमनया नयाम्येतौ यमाऽऽ[४]श्रयम् ॥९१॥
**दीर्घो**ऽवददये ! दीर्घमालोचय सुलोचने ! । वाणीं शृणु शिशोरस्य वैरस्यरसगर्भिताम् ॥९२॥
मृत्युदोऽसावुपचयैर्न यावद् यात्यसाध्यताम् । प्रकुप्यन् वर्द्धमानः स्राक् तावत्साध्येत रोगवत् ॥९३॥
अयं यमातिथिः कार्योऽहं वा निजपुरातिथिः । **भुजङ्गिनि गृहे वस्तुमस्ति कोऽपि किमु क्षमः ?** ॥९४॥
तयोचे प्राणवत्पुत्रं कथं कुर्वे यमातिथिम् । प्राणेभ्योप्यधिकं नाथ ! त्वां वा निजपुरातिथिम् ॥९५॥
सोऽभ्यधात् कति पुत्रास्ते नोत्पत्स्यन्ते मयि स्थिते । जीवत्यस्मिन्पुनर्मुग्धे ! न त्वं नाहं न नौ रतिः ॥९६॥

---

१. कणेरूदत्तः L. । २. चुलिनी० B. । ३. ०नीपतिः KH । ४. यमालयं-C

टि. 1. सन्तम् - नित्यम् ।

तथेति प्रतिपद्येयमलपच्चुलनी ततः । वध्योऽवध्योऽसकौ बालोऽरक्ष्यं रक्ष्यं[१] निजं यशः ॥९७॥
हृद्वाह्योऽपि विवाह्योऽथ वासागारोक्तिभिः[२] कृते । नवे जतुगृहे न्यस्य ज्वाल्योऽयं शयितो निशि ॥९८॥
इत्यालोच्य वृता ताभ्यां **पुष्पचूलस्य** कन्यका । जज्ञे तु तदभिप्रायं वासागारगुणैर्धनुः ॥९९॥
त्वामयं सेविता राजन् ! पुत्रो **वरधनुर्मम** । तीर्थेषु जीर्णो यामीति दीर्घं पप्रच्छ मन्त्रिराट् ॥१००॥
धीमान् बहिर्गतोऽनर्थमयं कर्तेति चिन्तयन् । जगाद सादरं वाचा सचिवं स नृपोऽशुचिः ॥१०१॥
शस्त्रैरिव महाधीरः शास्त्रैरिव महाकविः । राज्यं भवादृशैरिव विभ्राजते तव प्रभोः ॥१०२॥
स्यात् सर्वत्र कृतो धर्मः सिद्धसिन्धु[1]रिहास्ति च । इहस्थैरेव युष्माभिः साध्यं वृद्धोचितं हितम् ॥१०३॥
ततः सुरसरित्तीरे सत्रागारमकारयत् । नित्यः तत्र स्थितो मन्त्री स्वयं पूज्यानपूजयत् ॥१०४॥
ततोऽसौ पुम्भिरिच्छद्भिर्भव्यमव्यभिचारिभिः । द्विक्रोशां कारयामास सुरङ्गां जतुसद्मगाम् ॥१०५॥
प्रच्छन्नं **पुष्पचूलो**ऽपि ज्ञापितः सचिवेन तत् । दासेरीं दुहितुः स्थाने प्रैषीद्धूरिपरिच्छदाम् ॥१०६॥
महोत्सवेन वीवाहं निर्वाह्य चुलनी ततः । स्नुषायुतमपि प्रैषीन्निशि वासौकसे सुतम् ॥१०७॥
अमुक्तो मन्त्रिपुत्रेण पुण्येनेव[३] विपच्छिदा । कृतान्तस्येव वदने स वाससदनेऽविशत् ॥१०८॥
जाग्रत्येव कुमारेऽत्र मन्त्रिपुत्रकथारसैः । सर्वतः शर्वरीमध्ये तद्धाम्नि ज्वलनोऽज्वलत् ॥१०९॥
किमेतदिति पृष्टोऽथ **ब्रह्मदत्तेन** मन्त्रिभूः । दुर्वृत्त**चुलनी**वृत्तमाख्यायेत्युत्सुकोऽवदत् ॥११०॥
इह प्रहर पादेन धरित्रीमत्र सत्रगा । तातदत्ता सुरङ्गाऽस्ति तुरगावग्रतोऽद्भुतौ ॥१११॥
लूतातन्तुपुटीभेदं भित्त्वोर्वीमंह्रिणा ततः । सुरङ्गां द्राग् विवेशाऽयं त्रस्तो बिलमिवोरगः ॥११२॥
नररत्नद्वयं तच्च सुरङ्गातो विनिर्गतम् । युग्मरूपं तदा जातं स्वं मेने रत्नगर्भया ॥११३॥
साक्षाद्भूतेऽधिकगुणे तयोरेवाथ चेतसी । **धनुना** धारितौ वाहौ[४] रयादारोहतां च तौ ॥११४॥
पञ्चाशद्योजनीं गत्वा रयात्पञ्चमधारया । पञ्चत्वमापतुः खिन्नौ तौ हयौ पञ्चहायनौ ॥११५॥
आसन्ने **क्रोष्ठक**ग्रामे कृच्छ्रात्पद्भ्यां ततो गतौ । तौ जानन्तौ बहुं मार्गं तं मार्गादश्वलङ्घितात् ॥११६॥
तत्र धात्रीश-मन्त्रीशपुत्रौ मन्त्रितपूर्वकम् । कारयामासतुश्चूलाशेषं शीर्षस्य मुण्डनम् ॥११७॥
अधत्तां ब्रह्मसूत्रं च कषायवरचीवरौ । **ब्रह्मपुत्र-ब्रह्मदास**नामकल्पनशिल्पिनौ ॥११८॥
**ब्रह्मदत्तस्य** वक्षस्थः श्रीवत्सः पट्टकेन तत् । पिदधे मन्त्रिपुत्रेण कर्मणेवात्मनो महः ॥११९॥
ततः प्रविष्टौ ग्रामं तौ जीवचित्ते[2] इवाङ्गकम् । द्विजेनाऽऽमन्त्र्य केनाऽपि भक्त्या सद्मनि भोजितौ ॥१२०॥
क्षिप्त्वाऽक्षतानथो मूर्ध्नि कुमारस्य द्विजन्मना । सिते दत्त्वांऽशुके कन्योपानिन्येऽनन्यतुल्यरुक्[५] ॥१२१॥

---

१. रक्षं रक्षं - K. । २. वासावासो० P, C, KH, L । ३. ०नेवाऽपरिच्छदः B. । ४. बाहू-C । ५. ०धन्य० L, B, P, KH, K ।

टि. 1. सिद्धसिन्धुः-गङ्गानदी । 2. जीवश्च चित्तं च-जीवचित्ते इति द्वन्द्वसमासः, अयुतौ इत्यर्थः ।

तमूचे मन्त्रिभूर्भिक्षोरस्य स्वामद्भुतां सुताम् । चिन्तामणिमिवोष्ट्रस्य कण्ठे कुण्ठ ! बधान मा ॥१२२॥
अथ प्रोवाच विप्रोऽमुं दिष्टं नैमित्तिकेन मे । ग्रामेऽस्मिन् पट्टकच्छन्नश्रीवत्सो भिक्षुरेति यः ॥१२३॥
देया **बन्धुमती** तस्मै कन्येयं चक्रवर्त्तिने । तदस्मै वितराम्येनां रवेरेवाब्जिनी भवेत् ॥१२४॥
तां व्युवाह कुमारोऽथ **भोगाः कुत्र न भोगिनाम्** । तत्रोषित्वा निशां चाऽगात् सरागाः कुत्र सा[1]ऽरयः ? ॥१२५॥
प्रान्तग्रामं गतो मत्वा रुद्धान् दीर्घभटैः पथः । उत्पथेनाटवीमाप **सापदां कुत्र निर्वृतिः** ॥१२६॥
कुमारोऽस्थात्तृषा व्यग्रो न्यग्रोधे मन्त्रिभूः पुनः । तदर्थं वारिणेऽचालीद् विश्वार्थमिव वारिदः ॥१२७॥
दध्रे दीर्घभटैर्ग्रामतटीं यानुपलक्ष्य सः । तत्संज्ञया पलायिष्ट कुमारो विस्मृतश्रमः ॥१२८॥
स व्याधत्रस्तमृगवल्लङ्घमानोऽटवीर्बहूः । तृतीयेऽह्नि ददर्शैकमब्दं केकीव तापसम् ॥१२९॥
नीतस्तेनाऽऽश्रमे हृष्टो दृष्ट्वा कुलपतिं तदा । ननाम च पितृप्रीत्या **हृद्वेत्ति [१]सुजनं जनम्** ॥१३०॥
जाने मधुरया मूर्त्या स्फूर्त्या च त्वां महाकुलम् । अत्राऽऽगमे तु को हेतुरित्यपृच्छदमुं मुनिः ॥१३१॥
स्वं ततस्तस्य विश्वस्य निःश्वस्य च स राजसूः । विश्वं विश्वसनीयस्य पुरश्चरितमूचिवान् ॥१३२॥
ततः कुलपतिः प्रीतः प्रोचे पुत्र ! निजालयात् । त्वं निजालयमेवाप्तस्त्वत्पिता हि ममाऽग्रजः ॥१३३॥
तदत्र पुत्र ! दृक्सत्र ! तिष्ठाऽस्मन्मनसो मुदे । राज्योचितकरीं विद्धि वृद्धिं भोगैर्वनोचितैः ॥१३४॥
अथैनमिह तिष्ठन्तं ब्रह्मेव ब्रह्मणोऽनुजः । शास्त्र[२]शस्त्राऽर्थकुशलं चक्रे कुलपतिः स्वयम् ॥१३५॥
कदाऽपि तापसैः सार्द्धं मधुमासि जगाम सः । पुष्पोत्सुको वनोत्सङ्गमनङ्ग इव जङ्गमः ॥१३६॥
वनद्विपस्य स पश्यन् [2]सद्यस्कां पदपद्धतिम् । अगादनुपदी युद्धमदी द्राक् पञ्चयोजनीम् ॥१३७॥
स प्रेक्ष्य हस्तिनं हस्ती तं च प्रेक्ष्य मदोक्षितौ । क्रुद्धावधावतां योद्धुं हक्का-बृंहितसंहितौ ॥१३८॥
जेतुमेकेन शेकेऽन्यो न यावत्तावदम्बुदः । खे चकार कुमारस्योत्कर्षिवर्षैः सहायताम् ॥१३९॥
जलाकुलः पलायिष्ट स करी विरसं रसन् । वीरोऽपि सर्वतस्तोयधवले ववलेऽध्वनि ॥१४०॥
दिङ्मोहेन स भीमापत्सीमारेखामिवापगाम् । उत्ततार च तत्तीरेऽपश्यच्च पुरमुद्वसम् ॥१४१॥
प्रविष्टोऽस्मिन् पुरे वंशजालिकामयमैक्षत । [3]स्फराखड्गौ च शून्यात्तविलासेन्दुनिशोपमौ ॥१४२॥
वंशजालीं स चिच्छेद खड्गमाकृष्य कौतुकात् । सहच्छिन्नं शिरोऽपश्यत् तदन्तःस्थस्य कस्यचित् ॥१४३॥
स दध्यौ धूमपः कोऽपि वल्गुलीकरणो मुनिः । मया वंशच्छिदाऽच्छेदि **धिगचिन्तितकारिताम्** ॥१४४॥
मन्दं नन्दनमुद्यानमथैक्षि भ्रमताऽमुना । वेश्म सप्तक्षणं तत्र सप्तलोकसमासवत् ॥१४५॥
स्त्रीमपश्यदिहारूढः प्ररूढनवयौवनाम् । हस्तन्यस्तमुखामेष सचिन्तां स्वामिव श्रियम् ॥१४६॥

---

१. स्वजनं-KH । २. शास्त्रास्त्र-P, L, C ।

टि. 1. रागवतां कुत्रापि अरिशङ्का नास्ति इति ते न साऽरयः, इति काक्वा लभ्यते, अत एव विश्वस्तः स तत्रोषितवान् इति तात्पर्यः । 2. तात्कालिकीम् । 3. स्फरा-'ढाल' इति भाषायाम् ।

काऽसीति तेन पृष्टेयमाचष्टेदं ससाध्वसा । मत्कथाऽस्ति पृथुर्ब्रूहि त्वं कः पङ्कजलोचन ! ॥१४७॥
तेन **पञ्चाल**भूपालब्रह्मजोऽहमितीरिते । दृगञ्जलिभ्यां हर्षाश्रैर्दत्त्वेवार्घं जगाद सा ॥१४८॥
प्रियं प्रियं ममैवाद्य दृष्टः प्रियतमोऽसि यत् । विप्रियप्रसरोऽप्यद्य जानामि प्रलयं गतः ॥१४९॥
अहं सा हंससञ्चार ! कन्या **पुष्पवती**ति सा । या पित्रा **पुष्पचूलेन** दत्ता त्वन्मातुलेन ते ॥१५०॥
हर्षोन्मुखी मृगीवाऽहं विवाहदिवसोन्मुखी । व्याधेनेव हृता विद्याधरेणोद्यानखेलिनी ॥१५१॥
**नाट्योन्मत्ता**भिधोऽयं मां नयहीन इहाऽऽनयत् । दृशं त्वसहमानो मे विद्यां साधयितुं गतः ॥१५२॥
वंशालिमध्य ऊर्ध्वाङ्घ्रिर्धूमपस्य च सेत्स्यति । विद्याऽद्य तस्य तच्छक्त्या किल मां परिणेष्यति ॥१५३॥
कुमारायाऽथ तन्माथकथां दिष्टवते मुदा । स्वं गान्धर्वविवाहेन सा ददौ पारितोषिकम् ॥१५४॥
त्रियामां यामवन्निन्ये रममाणस्तयाऽथ सः । शुश्राव च वचः किञ्चित् स्त्रीणामिव दिवि प्रगे ॥१५५॥
**प्रियखण्डा विशाखा** च प्राप्ते तस्य द्विषोऽनुजे । इहाऽद्य तद्विवाहार्थमात्तोपकरणे मुधा ॥१५६॥
तिष्ठ क्षणमितो गत्वा स्तुत्वा यावद् भवद् गुणान् । निश्चिनोम्येतयोश्चेतस्त्वयि रागि विरागि वा ॥१५७॥
पताकां प्रेरयिष्यामि रागे रक्तां त्वमापतेः । विरागे विशदां क्वाऽपि तदा त्वं सत्वरं व्रजेः ॥१५८॥
भवन्तमभयं वेद्मि किन्तु तद्बन्धुकोटिभिः । सहाऽयमसहायस्य न युक्तस्तव विग्रहः ॥१५९॥
एवं तदनुरोधेन स तत्रैवैकतः स्थितः । सिताभमसिताक्षी तु ध्वजाञ्चलमचीचलत् ॥१६०॥
स प्रास्थित ततो दीर्घां ललङ्घे च महाटवीम् । ददर्श च सरः सायं निधिप्रायं सुधारुचेः ॥१६१॥
स सस्नौ तत्र गजवद्विललास मरालवत् । महोक्षवत् पपौ वारि वारिदैवतवद्बभौ ॥१६२॥
तन्नीरान्निःसृतस्तीरवन उत्तरपश्चिमे । कामिनीमिव पुष्पेषोः काञ्चित् पुष्पाणि चिन्वतीम् ॥१६३॥
मञ्जरीं रूपवृक्षस्य लक्ष्मीं लावण्यवारिधेः । भासं सौभाग्यरत्नस्य पश्यति स्म स कन्यकाम् ॥१६४॥ युग्मम् ॥
वदन्ती दासिकां साऽपि सलीलं ददती पदम् । कटाक्षैस्तन्मनः श्यन्ती पश्यन्ती चान्यतो ययौ ॥१६५॥
तया गृहीतचित्तोऽपि वलमानदृगप्यथ । शून्यशून्यैः पदैः सोऽपि धैर्येणैवान्यतोऽचलत् ॥१६६॥
मालादुकूलताम्बूलैस्तमेत्यानर्च दासिका । देव्या हृदासिकासत्यंकारोऽयमिति चाऽवदत् ॥१६७॥
आदिष्टा चास्मि यदयं सुन्दरो मन्त्रिमन्दिरे । नीत्वाऽऽतिथ्येन तथ्येन [1]श्रमापथ्येन पूज्यताम् ॥१६८॥
नीतः सोऽथ तयाऽगारं **नागदत्तस्य** मन्त्रिणः । अभ्युत्तस्थौ च तं मन्त्री **नृणां वक्त्याकृतिर्गुणान्** ॥१६९॥
[2]श्रीकान्तश्रीर्भवद्धाम्नि धन्योऽयं राजकन्यया । वासाय प्रहितोऽस्तीति द्रुतं सन्दिश्य दास्यगात् ॥१७०॥
प्रवीणः प्रीणयामास तमुपासनया निशि । प्रातर्मन्त्री धरित्रीशभवनाय निनाय च ॥१७१॥
अनर्घ्यमपि तं क्षोणिपतिरर्घादिनार्चयत् । पर्यणाययत प्रीतो गुणक्रीतोऽमुनैव ताम् ॥१७२॥

---

टि. 1. श्रमापथ्यः-श्रमस्याऽहितकारी, प्रस्तावात् उपायः, तेन । 2. श्रीकान्तः विष्णुः तस्य इव श्रीः शोभा यस्य ।

अनया रममाणोऽयमप्रमाणोल्लसन्मदः । विपत्पातैरपि स्वस्मिन्नमन्यत स धन्यताम् ॥१७३॥

अज्ञातकुलशीलाय त्वं लीलायतनं श्रियः । किं मे राज्ञा नियुक्तेति तदुक्तेयमु[1][१]दैरयत् ॥१७४॥

अदातुकामः क्ष्मापेषु [2]वैरवैरस्यतः पिता । मामेकदाऽवदद्वत्से ! स्वेच्छया वीक्ष्यतां वरः ॥१७५॥

तदाद्यहमिहोद्याने पान्थलोकमलोकयम् । दृग् न क्वाऽपि विशश्राम चित्राराम इवाऽलिनी ॥१७६॥

तच्चिरात्कैश्चन घनैस्तपोभिः प्राक्तनैर्मया । दुष्प्रापस्त्वमिह प्राप्तो मर्त्त्यजन्मेव संसृतौ ॥१७७॥

किं ते कुलादिप्रश्नेन वृतोऽतिगुणवानिति । द्रुनाम नाऽलिनी पृच्छेद् गच्छेद् वृक्षं ससौरभम् ॥१७८॥

आटीद्वाटीमनाहूतोऽप्येष राज्ञा सहैकदा । वाजी धावत्यनुन्नोऽपि धावमानेषु वाजिषु ॥१७९॥

लुण्ट्यमानेऽरिकुट्टाकैर्लुण्टाकैः सुभटैः पुरे । सरोऽसौ प्राप पयसे प्रियमेलकतीर्थवत् ॥१८०॥

मराल इव निर्गत्य तत्तडागत आगतः । ततोऽपतत् कुमारस्य धनुसूनुः पदाब्जयोः ॥१८१॥

दवार्त्त इव मेघाम्बु कल्पद्रुमिव दुस्थितः । मृतः सञ्जीवनमिवाप्यैनं स मुमुदेतराम् ॥१८२॥

उत्थापितः सबाष्पेणाऽऽलिङ्गितो रोमहर्षिणा । दृष्टास्यः फुल्लनेत्रेण स्मितेनाऽभाषि तेन सः ॥१८३॥

सखे ! सखेदं [२]मां कुर्वन्नुर्व्यां निपतितस्तदा । पश्चादप[३]श्चिमगुण ! स्थितोऽसि कथमुच्यताम् ॥१८४॥

अथाऽभ्यधात् **वरधनु**र्ननु वारि सरोवरात् । पद्मिनीपत्रपुटके न्यस्य त्वामहमापतन् ॥१८५॥

दृष्टोऽस्मि **दीर्घ**पुरुषैः [3]रुषैभिस्ताडितोऽभितः । ब्रह्मभूः क्वेति पृष्टस्त्वां व्याघ्राऽऽघ्रातं न्यवेदयम् ॥१८६॥ युग्मम् ।

स्थानं तद् दर्शयेत्येभिस्ताड्यमानोऽग्रतः कृतः । त्वद्दृष्टिमार्गमागत्य त्वां संज्ञाप्याऽपतं क्षितौ ॥१८७॥

परिव्राड्दत्तगुलिकामुखक्षेपप्रभावतः । निःसंज्ञोऽहं मृत इति प्रस्मितैरुज्झितोऽस्मि तैः ॥१८८॥

तेषु [४]पापिषु यातेषु करेष्विव विवस्वतः । आकृषं गुलिकां वक्त्राद् भृङ्गं कुमुदवन्मुदा ॥१८९॥

मरुपान्थस्तरुमिव प्रेक्षितुं त्वामथ भ्रमन् । ग्राममेकमयामेकमिह प्रव्राजमानमम् ॥१९०॥

स मामूचे **वरधनो** ! [५]**वसुभागः** सुहृद् **धनोः** । अस्म्यहं वद विश्रब्धः कुमारः कुशली किमु ॥१९१॥

अथो कथितवत्येष कथां मयि यथातथा । जगौ दुःखाग्निधूमैर्मां निश्वासैः श्यामतां नयन् ॥१९२॥

निर्दग्धे दृष्टदग्धैककरङ्के सद्मनि प्रगे । **दीर्घः** सुरङ्गामद्राक्षीत् तदग्रेऽश्वपदानि च ॥१९३॥

मन्त्रिबुद्ध्या गतौ तावित्यक्रुध्यद्धनुमन्वसौ । [६]आदिशच्चादिशं सैन्यान् बद्ध्वा नेतुं युवां जवात् ॥१९४॥

पलायत ततो मन्त्री [4]सवित्री तु तव द्विषा । चण्डालपाटकेऽक्षेपि दुर्गतिद्वारपाटके ॥१९५॥

[७]तां मालपति[८]तस्येवोत्पिट्टनप्रहतिं कथाम् । शृण्वतोऽजनि मे दुःखोपरिदुःखं सुदुस्सहम् ॥१९६॥

---

१. उदीरयत्-C, उदेरयन्-KH । २. मा-C । ३. पश्चिमगुणः C । ४. तापिषु L वादिषु K । ५. महाभाग ! B, C । ६. आदिशत्सादिनां-C । ७. तामाल...-C । ८. ०तस्यैवोत्पिट्टनप्रहतिं० - A, L, B, K, D ।

टि. 1. उद्+ईर् धातुः अवदत् इत्यर्थः । 2. वैरमेव विरसस्यभावः वैरस्यं इति वैस्वैरस्यम्, तस्मात् । 3. रुषा एभिः इति विग्रहः । 4. सवित्री-माता ।

गतः कापालिकीभूय **काम्पील्या**ऽन्त्यजपाटके । इतस्ततो भ्रमन् पृष्टे मातङ्गैरेवमभ्यधाम् ॥१९७॥
मातङ्गीं साधयिष्यामि विद्यामिति [1]मतोऽथ तैः । जनन्यारक्षकं कञ्चिन्मित्रं चकार तत्र च ॥१९८॥
त्वत्पुत्रमित्रं **कौण्डिन्यो** नमतीत्यथ तन्मुखात् । विज्ञाप्याऽम्बां सगुटिकं बीजपूरकमार्प्पयम् ॥१९९॥
अम्बां तद्भुक्तिनिःसंज्ञां मृतेति पुररक्षकः । राज्ञे व्यज्ञपयद्राज्ञा दग्धुं दिष्टाः स्वपूरुषाः ॥२००॥
ते मयोक्ता मुहूर्तेऽस्मिन् दग्धेयं वो नृपस्य च । अनर्थाय भवत्येवं श्रुत्वाऽगुः स्वस्ववेश्मनि ॥२०१॥
[2]अस्याः शबेन साध्यैका विद्येत्याहूय रक्षकम् । दूरं श्मशानमगमं सायमादाय मातरम् ॥२०२॥
मण्डलाद्यथ निर्माय मया मायामयात्मना । प्रेषितः पुरदेवीनां बलिदानाय रक्षकः ॥२०३॥
उत्थाप्याम्बां स्वमावेद्य [3]निर्वाप्य रुदतीं रयात् । कच्छग्रामे पितृसुहृद्**देवशर्म**गृहेऽनयम् ॥२०४॥
चकोरक इव स्वामिंस्त्वामिन्दुमनु च भ्रमन् । **पुण्यै[4]रपश्यं पश्यन्ति तदेकाग्रहृदो न किम्** ॥२०५॥
साधु साध्विवितिगीर्वृत्तं कुमारोऽप्याख्यदात्मनः । यावत्ताविति सन्तोषात् कथां रसयतो मिथः ॥२०६॥
तावत्तौ कश्चिदेत्योचे युष्मच्चित्रपवित्रितम् । पटूकृत्य पटं दीर्घभटा ग्रामे वदन्त्यदः ॥२०७॥
ईदृशी ददृशे क्वाऽपि पुंद्वयीति श्रुतं मया । दृष्टौ चेह युवां कार्यमुचितं रुचितं च यत् ॥२०८॥
[5]यातेऽथ तस्मिन् भीतेन मनसाऽपि पला[6]यिना । [1][7]सुतक्रमाब्जौ **कौशाम्बीं** तौ गतौ गहनाध्वना ॥२०९॥
वने **सागरदत्तस्य बुद्धिलस्य** च तत्र तौ । अपश्यतां लक्षपणं [2]चरणायुधयो रणम् ॥२१०॥
युद्धोत्कटौ कुर्कुटौ तौ पदापदि नखानखि । चञ्चूचञ्चवि [3]चञ्चन्तौ चित्रं कस्य न चक्रतुः ॥२११॥
जात्योऽप्यजातिना जिग्ये तदा शक्तोऽप्यशक्तिना । पक्षी सागरदत्तस्य युद्धे बुद्धिलपक्षिणा ॥२१२॥
त्वत्पक्षी पक्षिणानेन मृगेणेव मृगेश्वरः । जिग्ये सागर ! किं वीक्ष्ये तदिमं यदि मन्यसे ॥२१३॥
इत्युक्तवान् वरधनुः सागरानुमतस्ततः । अयःशूच्यङ्कितपदं तं [4]पदास्त्रमुदैक्षत ॥२१४॥
इदं संलक्ष्य लक्षार्द्धं च्छन्नं मेनेऽस्य **बुद्धिलः** । अमात्यभूः कुमाराय तच्च सर्वं न्यवेदयत् ॥२१५॥
रयादयमयःसूचीर्यमसूक्ष्मरहस्यवत् । कुमारः कौतुकी कृष्ट्वा तौ योद्धुममुचत् पुनः ॥२१६॥
जिगाय लीलयैवाऽयमरिं सागरकुर्कुटः । **मायाघाते जघन्यानां कुतस्त्याः स्युर्जयश्रियः** ॥२१७॥
हर्षादथ रथस्याङ्कमारोप्य नृपमन्त्रिजौ । स्वागारं सागरो निन्ये **जयदः कस्य न प्रियः** ॥२१८॥
इच्छान्नपानभोगादियोगादिह महासुखम् । तौ तस्थतुः स्थिरश्रीके तद्गृहे स्वगृहे यथा ॥२१९॥
बुद्धिलानुचरे किञ्चित् गते ख्यात्वैकदाऽवदत् । कुमारं मन्त्रिभूस्तन्मे लक्षार्द्धं बुद्धिलो ददौ ॥२२०॥

---

१. मयोदिते-C । २. अस्यां-C । ३. निवार्य-C । ४. रवश्यं-C । ५. याति-C । ६. यिनौ तत्क्र...A । ७. स्तुत...A, KH, B, C, L ।

टि. 1. सु धातुः प्रेरणे, भीतेन पलायिनाऽपि मनसा सुतौ प्रेरितौ क्रमाब्जौ ययोः तौ इत्यर्थः । 2. चरणायुधः-कुर्कुटः तयोः । 3. 'चञ्च्' धातुः गत्यर्थः । 4. पदास्त्र-कुर्कुटः तम् ।

पश्येदमित्यसौ हारं तारामयमिवार्प्पयत् । **ब्रह्मदत्ता**भिधालक्ष्मलेखं सौभाग्यभासुरम् ॥२२१॥
अथैत्य तापसी मूर्त्तं[१] काचिल्लेखस्य वाचिकम् । दत्त्वाऽऽशिषं तयोः किञ्चित् ख्यात्वा **वरधनो**र्ययौ ॥२२२॥
तस्याः कथामथाऽऽचख्यौ राजपुत्राय मन्त्रिसूः । इयमेत्यास्य लेखस्य प्रतिलेखमयाचत ॥२२३॥
को **ब्रह्मदत्तो** यन्नामलेखोस्तीति मयोदिते । तयोचेऽस्मिन् पुरे श्रेष्ठी **धनप्रवर** इत्यभूत् ॥२२४॥
अष्टबन्धुकनिष्ठाऽस्ति तस्य **रत्नवती** सुता । विधिर्व्यधित यां खिन्नो रतिरूपनिरूपणे ॥२२५॥
उद्यौवना वनावन्यां यक्षमाराधयच्च सा । अत्युत्तरवरप्राप्त्यै किमन्यत् कामिनीप्रियम् ॥२२६॥
प्रीतो यक्षश्चिरादेष तामभाषत सुभ्रुवम् । षट्खण्डमेदिनीभर्त्ता भर्त्ता तव भविष्यति ॥२२७॥
श्रीवत्सिनं वनोत्सङ्गेऽत्रैव दैववशागतम् । तं स्वसोदरयोस्ताम्रचूडक्रीडासु वेत्स्यसि ॥२२८॥
दृष्ट्वा तदा तदेनं ते **ब्रह्मदत्तं** सुहृत्तमम् । न सा बाला हि बालाहिघ्रातेव लभते रतिम् ॥२२९॥
संलिख्य लेखमेषा मे षाड्गुण्यप्रेरितार्प्पयत् । कृतिन् ! किङ्करहस्तेन रहस्तेन करे तव ॥२३०॥
तया तत्प्रतिलेखार्थं प्रहिताऽस्मि तवान्तिके । इत्युदीर्य स्थिता प्रैषि प्रतिलेखं समर्प्य सा ॥२३१॥
इत्याकर्ण्य कुमारोऽपि प्रज्वलद्विरहज्वरः । शिशिराणि शरीरेणाशिशिराणि चकार सः ॥२३२॥
तदन्वेषिणि **कौशाम्बी**पतौ दीर्घोपरोधतः । सागरो भूगृहे न्यस्य तौ[1] दधार निधानवत् ॥२३३॥
इमौ जिगमिषू नक्तं सागरो दुःखसागरः । रथमारोप्य नीत्वाल्पमध्वानं ववले ततः ॥२३४॥
अस्त्रालिमालितरथारूढावथ च तौ पथि । आरामे कामिनीं धामधौतध्वान्तामलोकताम् ॥२३५॥
लग्ना किमतिवेलेति सादरं तौ जगाद सा । ताभ्यामभाषि [२][2]वामभ्रु ! कौ नौ जानासि कथ्यताम् ॥२३६॥
तयोक्तमद्य यक्षेणाऽऽचचक्षे मम यन्निशि । उद्याने **ब्रह्मदत्ते**न सङ्गस्तव भविष्यति ॥२३७॥
ज्ञातोऽसि त्वं स पुंरत्न ! विद्धि **रत्नवतीं** च माम् । चिरात्त्वद्विरहोत्तप्तामेह्याऽलिङ्ग सुधामय ! ॥२३८॥
तत्तथा प्रतिपद्याऽथ रथमास्थाय भूपभूः । क्व तुरङ्गाः कुरङ्गाक्षि ! प्रेर्याः पप्रच्छ तामिति ॥२३९॥
**धनावहः** पितृव्यो मे पुरेऽस्ति **मगधे**शितुः । तत्र गन्तव्यमव्यग्रां प्रतिपत्तिं स दास्यति ॥२४०॥
एवमुक्ते तया मन्त्रिपुत्रेण त्वरया हयाः । विमुक्ताः सारथीभूय भूयसीमटवीमगुः ॥२४१॥
चौरः **सुकण्टक**स्तत्र **कण्टक**श्च चमूपती । रथं रुरुधतुर्मूर्त्ताविवानय[३]महाध्वजौ ॥२४२॥
तयोर्वीराः शरासारैर्वर्षन्तो वारिदा इव । ययुः क्वचित्कुमारात्तचापज्यामरुतैव ते ॥२४३॥
स्यन्दने सञ्चरत्येव परिश्रान्तो नृपात्मजः । सुष्वापाऽयं प्रियायुक्त आत्मेवाऽऽयुषि धीसखः[3] ॥२४४॥
प्रातः श्रमाऽऽङ्गारेखावन्नद्यां तस्थुः स्वयं हयाः । प्रतिबुद्धः कुमारस्तु न रथे मित्रमैक्षत ॥२४५॥

---

१. मूर्त्तिः - C । २. वामस्तु- P । ३. वामयमहध्वजौ-P, C, K वामयमहाध्वजौ-B ।

टि. 1. ब्रह्मदत्तं तन्मित्रं च । 2. वामभ्रूः-स्त्री, तत्संबोधने वामभ्रु ! । 3. धीः बुद्धिः साङ्ख्याभिमता, सखी यस्य पुरुषस्य स - धीसखः, आत्मनः विशेषणम् ।

गतः स्यात् पयसि क्वाऽपीत्याजुहाव तमुच्चकैः । रथाग्रे वीक्ष्य रक्तं तु स रुरोदोच्चकैस्तराम् ॥२४६॥
भ्रष्टः पितृश्रियो नव्यां नाद्यापि प्रापितः श्रियम् । तदत्र [१][1]प्रान्त रे मित्र ! मां मुक्त्वैकं क्व हा गतः ॥२४७॥
[२]किं द्यां [३]युद्ध्वाऽधुना गच्छन्मां नापृच्छस्तटस्थवत् । यत्त्वाऽस्थापयिष्यं वाऽगमिष्यं वा समं त्वया ॥२४८॥
तमित्यमन्दक्रन्दन्तं वल्लभाऽऽचष्ट वल्लभ ! । नाऽमङ्गलवचो वाच्यमिष्टे नष्टे मतिभ्रमात् ॥२४९॥
त्वत्कार्येण गतोऽयं स्यात्त्वद्भक्तः प्रातरेष्यति । **प्रभोरेव हि धैर्येण जयन्ति प्रभुकार्यिणः** ॥२५०॥
त्वरयाऽश्वान् रयात्स्वामिन् ! भूरियं भूरिविग्रहा । [2]तत्प्रवृत्तिप्रयत्नस्तु [४]स्थानाप्त्या क्रियते चरैः ॥२५१॥
प्रेर्याऽश्वान् **मगध**क्षोणिसीमग्रामं गतोऽथ सः । ग्रामेशेन गृहं निन्ये **पूज्या केन क्व नाकृतिः ?** ॥२५२॥
युध्यमानः समं चौरैः सुहृन्मे क्वाऽप्यगादिति । उक्ते दुःखात् कुमारेण ग्रामेशोऽप्यतिदुःखितः ॥२५३॥
स नभःस्वानिव नभो विगाह्य गहनं जवात् । एत्याचष्ट स नो दृष्टः सासृग् दृष्टः शरस्त्वयम् ॥२५४॥
अथ मित्रशुचा जाग्रच्चक्री तत्र स्थितो निशि । प्राहरत् प्रहरे चौरांस्तृतीये पतितानयम् ॥२५५॥
रथी प्रातर्विसृज्याऽथ ग्रामण्यं ग्रामसीमनि । ययौ राजगृहं स द्राग् **दविष्ठं पवनस्य किम्** ? ॥२५६॥
मुक्त्वा **रत्नवतीं** चित्तमिवाऽसौ तापसाश्रमे । तत्पुरं प्राविशत्कन्येऽपश्यद्वातायनस्थिते ॥२५७॥
इमे तमूचतुः प्रेमभाजनं यत्तदा जनम् । मुक्त्वाऽगच्छः [५]कलाकच्छ ! तत्ते चित्ते [६]स्वयं बभौ ॥२५८॥
स जगौ कं जनं प्रेमरञ्जनं खञ्जनेक्षणे ! । कदाऽस्मि मुक्तवान् ब्रूत कोऽहं वा के युवां च वा ॥२५९॥
अथाऽऽगच्छ प्रसीदेति तदगारं स तद्गिरा । प्रविष्टः स्नानपानादिहृष्टश्चाभ्यामभाष्यत ॥२६०॥
स्वामिन्नस्ति नभोहस्ति[3]विक्को **वैताढ्य**पर्वतः । पुरं तत्रास्ति [७]**रत्नाढ्यमन्दिरं** शिवमन्दिरम् ॥२६१॥
राजा च तत्र **ज्वलनशिखो विद्युच्छिखा**प्रियः । हृद्यश्रीर्विद्यते विद्याधरसिन्धुरयूथपः ॥२६२॥
तस्य **विद्युच्छिखा**गर्भभुवौ प्राणप्रिये सुते । आवां **खण्डा-विशाखा**ख्ये **नाट्योन्मत्त**खगानुजे ॥२६३॥
[4]क्षतपातकजातेन तातेन सममेकदा । गत्वा**ऽष्टापद**मानन्दादवन्दावहि तज्जिनान् ॥२६४॥
तत्रैव च सहाऽऽवाभ्यां रक्ताऽशोकतले पिता । ववन्दे सुकृतस्येव चरणौ चारणौ मुनी ॥२६५॥
आकर्ण्य कर्णपीयूषदेशीयां देशनां ततः । ततोऽपृच्छत्पतिर्भावी कोऽनयोः कन्ययोरिति ॥२६६॥
एतद्भ्रातृनिहन्ता य उपयन्ता स एतयोः । ताभ्यां मुनिभ्यामित्युक्ते तातश्चाऽऽवां च दुःखिताः ॥२६७॥
भोगयोगस्पृहां मुक्त्वा तद्वैराग्येण तद्दिनात् । आवां भ्रातुस्तनुं त्रातुकामे एवमितः स्थिते ॥२६८॥
अथाऽसौ पुष्पचापस्य चापलेन चकार यत् । यथाऽस्य कर्मभिर्जातं तज्जानाति स्वयं भवान् ॥२६९॥

---

१. प्रात रे K । २. किं त्वां P । ३. युद्धाऽध्वना... D, B, A, C, L । ४. स्थानास्या L, B । ५. सच्छ-C । ६. शुभं-C, A, B, A । ७. 'वैताढ्य'...-P ।

टि. 1. प्रान्त ! अवशिष्ट, मित्रस्य विशेषणम् । 2. स्थानस्य आप्त्या मित्रस्य प्रवृत्तेः प्रयत्नः चरैः क्रियते इति भावार्थः । 3. ०विक्कः-पोतः । 4. क्षतं हिंसा, क्षतस्य पातकः, क्षतपातकः तेषां जातं समूहः यस्य स क्षतपातकजातः, तेन ।

श्रुतं संबन्धुदमनं[1] भवदागमनं तदा । सवज्रपातपीयूषवृष्टितुल्यं बभूव नौ ॥२७०॥
आवयोरुक्तयोः **पुष्पवत्या**ऽथ रभसावशात् । पताकाऽस्मदभाग्यैककीर्त्तिवन्नर्त्तिता सिता ॥२७१॥
तदा च त्वामनायान्तं[2] पश्यन्त्योर्भुवनक्रमात्[3] । नैवाभूदावयोर्लग्नदावयोरिव निर्वृतिः ॥२७२॥
प्राप्तोऽधुनाऽसि दृग्मार्गं खिन्नयोर्नौ निषण्णयोः । **व्यवसायो वृथा भाग्यं कालेनाऽपि फलेग्रहिः** ॥२७३॥
आवां त्वया त्वमावाभ्यां वृतः **पुष्पवती**गिरा । स्वामिन्नद्य प्रसीदाऽस्तु स्वयंवृतिमहोत्सवः ॥२७४॥
सोऽथ निर्व्यूढगान्धर्वविवाहो विलसन् बभौ । सरागयोस्तयोर्मध्ये सन्ध्ययोरिव वासरः ॥२७५॥
स्थित्वा निशामसौ प्रोचे यावन्मे राज्यसङ्गतिः । यातं **पुष्पवतीं** तावत् ते तिरोभवतां ततः ॥२७६॥
गत्वाऽऽश्रममथाऽपश्यन् कान्तां स प्रवरं नरम् । कश्चित् पप्रच्छ काऽपीह दृष्टा शिष्टा वधूरिति ॥२७७॥
रुदती नाथ ! नाथेति तत् पितृव्याऽऽलये मया । ज्ञात्वा नीता ह्य एह्येहि त्वां विनाऽद्याऽपि रौति सा ॥२७८॥
इत्युक्त्वा तेन हृष्टेन **ब्रह्मदत्त**स्तदौकसि । नीतः प्रीतश्च विदधे तद्विवाहं धनावहः ॥२७९॥
नित्यं स्वादयता स्वादु दयिताप्रेमजं सुखम् । तेनाऽन्येद्यु**र्वरधनो**र्मृतकार्यमकार्यत ॥२८०॥
विप्रभोज्यक्षणे विप्रमूर्त्याऽऽगत्याऽऽह मन्त्रिभूः । साक्षाद् **वरधनु**र्भुङ्क्ते भोजनं मम दत्त[4] चेत् ॥२८१॥
श्रुत्वा श्रुतिसुधां वाचं तां मुदोत्थाय राजसूः । मुहुर्विरहभीत्यामुमालिलिङ्गैकतां नयन् ॥२८२॥
अथोपविश्य पृथ्वीशपुत्रे पृच्छति तत्कथाम् । स जगाद तदा नाथ ! प्रसुप्ते त्वयि सुप्रभौ ॥२८३॥
हृदि दुर्वचनेनेव बाणेनाऽऽहत्य पातितः । दुर्जनेनेव चौरेण मानादिव रथादहम्[5] ॥२८४॥
न रक्तगन्धोन्मत्ताश्वप्रत्वरं[6] रथमाप सः । **उपायोऽप्यनुपायः स्यान्महात्मनि दुरात्मनाम्** ॥२८५॥
लीने मयि लतौघेषु भग्नाशोऽयं विनिश्वसन् । चित्रकाय इव स्फारफालानाप्तमृगो ययौ ॥२८६॥
उत्पथेनाऽटवीं मुक्त्वा ग्रामेशात्प्राप्य वः कथाम् । इहाऽऽगत्य महापुण्यैः प्राप्तोऽस्यर्थ इवाऽर्थिना ॥२८७॥
ब्रह्मदत्तोऽभ्यधत्ताऽथ वदाऽस्माभिः कियच्चिरम् । स्थेयं रिपुभयोद्ग्रीवैः क्लीबैरिव सखे ! क्षितौ ॥२८८॥
इहान्तरे हहारावक्रीडादलितविश्वहृत् । शब्दोऽभूदिति पौराणां विकटप्रकटाक्षरः ॥२८९॥
निषादिनां नामम[7][1]िव स्तम्भं भङ्क्त्वा मदोद्धतः । त्रासयंस्त्रिजगत्त्राणप्राकारानिव दोर्भृतः ॥२९०॥
गतिक्रुधेव[8] जग्राह व्यालोऽयं बालिकां हे[9] हा । कोऽप्यमुं मोचयति भो हा निर्वीरा धरापि हा ॥२९१॥
स वीर इति शुश्राव पश्चात्पीठात्पुरोत्थितः । पश्चादभूद् गजं गन्तुमनास्तं प्रथमं गतः ॥२९२॥
रे नाम कर्ममातङ्ग ! स्त्रीग्रहेण न लज्जसे । इत्याक्षिप्तः कुमारेण तां त्यक्त्वा तमधावत ॥२९३॥
हतो हत इति व्यग्रे जने भूपाङ्गजो गजम् । दन्तदत्तांह्रिरारोहद्धेलयाद्रि[10] हरिर्यथा ॥२९४॥

---

१. स्वबन्धुदमनं-B, H, स्वबन्धुगमनं-K, L, D । २. त्वामथा K । ३. भुवनभ्रमात् C, A भुवनं भ्रमात् D, L । ४. दच्छ-C, A । ५. ययावहं-P । ६. प्रचरं H । प्राचरन्-P । ७. मानमिव-C, A, B । ८. गतिक्रुद्धेव-A, P । ९. जवात् B । १०. त्फालयाद्रि-B, A ।

टि. 1. नामः (पुं)- प्रसिद्धिः ।

ऊरुसंदंशसम्पीड्यमानकण्ठ[1]गलद्बलम् । निर्मदं निर्ममे वीरो नागं नागमिवाथ तम् ॥२९५॥
सोऽथ श्लथीकृतोरुस्तं पुनस्तद्ग्रहभीवशम् । हेलया खेलयित्वेभं स्तम्भेऽनयदयत्नतः ॥२९६॥
साधु साध्वित्यथो पौरैरुक्तो जय जयेति च । स एत्य ददृशे राज्ञा विस्मितेन स्मितेन च ॥२९७॥
चमत्कारी शिरःकम्पी तं वीक्ष्योचे जनं नृपः । क एष भो रविः शीतच्छविः पविधरोऽथवा ॥२९८॥
**रत्नावती**पितृव्येण कथिताय यथात्मने । अथाऽस्मै पृथिवीजानिर्बह्वीरदित कन्यकाः ॥२९९॥
एताभिः परिणीताभिर्भूभृत्कन्याभिरावृतः । रराज राजपुत्रोऽयं वाहिनीभिरिवार्णवः ॥३००॥
तमेकदाऽवदत्काऽपि जरती भ्रमिताञ्चला । इह **वैश्रवण**श्रेष्ठिसुताऽस्ति **श्रीमती** मता ॥३०१॥
सा त्वया नागतोऽमोचि तत् त्वय्येवानुरागिणी । पाणिग्रहेण तां कर्ष मज्जन्तीं विरहार्णवे ॥३०२॥
अथायमुपयेमे तां कुमारस्तारमङ्गलः । **सुबद्धि**मन्त्रितनयां **नन्दां** वरधनुः पुनः ॥३०३॥
अथ तौ प्रथितौ जातौ प्रथीयोभिर्गुणैरिह । अभियुक्तौ भयान्मुक्तौ गतौ **वाराणसीं** पुरीम् ॥३०४॥
ततः **कटकवत्याख्यां** **कटकः** **काशि**नायकः । **ब्रह्मप्रिय**सुहृद् **ब्रह्मदत्ताया**ऽदत्त नन्दिनीम् ॥३०५॥
चतुरङ्गां तुरङ्गांह्रिधूलिस्थूलितभूधराम् । ददौ तस्मै चमूं चाऽयं **स्वस्मै कः किं न यच्छति** ॥३०६॥
**कणेरुदत्त**[2]**श्चम्पेशः** स **धनुः** सचिवश्च तम् । **पुष्पचूला**दयोऽपीयुरुदयेऽर्कमिवांशवः ॥३०७॥
**दीर्घस्य** दीर्घनिद्रायै दीर्घपान्थस्य पाप्मभिः । **ब्रह्म**सूनुर्वायुरिवाचलदस्खलितः क्वचित् ॥३०८॥
**दीर्घ**स्य दूतः **कटक**मथाऽऽगत्येदमूचिवान् । अस्मासु बालमित्रेषु कर्तुं नैतत्तवोचितम् ॥३०९॥
**कटको**ऽप्याह यद् बालमित्रब्रह्मगृहं नयात् । पालयामास **दीर्घ**स्तत्फलमद्यैव लप्स्यते ॥३१०॥
इत्येनं **कटकः** प्रैषीत्कटकैर्**ब्रह्मज**स्य तु । रुद्धं **सदीर्घं** **काम्पिल्यं** सार्कं व्योम च रेणुभिः ॥३११॥
सर्वाभिसारप्रसरत्रसरेणूकृताहितः । **दीर्घ**स्यात्मेव दीर्घोऽथ पुरा[1]न्निर्गन्तुमुद्यतः ॥३१२॥
प्रतोलीपथसङ्कीर्णं यद्यत्तस्याऽपतद्बलम् । तत्तन्नद्यौघवन्मग्नं **ब्रह्मदत्त**बलाम्बुधौ ॥३१३॥
स न दीर्घो नदीर्घोरा विदधद्युधि रौधिरीः[2] । प्रतापदहनं कस्य शमयामासिवान् क्षणम् ॥३१४॥
क्रोधादथ रुरोधाऽमुं **ब्रह्मदत्त**श्चमूद्वहम् । दलयन्तं तरुततीर्महाद्विप इव द्विपम् ॥३१५॥
चिराऽन्तःसञ्चितक्रोधानलकीलावलीरिव । तौ क्षिपन्तौ महास्त्राणि गतौ प्राणितसंशयम् ॥३१६॥
दुर्जयारिजये नव्योत्पन्नचक्रच्छलात्तदा । **ब्रह्मदत्त**स्य हस्ताब्जमब्जबन्धुरिवागमत् ॥३१७॥
[3]चक्रेण दीर्घ आहारो जातमात्रेण यः कृतः । आहरिष्यति तारुण्ये तत्किमित्यापि भीर्नृपैः ॥३१८॥
चक्रिन् ! जयजयेत्युच्चैर्वादिनो बन्दिनो यथा । तदा **ब्रह्म**भुवो मूर्ध्नि पुष्पवृष्टिं व्यधुः सुराः ॥३१९॥

---

१. कण्डं-D । २. राजेन्दुः-P, B, KH, H ।

टि. 1. पुरात्-नगरात् पक्षे शरीरात् । 2. रौधिरीः रूधिरस्य शोणितस्य इमाः, नद्यः, ताः । 3. जातमात्रेण चक्रेण यः दीर्घ राजा प्रभूतो वा आहारः कृतः ।

अपि वृद्धैः पितेवाऽयं देवतेवाऽपि नास्तिकैः । आलोक्यमानः साऽऽनन्दैर्ब्रह्मसूः प्राविशत् पुरम् ॥३२०॥
जितषट्खण्डभूर्द्वादशाब्दीपूर्णाभिषेचनः । चतुःषष्टिसहस्रस्त्रीप्रियोऽयं मुमुदेतराम् ॥३२१॥
दास्यैकया कदाप्यस्य कौतुकाय करेऽर्पितः । स्वर्मालिनीगुम्फितवन्नेत्रेन्दुः पुष्पगेन्दुकः[१] ॥३२२॥
क्वाप्यहं दृष्टपूर्वीदं रूपमित्येष चिन्तयन् । स्मृतपञ्चभवो दध्यौ **सौधर्मे** दृष्टवानिति ॥३२३॥
मिलिष्यति स मे पूर्वपञ्चजन्मसहोदरः । कथमेवं सुधीर्ध्यात्वा श्लोकार्द्धमिति सोऽपठत् ॥३२४॥
आस्व दासौ मृगौ हंसौ मातङ्गावमरौ तथा । ऊचे चेमां समस्यां यः पूरयेत् सोऽर्द्धराज्यभाक् ॥३२५॥
समस्यामथ सर्वोपि जिह्वादोलास्वदोलयत् । न तु पूरयितुं तृष्णामिव कोऽपि शशाक ताम् ॥३२६॥
जातिस्मृतेर्व्रतीभूतश्चित्रजीवो महेभ्यसूः । तदागात् तत्पुरोद्यानमेकः **पुरिमताल**तः ॥३२७॥
आरघट्टिकमेकं तत्समस्यापदपाठिनम् । स मुनिः पाठयामास श्लोकपादद्वयीमिमाम् ॥३२८॥
एषा नौ षष्ठिका जातिरन्योन्याभ्यां वियुक्तयोः । इत्युक्तश्च स भूपाग्रेऽपठद् गत्वाऽरघट्टिकः ॥३२९॥
कविः क इति तत्पृष्टः स जगौ तं वने मुनिम् । राजा तदुक्तस्तत्रागाद् दत्त्वाऽस्मै पारितोषिकम् ॥३३०॥
तं नत्वा बाष्पपूर्णाक्षो निषसादाऽन्तिके नृपः । दत्त्वा चाऽस्मै तपोराशिराशिषं देशनां व्यधात् ॥३३१॥
राजन्नसारतः सारं संसाराद्धर्ममार्हतम् । धीरा गृह्णन्ति रत्नौघमिव क्षारपयोनिधेः ॥३३२॥
लब्ध्वापि मानवं जन्म तरण्डं [1]भवतोयधौ । तन्मुधैव त्यजन्तो धिग् मूढा मज्जन्ति तृष्णया ॥३३३॥
धर्माधर्मफलं स्पष्टं स्मृतपूर्वभवो भवान् । जानानो जगतीजाने ! भजतामुचितं व्रतम् ॥३३४॥
ऊचेऽथ चक्री यत्प्राप्यं तपोभिः क्षोभितामरैः । तत्प्राप्तं राज्यमुत्सृज्य कस्तपः कुरुते कुधीः ॥३३५॥
तवापि तपसा किं भोस्तपोदुर्लभमस्ति मे । राज्यं विभज्य तद् भोज्यं पञ्चजन्मसहोदर ! ॥३३६॥
मुनिराह जितोत्साहधनदो धनदोहदः । ममापि पूर्णस्तूर्णं तु स त्यक्तो भवभीरुणा ॥३३७॥
मोक्षमार्गोचितेनाऽङ्गेनाङ्गीकृत्याऽङ्गनादिकम् । मूढ ! भद्रेभमूल्येन गृह्णासि मलशूकरम् ॥३३८॥
अबोध्यमथ बुद्ध्वैनमसाध्यमिव रोगिणम् । मुक्त्वाऽगात्तपसे साधुर्न क्षणोऽपीदृशां मुधा ॥३३९॥
घातिकर्मव्ययोन्मीलत्केवलो बोधयन् धराम् । भवोपग्राहिकर्मालिक्षयादयमगाच्छिवम् ॥३४०॥
[2]अजिह्मं **ब्रह्मदत्तो**पि सैष वैषयिकं सुखम् । रसयन् गमयामास दृप्तः सप्त[3]शरच्छतीम् ॥३४१॥
पुरा परिचितो विप्रः कदाचिद् चक्रवर्त्तिनम् । जगौ यच्छ त्वमाहारं यमाहरसि तन्मम ॥३४२॥
तदन्नं दुर्जरं जीर्यमाणं तून्मादकृद् बहुः । इत्युक्ते चक्रिणा विप्रः कदर्योऽसीत्युवाच तम् ॥३४३॥
राज्ञाऽथ सकुटुम्बोपि स्वभोजनमभोजि सः । शतशाखं स्मरोन्मेषमेष नक्तमवाप च ॥३४४॥
मातृ-पुत्र-पितृ-भ्रातृ-स्नुषाजाम्यादिभेदभित् । पशुवत्पशुधर्मोऽथ मिथोऽभूत् तत्कुटुम्बके ॥३४५॥

---

१. कन्दुकः इत्यर्थः ।

टि. 1. भवाम्बुधौ । 2. सुलभं इत्यर्थः । 3. शरद् (स्त्री) वर्षः ।

मिथस्त्रपानतं प्रातर्मुक्त्वा विप्रः कुटुम्बकम् । नगर्या निर्ययौ निन्दन् [1][१]मेदिनीशममर्षणः ।।३४६।।
स च क्वचिदजापालं कञ्चित् कर्क्करिकाकणैः । दूराद[2]श्वत्थपत्राणि काणयन्तमलोकयत् ।।३४७।।
तद्वैरं साधयाम्यद्य स्वकुटुम्बविडम्बनम् । ध्यात्वेति विप्रः सत्कारैरजापालं पुरेऽनयत् ।।३४८।।
गजारूढः शितच्छत्रो वर्त्मन्यत्रोपयाति यः । [3]अदृक् स कार्य इत्युक्त्वा स तं कुड्यान्तरे न्यधात् ।।३४९।।
किमावाभ्यां [4]स्फुटितहृद्दृष्टेरस्येति भूपतेः । तत्क्षिप्तयुगपद्गोलयुगेन स्फुटिते दृशौ ।।३५०।।
अजापालोऽयमालोक्यमानः प्राप्तोऽङ्गरक्षकैः । हन्यमानो गलन्मानो निजगाद द्विजं द्विषम् ।।३५१।।
श्रुत्वेति चक्रिणा विप्रः सत्क्रुधाऽघाति सान्वयः । पुरोहितप्रभृतयोऽप्यथ सर्वेऽपि घातिताः ।।६५२।।
अब्रह्मण्यं **ब्रह्मदत्तः** पत्तनान्तर्व्यधत्त तत् । यं यं जज्ञौ द्विजं सन्तं तं तं घ्नन्तं निनाय सः ।।३५३।।
अथोचे भूधरोऽमात्यं नो मात्यन्तः[5]क्रुधा मम । तद्विप्रदृग्भृतं स्थालं विशालं मुञ्च मत्पुरः ।।३५४।।
रौद्रध्यानाध्यवसितं तं मत्वा सचिवः सुधीः । श्लेष्मातकफलैः पात्रं पूरितं पुरतोऽमुचत् ।।३५५।।
नृपः पस्पर्श च स्थालमालपच्चेति हर्षुलः । स्त्रीरत्न**पुष्पवत्य**ङ्गसङ्गमोऽप्यद्य मे तृणम् ।।३५६।।
अतपांसि स्तुवे तानि यद्दत्तैर्विप्रलोचनैः । स्पृष्टैर्यथाऽद्य हर्षो मे न तथार्थैस्तपोर्जितैः ।।३५७।।
इदृगध्यवसायेन हृष्टः षोडशवत्सरीम् । मुहूर्त्तवदतीत्याऽऽप स क्ष्मापः सप्तमीं भुवम् ।।३५८।।

**इति ब्रह्मदत्तकथानकम् ।।**

**उदायिनृपमारककथानकं** त्विदम्—

## [ उदायिनृपमारककथानकम् ।। ]

अस्ति वास्तवताऽऽनीतकवीन्द्रातिशयस्तुतिः । **उदायी**ति नृप**श्चम्पा**पतिः **कोणिक**भूपभूः ।।१।।
देशे नैमित्तिकोद्दिष्टे परितः पाटलातरोः । **पाटलीपुत्र**संज्ञं स नूतनं पत्तनं व्यधात् ।।२।।
तस्मिन् सुरपुरस्पर्द्धाभाजि राजवरः पुरे । चारुशाश्वतचैत्याभं जिनागारमकारयत् ।।३।।
निर्मलं निर्मलोद्दामपरलोकविशोधनम् । अपालयदयं राज्यमिह धर्ममिवार्हतम् ।।४।।
देवतार्हन्गुरुः साधुर्धर्मः सर्वज्ञभाषितः । इति तत्त्वत्रयं तस्य प्रोल्ललास सदा हृदि ।।५।।
चतुर्थादितपोभिः स्वं चतुष्पर्व्यां विशोधयन् । महामतिः स जग्राह पौषधौकसि पौषधम् ।।६।।
धैर्यधुर्यो धरां धर्माऽबाधया साधयन्नयम् । विद्विषः सेवकीचक्रे [6]देवकीसूनुविक्रमः ।।७।।
सर्वेऽप्युर्वीभृतो दध्युस्तदाक्रान्तभुवस्तदा । **उदायी** जगदादायी यावत्तावन्न नः सुखम् ।।८।।
अथाऽऽगस्यागते क्वापि कस्यापि पृथिवीपतेः । विक्रम्योदायिना राज्यमादायि प्राज्यतेजसा ।।९।।

---

१. मेदिनीशसमर्षणः...KH ।

टि. 1. मेदिनीशं अमर्षणः–राजानं सोढुं अशक्तः इत्यर्थः । 2. अश्वत्थः वृक्षविशेषः, 'पींपळो' इति भाषायाम् । 3. दृष्टिरहितः कार्यः इत्यर्थः । 4. हृद् एव दृष्टिः इति हृद्दृष्टिः स्फुटिता हृद्दृष्टिः यस्य स, तस्य । 5. क्रुधा(स्त्री) कोपः । 6. देवकीसूनुः वासुदेवः तस्य विक्रम इव विक्रमो यस्य ।

स नश्यन् सुकुमालाङ्गो विपद्यस्यां [१]व्यपद्यत । कियज्जीवति राजीवमाकृष्टं [1]जीवनीयत: ॥१०॥
एकाकी मत्सराकीर्ण: शोकसङ्कीर्णमानस: । तदङ्गजो भुवि भ्राम्यन् ययावुज्जयनीं पुरीम् ॥११॥
**उदायि**नित्यविद्वेषसज्ज**मुज्जयनी**पतिम् । असेवत रसेनाऽसौ सेनासौष्ठवनिष्ठुरम् ॥१२॥
**उदायि**मत्सरोत्सङ्गरङ्गन्मनसमेकदा । राज्यभ्रष्ट: कुमारोऽय[2]**मवन्ती**पतिमब्रवीत् ॥१३॥
मम राज्याय साहाय्यं प्रतनोषि पुरा यदि । **तदुदायिन**मुर्वीशमवश्यं साधयाम्यहम् ॥१४॥
तथेति प्रतिपेदाने राजन्यस्मिन् स राजसू: । पत्तनं पाटलीपुत्रं पापधीरापतत्तत: ॥१५॥
छिद्राण्यन्वेषयन्नेष सवितु: परितापत: । पन्नगश्चन्दनस्येव सेवकोऽभू**दुदायिन:** ॥१६॥
तद्ध्यानो निग्रहस्थानं पश्यन्नप्यस्य भूपते: । नाऽऽसदत्प्रतिवादीव स महावादिन: क्वचित् ॥१७॥
जिनदर्शनभक्तात्मन्यस्मिन् राज्ञि ददर्श स: । सर्वत: सर्वदा येन यतीनेवाऽस्खलद्गतीन् ॥१८॥
भूभृन्निवेशनक्रोडप्रवेशनमनोरथी । स दीक्षामेकत: सूरेरेक[२]तानरसोऽग्रहीत् ॥१९॥
व्रतं निरतिचारं स पालयामास मायया । एकचित्तोऽपठत् सूत्रं शुश्राव च गुरोर्वच: ॥२०॥
तादृग् धर्मोक्तिपीयूषपिबस्या[३]ऽपि हि तस्य हा । नाऽवलिष्ट बलिष्ठाघं चेतो नृपनिपातनात् ॥२१॥
व्रतेन मुक्तिदेनाऽपि वाञ्छन् पापं नृपव्ययात् । स चिन्तामणिमूल्येन काचगोलमिवैहत ॥२२॥
कृपाणधारातीव्रं स व्रतं यत्नेन पालयन् । अवर्त्तत नृपग्रीवाकर्त्तनाऽवसरोत्सुक: ॥२३॥
माययाऽप्यद्भुततपोलालनालालसात्मनि । अहो साधुरहो साधुरित्यस्मिन् दिद्युते यश: ॥२४॥
तस्य नालक्षि केनापि तन्मायागर्भितं व्रतम् । पवित्रं शाकिनीगर्भमिव मान्त्रिकमन्दिरम् ॥२५॥
आददौ पौषधं भूप: स तु पर्वणि पर्वणि । तदा तदन्तिके धर्मकथार्थं सूरयोऽवसन् ॥२६॥
कदाचिदचलन् पापौषधे पौषधपर्वणि । सूरयो नृपहर्म्याय मायिको यै: स दीक्षित: ॥२७॥
नीत्वोपकरणं कोऽपि क्षुल्लकश्चलतु द्रुतम् । नृपधाम वयं याम इत्यूचुस्ते च सूरय: ॥२८॥
मायामयो मुनि: सोऽथ नाटयन् भक्तिनाटिकाम् । नीत्वोपकरणान्यूचे गुरून् पादोऽवधार्यताम् ॥२९॥
चिरप्रव्रजितस्यास्य कामं [3][४]पर्यणमच्छम: । इति सार्द्धमनेनापि नृपागारमगाद् गुरु: ॥३०॥
धर्ममाख्याय सुष्वाप सूरि: क्ष्मापतिरप्यथ । खिन्न: स्वाध्यायतोऽशेत प्रतिलेखितभूतल: ॥३१॥
ध्यानरौद्रत्वविद्राणनिद्रो मायायतिस्तत: । कर्त्तिकां कङ्कलोहस्याऽऽचकर्ष चिरगोपिताम् ॥३२॥
चिरसंसेवितस्याद्य गृह्णे व्रततरो: फलम् । इति हृष्यन् स भूपालगलनालं तयाऽलुनात् ॥३३॥
अथाऽयं कायचिन्तायै मायां निर्माय मायिक: । निर्यातवान् यतित्वेन यामिकैरप्यभाषित: ॥३४॥

---

१. विपद्यत- P, A, KH । २. तानरतो B. । ३. पिहितस्पृहा... - KH । ४. पर्यणमृच्छम: P पर्यणन्मन: A, B, H ।
टि. 1. जीवनीयत: जलत: इत्यर्थ: । 2. उज्जयन्या: नामान्तरम् । 3. पर्यणमत् शम: ।

[1]कीलालकुल्यासञ्जातजागरोऽथ गुरुः पुरः । भूपालमौलिमालूनमैक्षत क्षुल्लकं न तु ॥३५॥
अचिन्तयच्च धिक् कश्चिदहितोऽस्य महौजसः । मायया श्रमणीभूय जघानैनं जघन्यधीः ॥३६॥
धिग् धिग् रे पाप ! निष्पापो महीजानिरघानि किम् । धिग् धिग् मालिन्यमानिन्ये जिनप्रवचनस्य च ॥३७॥
एतावताऽपि कालेन मध्येधर्मरसं वसन् । न रे भिन्नोऽसि धिक् सिन्धुसम्बन्धीवाऽश्मगोलकः ॥३८॥
त्वया त्वदः कृतं साधु विमुक्ता कर्त्तिकाऽत्र यत् । जिनशासनमालिन्यमनयाऽपनयाम्यहम् ॥३९॥
छिन्देऽनया स्वमूर्द्धानं जानन्तु जनतास्ततः । हतौ राजा च सूरिश्च क्षुल्लकेन शठात्मना ॥४०॥
ध्यात्वेति चतुराहारपरीहारमना मुनिः । स्मृतपञ्चनमस्कारस्तच्चकार व्यपादि च ॥४१॥
तत्प्रातः प्रेक्ष्य किङ्कर्य्यः कुट्टयन्त्यः करैरुरः । पूत्कार[१]तारं रुरुदुरुरुदुःखविसंस्थुलाः ॥४२॥
मिलितः सकलो राजलोकश्चैतदचिन्तयत् । क्रूरेण राजा सूरिश्च क्षुल्लकेन हतौ खलु ॥४३॥
स कोऽप्यरिः परिव्रज्यामप्युपादाय मायया । क्ष्मापं व्यापादयामास विश्वासवशमागतम् ॥४४॥
अस्मिन्नमङ्गले रोद्धुं निषेद्धुं वा कृतोद्यमः । क्रूरेण सूरिरप्येनां दम्भिना लम्भितो दशाम् ॥४५॥
निशीथे स कृतक्रूरकर्मा दूरमगात् खलु । तथाप्यन्वेष्यतां दिक्षु हयैर्वायुरयैरयम् ॥४६॥
अथ सर्वास्वधावन्त दिक्षु दूरं तुरङ्गिणः । प्रविष्टमिव पापाभ्रे नाऽपश्यन् क्वापि तं पुनः ॥४७॥
राज्ञः सूरेश्च संस्कारमथ पूत्कारविह्वलाः । प्रधानपुरुषाश्चक्रुः क्रन्दयन्तस्तरूनपि ॥४८॥
स पापः क्ष्मापनिर्घाती गत्वाऽवन्तीपतिं ततः । **उदायि**वधमाचख्यौ हर्षमग्नो यथाकृतम् ॥४९॥
अथैनमूचे धिक् कुर्वन् उर्वरापतिरप्ययम् । रे रे त्वमधमश्रेणिवेणिरत्नायसे भृशम् ॥५०॥
श्रुत्वापि द्वादशाब्दानि व्रतलीनो [२]जिनागमम् । न यः शमे परिणतो धर्मस्थं योऽवधीन्नृपम् ॥५१॥
स मेऽधमः कथं भावी हितस्त्वं भुवनाहितः । अद्रष्टव्यमुखः क्षिप्रं पापा !ऽपसर मत्पुरात् ॥५२॥
तेनापीति स भूपेन पापो निर्वासितः पुरात् । **न स्वः पितापि मातापि क्वापि पापात्मनां भवेत्** ॥५३॥
स भव्यानां [३]शिरःशूलमभव्यानां शिरोमणिः । तदाद्यु**दायि**घातीति प्रख्यातः क्ष्मातलेऽखिले ॥५४॥

**इति उदायिनृपमारककथानकम् ॥**

अथ **ब्रह्मदत्त**वदेवान्येऽपि ये न बुध्यन्ते, तेषामधोगतिरित्याह—

**गयकन्नचंचलाए, अपरिचत्ताए रायलच्छीए ।**
**जीवा सकम्मकलमल-भरियभरा तो पडंति अहे ॥३२॥**

**गजकर्णचञ्चलया** करिकर्णतालतरलया**ऽपरित्यक्तया राजलक्ष्म्या जीवा** मन्दसत्त्वप्राणिनः स्वकर्मैव

---

१. ०भारं - L.K. । २. यथागमं P । ३. शिरःशूरम - B, A ।

टि. 1. कीलालः-रुधिरः ।

कलं[१] प्रचुरत्वादजीर्णं, तदेव मलस्तेन भरितः पूरितो भरो भारो यैस्ते, **स्वकर्मकलमलभरितभराः** अथवा स्वकर्मैव कलमलो देशीशब्दत्वात् कचवरः यद्वा स्वकर्मण्येव कलमले पङ्कविशेषे भरितभराः संसक्तात्मानः सन्तस्तत एव हेतोः **पतन्ति, अधो** नरक इति ॥३२॥ दुर्विपाकत्वमुक्त्वा इहैव कर्मणो दुर्वचत्वमाह—

**वोत्तूण वि जीवाणं, सुदुक्कराइं ति पावचरियाइं ।**
**भयवं जा सा सा सा, पच्चाएसो वि इणमो ते ॥३३॥**

**वक्तुमपि जीवानां सुदुष्कराण्य**तिदुःशक्यानी**ति पापचरितानि** एवं दुष्टचेष्टितानि, उत्तरार्द्धेन दृष्टान्तं सूचयति । **भगवन् ! या सा** एवं स्वरूपा, **सा** किं **सा** सैव नान्येति प्रश्ने कृते भगवानाह **ते** तव **प्रत्यादेशो** उत्तरमपि **इदमेव** या सा, सा सैव इतिरूपमित्यक्षरार्थः ॥३३॥ भावार्थः कथानकादवसेयः तच्चेदम्—

**[ 'या सा सा सा' कथानकम् ॥ ]**

**साकेत**पत्तने यक्षः ख्यातो नाम्ना **सुरप्रियः** । विचित्रं चित्र्यते यात्रादिने प्रत्यब्दमप्ययम् ॥१॥
चित्रितश्चित्रकं[२] हन्ति पूर्लोकं हन्त्यचित्रितः । असाविति परित्रस्तं समस्तं चित्रकृत्कुलम् ॥२॥
पुरचारिप्रजामारिभीरुणा भूभुजा ततः । धृत्वाऽऽनायि भटैर्दीनचक्षुश्चित्रकरोत्करः ॥३॥
मुक्तास्ते लग्नकैर्[1]बद्ध्वा घटश्चाऽपूरि भूरिभिः । तन्नामचित्रितैः पत्रैश्चित्रगुप्त[2]निधानवत् ॥४॥
प्रत्यब्दं कापि कन्यैकं कुम्भात्कर्षति पत्रकम् । तत्र यन्नाम निर्याति यक्षचित्रं[३] करोति सः ॥५॥
इति व्यतिकरे जाते तत्र चित्रकदारकः । आययौ कोपि **कौशाम्ब्या**श्चित्रकौशलसिद्धये ॥६॥
स चित्रकरवृद्धाया मातृश्रद्धावशंवदः । कस्याश्चिद्धाम्नि तस्थौ तत्पुत्रमैत्रीनियन्त्रितः ॥७॥
पुत्रपत्रे तदाऽऽयाते कृतान्ताह्वानलेखवत् । वृद्धा घ्नन्ती कराघातैरुरो दीर्घं रुरोद सा ॥८॥
चित्रयिष्याम्यहं यक्षं यक्षाराधनदक्षधीः । मह्यं न ह्यन्तको मातस्तत्र घातक्षमो भवेत् ॥९॥
इति प्रबोध्य वृद्धां तां ज्ञात्वा यात्रादिनं च तत् । कृत्वा षष्ठं तपो भूत्वा पवित्रश्चित्रकृद्युवा ॥१०॥
चारुचन्दनकस्तूरीकर्पूराद्यधिवासितैः । नवैर्नवपुटन्यस्तैर्वर्णकैर्नवकूर्चकैः ॥११॥
वेष्टयित्वाऽष्टधा पट्या मुखं सौरभभासुरः । निर्भयश्चित्रयामास यक्षस्यार्चां मनश्च सः ॥१२॥ विशेषकम् ॥
ततः कृताऽऽनतिर्दक्षः स यक्षमिदमब्रवीत् । न चित्र्यसे यथोचितं **सुरप्रिय** ! सुरैरपि ॥१३॥
तद्विश्वोद्धारसंहारशक्त ! भक्तैकवत्सल ! । अयुक्तं यत्कृतं यक्ष ! मयाऽद्य क्षमयामि तत् ॥१४॥
ततः **सुरप्रिये** प्रीते वरदायिनि सोऽवदत् । विधातव्यः प्रजाघातस्तात ! नातः परं त्वया ॥१५॥
सिद्धमेतत्स्वयं वत्स ! धीमहत्यहते त्वयि । स्वस्मै वरं वृणीष्वेति तं प्रोवाच **सुरप्रियः** ॥१६॥

---

१. कुलं - KH । २. विचित्रत०-L । ३. यक्षश्चित्रं - P, KH ।

टि. 1. लग्नकः-साक्षी । 2. चित्रगुप्तः-यमराजस्य प्रधानपुरुषः, येन मनुष्याणां गुणदोषाणां सूचिपत्रं लिख्यते ।

स जगाद त्वया तात ! स्वयं मारिरवारि तत् । एतावतैव प्रीतोऽस्मि किं याचेऽतः परं प्रियम् ॥१७॥
इत्यस्य स्वार्थशैथिल्यात् प्रमोदं परमं वहन् । यक्षो जगाद भोः किञ्चिद् याच याचेति सादरः ॥१८॥
ऊचेऽथ चित्रकृन्नाथ ! चेत्प्रीतोऽसि तदस्तु मे । चित्रं रूपस्य दृष्टैकदेशस्यापि यथास्थितम् ॥१९॥
एवमस्त्विति यक्षेणाभिहितो महितो जनैः । स **कौशाम्बीं शतानीक**नृपश्रीकलितां ययौ ॥२०॥
निजराज्येऽन्यराज्येभ्यो हीनं चित्रसदस्तदा । विज्ञाय नृपतिस्तत्राऽऽदिशच्चित्राय चित्रकान् ॥२१॥
प्रासादस्य प्रदेशेषु विभज्याऽऽत्तेषु चित्रकैः । स्थानमन्तःपुरासन्नमवाप स तु चित्रकः ॥२२॥
दिव्याकृतिद्युतेर्देव्या **मृगावत्याः** क्रमाङ्गुलिम् । दैवादालोकयज्जालान्तरेण तरलां त्विषा ॥२३॥
अनिरूपितमित्यस्या रूपमङ्गुलदर्शनात् । निखिलं लिखतस्तस्याऽपतदूरौ मषीलवः ॥२४॥
स तं ममार्जाऽऽशु मषीबिन्दुस्तत्राऽपतत्पुनः । पुनर्ममार्ज पुनरप्यपतद् व्यमृशच्च सः ॥२५॥
निर्भाग्यस्य विपत्ताप इवोन्मृष्टोऽपि यन्मुहुः । मषीबिन्दुः पतत्यस्यास्तन्मन्येऽस्तीह लाञ्छनम् ॥२६॥
तच्चित्रितमथो देव्या रूपमालोक्य भूपतिः । मुदमाप च तद्बिन्दुदर्शनाच्च क्रुधं कुधीः ॥२७॥
दध्यौ च पाप्मनाऽनेन विप्लुतैव **मृगावती** । इह स्थायी मषग्रन्थिरस्या ज्ञातोऽन्यथा कथम् ॥२८॥
अथाऽत्र चित्रके हन्तुमारब्धे मन्तुघोषणात् । एत्य चित्रकृतः सर्वेऽप्युर्वीनाथं व्यजिज्ञपन् ॥२९॥
स्वामिन् ! यक्षप्रसादेन दक्षश्चित्रकलाविधौ । दृष्टैकदेशमप्येष लिखेद्रूपं यथास्थितम् ॥३०॥
कुब्जिकाया मुखमथो राजा ह्यमदीदृशत् । स च तस्या यथावस्थं रूपं चित्रकरोऽलिखत् ॥३१॥
तथापि छिन्नसन्दंशो राज्ञाऽकारि स चित्रकः । यक्षमाराध्य लेभेऽथ तां सिद्धिं वामपाणिना ॥३२॥
अथाऽमर्षरसोत्कर्षाच्चिन्तयामास चित्रकः । धिग् राज्ञाऽहं मुधारागान्निरागास्तेन खण्डितः ॥३३॥
अशक्तः शक्तिसम्पन्नमपि तं धीधनोऽधुना । मूलादुन्मूलयिष्यामि **कियानिन्द्रोऽपि धीमताम्** ॥३४॥
इति ध्यात्वा **मृगावत्या** रूपं न्यस्य पटेऽमुना । **चण्डप्रद्योत**भूपस्याऽदर्शि कर्शितविद्विषः ॥३५॥
[1]दृग्मृगीजालमालोक्य [2]तद् भूपालः शिरोऽधुनात् । साम्यं रम्भादिभिः कुर्वन् स्वान्तं स्वं दारयन्निव ॥३६॥
न रूपं सम्भवत्येतदुर्व्यां निर्व्याजसुन्दरम् । [3]स्वर्गपातालबालानामालोकनगतिः क्व ते ॥३७॥
तत् किं चित्रक ! भात्येषा चित्रकर्मकलैव ते । किं वा स्त्री क्वचनाऽस्तीदृग् वचनागोचराकृतिः ? ॥३८॥
स्त्रीरत्नं रत्नगर्भायामिदं यद्यस्ति तद्वद । गृह्णाम्यहं न हंसी हि हंसादन्यत्र राजते ॥३९॥
एवं वचसि भूपेन कलिते फलितं निजम् । जानन्मनोरथं नृत्यच्चित्तश्चित्रकृदूचिवान् ॥४०॥
या लीलागतिलालित्यवाग्विलासादिवर्जिते । चित्रे न्यस्ता मया देवी चकास्ति चकितैणदृग् ॥४१॥

---

टि. 1. दृग् एव मृगी तस्या बन्धने जालं इव जालं इति दृग्मृगीजालम् । 2. तद् - पटे आलिखितं रूपम् । 3. स्वर्गश्च पातालश्च स्वर्गपातालौ तयोर्बालानां आलोकनविषये गतिः बुद्धिः क्व ते तव इत्यर्थः ।

सेयं **मृगावती** नाम **शतानीक**नृपप्रिया । सुरासुरस्त्रीरूपाणामन्त्यावयवरूपिणी ॥४२॥ युग्मम् ॥
ग्राह्या शक्त्याप्यसौ याचे पूर्वं साम्नेत्यथो नृपः । **कौशाम्बी**पतये दूतं **वज्रजङ्घा**ख्यमन्वशात् ॥४३॥
स गत्वोचे **शतानीकं** हन्त ! त्वामादिशत्यदः । अनादेशकृतां **चण्डश्चण्ड**प्रद्योतभूपतिः ॥४४॥
त्रपुणीव मणी नैव त्वय्याभाति **मृगावती** । साऽस्मभ्यं प्रेष्यतां **नांह्रौ मौलिर्मौलौ हि युज्यते** ॥४५॥
जीवितव्यं च राज्यं च रक्ष प्रेष्य **मृगावतीम्** । **सर्वनाशोंऽशनाशेन रक्षणीयो विचक्षणैः** ॥४६॥
ततः प्रततकोपश्रीः शतानीकनृपोऽभ्यधात् । मद्गिराऽदिश्यतां दूत ! गृहचण्डः[1] स भूपतिः ॥४७॥
त्रपुणीव मणी नैव त्वय्याभाति **मृगावती** । इहाऽस्तु तदियं **नांह्रौ मौलिर्मौलौ हि युज्यते** ॥४८॥
राज्यं च जीवितव्यं च रक्ष प्रेष्याऽवरोधनम् । **सर्वनाशोंऽशनाशेन रक्षणीयो विचक्षणैः** ॥४९॥
इत्येष प्रैषयद्दूतं स गत्वेदं न्यवेदयत् । चक्रे प्रयाणं प्रद्योतश्चतुर्दशनृपावृतः ॥५०॥
सूरनिस्तेजनायोग्यैर्भूभृत्कम्पनहेतुभिः । **कौशाम्ब्यै** सोऽचलद्धूलिधूम्रदिग्भिः प्रयाणकैः ॥५१॥
श्रुत्वैनं चण्डमायान्तं **शतानीको**ऽतिसारतः । ससार शरणार्थीवाऽतिचण्डयममन्दिरम् ॥५२॥
प्रिये पञ्चत्वमापन्ने देवी दध्यौ मृगावती । सूनुर्मेऽल्पबलो बालो बलीयान् पुनरेत्यरिः ॥५३॥
छलेनाप्यक्षतं रक्ष्यमस्माच्छीलं कुलं च तत् । इति ध्यात्वाऽन्वशाद्दूतमियं प्रद्योतभूपतेः ॥५४॥
गत्वा **प्रद्योत**मायान्तं स जगौ त्वां **मृगावती** । वदतीदं **शतानीके** मृते त्वं शरणं मम ॥५५॥
किन्तू**दयन**नामायं मत्पुत्रोऽल्पबलः शिशुः । पितृशोकैरिवाऽमित्रैर्मन्मुक्तोऽभिभविष्यति ॥५६॥
तद्गिरा प्रमदप्रोतहृत् प्रद्योतस्ततो जगौ । तस्य रोमापि को नाम नामयेन्मयि पातरि ॥५७॥
अब्रूत दूत इत्येतदेव[१] देव्याप्युदीर्यते । **किं भयं जगदुद्द्योते प्रद्योते सति गोप्तरि** ॥५८॥
द्विड्महीपाः समीपे तु नेतुर्दूरे तव स्थितिः । यदेतन्मरुकूपेऽम्भो गृहमूर्ध्नि प्रदीपनम् ॥५९॥
**अवन्तीतः** समानीतैर्मत्पुर्यामिष्टिकोत्करैः । ततो दिवो[२] वप्राऽऽकारं प्राकारं कारय[३] द्रुतम् ॥६०॥
ततस्तं पूरय रयात्तृणधान्येन्धनैर्घनैः । पुत्रं कुशलिनं तत्र मुक्त्वा कुर्वे[४] हितं तव ॥६१॥
श्रेणीकृत्य ततः सेनाश्चतुर्दशमहीभुजाम् । हस्ताऽनुहस्तिकाऽऽनीतैरवन्त्या इष्टिको[५]त्करैः ॥६२॥
व्योमद्रुमालवालाभं स प्राकारमकारयत् । अपूरयच्च काष्ठान्नतृणैः **प्रद्योत**भूपतिः ॥६३॥
तत्कृतेऽप्यथ वप्राङ्गे रुद्धद्वारा **मृगावती** । योगिनी कर्मण इव द्विषोऽभूत्तस्य दुर्ग्रहा ॥६४॥
[2]बहिर्विहितरोधं कः प्रद्योतं वेत्तु कोपिनम् । अवैत् तत्पुरवास्तव्यो नोदयास्तमयावपि ॥६५॥

---

१. इत्येवदेव - C । २. दिवोपमकारं - C । ३. कारयतद्रुतं - P; कारयाद्धुतं - B, A, । ४. कुवि - P । ५. इष्टिको - P ।

टि. 1. गृहे [एव] चण्डः गृहचण्डः । 2. तत्पुरवास्तव्यो(ऽतिसुरक्षिततया) उदयास्तमयौ अपि न अवैत्, बहिर्विहितरोधं कोपिनं प्रद्योतं (पुनः) कः वेत्तु इति अन्वयः कार्यः ।

चिन्ता-विस्मय-सन्ताप-खेद-दुःस्थः स तस्थिवान् । अवाप्तहारितमणिर्दरिद्र इव विद्विषन् ॥६६॥
अथोग्रोधसक्रोधयो[१]र्युद्धा[1]स्त्रवृष्टिभिः । उद्भिन्नप्रसृतोत्फुल्लवैराग्याऽभून्**मृगावती** ॥६७॥
दध्यौ च शीलरक्षायै बाह्योऽरिश्छलितो मया । छलयाम्यन्तरारातीन् [2]यद्यायातीह तीर्थकृत् ॥६८॥
सर्वभाव-स्वभावज्ञस्तद्भावाऽभ्यर्थितः प्रभुः । तत्पुरीसीम्नि तच्चिन्ता[२]तुल्यकालमुपाययौ ॥६९॥
श्रीजिनेशदिनेशस्याभ्युदयेऽथ **मृगावती** । पुरादुद्घाटितद्वारादब्जाद् भृङ्गीव निर्ययौ ॥७०॥
अथ ऋद्ध्या च भक्त्या च महत्याऽभ्येत्य निर्भया । जिनाधिनाथमानम्य यथास्थानमियं स्थिता ॥७१॥
विमुच्य कोपचण्डत्वं **चण्डप्रद्योत**राडपि । श्रीवीतरागमागत्य प्रणिप्रत्योपविष्टवान् ॥७२॥
धर्मकैरवकेदारविकाशनशशिद्युतिम् । व्यधत्त दुरितध्वान्तध्वंसिनीं देशनां जिनः ॥७३॥
कोपि धन्वी तदा नाथं हृदा पप्रच्छ संशयम् । तं स्वाम्यूचे गिरा पृच्छ बुध्यन्ते बहवो यथा ॥७४॥
स जगौ भगवन् ! या सा सा सैवेति मिताक्षरम् । नाथोऽप्यभिदधे या सा सा सैवेत्यस्फु[३]टार्थकम् ॥७५॥
पप्रच्छ **गौतमः** स्वामिन् ! कः प्रश्नोऽत्र किमुत्तरम् । प्रभुराचष्ट **चम्पा**ऽस्ति ख्याताऽस्मिन् **भरते** पुरी ॥७६॥
तत्रैकः स्वर्णकारोऽभूत् कन्यां यां यां व्यलोकयत् । कान्तां हेमसहस्रार्द्धं दत्त्वा तां तां व्युवाह सः ॥७७॥
इत्युदूहे क्रमात्पञ्च चञ्चलाक्षीशतानि सः । प्रत्येकमपि सर्वासां सर्वाङ्गाभरणान्यदात् ॥७८॥
स्वशृङ्गारभृतः स्वस्ववारे तमरमन्त ताः । अन्यवारे पुनः शान्तवेषास्तस्थुस्तदाज्ञया ॥७९॥
इतस्ततोऽस्मिन् याते ताः शृङ्गारादि मुदा व्यधुः । ततोऽसौ तर्जयामास ताडयामास चाऽऽगतः ॥८०॥
[3]रक्षामतीर्ष्यया तासामथ निर्मातुमुद्यतः । कदाचिन्नामुचद् द्वारं धाम्नोऽधिष्ठानभूतवत् ॥८१॥
हत्यादग्ध इवाऽगच्छद् भोक्तुं कस्यापि नौकसि । स निजेऽपि गृहे कश्चिन्न कदाचिदभोजयत् ॥८२॥
बलात् कदापि सुहृदा निजे भोजयितुं गृहे । अनिच्छन्नपि निन्येऽसौ [4]गुप्तौ क्षेप्तुमिव द्विषा ॥८३॥
साध्वद्य नः पतिच्छद्मा [४]बन्दिकृत् गुप्तियामिकः । बहिर्गत इति स्फीताः क्षणं स्मः [5]क्षणिका इव ॥८४॥
ध्यात्वेति तत्क्षणकृतस्नानालेपनमण्डनाः । पश्यन्त्यो दर्पणेषु स्वं तस्थुः प्रीतास्तदङ्गनाः ॥८५॥
स्वर्णकारस्तदागारमागात् प्रेक्ष्य च ताः क्रुधा । एकां जघान स तथा सा यथाऽभूद्यमातिथिः ॥८६॥
अरे रे हन्ति हन्त्येष पापी संभूय हन्यते । इत्यन्याश्चक्रवत्तत्राऽक्षिपन् कोपेन दर्पणान् ॥८७॥
तत्पातेन मृतः सोऽपि पश्चात्तापेन तास्ततः । चितावदौकः प्रज्वाल्य मृत्युदाहौ सहाऽऽसदन् ॥८८॥
विपद्य पश्चातापेनाऽकामनिर्जरया च ताः । एकेन पञ्चशत्यूना भुवि मर्त्त्यतयाऽभवन् ॥८९॥
ते दुर्गे क्वचिदेकत्र तस्करत्वेन सङ्गताः । जीवन्ति स्माऽधुनाऽस्तोकलोकलुण्टनलम्पटाः ॥९०॥

---

१. युद्धाश्रु...KH, युद्धास्त्र A, C, B, H । २. तुल्ये - P । ३. टाक्षरं - A, B, C । ४. बन्द - P, A, C, L, H, B, KH ।

टि. 1. अस्त्रं - अश्रु, शोणितं वा । 2. यदि आयाति इह । 3. रक्षां अतिईर्ष्यया इति विग्रहः । 4. गुप्तौ - कारागृहे । 5. क्षणिका-विद्युत् ।

सा तु पूर्वहता योषित् कुत्रचित् सन्निवेशने । कस्याऽपि रोरविप्रस्य पुत्रत्वेनोदपद्यत ॥९१॥
जाते पञ्चाब्दिके चास्मिन् तिर्यग्योनिपरिभ्रमी । स्वर्णकारस्तु तस्यैव द्विजस्याऽजनि पुत्रिका ॥९२॥
बालः पितृभ्यां बालायाः स तस्याः पालकः कृतः । सा तु बाला शठत्वेन रुरोदैव सदैव हि ॥९३॥
उदरं स्पृशतस्तस्यास्तस्य लालयतोऽन्यदा । गुह्ये हस्तोऽलगत् त्यक्तरुदिता मुदिता च सा ॥९४॥
रुदितस्य प्रतीकारं दारकः स विमृश्य तम् । तस्या रुदत्यास्तन्वानः पितृभ्यां वीक्षितोऽन्यदा ॥९५॥
पुरोऽप्येष दुराचारो दारको भवतीति तौ । निरकासयतामेतं कुट्टयित्वा निकेतनात् ॥९६॥
अरण्येषु भ्रमन्नेष दारकश्चौर्यकारकैः । तैः साकं सङ्गतः पञ्चशतीपूरणतां गतः ॥९७॥
सा तु जातैव कुलटा तत्स्वसा शैशवादपि । कदाचिदगमत् ग्राममेकमेकत्र न स्थिरा ॥९८॥
ग्रामोऽलुण्टि तदा चौरैः स तैः पञ्चशतीमितैः । अधारि दारिका [१]सा तु भार्या सर्वैरकारि च ॥९९॥
बहूनां सेवयाऽस्माकमियमेका वराकिका । म्रियतामिति तैश्चौरैरन्याऽऽनिन्येऽङ्गना[२]ऽन्यदा ॥१००॥
गतेषु तेषु चौर्याय पूर्वभार्यातिकोपिनी । वञ्चयित्वाऽगाधरूपे कूपे चिक्षेप तामृजुम् ॥१०१॥
आगता रागतश्चौरास्तेऽपृच्छन् क्व नु सेति ताम् । सा जगौ किमु जानामि यामिकी तत्कृतेऽस्मि किम् ॥१०२॥
ते दध्युः खलु मुग्धा सा हता हतकयाऽनया । द्विजोऽपि व्यमृशत् किं मे स्वसेयमिति दुर्मतिः ॥१०३॥
इहाऽऽगतोऽस्ति सर्वज्ञो विज्ञायेति जनादयम् । आगत्य मनसाऽपृच्छत् संशयं स्वसृलज्जया ॥१०४॥
उक्तोऽस्माभिर्गिरा पृच्छेत्यपृच्छद् गुप्तवागसौ । या सा सा सेत्यथ ददेऽस्माभिरुत्तरमप्यदः ॥१०५॥
एवं च वञ्चनाचञ्चत्पञ्चत्वादिविडम्बनैः । रागद्वेषादयो लोकं [३]लोडयन्ति भवे भवे ॥१०६॥
इत्याकर्ण्य स संविग्नश्चौरोऽवाप्य विभोर्व्रतम् । पल्लीं गत्वा प्रबोध्याऽऽशु चौरान् प्राव्राजयन्निजान् ॥१०७॥
उत्थाय नाथमानम्य जगावथ **मृगावती** । प्रव्रजिष्याम्यहं **चण्डप्रद्योता**नुज्ञया प्रभो ! ॥१०८॥
साऽथो जगाद **प्रद्योत**मनुजानासि मां यदि । तत्प्रव्रजामि संविग्ना त्वदधीनः सुतोऽधुना ॥१०९॥
प्रभुप्रभावप्रभ्रष्टवैरोऽ[४]नुज्ञाप्य तां ततः । **प्रद्योत**भूपः **कौशाम्ब्यां** व्यधादुदयनं नृपम् ॥११०॥
प्रद्योतस्त्रीभिरङ्गारवत्यादिभिरथाऽष्टभिः । सहाऽग्रहीद् व्रतं स्वामिसमीपेऽथ **मृगावती** ॥१११॥
अनुशिष्याऽथ नाथेन **मृगावत्यादयो**ऽर्पिताः । **चन्दनायास्ततो** जज्ञुः सामाचारी क्रमादिमाः ॥११२॥

**इति 'या सा सा सा' कथानकम् ॥**

अथ पल्लीपतिकथाप्रस्तावप्राप्तम् अपराधक्षामणामुपदेष्टुं **मृगावती**मेव दृष्टान्तं करोति । तत्र पूर्वं कथैव कथ्यते-

**[ मृगावतीकथानकम् ॥ ]**

विजहार **महावीर**स्ततो भवदवाकुलम् । तर्पयन् सुकृताख्यानसुधाभिर्वसुधातलम् ॥१॥

---

१. साधु - P । २. पुनः P । ३. ताडयन्ति - C । ४. नुज्ञाय - C, A, KH ।

पुनः पुनानो गतिभिर्जगतीं जगतां गुरुः । कदाचिदेत्य **कौशाम्बी**मारामे समवासरत् ॥२॥
ततस्तृतीयपौरुष्यां दिवाकरनिशाकरौ । समं स्वस्वविमानाभ्यां जिनेन्दुं नन्तुमीयतुः ॥३॥
तौ विनम्य जिनाधीशं समुपाविशतां पुरः । सुधोर्मिमधुरं[१] पातुः पातुकामौ वचः शुचि ॥४॥
रवेर्विमानतेजोभिः पूरिते परितोऽम्बरे । न कोपि रात्रेः समयं[२] समायान्तमबुध्यत ॥५॥
कालं विचिन्त्य चै[1]तन्याच्चन्दना तु प्रवर्तिनी । स्वमाश्रयमगान्नाऽऽगात् दिनभ्रान्त्या **मृगावती** ॥६॥
तयोश्च गतयोर्नत्वा जिनं दिननिशाकृतोः । अकस्मात्कश्मलीभूतसर्वाशाऽजनि शर्वरी ॥७॥
मत्वा कालविलम्बं तं सत्यशीला **मृगावती** । स्वमाश्रयं गतवती भीतभीता द्रुतं द्रुतम् ॥८॥
तां वीक्ष्य चन्दनाऽवोचच्चारुशीले ! **मृगावति** ! । युक्तं नक्तं बहिः स्थातुं किमुज्ज्वलकुले ! तव ? ॥९॥
अचैतन्यादिदं जज्ञे स्खलितं क्षम्यतां मम । इदं वदन्ती पदयो**श्चन्दना**याः पपात सा ॥१०॥
तस्यां चरणलग्नायां संवाहनकलाजुषि । आसदच्**चन्दना** निद्रां तदा संस्तरणस्थिता ॥११॥
कालातिचारदोषेण स्वं निन्दन्ती **मृगावती** । तदाप केवलज्ञानं घातिकर्मौघघातिनी ॥१२॥
उद्दधार धरापीठे विलुठन्तं मृगावती । तदानीं सुखसुप्ताया**श्चन्दना**याः कराम्बुजम् ॥१३॥
प्रबुध्य **चन्दना**ऽवोचत् किमचालि करो मम । जगौ **मृगावती** भीमभुजङ्गमभयादिति ॥१४॥
आचष्ट **चन्दना** दृष्टस्[2]तते ध्वान्ते कथं फणी । दीप्तेन केवलज्ञानदीपेनेति जगाद सा ॥१५॥
केवल्याशातनीं धिग् मामित्यारब्धस्वनिन्दना । **चन्दना**ऽप्यासदत्सद्यः केवलज्ञानसम्पदम् ॥१६॥

**इति मृगावतीकथानकम् ॥**

तथा च सूत्रम्–

**पडिवज्जिऊण दोसे, नियए सम्मं च पायवडियाए ।**
**तो किर मिगावईए, उप्पन्नं केवलं नाणं ॥३४॥**

**प्रतिपद्य** अनुमन्य **दोषान् निजकान् सम्यक्त्रि**करणशुद्ध्या **च**शब्दादपुनःकरणाङ्गीकारपूर्वं **पादपतितायाः** गुरोरात्मनिवेदनार्थं चरणप्रणतायाः, **ततः किले**ति परोक्षाप्तोपदेशसूचकः, **मृगावत्या उत्पन्नं केवलज्ञान**मिति गाथार्थः ॥३४॥ छद्मस्थानामपि कषायजयो गुणायैवेत्याह–

**किं सक्का वोत्तुं जे, सरागधम्मम्मि कोइ अकसाओ ।**
**जो पुण धरेज्ज धणियं, दुव्वयणुज्जालिए स मुणी ॥३५॥**

**किं सक्क** त्ति प्राकृतत्वात् शक्यं; **वक्तुं जे** त्ति वाक्यार्थकर्मत्ववाचको यदित्यर्थः, तेन यत् **सरागधर्मे** सकषायसंयमे **को**ऽ**प्यकषायो**ऽविद्यमानकषाय इति **यः पुनः** कश्चिन्महात्मा **धारयेदनु**दयोदयप्राप्तवैफल्याभ्यां

---

१. जैनं - B, A । २. समायात - C ।

टि. 1. उपयोगात् । 2. तते ध्वान्ते-गाढान्धकारे ।

निगृह्णीयात्, **धणियं** अत्यर्थं **दुर्वचनोज्ज्वालितान्** दुःश्रववाक्योद्दीपितान् कषायान् **स मुनिर्यथावस्थितं** मोक्षकारणं प्रस्तावान्निष्कषायत्वरूपं तत्त्वं मन्यत इति कृत्वा, निष्कषाय एव स इत्यभिप्रायः ॥३५॥

अथ किं कषायनिग्रहे महान् यत्न इति तद्दोषमाह—

**कडुयकसायतरूणं, पुप्फं च फलं च दो वि विरसाइं ।**
**पुप्फेण झाइ कुविओ, फलेण पावं समायरइ ॥३६॥**

कटुकाः संयमसुखभङ्गहेतुत्वात् दुःखदाः ते च कषायाश्च, त एव **तरवः**, स्वोत्तरप्रकृतिरूपशाखादिमत्त्वात् **कटुककषायतरूणां पुष्पं च फलं च द्वे अपि विरसे**, संयमजीवितापेक्षया विरुद्धपरिणामे । पुष्पफलस्वरूपं क्रोधमधिकृत्योदाहरति-**पुष्पेण** हेतुना **ध्यायति कुपित**स्ततो ध्यात्वा, **फलेन** हेतुना **पापं** दुर्वचनभाषणताडनादिकं **समाचरति** । क्रोधोदाहरणेन च सर्वकषायाणाम् उदयः पुष्पम्, उदयनिमित्तो व्यापारः फलमिति ज्ञातव्यम् ॥३६॥

कषायनिग्रहश्च विषयपरित्यागमूलः, स च कस्यचिदेव सुकरो, न सर्वस्येति दृष्टान्तेनाह—

**संते वि को वि उज्झइ, को वि असंते वि अहिलसइ भोए ।**
**चयइ परपच्चएण वि, पभवो दट्ठूण जह जंबुं ॥३७॥**

भुज्यन्त इति भोगाः शब्दादयस्तान् **सतोऽपि** विद्यमानानपि, **कोऽपि** जम्बूस्वाम्यादिर्विवेकी **उज्झति** त्यजति, **कोऽपि** प्रभवादिरविवेकी **असतोऽपि अभिलषति** वाञ्छति **भोगान्** तथा कश्चिदित्यनुवर्त्तते **त्यजति परप्रत्ययेनापि** किं तदित्याह **प्रभवो दृष्ट्वा जम्बुमिति** समासार्थः । व्यासार्थस्तु शतोपरि त्रिपञ्चाशत्तमगाथायां **'रूवेण जोव्वणय'** इत्यत्राभिधास्यते ॥३७॥

ननु कथमेवं क्रूरकर्मा प्रभवः प्रतिबुद्ध ? उच्यते—धर्ममाहात्म्यात्, तथा चाह—

**दीसंति परमघोरा वि, पवरधम्मप्पभावपडिबुद्धा ।**
**जह सो चिलाइपुत्तो, पडिबुद्धो सुंसुमाणाए ॥३८॥**

**दृश्यन्ते परमघोरा अपि** अतिशयरौद्रा अपि सत्त्वा इति गम्यते, **प्रवरधर्मप्रभावप्रतिबुद्धा**स्तीर्थकरोपदिष्टतया प्रधानधर्मस्य माहात्म्येन मिथ्यात्वनिद्रापगमादवगततत्त्वा उपलभ्यन्त इत्यर्थः[१] । अत्र दृष्टान्तमाह—**यथा स चिलातीपुत्रः प्रतिबुद्धः सुंसुमाज्ञाते** सुंसुमोदाहरणे इत्यक्षरार्थः ॥३८॥

भावार्थस्तु कथायाम् । तथाहि—

## [ चिलातीपुत्रकथानकम् ॥ ]

**क्षितिप्रतिष्ठे** ज्ञंमन्यो **यज्ञदेवः** पुरे द्विजः । जिनानामसृजन्निन्दां संसारतरुसारणिम् ॥१॥
शिष्यभावं जितो जेतुर्यास्यतीति प्रतिज्ञया । क्षुल्लकेन स केनाऽपि वादायाऽवादि धीमता ॥२॥
आनीय निग्रहस्थानं क्षुल्लकेन विवादिना । द्विजो विजित्य प्रव्रज्यां ग्राहितः प्राक्प्रतिज्ञया ॥३॥

---

१. इत्याह - P ।

सोऽथ शासनदेव्येदमुक्तश्चारित्रमस्ति ते । ज्ञानश्रद्धानवानेधि **किमक्ष्णा तरणिं विना** ॥४॥

तदादि च विमुच्यैकमलं मलपरीषहम् । चारित्रं निरतीचारमपालयदयं द्विजः ॥५॥

संसर्गादपि कस्तस्य न भेजे वीतरागताम् । बीजपूररसस्येव सङ्गात् कौसुम्भमंशुकम् ॥६॥

वाक्यैर्विशुद्धैरप्यस्य न तु रागं प्रियाऽमुचत् । आरक्ता कम्बली धाराभृतो धाराभरैरिव ॥७॥

सा तस्य वश्यतां कर्तुं पारणे कार्मणं ददौ । **दहत्यरक्ता रक्तापि वह्निकीलेव कामिनी** ॥८॥

ग्रीष्मेणेव लताकुञ्जः कार्मणेन क्रमेण सः । क्लिश्यमानतनुस्तेन प्रपेदे त्रिदिवालयम् ॥९॥

तद्दुःखेन व्रतं प्राप्य साप्यथ त्रिदिवं ययौ । पतिव्यसनजं पापं किन्तु नाऽऽलोचितं तया ॥१०॥

च्युत्वाऽथ **यज्ञदेव**स्य जीवो **राजगृहे** पुरे । **चिलात्या धन**सार्थेशदासिकायाः सुतोऽभवत् ॥११॥

च्युत्वा च **यज्ञदेव**स्त्रीजीवः पञ्चसुतानु । **धन**प्रियाया **भद्रायाः** सुताऽभूत् **संसुमा**ह्वया ॥१२॥

**धनेन संसुमा**ख्याया दुहितुर्विहितः स तु । **चिलातीतन**यस्तस्या बाललालनकर्म्मणि ॥१३॥

तमन्यायकरं लोके **धनो** भूमिपतेर्भयात् । दण्ड्यो भृत्यापराधेषु स्वामीति निरकासयत् ॥१४॥

**चिलातीसूनु**रगमत्ततः **सिंहगुहा**भिधाम् । भिल्लपल्लीमसौ मल्लीमालामिव मधुव्रतः ॥१५॥

मृते चौरपतौ चौरपतिश्चौरैरयं कृतः । पातकी स शिरःकम्पं स्तूयमानगुणो मुदा ॥१६॥

[1]विषमास्त्रमहावीरविहारभरहारिणि । स्थितः पल्लिवने सोऽथ यौवने **संसुमा** पुनः ॥१७॥

स्वानूचेऽसौ **धना**ख्योऽस्ति श्रेष्ठी **राजगृहे** पुरे । तद्गृहेऽस्त्यद्भुता लक्ष्मीः **संसुमा** च कुमारिका ॥१८॥

तद्धनं भवतां भूरि ममैका **संसुमा** पुनः । इति व्यवस्थया तेऽमी जग्मुर्निशि **धनौ**कसि ॥१९॥

पञ्चभिः सूनुभिः साकं गेहे गेही तदा[१]कुले । तस्थौ निलीय मोहार्त्ते देहे देहीन्द्रियैरिव ॥२०॥

आत्तवित्तः समं चौरैः समादायाऽथ संसुमाम् । भयद्रुतमनःस्पर्द्धी चैलातेयः [२]पलायत ॥२१॥

पुरीरक्षानथाहूय दूयमानमना धनः । ऊचे धनानि वः पुत्री मम यामोऽनु तस्करान् ॥२२॥

इत्थं व्यवस्थया श्रेष्ठी साऽऽयुधैः सह सूनुभिः । पुररक्षान् पुरस्कृत्य सत्वरान् सत्वरोऽचलत् ॥२३॥

सुप्तमत्राऽत्र भुक्तं तैरिति पान्थजनोक्तिभिः । चौरान् हस्तगतानेव मेनिरेऽन्वेषिणो नराः ॥२४॥

दृष्ट्वाऽथ तान् हत हत लात लातेतिभाषिणः । हर्षानुविद्धयाऽधावंस्ते रक्षापुरुषा रुषा ॥२५॥

त्यक्त्वा लोप्त्राणि धावद्भ्यः श्वभ्योऽन्नानीव तस्कराः । महाटवीं प्रविश्याऽमी कामं जग्मुरितस्ततः ॥२६॥

तत्त्यक्तलोप्त्राण्यादाय व्यावृत्तं पुररक्षकैः । **न कस्यापि कृतार्थस्य परार्थे रमते मतिः** ॥२७॥

स्कन्ध एव वहन् कन्यां **चैलातेय**स्तु सत्वरः । प्रविवेश महारण्यं स्मृतविन्ध्य इव द्विपः ॥२८॥

---

१. कुलैः L । २. पलायितः - A, पलायतः D ।

टि. 1 विषमाणि अस्त्राणि यस्य स विषमास्त्र, स चासौ महावीरश्च इति –पल्लिवने' अन्वयपक्षे विग्रहः कार्यः । विषमास्त्र कामदेवः, स चासौ महावीरश्च इति 'यौवने' अन्वयपक्षे विग्रहः कार्यः ।

श्रेष्ठी च पञ्च पुत्राश्च तां कन्यामेव तद्गताम् । इन्द्रियाणि च चित्तं च जीवितव्यमिवाऽन्वगुः ॥२९॥
प्रत्यासीदत्यथ धने दुर्विदग्धः स दग्धधीः । मा भून्ममाऽसौ माऽस्येति **सुंसुमा**यः शिरोऽलुनात् ॥३०॥
दुरात्माकृष्टखड्गोऽयं स्राक् सर्पन् नरकाध्वगः । हस्ते सशम्बलग्रन्थिरिव तन्मौलिना बभौ ॥३१॥
करस्थं रागतः पश्यन् **सुंसुमा**या मुहुर्मुखम् । सोऽथ वेगाद्दिशं याम्यामविज्ञातश्रमोऽगमत् ॥३२॥
पुत्रैः सह रुदन् पुत्र्याः कबन्धसविधे[1] धनः । अनग्निनि वने बाष्पैर्जलाग्निमिव दत्तवान् ॥३३॥
मध्यंदिनदिनाधीशकराऽऽलिविकरालितः । स्वं वीक्ष्याऽथ गतं [१]कालकवले ववले धनः ॥३४॥
क्षुत्तृष्णा-श्रम-शोकाऽर्कतापैः पञ्चभिरुच्चकैः । अयं [२]पपात पञ्चत्वगतंमन्यो महाटवीम् ॥३५॥
वित्तनाश-सुतामृत्युतादृशव्यसनातुरः । धनो [३]दुःखनिधिं निन्दन् विधिमाप गृहं चिरात् ॥३६॥
अप्रेमवैरो वैराग्यात्ततः श्री**वीर**सन्निधौ । व्रतं धृत्वा तपस्तप्त्वा पूर्णायुर्द्यां ययौ **धनः** ॥३७॥
**चैलातेयो**ऽपि तेनाऽनुतप्तः किञ्चित्स्वकर्मणा । पथि गच्छन् मुनिं कञ्चित् कायोत्सर्गस्थमैक्षत ॥३८॥
चौरस्तमूचे संक्षेपाद्धर्ममाख्याहि मे मुने ! । अथवाऽहं तवाप्येवं छेत्स्याम्येवाऽसिना शिरः ॥३९॥
तं दुष्कर्मरजःपात्रं क्षेत्रं चारित्रकर्षुकः । प्रबोधिबीजवापाय योग्यं मत्वा जगौ मुनिः ॥४०॥
सदाप्युपशमः कार्यो विवेकः संवरोऽपि च । त्रयोऽमी चित्तवाक्कायकृतपातकघातकाः ॥४१॥
इत्युक्त्वाऽस्मिन् मुनौ याते तदाऽऽदिष्टानि मन्त्रवत् । पदानि ध्यायतस्तस्याऽर्थोल्लेखोऽभवदीदृशः ॥४२॥
कारणेऽपि क्रुधादीनामक्रियोपशमो मतः । हेयोपादेययोर्ज्ञानं विवेक इति विश्रुतः ॥४३॥
मुहुरुत्प्लवमानानां काममिन्द्रियचेतसाम् । यत्संवरणनिर्माणं बोद्धव्यः संवरश्च सः ॥४४॥
तदेतदपरिज्ञानात् क्रोधादिभिरभिद्रुतः । आनीतो नरकासन्नामियतीं भूमिकामहम् ॥४५॥
तदिदानीमुपशमप्रमुखैरौषधैरिव । चिकित्साम्यात्मनो रोगानिव [2][४]रोषादिमानिमान् ॥४६॥
इत्थं पदार्थमत्यर्थभावनो भावयन्नयम् । रुद्धाखिलेन्द्रियो जज्ञे मनोमात्रैकचेतनः ॥४७॥
[3]कुशीमुख्योऽथ गन्धेनाऽसृजः प्राप्ताः [4]पुरेऽसृजन् । पदप्रवेशतो दस्युवदस्यार्त्तिं पिपीलिकाः ॥४८॥
अश्रान्तं कीटिकाकोटिच्छिद्रितं तद्वपुर्बभौ । चालनीव महाकर्मतुषत्यागार्थमात्मनः ॥४९॥
टङ्कास्यैः कीटिकाकूटैः कीर्यमाणोपि निश्चलः । दिव्यं सार्द्धाहयुग्मेन पदं स्तम्भ इवाऽऽप सः ॥५०॥

**इति चिलातीपुत्र[५]कथानकम् ॥**

---

१. कालंकेवले - P । २. प्रापत - C । ३. दुःखनिधिर्नि - B, C, K । ४. रागादि - KH, C । ५. त्राख्यान... C ।

टि. 1. सविध(त्रि०) - समीपे । 2. रोषः आदिमः येषां ते रोषादिमाः, तान् । 3. कुशी - अयोमयः तीक्ष्णसाधनविशेषः तस्य इव मुखं यस्याः सा कुशीमुखी, ताः । 4. नगरे पक्षे शरीरे ।

धर्मप्रभावादपि प्रतिबुद्धस्य **चिलातीपुत्र**स्येदृग्दुर्वहप्रतिज्ञानिर्वाहः शक्यत इति कथं मन्यामहे ? उच्यते, साहसिक[१]सत्त्वानां न किमप्यशक्यमिति, दृष्टान्तेनाह–

**पुप्फियफलिय तह पिउघरम्मि तण्हा छुहा समणुबद्धा ।**
**ढंढेण तहा विसढा, विसढा जह सफला जाया ॥३९॥**

पुष्पितं-भोगाख्यफलापेक्षया सञ्जाततत्कारणकुसुमरूपसमग्रविषयसामग्रीकं, न पुनः [1]षिङ्गभवनमिवोत्पन्नभक्षीति, तच्च कृपणधनिभवनमपि सम्भाव्यते, अतः फलितं-समन्ततो व्यापार्यमाणविषयोपभोगं, पुष्पितं च फलितं चेति विग्रहः तस्मिन् **पुष्पितफलिते । तथेति** प्रसिद्धिसूचकः, **पितृगृहे** कृष्णभवने, **तृष्णा** पिपासा **क्षुधा** बुभुक्षा **समनुबद्धा** सन्तता [२]**ढण्ढेण** ढण्ढाख्यऋषिणा **तथा** तेनाऽलाभपरीषहातिसहनप्रकारेण, [३]**विशठा** शाठ्यरहिता भावसारं न कपटतो **विषोढा** [४]तितिक्षिता, **यथा सफला** कर्मक्षया[५]ख्यफलवती **जाते**ति समासार्थः ॥३९॥ व्यासार्थः कथानकगम्यस्तच्चेदम्–

**[ ढण्ढणकुमारकथानकम् ॥ ]**

**द्वारकायां हरेः** सूनु**र्ढण्ढणा**कुक्षिसम्भवः । **ढण्ढणा**ख्यो युवा राज्ञां कन्याः पर्यणयद्घनाः ॥१॥
**श्रीनेमि**तोऽन्यदा धर्मं स निशम्य शुभाशयः । अगृह्णीत व्रतं विष्णुकृतनिष्क्रमणोत्सवः ॥२॥
विहृत्य स्वामिना साकं द्वारकां पुनरीयुषः । कदाचिदुदगादुच्चैः कर्म तस्यान्त[६]रायिकम् ॥३॥
यत्र यत्राऽगमत् किञ्चित् तत्र तत्राऽऽसदन्न सः । साधवस्तेन सार्द्धं ये जग्मुस्तेऽपि तथैव हि ॥४॥
श्रीने**मिं** मुनयः सर्वे विज्ञा व्यज्ञपयन्नथ । श्रीसर्वज्ञस्य शिष्योऽपि विष्णुजन्मापि **ढण्ढणः** ॥५॥
पूर्यां समृद्धश्रद्धानिदानिपुंवर्ययुज्यपि । भिक्षामप्येष नाप्नोति किं निमित्तमिह प्रभो ! ॥६॥ युग्मम् ॥
प्रभुराह पुरा जज्ञे द्विजो राजनियोगवान् । **धान्यपुरा**भिधे ग्रामे **मगधेषु परासरः** ॥७॥
कदाचिदेष ग्रामीणैः क्ष्मापक्षेत्राण्यवापयत् । भोजनेऽप्यागतेऽमुञ्चत् भोजनाय न खेटकान् ॥८॥
श्रान्तैः क्षुधातृषाक्रान्तैः खेटकैश्च वृषैश्च सः । बलात् प्रत्येकमेकैकां क्षेत्रे सीतामकर्षयत् ॥९॥
सोऽथ मृत्वा भवान् भूरीन् भ्रान्त्वाऽयं ढण्ढणोऽभवत् । तच्चान्तरायिकं कर्म प्रोदगादस्य सम्प्रति ॥१०॥
इति श्रुत्वाऽऽप्तसंवेगः स्वाम्यग्रे **ढण्ढण**स्तदा । जग्राह परलब्ध्याऽहं नाहरामीत्यभिग्रहम् ॥११॥
महत्तरं तरन्नब्धिमिवाऽलब्धिपरीषहम् । पर[७]लब्धिमभुञ्जानो निन्ये कालं कमप्यसौ ॥१२॥
को दुष्करकरः स्वामिन् ! मध्येऽमीषां तपस्विनाम् । इत्यन्यदा **गदापाणि**पृष्टः प्रभुरिदं जगौ ॥१३॥
कुर्वन्ति दुष्करं सर्वे किं ब्रूमो **ढण्ढण**स्य तु । इयत्कालमलाभाख्यं योऽसहिष्ट परीषहम् ॥१४॥
प्रणिपत्याथ तीर्थेशं केशवः प्रविशन् पुरीम् । परिभ्रमन्तं भिक्षार्थमृषिमैक्षिष्ट ढण्ढणम् ॥१५॥

---

१. सात्विकानां - KH, C, A । २. ढंढणेन ढंढणाख्या.... - P । ३. विसढा 'विषमे ढोवेति' प्राकृतलक्षणाद्विषमा दुस्सहा विषोढा - C । ४. तितिक्षता - P, A, KH, B । ५. ख्यप्रधानफलवती - C । ६. रीयकं - P । ७. लाभम - P ।

टि. 1. षिङ्गस्य विटस्य भवनं सञ्चितसामग्रीकं न भवति किन्तु प्रतिदिनं यद् उत्पद्यते तदेव भक्षयतीत्यर्थः ।

उत्तीर्य सिन्धुराद्भक्त्या तं साधुं माधवोऽनमत् । तद्वीक्ष्यैको वणिग् दध्यौ धन्यो योऽवन्दि विष्णुना ॥१६॥
तस्यैव वणिजो गेहं स भ्रमन्नगमन्मुनिः । प्रत्यलाभि ततस्तेन बहुमानेन मोदकैः ॥१७॥
स मुनिर्जिनमागत्य प्रणिपत्य व्यजिज्ञपत् । किं तत् कर्म मम क्षीणं ? प्रभो ! यद् भैक्षमासदम् ?[1] ॥१८॥
जिनोऽभ्यधित लब्धिस्ते नेयं लब्धिरियं हरेः । हरिणा प्रणतोऽसीति वणिजा प्रतिलाभितः ॥१९॥
तां भिक्षां परलाभत्वात् परिष्ठापयितुं ततः । रागादिरिक्तः प्रारेभे **ढण्ढणः** स्थण्डिलावनौ ॥२०॥
**दुःक्षयाणि पुराणानि कर्माणि प्राणिनामहो** । इति स्थिरतरध्यान एव केवलमाप सः ॥२१॥
ततः प्रदक्षिणीकृत्य स **ढण्ढण**मुनिर्जिनम् । उपाविशत् पूज्यमानो देवैः केवलिपर्षदि ॥२२॥

**इति ढण्ढणकुमारकथानकम्** ॥ [ग्रन्थाग्रम् - ३३८५]

इह चाहाराप्रतिबन्ध उक्तः [2]तदधिकारात्सर्वविषयमप्रतिबन्धमुपदिशति—

**आहारेसु सुहेसु अ, रम्मावसहेसु काणणेसुं च ।**
**साहूण नाहिगारो, अहिगारो धम्मकज्जेसु ॥४०॥**

**आहारेषु शुभेषु** मनोज्ञरसादिमत्सु **च**शब्दाद् वस्त्रपात्रादिदण्डकपुस्तकादिषु, च औधिकौपग्रहिकोपकरणेषु **रम्यावसथेषु** रमणीयोपाश्रयेषु, **काननेषु** विचित्रोद्यानेषु, **साधूनां नाधिकारो** न नियोगः प्रतिबन्धं कर्तुमिति गम्यं तर्हि क्वाधिकारः ? इत्याह—**अधिकारो धर्मकार्येषु** तपोनुष्ठानादिषु आहारादिग्रहणस्यापि तन्मात्रफलत्वात् ॥४०॥

सामान्यविषयप्रतिबन्धमुक्त्वा आपत्स्वपि शक्तिमतां तमाह—

**साहू कंतार-महाभएसु अवि जणवए वि( व ) मुइअम्मि ।**
**अवि ते सरीरपीडं, सहंति न लयंति य विरुद्धं ॥४१॥**

अत्र इहलोकनिरपेक्षतया मोक्षार्थसाधकत्वात् **साधवो** निरपेक्षयतिधर्मानुष्ठायिनः ते **कान्तार-महाभययोरपि** दुर्भिक्षाटव्यादिराजविड्वरादिकयोरपि, **जनपद इव मुदिते** [3]अत्रेवशब्दो जनपद-मुदितशब्दयोरन्तर्वर्त्तमानः प्रत्येकं योज्यते, तेन यथासङ्ख्यं कान्तारेऽपि जनपदेषु इव, महाभयेऽपि च मुदिते इव तदव्यभिचारित्वात् निर्भये इव वर्त्तमाना **अपि** सम्भाव्यते एतत् **ते** भगवन्तः **शरीरपीडां सहन्ते** तितिक्षन्ते । **न लान्ति तु** न गृह्णन्ति, पुन**र्विरुद्धं** संयमप्रत्यर्थि अनेषणीयभक्तपानफलादिकं वेषत्यागक्रोध[4]प्रहारदानादिकं चेति । अत्र च 'शरीरपीडां सहन्ते' इति वचनात् मानसपीडासद्भावे अपवादपदेन यतनया विरुद्धमपि गृह्णतां भगवदाज्ञाऽनतिक्रमेणाऽविरुद्धत्वात् न दोष इत्युक्तं भवति ॥४१॥

एतेनाऽऽपत्स्वपि दृढधर्मता उक्ता । तामेव तदनुष्ठायकस्तुतिद्वारेणोपदिशति—

**जंतेहिं पीलिया वि हु, खंदगसीसा न चेव परिकुविया ।**
**विइयपरमत्थसारा, खमंति जे पंडिया हुंति ॥४२॥**

---

१. भैक्ष्य - KH, C । २. तदधिकेच्छोरालयविषय.... - C । ३. अत्रैव-P, C, B । ४. प्रतिहार - P, प्रतिप्रहार - D, KH ।

**यन्त्रैः पीडिता अपि** हुर्विस्मये अहो **स्कन्दकशिष्याः** स्कन्दकाचार्यस्य विनेया **न चेव** त्ति नैव, **परिकुपिताः** परिक्रुद्धाः, चशब्दात् कृपार्द्रचित्ताश्च बभूवुः उपसर्गकारिणं प्रतीति गम्यम् । विशेषणद्वारेणात्र हेतुमाह - **विदितो** ज्ञातः **परमार्थस्य** चतुर्थपुरुषार्थस्य हेतुभूततया उपशम एव **सारो** रहस्यं यैस्ते तथाभूताः । **क्षमन्ते** किं ? **ये पण्डिता भवन्ति** । यत्तदोर्नित्याभिसम्बन्धादेवं योजनेति गाथार्थो ॥४२॥

भावार्थः सम्प्रदायगम्यः, स चायम्—

**[ स्कन्दकाचार्यशिष्यकथानकम् ॥ ]**

असावस्तीह नगरी **श्रावस्ती**ति गरीयसी । **जितशत्रु**रभूत्तत्र **धारिणी**जानिरीशिता ॥१॥
जीवाजीवादितत्त्वज्ञः सर्वज्ञागमपारगः । स राजेन्दुर्यथा तद्वत् तत्पुत्रः **स्कन्दको**ऽप्यभूत् ॥२॥
**पुरन्दरयशा**नाम कुमार**स्कन्दका**नुजा । राज्ञा **दण्डकि**नोदूढा **कुम्भकारकटे** पुरे ॥३॥
राजकार्येण केनाऽपि दण्डके राज्ञ आज्ञया । द्विजातिः **पालको**ऽमात्यः **श्रावस्तीं** पुरमागतः ॥४॥
वेत्रिणा वेदितस्तत्र **जितशत्रु**नृपस्य सः । प्रविश्याऽऽस्थानमानम्य नृपमासनमासदत् ॥५॥
[1]समुदास [2]मुदाचारं प्रतीष्य प्राभृतैः सह । जामातुः कुशलं पृष्ट्वा राज्ञा गौरवितोऽथ सः ॥६॥
अन्यदाऽऽसौ नृपाऽऽस्थाने धर्मकर्मण्यरुन्तुदम् । ब्रुवन् [3]विप्रब्रुवः प्रोचे स्कन्दकेण मनीषिणा ॥७॥
मुक्तेऽष्टादशभिर्दोषैः केवलज्ञानशालिनि । धर्मतीर्थकरे देवे देवानामधिदैवते ॥८॥
गुरौ तदुक्तमार्गस्थे धर्मे तद्देशितेऽथवा । विसंवदन्ति ये मर्त्याः पशूनां संवदन्ति ते ॥९॥ युग्मम् ॥
तत्त्वत्रयप्रतिष्ठानप्रामाणिकगिरेति सः । अनेकान्तविदा चक्रे कुमारेण निरुत्तरः ॥१०॥
गम्भीरमत्सराध्मातो निःस्निग्धवदनस्मितः । तुष्टुवे संवृताकारः कुमारं किल वाग्मिनम् ॥११॥
स्वराज्यं तत्र यातेऽथ स्कन्दको नृपनन्दनः । बाल्यान्निर्मलवैराग्यश्चिन्तयामासिवानिति ॥१२॥
मूर्च्छाहेतुर्विषं भोगाः संसारश्चारकस्तथा । धिक् तथापि विरज्यन्ते न हि मोहेन देहिनः ॥१३॥
सदेति चिन्तयन् पुण्यैः प्राप्ते **श्रीसुव्रते** जिने । पञ्चशत्या सहायानां सहाऽयं व्रतमग्रहीत् ॥१४॥
क्रमेणाधीतसिद्धान्तः प्राप्तसूरिपदो जिनम् । **कुम्भकारकटे** गन्तुं सोऽपृच्छद् भवितव्यतः ॥१५॥
प्राणान्तिकोऽन्तरायस्ते तत्रेत्यादिशति प्रभौ । सोऽब्रवीत्तत्र किं नाथ ! वयमाराधका न वा ॥१६॥
त्वां विनेति जिनेनोक्तेऽवोचन्नियतियन्त्रितः । मयाऽऽप्तमियता किं न सर्वेऽप्याराधका इमे ॥१७॥
आचार्यः स विचार्येति कुम्भकारकटेऽगमत् । **अवश्यम्भाविभावाऽसौ नियतिर्नातिलङ्घ्यते** ॥१८॥
[१]समायान्तं स मायावी तं श्रुत्वा तत्र पालकः । प्राग्भूरिमत्सरक्रूरहृदयो निर्दयोऽधमः ॥१९॥

---

१. समायातं - KH ।

टि. 1. सम्+उद्+आस्-परोक्षारूपः, स्थितः इत्यर्थः । 2. मुद् अभिव्यक्त्यै कृतमाचारम् इति मुदाचारम् । 3. अधमविप्रः ।

संयतस्थानयोग्येषु पुण्योद्यानेषु सर्वशः । आयुधानि [१]न्यधाद् गूढं गुप्तैराप्ततरैर्नरैः ॥२०॥ युग्मम् ॥
अथ क्रमेण तत्राप्तः सूरि**स्कन्दक**वन्दकः । सद्धर्मश्रुतिसन्तुष्टः प्रचण्डो **दण्डकि**र्नृपः ॥२१॥
स्वगोपिताऽऽयुधप्रेक्षाप्रत्ययापादितभ्रमः । हितेनेव हताशेन पालकेनोदितो रहः ॥२२॥ युग्मम् ॥
अयं देव ! च्युताचारस्तव राज्यं जिघृक्षति । सहस्रयोधिभिः पुंभिर्वृतः पाखण्डिभिर्भटैः ॥२३॥
मया सम्यग् निशम्येदमवेक्ष्य च परीक्षितम् । एवमेवेति निश्चित्य विज्ञप्तं ते हितेच्छुना ॥२४॥
अकृत्याय वशीकृत्य प्रेरितः **पालकेन** सः । **विप्रलब्धावकाशा हि विप्रलब्धाः पराःशताः** ॥२५॥
ऋजु[1]श्छित्त्वरितस्तेन [2]छित्त्वरेणेति **दण्डकिः** । ऊचे **पालक**मेवामुं निगृहाण निजेच्छया ॥२६॥
आरोप्य पश्यतः [3]सूरेर्दुर्यन्त्रे तिलपीडने । साधूनेकैकशः सर्वान् पीडयामास पालकः ॥२७॥
आराधनाधनास्ते तु **स्कन्दका**चार्यसन्निधौ । अन्तकृत्केवलीभावभाजो भेजुः शिवालयम् ॥२८॥
पञ्चशत्यां च पूर्णायां कनीयसि मुनौ पुनः । एकस्मिन् **पालका**ऽऽक्रान्ते जगाद **स्कन्दको** गुरुः ॥२९॥
मामनापीड्य बालं मे यन्त्रे क्षिपसि यत्पुरः । स्नेहो नेहोचितः किन्तु तन्मनोऽतिदुनोति नः ॥३०॥
महतीदं वधा[२]दाधिरस्याऽस्त्विति धियाऽधमः । यन्त्रे तमादराद् बालं रोपयामास पालकः ॥३१॥
आराधनां शिवपुरीवैजयन्तीमसावपि । कृती पुरो गुरोः प्राप पापभिन्निर्वृतिं ततः ॥३२॥
अथैतद्वधनिर्बन्धादुद्यत्क्रोधधनञ्जयः । प्राक् सूरिः स्वं तपोऽधाक्षीद् दिधक्षुः सनृपं पुरम् ॥३३॥
दग्धुं पुरं नृपं राज्यं पालकं च प्रजाश्च ताः । चक्रे निदानं स क्रोधनिदानं यन्त्रपीडितः ॥३४॥
धर्मध्वजं शकुनिका तस्य शोणितशोणितम् । सहस्रास्त्रभुजभ्रान्त्या रभसा नभसाऽनयत् ॥३५॥
अन्तःपुरोपरि त्यक्तं विलोक्य पतितं पुरः । **पुरन्दरयशो**देव्या प्रत्यभिज्ञातमेव तत् ॥३६॥
हा मद्दत्तमहारत्नकम्बलाग्रदशो गुरोः । धर्मध्वजः कुत इति पृष्टे ज्ञातं तया जनात् ॥३७॥
साऽवोचद् **दण्डकिं** देव ! तवागाधत्वमद्भुतम् । क्व गतं विप्रतीर्णोऽसि यदेवं दैववञ्चितः ॥३८॥
येषा[३]मशास्त्रकं शास्त्रं हिंसा धर्मो द्विजन्मनाम् । विश्वसन्तीह ये तेषां ते श्वसन्तीति कौतुकम् ॥३९॥
उत्तमस्तपसा भिक्षुर्भिक्षुर्मध्यो बुभुक्षितः । सर्वाधमस्तु धिग्जातिर्द्विजातिर्जातिभिक्षुकः ॥४०॥
स्यात् ब्राह्मण्यं गुणैरेव न जात्येति शठः पठन् । जातिभिक्षुरतिक्षुद्रः श्रयते [4]सूत्रकण्ठताम् ॥४१॥
लौकिकैः सूत्रकण्ठानां नाम संस्तूयते मृषा । [5]जनङ्गमानमी पापाश्चरितैरतिशेरते ॥४२॥
एते नट्या विटा धूर्त्ता दूताश्चौराश्चरास्तथा । नृशंसा निस्त्रपाः किं किं सूत्रकण्ठा न कुर्वते ॥४३॥
कुलमात्मा श्रियः श्रेयः सर्वमेकपदे त्वया । [6]श्वभ्राऽन्तर्भ्रान्तचित्तेन क्षिप्तं कर्मेति कुर्वता ॥४४॥

---

१. व्यधाद् - P । २. दायि - P । ३. मशास्त्रिकं - KH, मशास्त्रकं - B, L ।

टि. 1. छित्त्वरितः-छलितः । 2. छित्त्वरः-छलकः । 3. सूरिः-स्कन्दकाचार्यः तस्य । 4. (यज्ञ) सूत्रं कण्ठे येषां ते सूत्रकण्ठाः तेषां भावः सूत्रकण्ठता, ताम् । 5. जनङ्गमः-चण्डालः, तान् । 6. श्वभ्रं - नरकः ।

शोचन्तीमिति तां तत्र शासनस्याधिदेवता । निन्ये श्री**सुव्रत**स्यान्ते साऽपि तत्राऽऽप संयमम् ॥४५॥
**स्कन्दको**ऽपि समासाद्य [1]ज्वालाजिह्वकुमारताम् । प्रयुक्तावधिरभ्येत्य विरोधं क्रोधनः स्मरन् ॥४६॥
यन्त्रपीडानिदानोत्थज्वलज्ज्वलनलीलया । [१]सराष्ट्रं **दण्डकिं** दग्ध्वा **दण्डकारण्यमा**तनोत् ॥४७॥

**इति स्कन्दकाचार्यशिष्यकथानकम् ॥**

एवमेतदशेषसाधूनामपि निर्विशेषमनुष्ठानमुचितमुपदिशति–

**जिणवयणसुइसकण्णा, अवगयसंसारघोरपेयाला ।**
**बालाण खमंति जई, जइ त्ति किं इत्थ अच्छेरं ॥४३॥**

**जिनवचनस्य** कषायविपाकोपदर्शिनो वीतरागभाषितस्य **श्रुत्या** श्रवणेन **सकर्णाः** सार्थकश्रवणेन्द्रियाः तथा **अवगतः** परिज्ञातः **संसारस्य** भवप्रबन्धस्य **घोरो** रौद्रः **पेयाल** इति देशीभाषया परिणामोऽसार-विरसपर्यवसानतापर्यालोचनरूपो यैस्ते तथाविधा **बालानां** विवेकविकलप्राणिनां दुश्चेष्टितमिति गम्यम्, **क्षमन्ते** तितिक्षन्ते **यतयः** साधवो **यदि** इत्यभ्युपगमे, इत्येवं **स्कन्दकाचार्यशिष्यवत् किम् अत्रास्मिन्नर्थे आश्चर्यं** ? न किञ्चिच्चित्रं युक्तमेवैतदित्यर्थः ॥४३॥

अत्र च उग्रादिविशिष्टकुलोत्पन्ना एवैवंविधदुरनुचरतपश्चरणकारिणः स्युर्नेतरे इति कस्यचिदभिसन्धिः स्यात्, तं प्रत्युपदिशति–

**न कुलं एत्थ पहाणं, हरिएसबलस्स किं कुलं आसि ? ।**
**आकंपिया तवेणं, सुरा वि जं पज्जुवासंति ॥४४॥**

**न कुलं** पूज्यगोत्रादिकम्, **अत्र** धर्मविचारे प्रक्रान्ते, **प्रधानं** श्रेष्ठम् । अत्र दृष्टान्तेन युक्तिमाह– **हरिकेशबलस्य** मातङ्गजातीयस्य यते**र्बल**नाम्नः, **किं कुलमासीत्,** अस्पृश्यत्वान्न किञ्चिदित्यर्थः । यस्य किं सम्पन्नमित्याह—**आकम्पिता** हृतहृदयाः कृताः **तपसा**ऽष्टमादिना विकृष्टेन, **सुरा अपि** आसतां मनुष्या देवा अपि **यं बला**भिधानं मातङ्गर्षिं **पर्युपासते** कृताञ्जलयः सेवमाना निर्देशवर्त्तिनो भवन्तीति गाथार्थः ॥४४॥

अथ भावार्थाय कथा । तथाहि–

**[ हरिकेशबलर्षिकथानकम् ॥ ]**

**मथुरा**यां पुरा राजा **शङ्खो** राज्यं विहाय सः । निर्विण्णः कामभोगेभ्यो गुरोः पार्श्वेऽग्रहीद् व्रतम् ॥१॥
गीतार्थः स क्रमात् प्राप्तो भिक्षार्थं **हस्तिनापुरे** । पन्थानं विप्रमप्राक्षीत् **सोमदेवं** पुरोहितम् ॥२॥
तेन द्विष्टेन निर्दिष्टः पन्था [2]हौताशनोऽस्य यः । मुनीश्वरः स तेनाऽगादलङ्घ्येनाऽन्यदेहिनाम् ॥३॥
अथेर्यासमितेर्मार्गं तपोमहिमतो हिमम् । अतिक्रम्य मुनौ याते **सोमदेवो** व्यचिन्तयत् ॥४॥
'क्षमा सर्वस्वमेतन्मे नान्यस्ये'तीव[२]सन्धया । चारदिव्यमिवाध्वानं साधुः शुद्धोऽत्यगादहो ! ॥५॥

---

१. स राष्ट्रं दंडकेर्दग्ध्वा - D, C, K दंडिकेर्दग्ध्वा - KH । २. संज्ञया - C ।

टि. 1. अग्निकुमारदेवत्वम् । 2. हुताशनोऽग्निः यस्मिन् मार्गे इति हौताशनः पन्था ।

धिग् मामहृदयं क्रूरं मुधा जातिमदोद्धतम् । अमी अजिह्मब्रह्माणो ब्राह्मणा न तु मादृशाः ॥६॥
दृश्यो नमस्यः स्तुत्योऽयं वरिवस्यस्तपोनिधिः । ध्यात्वेति गत्वा तं नत्वा धर्मं श्रुत्वाऽग्रहीद् व्रतम् ॥७॥
ग्रहणासेवनारूपशिक्षाद्वितयपारगः । संयमं पालयामास मनाग् जातिमदोन्मनाः ॥८॥
सम्यगाराधनापूर्वं भावनापावनाशयः । काले मृत्वाऽभवद्देवो देवलोके महाद्युतिः ॥९॥
क्रमात्ततश्च्युतो नीचैर्गोत्रकर्मोदयादयम् । **गङ्गा**तटे **बलकोट्टहरिकेश**पतेः सुतः ॥१०॥
**बला**ख्यो दुर्भगः कालः कुरूपः कलहाङ्कुरः । **गौरी**नाम्नि कलत्रेऽभू[१]च्चूतस्वप्नेन सूचितः ॥११॥ युग्मम् ॥
स वसन्तोत्सवेऽन्येद्युर्वने क्रीडत्सु बन्धुषु । धिक्कृत्य कलहं कुर्वन् वृ[२]द्धैर्दूरेण हा[1] कृतः ॥१२॥
दूरे स्थितश्च सर्पन्तं सर्पं तत्र हतं जनैः । दीपकं चाहतं वीक्ष्य स दध्यौ कर्मलाघवात् ॥१३॥
**पराभूतिर्यथा दोषैरसतां निर्विशेषणा । गुणैरेवं प[2]रा भूतिर्विशिष्टा सुकृतात्मनाम् ॥१४॥**
**[3]वानेयं पुष्पमादेयं मलस्त्याज्योऽङ्गजोऽपि यत् । गुणाः सम्पत्तये तस्माद् दोषा एव विपत्तये ॥१५॥**
भावयन्निति साधुभ्यो धर्मं श्रुत्वातिनिर्मलम् । **हरिकेश**महर्षित्वं **बलः** कलयति स्म सः ॥१६॥
स षष्ठादिचतुर्मासक्षपणान्ततपःकृशः । **बलः** साधुक्रियाचारो ययौ **वाराणसीं** पुरीम् ॥१७॥
स तत्र **तिन्दुको**द्याने तपोराशिरवस्थितः । **ग्रन्थितिन्दुक**यक्षेण सेव्यमानो दिवानिशम् ॥१८॥
अन्यदाऽभ्येत्य मित्रेण यक्षेण ग्रन्थितिन्दुकः । मित्र ! किं दृश्यसे नेति पृष्टो मुनिमदर्शयत् ॥१९॥
ममाऽऽरामेऽपि सन्त्येते तेनेत्युक्ते नमश्चिकीः । यक्षेण सह सख्याऽगात् यक्षोऽपि **ग्रन्थितिन्दुकः** ॥२०॥
दृष्ट्वा तान् विकथासक्तान् द्वावपि [4]द्वापरोज्झितौ । अतिभक्तावभूतां तौ **हरिकेशबले** मुनौ ॥२१॥
राज्ञः **कौशलिक**स्यागात् पुत्री **वाराणसी**शितुः । **भद्रा**ख्याऽऽयतने तत्र यक्षमर्च्चितुमन्यदा ॥२२॥
अभ्यर्च्य चेटिकाचक्रपरीता यक्षदैवतम् । प्रदक्षिणं परीयन्ती बाला व्यालोक्य तं मुनिम् ॥२३॥
मलोर्मि[5]विस्रविस्रस्यच्चेलो दु[३]र्दर्शनो हहा । निष्ठीव्य कूणितघ्राणा जुगुप्सामिति साऽतनोत् ॥२४॥ युग्मम् ॥
यक्षेण कुपितेनाऽथ महर्षेः कुत्सया तया । अधिष्ठिताऽब्रवीद् **भद्रा** वैकल्यादसमञ्जसम् ॥२५॥
नीता कथञ्चिदावासे यावन्न स्वास्थ्यमाप सा । राज्ञस्तत्राज्ञया वैद्यमान्त्रिकास्तावदाययुः ॥२६॥
तेषामौषधमन्त्रादिक्रियास्तत्कर्मदूषणात् । अभवन्तोषरक्षोणिकृषिवत्तत्र निष्फलाः ॥२७॥
वैद्या निर्विद्य निर्विद्या[४]स्त्रासमन्त्राश्च मान्त्रिकाः । यदाऽभूवंस्तदा पात्रेऽवतीर्योवाच गुह्यकः ॥२८॥
महात्मा तपसांराशिर्ययाऽतिमदमत्तया । स तर्हि गर्हितः साधुः साऽधुना मुच्यते कथम् ॥२९॥
यद्यनेनैव पापेन **हरिणा** परिणाय्यते । तदा मुञ्चामि जीवन्तीं मुधाऽऽयासः परोऽखिलः ॥३०॥

---

१. भूद्धूतस्व...- H, A, B भूत्चूत...KH । २. वृद्धैःपूरेण- P । ३. दुर्दशनो... B । ४ स्त्राःसमंत्रा...- C । स्त्राश्चमंत्रा- D ।

टि. 1. हा (अव्य.) निन्दायाम् । 2. अतिशायिनी विभूतिः । 3. वनसम्बन्धिनं पुष्पं-वानेयं इत्यर्थः । 4. द्वापरः-संशयः ।
5. विस्रं-दुर्गन्धम् ।

तन्मेने नृपतिः पुत्री जीवत्वेवमपीत्यसौ । प्रैषीच्च सायमुद्वाहसामग्र्या तां स्वयंवराम् ॥३१॥
निपत्य पादयोः सापि प्रणिपत्य तपोनिधिम् । व्यजिज्ञपत्प्रभो ! पाणिं गृहाणाऽनुगृहाण माम् ॥३२॥
मुनिरूचे वयं सिद्धिवधूसम्बन्धकाङ्क्षिणः । तदसूयाभयात् नान्यवधूगन्धं सहामहे ॥३३॥
रूपं मुनेः पिधायाऽथ विधायाऽस्याऽऽकृतिं स्वयम् । [1]विडम्बनचिकीर्श्चक्रे तदुद्वाहं स गुह्यकः ॥३४॥
विडम्ब्य विविधं रात्रौ वटवासी चलन्मनाः । स्वच्छन्दं गच्छ मुक्ताऽसीत्यूचे राजसुतां स ताम् ॥३५॥
प्रातर्[2]मन्दाक्षमन्दाक्षी प्राप्ता पितृपदान्तिकम् । सेयं कस्योचितेत्येवं नृपः [3]स्मृतिविदो जगौ ॥३६॥
ऊचुस्ते ऋषिपत्न्येषा तेन त्यक्ता च साम्प्रतम् । दातु[१]मर्हाथ विप्रस्य विभ्रश्यत्कलु[२]षात्मनः ॥३७॥
नृदेवो **रुद्रदेवाय** तदैवात्मपुरोधसे । **भद्रां** ददौ यदौचित्यं नातिक्रामन्ति तद्विधाः ॥३८॥
**रुद्रदेवो**ऽन्यदा यज्ञं यजमानः स दीक्षितः । धर्मपत्न्या तया साकं नाकं मेने करस्थितम् ॥३९॥
तस्यैव यज्ञवाटे च मासक्षपणपारणे । भिक्षार्थं [३]यक्षसेव्योऽगात् बलः प्रौढतपोबलः ॥४०॥
तमालोक्य द्विजन्मानो जातिमानोन्मदास्तदा । ऊचुश्चट्टाश्च भोः कस्त्वं यज्ञवाटे प्रविष्टवान् ॥४१॥
यक्षो मुनिमथाऽऽविष्टः सावष्टम्भमुवाच तान् । साधुर्माधुकरीं भिक्षामाप्तुं प्राप्तोऽस्मि वो गृहान् ॥४२॥
एतज्जातिमतां वेदविदां हेतोरुपस्कृतम् । शूद्राय तुभ्यं दातव्यं नेत्यूचुर्बटवः स्फुटम् ॥४३॥
अहं हिंसानृतस्तेयपरिग्रहनिवृत्तधीः । ब्रह्मचारीसमस्तस्मान्मम धर्माय दीयताम् ॥४४॥
इत्युक्ते तेन तेऽवोचन् प्राक्देयं [4]पितृवह्निषु । ब्रह्मणे च ततो[४]ऽन्यस्मिन् वृथा तद्दत्तमन्यथा ॥४५॥
मुनिराह न युष्माकं हिंसाद्याश्रवसेविनाम् । अब्रह्मचारिणां सूत्रकण्ठानां ब्राह्मणस्थितिः ॥४६॥
अग्नौ हुतं भवेद्भस्म न भस्मापि द्विजे हुतम् । न्यायेनानेन वः सर्वं स्याद्भस्मनिहुतं हुतम् ॥४७॥
जन्मना नान्तरं किञ्चिद् ब्राह्मणस्यान्त्यजस्य च । कर्मणा ब्राह्मणत्वं चेज्जितं तर्हि तपोधनैः ॥४८॥
कर्मभिर्दिवि सम्पत्तिः कर्मभिर्नरके विपत् । जात्याद्याः क्वोपयुज्यन्ते सद्गतौ ते हि पङ्गवः ॥४९॥
सत्कर्मनिरतः शूद्रस्त्रैलोक्यस्यैति पूज्यताम् । असत्कर्मा द्विजन्मापि निन्द्यानामपि निन्द्यताम् ॥५०॥
मृतेषु तर्पणं श्राद्धं यन्मूढैरुपकल्प्यते । उच्छिद्य भस्मतां नीते तत्तरौ सेचनोपमम् ॥५१॥
भस्मीभूतस्य भूतस्य तृप्तिः श्राद्धाद्यथा भवेत् । कलत्रात् पुत्रजन्माऽपि तद्वदेव न तस्य किम् ॥५२॥
तदेवं सर्वमप्येतत् द्विजानां तुषखण्डनम् । आकाशचर्वणं पाथोमथनं चानुगच्छति ॥५३॥
तथ्यं न वेत्थ ब्राह्मण्यं यज्ञं स्नानं च बालिशाः । धिग् वो मूर्खान् मुधा वेदभारोद्वहनरासभान् ॥५४॥
तं निशम्याथ साक्रोशमुद्गीर्णलगुडादयः । तं हन्तुं हन्त धावन्तो गुह्यकेन हता द्विजाः ॥५५॥
वमन्तः शोणितं वक्त्रैर्निश्चेष्टाः पतिताः क्षितौ । चट्टाश्चक्रुस्तदाक्रन्दं **भद्रा**प्येत्य ददर्श तान् ॥५६॥

---

१. मर्हथ- C । २. षात्मना- P । ३. यज्ञदेवो.... KH । ४. स्मिन्नवृथादत्तमन्यथा- P । स्मिन्वृथातेदत्तमन्यथा- KH ।

टि. 1. विडम्बनं कर्तुमिच्छति इति क्विप् । 2. मन्दाक्षं-लज्जा, तेन मन्दं अक्षि यस्याः सा । 3. ब्राह्मणाः तान् । 4. अग्निहोतृभिः ब्राह्मणैः पूज्यमानाः पितृणां वह्नयः, तेषु ।

साऽप्युवाच ततः पापाः ! किमेद्विहितं ह हा । आक्रान्तः पावकः पद्भ्यां ताडितः शिरसा गिरिः ॥५७॥
तातदत्ताऽपि येनाहं तदा त्यक्ता महात्मना । ऋषिः स एष देवानां वन्द्यो घोरतपोभरः ॥५८॥
क्षमी क्रुध्यति नैवाऽयं क्रुद्धः केनैष सह्यते । यातैनं शरणं भक्त्या यद्यर्थो जीवितेन वः ॥५९॥
भक्त्या तमृषिमानम्य **रुद्रदेवः** समं द्विजैः । प्राञ्जलिः क्षमयामास क्षमयाऽऽध्यासितं[१] सदा ॥६०॥
प्रत्यलाभि च स प्रीतैः पटवो बटवोऽभवन् । प्रपञ्चितानि पञ्चापि दिव्यानि च तदामरैः ॥६१॥
पप्रच्छ **रुद्रदेवोऽथ** ब्रह्मर्षे ! वञ्चिता वयम् । सम्यग् ब्रह्मविदो यूयं ब्राह्मण्यं नास्ति नः क्वचित् ॥६२॥
को यज्ञः किञ्च वः स्नानं सामग्री कीदृशी तयोः । इदं ज्ञीप्सामि युष्मत्त इत्युक्ते मुनिरब्रवीत् ॥६३॥
**जीवो वेदी तपो ज्योतिर्योगाः स्रुगरणिर्वपुः । कर्माणि समिधो होमः शान्त्यै संयमसाधनः** ॥६४॥
**ह्रदः क्षान्त्यादिभिद्[1]धर्मो[२] ब्रह्म तीर्थमनाविलम् । मलो रागादिकः[३] स्नानं लेश्याशुद्धिरिहात्मनः[४]** ॥६५॥
होमेनानेन ये शान्ताः स्नानेनानेन निर्मलाः । भवन्ति योग्यास्ते सिद्धिवधूसम्बन्धसम्पदाम् ॥६६॥

**इति हरिकेशबलर्षिकथानकम् ॥**

कुलस्याऽप्राधान्यख्यापनार्थमेव एकैकस्य जीवस्य नटदृष्टान्तेन अन्यान्यजन्मसु विपरिवर्त्तमान-मुच्चावचत्वं गाथात्रयेणाह–

**देवो नेरइउ त्ति य, कीडपयंगु त्ति माणुसो एसो ।**
**रूवस्सी य विरूवो, सुहभागी दुक्खभागी य ॥४५॥**

**राउ त्ति य दमगु त्ति य, एस सपागु त्ति एस वेयविऊ ।**
**सामी दासो पुज्जो, खलो त्ति अधणो धणवइ त्ति ॥४६॥**

**न वि इत्थ को वि नियमो, सकम्मविणिविट्ठसरिसकयचिट्ठो ।**
**अन्नुन्नरूववेसो, नडु व्व परियत्तए जीवो ॥४७॥**

**देवो** वैमानिकादि**र्नैरयिको** रत्नप्रभादिपृथ्वीभवः **इतिः** सर्वत्र उपदर्शने, **चः** समुच्चये, तथा **कीटः** कृमिकीटकादिः, **पतङ्गः** शलभशकुन्तादिः, सर्वतिर्यगुपलक्षणं चैतत् । तेन एकेन्द्रियवर्जाः सर्वाऽऽस्तिक-प्रावादुकानाम् अविवादसिद्धा[५] द्वित्रिचतुःपञ्चेन्द्रियास्तिर्यञ्चोऽपि गृह्यन्ते । **मानुषो** वा **मनुष्यश्च, एष** इति, अयं जीवः परावर्त्तते इति सर्वत्र योज्यम् । सामान्यमुक्त्वा विशेषानाह–**रूपं** विशिष्टकमनीयाकारः स एव **स्वं** धनं विद्यते यस्य स **रूपस्वी** रूपवान्, **विरूपो** विगतः शोभाकारः, सुखभजनशीलः **सुखभागी** सातसेवी एवं **दुःखभागी** चैवेति । तथा **राजा इति च** विशिष्टैश्वर्यसम्पन्नो नृपादि**र्द्रमक इति च** निःस्वः कर्प्परभोज्यादिः । **एष** इति विरुद्धार्थव्यपदेशवचनस्तेन अयमेव जीवः **श्वपाकश्चा**ण्डाल **इति एष** एव च **वेदानां** सामादीनाम्

१. सितः सदा- KH, सितं तदा - B, C, L । २. भिर्द्धर्मो - P, A, B, KH, H, D, K । ३. रागादयः - P । ४. ज्ञेयाशुद्धि....KH । ५. सिद्धाः - P, C ।

टि. 1. क्षान्त्यादय एव भेदा यस्य स क्षान्त्यादिभिद् ।

**वित्** वेत्ता स तथा । तथा **स्वामी** स्वपोष्यजनापेक्षया प्रभुः । **दासः** क्रीताङ्कितपोषितादिः पराधीनो द्व्यक्षरकः । **पूज्यो** माननीयगुण उपाध्यायादिः । **खलो** दुर्जनः । **अधनो** दरिद्रः । **धनवान् इति** ईश्वरः । **नाऽप्यत्र कश्चिन्नियमो**ऽवश्यंभावी सम्भाव्यते यथा[1]ऽन्येषां पुरुषः पुरुषत्वमश्नुते पशवः पशुत्वम् इत्यादि प्रमाणबाधितत्वात् । भववैचित्र्यस्य कर्मवैचित्र्यमन्तरेणानुपपत्तेरित्याह—**स्वकर्मविनिविष्टसदृशकृतचेष्ट** इति तत्र स्वं—स्वकीयं, यत् कर्म—क्रियत इति ज्ञानावरणीयादि, तस्य विनिविष्टं—विनिवेशः, प्रकृतिस्थित्यनुभागप्रदेशात्मिका रचना तस्य सदृशीकृता—निर्वर्त्तिता चेष्टा—देवादिपर्यायाध्यासरूपो व्यापारो येन स तथारूपः । परावर्त्तते जीव इति सम्बन्धः, दृष्टान्तमाह—**अन्यान्यरूपवेषो** नानाकारनेपथ्यो **नट इव परावर्त्तते** परिभ्रमति स एव **जीव** आत्मेति ॥४५॥ ४६॥ ४७॥

तदेवं संसारे सर्वमनवस्थितमालोक्य विवेकिनो मोक्षमेवाकाङ्क्षन्ते, न धनयुवत्या[१]दीनि, दृष्टान्तेनाह—

**कोडीसएहिं धणसंचयस्स गुणसुभरियाए कन्नाए ।**
**न वि लुद्धो वयररिसी, अलोभया एस साहूणं ॥४८॥**

**धनसञ्चयस्य** रत्नकनकादिद्रव्यसमूहस्य, **कोटीशतैः** सह, या कन्या तस्यां न लुब्ध इति सम्बन्धः । कोऽसौ ? **गुणै**र्लावण्यादिभिः **सुभरितायां** सुपरिपूर्णायां **कन्यायां** कुमार्यामपि, **न लुब्धो** न लोभं गतोऽपिशब्दस्य व्यवहितः सम्बन्धः । कोऽसौ ? **वज्रर्षिः** वज्रस्वामी **अलोभता एषा** अनन्तरोक्ता **सर्वसाधूनामु**चितेति शिष्यान् प्रत्युपदेश इत्यक्षरार्थः ॥४८॥

विस्तरस्तु पूर्वभवात् प्रभृति श्री**वज्रस्वामीकथा**याम् । तथाहि—

**[ श्रीवज्रर्षिकथानकम् ॥ ]**

**पृष्ठिचम्पापुरोद्याने सुभूभागाभिधे** नृपः । श्री **वीरजिनतो** धर्मं **शालः** श्रुत्वा व्यबुध्यत ॥१॥
अनिच्छति **महाशाले**ऽनुजे राज्यं स **गागलिम्** । **काम्पील्यतः** समानीय स्वस्त्रीयमकरोन्नृपम् ॥२॥
आत्तव्रतौ च तौ **शाल-महाशालौ** बहुश्रुतौ । **चम्पां राजगृहा**द्याता श्री**वीरे**णाऽन्यदाऽध्वनि ॥३॥
तद्विज्ञप्तेनेन्द्रभूतिसहितौ प्रहितौ गतौ । [२]यामेयप्रतिबोधाय **पृष्ठिचम्पापुरीं** प्रति ॥४॥ युग्मम् ॥
समं मात्रा **यशोमत्या** पित्रा **पिठर**भूभुजा । सुतसंक्रान्तराज्योऽत्र **गागलि**र्ग्राहितो व्रतम् ॥५॥
व्यावृत्ते **गौतमे** मार्गे तन्निस्तारणजन्मना । मुदा **शाल-महाशालौ** केवलज्ञानमापतुः ॥६॥
**यशोमती** च **पिठरो गागलिश्च** तथैव ते । [३]अवापुः केवलज्ञानं **शालर्षे**[४]र्बोधहर्षिताः ॥७॥
श्री**वीर**स्यान्तिके नन्तुं प्राप्ते गणधराग्रिमे । त्रिःपरीय प्रभुं यात्सु तेषु केवलिपर्षदि ॥८॥
शैक्षाः ! किमेतदित्येवं जल्पाके **गौतमे** जिनः । ज्ञानिष्वाशातनां मैवं कुर्या इति जगाद गाम्[2] ॥९॥ युग्मम् ॥
शोकदाहं कदा हन्त त्यक्त्वा कैवल्यमाप्नुयाम् । चिन्तासन्तापमि[५]त्याप वीक्षापन्नो गणी तदा ॥१०॥

---

१. दीती – C, K । २. जामेय – C । ३. अवाप – P । ४. र्षिबो – C । ५. त्यापद्वी... P ।

टि. 1. परदर्शनिनां इत्यर्थः । 2. गिरम् इत्यर्थः ।

गन्ता यो**ऽष्टापदे** मुक्तिं तद्भवे स गमीत्यथ । श्रुत्वा जिनोक्तं देवेभ्यो **गौतमो**ऽभूत्तदुत्सुकः ॥११॥
अथाऽऽदेशाज्जिनेन्द्रस्य स्पष्ट**मष्टापदे** गिरौ । दूराद् **गौतम**मायान्तमद्राक्षुस्तापसास्त्रयः ॥१२॥
**कौण्डिन्यः** फलमूलादीनश्नात्येकश्चतुर्थतः । **दत्तः** षष्ठाद् द्वितीयस्तु शुष्कपत्रफलादिकम् ॥१३॥
**सेवाली**ति तृतीयस्तु शुष्कं सेवालमष्टमात् । तपसा पारणेनापि ते त्रयोऽप्युत्तरोत्तराः ॥१४॥ युग्मम् ॥
तद्वत्तपस्विभिः पञ्चशत्या चैकैकशो वृताः । क्रमादुच्चैस्तपोवीर्यादिक-द्वि-त्रिषु तापसाः ॥१५॥
सोपानेषु समारूढाः क्षीणोर्ध्वगतिशक्तयः । उदाराकारमालोक्य **गौतमं** तेऽहसन् कृशाः ॥१६॥ युग्मम् ॥
आगच्छत्यागतो हं हो याति यातो दृशोः पथः । इत्येवं पश्यतां तेषामारोहद् **गौतमो** गिरिम् ॥१७॥
चैत्यवन्दनमाधाय विधिवत्तत्र **गौतमः** । एकैकमिति तीर्थेशांस्तुष्ट्या तुष्टाव मोक्षदान् ॥१८॥
**अष्टापदाद्रौ भरते**शतीर्थे तीर्थेश्वराः श्री**ऋषभा**दयोऽमी ।
यथास्वमासूत्रितवर्णमानाः श्री**वर्द्धमाना**वधयो जयन्ति ॥१९॥
उपास्महे **श्रीऋषभं** जिनेशं कुर्मो नमस्या**मजितस्य** भर्तुः ।
**श्रीसम्भवाह्वं** स्तुमहे महेशं, महेम[1] पादा**नभिनन्दनस्य** ॥२०॥
ददातु मुक्त्यै **सुमति**र्मतिं मे, **पद्मप्रभो**ऽस्तु प्रभवो विभूतेः ।
दत्तां स्वपार्श्वे वसतिं **सुपार्श्वश्चन्द्रप्रभः** प्रापयतु प्रभुत्वम् ॥२१॥
बुद्धिं विशुद्धां **सुविधि**र्विधत्तां तापत्रयान्ताय स **शीतलः** स्तात् ।
**श्रेयांस** ! मे श्रेयसि यच्छ वाञ्छां पूज्यः सदास्तां मम **वासुपूज्यः** ॥२२॥
मलप्रशान्त्या **विमलः** पुनीयादनन्तकर्मान्तकृदस्त्व**नन्तः** ।
कुकर्ममर्माणि भिनत्तु **धर्मः** **श्रीशान्तिनाथः** शिवतातिरस्तु[2] ॥२३॥
मथ्नातु **कुन्थुः** शिवपान्थपापान्य**रो**ऽस्तु विघ्नौघविघातनिघ्नः ।
**श्रीमल्लि**मुल्लुण्ठितमोहमीडे[3] **श्रीसुव्रतो** निर्वृतयेऽस्तु देवः ॥२४॥
न मे **नमे** !ऽस्तु त्वदुपास्त्यपास्तिः **श्रीनेमिने** मेऽस्तु नमो जिनाय ।
**पार्श्वो**ऽघ[4]पाशौघशमेऽस्तु पर्शुः **श्रीवर्द्धमानो**ऽस्तु महोदयाय ॥२५॥
**अष्टापद**स्य प्रभवो जिनेन्द्राः अष्टाऽऽपदः कर्मनिभेन भित्त्वा ।
जनस्य नश्यद्वृजिनस्य सन्तु महोदयस्य प्रभुताद्भुताय ॥२६॥ [उपजातिवृत्ताष्टकम्]
तीर्थेशानिति संस्तुत्य सायं देवगृहाद् बहिः । दिशीशान्यामशोकद्रोरधः पट्टे शिलामये ॥२७॥
समित्राय समेताय नन्तुं **वैश्रवणाय** सः । तपःकृशान् मुनीन् बाढं वर्णयामास **गौतमः** ॥२८॥

---

टि. 1. 'मह' धातोर्विध्यर्थरूपः प्र.पु.बहु. । 2. शिवतातिः=शिवङ्करः अभिधानचिन्ता-४८९ । 3. ईड्-स्तुत्यर्थकधातोः वर्त्त० प्र.पु.एक० । 4. अघं (न०) पापं ।

गुरोरुदारमाकारं दृष्ट्वा श्रुत्वा च तां गिरम् । संशयानाऽऽशये तस्मिन् **गौतमः** पुनरब्रवीत् ॥२९॥
व्यवहारे तपः श्रेष्ठं परिणामस्तु निश्चये । ज्ञातेन **पुण्डरीकस्य** ज्ञेयं तच्चाधुना शृणु ॥३०॥
आस्ते **महाविदेहेषु जम्बूद्वीप**प्रदीपिषु । विजये **पुष्कलावत्यां** नगरी **पुण्डरीकिणी** ॥३१॥
तत्र **पद्मावती**जानि**र्महापद्मो**ऽभवन्नृपः । अभूतां **पुण्डरीकश्च कण्डरीकश्च** तत्सुतौ ॥३२॥
साधूनां नलिनवनोपवनोपेयुषां गिरा । प्रबुद्धः प्राव्रजद्भूपः **पुण्डरीका**र्पितक्षितिः ॥३३॥
उत्पाद्य [1]ज्ञानमत्युग्रच्छायं न्यायं च केवलम् । क्रमात् प्राप्तौ **महापद्मपुण्डरीकौ** परं पदम् ॥३४॥
उपेयुषां पुनस्तेषां गुरूणामुपदेशतः । **पुण्डरीकः** प्रबुद्धश्च **कण्डरीक**मभाषत ॥३५॥
क्रमादुभे [2]क्षमे वत्स ! तातस्तावदपालयत् । [3]आद्या त्वया मया चान्या ते पाल्येते विभागतः ॥३६॥
**कण्डरीको**ऽभ्यधादाद्यां क्षमामाद्यः पितुः सुतः । त्वं पालय द्वितीयां तु द्वितीयः पालयाम्यहम् ॥३७॥
काममित्युक्तिभङ्गीभिरनङ्गीकृतवैभवम् । [१]दीक्षोद्यतं **पुण्डरीकः कण्डरीक**मदोऽवदत् ॥३८॥
वत्स ! मत्सरिणो ज्ञेया विषया विषमूर्त्तयः । रक्षेः स्वानि मिलिष्यन्ति प्रचलानीन्द्रियाणि तैः ॥३९॥
तथेति प्रतिपद्याथ **कण्डरीको**ऽधित व्रतम् । **पुण्डरीकः** प्रजाः पातुं तस्थौ भावयतिर्गृहे ॥४०॥
महाभिग्रहसञ्चारी सामाचारीधुरन्धरः । [4]तपस्तनुतनुर्जज्ञे **कण्डरीकः** सतां प्रियः ॥४१॥
वसन्तसमयेऽन्येद्युर्मत्तो दन्तीव पादपम् । तच्चेतश्चालयामास चारित्रावरणोदयः ॥४२॥
[२]अथैत्य **पुण्डरीकिण्यां पुण्डरीकाय** भूभुजे । उद्यानस्थोऽयमुद्यानपालेन स्वमजिज्ञपत् ॥४३॥
बद्धोपकरणो वृक्षशाखायां सुखतः स्वयम् । शाड्वले स लुठन् दृष्टः [5]स्रागुपेतेन भूभुजा ॥४४॥
एकं तथास्थमालोक्य तं मत्वा च व्रताच्चलम् । क्लिष्टहृष्टावधिः क्ष्मापः प्रोचिवान् सचिवानिति ॥४५॥
प्रागप्ययं मयाऽवारि चारित्रग्रहणेऽनुजः । मुदे तदस्तु प्रव्रज्या-राज्ययोर्व्यत्ययोऽद्य नौ ॥४६॥
इत्युदित्वा ततोऽगृह्णाद् व्रतचिह्नानि पार्थिवः । तस्मै [6]भोग्याखिलक्ष्माणि राज्यलक्ष्माणि दत्तवान् ॥४७॥
विजहार महाराजः स्वयमात्तव्रतस्ततः । सो[7]ऽवकीर्णी तु दुष्कीर्त्तिकीर्णकर्णोऽविशत् पुरि ॥४८॥
रङ्कोऽन्नार्थीति हसितः सेवकैरप्ययं रुषा । दध्यौ गत्वा गृहं भोक्ष्ये मोक्ष्येऽमीषु शिलां ततः ॥४९॥
[8]गत्वाऽथौकस्तथाऽभुङ्क्त चूलायां रसना यथा । गर्भे बुद्धाण्डकस्येवान्नकूटस्याजनि ध्वजः ॥५०॥

---

१. दीक्षोदितं - P । २. अथेत्य - P, K, H, A, D, C, KH ।

टि. 1. महापद्मपुण्डरीकौ क्रमात् (यथाक्रमं) केवलं (अद्वितीयं) ज्ञानं न्यायं (नीतिं) च उत्पाद्य परं (श्रेष्ठं) पदं (स्थानं) प्राप्तौ इत्यर्थः । 2. क्षमा-पृथ्वी धर्मश्च । 3. आद्या क्षमा पृथ्वी द्वितीया-यतिधर्मः । 4. तपसा तनुः कृशीभूता तनुः शरीरं यस्य । 5. स्राक् - (अ.) द्राक् । 6. भोग्याऽखिला पृथ्वी सैव राज्यचिह्नानि दत्तवान् । 7. अवकीर्णी - खण्डितव्रती । 8. अथ औकः गत्वा तथाऽभुङ्क्त यथा अन्नस्य कूटः, तस्य चूला अग्रभागः, तस्यां रसना जिह्वा ध्वजः इवाजनि कस्य इव ? बुद्धः परिपक्वः अण्डकः, तस्य गर्भे ध्वजः इव आकण्ठं भुक्तवान् इत्यर्थः ।

गुर्वाहारस्य [1]चार्वङ्गीरागादुज्जागरस्य च । अभूत्तस्योदरे मृत्युसोदरेव विसूचिका ॥५१॥
अवकीर्णोऽवकीर्णित्वाद् वैद्यैरप्यकृतौषधः । नाश्रितः सचिवैर्दासैरप्युदासैर्निरीक्षितः ॥५२॥
ततः क्रुधाऽयमध्यायद्यदि जीवामि यामिनीम् । तदेषामेष सर्वेषामायुर्निःशेषयाम्यमहम् ॥५३॥
श्यामलेश्यामयध्यानादिति नक्तं विपद्य सः । प्रतिष्ठा**मप्रतिष्ठाने** सप्तमे नरकेऽभजत् ॥५४॥
जिनादिष्टं चिरादिष्टं धर्मं दिष्ट्याऽद्य लब्धवान् । गुरुसाक्षीकरोमीति पुण्डरीकस्त्वचिन्तयत् ॥५५॥
विवन्दिषुर्गुरून् विश्वप्रथितः प्रस्थितः पथि । अष्टमस्य [2]नमस्यांह्रिः पारणं स चकार च ॥५६॥
अन्नैर्वेलातिगैः शीतरूक्षैश्च व्यथितो मृदुः । भूचाराश्चरणोद्गच्छदसृग् भूरिपरिश्रमः ॥५७॥
ग्रामे वसतिमभ्यर्थ्य तृणसंस्तरणे स्थितः । कदा गुरु[१][3]पदाभ्यासं यास्यामीति विचिन्तयन् ॥५८॥
साधिताराधनः शुद्धध्यानोऽयं साधुशेखरः । विपद्य **पुण्डरीकस्तु** **सर्वार्थ**मुपजग्मिवान् ॥५९॥ विशेषकम् ॥
तच्छ्रु**त्वै[4]लविलो** हृष्टः [२]पिष्टो येनाऽस्य संशयः । मित्रं **सामानिक**श्चास्याऽधीयायाऽध्ययनं च तत् ॥६०॥
तस्मिन् यातेऽथ स्वस्थानं **गौतमो**ऽतीत्य तां निशाम् । नमस्कृत्य जिनान् शैलादुत्तरंस्तापसै[३]र्नतः ॥६१॥
देवतादत्तवेषांस्तान् दीक्षयित्वात्र तापसान् । गणी जिनान्तिकं नेतुं गुणानाख्यज्जगद्गुरोः ॥६२॥
पथि तांश्च व्रजन् काले व्रजे क्वापि स पायसैः । लब्ध्याऽक्षीणमहानस्या प्राप्तैरेकपतद्ग्रहात् ॥६३॥
पारणं कारयामास स्वेनाऽथ कृतपारणः । सोत्कर्षहर्षैस्तैः साकं **गौतमो**ऽगाज्जिनान्तिकम् ॥६४॥ युग्मम् ॥
लब्धिमब्धिगभीरस्य भुञ्जानो भावयन् गुरोः । तापसः प्राप **सेवाली** केवलं तैः समं निजैः ॥६५॥
छत्रातिच्छत्रतां लक्ष्मीं भर्त्तु**र्दत्तो**ऽपि वीक्ष्य सः । केवलं प्राप **कौण्डिन्यः** साक्षाद्वीक्ष्य जिनं पुनः ॥६६॥
त्रिः परीय परीवारमुनीन् केवलपर्षदम् । गच्छतो विब्रुवाणं तानित्यूचे **गौतमं** जिनः ॥६७॥
ज्ञानिष्वाशातना मैवं कारि चारित्रिषु त्वया । तद्विदित्वाऽभितप्तं तमाप्तेशः पुनरब्रवीत् ॥६८॥
किं **गौतम** ! गिरो ग्राह्या अमर्त्त्यानामुताऽर्हतः । जिनानां यदि तत्तुल्यावावामन्ते विनिश्चिनु ॥६९॥
[४]त्वं कम्बलकटप्रेमा रागस्थेमात्मको मयि । तत् प्रमादीः क्षणं माऽङ्गे द्रुमपत्रवदस्थिरे ॥७०॥
*__श्रीद__सामानिकः सोऽभूद् __वज्रर्षिः__ पूर्वजन्मनि । तत्प्रसक्तेदमुक्त्वाथ भूयः प्रस्तुतमुच्यते ॥७१॥*
**जम्बूद्वीप**महीपूर्व**भरतार्द्ध**स्य मूर्द्धवत् । आस्ते दिव इवादेशो देशो**ऽवन्ति**रिति श्रुतः ॥७२॥
तत्र धर्मद्रुमस्तम्बवनं **तुम्बवना**भिधम् । सन्निवेशनमस्ति [5]श्रीसन्निवेशनवाम्बुजम् ॥७३॥
तत्राऽभवद् भवाद् बिभ्यदिभ्यपुत्रः पवित्रधीः । धर्मी **धनगिरि**र्नाम धनेन धनदोपमः ॥७४॥
धनं धर्मार्जनायैवार्जयन् कामं च निर्जयन् । शमं बभार शृङ्गारवयस्येऽपि वयस्यसौ ॥७५॥

---

१. पदन्यासं - P । २. पृष्टो - P । ३. सैर्वृतः - K । ४. त्वं हि कलकट०...P ।

टि. 1. चार्वाङ्गी - स्त्री । 2. नमस्यौ पूजार्हौअंह्री पादौ यस्य सः । 3. समीपम् । 4. ऐलविलः-कुबेरः । 5. श्रीः लक्ष्मीः तस्याः सन्निवेशं वासः, तद्रूपं नवं नूतनं अम्बुजम्, इत्यर्थः ।

पितरौ तद्विवाहाय यां यां कन्यामयाचताम् । तस्यास्तस्याः स जनकौ परिव्रजनकौतुकी ॥७६॥
अवदत् सदनं गत्वा तत्राविष्टमनोरथः । दीक्षामहं ग्रहीष्यामि त्यजतो दूषणं न मे ॥७७॥ युग्मम् ॥
**धनपाला**भिधेभ्यस्य **सुनन्दा** नन्दिनी जगौ । विना **धनगिरिं** मान्यो ममाऽन्यो न करग्रहे ॥७८॥
ततो **धनगिरे**स्तस्य **धनपालः** स्वयंवराम् । दीक्षां जिघृक्षतोऽप्येनां ददौ कन्यामनन्यगाम् ॥७९॥
अन्यदा तामृतुस्नातामजिह्मब्रह्मधीरपि । भेजे **धनगिरि**र्भोगफलकर्मनियोगतः ॥८०॥
**गौतम**स्वामिना ख्यात**मष्टापद**गिरौ पुरा । राजर्षेः **पुण्डरीक**स्याऽध्ययनं येन भावितम् ॥८१॥
**श्रीद**स्य भानुश्रीदस्युधामा सामानिकः सुरः । दिवश्च्युत्वा **सुनन्दाया**स्तदा कुक्षिमवातरत् ॥८२॥ युग्मम् ॥
धीमान् **धनगिरि**र्मत्वाऽऽपन्नसत्त्वामिमां जगौ । भद्रे ! गर्भद्वितीयायै भद्रं भवतु तेऽधुना ॥८३॥
तव प्रव्रजितो यत्र भ्राता**ऽऽर्यशमिता**भिधः । तत्राहं प्रव्रजिष्यामि पुरः **सिंहगिरे**र्गुरोः ॥८४॥
इदमुक्त्वा च कृत्वा च तप्यमानस्तपांसि सः । पीतवान् पीतसंसारं श्रुतसारं गुरोर्मुखात् ॥८५॥
शुभे दिने **सुनन्दा** तु नन्दनं चित्तनन्दनम् । **वज्रं** वज्राकरोर्वीव द्युतिपूतमसूत सा ॥८६॥
आनन्दिन्यः **सुनन्दायाः** प्रीतिपात्राणि योषितः । प्रतिजागरणाऽऽयातास्तमित्थं बालमालपन् ॥८७॥
अयि ! तात ! न ते तातः प्राव्रजिष्यत् पुरा यदि । अभविष्यत्तदुद्दामो जातकर्मोत्सवस्तव ॥८८॥
विना पुमांसं न स्त्रीभिः स्याद्विश्वानन्दकृन्महः । असति [1]द्युमणौ देवे दीपिकाभिरिवाभितः ॥८९॥
संज्ञावान् स पुनर्ज्ञानावरणस्यातिलाघवात् । दत्तावधानस्तद्वाचि बालोऽप्यालीढसम्भ्रमः ॥९०॥
ऊहापोहपरो जातिस्मृतिस्मृतपुराभवः । क्षीरकण्ठोऽप्यसावैच्छत् अध्वन्यध्वन्यतां पितुः ॥९१॥
माता जातातिवैलक्ष्या मङ्क्षु त्यक्ष्यति मां कथम् । ध्यात्वेत्यसौ रुरोदैव [2]दैवदून इवानिशम् ॥९२॥
न सुधामधुरैर्गानैर्न वचोभिश्चटूचितैः । न चूलाचुम्बनैश्चलदोलान्दोलनकैर्न च ॥९३॥
नाऽङ्कखेलैर्न चन्द्रादिचित्ररूपनिरूपणैः । असावपूर्णहृत्कामो विरराम प्ररोदनात् ॥९४॥
इत्यर्द्धवत्सरस्तस्य वत्सस्य रुदतोऽगमत् । तेनाऽमन्दं **सुनन्दा**पि चिरान्निर्वेदमासदत् ॥९५॥
आचार्यो [3]**धनगिर्यार्यशमिता**दिशमिश्रितः । श्री**सिंहगिरि**रागच्छदन्यदा तन्निवेशनम् ॥९६॥
नत्वा तत्रा**ऽऽर्यशमिता**न्वितो **धनगिरि**र्गुरुम् । आपप्रच्छ निजं ज्ञातिवृन्दं वन्दयितुं तदा ॥९७॥
विचार्य शकुनं किञ्चित् पृच्छतोरेतदेतयोः । ससम्भ्रमचमत्कारमुज्जगार गुरुर्गिरम् ॥९८॥
भविता भवतोर्लाभो महानिह महामुनी ! । नैवाऽचित्तं सचित्तं वा निषेध्यं भैक्ष्यमद्य तत् ॥९९॥
मन्दिरेऽथ **सुनन्दाया**स्तौ यातौ यतिपुङ्गवौ । तत्परीवारनारीभिर्दृष्टौ च द्वारि चारिणौ ॥१००॥
सस्मितं ताभिराभाषि **सुनन्दे** ! सूनुरर्प्यताम् । **धनगिर्या**ख्यमुनये क्व नयत्येष वीक्ष्यते ॥१०१॥

टि. 1. द्युमणिः-सूर्यः । 2. दैवेन भाग्येन दूनः दुःखितः । 3. धनगिरिआर्यशमितादिशमिनः (साधवः) तैः श्रितः इत्यर्थः ।

तदीयाऽऽक्रन्दमन्दश्रीः **सुनन्दा**ऽपि सुतं ततः । आदाय दोर्भ्यामुत्थाय मुनिं **धनगिरिं** जगौ ॥१०२॥
[१]इयन्तमा[1]लवत् कालममुं बालमपालयम् । रटता नटिताऽनेन नन्वहं पुनरन्वहम् ॥१०३॥
धुर्योऽपि निःस्पृहाणां त्वं गृहाणाङ्गजमात्मनः । मामिवाऽपकृपो जैनमुने ! मैनमपि त्यज ॥१०४॥
स्मृत्वा गुरुगिरं स्मित्वा जगौ **धनगिरिश्च** ताम् । कल्याणमेतत्कल्याणि ! करवाणि वच[२]स्तव ॥१०५॥
पश्चात्तापवती पश्चात्पुनर्भद्रे ! भविष्यसि । अर्प्पितं रभसेनाऽमुं लभसे न कथञ्चन ॥१०६॥
तदिदं मा कुरु स्वैरं कुरु वा न निवार्यसे । रचनीयाः पुनर्याच्ञारक्षादक्षास्तु साक्षिणः ॥१०७॥
निर्मायमथ निर्माय साक्षिणोऽपि **सुनन्दया** । ददे निर्विण्णया तस्मै सूनुस्तेनाऽप्युपाददे ॥१०८॥
स बालः साधुना तेन पात्रबन्धे न्यधायि च । जानन् भवार्त्तिमुक्तं स्वं विरराम च रोदनात् ॥१०९॥
गुर्वाज्ञापालकावात्तबालकावथ तौ मुनी । जग्मतुर्मङ्क्षु साऽऽनन्दौ **सुनन्दा**मन्दिराद् गुरुम् ॥११०॥
सुतरत्नस्य भारेण विश्वसारस्य भूरिणा । [2]नमद्भुजाभुजङ्गेशमूचे **धनगिरिं** गुरुः ॥१११॥
आयासित इवाऽऽयासि भिक्षाभारेण भद्र ! तत् । अमुं मम समर्प्याऽऽशु [3]विश्राम्य शमिनांवर ! ॥११२॥
नभोरत्नसपत्नश्रि सुतरत्नं प्रयत्नतः । अथाऽयमर्पयामास नेत्रोल्लासकरं गुरोः ॥११३॥
डिम्भस्य तस्य भारेण भूयसाऽथ गुरोः करः । ननाम नाम मत्त्वेव स्वतस्तं गुरुताधिकम् ॥११४॥
[4]प्रभाप्र[३]भास्वन्नभसं लक्ष्याशेषनृलक्षणम् । तं प्रेक्ष्य पीतामृतवत् गुरुर्गामुज्जगार सः ॥११५॥
सारं सारेण भासा च जानेऽमुं जिनशासने । [5]वज्राधिदैवतमिवावतीर्णं पालनेच्छया ॥११६॥
[6]श्रितानाममुना कर्मवारणान् [४]दारयिष्यता । [५]सत्या सम्भाव्यते **सिंहगिरि**रित्यभिधा मम ॥११७॥
अयं प्रवचनाधारः सुधीः साधारणः सताम् । ईदृग्भारोऽपि भाव्येष [7]पोतः पोतो भवाम्बुधौ ॥११८॥
तपःसंघट्टतोऽघस्य घातान्नैर्मल्यमीयुषा । विभास्यत्यमुना मौलिमणिना जिनशासनम् ॥११९॥
रक्ष्योऽयमतियत्नेन जैनशासनजीवितम् । सुव्यक्तभक्तिभिर्जैनशासनोपासनोन्मुखैः ॥१२०॥
इत्युक्त्वा **वज्रसारत्वाद्वज्र** इत्यभिधाय च । साध्वीनामर्प्पितो बालः पालनायैष सूरिभिः ॥१२१॥
आर्य्याः शय्यातरकुले पालनायाथ बालकम् । बाललालनलोलानां लोलाक्षीणां तमार्प्पयन् ॥१२२॥
मनसो मोहकत्वेन पश्यन्त्यः स्वसुताधिकम् । शीललीलोज्ज्वलं शय्यातर्यस्तं पर्यपालयन् ॥१२३॥
मुहुर्मुहुर्नव इव भ्राजमानोऽङ्गनाजनैः । अङ्कतः कमनीयश्रीरयमङ्कमनीयत ॥१२४॥

---

१. अयंतमालवत्का-B, L; इयंममालवत्का C; इयंतमालपत्क-K । २. ततः P । ३. भासन्न P । ४. वारयि-P । ५. संज्ञा-P ।

टि. 1. आलवत्-कलङ्कवत् । 2. नमद्भुजा एव भुजङ्गेशः शेषनागः यस्य सः, तम् । 3. वि+श्रम् आज्ञार्थ द्वि०पु० एकवचनरूपः । 4. (स्वीया) प्रभया प्रकर्षेण भास्वत् दीप्तिमत् (कृतं) नभः येन सः, तम् । 5. इन्द्रमिव इत्यर्थः । 6. श्रितानां कर्म एव वारणाः हस्तिनः तान् दारयिष्यता (सिंहेन इव) अमुना (बालेन) मम सिंहगिरिः इति अभिधा सत्या सम्भाव्यते । अर्थात् यथा सिंहः गिरिं श्रयति तथा च एष माम् इति सिंहगिरिः । 7. पोतः-बालः ।

यया ययाऽयमुत्सङ्गे धृतः सा सा ससंमदा । मातेवाहं शिशोरस्य मुदेऽस्मीति व्यचिन्तयत् ॥१२५॥
शय्यातरीभिरेवं स पाल्यमानो न चापलम् । किमप्यसौख्यदं तासु बालतासुलभं व्यधात् ॥१२६॥
संज्ञामाहारनीहारादिषु व्यक्तामयुङ्क्त सः । अभुङ्क्त प्रासुकं जातिस्मृतिस्मृतयतिक्रियः ॥१२७॥
युग्मजैरिव रेमेऽसौ सर्वैर्निर्भरमर्भकैः । [1]तदिष्टक्रीडनेनैकेन्द्रियादिव्यसनं विना ॥१२८॥
सत्क्रियां शिक्षयन् दक्षः सपक्षीकृत्य डिम्भकान् । क्रीडन् धर्मानुरूपं स सुधीः साध्वीरमोदयत् ॥१२९॥
अमुं स्नान-पयःपान-भक्षदानविधानतः । स्पर्द्धया वर्द्धयामासुः शय्यातरपुरन्ध्रयः ॥१३०॥
**वज्रं** निरूप्य रूपश्रीमालिनं शीलशालिनम् । शय्यातरेभ्योऽयाचिष्ट **सुनन्दा** मेऽङ्गभूरिति ॥१३१॥
जननीजन्यसम्बन्धं न विद्मो युवयोर्वयम् । गुरोर्न्यासोऽयमस्मासु तैरित्युक्त्वा न्यषेधि सा ॥१३२॥
अथागाधजलेऽम्भोजमिव लक्ष्म्याऽद्भुतं सुतम् । दुष्प्रापमिष्टप्रापं सा दूरस्थैव तमैक्षत ॥१३३॥
क्वचित् महोपरोधेन धात्रीव तमसौ सुतम् । स्तन्यपानादिभिस्तेषामेव धामन्यपालयत् ॥१३४॥
इतश्च **कन्यापूर्णा**ख्यं विख्यातं तटिनीद्वयम् । आस्ते**ऽचलपुरो**पान्तं महीमण्डलमण्डनम् ॥१३५॥
सरितोरेतयोरन्तस्तद्भुवोर्भुजयोरिव । हारलीलां ललुर्भूतिधवलाः केऽपि तापसाः ॥१३६॥
पादुके परिधायैकस्तापसस्तेषु लेपवित् । सलिलेऽप्यतलस्पर्शे तलदघ्न इवाचलत् ॥१३७॥
कुतूहलं मुहुः पौरजनस्य जनयन्नयम् । पादुकालेपगुप्तांह्रिरुत्ततार तरङ्गिणीम् ॥१३८॥
ईदृक्षोऽस्ति नवः कोऽपि प्रभावो दर्शने न वः । स जिनोपासकानेवं जहास प्रतिवासरम् ॥१३९॥
विहारक्रमयोगेन योगसिद्धस्तपोनिधिः । तत्रा**ऽर्यशमिता**ऽऽचार्यस्तदागाद्**वज्र**मातुलः ॥१४०॥
तस्मै तं मुनिमाख्याय श्राद्धा वृद्धपराभवाः । सतापास्तापसोपज्ञमुपहासमजिज्ञपन् ॥१४१॥
मतिज्ञानेन विज्ञाय श्रुतज्ञाने स्फुरत्यपि । तानुवा**चार्यशमिता**चार्यः स्वोपासकानथ ॥१४२॥
तापसस्य तपःशक्तिस्तस्य नो काचिदाचिता । किन्तु केनाऽपि लेपेन लिप्तपादः स चित्रकृत् ॥१४३॥
अत्रोपदेशमात्रैकसाध्ये निस्तपसामपि । मा विस्मयध्वं विज्ञाने मा श्रद्धत्त च तापसान् ॥१४४॥
न सत्यं प्रत्ययश्चेद्वस्तापसस्तन्निमन्त्र्यताम् । भक्तिच्छलेन प्रक्षाल्यौ तत्पादौ पादुके च ते ॥१४५॥
श्रावकैरथ तीर्थेशमतप्रहसनच्छिदे । धर्माय मायामपि तैर्निर्मायाऽऽमन्त्रि तापसः ॥१४६॥
वृतः कौतुकिभिर्लोकैर्भोजनाभ्युदितस्ततः । श्राद्धस्यैकस्य सदनम्[१]आपपात स तापसः ॥१४७॥
अगारद्वारमायान्तं मायाभक्तिभृतस्ततः । उवाच श्रावकः श्रद्धासम्बद्धात्मेव तापसम् ॥१४८॥
प्रक्षालयति यो भक्त्या भगवन् ! भवतः क्रमौ । न श्राम्यतः क्रमौ तस्य संसारारण्यलङ्घने ॥१४९॥
तदहं क्षालयिष्यामि त्वत्पादौ भुक्तिमुक्तिदौ । **न कुर्वन्ति हि भक्तस्य भक्तिभङ्गं भवादृशाः** ॥१५०॥

---

१. मातताप - P ।

टि. 1. तदिष्टक्रीडनेन एकेन्द्रियादिजीवानां व्यसनं पीडां विना स निर्भरं रेमे इत्यर्थः ।

इत्युक्त्वाऽनिच्छतोऽप्यस्य श्रावकोऽसौ तपस्विनः । अक्षालयत्पदौ लिप्तावविलिप्तं च मानसम् ॥१५१॥
जलेनोष्णेन तत्पादपादुकाक्षालनं तथा । स चकार यथा तस्थौ लेपलेशोऽपि न क्वचित् ॥१५२॥
प्रतिपत्त्या महत्याऽथ श्रावकस्तमभोजयत् । **पादान् ममर्द कार्येण गर्द्दभस्य जनार्दनः** ॥१५३॥
तल्लेपलोपं सम्भाव्य विगोपकभयाकुलः । भुञ्जानो भोजनास्वादमजानान्न स तापसः ॥१५४॥
तापसोऽथ सरित्तीरं ययौ जनितभोजनः । वृतोऽभितो जनै[1]रम्भस्तम्भदर्शनकौतुकात् ॥१५५॥
कोऽपि लेपलवोऽद्यापि स्यादिति ध्यानतोऽल्पधीः । प्रागिव प्रविवेशाऽयं सरित्तीरे ममज्ज च ॥१५६॥
धिक् कैतवेन केनाऽपि सरितं तरताऽमुना । विप्रलब्धा वयं दध्युरित्थं मिथ्यादृशोऽप्यथ ॥१५७॥
प्रहासतुमुलोत्ताले दत्तताले जने ततः । अयं तत्राऽऽययौ [१]सूरिः श्रुता[2]कूपारपारगः ॥१५८॥
जने जनयितुं जैनदर्शनस्य प्रभावनाम् । निम्नगायामयं योगमयं माहात्म्यमक्षिपत् ॥१५९॥
प्रयच्छ पुत्रि ! पन्थानं परं तटमटामि ते । इति वाचाऽभ्युवाचाथ नदीमाचार्यपुङ्गवः ॥१६०॥
सखीवत्तटिनीतट्योर्मिथो मिलितयोस्ततः । ससार सपरीवारः सूरिस्तीरमसौ परम् ॥१६१॥
तं वीक्ष्यातिशयं सर्वे मुक्ता गर्वेण तापसाः । आचार्यपादपर्यन्तमेत्य पर्यव्रजन् मुदा ॥१६२॥
[२]**ब्रह्मद्वीपक**नामानो **ब्रह्म**द्वीपाधिवासिनाम् । अन्वये श्रमणास्तेषामभूवन्नागमोदिताः ॥१६३॥
इतोऽपि क्रमतो जज्ञे तत्र **वज्र**[3]स्त्रिहायणः । साधवो **धनगिर्या**द्यास्तां महीं व्यहरन्त च ॥१६४॥
प्राप्ते **धनगिरौ** पुत्रं ग्रहीष्यामीति नित्यधीः । **सुनन्दा**ऽजनि सानन्दा तेष्वायातेषु साधुषु ॥१६५॥
अयाचत महर्षिभ्यः **सुनन्दा**ऽथ स्वनन्दनम् । तेऽप्यमुं नयनानन्दं न ददुर्जगदुस्त्वदः ॥१६६॥
मुनेः ससाक्षिकं दत्तं याचमाना न लज्जसे । विक्रीतस्येव दत्तस्य मितापि स्वामिता कुतः ॥१६७॥
अनालोच्याखिलं गोत्रमज्ञानत्वान्मयार्पितः । न गच्छत्येव वत्सोऽयमित्यूचेऽथ **सुनन्दया** ॥१६८॥
विवाददक्षयोरेवं पक्षयोरुभयोरपि । लोकोऽभ्यधाद्विधाताऽमुं निर्णयं नयविन्नृपः ॥१६९॥
लोकैः साकं **सुनन्दा**ऽथ मेदिनीन्दोः सदस्यगात् । ययुः समं समस्तेन श्रीसङ्घेन च साधवः ॥१७०॥
निषसाद **सुनन्दा**ऽथ वामपक्षेण भूपतेः । दक्षिणेन तु पक्षेण सङ्घभट्टारकोऽखिलः ॥१७१॥
द्वयो[३]र्भाषोत्तरज्ञानादभाषत नृपस्ततः । येनाऽऽहूतः समभ्येति तस्यैवास्तामसौ शिशुः ॥१७२॥
तं निर्ण्णयममन्येतामथ पक्षावुभावपि । ऊचतुश्चेदमादौ कः पुत्रमाकारयिष्यति ॥१७३॥
स्त्रीपक्षैराचचक्षेऽथ बालोऽयं शमिभिः समम् । [4]चिरसङ्गरसङ्गत्वाद् भविता त[5]द्गिरि स्थिरः ॥१७४॥

---

१. सूरिश्श्रुताकू - KH । २. ब्रह्मदीप....- C । ३. र्भाषान्तरज्ञा....- KH ।

टि. 1. अम्भसः स्तम्भः जाड्यं अम्भस्तम्भः [धुटो धुटि स्वे वा-१/३/४८] इत्यनेन सकारलोपः । 2. अकूपारः सागरः । 3. [२।३।७४] चतुस्त्रे....इत्यनेन नस्य णः । 4. चिरसङ्ग एव रसस्तं गतः प्राप्तः इति चिरसङ्गरसङ्गः तस्य भावः, तस्मात् हेतोः । 5. तेषां गिरायां इत्यर्थः ।

सोढनिर्भरगर्भादिकष्टा स्त्रीकृपया च तत् । तनयं जनयित्रीयमाह्वातुं [१]प्राग् निदिश्यताम् ॥१७५॥
तथेत्युक्ते सभासद्भिरुद्भिन्नपुलकाङ्कुरा । विविधानि विधायाऽग्रे क्रीडनान्यदनानि च ॥१७६॥
**सुनन्दा** मृदुमन्दोक्तिश्चाटुनाट्यमहानटी । रयादाकारयामास तनयं विनयाञ्चिता ॥१७७॥ [युग्मम्]
एह्येहि संमदं देहि वत्स ! वात्सल्यतो मयि । इह हस्त्यश्वपत्त्यादौ स्पृहा यत्र गृहाण तत् ॥१७८॥
इमा मोदक-मत्स्यण्डी-द्राक्षाः साक्षादिवामृतम् । तुभ्यमभ्याहृता वत्स ! गृहाण त्राणकृन्मम ॥१७९॥
अन्यदप्यस्त्यदो भूरि बाललालनलोभनम् । आदत्स्व वत्स ! तत्सर्वं मदुत्सङ्गमुरीकुरु ॥१८०॥
त्वं मे देवो गुरुस्त्वं मे त्वं मे प्राणाश्च दारक ! । त्वां विना तव माताहं म्रिये त्वं रक्ष रक्ष माम् ॥१८१॥
लोकस्यास्य पुरस्तेजो दीनायाः पुत्र ! पुष्य मे । एह्यालिङ्गनदानेन गर्भवासाऽनृणो भव ॥१८२॥
पटुलोभचटुक्षोभमयैरित्यपि वाक्चयैः । बालश्चचाल न मनागपि मेरुरिवानिलैः ॥१८३॥
मातुः स्यादुपकाराणां कथञ्चित्कोऽपि नानृणः । एवं विदन्नपि कृती बालोऽसावित्यचिन्तयत् ॥१८४॥
दयां जनन्या जनयन् यदि स्यां सङ्घलङ्घनः । तत्पङ्गुभङ्गुरगतिर्भवेयं भवलङ्घने ॥१८५॥
अल्पकर्माऽनु माता मद्वियोगे प्रव्रजिष्यति । मदुपेक्षाऽऽधिजं दुःखमस्या गूढोपकारकृत् ॥१८६॥
तत्सङ्घाराधनादाराधनं स्यात् मातृ-सङ्घयोः । श्रीसङ्घस्तु विराध्येत मातुराराधनेऽधुना ॥१८७॥
धीमानिति विमर्शी स दीर्घदर्शी दृढाशयः । श्रियामिव ददौ साधुर्न दृष्टिमपि मातरि ॥१८८॥
ततो भेजे [1]महाराजनुन्नो **धनगिरि**र्गिरम् । रजोहरणमुत्क्षिप्य लोकाग्रं दर्शयन्निव ॥१८९॥
वत्स ! यद्यपि तत्त्वज्ञो यदि तेऽभिमतं व्रतम् । [२]अस्त्रं मुक्त्यध्वसञ्चारे तद्रजोहरणं श्रय ॥१९०॥
द्रुतमेत्य ततः प्रीत्या धन्यो **धनगिरेः** करात् । चामरं धर्मसम्राजो रजोहरणमाददे ॥१९१॥
रजोहरणहस्तोऽयं पितुरुत्सङ्गसङ्गतः । शमामृतसरोम्भोजखेलीव शुशुभे शिशुः ॥१९२॥
स रजोहरणं [2]पाणिप्रभापटलपाटलम् । धन्यो धवलयामास दृग्भासा च स्मितेन च ॥१९३॥
सुनन्दा मुख[3]नालीकनालीकृतकरा ततः । दीना यूथपरिभ्रष्टमृगीवेदमचिन्तयत् ॥१९४॥
पुत्रः प्रव्रजितो भ्रातृ-पती प्रव्रजितौ मम । प्रव्रजाम्यहमप्याशु [३]भाविन्येकाकिनी गृहे ॥१९५॥
विचिन्त्यैवं **सुनन्दा**ऽगात् सदनं तदनन्तरम् । आदाय **वज्र**मायाता वसतिं व्रतिनोऽपि ते ॥१९६॥
स्तनन्धयोऽप्यपान्नैष धन्यः स्तन्यं व्रतस्पृहः । प्रव्राज्याऽऽचार्यवर्यैस्तद्व्रतिनीभ्योऽर्पितः पुनः ॥१९७॥
प्रारब्धदुरितास्कन्दा **सुनन्दा**ऽपि प्रमोदिनी । श्री**सिंहगिरि**पादान्ते दान्ताऽसौ व्रतमाददे ॥१९८॥
पदानुसारिभिर्वज्रो [4]धीतरङ्गैरधीतवान् । एकादशाङ्गीं बालोऽपि पठत्साध्वीमुखश्रुताम् ॥१९९॥

---

१. द्राग् - KH । २. अमुं - KH । ३. भामिन्ये - L, B, A, D, KH, भामिनेका...K, भामिनै...H ।

टि. 1. महाराजेन प्रेरितः इत्यर्थः । 2. पाणी करौ तयोः प्रभा कान्तिः तस्याः पटलं छदनं तेन पाटलं रक्तमपि रजोहरणं धवलयामास इति अन्वयः । 3. नालीकं-कमलम् । 4. धीः बुद्धिः तस्याः तरङ्गाः वीचयः, तैः ।

आनीयत विनीतात्मा व्रतिनीनामुपाश्रयात् । वसत्यामष्टवर्षः सन् हर्षिभिः स महर्षिभिः ॥२००॥
**अवन्तीन्** सह वज्रेण गुरवो जग्मुरन्यदा । अन्तर्ववर्ष धाराभिः प्रबलाभिर्बलाहकः ॥२०१॥
अप्कायान् दूरयन्तस्ते सूरयः सपरिच्छदाः । तस्थुर्यक्षालयतले क्वचिदप्यगलज्जले ॥२०२॥
प्राग्जन्ममित्राण्यमराः सत्त्वं **वज्रस्य** वीक्षितुम् । [१]आवासितवणिग्रूपं **जृम्भका**ऽऽख्यास्तदाऽ[२]भजन् ॥२०३॥
नीरवाहे निरुत्साहे वन्दित्वाऽथ दिवौकसः । न्यमन्त्रयत ते सूरिं तृणच्छन्नान्नभूमयः ॥२०४॥
कृत्वा चावश्यकीं पश्यन्नध्वशुद्धिं [1]द्वितीयवान् । तद्देशाद् गुरुनिर्देशात् **वज्रो** भिक्षाकृतेऽचलत् ॥२०५॥
पततो दिक्षु वीक्ष्याथ तुषारान् सूक्ष्मकानपि । वलते स्माऽयमह्नाय बिभ्यदप्कायसङ्गमात् ॥२०६॥
पुनराकारितो देवैर्वारिताशेषवारिभिः । **वज्रो** जगाम भुञ्जानजनं भोजनसंश्रयम् ॥२०७॥
तृणोटजं कुतोऽटव्यामकाण्डे घनताण्डवे । इति सम्भ्रमभाग् **वज्रो** वणिजां मुखमैक्षत ॥२०८॥
तान् दक्षो निर्निमेषत्वादेष मत्वा दिवौकसः । अकल्प्यदेवपिण्डत्वाद्व्वले धवलाशयः ॥२०९॥
प्रीताः प्रत्यक्षतां प्राप्य ते देवाः स्वं निवेद्य च । तस्मै **वैक्रि[३]यलब्ध्य**र्थां दत्त्वा विद्यां तिरोभवन् ॥२१०॥
वणिग्भूतैरयं देवैस्तैरेव विहरन् बहिः । मासि ज्येष्ठेऽन्यदा दातुं घृतपूरान्निमन्त्रितः ॥२११॥
तं मत्वा पूर्ववत्तस्मै देवपिण्डमगृह्णते । साक्षाद्भूय ददुर्देवा विद्यां **व्योमगतिं** मुदा ॥२१२॥
पदानुसारि[४]प्रतिभः प्रपेदे सुस्थिराण्यथ । पठन्मुनिघटासङ्गादङ्गान्येकादशाऽपि सः ॥२१३॥
अधीयमानं [2]सुधियामाद्यः पूर्वगताद्यपि । यद् यद् **वज्रो**ऽशृणोन्मोहनिग्रही तत्तदग्रहीत् ॥२१४॥
स्थविरैः स पठेत्युक्तः शक्तिं स्वामप्रकाशयन् । कुर्वन् गिणगिणारावं शुश्राव पठतः परान् ॥२१५॥
भिक्षार्थं साधवोऽन्येद्युरगमन् सूरयः पुनः । बहिर्भूमिं ययु**र्वज्र** एकाकी वसतौ स्थितः ॥२१६॥
साधुमण्डलिकारीत्या सन्निवेश्य स वेष्टिकाः । तासां मध्ये स शिष्याणामिव गच्छगुरुः स्थितः ॥२१७॥
पूरयन् [3]मरुदध्वानं ध्वानैरम्भोदसोदरैः । प्रारेभे वाचनां दातुमनातुरमनाश्च सः ॥२१८॥
व्यक्तमेकादशाङ्ग्याश्च ततः पूर्वगतस्य च । आगच्छन् वाचनावाचं गुरुः शुश्राव दूरतः ॥२१९॥
आगत्य तूर्णमापूर्णभिक्षाः किं साधवोऽधुना । समागमनमस्माकं स्वाध्यायैः पालयन्त्यमी ॥२२०॥
वसतेर्बहिरित्यन्तर्ध्यायन्तः सूरयः स्थिताः । ध्वनितो ज्ञातवन्तश्च वदन्तं **वज्र**मेव तम् ॥२२१॥
तद्वाचनाव[५]चस्तोमान् श्रुत्वा रोमाञ्चिताश्च ते । दध्युरध्युषितानन्दा मद्गच्छो भाग्यभागयम् ॥२२२॥
मुनिर्यत्रैष बालोऽपि कर्णधृष्ट्यैव पेठिवान् । भृशमेकाद[६]शाङ्गीं च [७]तन्नः पूर्वगतादिव ॥२२३॥
मा स्म लज्जिष्ट बालोऽयं वाचनावचनैरिति । उच्चैर्निषेधि[८]कोच्चारास्ते द्वारमविशन् शनैः ॥२२४॥

१. अवासित... P । २. भवन्.... P । ३. यलब्ध्याख्यां... C । लब्ध्यार्थां-D । लब्ध्यर्थं - B । ४. तितः - P । ५. वचस्थेमं- C । ६. शांगीवदन्यत्पूर्वं - C । ७. तत्र - P । ८. क्युच्चारा - C ।

टि. 1. द्वितीयः सङ्घाटकमुनिः अस्याऽस्ति इति द्वितीयवान् । 2. सुधियाम् आद्यः अग्रणीः इत्यर्थः । 3. मरुदध्वानं-आकाशम् ।

वचः स च तदाकर्ण्य न्यस्य स्थानेषु वेष्टिकाः । एत्याददे गुरोर्दण्डं क्रमरेणुं ममार्ज च ॥२२५॥
तेनाऽथ मुक्तिवामाक्षीवशीकरणकारणम् । गुर्वंह्रिरजसा भाले बालेन तिलकः कृतः ॥२२६॥
प्राग्विष्टरनिविष्टस्य गुरोः प्रासुकवारिणा । चरणौ क्षालयामास वासनाभासुरोऽथ सः ॥२२७॥
वन्दनेन गता भालं तस्य तद्वारिबिन्दवः । मध्येविनयिनां मुक्तापट्टबन्धनिभा बभुः ॥२२८॥
दध्यौ गुरुस्तथा कुर्यां शिशुत्वसुलभां यथा । कुर्युरीदृग्प्रभावज्ञा नाऽवज्ञामस्य साधवः ॥२२९॥
इत्याचार्या विचार्यान्तर्विभावर्यां जगुर्मुनीन् । यामो ग्रामेऽमुकेऽस्माकं तत्र द्वित्रदिनं स्थितिः ॥२३०॥
अथ व्यजिज्ञपन् योगप्रपन्ना मुनयो गुरुम् । अस्माभिर्वाचनाचार्यः कार्यः क इह[१] तत्प्रभो ! ॥२३१॥
सन्देहशैलसन्दोहवज्रं **वज्रो** भविष्यति । भवतां वाचनाचार्यस्तानाचार्योऽभ्यधादिति ॥२३२॥
गुरुभक्तिभरश्रद्धाशुद्धात्मानोऽथ साधवः । अविचार्यैव वाचं तां तथेति प्रतिपेदिरे ॥२३३॥
प्रातर्याते गुरौ ग्रामं शमिनः समयेऽथ तम् । अध्यास्य गुरुबुद्ध्यैव वाचनार्थमुपाविशन् ॥२३४॥
अल्पप्रज्ञानपि प्राज्ञानिवैकोक्त्यैव बोधयन् । आज्ञा गुरूणामस्तीति श्री**वज्रो** वाचनां ददौ ॥२३५॥
तादृक्षवाचनादानमोदिनोऽनुदिनं ततः । गुरुतोऽपि गुरुं तस्मिन् मुनयो विनयं व्यधुः ॥२३६॥
इयता नियतं जज्ञुः शमिनः समयेन ते । **वज्र**माहात्म्यमित्यागुर्गुरवो गदितेऽवधौ ॥२३७॥
कृतद्वारप्रवेशादितादृग्विनयभक्तयः । धर्माचार्यैरपृच्छ्यन्त मुनयो वाचनासुखम् ॥२३८॥
साधवोऽभिदधुः शक्तिं बोधयित्रीं परां दधत् । **वज्रो**ऽस्तु वाचनाचार्यो यावज्जीवितमेव नः ॥२३९॥
प्राग् बाल इत्यवज्ञातो मूर्तं श्रुतमिवैष यत् । पादाग्रे[२] वस्तदालोच्य शोच्याः कर्मावलिप्तयः ॥२४०॥
गुरवो गौरवेणाथ **वज्र**मुज्जृम्भितोदयम् । परिज्ञातावशेषं यदशेषं तदपाठयन् ॥२४१॥
श्रुतमात्रगृहीतस्य श्रुतस्य स्थापनाय सः । भङ्गी[1]मुत्सारकल्पाख्यामङ्गीचक्रे गुरोर्गिरा ॥२४२॥
तत्प्रज्ञया श्रुताम्भोधौ पीतेऽप्यधिकतृष्णया । **दृष्टिवादो**ऽप्यभूद्यावान् गुरोस्तावानपीयत ॥२४३॥
हरन्तो जन्तुपापानि विहरन्तोऽथ सूरयः । पुरं **दशपुरं** जग्मुः सवज्रादिपरिच्छदाः ॥२४४॥
हर्षयन्तोऽथ रोमालिं **वज्र**मालिङ्ग्य सूरयः । ऊचुः सुधाङ्कवचनैर्वचनैरौचितीविदः ॥२४५॥
**अवन्त्यां** दशपूर्वीभृत् **भद्रगुप्तो**ऽस्ति सद्गुरुः । दशपूर्वीं ततोऽध्येतुं धीसिन्धो ! यत्नमुद्वह ॥२४६॥
त्वां विना नास्ति मच्छिष्यस्तच्छिष्योऽपि स कश्चन । धीनिधिर्दशपूर्वाणि सपूर्वाणि[2] करोति यः ॥२४७॥
तद्वत्स ! वत्सलप्रज्ञ ! पुरी**मुज्जयिनीं** व्रज । अधीत्य दशपूर्वाणि दशदिक्पूज्यतां भज ॥२४८॥
दशपूर्वीसुधापूरपानध्यानस्य तेऽनिशम् । सन्निधानं विधास्यन्ति प्रीताः शासनदेवताः[३] ॥२४९॥

---

१. इव तत्प्रभोः - P, C इहतत्प्रभोः H, B । २. पदाग्रे - P । ३. शोभनदेवताः P ।

टि. 1. उत्सारकल्पः-तथाविधावसरमपेक्ष्य क्रमादीनुल्लङ्घ्य श्रुतपाठनव्यवस्थाविशेषः । 2. पूर्वं-पुराणं-दृढमूलं, पूर्वेण-दृढमूलतया सहितानि - सपूर्वाणि, आत्मसात्कृतानि इत्यर्थः ।

इति द्रुतोल्लसत्पाणिसम्पुटात्तामिवोत्सुकः । कुर्वन् शिरसि गुर्वाज्ञां **वज्रः** पुलकितोऽचलत् ॥२५०॥
युतो गुरुनियुक्ताभ्यामृषिभ्यां स बभौ पथि । सञ्चलन् गगने शुक्रबुधाभ्यामिव भानुमान् ॥२५१॥
दिदृक्षुर्भद्रगुप्तास्यं दशपूर्वीसुधाविधुम् । **उज्जयिन्यामयं** [१]यातो रजन्यामवसद्बहिः ॥२५२॥
**भद्रगुप्तो** गुरुः सुप्तोत्थितः शिष्यान् प्रगे जगौ । अद्य प्रातःक्षणेऽस्माभिरलाभि स्वप्न ईदृशः ॥२५३॥
जानीमः कश्चिदागन्तुर्दुग्धपूर्णपतद्ग्रहम् । गृहीत्वाऽस्मत्करात्पीत्वा तृप्तश्च मुमुदेतराम् ॥२५४॥
[1]तच्छमेधावतां मेधावतां धुर्यः समेष्यति । स कोऽप्यद्यातिथिर्यो मे दशपूर्वीं ग्रहीष्यति ॥२५५॥
अद्य मे सफलः सैष दशपूर्वीपरिग्रहः । यद्भविष्यति तद्दानयोग्यपात्रसमागमः ॥२५६॥
दिष्ट्या न यास्यति मयि व्युच्छित्तिं दशपूर्व्यसौ । दिष्ट्याद्याप्युद्भवत्पात्रभाजनं जिनशासनम् ॥२५७॥
इदं वदति सूरीन्दौ हर्षोत्कर्षवशंवदे । नैषेधिकीं वदन् **वज्रो** विवेश वसतेर्मुखम् ॥२५८॥
आकृतिं प्रकृतिं चाऽस्य पश्यन् दध्यौ मुदा गुरुः । अयं स विद्यादानाख्यमदिच्छाकल्पपादपः ॥२५९॥
अथोत्सुकतमो **वज्रः** प्रणमन् पादयोः पुरः । आलिङ्गनोत्सुकहृदा कराभ्यां गुरुणाऽऽददे ॥२६०॥
प्रसिद्धिसदृशाऽऽकृत्या **वज्रं** निश्चित्य तं गुरुः । आलिङ्ग्योवाच तद्वक्त्रचन्द्रे चक्षुश्चकोरयन् ॥२६१॥
कच्चित्सुखविहारस्ते कच्चित्ते गमनाऽऽमयम् । कच्चित्तपस्ते निर्विघ्नं [2]कच्चित्ते कुशली गुरुः ॥२६२॥
विरहय्य गुरोः पादपद्मसेवासुखान्यपि । किञ्च [3]वज्रयते ! किं ते**ऽवन्ती**वीहारकारणम् ॥२६३॥
व्यक्तभक्तिभराभोगभङ्गीभुग्नशिरा गुरून् । वन्दित्वाऽथ जगौ **वज्रो** [4]गौरगौरवया गिरा ॥२६४॥
आदौ सुखविहारादि यत्पूज्यैः समपृच्छ्यत । तदस्त्येव देवगुरुप्रसादादखिलं खलु ॥२६५॥
गुरोराज्ञागिराऽध्येतुं दशपूर्वीमिहाऽऽगमम् । तदेकवेदी तज्ज्ञानप्रदानेन प्रसीद मे ॥२६६॥
तथेत्यथ प्रतिज्ञाय तस्मै सस्मेरगीर्गुरुः । आदिशद्दशपूर्वाणि [5]दशपूर्वादिदिग्श्रुतः ॥२६७॥
दशपूर्वीमथाधीतपूर्वी **दशपुरं** प्रति । **भद्रगुप्ता**ज्ञया **वज्रो**ऽगच्छद् गच्छगुरूत्सुकः ॥२६८॥
अथागतस्य **वज्रस्य** प्रीतः **सिंहगिरिर्गुरुः** । अधीतदशपूर्वस्य पूर्वानुज्ञां विनिर्ममे ॥२६९॥
तैर्**वज्रस्य** पुराजन्मसुहृद्भिर्जृम्भकामरैः । पूर्वानुज्ञोत्सवे सृष्टा दिव्य[6]प्रसववृष्टयः ॥२७०॥
योग्य इत्यथ **वज्रस्या**ऽयच्छद् गच्छभरं गुरुः । स्वयं च स्वर्गमारोहद् गृहीतानशनक्रमः ॥२७१॥
श्री**वज्र**मुनिराजस्तु यतिपञ्चशतीवृतः । विजहार सहाऽरण्यगिरिग्रामपुरां [२]धराम् ॥२७२॥
यत्र यत्र ययौ **वज्रस्त**त्र तत्र जनोऽजनि । तच्छील-श्रुत-सौभाग्य-लावण्याऽद्वैतरञ्जितः ॥२७३॥
इतश्च **पाटलीपुत्रे** धनाढ्योऽभूद् **धनो** वणिक् । तत्कन्या**रुक्मिणी**त्यासीद्रूपस्येव परं पदम् ॥२७४॥

---

१. याति - P जातो - L, KH । २. पुरां - P ।

टि. 1. तस्मात् शम् (अव्य०) सुखं तदेव एधा समृद्धिः सा अस्यास्ति शमेधावान् - तेषां धुर्यः अग्रेसरः । 2. कच्चित् (अव्य०)-प्रश्नार्थे । 3. वज्रमुने ! । 4. गौरा विशुद्धा च गौरववती च गौरगौरवा, तया । 5. पूर्वादिदशदिग्, तासु श्रुतः प्रसिद्धाः । 6. प्रसवः पुष्पम् ।

तस्य श्रेष्ठिप्रधानस्य यानशालास्पदे तदा । अवसन् विशदाः साध्व्यः श्री**वज्र**स्वामिनो मुनेः ॥२७५॥
ताः शील-श्रुत-सौभाग्य-लावण्यादिगुणस्तवम् । नित्यं वितेनु**र्वज्र**स्य **श्रेयसे हि गुरुस्तुतिः** ॥२७६॥
श्रावं श्रावं गुणश्रेणिं तन्मुखात्तादृशं भृशम् । श्री**वज्रे** वीतरागेऽपि **रुक्मिणी** रागभागभूत् ॥२७७॥
इदं च निश्चयादूचे निशाया इव चन्द्रमाः । कुरूपाया अपि स्वामी सुरूपो वज्र एव मे ॥२७८॥
साध्व्यस्तामवदन् मुग्धे ! मेदं वादीः सुवादिनि ! । निष्फलोऽस्मद्गुरोरग्रे ग्रहोऽयम[1]परिग्रहे ! ॥२७९॥
सा बभाषे न भाषेयं सत्या मे यदि भाविनी । शरणीकरणीयस्तत्तत्प्रियो मम संयमः ॥२८०॥
इति निश्चितचित्तेयं कूणयन्ती [2]विकुणिकाम् । वरणोक्तं वरं कं कं [3]निचकार न कन्यका ॥२८१॥
इतश्च **पाटली[१]पुत्रे सुनन्दासूनु**सूरिणा । विहारक्रमयोगेन समाजग्मे शमाब्धिना ॥२८२॥
आयाति भगवान् **वज्र**स्वामीति प्रीतिपूरितः । जगाम सन्मुखं तस्य महीभर्त्ता महर्द्धिभाक् ॥२८३॥
सर्वेऽप्यथ महाशीला महारूपा महारुचः । शमवन्तः समायान्तो रूपेणैक्ष्यन्त सूरिवत् ॥२८४॥
क एतेषु गुरुर्यस्मै करोमि प्रथमं नमः । इति संशयदोलायां न्यधाच्चेतश्चिरं नृपः ॥२८५॥
साधून्नृपः स पप्रच्छ ततस्तुल्योरुतेजसः । को भवत्सु विभुर्वज्रः स्राग् वन्दे पूर्वमेव तम् ॥२८६॥
साधवः क्ष्माधवमथ प्रथमानगिरो जगुः । श्री**वज्र**स्य भ्रमोऽस्मासु सरःस्विव [4]सरस्वतः ॥२८७॥
सर्वेषामपि साधूनां धुरि श्लाघ्यगुणोदयः । यो भात्युडुषु [5]राजेव राजन् ! **वज्र**मवैहि तम् ॥२८८॥
निरीक्ष्याथ महीनाथः श्री**वज्र**स्वामिनं मुनिम् । दुर्ल्लोकाऽऽलोकदुःखेभ्यो ददौ हर्षाश्रुभिर्जलम् ॥२८९॥
भालं व्यभूषयद्भूपो भवतापभिदे ततः । **सुनन्दा**नन्दनपदद्वन्द्ववन्दनचन्दनैः ॥२९०॥
श्री**वज्र**मुनिराजोऽपि मुनिराजिविराजितः । उरीचक्रे पुरीपार्श्वे [२]वनच्छायमुपाश्रयम् ॥२९१॥
देशनां दशना[6]ऽभीशुदम्भडिण्डीरमण्डिताम् । मुनीन्दुर्विदधे धर्मोदधेरूर्मिमिवाथ सः ॥२९२॥
तदा तद्देशनावारिनिवारितमलोज्ज्वलाः । आत्तपुण्यस्रजः सौधं जना निजं निजं ययुः ॥२९३॥
अन्तःपुरपुरन्ध्रीणां पुरः पुरपतिस्ततः । प्रीतिस्फीतमनाः प्रोचे चञ्चद्रोमाञ्चकञ्चुकः ॥२९४॥
इन्दु[३]मुख्यः ! सतां मुख्यः श्री**वज्रो** वज्रमंहसाम् । मयोल्बणगुणग्रामरम्यः सम्यगनम्यत ॥२९५॥
तत्पादस्पर्श-तद्रूप-तद्वाक्-तच्छ्वाससौरभैः । तद्गुणग्रहपीयूषैः को न तृप्तेन्द्रियो भवेत् ॥२९६॥
तद्यूयमपि सम्भूय याथ चेन्नाथमीक्षितुम् । कृतकृत्यस्ततो युष्मदात्माप्युज्झेद् भवभ्रमान् ॥२९७॥
इति भर्तुर्गिरं भावशुद्धां शुद्धान्तयोषितः । परिपीय श्रुतिपुटैर्जगुः प्रगुणसम्मदाः ॥२९८॥
स्वामिन् ! [४]मनोरथः सैष चिराच्चक्रे [7]मनोरथः । स्वभाव-भवदादेश[५]वाह्याभ्यां चरतु द्रुतम् ॥२९९॥

---

१. पुत्रं-P । २. वनछायामु-C, K, KH, D, A, B, H, L । ३. मुख्याः-C । ४. मनोरथं-C । ५. वाहाभ्यां-C, A ।

टि. 1. अपरिग्रहा-कन्या, तत्संबोधने । 2. विकूणिका-नासा, ताम् । 3. पराभवमकरोत् । 4. समुद्रस्य । 5. राजा - चन्द्रः । 6. अभीशुः - अंशुः । 7. मन एव रथः, मनोरथः ।

एत्याथ यानयायिन्यो महीनाथ[1]नतभ्रुवः । धृतानन्दाः **सुनन्दायाः** नन्दनं ता ववन्दिरे ॥३००॥
द्वितीयेऽह्नि ह्रियं मुक्त्वा **रुक्मिणी** जनकं जगौ । **वज्र**स्वामी समेतोऽस्ति यत्र मे वरणस्पृहा ॥३०१॥
नानास्थानरतिर्यावदयं व्रजति नान्यतः । एतस्मै दत्त तावन्मां शरणं मृत्युरन्यथा ॥३०२॥
इत्याकर्ण्य कृती कन्यां दिव्याभरणभासुरीम् । **श्रीवज्र**स्वामिने निन्ये **धनः** सार्द्धं धनव्रजैः ॥३०३॥
**श्रीवज्रो** भगवान् पौरगौराङ्गीक्षोभशङ्कया । सङ्क्षिप्तरूपः स पुरा पुरोद्देशं विवेश तम् ॥३०४॥
**वज्र**स्वामिगुणग्रामप्रीताश्चैवं जगुर्जनाः । गुणानुरूपं रूपं हा [१]नाऽस्य विश्वगुरोरभूत् ॥३०५॥
तदा च वाचः पौराणां ता मत्वा चित्तदुःखजाः । प्रभुः स्वाभाविकं रूपमभजद् भूरिलब्धिकः ॥३०६॥
स्वामी चामीकरमयं विचकार च वारिजम् । तदध्यास्य व्यधाद्धर्मदे[२]शनां क्लेशना[३]शनीम् ॥३०७॥
तन्निरूप्य गुरोः रूपं मूर्द्धानं दुधुवुर्जनाः । [2]सितच्छदच्छदस्पृष्टकर्णान्तविवरा इव ॥३०८॥
सङ्क्षिप्तं खलु पूःक्षोभशङ्कया स्वामिना च यत् । अद्याऽस्मत्कृपया रूपं पुनराविरभावि तत् ॥३०९॥
इत्यन्तश्चिन्तयन्तस्ते दधिरे मुदमद्भुताम् । गुणानुरूप**श्रीवज्र**स्वामिरूपनिरूपणात् ॥३१०॥
धनस्तु दध्यौ धन्या मे कन्या सेयं स्वयं यया । अयं वरयिता चित्तेऽनुध्यातोऽनन्यचित्तया ॥३११॥
धनस्य तु मनः कन्यादानवक्त[४]व्यचिन्तकम् । न **वज्र**देशनाऽऽकर्षन्महर्षेरिव वामदृक् ॥३१२॥
**धनो**ऽथ प्राञ्जलि**र्वज्रं** देशनान्ते व्यजिज्ञपत् । इमां मम सुतां स्वामिन्नासक्तहृदमुद्वह ॥३१३॥
**वज्र**स्वामी मम पतिर्मृतिर्वा शरणं मम । इत्यस्यां सप्रतिज्ञायां कृपां कुरु कृपामय ! ॥३१४॥
अमूर्दास्यामि च स्वामिन् ! पाणिमोचनपर्वणि । अमिताः साधुकोटीर ! स्वर्णकोटीरहं तव ॥३१५॥
तमज्ञानमथ ज्ञात्वा **वज्र**प्रभुरभाषत । भोगाः पुण्यश्रियां रोगास्तद्योगानीहतेऽत्र कः ॥३१६॥
स्त्रियः श्रियश्च निश्चित्य [3]तन्निदानमनादितः । तद्दानमुचितं भाति किं महाभाग ! मां प्रति ॥३१७॥
किमियं मयि मांसासृगस्थिकूटेऽनुरागिणी । दिशाम्यस्याः पतिं तं यो देवीनामपि दुर्ल्लभः ॥३१८॥
यस्य प्रेष्या गुणाः सर्वे रूपश्रीः यस्य किङ्करी । यस्य दास्यः श्रियः सर्वा यस्य किञ्चिन्न दूषणम् ॥३१९॥
यत्प्रसादकणाद् भान्ति सुरासुरनरेश्वराः । कोशो यस्यातिभ[५]क्तैकप्रदेयः पदमव्ययम् ॥३२०॥
कृतिन् ! स तव कन्यायाः संयमोऽस्तु मनःप्रियः । यदि त्वमनुजानासि तत्करोमीह[६]मेलनम् ॥३२१॥
इति श्रीवज्रसूरीणां सुधाभु[७]क्तिभिरुक्तिभिः । शान्तमोहज्वरा पथ्यं व्रतमादत्त **रुक्मिणी** ॥३२२॥ कलापकम् ॥
तदा तदुक्तिभङ्गीभिरुत्सङ्गीकृतबोधयः । बभूवुर्बहवोऽप्याशु भवाभिभवने भटाः ॥३२३॥
महापरिज्ञाध्ययनाद्वज्रः सङ्घाऽर्थमन्यदा । पदानुसारिलब्ध्यैवोद्दध्रे विद्यां **खगामिनीम्** ॥३२४॥

---

१. नाद्य – C । २. शनाः P । ३. शनीः P । ४. चित्तकं – C । ५. भक्त्यैक – A । ६. मेहनं – KH । ७. सुक्ति – A, भक्ति – P ।

टि. 1. नतभ्रूः–स्त्री महीनाथस्य राज्ञ्यः इत्यर्थः । 2. सितच्छदः हंसः तस्य छदः पक्षः, रूपस्योज्ज्वलत्वादियमुपमा, तेन स्पृष्टः कर्णान्तविवरः येषां ते । मूर्ध्नः धूनने कारणत्वादस्य कथनम् । 3. तेषां निदानं = भोगानां निदानं मूलकारणं स्त्रियः श्रियश्च अनादितः इत्यर्थः ।

शक्तिर्मनुष्यक्षेत्रान्तर्भ्रान्तौ[१] मे विद्ययाऽनया । नेयं देया च कस्मैचिद्वज्रः सङ्घेऽभ्यधादिति ॥३२५॥
अन्यदा पूर्वदिग्भागादागाद् गुरुरुदग्दिशम्[1] । प्रावर्तत च तत्रोच्चैर्दुर्भिक्षं दारुणं तदा ॥३२६॥
तदाऽतिदीर्घदुर्भिक्षविलक्षः श्रावकव्रजः । आगत्य नत्वा श्रीवज्रयतिराजं व्यजिज्ञपत् ॥३२७॥
इह दुर्भिक्षसाम्राज्ये भुञ्जानानां मुहुर्मुहुः । अपि भूयोभिरिभ्यानां[२] प्रभो ! तृप्तिर्न भोजनैः ॥३२८॥
इभ्यौकसां भिक्षुभयान्नोद्घटन्ते कपाटकाः । पक्ष्माणि विषयत्रासादिव योगीन्द्रचक्षुषाम् ॥३२९॥
हृष्यज्जनसहोदस्तक्वणद्राजनवाद्यभृत्[३] । गृहस्थानां गृहेष्वन्ने राद्धे वर्द्धापनं भवेत् ॥३३०॥
राद्धैरनल्पनीराल्पकणचूर्णाशनैर्जनाः । पुरा बहिरिवेदानीं शोधयन्त्यन्तरा वपुः ॥३३१॥
क्रयविक्रयगं तक्रकणाद्यादि[४] रलव्रजः[2] । ताड्यमानोऽपि दण्डाग्रैराच्छिद्याऽऽच्छिद्य खादति ॥३३२॥
आकृष्टासिशतत्रातं याति त्रिदशसद्मसु[3] । रङ्कराजकरापातभयान्नैवेद्यभाजनम् ॥३३३॥
धिगस्मानपि भिक्षार्थमभ्यायातेषु साधुषु । दर्शयामः समुत्पाद्य सद्यो[५] वस्तुष्वनेषणाम् ॥३३४॥
भिक्षां भव्यगृहे लब्धामीष्टे पातुं रलव्रजात् । येषां तीव्रं तपस्तेजस्ते जयन्ति तपोधनाः ॥३३५॥
अन्नसन्तानचिन्ताभिः क्षुत्सन्तापैरिति[६]क्रमात् । धर्मनिर्माणकर्माणि विस्मृतिं यान्ति नाथ ! नः ॥३३६॥
तदीदृग्दुःखसङ्कष्टात् सङ्घमुद्धर्तुमर्हसि । प्रभूताद्भुतलब्धीनामब्धीभूतोऽसि यत् प्रभो ! ॥३३७॥
विद्योद्योगोऽपि[७] सङ्घार्थे न दोषायेति च प्रभुः । विचक्रे चक्रभृच्चर्मरत्नवत् विकटं पटम् ॥३३८॥
सङ्घं निवेश्य निःशेषं तस्मिन्नन्तर्निवेश्य च । विद्यां विद्योतयामास गुरुर्गगनगामिनीम् ॥३३९॥
श्रीवज्रस्वामिशक्त्योर्वी स्वयं देहेन किं दिवि । एतीति द्युसदां भ्रान्तिं ददद्व्योम्नाऽचलत्पटः ॥३४०॥
**दत्ता**भिधानः श्री**वज्र**यतेः शय्यातरस्तदा । वारिग्रहणकार्येण गतस्तत्कालमागतः ॥३४१॥
वीक्ष्य **वज्र**मुनिं व्योमचालिनं सङ्घशालिनम् । दक्षस्तत्क्षणमुत्खाय मूर्द्धजान्[८] मूर्द्धदृग्[4] जगौ ॥३४२॥
पुरा शय्यातरोऽहं वः स्वामिन् ! साधर्मिकोऽधुना । तत्किं मामीदृशि स्थाने मुक्त्वा यासि जगद्गुरो ! ॥३४३॥
तमित्यालापमालोक्य[5] तत्कालोत्खातमूर्द्धजम् । दशपूर्वीसुधासिन्धुः सूत्रार्थमिममस्मरत् ॥३४४॥
ये साधर्मिकवात्सल्ये स्वाध्याये चरणेऽपि वा । तीर्थप्रभावनायां वोद्युक्तास्ताँस्तारयेन्मुनिः ॥३४५॥
इत्यागमार्थमाश्रित्य **सुनन्दासूनु**सूरिभिः । तस्मिन् विद्यापटे पर्यारोपि शय्यातरोऽपि सः ॥३४६॥
ततः सङ्घतनूतेजस्तोमैराशाः प्रकाशयन् । पटश्चचाल विश्वस्य सारोद्धार इवाम्बरे ॥३४७॥
सर्वैर्गन्धर्वसिद्धाद्यैर्वन्द्यमानः पदे पदे । भक्तिनम्राननं सङ्घं[९] मोदयन् देशनोक्तिभिः ॥३४८॥

---

१. भ्रान्तं - C। २. भिरुच्या - P भिरिच्चिा - L, KH। ३. कैतवान् - P, C। ४. तत्र - P, KH। ५. द्योवोवस्त्वनेषणात् - C। ६. रति - B, L, A, H रपि - KH, C। ७. द्यायो - KH, L। ८. जानूर्द्ध - L, H, K, KH जानूर्द्ध्वं - C। ९. वीक्ष्य - P।

टि. 1. वज्रस्वामी इत्यर्थः। 2. रलव्रजः-पशूनां समूहः। 3. जिनालयेषु। 4. मूर्द्धनि अग्रभागे दृक् यस्य मूर्द्धदृक्। 5. इति आलापः यस्य सः, तम्।

किल त्यक्तोष्मजाड्याभ्यामर्क्केन्दुभ्यामखेदितः । पटयानो ययौ **वज्रः** पुरं नाम्ना **महापुरम्** ॥३४९॥
विद्योतमानो वसुभिः सुभिक्षस्पृशि पत्तने । सङ्घः सङ्घट्टमानाङ्गशोभः सोऽभूदिह क्रमात् ॥३५०॥
परस्परस्फुरद्वादा धर्मकर्ममहोत्सवे । जना जैनाश्च बौद्धाश्च प्रायेण [१]न्यवसन्निह ॥३५१॥
धर्मार्थनिर्मितानल्पनित्यवित्तचयव्ययैः । जनैः पुनरजीयन्त बौद्धश्राद्धा मुहुर्मुहुः ॥३५२॥
विज्ञप्य बौद्धलोकेन बुद्धभक्तं ततो नृपम् । आरामिका न्यवार्यन्त जैनेभ्यः कुसु[२]मार्प्पणात् ॥३५३॥
कपर्दसुलभं काममलभन्त जिनार्च्चकाः । पुष्पमेकमपि स्वर्णकोटीभिरपि न क्वचित् ॥३५४॥
रत्नैरगुरुकस्तूरीकर्पूरसुरभीकृतैः । ततो जिनार्चनं जैना नानापुष्पैरिव व्यधुः ॥३५५॥
एवं जितद्विषोऽप्येते नत्वा वज्रगुरुं जगुः । पुष्पैर्विना न राजन्ते जिनराजार्चनक्रियाः ॥३५६॥
[३][1]अर्यपर्युषणापर्व सर्वस्वं जिनधर्मिणाम् । इदमायातमासन्नं क्वाऽऽसाद्याः कुसुमस्रजः ॥३५७॥
विना पुष्पैर्न हृष्यामो रत्नौघैर्जिन[४]पूजिनः । प्रीतिरुत्खातनेत्राणां नेत्रै रत्नमयैः कुतः ॥३५८॥
इत्थम्भूताः पराभूतास्तैर्वयं [2]राजवर्चसात् । बहुलब्धिनिधे ! जीवन्मृतान् जीवय नाथ ! नः ॥३५९॥
इदं वदन्तस्ते श्राद्धाः श्रीवज्राय न्यवेदयन् । वेलाप्र[५]वृद्धि दुःखाब्धि दृग्[६]मार्गोच्छृङ्खलैर्जलैः ॥३६०॥
तीर्थप्रभावनाभोगे यतन्ते योगिनोऽपि हि । इत्युक्त्वाऽऽश्वास्य तं वर्गं श्रीवज्रो वियदुद्ययौ ॥३६१॥
अथागमन्निमेषेण मुनि**र्माहेश्वरीं** पुरीम् । तत्रागा**द्दग्निदेव**स्योपवने विस्मयावहे ॥३६२॥
मित्रं **धनगिरे**स्तत्र मालिक**स्तडिता**भिधः । प्रातरायातमालोक्य **वज्रं** नत्वाऽवदन्मुदा ॥३६३॥
अद्यास्मि कृतकृत्योऽहं वज्र ! त्वन्मुखवीक्षणात् । तथाप्यादिश कृत्यं मे किमपि स्वमुखोक्तिभिः ॥३६४॥
**वज्रस्वामी** तमारामपालमित्यालपत्ततः । कार्यं नः कुसुमैः कैश्चिदीशस्त्वं च तदर्प्पणे ॥३६५॥
उद्यानपालोऽप्यालापीत् पुष्पलक्षाणि [७]विंशतिः । भवन्तीहान्वहं तानि गृहाणानुगृहाण माम् ॥३६६॥
यावदायामि गत्वाऽग्रे तावदेतानि सज्जयेः । [3]तदेत्यादिश्य तं **क्षुद्रहिमा**द्रिमगमन्मुनिः ॥३६७॥
तत्र शाश्वतचैत्येषु नमश्चक्रे मुनिर्जिनान् । तद्वन्दनागतैर्वन्द्यमानो नानासुरव्रजैः ॥३६८॥
पुष्पैरिव [८]द्रवीभूतैरुज्ज्वलैर्मञ्जुलं जलैः । **वज्र**स्तत्र ययौ **पद्मा**सद्म **पद्मा**स्पदं ह्रदम् ॥३६९॥
ह्रदेऽस्मिन् शैत्यनैर्मल्यमाधुर्याधिक्यमिच्छता । मरालजालतामेत्य सुधाभासेव सेविते ॥३७०॥
षट्पदीभूय गायद्भिर्भासुरं किन्नरैरिव । **पद्मायाः** सद्म पद्मं स रत्नैकमयमैक्षत ॥३७१॥ [युग्मम्]
[4]पद्मैकं पद्ममुच्चित्य चलिता देवमर्च्चितुम् । **वज्रं** वीक्ष्याऽनमत् प्रीता दत्ताशीः सोऽपि तस्थिवान् ॥३७२॥

---

१. न्यव - P । २. मार्पणं - B, A, H मार्चनं - KH, L । ३. अद्य - KH । ४. पूजने - A, M पूजितः KH, पूजिने B पूर्जितः L । ५. वृद्धं - KH, C । ६. मात्रो - P । ७. विंशति - P । ८. द्रवैभूतै - C ।

टि. 1. अर्य (त्रि)-पूज्यम् । 2. राज्ञः वर्चस् तेजः राजवर्चसः [हेम० - ७-३-८३] अत् समासान्तः तस्मात् । 3. तदा इति आदिश्य इति विग्रहः । 4. पद्मा लक्ष्मीः एकं इति विग्रहः ।

किं करोमीति पद्मायां वदन्त्यामुदयन्मुदि । तदा तत्पाणिपद्मस्थं मुनिः पद्ममयाचत ॥३७३॥
किमादिष्टं ? ददामीन्द्रवनस्य कुसुमान्यपि । इत्युदित्वा मुनीन्द्राय कमलं **कमला**ऽऽर्पयत् ॥३७४॥
पथा यथाऽऽगतेनाऽब्जकलितश्चलितस्ततः । **हुताशन**वनोत्सङ्गमङ्गीचक्रे महामुनिः ॥३७५॥
ततोऽद्भुतमणिस्थानं विमानं सङ्घमानदम् । विचक्रे मुनिशक्रेण शक्र[१]यानं [1]विमानयत् ॥३७६॥
न्यस्याऽन्तरुदयच्चन्द्रधाम[2]तामरसं श्रियः । पार्श्वे [२]वलक्षऋक्षाणि पुष्पलक्षाणि स न्यधात् ॥३७७॥
लक्ष्मीसहस्रपत्रस्य च्छत्रस्येव तले स्वयम् । विनिविष्टः प्रकृष्टश्रीर्मुनिराजो रराज सः ॥३७८॥
स्मृतागतैर्वपुर्धामोड्डामरैर्जृम्भकामरैः । सेवितः स्वस्वयानस्थैस्तूर्यत्रयलयश्रिया ॥३७९॥
श्री**वज्रो** वर्धयन् सङ्घमहिमानं **हिमाद्रि**तः । विजहार विमानेन पुरीं प्रति **महापुरीम्** ॥३८०॥
तद्विमानं मणीतेजःपुञ्जपिञ्जरिताम्बरम् । निरूप्याभिपतद्बौद्धा मिथस्ते मदिनोऽवदन् ॥३८१॥
अहो महोत्सवः पुण्यस्पर्शने बौद्धदर्शने । यस्मिन्नमी समीयन्ते महिमार्थं विमानिनः ॥३८२॥
इदं वदति सानन्दे बौद्धवृन्दे विमानिनः । कृतजैनमनःशैत्या जिन[३]चैत्याय ते ययुः ॥३८३॥
ततो दीनमुखैः पीनदुःखैः कलुषमानसैः । बौद्धैर्हाकार-धिक्कार-सूत्कारव्याकुलैः स्थितम् ॥३८४॥
अथ दिव्यप्रसूनाब्जविराजज्जिनपूजनाः । तूर्यत्रयलयोज्जृम्भमाणजृम्भकदेवताः ॥३८५॥
हृष्यद्भिर्जनताऽदृष्टपूर्वाः पूर्वासिनां नृणाम् । जैनैः पर्युषणापर्वमहिमानः प्रतेनिरे ॥३८६॥ युग्मम् ॥
तत्पुष्प[४]पूरसौरभ्यपूर्णायां पुरि पुस्फुरे । ध्वनद्भिर्बौद्धदुष्कीर्त्तिपटहैरिव षट्पदैः ॥३८७॥
तन्माहात्म्यस्फुरत्शुद्धभावनो [3]बुद्धभावमुक् । तत्राऽजनि तदा जैनः सप्रजोऽपि प्रजापतिः ॥३८८॥
इतश्च **सोमदेवो**ऽभूत् पुरे **दशपुरे** द्विजः । **रुद्रसोमा** च तत्कान्ता संजज्ञे जिनधर्मभाक् ॥३८९॥
उभावभू[५]तामुद्भूतविनयाद्यगुणोद्यतौ । नाम्ना**ऽऽर्यरक्षितः फल्गुरक्षित**श्च तयोः सुतौ ॥३९०॥
अधीयानः सुधी[4]मौञ्जीबन्धादे**वार्यरक्षितः** । यावत्यभूत्पितुः पार्श्वे विद्यामादत्त तावतीम् ॥३९१॥
अधिकाधिकविज्ञेयग्रहणैकाऽऽग्रहस्ततः । पर्यट **पाटलीपुत्रं** नगरं स गुरूत्सुकः ॥३९२॥
चत्वारोऽङ्गैः समं वेदा मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च तेनाधीतानि धीमता ॥३९३॥
चतुर्दशाऽप्यसौ विद्यास्थानान्येतानि शुद्धधीः । सुकण्ठः कण्ठवर्त्तीनि कृत्वा **दशपुरं** ययौ ॥३९४॥
चतुर्वेदी कलावेदी नेदीयान्नगरस्य सः । यदाऽभवत्तदा भूपः स्वयं सन्मुखमाययौ ॥३९५॥
तमारोप्य द्विपस्कन्धे द्विजं **मौद्रायणो** नृपः । चतुर्वेदोऽयमित्युद्यद्भक्तिः प्रावीविशत्पुरि ॥३९६॥
लोकैरुपास्यमानोऽयं नानोपायनपाणिभिः । स्वगृहस्य बहिःशालाभागमागत्य तस्थिवान् ॥३९७॥

---

१. मानं - C, A । २. विलक्ष - KH, ऋक्षवल्लक्षाणि - A । ३. चैत्यालये - L, KH । ४. पौर - P । ५. तामद्भुत - B ।

टि. 1. तिरस्कुर्वत् इत्यर्थः । 2. तामरसं - रक्तोत्पलम् । 3. बौद्धदर्शनत्यागी इत्यर्थः । 4. मौञ्जीबन्धः यज्ञोपवीतदानरूपसंस्कारः, तत आरभ्य इत्यर्थः ।

चरित्रैर्गोत्रपावित्र्यकरोऽयं प्राप्तवानिति । स्वजनाः सदने तेनुस्तोरणस्वस्तिकादिकम् ॥३९८॥
स च द्रागदरिद्रोऽभूल्लोकोपायनकोटिभिः । **पुंसां [१]पूजा हि [1]भूजानिजनिता जनयेद्धनम्** ॥३९९॥
अन्येद्युरिदमध्यायदयं धिग् मे प्रमादिताम् । न यन्मातुः पदद्वन्द्वं वन्देऽद्यापि चिराऽऽगतः ॥४००॥
अस्मत्सुखैकसुखिनीमस्मद्दुःक्खैकदुःखिनीम् । प्रवासद्रुफलैर्विद्या-वित्तैरानन्दयामि ताम् ॥४०१॥
अथ सन्देहसन्दोहमुच्छिन्दन् पृच्छतां सताम् । कृत्वाऽत्युदारं शृङ्गारं मध्येऽगारं जगाम सः ॥४०२॥
अनमज्जननीपादावादावेव ततः कृती । तीर्थानामपि तौ तीर्थं जानन्नानन्दसुन्दरः ॥४०३॥
भव दारक ! दीर्घायुस्तव निर्विघ्नमागतम् । सा [२]प्रातिवेशिकीवेदमूचे किञ्चन नाधिकम् ॥४०४॥
पुत्रप्रेमोचितां मातुर्वाचमप्राप्य सोऽब्रवीत् । मूर्खेऽभून्मयि या प्रीतिः सा सविद्येऽपि वो न किम् ॥४०५॥
**रुद्रसोमा**ऽवदन्मौर्ख्याधिक्यं ते विद्ययाऽनया । ययाऽसि जन्तुघातोक्तिस्थिरया निरयातिथिः ॥४०६॥
भवोत्तारेऽभवत्तेऽङ्गजन्मनो मन्मनोरथः । त्वं तु [2]जन्तुभिदामन्तुविद्यायासेन यास्यधः ॥४०७॥
तच्च दुर्गतिभीताऽहं प्रीता हन्त भवामि किम् । **सुख-दुःखैकभागिन्यो जनन्यो ह्यात्मजन्मनाम्** ॥४०८॥
भक्तोऽसि चेन्मयि हितां यदि मां हृदि मन्यसे । स्वर्गापवर्गदं दृष्टिवादं धीमन्नधीष्व तत् ॥४०९॥
अथाऽयमवदन्मातर्या तव क्लेशजातकृत् । त्यक्तैव विद्याऽवद्या सा तद्भवैर्विभवैश्च किम् ! ॥४१०॥
[3]दर्शनं वाद्यमत्रेति यन्नामार्थोऽपि मञ्जुलः । **दृष्टिवाद**म[३]धीयै तं मातः ! ख्यातः क्व तद्गुरुः ॥४११॥
**रुद्रसोमा** हसद्रोमा चालयन्ती ततोऽञ्चलम् । [4]अमन्दनन्ददानन्दमन्दिरं निजगाद सा ॥४१२॥
त्वया पुत्र ! सुपुत्रेण [४]पवित्रः कुक्षिरद्य मे । दूरीकृतं पुराऽधीतं यदूरीकृतमद्गिरा ॥४१३॥
प्रवणो **दृष्टिवादोक्तौ** श्रमणोपासको भव । **विना दिनाधिपोपास्तिं नास्ति दृश्यं महन्महः** ॥४१४॥
सूरि**स्तोसलिपुत्रो**ऽस्ति [5]त्वदिक्षुवणसंश्रयः । भज तं **दृष्टिवादाय** [५]दृष्टिमादाय भूयसीम् ॥४१५॥
प्रातर्मातः ! [६]करोमीदमित्युदित्वा**ऽऽर्यरक्षितः** । **दृष्टिवादं** कदाऽधीये ध्यायन्निति निशि स्थितः ॥४१६॥
[6]सैष शेषे तमिस्रायास्तमिस्राऽमिश्रिते ततः । आपृच्छ्याम्बां गुरून् गच्छन्नुक्तः कोऽसीति केनचित् ॥४१७॥
[7]**बतार्यरक्षितो**ऽस्मीति जल्पन्नालिङ्ग्य तेन सः । उत्कण्ठागद्गदतरस्वरेणेदमगद्यत ॥४१८॥
**शाखापुरा**श्रयोऽहं त्वत्पितृमित्रं महाद्विजः । गृहचिन्ताभरव्यग्रो ह्यस्तनेऽह्नीह [७]नाऽऽगमम् ॥४१९॥

---

१. पूजानि – P । २. प्रातिवेशिनी – P प्रातिवेश्मिकी – C । ३. धीये – H । ४. पवित्रा – C । ५. दृष्टि – KH । ६. करोमीति तामुदित्वा... P । ७. मागतं – P ।

टि. 1. भूजानि–राजा, तेन जनिता पूजा इत्यर्थः । 2. जन्तूनां भिदा हिंसा सैव मन्तुः अपराधः तस्य प्रतिपादिन्यां विद्यायां आयासेन हेतुना अधः अधोगत्यां यासि इत्यर्थः । 3. दर्शनं वाद्यं [५।१।१७ हेम. घ्यण्] वदितव्यं अत्र इति दृष्टिवादः इति यन्नामार्थः तदपि मञ्जुलः रमणीयम् इत्यर्थः । 4. 'सा' इति अस्य विशेषणम् 'मन्दिर' शब्दस्याऽऽविष्टलिङ्गत्वात् । 5. तव इक्षुक्षेत्रे संश्रय- आश्रयः यस्य स त्वदिक्षुवणसंश्रयः । 6. स एष इति विग्रहः [तदः सेः स्वरे पादार्था] [१।३।४५] हेम० इत्यनेन सूत्रेण सन्धिः । 7. बत (अव्य०) संबोधने ।

अद्योत्सुकस्तु प्राप्तस्त्वां गृहाणेमाः सुधारसाः । इक्षुयष्टीर्नव मया सार्द्धास्तुभ्यमुपाहृताः ॥४२०॥
अभिवाद्याभ्यधादार्यरक्षितस्तनुचिन्तया । याम्यहं त्वमिमा मातुः ख्यात्वेदं सर्वमर्प्पयेः ॥४२१॥
अथ विप्रस्तथा चक्रे **रुद्रसोमा**ऽप्यचिन्तयत् । नवपूर्वाणि सार्द्धानि लप्स्यते खलु मत्सुतः ॥४२२॥
अगारद्वारजातेदृग्शकुनोऽ**थार्यरक्षितः** । विद्याभागानहं सार्द्धान्नव लब्धेति धीरगात् ॥४२३॥
द्वारि गत्वेक्षुवाटस्य विशामि वसतिं कथम् ? । गुरून् वन्दे कथं चेति विधिं जिज्ञासुरास्त सः ॥४२४॥
मन्द्रो मालवकैशिक्याद्युज्ज्वलग्रामरागभाक् । स्वाध्यायोऽप्यथ साधूनां धिनोति[1] **स्मार्यरक्षितम्** ॥४२५॥
धार्मिको **ढड्डरो** नामाऽऽजगामाऽहर्मुखे तदा । विवेश वसतिद्वारं सैष नैषेधिकीं वदन् ॥४२६॥
उच्चगीः प्रतिचक्राम स ईर्यापथिकीमथ । वन्दित्वा विधिवत्साधून् प्रतिलिख्याऽऽसने स्थितः ॥४२७॥
यथादृष्टमथाऽशेषं सुधीः कृत्वा**ऽऽर्यरक्षितः** । निविष्टो विष्टरे हृष्टमनाः सद्गुरुदर्शनात् ॥४२८॥
कोऽप्यसौ नूतनः श्राद्धो यन्नाऽवन्दत **ढड्डरम्** । ध्यात्वेत्यपृच्छत्तं सूरिः कुतो धर्मागमस्तव ॥४२९॥
कृती विनयमाधुर्यकृतां धुर्यः कृताञ्जलिः । यथावृत्तमथाचख्यौ सूरिभ्यः **सोमदेवभूः** ॥४३०॥
भद्रभावं च तं मत्वा गौरवाद् गुरवो जगुः । **दृष्टिवादः** परिव्रज्यां विनाऽध्येतुं न बुध्यते ॥४३१॥
अभ्यधात् सोमभूरस्मत्कामकामगवी ध्रुवम् । मूर्द्धोपरि परिव्रज्या स्वामिन् सा मम दीयताम् ॥४३२॥
किन्तु द्रुतमतः स्थानात्क्रियतां विहृतिक्रमः । यततामिह दीक्षायास्त्याजने मा जनेश्वरः ॥४३३॥
इत्युक्ते तं पुरस्कृत्य विहारं विदधे गुरुः । दर्शने शिष्यचौर्यस्य व्यवहारस्तदाद्यभूत् ॥४३४॥
स प्रव्रज्य तपस्तीव्रं तन्वानोऽध्ययनैकधीः । एकादशाङ्गीमुत्सङ्गीचकार मनसो मुनिः ॥४३५॥
आसीत्तस्य गुरोर्यावान् **दृष्टिवादो**ऽपि विस्फुटम् । तावान् भावानुषक्तेनाग्रहेण जगृहेऽमुना ॥४३६॥
भूयानप्यस्ति **वज्रर्षेर्दृष्टिवादः** स्फुटं स्फुटः । मत्वेत्यचालीत् तत्पूतां पुरीं प्रति **महापुरीम्** ॥४३७॥
**उज्जयिन्यां** ययौ **भद्रगुप्ता**चार्यस्य संश्रयम् । तेनोपलक्षित**श्चार्यरक्षितः** पर्यरभ्यत ॥४३८॥
ऊचे च वत्स ! धन्योऽसि कृतकृत्योऽसि कृत्यसि[2] । येन ब्राह्मण्यमुन्मुच्य श्रामण्यमिदमादृतम् ॥४३९॥
क्षीणशेषायुरद्याहमाऽऽदास्येऽनशनं पुनः । मम निर्मम ! निर्माहि निर्यामित्वमिह स्थितः ॥४४०॥
इत्यादेश[3]स्थिरावेशमिमं शमवतां वरम् । श्री**भद्रगुप्त**सूरीन्दुर्विहितानशनोऽन्वशात् ॥४४१॥
**वज्रा**चार्यादधीयेथा भिन्नाश्रयकृतस्थितिः । वसेन्निशां यस्तत्पार्श्वेऽवश्यं सोऽनुम्रियेत तम् ॥४४२॥
तथेति प्रतिपद्याऽथ कृत्वा निर्यामणां गुरोः । पुरीं **महापुरी**माप **वज्र**पादाब्जमण्डनाम् ॥४४३॥
तत्राविशद्विभावर्यां नगर्यां[१] ना**ऽऽर्यरक्षितः** । स्वप्नं निशात्ययेऽपश्यदिमं च दशपूर्वभृत् ॥४४४॥
यदस्माकं पयःपूर्णात् कोऽप्यागन्तुः पतद्ग्रहात् । पपौ भूरितरं क्षीरमवशिष्टं किमप्यभूत् ॥४४५॥

१. नगर्यामार्यरक्षितः - H ।

टि. 1. धिनोति स्म-प्रीणयति स्म । 2. कृती असि । 3. स्थिरावेशः स्थिराग्रहः, इत्यादेशे स्थिरः आवेशः यस्य ।

स्वप्नस्यार्थमथाऽऽचख्यौ श्रीवज्रः शमिनामिति । न्यूनां कोऽप्येत्य शिष्योऽस्मद्दशपूर्वीं पठिष्यति ॥४४६॥
क्षणेऽस्मिन्नाययावार्यरक्षितोऽप्यक्षतोद्यमः । ननाम स्वामिनं वज्रं पृष्टश्च स्वं न्यवेदयत् ॥४४७॥
श्रीभद्रगुप्तवाचाऽनुज्ञाप्य भिन्नं प्रतिश्रयम् । नवपूर्वीमधीयाय लीलयैवार्यरक्षितः ॥४४८॥
विषमं दशमस्याथ पूर्वस्य यमकव्रजम् । अयमध्येतुमारब्ध सुधीरब्धिसुदुस्तरम् ॥४४९॥
ईयुश्च पितृसन्देशास्तस्य यत्त्वां विना वयम् । मग्नास्तमसि लब्ध्वेत्य[१] मुनिमार्त्तण्ड ! मोदय[२] ॥४५०॥
तं सन्देशनिरावेशम[1]ध्येतुं बद्धनिश्चयम् । एत्य नत्वाऽनुजः फल्गुरक्षितो दक्षगीर्जगौ ॥४५१॥
वात्सल्यं तव चेन्नास्ति तदस्ता[2] करुणाऽपि किम् ? । तप्तान् पितॄन् न यत् पासि महात्मन् ! दर्शनामृतैः ॥४५२॥
गन्तुमित्यनुजेनोक्तः स[३] पृच्छन् वज्रसूरिभिः । पठेत्यभिहितः कुर्वन् गुर्वाज्ञामेव संस्थितः ॥४५३॥
पुनः प्रोक्तोऽनुजेनाऽयमाः[3] किं नायासि बन्धवः[४] । प्रव्रज्यार्थं प्रतीक्षन्ते भवन्तं मार्गदेशकम् ॥४५४॥
अथोवाचाऽऽर्यधीरार्यरक्षितः फल्गुरक्षितम् । सत्यमित्यस्ति चेत् त्वं तद्, वत्सा[५]ऽऽदित्स्वा[4]ऽऽदितो व्रतम् ॥४५५॥
इत्यार्यरक्षितगिरा चिराद्दीक्षास्थिराशयः । व्रतं भेजे मुदा वल्गद्वल्गुधीः[5] फल्गुरक्षितः ॥४५६॥
पुनः कनीयसा गन्तुमयमुत्साहितो मुनिः । अधीतविषमाशेषयमकः पृष्टवान् गुरून् ॥४५७॥
निषिद्धः करुणावल्लितरुणा गुरुणा मुनिः । गुर्वाज्ञा-स्वजनाह्वानसङ्कटस्थोऽपठत्पुनः ॥४५८॥
कियद्दशमतः पूर्वादधीतं शिष्यते कियत् । इत्यपृच्छदसौ सूरीन् ग्रन्थकाठिन्यकुण्ठधीः ॥४५९॥
स्मित्वा गुरुर्जगौ बिन्दुरधीतः शिष्यतेऽम्बुधिः । अधीष्व धीर ! शेषं तु पूर्ण[६]मागमयिष्यते ॥४६०॥
इत्युक्तो गुरुभिर्गन्तुमुत्सुकोऽपि पुनः[७] पठन् । पूर्वं दशममप्यर्द्धशेषमेव सुधीर्दधौ[८] ॥४६१॥
गन्तुं कृताग्रहः शिष्टपूर्वग्रहणकुण्ठधीः । प्रणम्यापृष्टवान् वज्रस्वामिनं सोमनन्दनः ॥४६२॥
[९]स्वप्नार्थप्रमितं मत्वाऽधीतं श्रीसूरिभिस्ततः । [6]नियुक्तो बन्धुयुक्तोऽगादसौ दशपुरं पुरम् ॥४६३॥
प्रीतिगौरैः समं पौरैः पुरेशस्तमवन्दत । हर्षान्मातृ-पितृ-भ्रातृमुख्यो गोत्रजनः पुनः ॥४६४॥
तद्व्याख्याभिरभूद्भूपः श्राद्धः सार्द्धं घनैर्जनैः । भेजतुर्भूरिभिः साकं लोकैस्तत्पितरौ व्रतम् ॥४६५॥
श्रीवज्रस्तु क्रमेणाऽऽप्तो विहरन् दक्षिणां दिशम् । देशस्य देशनेतुश्च देशनाभिर्ददौ मुदम् ॥४६६॥
श्लेष्माकुलोऽन्यदा शुण्ठीं केनाऽप्यानाय्य साधुना । भोज्योर्ध्वं भक्षणीयेयमिति कर्णे न्यधाद् गुरुः ॥४६७॥
कृताहारो[7]ऽप्यपागारपतिः श्रुतिपुटस्थिताम् । स्वाध्यायादिरसस्मेरो विसस्मार तथैव ताम् ॥४६८॥
मुखवस्त्रिकया नुन्नां[१०] प्रतिक्रमणकर्मणि[११] । पतितां निशि सस्मार तां खटत्कारतो मुनिः ॥४६९॥

---

१. लब्धेत्य - A । २. मोदयः - P, H, KH, K, C । ३. संपृच्छन् - C, L, KH । ४. बान्धव - B, C बान्धवः A । ५. त्सादतस्व - C, D, L, B । ६. तूर्ण... L, KH, A चूर्ण - C । ७. गुरुः P । ८. ददौ P । ९. पूर्वार्थ P । १०. पुन्नां - P । ११. पर्वणि - P ।

टि. 1. सन्देशे निर्गतः आवेशः आग्रहः यस्य स । 2. अस्ता-दूरीकृता । 3. अप्रव्रजिताः बन्धवः । 4. आदातुं इच्छ । 5. स्फुरन्ती मनोहरा धीः यस्य स । 6. नियुक्तः-प्रेरितः । 7. अपागारपतिः - अपाकृतं त्यक्तं अगारं गृहं येन सः, अपागारः तेषां पतिः, गुरुः ।

दध्यौ च कार्ये चेतः स्म धिग् ममाऽद्य प्रमाद्यति । **स्खलत्येव प्रमादे हि देहिनां सुकृतक्रमः** ॥४७०॥
तं विना भविनामुच्चैर्निष्फले जन्म-जीविते । तत्तनोमि तनोस्त्यागं **वज्रो**ऽभूदितिनिश्चयः ॥४७१॥
द्वादशाब्दं तदा चाभूद्दुर्भिक्षमभितो[१] द्रुतम् । स्वशिष्यं चान्यतो **वज्रसेनं** वज्रो व्यहारयत् ॥४७२॥
नालभन्त क्वचिद्भिक्षां **वज्रस्य** यतयस्तदा । आहरन् गुरुभिर्दत्तं ते भिक्षापिण्डमन्वहम् ॥४७३॥
अजातसंयमाबाधः साधवः! पिण्ड एष वः । यद्यस्ति द्वादशाब्दानि तदाऽऽनीय ददामि तम् ॥४७४॥
नो वा भो वारयित्वाऽन्नं तनुत्यागं वितन्महे । इत्युक्ते गुरुभिर्धर्ममतयो यतयोऽभ्यधुः ॥४७५॥
विरक्ताः पोषके पिण्डे पिण्डे पोष्ये च निःस्पृहाः । नाथ ! तीर्थे क्वचिद्यामस्त्यजामस्तद् द्वयं वयम् ॥४७६॥
तत्कालमेव तत्कालकृतये कृतिनां पतिः । गिरिं प्रत्यचलत्सत्य[२]व्रतव्रतिकृतावृतिः ॥४७७॥
वार्यमाणमतिष्ठन्तं प्रतार्य ग्रामके क्वचित् । एकं क्षुल्लकमुन्मुच्य तेऽध्यरोहन् धराधरम् ॥४७८॥
असमाधिभरो मा भूद् गुरोरिति गिरेरधः । गत्वा स क्षुल्लकस्तस्थौ त्यक्तदेहान्नपानकः ॥४७९॥
असौ शिलातलासीनस्तप्तः [1]सप्ताश्वतेजसा । द्रुतं [३]गतायुरगमद् वशात्मा त्रिदशालयम् ॥४८०॥
तद्देहमहिमाहेतोर्महीमागच्छतः सुरान् । पश्यद्भिर्मुनिभिः पृष्टः कारणं दिष्टवान् गुरुः ॥४८१॥
यतयोऽथ जगुः कीदृग् गतिस्तस्य शिशोरपि । मार्गेऽत्र पश्चान्मुक्तोऽपि यदस्माकं पुरोऽभवत् ॥४८२॥
तत् किं वयं प्रमाद्यामः ? क्रमाद्यामः पथामुना । इत्युक्ते तैः समं भेजे **वज्रो**ऽप्यनशनक्रियाम् ॥४८३॥
मिथ्यादृग् देवता तत्र श्रावकीभूय मोदकान् । मुनिभ्यो दर्शयामास पारणं क्रियतामिति ॥४८४॥
अवग्रहविरोधेन तं [४]विधूयाथ भूधरम् । जगाम शृङ्गमन्यस्य गिरेर्धनगिरेः सुतः ॥४८५॥
[2]सम्मतावग्रहास्तत्र देव्या सम्यग्दृशा भृशम् । मुनयोऽनशनेनामी द्युसदां पदमासदन् ॥४८६॥
[3]पुण्यपूंषि ततस्तेषां वपूंषि समपूजयत् । तं च प्रदक्षिणीचक्रे गिरिं शक्रो रथस्थितः ॥४८७॥
रथापातनतास्तत्राद्यापि [4]भुग्नतमा द्रुमाः । **रथावर्त्त** इति ख्यातिं स बभार च भूधरः ॥४८८॥
श्री**वज्रस्वामि**नि मुनिस्वामिनि स्वर्गगामिनि । तुर्यं संहननं पूर्वं दशमं च विचिच्छिदे ॥४८९॥

**इति श्रीवज्रर्षिकथानकम् ॥**

एतच्च श्री**वज्रस्वामि**चरिताद्भुतं न असम्भावनार्हं सामान्येन सर्वसाधूनामेवंस्वभावत्वात् इत्याह–

**अंतेउरपुरबलवाहणेहिं वरसिरिघरेहिं मुणिवसहा ।**
**कामेहिं बहुविहेहि य, छंदिज्जंता वि नेच्छंति ॥४९॥**

**अन्तःपुरैः** रमणीयरमणीजनैः, **पुरै**र्नगरै**र्बलै**श्चतुरङ्गसैन्यै**र्वाहनै**र्वरवारणाश्वादिभिः, एतेषां द्वन्द्वे, एतैस्तथा

१. तोद्धुतं - B, H, KH, C, A । २. संध - C । ३. गंतारम - C । ४. विभूय - P ।

टि. 1. सूर्यः तस्य तेजः, तेन । 2. सं(अनु)मतोऽवग्रहः येषां ते - संमतावग्रहाः । 3. पुण्यं पुष्णाति-पुण्यपुष् तानि वपूंषि । 4. 'भुजोंत् कौटिल्ये' (१३५१) धातोः क्तप्रत्ययान्तरूपः ।

[1]**वरश्रीगृहैः** प्रधानकोशैस्तथा **कामैश्च, च**शब्दस्य व्यवहितसंबद्धत्वात् प्रार्थनीयैः शब्दादिभिश्च **बहुविधैर्ना**ना-रूपैश्चित्ताक्षेपहेतुभिरित्यन्तदीपकं सर्वविशेषणम्, एतैर्हेतुभूतै**र्मुनिवृषभाः** सुसाधव**श्छन्द्यमाना** निमन्त्र्यमाणा अपि **नेच्छन्ति** नाभिलषन्ति [2]तानीति गम्यमिति सम्बन्धः ॥४९॥

कुतो नेच्छन्ति इत्याशङ्क्य परिग्रहस्य सापायतामाह—

**छेओ भेओ वसणं, आयासकिलेसभयविवाओ य ।**
**मरणं धम्मब्भंसो, अरई अत्थाउ सव्वाइं ॥५०॥**

**छेदः** कर्णादिकर्त्तनं, **भेद**स्त्वगुत्तारणादिः, स्वजनादिभिः सह चित्तविश्लेषो वा, **व्यसनं** [3]बन्ध-ग्रहादिजनिता आपदित्यर्थः । **आयास**स्तदर्जनगोपनादिप्रभवः शरीरव्यायामः, स्वयंकृतः, **क्लेशः** परकृता बाधा **भयं** त्रासो **विवादो** दायादप्रभृतिभिः कलहः, **मरणं** प्राणभ्रंशः, **धर्मभ्रंशः** श्रुतचारित्रलक्षण[4]धर्माच्च्युतिः सदाचारलोपो वा । **अरति**श्चित्तोद्वेगः । एतानि **सर्वाण्य**पि किम् ? अर्थ्यते काम्यते विवेकविकलैरि**त्यर्थो** हिरण्यादिस्तस्मात्स्वपरयोर्भवन्तीति शेषः ॥५०॥ किञ्च प्रस्तुतव्रतविरोध्येवायमर्थ इत्याह—

**दोससयमूलजालं, पुव्वरिसिविवज्जियं जई वंतं ।**
**अत्थं वहसि अणत्थं, कीस अणत्थं तवं चरसि ? ॥५१॥**

अर्थं यदि वहसि किं तपश्चरसीति सम्बन्धः । किम्भूतम् अर्थम् ? आत्मदूषकत्वात् दोषाणां रागादीनां हिंसादीनां वा शतानि, तेषां मूलं कारणं चासौ जालं च, मत्स्यबन्धजालवत् बन्धहेतुत्वात् **दोषशतमूलजालम्** । यद्वा दोषशतस्य तरोरिवावष्टम्भहेतुं वा साधारणकारणन्वान्मूलजालम् । अत एव **पूर्वऋषिभिर्वज्रस्वामि**-प्रभृतिभि**र्विवर्जितं** सर्वथा परित्यक्तं, पूर्वऋषिग्रहणाच्च इदानीन्तनाः कर्मकालादिदोषाद् अर्थवहनप्रवणा भूयांसो दृश्यमाना अपि विवेकिना [5]नालम्बनीकर्त्तव्याः । तथा तं **यदि वान्तं** प्रव्रज्यास्वीकारेण त्यक्तम् **अर्थं** हिरण्यादिकं **वहसि** धारयसि । किम्भूतम् ? **अनर्थं** नरकपाताद्यनर्थहेतुत्वात् । सूत्रस्य सोपस्कारत्वात् ततो हे दुर्मते ! **किमित्यनर्थं** निष्प्रयोजनं **तपो**ऽनशनादिरूपं **चरसि** अनुतिष्ठसि ? नेदं पौर्वापर्येण घटते इत्याशयः ॥५१॥ किञ्च—

**वहबंधणमारणसेहणाओ काओ परिग्गहे नत्थि ? ।**
**तं जइ परिग्गहो च्चिय, जइधम्मो तो नणु पवंचो ॥५२॥**

**वधो** यष्ट्यादिताडनं, **बन्धनं** रज्ज्वादिसंयमनं, **मारणं** प्राणच्यावनं, **सेधनं** नानाविधाः कदर्थनाः । ताः **काः** कथय त्वमेव, याः **परिग्रहे** धनादिसङ्ग्रहे **न सन्ति** ? सर्वा अपि सन्ति इति भावः । **तद्यदि** एवमपि स्थिते **परिग्रह** [6]**एव** सोपस्कारत्वात् प्रतिपन्नयतिधर्मैरपि स्वीक्रियते । **यतिधर्मस्ततो ननु** निश्चयेन **प्रपञ्चो** वेषपरावर्त्तन लोकमोषणोपायत्वाद्विडम्बनमित्यतो बाह्यग्रन्थपरित्यागपूर्वमेव नैर्ग्रन्थ्यं श्रेयस्करमिति भावः ॥५२॥

**इत्याचार्यश्रीउदप्रभदेवसङ्कलितायां उपदेशमालायाः कर्णिकाख्यायां विशेषवृत्तौ प्रथमः परिवेषः संपूर्णः॥**

**द्विपञ्चाशत्तमगाथार्थविवरणम् । आदितो ग्रन्थाग्रम् ४०९१[7]॥**

---

१. विध... C । २. लांति - C । ३. बंद - C, P, B बद्ध - KH, L नंद - H । ४. धर्माव्युति - L, A, धर्माच्युतिः - P, धर्माच्च्युति H B । ५. लंबनां...P । ६. एवं - C । ७. ३९९२ - D, K, ४२७० - C, KH, L, ४३३३ - H, A ।

## अथ द्वितीयः परिवेष आरभ्यते ॥

एतेन बाह्यग्रन्थत्यागमुक्त्वा अधुना कुलाभिमानरूपाऽभ्यन्तरग्रन्थत्यागार्थमुपदिशति—

**किं आसि नंदिसेणस्स, कुलं ? जं हरिकुलस्स विउलस्स ।**
**आसी पियामहो सुचरिएण वसुदेवनामो त्ति ॥५३॥**
**विज्जाहरीहिं सहरिसं, नरिंददुहियाहिं अह महंतीहिं ।**
**जं पत्थिज्जइ तइया, वसुदेवो तं तवस्स फलं ॥५४॥**

**हरिकेशबलर्षि**चरिते प्राक् इहलोकापेक्षया गुणानां पूज्यताद्वारेण कुलस्य अप्राधान्यमुक्तम् । इह तु परलोकमधिकृत्येति न पौनरुक्त्यदोषः । सुखावबोधार्थं च पूर्वमाख्यानकं कथ्यते । तथाहि—

### [ नन्दिषेण-वसुदेवकथानकम् ॥ ]

आसीन्**मगध**देशेषु कश्चिच्**चक्रधरः** पुरा । **नन्दिग्रामे** द्विजो दुःस्थः[१] **सोमिला** नाम तत्प्रिया ॥१॥
नन्दनो **नन्दिषेणो**ऽभूत्तयोर्यस्य शिशोरपि । अभाग्यसागरे मङ्क्त्वा दुस्तरे पितरौ मृतौ ॥२॥
आकेशनखपर्यन्तमपर्यन्तविरूपताम् । तनुं स कलयन् सर्वैः स्वजनैरपि तत्यजे ॥३॥
मातुलोऽथाऽतुलोद्वेगं जीवन्तं मूल्यकर्मणा । ऊचे कदाचिद्दुःस्थं तं सन्ति मे सप्त कन्यकाः ॥४॥
ताभ्यस्तुभ्यं ददाम्[२]येकामहमुद्वोढुमे[३]हि माम्[1] । स्वस्त्रीय ! प्रीयसे येन तत्कार्यमखिलं मया ॥५॥
श्रुत्वेत्यकर्मा तद्गेहं सोऽनन्यगतिको गतः । अखर्वाणि[2] च सर्वाणि गृहकर्माणि निर्ममे ॥६॥
मत्वा पितुरभिप्रायमथ प्रथमकन्यका । जगौ देयास्मि यद्यस्मै तन्मुष्टौ मृत्युरस्ति मे ॥७॥
**नन्दिषेण**मिति श्रुत्वा व्याकुलं मातुलोऽवदत् । कन्यां दास्ये द्वितीयां ते मा स्म भूस्तद्विषादभूः ॥८॥
तद्वत्कन्या द्वितीयाऽपि प्रतिज्ञामग्रहीत्ततः । अन्याभिरपि कन्याभिः प्रतिषिद्धः क्रमेण सः ॥९॥
तं विषण्णं निषण्णं च पुनराचष्ट मातुलः । कयापि कन्ययाऽन्यस्य मयोद्वाह्योऽसि मा शुचः ॥१०॥
स च दध्यौ न मामैच्छन्नमूः स्वजनकन्यकाः । ईहिष्यन्ते ततः किं मामरूपमपरात्मजाः ॥११॥
इत्ययं स्वैरवैराग्यः पुरं **रत्नपुरं** गतः । स्वं तत्राऽनिन्ददुत्पीडः क्रीडतः प्रेक्ष्य दम्पतीन् ॥१२॥
मुमूर्षुरथ मूर्खोऽयं पुरादुपवनं गतः । निरीक्ष्य **सुस्थितं** नाम मुनिं तत्र ननाम सः ॥१३॥
ज्ञानादुद्भाव्य तद्भावमथाऽभाषत तं मुनिः । मुग्धवैरूप्यवैराग्यात् मा कार्षीर्मृत्युसाहसम् ॥१४॥
वैरूप्यादिविपज्जज्ञे येन पापेन कर्मणा । एष्यत्यकृतधर्मस्य तत्पुरस्ते भवान्तरे ॥१५॥
तस्माद्धर्मेण निर्मूल्य कर्मजालमनिर्मलम् । निर्मलं रचयात्मानं मृत्युर्यावन्न धावति ॥१६॥
इत्युक्त्वा बोधयित्वा च तं धर्मं धर्मविद्वरः । मुहुरुत्साहयामास ग्राहयामास च व्रतम् ॥१७॥

---

१. दुःस्थाः C । २. म्येषा - D । ३. मेहिकां - D ।

टि. 1. मम समीपं इत्यर्थः । 2. उदाराणि ।

स गृहीतव्रतः साधुः क्रमाद् गीतार्थतां गतः । अभिजग्राह साधूनां वैयावृत्यविधिं सुधीः ॥१८॥
अनिर्वेदेन तं साधुवैयावृत्यविधायिनम् । संसदि त्रिदशोत्तंसः शशंस प्रशशंस च ॥१९॥
अश्रद्दधानस्तत्सत्यगौरं पौरन्दरं वचः । सुरो **रत्नपुरो**पान्ते कश्चन ग्लानसाध्वभूत् ॥२०॥
द्वितीयसाधुरूपेण स गत्वा तदुपाश्रयम् । षष्ठान्ते पारणायात्तकवलं तमदोऽवदत् ॥२१॥
वैयावृत्त्यं प्रतिश्रुत्य किं भोक्तुं त्वमुपाविशः । मुनिरस्ति बहिस्तृष्णाक्षुधाद्यार्त्तोऽतिसारकी ॥२२॥
**नन्दिषेणो**ऽथ मुक्त्वान्नं पानमन्वेष्टुमुद्यतः । अनेषणीयं तत्कर्तुं शक्त्याऽऽरेभे सुरः स्वया ॥२३॥
मुनिर्लब्धिप्रभावेण सुरशक्तिं विजित्य ताम् । शुद्धं प्राप क्वचित्पानं क्व न कल्पतरुस्तपः ॥२४॥
तं मायामुनिमायातो **नन्दिषेण**मुनिस्ततः । तेन रूक्षाक्षरं साक्षात् चुक्रुशे[१] च कृतक्रुधा ॥२५॥
अहं ग्लानिं वहन्नस्मि त्वं चाहारमहारसः[1] । नाऽऽगतो द्रागतो धिक्त्वां वैयावृत्त्यविनिश्चितम् ॥२६॥
आगो मम क्षमस्वेदं **नन्दिषेण** इति ब्रुवन् । अपाययदयं प्रासु[२] तं पयः कम्पयन् भवम्[३] ॥२७॥
तमुत्तिष्ठेत्यथाचष्ट सोमिलानन्दनो मुनिः । सोऽप्यूचे मुण्ड ! धिक् किं मां न त्वमक्षममीक्षसे ॥२८॥
स्कन्धे तमधिरोप्याऽथ प्रचलन् वसतिं प्रति । पदे पदे **नन्दिषेण**स्तेनेत्थं चुक्रुशेतराम् ॥२९॥
कुतो[४]ऽभिजगृहे वैयावृत्यं कर्तुं न वेत्सि चेत् । मम प्राणा व्रजन्तीव वेगेन व्रजति त्वयि ॥३०॥
पदन्यासैस्ततो मन्दैर्**नन्दिषेणस्य** गच्छतः । वर्च्चोऽङ्गे व्युत्सृजन् तस्य स मायामुनिरब्रवीत् ॥३१॥
तवातिमन्दगमनैरमन्दस्तपनाऽऽतपः । मम लोच[५]मृदौ मूर्ध्नि तनोत्येष पृथुर्व्यथाम् ॥३२॥
इत्यादिवादिनस्तस्य वचांस्यगणयन्नयम् । **नन्दिषेण**स्तदाऽऽरोग्योपायं ध्यायन् शनैर्ययौ ॥३३॥
ज्ञात्वा सुर[६]स्तमक्षोभ्यं **नन्दिषेणस्य** मूर्द्धनि । वर्चोऽपहृत्य विदधे पुष्पवृष्टिपरम्पराम् ॥३४॥
प्रदक्षिणात्रयं दत्त्वा प्रणिपत्य च तं मुनिम् । तस्मै शशंस स कृतं मघोना[2] श्लाघनं घनम् ॥३५॥
क्षमयित्वाखिलं स्वं च कुचेष्टितसमुच्चयम् । किं तुभ्यं करवाणीति प्रीतिभागभ्यधात्सुरः ॥३६॥
ऊचे मुनिर्मयाऽलम्भि जैनो धर्मः सुदुर्ल्लभः । अतस्त्वत्तो वरं किञ्चिन्न याचेऽहं कथञ्चन ॥३७॥
इत्युक्तः स दिवं देवो यातः स्वां वसतिं यतिः । पृष्टः सर्वमनुत्सिक्तः साधुषु व्यक्तमभ्यधात् ॥३८॥
स द्वादशसहस्राब्दीं तप्त्वा तीव्रतरं तपः । रचितानशनश्चान्ते स्वान्ते दौर्भाग्यमस्मरत् ॥३९॥
भूयासं भूयसाऽनेन तपसा स्त्रीषु वल्लभः । इदं निदानं चक्रे च **महाशुक्रे** च सोऽगमत् ॥४०॥
इतश्च **मथुरापुर्यां हरिवंशे** प्रथीयसि । **बृहद्बला**ङ्गजो राजा जज्ञे **यदु**रिति श्रुतः ॥४१॥
**शूरो** जातस्ततः **शौरिसुवीरौ** तस्य चात्मजौ । **शूरः शौरिं** नृपं कृत्वा व्रते प्रववृते कृती ॥४२॥
**सुवीरं** स्वपदे न्यस्य **शौरिः** सोदरवत्सलः । स्वयं **कुशार्त्त**देशेषु चक्रे **शौरिपुरं** पुरम् ॥४३॥

---

१. चक्रुशे – C, KH । २. प्रासुकं – B । ३. भुवं – B, H । ४. निजगृहे – KH । ५. चमतो – B । चाम्यदो – P । ६. पुरस्त – P ।

टि. 1. आहारे महान् रसो यस्य स आहारमहारसः । 2. इन्द्रेण ।

**शौरेरन्धकवृष्ण्याद्या** बभूवुः किल सूनवः । **सुवीरस्य** महावीरा **भोजवृष्ण्यादयः** पुनः ॥४४॥
भूप**मन्धकवृष्णिं** तत् कृत्वा **शौरिर्ध**राधिपः । **सुप्रतिष्ठा**न्मुनेः प्राप्य व्रतं निर्वृतिमासदत् ॥४५॥
**सुवीर**स्तनुजं राज्ये **भोजवृष्णिं** विधाय च । विदधे **सिन्धुषु** स्वस्मै **सौवीरं** नाम पत्तनम् ॥४६॥
**मथुरा**म्भोजसूर्यस्य **भोजवृष्णेर्म**हीभुजः । जाग्रदुग्रगुणग्राम **उग्रसेनः** सुतोऽभवत् ॥४७॥
**सुभद्रायां** तनुभुवो**ऽन्धकवृष्णेर्द**शाऽभवत् । **समुद्रविजयोऽक्षोभ्यस्तिमितः सागरस्तथा** ॥४८॥
**हिमवानचलो** नाम **धरणो**ऽपि च **पूरणः** । **अभिचन्द्रो वसुदेवो** दशाऽर्हाख्या दशाप्यमी ॥३९॥ युग्मम् ॥
**महाशुक्रा**त् च्युतो **नन्दिषेण**जीवो निदानतः । सुरूपः सुभगः कान्तो नारीजनमनःप्रियः ॥५०॥
कलासु कुशलो विद्यानिधिर्वैदग्ध्यमन्दिरम् । **वसुदेवः** स एवाभूत्प्राग्भवीयतपोबलात् ॥५१॥ युग्मम् ॥
**समुद्रविजयं** न्यस्य स्वपदे**ऽन्धकवृष्णिना** । **सुप्रतिष्ठा**न्मुनेरेव प्रव्रज्य प्रापि निर्वृतिः ॥५२॥
सारथिर्**वसुदेवस्य कंसः सिंहरथं** रणे । तस्याऽऽज्ञयाऽऽर्प्पयद्बद्ध्वा **जरासन्धाय** कर्हिचित् ॥५३॥
त**ज्जीवयशसं** पुत्रीं तस्माल्लेभे प्रसादतः । **मथुरा**याश्च साम्राज्य**मुग्रसेना**ज्जहार सः ॥५४॥
**जरासन्धा**त्मजां पत्नीं **मथुरा**याश्च तां श्रियम् । **वसुदेव**स्य सेवायाः फलं सोऽमन्यत द्वयम् ॥५५॥
सहेलं पुरि खेलन्तं **वसुदेवं** सदान्वयुः । सौभाग्यशोभया चित्तचौरं पौराङ्गनाजनाः ॥५६॥
सुभगं तं [1]वृषस्यन्त्यः श्रान्त्यादि व्यपदेशतः । [2]तद्ध्यानात्किमपि [१]शिलष्ट्वा रतिं भेजुरतीव ताः ॥५७॥
याचनाऽऽदानदानादौ कार्येऽर्थान् योषितोऽखिलान् । अभ्यधु[3]र्**वसुदेवे**ति नामतः कामतत्पराः ॥५८॥
तन्नेपथ्य-तदुद्वाह-तदालपनविभ्रमैः । तत्र प्रावर्त्तत **स्त्रीणां** मिथः क्रीडारसो नवः ॥५९॥
**वसुदेव**तया ध्यातपतयो बत योषितः । निमील्याक्षि कृते ध्वान्ते रमन्ते स्म रतेषु ताः ॥६०॥
भूतीभूताश्च ताः क्षिप्तचित्ताः परवशा इव । न स्मरन्ति स्म संमुह्य गृह्यतन्त्रं कृताकृतम् ॥६१॥
सब्रह्मचारि[२]चेष्टानां **वसुदेवा**भिलाषतः । श्वश्रू-ननान्दृ-[4][३]जातॄणां न भेजुर्भीरवो भयम् ॥६२॥
के चात्र दोषा [४]योषाणां वृषस्यन्तस्तमेव यत् । [5]नरोऽनभीष्टपुंभावाः स्त्रीभावाय धियं दधुः ॥६३॥
वसुदेवाङ्गसौभाग्याऽऽकृष्टस्त्रीविप्लवाकुलैः । नृपः कदाऽपि विज्ञप्तो नागरैर्नयसागरैः ॥६४॥
**समुद्रविजये**नाऽथ तादृग्विप्लवभीरुणा । **वसुदेवो**ऽन्यदाऽभाषि स्वोत्सङ्गारोपपूर्वकम् ॥६५॥
अहर्निशं बहिर्भ्रान्त्या दुर्बलोऽसि ततस्त्वया । स्थेयं सदा मदावासे कलाभ्यासं वितन्वता ॥६६॥
गुरोर्गिरं शिरस्येष शेषामेव निधाय ताम् । सौध एव स्थितश्चक्रे कलाभ्यासमहर्निशम् ॥६७॥
स कदापि **शिवादेव्या** प्रेषितं भूपतिं प्रति । चन्दनोद्वर्त्तनं चेटीहस्ताज्जग्राह नर्मणा ॥६८॥
उक्तश्चेटिकया सोऽपि **वसुदेवः** सहासया । राज्ञा स्त्रीनर्मदोषेण त्वमने[५]न नियन्त्रितः ॥६९॥

१. श्लेष्टा – P शिलष्टा – KH, B, L । २. चेष्टाभ्यो – B । ३. मातृभ्यो – B । ४. योषादोषाणां – P । ५. नासियंत्रितः – A, B, C, L, K । टि. 1. वृषस्यन्ती (स्त्री) – अत्यन्तकामिस्त्रीः । 2. तद्ध्यानद्वारा शिलष्ट्वा रतिं भेजुः इत्यर्थः । 3. वसुदेवं देहि, वसुदेवं गृहाण इत्येवं योषितः अभ्यधुः इत्यर्थः । 4. जातृ(स्त्री.) भ्रातृजाया । 5. नृ शब्दस्य बहुवचनम् ।

इत्यसौ परमार्थेन निजं मत्वा नियन्त्रणम् । देशान्तरविलोकाय निस्ससार पुरान्निशि ॥७०॥
रचयित्वा चितामेष श्मशानभुवि भूरिधीः । निक्षिप्य मृतकं किञ्चिदन्तरज्वालयन्मुदा ॥७१॥
स्तम्भं न्यस्य तटे[१] तस्य पत्रिकायां लिलेख सः । गुरुभिर्दूषितगुणो **वसुदेवो**ऽनलेऽविशत् ॥७२॥
इति कृत्वा व्रजन् दृष्टः कयाऽपि पथि योषया । आरोपितो रथे खिन्न इति ब्राह्मणवेषभृत् ॥७३॥
तद्ग्रामे तद्गृहे स्नातभुक्तो यक्षालयस्थितः । शुश्रावाग्नौ मृतोऽशोचि **वसुदेवः** स्वकैरिति ॥७४॥
अथात्मज्ञाननिर्भीकः प्रचलन्नग्रतो बली । कयापि किल कामिन्या रथमारोपितो निजम् ॥७५॥
पुरे **विजयखेटा**ख्ये **सुग्रीव**क्ष्मापतेः सुते । **श्यामाविजयसेना**ख्ये पर्यणैषीत्कलाजिते ॥७६॥
ततो **विजयसेना**यामुत्पाद्या**ऽक्रूर**मङ्गजम् । अटन्नटव्यां स प्राप्तो **जलावर्त्ता**ख्यपल्वले ॥७७॥
द्विपं मत्तमिहायान्तं वशीकुर्वन्नसौ वशी । **खगार्च्चिमालि-पवनञ्जया**भ्यां सहसा हृतः ॥७८॥
उद्याने **कुञ्जरावर्त्ते** नीतस्यास्य मुदा ददौ । खेचरो**ऽशनिवेगा**ख्यः **श्यामां** नाम निजात्मजाम् ॥७९॥
अयं तया प्रवीणात्मा वीणावाद्येन तोषितः । ददौ वरं तयाऽयाचि सदाऽप्यविरहोऽस्तु नौ ॥८०॥
अवियोगस्त्वयाऽयाचि कुतः सुतनु ! कथ्यताम् । इत्युक्ते **वसुदेवे**न सा बभाषे मृगेक्षणा ॥८१॥
पुरे **किन्नरगीता**ख्ये **वैताढ्य**गिरिभूषणे । राजा **ज्वलनवेगो**ऽभूद**र्चिमालि**र्नृपात्मजः ॥८२॥
नाम्ना चा**ऽशनिवेगो**ऽस्ति खगस्तदनुजो बली । आस्ते **ज्वलनवेग**स्य सूनु**रङ्गारकः** पुनः ॥८३॥
एतस्या**ऽशनिवेग**स्य सुताहमभवम् विभो ! । व्रती **ज्वलनवेगो**ऽभूत् कृत्वा मत्पितरं नृपम् ॥८४॥
तद**ङ्गारक**[२]वीरेण विद्याबलविलोभिना । जित्वा मत्पितरं राज्यमिदमद्भुतमाददे ॥८५॥
**अष्टापदे**ऽन्यदा ख्यातं मत्पितुश्चारणर्षिणा । जलावर्त्ते गजं जेता राज्यदस्ते[1] भविष्यति ॥८६॥
तदादि तत्र मुक्ताभ्यां खगाभ्यां त्वं जितद्विपः । हृतोऽसि राज्यलोभेन दत्ता तुभ्यमहं पुनः ॥८७॥
स्त्रीयुतं यः खगं हन्ति स विद्याभिर्विमुच्यते । इत्याचारः सदैवास्ति समये व्योमचारिणाम् ॥८८॥
तत्क्रूरो**ऽङ्गारक**स्तुभ्यं मा कार्षीत्प्रिय ! विप्रियम् । अवियोगस्तदेतेन कारणेन मया वृतः ॥८९॥
प्रतिपद्य गिरं सद्यस्तदीयामिति वृष्णिभूः । तत्रावतस्थे सौस्थ्येन समं दयितया तया ॥९०॥
सुप्तः स चाऽन्यदा रात्रौ वीरो वनितया समम् । **अङ्गारके**णाऽपहृतो **वसुदेवः** प्रबुद्धवान् ॥९१॥
को मे हर्त्तेति विमृशन् ददृशे निजवल्लभाम् । **श्यामामङ्गारके**णैव खड्गाखड्गि वितन्वतीम् ॥९२॥
**अङ्गारके**ण सा **श्यामा** खड्गेनाऽऽशु द्विखण्डिता[३] । द्वे श्यामे युध्यमाने च **वसुदेवो** व्यलोकयत् ॥९३॥
अथ मायामिमां ज्ञात्वा वार्ष्णेयोऽङ्गारकं रुषा । जघान मुष्टिना मूर्द्ध्नि केसरीव करीश्वरम् ॥९४॥

---

१. तदेतस्य - H, B । २. वेगेण - K, D । ३. द्विधाकृता - P ।

टि. 1. राज्यं ददाति-राज्यदः ।

[1]उद्व्यानपातरुग्णेन [2]विमुक्तोऽङ्गारकेण सः । च्युतश्चम्पापुरीपार्श्वसरोवरपयोऽन्तरा ॥९५॥
ततः तीर्त्वाऽऽशु सरस्तीरे **वासुपूज्या**लयं गतः । जिनं नत्वा [1]सहैकेन द्विजेन पुरमाविशत् ॥९६॥
यूनो वीणाजुषः प्रेक्ष्य हेतुं पप्रच्छ स द्विजान् । अथो कथयितुं तस्मै प्रारेभे द्विजकुञ्जरः ॥९७॥
इह **गन्धर्वसेना**ऽस्ति **चारुदत्त**वणिक्सुता । सा प्राह स पतिः स्यान्मे यो मां जयति वीणया ॥९८॥
वीणाचार्यौ **यशोग्रीव-सुग्रीवा**विह तिष्ठतः । वीणाभ्यासं तदाभ्यासे तन्वन्त्येते तदिच्छया ॥९९॥
मासे मासे परीक्षा स्यान्न तु कोऽपि जयत्यमूम् । **वसुदेवो** निशम्येति विद्याविकृतरूपकृत् ॥१००॥
विप्रवेषधरो गत्वा **सुग्रीवं** प्रत्यदोऽवदत् । वीणायां तव शिष्योऽस्मि **चारुदत्त**सुताकृते ॥१०१॥ युग्मम् ॥
सोपहासमुपाध्यायः स्थापयामास तं ततः । अहासयत् जनान् सोऽपि मूर्खत्वमिव दर्शयन् ॥१०२॥
अथाऽऽजगाम मासान्ते चारुदत्तस्य नन्दिनी । वीणाभ्यासकृतां यूनां परीक्षां कर्तुमात्मना ॥१०३॥
उपाध्यायेन शिष्यैश्च चारुचीरधरस्तदा । **वसुदेवः** प्रहासाय स्थापितः प्रौढविष्टरे ॥१०४॥
ते युवानोऽथ सर्वेऽपि वीणायां विजितास्तया । वादाय **वसुदेवो**ऽथ तैरूचे परिहासिभिः ॥१०५॥
अथाऽऽधाय निजं रूपं चमत्कारकरं नृणाम् । वीणाः प्रदूष्य यूनां च तस्या वीणां करेऽग्रहीत् ॥१०६॥
गेयो **विष्णुकुमार**स्य त्रिविक्रमपराक्रमः । **गन्धर्वसेन**येत्युक्ते स चक्रे सर्वमप्यदः ॥१०७॥
तस्मै **गन्धर्वसेनायाः** खेचरीत्वकथामथ । श्रावयित्वाद्भुतामेनां **चारुदत्तः** स दत्तवान् ॥१०८॥
अथ तां परिणीयाऽसौ **श्यामाख्यविजयाह्वये** । पर्यणैषीत् **यशोग्रीव-सुग्रीव**तनये अपि ॥१०९॥
रक्त्या चाऽथ विरक्त्या च छलेन च बलेन च । कलाजयेन [2]चानेकदेशोद्देशान् परिभ्रमन् ॥११०॥
भूपानां खेचराणां च द्विजानां वणिजामपि । कन्याः सौन्दर्यसौभाग्यलावण्यादिगुणास्पदम् ॥१११॥
स कदाऽप्युपरोधेन कदाऽपि हठतः पुनः । कदाऽपि कौतुकेनैव परितः परिणीतवान् ॥११२॥ विशेषकम् ।
**सुकोशला**भिधां पुत्रीं **कोशल**स्य खगेशितुः । **कोशला**यां पुरि प्राप्तः स कदाचिदुदूढवान् ॥११३॥
स **पेढालपुरं** गत्वा **हरिश्चन्द्र**स्य भूभुजः । सुतां **कनकवत्या**ख्यां श्रीददत्तामुदूढवान् ॥११४॥
**वसुदेवो**ऽन्यदा खेलन् खेचरीभिः सहान्वहम् । सूर्पकेणैकदा जह्रेऽमोचि गङ्गाजले ततः ॥११५॥
उत्तीर्य वीर्यवान् गङ्गां पल्लीं कामपि जग्मिवान् । असौ परिभ्रमन् साकं पथिकैः पथि कैश्चन ॥११६॥
**जरा**भिधां स्मरस्मेरभल्लीं पल्लीशितुः सुताम् । तत्रोपयेमे रेमे च चन्द्रिकामिव चन्द्रमाः ॥११७॥
तस्यां **जराकुमार**ाख्यं समुत्पाद्याऽथ नन्दनम् । विहरन्नन्यतोऽभाषि साक्षाद्देव्या कयाचन ॥११८॥
कन्या **रुधिर**भूपस्य दत्ता ते **रोहिणी** मया । व्रज [3]पाणविकीभूय तूर्णं तस्याः स्वयंवरे ॥११९॥

---

१. तदैके - P, KH । २. चानेन - C, A, K, D ।

टि. 1. उद्व्यानपातरुग्णेन-ऊर्ध्वं गतः व्यानः सर्वशरीरव्याप्तप्राणवायुविशेषः येन (मुष्टि) पातेन तेन रुग्णः व्याधिग्रस्तः सः तेन । 2. गगनाद् विमुक्तः । 3. पटहवादकरूपं कृत्वा इत्यर्थः ।

इत्युक्तः स तया **शौरिर्गतो रिष्टपुरं** प्रति । **जरासन्धा**दिभूपाढ्ये स्वयंवरणमण्डपे ॥१२०॥
रूपेण त्रिजगच्चित्ताऽऽरोहिणी **रोहिणी** ततः । स्वयंवरणमाल्येन राजमानाऽऽजगाम सा ॥१२१॥
शृङ्गारितेऽप्यरूपेऽस्मिन् राजकेऽस्याः स्थिता न दृक् । [1]वर्ण्यवर्णेऽपि निर्गन्धे कर्णिकार इवालिनी ॥१२२॥
**शौरि**रेषोऽन्यवेषोऽथ विस्फूर्जत्तूर्यवादिषु । वादयामास पटहमित्थं पटुभिरक्षरैः ॥१२३॥
आगच्छ गच्छ मां तन्वि ! नन्वितः किमु वीक्ष्यसे । अस्मिन् त्वद[१]नुरूपोऽहं कृतोत्कण्ठः सुकण्ठि ! यत् ॥१२४॥
वादयन्तमिति प्रेक्ष्य **शौरिं** शूरनिभप्रभम् । **रोहिणी** रोहदानन्दाऽऽनन्दयद्वरमालया ॥१२५॥
अथ पाटहिके तस्मिन् वृते रुधिरकन्यया । अहसन् सहसा सेर्ष्यं सर्वेऽप्युर्वीशकुञ्जराः ॥१२६॥
ह हा कुलीनताऽमुष्याः कुलीनमवृणोद्यतः । इति वार्त्ता मिथश्चक्रुः पश्यन्तो रुधिरं च तौ ॥१२७॥
अथ तेषु सहासेषु प्राह [2]पाटहिकः क्रुधा । दोर्दण्डे यस्य कण्डूतिर्दर्शयेऽस्य कुलीनताम् ॥१२८॥
श्रुत्वा **शौरे**र्गिरं [3]दावकीलालीलामिमामथ । तद्वधाय **जरासन्धः** स्वभूपान् समनीनहत् ॥१२९॥
सन्नद्धनिजसैन्योऽथ रुधिरोऽपि धराधवः । **जरासन्धेन** युद्धाय क्रुद्धः **शौरेः** [२]पुरोऽस्फुरत् ॥१३०॥
सारथीभूय शौण्डीरावधिर्**दधिमुखा**भिधः । खेचरः समरक्रूरं रथे **शौरि**मवीविशत् ॥१३१॥
वेगा**द्वेगवती**मात्रा**ऽङ्गारवत्या**ऽर्पितानि तत् । [३]चण्डः कोदण्डतूणानि जगृहे विग्रहाग्रही ॥१३२॥
**जरासन्ध**[4]धराधीशे रुधिरं युधि रंहसा । भग्नं वीक्ष्य गिरा शौरेः खेचरो रथमैरयत् ॥१३३॥
**शौरिं** स्ववर्ग्यभूमीभृत्कुम्भिकेसरिणं रणे । पश्यन्नूचे **जरासन्धः समुद्रविजयं** प्रति ॥१३४॥
न पाणविकमात्रोऽयं तदेनं साधय स्वयम् । **वनं भञ्जन्निभः केन रक्ष्यः पञ्चाननं विना** ॥१३५॥
प्रदोषमेनं निर्जित्य त्वं भवन् [5]रोहिणीधवः । मद्यशःकुमुदं स्मेरं कुरुष्व प्रसरत्करः ॥१३६॥
वृताऽन्यवरनिष्ठाया न धवोऽस्या भवाम्यहम् । जेयोऽसौ नु त्वदादेशादित्युक्तस्थौ **समुद्रराट्** ॥१३७॥
ततः समुद्रमुन्मुद्रवेलं खेलन्तमा[6]ऽऽहवे । अवलोक्य स्म कुर्वन्ति देवाः कल्पान्तविभ्रमम् ॥१३८॥
युयुधाते क्रुधा तेजस्तिरस्कृतदिवाकरौ । [7]**शौरी** दूरीकृतत्रासावथ प्रथमपश्चिमौ ॥१३९॥
कृतस्य प्रतिकुर्वाणावविशेषतया चिरम् । अयुध्येतामुभौ धीरौ नृणां कृतचमत्कृती ॥१४०॥
**समुद्रविजयं** सम्यगधिगम्य विनीतधीः । चिक्षेप साक्षरं नम्रं वसुदेवः शरं पुरः ॥१४१॥
पाणौ बाणमथाऽऽदाय **समुद्रो**ऽवाचयल्लिपिम् । तदा च्छलेन यातस्त्वां **वसुदेवो** नमाम्यहम् ॥१४२॥
वत्सलो वत्स वत्सेति **समुद्रो**ऽपि वदन्नदः । अभ्यधावद् रथं मुक्त्वा तं प्रतीन्दुमिवाम्बुधिः ॥१४३॥
प्रीतिमान् **वसुदेवो**ऽपि समुत्तीर्य समुत्सुकः । न्यपतन्पादयोर्दोर्भ्यामुद्धृत्याऽनेन सस्वजे ॥१४४॥

---

१. नुकंपोऽहं - P । २. पुरःस्फुरत् - P । ३. चण्डकोद० - B, C ।

टि. 1. मनोहरवर्णवान्-वर्ण्यवर्णः तस्मिन् । 2. पाटहिकः - पटहवादकः । 3. दावकीलालीलां-अग्निशिखासमम् । 4. [रो रे लुग्....१।३।४१] हेम० इत्यनेन विसर्गलोपः । 5. पक्षे चन्द्रः । 6. युद्धे । 7. समुद्रविजयः प्रथमशौरिः वसुदेवस्तु पश्चिमः इति द्विवचनम् ।

क्व स्थितस्त्वमियत्कालमिति पृष्टोऽग्रजन्मना । समग्रमात्मनो वृत्तं **वसुदेवो** न्यवेदयत् ॥१४५॥
वार्ष्णेयो दशमः सोऽयमिति मत्वा पराक्रमात् । दधिरे रुधिरोर्वीश**जरासन्धा**दयो मुदम् ॥१४६॥
प्रसङ्गायातनिःशेषभूपालविहितोत्सवम् । पुण्येऽह्नि **वसुदेवो**ऽथ **रोहिणीं** परिणीतवान् ॥१४७॥
**जरासन्धा**दयो जग्मुर्भूभुजो रुधिराऽर्चिताः । तत्रैव यदवः सर्वे तस्थुः **कंसा**न्विताः पुनः ॥१४८॥
अन्येद्युर्जरती काऽपि श्री**समुद्रे** सभाजुषि । आगत्य गगनोत्सङ्गात् **वसुदेव**मवोचत ॥१४९॥
मम पुत्र्यौ चिराद्**बालचन्द्रा वेगवती** तथा । त्वद्वियोगाऽऽतुरे देव ! सञ्जाते बाढदुर्बले ॥१५०॥
इति श्रुत्वा मुखं पश्यन् समुद्रेण स भाषितः । गच्छ वत्स ! चिरं तत्र मा स्म स्थाः पूर्ववत्पुनः ॥१५१॥
इत्याकर्ण्य तया साकं वसुदेवो दिवा ययौ । तदाऽऽगमोत्सुकः प्राप समुद्रोऽपि स्वपत्तनम् ॥१५२॥
कन्ये **काञ्चनचन्द्र**स्य खेचरेन्द्रस्य वृष्णिभूः । उद्वाह्य पूर्वमूढाश्च सर्वाः **शौरिपुरे**ऽनयत् ॥१५३॥
अन्यदा **रोहिणी** स्वप्ने हलभृज्जन्मसूचकान् । मृगाङ्कार्कमृगेशाब्धीन् निशाशेषे व्यलोकयत् ॥१५४॥
ततोऽङ्गतेजसा [1]ध्वान्तद्रोहिणं **रोहिणी** सुतम् । असूत [2]भूतधात्रीव विजितद्युमणिं मणिम् ॥१५५॥
**रामो** नाम्नाऽभिरामत्वात्पितृभ्यां स प्रतिष्ठितः । क्रीडन् भोगीव बालोऽपि जातः परभयङ्करः ॥१५६॥
**वसुदेवो**ऽन्यदाऽऽहूतः **कंसे**न प्रीतिशालिना । ययौ राजानमापृच्छ्य **मथुरा**याममन्थरः ॥१५७॥
**कंस**स्तं **मृत्तिकावत्यां** पुर्यां नीत्वाऽथ यादवम् । ययाचे **देवकीं** पुत्रीं **देवका**ख्यात्पितृव्यतः ॥१५८॥
पुराऽपि **नारदा**ऽऽख्यातगुणोद्यदनुरागयोः । तयोरथ विवाहोऽभूद् **देवकीवसुदेव**योः ॥१५९॥
**देवको**ऽथ दशार्हाय बहु स्वर्णादिकं ददौ । **नन्दं** गोकोटियुक्तं च दशगोकुलनायकम् ॥१६०॥
**वसुदेवो**ऽद्भुतानन्दस्ततो **नन्द**समन्वितः । **मथुरां** सह **कंसेन** प्रयातो दयितायुतः ॥१६१॥
सुहृत्पाणिग्रहोपज्ञं कंसश्चक्रे महोत्सवम् । अमानमदिरापानमत्तनृत्यद्वधूजनम् ॥१६२॥
**कंसा**ऽनुजो**ऽतिमुक्तो**ऽथ पूर्वोपात्तव्रतः कृती । आगादोकसि **कंस**स्य पारणाय महातपाः ॥१६३॥
वीक्ष्य मत्ता तमायातं प्रीता **कंस**प्रिया ततः । एहि देवर ! नृत्यावो जल्पन्तीति गलेऽलगत् ॥१६४॥
अथोचे व्यथितः साधुर्यन्निमित्तोऽयमुत्सवः । तस्य सप्तमगर्भेणोच्छेद्यौ त्वत्पितृवल्लभौ ॥१६५॥
श्रुत्वेति मुनितो मुक्तमदा **जीवयशा** जवात् । गत्वा स्फारस्फुरत्खेदं **कंसा**येदं न्यवेदयत् ॥१६६॥
याच्यः सौहार्दतः सप्तगर्भान् **शौरि**रसौ सुहृत् । निश्चित्येदमगात्कंसो **वसुदेवं** प्रियान्वितः ॥१६७॥
प्रारब्धप्रेमवार्त्तासु मत्तेनेव मदेन सः । [1]संमेने **देवकी**गर्भान् सप्त **कंसेन** याचितः ॥१६८॥
आकर्ण्य **शौरि**रन्येद्युरतिमुक्तकथामथ । चिखिदे वञ्चितो गर्भान् याचता सुहृदा च्छलात् ॥१६९॥

---

१. समेने – C, B ।

टि. 1. अन्धकारनाशकं इत्यर्थः । 2. भूतधात्री – पृथ्वी ।

इतश्चासीन्**नाग** इति श्री**भद्रिलपुरे** वणिक् । प्रियाऽऽसीत्तस्य **सुलसा** कुलसागरचन्द्रिका ॥१७०॥
**अतिमुक्ता**भिधः साधुश्चारणोऽस्याश्च शैशवे । निन्दुरिन्दुमुखी सेयं भाविनीति न्यवेदयत् ॥१७१॥
परमश्राद्धयाराधि सुरः कश्चित्तयाऽप्यथ । तुष्टोऽयाचि सुतानेष प्राह ज्ञात्वाऽवधेस्ततः ॥१७२॥
हन्तुं **शौरि**सुतान्प्रीतिकूटात्**कंसे**न याचितान् । अहं सञ्चारयिष्यामि निन्दोः सुतपदे तव ॥१७३॥
इति देवः प्रतिज्ञाय चक्रे शक्त्या स्वकीयया । **देवकीसुलसा**ऽपत्यप्रसवे तुल्यकालताम् ॥१७४॥
सुषुवाते समं ते तु **देवक्याः** षट् सुतान् क्रमात् । **सुलसा**यै ददौ देवो **देवक्यै** [1]सौलसान् सुतान् ॥१७५॥
स्फारमास्फालय[2]द्ग्राव्णि **कंसो** निन्दुसुतान् स तान् । अवर्द्धन्तश्च **देवक्याः** सूनवः **सुलसा**गृहे ॥१७६॥
नाम्नाऽ**नीकयशो**ऽ**नन्तसेनो विजितसेनकः** । **निहतारि**र्**देवयशाः शत्रुसेन**श्च ते श्रुताः ॥१७७॥
निशान्ते प्रैक्षत स्वप्ने सिंहार्काग्निगजध्वजान् । विमानपद्मसरसी ऋतुस्नाताऽथ **देवकी** ॥१७८॥
तस्याः कुक्षाववातार्षीद् **गङ्गदत्त**श्च्युतो दिवः । [3]नभःसिताष्टमीरात्रिमध्येऽथ तमसूत सा ॥१७९॥
सान्निध्यं तेनिरे तस्य पुण्यपूर्णस्य देवताः । तज्जन्मनि ततः स्वापमापुस्ते **कंस**यामिकाः ॥१८०॥
तदाऽऽहूय प्रियं प्राह **देवकी** रक्ष मे सुतम् । वञ्चयित्वा द्विषं **कंसं** मोच्योऽसौ **नन्द**गोकुले ॥१८१॥
**यशोदा**जननी चामुं सानन्दा **नन्द**वल्लभा । पालयिष्यति यद्बालमुपचारैर्नवैर्नवैः ॥१८२॥
**वसुदेवो**ऽपि तन्मत्वा तं लात्वाऽङ्गजमव्रजत् । पार्श्वस्थदेवीक्लृप्ताष्ट[4]दीपच्छन्नजुषा पथा ॥१८३॥
अथो धवलरूपेण शिशुसान्निध्यदेवताः । पुरतो गोपुरद्वारकपाटानुदघाटयत् ॥१८४॥
आयातो गोपुरे **शौरिरुग्रसेने**न भाषितः । भास्वन्तं दर्शयन् बालं सानन्दमिदमब्रवीत् ॥१८५॥
पुत्रव्याजेन शत्रुस्ते **कंसो**ऽनेन हनिष्यते । त्वं चोद्धरिष्यसे किं तु मैवं क्वाऽपि प्रकाशयेः ॥१८६॥
आकर्ण्येत्यु**ग्रसेने**न हर्षादनुमतस्ततः । जगाम **नन्द**कान्ताया **यशोदा**या निकेतनम् ॥१८७॥
तस्यास्तमात्मजं **शौरिः** समर्प्याऽथ तदात्मजाम् । तनयां समुपादाय **देवक्याः** पुरतोऽमुचत् ॥१८८॥
इति कृत्वाऽऽगते **शौरौ** प्रबुद्धाः **कंस**यामिकाः । कन्यामिमां समादाय **कंसा**य द्रागढौकयन् ॥१८९॥
स्त्रीमयं सप्तमं वीक्ष्य तं गर्भं निर्भयो नृपः । विदधे च्छिन्ननासाग्रं मानी ज्ञानं हसन्मुनेः ॥१९०॥
अमूमुचदमूं **कंसो देवक्या** एव सन्निधौ । पुनर्जातेयमित्यन्तःप्रमोदं प्राप साऽप्यथ ॥१९१॥
स **कृष्ण** इति संहूतः कृष्णाङ्गत्वेन वल्लवैः । **वसुदेव**कुलोत्तंसो गोकुलान्तरवर्द्धत ॥१९२॥
गते मासि सुतं द्रष्टुमुत्सुका **देवकी** ययौ । सह स्त्रीभिः [5]प्रियं [१]पृष्ट्वा गोकुले गोऽर्च्चनच्छलात् ॥१९३॥
श्रीवत्स[२]लाञ्छनं स्निग्धश्यामममालोक्य **देवकी** । स्वनन्दनं **यशो**[३]**दा**ङ्कमण्डनं मुमुदेतमाम् ॥१९४॥

---

१. दृष्ट्वा - P, KH । २. लांछितं - B, K, KH । लांछलं - C । ३. दाह्व - C, KH ।

टि. 1. सुलसायाः सुतान् इत्यर्थः । [६।१।६०-शिवादेरण्] इत्यनेन सुलसाया अपत्यं-सौलसः तान् । 2. ग्रावन्(पुं)-पाषाणः, तस्मिन् । 3. श्रावणमासस्य शुक्लाष्टमी । 4. दीपछन्नजुषा-दीपस्य व्यापः, तेन युक्तः, तेन, शेषं स्पष्टम् । 5. वसुदेवम् इत्यर्थः ।

सदैव **देवकी** तत्र गोपूजाव्याजतो ययौ । आविर्बभूव लोकेऽत्र ततःप्रभृति गोव्रतम् ॥१९५॥

वैरेण **वसुदेव**स्याऽन्यदा **शकुनि-पूतने** । विद्यया तत्सुतं ज्ञात्वा निहन्तुं **कृष्ण**मागते ॥१९६॥

बभूवैका समारुह्य शकटं कटुनादिनी । पूतना नूतन[1]क्ष्वेडलिप्तं स्तनमपाययत् ॥१९७॥

सान्निध्यं विदधानाभिर्देवताभिस्तदा मुदा । **कृष्ण**स्य देहमाविश्य हते तेना[2]ऽनसैव ते ॥१९८॥

एत्य **नन्दो**ऽथ वीक्ष्यैवं खेदं मनसि धारयन् । **यशोदां** प्राह नैकाकी बालो मो[१]च्यः कदाचन ॥१९९॥

तं पालयति सानन्दा **यशोदा**ऽथ स्वयं सदा । च्छलादुच्छृङ्खलो बालः प्रयातीतस्ततः स तु ॥२००॥

[3]दाम्नो[4]दूखलबद्धेन तस्य बद्ध्वाऽन्यदोदरम् । **यशोदा** तद्गतेर्भीता गृहेऽगात्प्रतिवेशिनः ॥२०१॥

तदा पितामहद्वेषादेत्य सूर्प्पकभूः शिशुम् । तं मध्येकृत्य निष्पेष्टुं जगामा[5]र्जुनयुग्मताम् ॥२०२॥

अनयोः कृष्णदेव्याथ [6]माथश्चक्रे महीरुहोः । ऊचे गोपैस्ततोऽभञ्जि कृष्णेनार्जुनयोर्द्वयम् ॥२०३॥

तदाकर्ण्येति **नन्दश्च यशोदा** च समीयतुः । [२]तावक्षताङ्गं तं वीक्ष्य प्रीतौ बालं चुचुम्बतुः ॥२०४॥

बद्धो यदुदरे दाम्ना नाम्ना **दामोदर**स्ततः । ख्यातोऽयं गोकुले [३]बालो [7]व[४]ल्लवीप्रीतिपल्लवी ॥२०५॥

मत्वा [8]शताङ्ग-शकुनि-पूतनाऽर्जुनसंकथाम् । दध्यौ **शौरि**रमुं **कंसो** ज्ञास्यत्येवंविधौजसा ॥२०६॥

माऽपकार्षीत्किमप्यस्य मत्वाऽपि [५]क्रूरधीरसौ । अहं तदस्य रक्षायै कञ्चिन्मुञ्चामि नन्दनम् ॥२०७॥

तद्यथातथमाख्याय राममुद्दामविक्रमम् । सुतत्वेनार्प्पयामास **यशोदानन्दयो**स्तदा ॥२०८॥

सहेलं खेलतस्तत्र **राम-दामोदरौ** ततः । गोकुले गोमति व्योम्नि सतारे शशिसूर्यवत् ॥२०९॥

आयुधेषु समग्रेषु श्रमं **रामेण** कारितः । प्रकृत्या विक्रमी **कृष्णः** सपक्षोऽहिरिवाबभौ ॥२१०॥

गोपस्त्रियः प्रियममुं गूढोन्मुद्रितमन्मथाः । समालिङ्गन्ति चुम्बन्ति बालव्यवहृतिच्छलात् ॥२११॥

**कृष्णः** सदापि मायूरपिच्छपूरविभूषणः । जगौ गोपालबालाभिः सह गोपालगूर्जरीम् ॥२१२॥

वंशनादवशैर्नेत्रगतिकान्तिजितैरिव । सोऽयं कुरङ्ग-मातङ्गभुजङ्गैरनुगैर्बभौ ॥२१३॥

**रामगोविन्दयोः** क्रीडारसनिर्मग्नयोरिति । गोपयोर्जग्मुरेकाहवदेकादश वत्सराः ॥२१४॥

इतश्च **कार्त्तिककृष्णद्वादश्यां** [9]**त्वाष्ट्रगे** विधौ । **समुद्रविजया**ख्यस्य पत्न्या **शौर्यपुरे**शितुः ॥२१५॥

**शिवायाः** कुक्षिमध्यास्त **शङ्ख**जीवो**ऽपराजितात्** । सा निशान्ते महास्वप्नांश्चतुर्दश ददर्श च ॥२१६॥ युग्मम् ॥

गजोक्षसिंहलक्ष्मीस्रग्चन्द्रार्ककलशध्वजाः । पद्माकरविमानाब्धिरत्नपुञ्जाग्नयस्तु ते ॥२१७॥

नारकाणामपि स्वर्गजुषामिव तदा सुखम् । क्षणमासीत् प्रकाशश्च चकास्ति स्म जगत्स्वपि ॥२१८॥

---

१. मुच्यः - P । २. तावक्षितादृतं - C, तावक्षतादृतं - D, तावक्षतांगतं - P, KH, H । ३. नागो - P । ४. ल्लकी-KH, H । ५. धीरधीरसौ - B ।

टि. 1. क्ष्वेडः - विषः । 2. अनस् - शकटं । 3. दाम्ना - रज्ज्वा । 4. उदूखलं-कण्डनभाण्डं 'खांडणी' इति भाषायाम् । 5. अर्जुनः-वृक्षविशेषः । 6. माथः-विनाशः । 7. गोपस्त्रीः । 8. शताङ्गः-राक्षसः वृक्षश्च । 9. त्वाष्ट्रः-चित्रानक्षत्रम् ।

पत्युरत्युत्सुका स्वप्नानाख्यद्देवी प्रबुद्धय तान् । राज्ञा तदैव दैवज्ञो[१]ऽपृच्छ्यत क्रोष्टुकिः स्वयम् ॥२१९॥
स व्याचख्यौ सुतो भावी जिनस्ते त्रिजगत्पतिः । श्रुत्वेति तावतिप्रीतौ पीयूषस्नपिताविव ॥२२०॥
गर्भस्थितेन तेनाऽथ स्वामिना नृपकामिनी । बभौ स्मितमुखाम्भोजा भृङ्गेणेव सरोजिनी ॥२२१॥
निशीथे **सितपञ्चम्यां श्रावणे त्वाष्ट्रगे** विधौ । **शङ्ख**ध्वजं **शिवा**ऽसूत सुतं जीमूतमेचकम् ॥२२२॥
षट्पञ्चाशदथागत्य दिक्कुमार्यो यथाक्रमम् । **शिवा**जिनेन्द्रयोश्चक्रुः सूतिकर्माणि भक्तितः ॥२२३॥
पञ्चरूपो हरिः स्वर्गादथागत्य यथाविधि । **अतिपाण्डुकम्बला**यां शिलायां नीतवान् विभुम् ॥२२४॥
तत्र सिंहासनारूढः सोऽयं स्वाङ्के जिनं दधौ । त्रिषष्ट्या त्वपरैः शक्रैः स्नानं चक्रे**ऽच्युता**दिभिः ॥२२५॥
अङ्के तदीशमीशानो दधौ सिंहासनासनः । **सौधर्मेन्द्रो** कृतस्नात्राऽऽरात्रिकस्तवनाद्यथ ॥२२६॥
स्थाने नीत्वा प्रभुं पञ्च धात्रीश्च न्यस्य वासवः । कृत्वा **नन्दीश्वरे** यात्रां मुदितः स्वपदं ययौ ॥२२७॥
सप्रभावं प्रभावन्तं राकेन्दुमिव नन्दनम् । तमालोक्य **समुद्रो**ऽभूदुन्मुद्रितमहोदयः ॥२२८॥
दृष्टोऽरिष्टमणीने[1]मिर्मात्रा स्वप्नेऽत्र गर्भगे । **अरिष्टनेमि**रित्याख्यां सूनोस्तद्विदधे पिता ॥२२९॥
**मथुरा**यामथाऽऽतेने **नेमि**जन्ममहोत्सवम् । दशार्हो दशमस्तेन **कंस**स्तस्याऽऽययौ गृहम् ॥२३०॥
छिन्ननासापुटां वीक्ष्य खेलन्तीं तत्र तां सुताम् । भीतः **कंसो**ऽधिकं सोऽथ स्मृत्वाऽनुजमुनेर्वचः ॥२३१॥
नैमित्तिकं स कंसस्तदपृच्छत्सदने गतः । स्त्रीगर्भसप्तमः सोऽयं मुनिनोक्तो भवेन्न वा ॥२३२॥
ऊचे नैमित्तिकः साधुगिरो विपरियन्ति न । क्वाऽप्यस्ति हस्तिमल्लोजाः स गर्भस्ते भयङ्करः ॥२३३॥
त**मरिष्टा**ख्यमुक्षाणं हयेशं केशिनं च तम् । खरमेषौ च तौ मुञ्च क्रमात् वृन्दारके वने ॥२३४॥
अत्युग्रानपि खेलंस्तान् सहेलं यो हनिष्यति । हन्त हन्ता स ते [२]नित्यनिर्गलभुजार्गलः ॥२३५॥
पूजयेज्जननी यत्ते [३]शार्ङ्ग[४]धनुः क्रमागतम् । आरोपयिष्यति पयःसितकीर्तिः स एव तत् ॥२३६॥
**कालिया**ऽहेर्दमयिता **चाणूर**स्य विघातकः । हनिष्यति द्विपेन्द्रौ ते स **पद्मोत्तर-चम्पकौ** ॥२३७॥
आदिश्याऽथ श्रमायासौ मल्लौ **चाणूरमौ[५]ष्टिकौ** । **अरिष्टा**दीन् वनेऽमुञ्चदरातिं ज्ञातुमात्मनः ॥२३८॥
शरद्घनाघनध्वानो महोक्षो गाः क्षिपन् मुहुः । भञ्जन् भाण्डभरं तुङ्गशृङ्गो गोपान् लुलोप सः ॥२३९॥
**राम** ! त्रायस्व **गोविन्द** ! त्रायस्वेति व्रजे गिरः । श्रुत्वेति शौरिजन्मानौ मानाध्मातावधावताम् ॥२४०॥
अथोक्षाणं क्रुधावन्तं धावन्तं वीक्ष्य **केशवः** । करावलितशृङ्गाग्रभग्नग्रीवं जघान तम् ॥२४१॥
तस्मिन् काल इव क्रूरे नीते कालनिकेतनम् । वल्लवाः पूजयामासुर्जनार्दनभुजौ तदा ॥२४२॥
प्राप्तः **कंस**[2]किशोरोऽथ **केशी** क्रीडति **केशवे** । प्रक्रान्तवल्लवीनाशः कीनाश इव दुस्सहः ॥२४३॥

---

१. ज्ञः पृच्छ्यते - P । ज्ञो पृच्छ्यते - KH, H, A । २. नित्यं - L, A, KH, C । ३. शाङ्गं - K, H, A, B । ४. धन्वं - C, K, D, H, B । ५. मुष्टिकौ - L, KH । मोष्टिकौ - H ।

टि. 1. नेमिः-चक्रस्य धारा । 2. अश्वः ।

**कृष्णे**न सोऽपि निर्भिन्दन् [१]सुरभीः खुरभीषणः । कूर्पराप्र्पणतो वक्त्रं विदार्याऽमार्यत द्रुतम् ॥२४४॥
खरमेषमुरुक्रोधखरमेष मुदाऽन्यदा । कृतगोपभयाऽऽरोपमाजघान **जनार्दनः** ॥२४५॥
अथाऽयं **मथुरानाथ**स्तन्माथप्रभवद्भयः । द्विषं निश्चेतुमानिन्ये सदस्यर्च्चामिषाद्धनुः ॥२४६॥
अत्यद्भुतभुजः शाङ्र्गं यः कोऽप्यारोपयिष्यति । देयाऽस्मै **सत्यभामे**यमिति चायमघोषयत् ॥२४७॥
महीभुजो भुजोष्मायमाणा [1]प्राणाधिकास्ततः । आगताः पर्यभूयन्त हन्त तेनैव धन्वना ॥२४८॥
सूनु**र्मदनवेगाया वसुदेवा**त्मजो रथी । चापारोपार्थमुत्कण्ठाकुलो गोकुलमागमत् ॥२४९॥
तत्रोवास निशां रामकेशवस्नेहमोहितः । मार्गे गच्छन्नसौ प्रातः **कृष्ण**मेकं सहाऽनयत् ॥२५०॥
अथ लग्नरथं मार्गे**ऽनाधृष्टौ**[२] मोक्षणाक्षमे । हेलया **हरि**रव्यग्रो न्यग्रोधमुदमूलयत् ॥२५१॥
इत्यूर्ज्जस्वलमालोक्य तं पदातिं पदान्तिके । हृष्टो**ऽनाधृष्टि**[३]रुत्तीर्य परिष्वज्य रथेऽनयत् ॥२५२॥
**मथुरा**यामथानेकपृथ्वीनाथकुलाकुलाम् । धीरौ धनुःसभामेतां जग्मतुस्तिग्मतेजसौ ॥२५३॥
[2]असिस्नपन्नृपस्तोमवीक्षातप्तमथ क्षणात् । **सत्यभामा** चिरं चक्षुः **कृष्ण**लावण्यसागरे ॥२५४॥
ग्रहणादेव चापस्याऽनाधृष्टौ पतिते सति । भ्रष्टाङ्गभूषणे तस्मिन्न यावदहसन् जनाः ॥२५५॥
तावन्मृदुलदोर्दण्डचण्डिमानमदीदृशत् । मुदा सदसि **गोविन्द**स्तन्वन् धन्वाधिरोपणम् ॥२५६॥ युग्मम् ॥
**अनाधृष्टि**रथागत्य मुक्त्वा द्वारि हरिं रथे । गत्वा पितुःसदस्याख्यन्मयाऽरोप्यत तद्धनुः ॥२५७॥
उक्तोऽथ वसुदेवेन नश्य कंसेन हन्यसे । श्रुत्वेति स हरिं मुक्त्वा व्रजेऽथ स्वपुरेऽव्रजत् ॥२५८॥
चापमारोपयन्नन्दनन्दनः शब्द इत्यभूत् । **कंसो**ऽपि हृदयारोपिशङ्काशङ्कुरजायत ॥२५९॥
आहूय भूयसो भूपान्मञ्चेषु **मथुरापतिः** । आदिशत्केलये मल्लान् चापारोपोत्सवच्छलात् ॥२६०॥
**रामं** जगाद **गोविन्दः** श्रुत्वा मल्लरणोत्सवम् । द्रष्टुं मल्ल[४]भटीमावां गच्छावः कौतुकं हि मे ॥२६१॥
तं प्रति प्रतिपद्येति **यशोदा**मवदत् बलः । आवयोर्मङ्क्षु पानीयं स्नानीयं प्रगुणीकुरु ॥२६२॥
**बल**स्तत्रालसां किञ्चित्तां निरीक्ष्य रुषावदत् । षट्बान्धववधाख्यानं साक्षात्कर्तुं **हरेः** पुरः ॥२६३॥
आत्मानं मा स्म विस्मार्षीर्मदुक्तं न करोषि किम् । स्वाम्यादेशेऽप्युदासीना दासी नाम क्वचिद्भवेत् ॥२६४॥
वचनेनामुना म्लानमवलोक्य बलो हरिम् । स्नानाय सममादाय **यमुना**यास्तटे ययौ ॥२६५॥
**रामो हरि**मथाऽपृच्छदपच्छायोऽसि वत्स ! किम् । त्वं प्रभातप्रभाराशि[3]व्याश्लिष्ट इव दीपकः ॥२६६॥
तदेवं **बलदेवं** स निजगाद सगद्गदम् । किंकरीति किमाक्षिप्ता भ्रातर्माता मम त्वया ॥२६७॥
अथैवं प्रथयन् सामलीलां नीलाम्बरोऽवदत् । न ते **नन्दः** पिता किं च **यशोदा** जननी न ते ॥२६८॥

---

१. सुरभी - KH, K, D । २. धृष्णौ - KH, L । ३. धृष्णि - A, P, K, H, C । ४. भटमा - C । पटीमा - P ।

टि. 1. प्राण: बल: पराक्रमो वा, तेनाधिक: । 2. 'स्ना' धातु: - प्रेरक-अद्यतनीरूप: । 3. व्याश्लिष्ट:-विशेषेण आश्लिष्ट: इत्यर्थ: ।

**देवकी देवक**क्ष्मापन[१]न्दिनी ज[२]ननी तव । गोपूजाव्याजतोऽभ्येति त्वां द्रष्टुं मासि मासि सा ॥२६९॥
**वसुदेव**स्तु देवेन्द्रप्रायरूपपराक्रमः । पिता स तव तेनाऽत्र **कंस**त्रासादमुच्यथाः ॥२७०॥
अहं च **रोहिणी**सूनुर्वैमात्रेयस्तवाग्रजः । तातेन स्वयमाहूय त्वद्रक्षायै नियोजितः ॥२७१॥
**कंसा**त् किं भीतिरित्युक्ते **कृष्णे**नाऽऽख्यत्पुनर्बलः । **अतिमुक्त**मुनेरुक्तिं तथा बन्धुवधप्रथाम् ॥२७२॥
**कृष्ण**स्तदा तदाकर्ण्य क्रोधादनलवज्ज्वलन् । **कंस**ध्वंसं प्रतिज्ञाय स्नानाय **यमुनां** ययौ ॥२७३॥
दृष्ट्वाऽथ **कालियः कृष्ण**मतिक्रोधादधावत । पश्यन्निवात्मनो मृत्युं चूडारत्नप्रदीपवान् ॥२७४॥
किमेतदिति सम्भ्रान्ते **रामे** वामेन पाणिना । धृत्वाऽसौ **हरिणा** घ्राणे पद्मनालेन न[1]स्तितः ॥२७५॥
**हरिः** [2]शेरारुमारुह्य तं भुजङ्गं महाभुजः । क्रीडन्नुडुपवन्नीरे सविभ्रममबिभ्रमत् ॥२७६॥
[३]मृतकल्पमनल्पौजास्तं मुक्त्वा निर्ययौ **हरिः** । तदेत्य समदाटोपैर्गोपैस्तौ बान्धवौ वृतौ ॥२७७॥
ततः प्रचलितौ **राम-गोविन्दौ मथुरां** प्रति । गोपालकैः सहाऽभूतां पुरगोपुरगोचरौ ॥२७८॥
**कंसा**दिष्टावथ द्विष्टाविभौ यमनिभौ क्रुधा । प्रधावितौ हतौ ताभ्यां तौ **पद्मोत्तरचम्पकौ** ॥२७९॥
अरिष्टादिद्विषौ **नन्दनन्दनौ** ननु ताविमौ । [४]दर्श्यमानौ मिथो रागसागरैरिति नागरैः ॥२८०॥
गत्वा मल्लभटीभूमिं सह वल्लभवल्लवैः । निषेदतुः क्वचिन्मञ्चे तौ समुत्तार्य तज्जनम् ॥२८१॥ युग्मम् ॥
ततश्च वामो **रामे**ण रौद्रमूर्त्तिधरः पुरः । सैष मञ्चशिखोत्तंसः **कंसः कृष्ण**स्य दर्शितः ॥२८२॥
सकौतुकप्रपञ्चेषु मञ्चेषु विहितासनाः । **कंस**क्रूराशयज्ञानसावधानीभवद्धृदाः ॥२८३॥
**समुद्रविजय**प्र[५]ष्ठा जितज्वलनतेजसः । दशाऽपि च दशार्हास्ते **गोविन्दा**य निवेदिताः ॥२८४॥ युग्मम् ॥
विभाविभासुरच्छायौ सुरप्रायौ [3]तुकाविमौ । चिन्तयद्भिरिति क्ष्मापैरैक्ष्येतां तौ प्रतिक्षणम् ॥२८५॥
अयुध्यन्ताधिकं मल्लोत्तंसाः **कंसा**ज्ञया ततः । [६]अथोदस्थादतिक्रूर**श्चाणूरः कंस**संज्ञया ॥२८६॥
करास्फोटस्फुटाटोपः स्फूर्ज्जन्नूर्ज्जस्वलं ध्वनन् । ऊद्‌र्ध्वीकृतभुजो भूमीभुजोऽधिक्षिप्य सोऽवदत् ॥२८७॥
यः कोऽपि धैर्यधूर्योऽस्ति पात्रं कोपस्य कोऽपि यः । स मे दोर्दण्डकण्डूतिं युधा खण्डयतु क्षणात् ॥२८८॥
असहिष्णुरथो **विष्णुश्चाणूर**स्येति गर्ज्जितम् । उत्तीर्य मञ्चात् पञ्चास्यध्वनिर्भुजमदिध्वनत् ॥२८९॥
भुजास्फोटध्वनिर्विष्णोर्वर्द्धमानोऽथ दुर्द्धरः । कीर्त्तिविस्तृतये व्योमभाण्डे भङ्गमिव व्यधात् ॥२९०॥
तं मत्वाऽथ भुजास्फोटध्वनिनैवात्मनो रिपुम् । [७]एककालं युधे **कंसः** प्रेरयामास **मौष्टिकम्** ॥२९१॥
अथ दृष्ट्वा तमुत्कृष्टमुष्टिकं **मौष्टिकं** हली । अधावत क्रुधा **विष्णु**[८]पराभवभिया विभीः ॥२९२॥
[4]स्थिराया व्यर्थतां नाम नयन्तः क्रमसङ्क्रमैः । अथो युयुधिरे विष्णुचाणूरबलमौष्टिकाः ॥२९३॥

---

१. नन्दनी – A, P, L । २. जननं – C । ३. सृत – C । ४. दर्शमानौ – C, A, KH दश्य – K, D । ५. पृष्ठा – C । ६. अथोत्तस्थाद – P । ७. एकः कालं – C । ८. विष्णुः – D, KH ।

टि. 1. नस्तितः–घ्राणे छिद्रं कृतः, विद्धः इति यावत् । 2. अनिष्टकृत् – तम् । 3. तुक्-पुत्रः, तौ । 4. स्थिरा पृथ्वी तस्याः नाम व्यर्थतां क्रमसङ्क्रमैः पादसञ्चारैः नयन्तः इत्यर्थः ।

**कंसे** यियासौ कीनाशपुराय प्रहितौ पुरः । तौ मल्लावथ शौरिभ्यां मार्गालोककराविव ॥२९४॥
इमौ हत हत क्षिप्रं सह नन्देन गोपिना । वदन्तमिति भीकोपद्विगुणस्फुरिताधरम् ॥२९५॥
फालाक्रान्तमहामञ्चः संचरन् पञ्चवक्त्रवत् । केशेषु **केशवः कंसं** कृष्ट्वाऽलूलुठदग्रतः ॥२९६॥ युग्मम् ॥
अथ **कृष्णं** प्रति क्रुद्धाः **कंस**गृह्या महीभुजः । मञ्चस्तम्भाऽऽयुधेनोच्चै**र्बलेन** दलिता बलात् ॥२९७॥
[१]**कृष्णो**ऽपि रोपितपदः शिरस्युरसि च क्षणात् । **कंसं** क्रोशन्तमत्यन्तम[1]जघातं जघान तम् ॥२९८॥
भयस्पृशाऽधिकं सेना **कंसे**नाऽऽनायि या पुरा । **जरासन्धस्य** साऽप्यत्र योद्धुं क्रोधादधावत ॥२९९॥
तासु संनह्यमानासु वाहिनीष्वर्द्धचक्रिणः । त्रासं दिदेश सन्नद्धः समुद्रविजयः स्वयम् ॥३००॥
यदवोऽथ दवोदग्रमहसः सहसा ययुः । सदनं **वसुदेवस्य समुद्रविजया**दयः ॥३०१॥
चुम्बन्तं लालयन्तं च रामदामोदरौ तदा । किमेतदिति पप्रच्छ वसुदेवं धराधिपम् ॥३०२॥
**देवकी**दयितेनाऽथ कथितेऽस्मिन् कथानके । स्वाङ्केऽधिरोप्य तौ बालौ राजा चिरमलालयत् ॥३०३॥
साकं तदुग्रसेनेन काराकृष्टेन भूभुजा । **कंसा**य यमुनानद्यां समुद्राद्या जलं ददुः ॥३०४॥
हते [2]**कंसा**हिते पित्रा देयं पत्युर्जलं मया । इति **जीवयशाः** सन्धां **जरासन्धा**त्मजा व्यधात् ॥३०५॥
मुरारिरुग्रसेनेन दत्तां पर्यणयत्ततः । **सत्यभामां** प्रभोद्दामां क्रोष्टुकिप्रथिते दिने ॥३०६॥
दशार्हा **उग्रसेनश्च** कुलाष्टदशकोटिभिः । सह क्रोष्टुकिसम्मत्या प्रत्यक्सिन्धोस्तटीं ययुः ॥३०७॥
**सुस्थिते**नाब्धिदेवेन शक्रेण धनदेन च । सर्वेषां सदनैः सार्द्धं कृतायां **द्वारिका**पुरि ॥३०८॥
क्रोष्टुकिज्ञानिसम्मत्या यादवैर्द्विट्लतादवैः । **कृष्णो**ऽभिषिक्तः साम्राज्ये **समुद्रविजया**ज्ञया ॥३०९॥ युग्मम् ॥
बलेनोद्वाहितः **कृष्णो रुक्मिणीं भीष्मका**त्मजाम् । तद्बन्धुं **रुक्मिणं** जित्वा **शिशुपालं** तथा[3]भिकम् ॥३१०॥
**प्रद्युम्नो**ऽस्याः सुतः **साम्बो जाम्बुवत्यास्तथा हरेः । भानुभानुकभीर्वाद्याः** कोटिशोऽन्येपि जज्ञिरे ॥३११॥
**वैदर्भी रुक्मिणः** पुत्रीं छलेन च बलेन च । **प्रद्युम्नः** परिणिन्येऽथा**ऽनिरुद्ध**स्तत्सुतोऽभवत् ॥३१२॥
क्रमादथ **जरासन्धे** हते **कृष्णे**न सङ्गरे । अर्द्धचक्रिपदं लेभे स्तुतेन त्रिदशासुरैः ॥३१३॥
दशार्हो दशमः पुण्यै**र्वसुदेवो**ऽतिमानुषैः । जज्ञे **हरिकुलस्ये**ति विपुलस्य पितामहः ॥३१४॥
तुष्यत्विमां समासाद्य समासात् तत्कथां जनः । श्री**नेमिचरिते**ऽस्माभिर्विस्तरोऽस्याः प्रदर्शितः ॥३१५॥

**इति नन्दिषेण-वसुदेवकथानकम् ॥**

अथ गाथा व्याख्यायते । **किमासीन्नन्दिषेणस्य कुलम्** ? उच्छिन्नपितृमात्रादिकत्वात् भिक्षुकधिग्जातित्वाच्च, न किञ्चिदित्यर्थः । तथाऽपि **यदसौ हरिकुलस्य विपुलस्य** विस्तीर्णस्य विमलस्य वा निष्कलङ्कस्य **सुचरितेन** प्रधानतपःकर्मणा हेतुभूतेन पितामहो **वसुदेव**नामाऽऽसीदिति, तस्मात् [२]तदेव सुचरितमाचरणीय-

---

१. कृष्णेनारोपि...P । २. तवसुदेवचरि...C ।

टि. 1. यथा अजः मेषः हन्यते तथा हतः इत्यर्थः । 2. कंसाहिते-कंसस्य अहितः रिपुः तस्मिन् हते । 3. अभिकः-अभिलाषुकः तम् ।

मित्युपदेशः । तथा **विद्याधरीभिः** खेचरीभिः **सहर्षं नरेन्द्रदुहितृभि**र्नृपतिसुताभिश्च **अह महंतीहिं** अथ स्वगृहनिर्गमादनन्तरं महंतीहिं त्ति सस्पृहं काङ्क्षन्तीभिः, अथवा '**अहमहंतीहिं**'त्ति प्राकृतत्वात् अहमहमिकां गच्छन्तीभिरन्योन्यस्पर्द्धया मिथ उद्दालनेन इत्यर्थः । **यत् प्रार्थ्यते** लज्जां विमुच्य चाटुभिर्वाक्यैस्त्वं भर्त्ता भवेति याच्यते, **तदा** तस्मिन् काले **वसुदेवस्तत्तपसः** प्राग्भवविहितयतिवैयावृत्त्यादिलक्षणस्य आक्रोशसहनादिक्षमालक्षणस्य च **फलं** तज्जनितपुण्योत्कर्षसम्पाद्यत्वात्तस्य ॥५३-५४॥

अथ क्षमामेव मोक्षाङ्गतया उपदिशन् दृष्टान्तमाह—

**सपरक्कमराउलवाइएण सीसे पलीविए नियए ।**
**गयसुकुमालेण खमा, तहा कया जह सिवं पत्तो ॥५५॥**

इहाऽपि सुखेन गाथार्थाऽधिगमाय पूर्वं कथानकमेव कथ्यते । अथ **गजसुकुमालकथा** प्रारभ्यते—

## [ गजसुकुमालकथानकम् ॥ ]

ते **भद्रिलपुरे** तत्र **सुलसानागव**र्द्धिताः । व्यूहुर्द्वात्रिंशतं कन्याः प्रत्येकं **देवकी**सुताः ॥१॥
षडप्यमी समीपे **श्रीनेमिनः** स्वामिनस्तदा । प्रतिबुद्धा व्रतं भेजुर्भवानलजलायितम् ॥२॥
सर्वेऽपि चरमाङ्गास्ते द्वादशाङ्गीं दधुः क्रमात् । जग्मुश्च **द्वारिकां** स्वामिपादैः सहविहारिणः ॥३॥
ते षष्ठपारणकृते भूत्वा युगलिनस्त्रिधा । त्रिरत्नीनयनानीव द्वारिकां प्राविशत् पुरीम् ॥४॥
तेभ्योऽ**नीकयशोऽनन्तसेनौ** प्राग् **देवकीगृहम्** । गतौ तौ **देवकीकृष्ण**प्रख्यैः[१] प्रेक्षाऽऽददे[२] मुदम्[३] ॥५॥
तया तौ मोदकैः सिंहकेशरैः प्रतिलाभितौ । निर्जग्मतुस्तयोरन्यावुभावाजग्मतुस्ततः ॥६॥
ताव**प्यजितसेनं** च निहतारिं तथा मुनिम् । सा प्रत्यलाभयत्साधू तद्रूपावेव विस्मिता ॥७॥
ततो **देवयशःशत्रुसेनौ** तत्सोदरौ यती । तत्तुल्यावेव तत्रैतौ तौ नत्वाचष्ट **देवकी** ॥८॥
मुहुर्मुहुरिहायाता यूयं दिग्मोहतः किमु । किं त एव न यूयं वा ममैवायं मतिभ्रमः ॥९॥
अप्यस्यां पुरि वा भूतिभर्त्सितत्रिदशौकसि । न युक्तं भक्तपानादि लभन्ते यतिपुङ्गवाः ॥१०॥
तावूचाते च दिग्मोहो न नः षड् बन्धवो वयम् । **भद्रिल**द्रङ्ग[1]वास्तव्य**सुलसानाग**सूनवः ॥११॥
श्री**नेमि**पादपद्मान्ते षडप्यात्तव्रता वयम् । आगमाम क्रमादद्य युग्मीभूय भवद्गृहम् ॥१२॥
सविस्मयाऽथ सा दध्यौ षडप्येते कथं बत । तथा विष्णोः समानाः स्युस्तिलस्यापि तिला यथा ॥१३॥
**अतिमुक्त**मुनीन्द्रेण जीवदष्टसुता पुनः । पुराख्यातास्मि तत्किन्नु ममैवामी षडङ्गजाः ॥१४॥
इति ध्यात्वा द्वितीयेह्नि प्रष्टुं श्री**नेमिनं** जिनम् । सा ययौ समवसृतं **सहस्राम्रवने** वने ॥१५॥
भावज्ञोऽथ विभुः स्माह षट् तेऽमी सूनवस्तव । जीवन्तः शक्रसेनान्या **सुलसायै** समर्पिताः ॥१६॥
उत्प्रस्नवस्तनी साऽथ तान् षट् साधूनवन्दत । निजगाद च जीवन्तः साधु दृष्टाः स्वनन्दनाः ॥१७॥

---

१. प्रख्यौ-C, H, B प्रेक्ष्यौ - KH । २. प्रेक्ष्या B, A, P । ३. मुनिं - KH ।

टि. 1. द्रङ्गः-पत्तनविशेषः ।

प्रीताऽस्मि राज्यमुच्चैर्वा व्रतं वा मद्भुवामिति[1] । खिन्नास्मि च मया यन्न सूनुरेकोऽपि लालितः ॥१८॥
जगौ जगद्गुरुस्तां च किमु ताम्यसि देवकि ! । ननु प्राग्जन्मकर्मेदं जन्मन्यत्र तवाऽफलत् ॥१९॥
त्वया सपत्न्या रत्नानि हृतानि प्राक्तने भवे । तस्या रुदत्याः पुनरप्येकं रत्नं समर्प्पितम् ॥२०॥
तत् प्राच्यं दुष्कृतं स्वस्य निन्दन्ती देवकी ततः । आगादगारं तस्थौ च वाञ्छन्ती सूनुसम्भवम् ॥२१॥
किं मातर्दृश्यसे जातदुःखेवेत्यथ शाङ्गिणा । सा पृष्टाभिदधौ पुत्र ! निष्फलं मम जीवितम् ॥२२॥
त्वज्ज्येष्ठान् **सुलसा** बाल्ये **यशोदा** त्वामपालयत् । अपूर्यत न मे बाललालनस्य मनोरथः ॥२३॥
वत्स ! तत्सुतमिच्छामि तन्मनोरथपूर्त्तये । **बाललालनहर्षो हि देवीनामपि दुर्लभः** ॥२४॥
अयं[१] ते पूरयामीच्छामित्युक्त्वाऽथ **जनार्द्दनः** । तपसाऽऽराधयामास वासवध्वजिनीपतिम्[2] ॥२५॥
ऊचे स देवो **देवक्या** भविष्यति सुतोऽष्टमः । स पुनः प्राप्ततारुण्यः पुण्यधीः प्रव्रजिष्यति ॥२६॥
अनु तद्वचनं कश्चिन्महर्द्धिः स्वर्गतश्च्युतः । देवोऽभूद् **देवकी**कुक्षिसरोज[3]विशदच्छदः ॥२७॥
जज्ञे च समये सूनुः सा तं बालमलालयत् । [4]गजादिसुकुमारान्तसंज्ञमन्यमिवाच्युतम्[5] ॥२८॥
मातुर्भ्रातुश्च नेत्राणि प्लावयन्नमृतैरिव । तयोः समं प्रमोदेन स क्रमेण व्यवर्द्धत ॥२९॥
असौ **गजसुकुमारः** कन्यां **द्रुमम**हीपतेः । **प्रभावत्या**ख्यया ख्यातां व्युवाह पितुराज्ञया ॥३०॥
**सोमा**ख्यां क्षत्रियायोनिं **सोमशर्म**द्विजात्मजाम् । अनिच्छन्नप्युदूहेऽसौ मातृभ्रातृनिबन्धतः ॥३१॥
तत्रैव च दिने श्रुत्वा गजः श्री**नेमि**देशनाम् । आपृच्छ्य पितरौ दीक्षां भार्यायुग[२]युतोऽग्रहीत् ॥३२॥
वियोगेन **गज**स्याऽथ पितरौ भ्रातरोऽपि च । बिभ्राणाश्चेतसि शुचं दुस्तरां रुरुदुस्तराम् ॥३३॥
पृष्ट्वा प्रभुं श्मशानेऽस्थात् सायं प्रति[३]मया गजः । तत्र दृष्टश्च दुष्टेन **सोमशर्म**द्विजेन सः ॥३४॥
स च व्यचिन्तयद्विप्रो धिग् विडम्बयितुं बत । मम पुत्रीमुपायंस्त पाखण्डैकचिकीरयम् ॥३५॥
ध्यात्वेति स द्विजः क्रुद्धो विरुद्धो **गज**मूर्द्धनि । घटीकण्ठं [४]न्यधाद्दीप्तं चिताङ्गारालिमालितम् ॥३६॥
अङ्गारैरङ्गपात्रे तैर्दग्धकर्मेन्धनैः क्षणात् । सिद्धः शान्तस्य तस्यात्मा स्फुरत्केवलसौरभः ॥३७॥
चचाल चालोकयितुं **गज**मुत्कण्ठितः प्रगे । पुरीतः सपरीवारो रथेनाथ रथाङ्गभृत् ॥३८॥
नगर्या बहिरैक्षिष्ट वहन्तं शिरसेष्टिकाम् । वृद्धमेकं द्विजं **विष्णु**र्यान्तं देवकुलं प्रति ॥३९॥
इष्टिकां स्वयमा[6]पाकादेकां तत्कृपया **हरिः** । निन्ये देवगृहे तत्रैकैकां लोकोऽपि कोटिशः ॥४०॥
कृत्वा कृतार्थं तं विप्रं जगाम स्वामिपर्षदि । तत्रापश्यन् **गज**मभूदत्याकुलमना **हरिः** ॥४१॥

---

१. इयं - KH । २. युगयुगग्रहीत् - K, D, C, KH, B, H । ३. महा.... P । ४. व्य... P ।

टि. 1. मम पुत्राणां राज्यं वा व्रतं वा इति प्रीताऽस्मि इत्यर्थः । 2. ध्वजिनीपतिः-सेनापतिः । 3. हंसः । 4. 'गज' इति शब्द आदौ यस्य सुकुमार इति च शब्द अन्ते यस्य, सा च संज्ञा नाम यस्य स, तम् इत्यर्थः । 5. अच्युतः-श्रीकृष्णः । 6. आपाकः इष्टिकापाकस्थानम् - 'नींभाडो' इति भाषायाम् तस्मात् ।

प्रभुं नत्वाऽथ पप्रच्छ क्व मे भ्रातेति **केशवः** । द्विजाद् **गजस्य** निर्वाणं जिनेन्द्रोऽपि न्यवेदयत् ॥४२॥
**हरिर्मूर्च्छामथा**ऽगच्छद् बुद्ध्वा पप्रच्छ च प्रभुम् । विज्ञातव्यः कथं स्वामिन् ! स भ्रातुर्घातको मया ॥४३॥
प्रभुरप्यभ्यधात् **कृष्ण** ! तद् द्विषं प्रति मा कुपः । त्वद्भ्रातुः स हि साहाय्यं चक्रे द्राग् मुक्तिसाधने ॥४४॥
चिरसाध्याऽपि सिद्धिः स्याद् द्राक् सहायबलेन हि । त्वदिष्टिकार्प्पणेनेव वृद्धस्याद्य द्विजन्मनः ॥४५॥
**सोमशर्मा** भवद्भ्रातुर्न विदध्यादिदं यदि । कुतः स्यात्तस्य सिद्धिस्तद्विना कालविलम्बनम् ॥४६॥
भयाद्वनं व्रजन् पुर्यां विशतस्तव दर्शनात् । म्रियते भिन्नमूर्द्धा यः स [1]भवद्भ्रातृघातकः ॥४७॥
**मुकुन्दो**ऽथ रुदन्बन्धोः संस्क्रियाद्यं स्वयं व्यधात् । तथाविधं च तं विप्रमपश्यद् **द्वारिकां** विशन् ॥४८॥
क्रमयोर्बन्धयित्वा तं भ्रमयित्वाऽभितो नरैः । अक्षेपयद्बहिर्बन्धुद्विषं बलिभुजां बलिम् ॥४९॥

**इति गजसुकुमालकथानकम् ॥**

अथ व्याख्या—सह पराक्रमेण परपराजयोत्साहलक्षणेन वर्त्तते इति **सपराक्रमम्,** तच्च तत् **राजकुलं** च, तस्य **वातस्तत्कृत** उत्कर्षस्तेन **जयति** सर्वोत्कर्षेण वर्त्तते **तेन,** यद्वा सपराक्रम इति तस्यैव विशेषणं; **सपराक्रमश्चासौ राजकुलवातिकश्चेति तेन, शीर्षे** शिरसि **प्रदीपिते** ज्वालिते **निजे** स्वीये **गजसुकुमालेन क्षमा** क्षान्तिस्**तथा** तेन त्रिकरण[2]शुद्धिनिष्प्रकम्पताप्रकारेण **कृता** अकारि गोचरेति गम्यते, **यथा शिवं प्राप्त** इति गाथाक्षरार्थः ॥५५॥

एवमन्येऽपि साधवस्तितिक्षन्त इत्युपनयमाह—

> **रायकुलेसु वि जाया, भीया जर-मरण-गब्भवसहीणं ।**
> **साहू सहंति सव्वं, नीयाण वि पेसपेसाणं ॥५६॥**

**राजकुलेसु** उग्रभोगादिषु आसताम् अन्येषु तेष्वपि **जाताः साधवः सर्वं सहन्ते** इति सम्बन्धः । किम्भूता **भीतास्त्रस्ता जरामरणगर्भवसतिभ्यः** वयोहानिप्राणत्यागभूयोगर्भावतारेभ्यः, अत्र पञ्चम्यर्थे षष्ठी । **नीचानामपि** निन्द्यजातीनामपि **प्रेष्याणाम**पि परकर्मकृतामपि ये **प्रेष्या** दासास्तेषां सम्बन्धि दुर्वाक्यताडनादिकमिति कर्म गम्यम् ॥५६॥

अथ क्षमावद्विनयोऽपि कुलीनानामेव स्यादित्याह—

> **पणमंति य पुव्वयरं, कुलया न नमंति अकुलया पुरिसा ।**
> **पणओ पुव्विं इह जइ-जणस्स जह चक्कवट्टिमुणी ॥५७॥**

> **जह चक्कवट्टिसाहू, सामाइयसाहुणा निरुवयारं ।**
> **भणिओ न चेव कुविओ, पणओ बहुयत्तणगुणेण ॥५८॥**

अत्र साम्प्रदायिकोऽप्यर्थः कण्ठोक्त एव । तथा च साम्राज्यमुत्सृज्य गृहीतदीक्षश्चक्री मुनीन् कोऽपि न

---

१. भवेद्....P । २. शुद्धः.....K, D । शुद्ध....C, A, KH, H ।

वन्दते स्म । स शिक्षितस्तद्दिनदीक्षितेन गुणाधिकोऽभून्नितरां विनीतः । शिक्षा च इयं —**पणमंति** प्रकर्षेण प्रह्वा भवन्ति **च**शब्दस्य पुनरर्थत्वात्, अकुलजेभ्यो विशेषार्थ उपन्यासः, **पूर्वतरं** प्रथममेव **कुलजा** विशिष्ट-कुलोत्पन्नाः, **न नमन्ति** स्तब्धा भवन्ति **अकुलजा** निन्द्यजातयः **पुरुषाः** प्रायो नीचजातिहेतुत्वात् दुर्विनीततायाः । एवं सति यथा चक्रवर्त्ती भूत्वा मुनिस्त्वं वर्त्तसे, तथा त्वया सुतरां प्रणतिपरेण भवितव्यम् इत्युक्तोऽसौ सञ्जातसंवेगः सम्यग्नोदनेयमित्यभिधाय **यतिजनम्** अद्यदिनदीक्षितादिभेदभिन्नं साधुलोकं **प्रणतः**, प्राकृतत्वात् द्वितीयार्थे षष्ठी, **पूर्वं** प्रथममेव **इह** सर्वज्ञशासने । **यथा** स **चक्रवर्तिमुनि**स्तथाऽन्येनाऽपि भवितव्यमित्युपदेशः ॥५७॥

एतदेव स्फुटयति **यथा चक्रवर्तिसाधुः सामायिकसाधुना** लघुनापि **निरुपचारं** निष्ठुरं **भणितः** शिक्षितः सन् **नैव कुपितः**, **च**शब्दादनुग्रहं च मन्वानः **प्रणतो बहुत्वगुणेन** हेतुभूतेन प्रणतेः क्षान्ति-मार्दवाद्याश्रयत्वात् । तथाहि मोक्षहेतुतामधिकृत्य बह्वी क्षान्तिर्मृदुता वा, तुच्छास्तु अभिमानादयोऽतोऽस्ति अस्या बहुत्वगुणस्तेन प्रणतः । अस्य दृष्टान्तस्योपनयः प्राग्गाथायामेवोक्तः ॥५८॥

तदेवमनेन लघोरपि वचनमनुष्ठितं गुरोस्तु सम्बन्धि सुतरां तथेत्यनुष्ठेयमपि यो मन्दबुद्धिर्नानुतिष्ठेत, तद्दोषदर्शनाय दृष्टान्तं गाथात्रयेण सूचयति—

**ते धन्ना ते साहू, तेसिं नमो जे अकज्जपडिविरया ।**
**धीरा वयमसिधारं, चरंति जह थूलभद्दमुणी ॥५९॥**

**विसयाऽसिपंजरमिव, लोए असिपंजरम्मि तिक्खम्मि ।**
**सीहा व पंजरगया, वसंति तवपंजरे साहू ॥६०॥**

**जो कुणइ अप्पमाणं, गुरुवयणं न य लएइ उवएसं ।**
**सो पच्छा तह सोयइ, उवकोसघरे जह तवस्सी ॥६१॥**

आसामपि सुखावबोधार्थं कथानन्तरं पश्चादक्षरार्थः कथयिष्यते । कथा [१]चेयम्—

अथ **श्रीस्थूलभद्रकथा** कथ्यते—

**[ श्रीस्थूलभद्रकथानकम् ॥ ]**

अस्ति [1]सौवस्तिकेनेव सुकृतेन [२]कृतोच्चयम् । विभूतिपटलीपात्रं **पाटलीपुत्र**पत्तनम् ॥१॥
गुणवृन्दपरिस्पन्दो **नन्दो** नामा[2]धिभूरभूत् । [३]त्रिखण्डक्ष्मापतिस्तत्र श्रियः प्रिय इवापरः ॥२॥
मन्त्री गुणानाम[3]ट्टालः **शकडालः** स विश्रुतः । राज्ञोऽभूत् [4][४]सर्वभूपश्रीहूतिदूतीभवन्मतिः ॥३॥
पत्न्यां **लक्ष्मीवती**नाम्न्यां तस्य ज्यायान् सुतोऽजनि । स्थूलो गुणैः श्रिया भद्रः **स्थूलभद्र** इतीरितः ॥४॥

---

१. चैवम् D, K । २. कृतान्नति - D, K । ३. त्रिखंड...P । ४. दूँती...P ।

टि. 1. सौवस्तिकः-पुरोहितः । 2. अधिभूः-स्वामी । 3. शिखरं इत्यर्थः । 4. सर्वभूपश्रियो हूतौ-आह्वानविषये दूतीभवन्ती मतिर्यस्य सः ।

अद्वितीयमतिश्चास्य द्वितीयः **श्रीयका**भिधः । [1]श्रीनन्दहृदयानन्दकन्दलोऽजनि नन्दनः ॥५॥
रम्भासौभाग्यसंरम्भविलोपैका[2]वलेपिनी । **कोशे**ति [3]हेतिः कामस्य वेश्या तस्यामभूत्पुरि ॥६॥
ग्रीष्मर्तुशर्वरीमेकामिव द्वादशवत्सरीम् । अध्युवास तदावासं **स्थूलभद्रः** सुखोन्मुखः ॥७॥
अङ्गरक्षतया भूमिभर्तुर्विश्रम्भभाजनम् । कया कया न स कृती **श्रीयको**ऽश्रीयत श्रिया ॥८॥
अभूत्तत्र च विद्यैकरुचि**र्वररुचि**र्द्विजः । महाकवित्ववादित्वशब्दवेदित्वपारगः ॥९॥
अष्टोत्तरशतेनाऽयं नित्यं नवनवैः कृतैः । कृती क्षितिपतिं श्लोकैरुप[4]श्लोकयति स्म तम् ॥१०॥
न प्राशंसि कदाप्येष मन्त्रिणा द्विष्टदुष्टधीः । तुष्टिदानं न तुष्टोऽपि तदस्मै नृपतिर्ददौ ॥११॥
मत्वा **वररुचि**स्तत्र समारभत सेवितुम् । उपायनैरुपायज्ञो गृहिणीं तस्य मन्त्रिणः ॥१२॥
स प्रीतया तया पृष्टः कार्यमाचष्ट कोविदः । त्वत्पतिर्नृपतेरग्रे स्तुतां मत्कवितामिति ॥१३॥
इदं तयाऽथ विज्ञप्तः प्रोचिवान् सचिवाग्रणीः । [5]द्विष्टदृष्टेर्भृशं नास्य वचनं क्वचन स्तुवे ॥१४॥
तयाऽथ साग्रहं मन्त्री गदितस्तदमन्यत । **कामस्य वन्दकाराणां [6]वाग्निकारेऽस्तु कः क्षमः** ॥१५॥
अग्रे नृपं **वररुचेः** पठतः कवितामथ । शुभा सुभाषितस्यास्य गतिरित्याह मन्त्रिराट् ॥१६॥
ददौ तदस्मै दीनारशतमष्टोत्तरं नृपः । **अहो स्वयं क्रियामूढाः परोक्तिप्रत्यया नृपाः** ॥१७॥
अथास्मै दीयमानेषु दीनारेषु दिने दिने । किमेतद्दीयते नित्यमित्यमात्योऽवदन्नृपम् ॥१८॥
अथोचे पार्थिवो मन्त्रिन् ! दीयते त्वत्प्रशंसया । स्वयं चेद्दीयतेऽस्माभिर्नाऽग्रे तत्किमदीयत ॥१९॥
मन्त्र्यूचे प्रशशंसाऽहं सुभाषिततर्तिं शुभाम् । पठतः परकाव्यानि प्रशंसा क्रियतेऽस्य का ॥२०॥
नृपोऽप्यूचेऽन्यनिर्माल्यं सूक्तिमाल्यं ददाति मे । अमात्य ! सत्यमेतच्चेद्वार्यस्तद् द्वार्यसौ विशन् ॥२१॥
उवाच सचिवः स्वामिन् ! दर्शयिष्यामि वः प्रगे । श्लोकानेतेन पठितान् [१]पठन्तीर्बालिका अपि ॥२२॥
**यक्षा** च **यक्षदत्ता** च **भूता**ऽथो **भूतदत्तिका** । **सेणा वेणा** च **रेणा** च सप्ताऽऽसन् मन्त्रिपुत्रिकाः ॥२३॥
सकृदुक्तमपि ज्येष्ठाऽग्रहीत् प्राज्ञा-नवं श्रुतम् । द्वित्र्यादिवेलाक्रमतो[२]ऽगृह्णन्नन्या यथाक्रमम् ॥२४॥
उपान्तं भूमिकां तस्याऽन्येद्युर्मन्त्री निनाय ताः । समुपावीविशच्चाऽत्र प्राज्ञो यमनिकान्तरे ॥२५॥
स्वयंकृतान् **वररुचि**र्वरानष्टोत्तरं शतम् । श्लोकानूचे तदा ताश्च यथाज्येष्ठमनूचिरे ॥२६॥
ततस्तस्य नृपो रुष्टस्तुष्टिदानं न्यवारयत् । **वृतिश्च रक्षकश्च स्यान्मन्त्री भूपफलद्रुमे** ॥२७॥
गत्वाऽथ स कविर्यन्त्रं प्रच्छन्नं **जाह्नवी**जले । वस्त्रबद्धं च दीनारशतमष्टोत्तरं न्यधात् ॥२८॥
[7]ततस्तुत्वा प्रगे गङ्गां क्रमेणाऽऽक्रम्य यन्त्रकम् । जलोत्थितमदीनात्मा दीनारग्रन्थिमग्रहीत् ॥२९॥

---

१. पठती – C, B, A, H, KH । २. गृह्णन्त्येता... B, गृह्णन्त्वन्या – A गृह्णनन्या P ।

टि. 1. श्रीनन्दः कामदेवः । 2. ०अवलेपः-अभिमानः स अस्या अस्ति इति अवलेपिनी । 3. हेतिः-शस्त्रम् । 4. श्लाघते इत्यर्थः । 5. मिथ्यादृष्टेः । 6. वाचः निकारः तिरस्कारः तस्मिन् । 7. ततः स्तुत्वा – [व्यत्यये लुग्वा] १।३।५६ – विसर्गलोपः ।

विदधे नित्यमित्येष विस्मितोऽजनि तज्जनः । कवेः कवितया किं न सिध्यतीति जगाद च ॥३०॥
नृपः श्रुत्वेदमाचख्यौ सचिवाय स चाऽवदत् । एतत्सत्यमसत्यं वा वीक्षणीयं स्वयं प्रगे ॥३१॥
सचिवेनाऽनुशिष्याऽथ प्रहितोऽवहितो नरः । छन्नं निशि धनं न्यस्य कवौ याते[१]ऽम्बुनोऽग्रहीत् ॥३२॥
सद्धिरां **वररुचि**स्ततस्तोतुमगात् प्रगे । तत्कौतुकोत्सुकोऽभ्यागान्नृपोऽपि सह मन्त्रिणा ॥३३॥
स तु दृष्ट्वा नृपं द्रष्टुकाममुद्दामया गिरा । सविस्तरतरं [1]सिद्धसिन्धोर्व्यधित वर्णनाम् ॥३४॥
वर्णनान्ते[२] द्रुतं यन्त्रमाचक्राम क्रमेण सः । उत्पत्य नाऽपतन्पाणौ दीनारा नीरतस्तु ते ॥३५॥
मध्येऽम्बुनि धनं पाणिस्पर्शनादप्यनाप्य तत् । ह्रीदीर्यमाणहृत्तस्थौ सो[2]ऽपराद्धेषुयोधवत् ॥३६॥
अन्यायकृदियं **गङ्गा** निक्षिप्तमपि नाऽऽर्पयत् । तद्वित्तमर्प[३]णीयं ते न्यायं पाल[४]यता मया ॥३७॥
उपलक्ष्य गृहाणेयं श्रीस्ते भवति वा न वा । इत्युक्त्वा सोर्प्पयद्वित्तं [५]ग्रन्थितं सचिवः कवेः ॥३८॥
तयोक्त्या ग्रन्थिना तेन तां स विद्वान् दशां गतः । यस्याश्चरणरेणुत्वमेति शत्रु[६]कृता मृतिः ॥३९॥
जगौ मन्त्री नृपं विप्रो विप्रतारयति प्रजाम् । अयमित्थं निशि न्यस्य प्रगे गृह्णन् धनं जलात् ॥४०॥
साधु बुद्धं त्वयामात्य ! शाठ्यमस्येति भूपतिः । निगदन् विस्मयस्मेरो वेश्मने स्म प्रयात्यथ ॥४१॥
अथामर्षीत् द्विजो दुःखपेटिकाचेटिकादिकम् । पप्रच्छ प्रतिकाराय प्रत्यहं मन्त्रिचेष्टितम् ॥४२॥
असज्जि **श्रीयको**द्वाहाऽऽमन्त्रणीयाय मन्त्रिणा । भूपायोपायनीकर्तुमस्त्रसिंहासनादिकम् ॥४३॥
तदा सचिवदासीतो मत्वा **वररुचि**श्च तत् । चणकादिप्रदानेन पूर्डिम्भानित्यपाठयत् ॥४४॥
न वेत्ति लोको यदसौ **शकडालः** करिष्यति । व्यापाद्य नन्दं तद्राज्ये **श्रीयकं** स्थापयिष्यति ॥४५॥
पठतां डिम्भरूपाणां पुरस्यान्तः पदे पदे । इदं श्रुत्वा जनश्रुत्या नृपश्चेतस्यचिन्तयत् ॥४६॥
**बालका यच्च जल्पन्ति यच्च जल्पन्ति योषितः । औत्पातिकं च यद्वाक्यं तद् भवत्यन्यथा न हि** ॥४७॥
तत्प्रत्ययाय राज्ञाऽथ प्रहितः स्वहितः पुमान् । गृहस्वरूपं मन्त्रीन्दोर्विनिरूप्य व्यजिज्ञपत् ॥५८॥
सज्यन्ते वाजिनो दिव्या रच्यन्ते भूषणोच्चयाः । यानि राजन्ययोग्यानि [७]तेज्यन्तेऽस्त्राणि तानि च ॥४९॥
इति ज्ञात्वा प्रकुपितो नृपतिः सचिवं प्रति । सेवाक्षणप्रणामेऽपि तत्तस्याऽभूत् पराङ्मुखः ॥५०॥
भावं विज्ञाय राज्ञोऽथ मन्त्र्याह **श्रीयकं** रहः । केनाऽपि ज्ञापितो भर्तुरभक्तोऽहं द्विषन्निव ॥५१॥
कुलक्षयोऽयमस्माकमाकस्मिकतयोत्थितः । तं रक्ष दक्ष ! तन्वानो नत्वाऽऽदेशमिमं मम ॥५२॥
छेद्यस्त्वयाऽसिना मौलिर्नृपाग्रे नमतो मम । प्रभोरभक्तो हन्तव्यस्तातोऽपीति ततो वदेः ॥५३॥
धृते केशेषु जरसा मय्येवं तरसा मृते । चिरं त्वयि श्रीः सरसा विभातु परसाधिका ॥५४॥

---

१. तेंबुतो – D । २. तेद्रुतं – P, KH, K । ३. णीयेते – P । ४. यतो... P । ५. ग्रंथिगं A । ६. कृतानतिः – KH, कृतामतिः – B । ७. त्यज्यंते – P ।

टि. 1. गङ्गानदी । 2. अपराद्धा–अलब्धलक्षा इषवो बाणा अस्य अपराद्धेषुः, स चासौ योधश्च स इव, लक्ष्यतः च्युतः इत्यर्थः ।

रुदन्नुदश्रुसलिलः स जगौ [1]कलिलस्थितः । तात ! कर्मेच्छति म्लेच्छतिलकोऽपि न कोऽप्यदः ॥५५॥
ऊचे मन्त्री कुलमिदं स्वसात्कुरु निहत्य माम् । दृष्टं राज्ञा विरुद्धेन [१]स्तम्भं लीढमिवाग्निना ॥५६॥
न्यस्य तालुपुटं तालुपुटे नंस्याम्यहं नृपम् । मा भैषीः पितृहत्या[2]या [3]व्यसोश्छेद्यं शिरो मम ॥५७॥
बोधितोऽथ स पित्रेदं स्वीचकार चकार च । किमेतदिति सम्भ्रान्ते भूपे पृच्छत्युवाच च ॥५८॥
ज्ञातश्च स्वामिनो द्रोही हतश्चायं मया रयात् । **मुकुटेनापि किं तेन शीर्यते येन मस्तकः** ॥५९॥
कृत्वोद्ध्र्वदेहिकं कर्म विशुद्धः **श्रीयक**स्ततः । सर्वव्यापारदे राज्ञि विज्ञो व्यज्ञपयत्तदा ॥६०॥
स्वामिन् ! मम पितेवाऽस्ति **स्थूलभद्रा**ऽभिधोऽग्रजः । सुखी पितृप्रसादेन कोशावेश्यानिकेतने ॥६१॥
पृथ्वीशस्तमथाहूय तमेवार्थमचीकथत् । आलोच्येदं करिष्यामि **स्थूलभद्रो**ऽभ्यधादिति ॥६२॥
निर्धारयाऽधुनैवेति भणितो भूभुजाऽथ सः । **अशोकवनिका**माप निकामापन्नसम्भ्रमः ॥६३॥
एकान्ते मतिकान्तेन चित्तेनाऽचिन्तयच्च सः । सदोषा पणयोषावदेषा हन्त नियोगिता ॥६४॥
जनस्य सेवमानस्य दीप्तमानस्य [4]ते उभे । द्रव्यार्जनेषु दाक्ष्यं स्यात् दाक्षिण्यं स्वजनेऽपि न ॥६५॥
तद्वशेन व्ययाधिक्यबाध्यमानहृदः सदा । द्रव्यमर्जयतः पुंसः क्व कृत्याकृत्यचेतना ॥६६॥
तत्कृत्यनित्यचिन्तोऽथ पर्याकुलमना जनः । न स्मरेद्धर्मकृत्यानि कुलकृत्यानि विस्मरेत् ॥६७॥
तदर्थिनः समर्थस्य परस्य पुरुषस्य सः । [5]आतङ्केनाकुलस्तिष्ठेन्न सुखं क्षणमप्यसौ ॥६८॥
तया तयाऽप्यसौ दैवदुर्योगेन विरक्तया । बध्यते बाध्यते कृत्यात् वार्यते मार्यतेऽपि हा ॥६९॥
स्यादतोऽप्यधिकं किञ्चित्पुंसि तज्जुषि जीवति । मृते तु हन्त जायन्ते महत्यो दुर्गतिव्यथाः ॥७०॥
दोषसाम्राज्यपुर्यां च तस्यां तस्यां हहा जनः । भोगमात्रसुखान्मुह्येत् यन्त्रपिण्ड्यां [6]तिमिर्यथा ॥७१॥
ते धन्याः सुधियस्ते च ये तद्भोगसुखं सदा । गृह्णन्ति धर्मकृत्यादि क्षणं नो विस्मरन्ति च ॥७२॥
तत्तां च तां च नो सेवे सेवे सर्वगुणं तु किम् । इत्यन्तर्विमृशन् दीक्षामुदीक्षामास मन्त्रिसूः ॥७३॥
दध्यौ चैनां न किं सेवे [7]यत्सेवावशगः पुमान् । हीनवंशोऽपि [२]सेव्येत सुरासुरनरोत्तमैः ॥७४॥
दीक्षोल्बणगुणग्रामक्रियालीनस्य देहिनः । जायन्ते त्रिजगत्सम्पदब्धयः सर्वलब्धयः ॥७५॥
अपवित्रः पवित्रः स्याद्दासो विश्वेशतां भजेत् । मूर्खो लभेत ज्ञानानि मङ्क्षु दीक्षाप्रसादतः ॥७६॥
दत्ते महत्त्वमित्यादि जनस्य ननु जीवतः । महानन्दपदं नित्यं दत्ते दीक्षा मृतस्य तु ॥७७॥
तदिमामेव सेवेऽहमिति मन्त्रिपतेः सुतः । [३]शिरसो ललितान् केशान् क्लेशानेवोच्चखान सः ॥७८॥
[8]रत्नकम्बलतज्जातरजोहरणभाक् ततः । सभां गत्वाऽऽह भूपालमालोचितमिदं मया ॥७९॥

---

१. लंभं - P तंसं - C । २. मन्येत - B । ३. सोल्लसितान्...B, KH, सोलसितान् - C, D, A ।

टि. 1. कलिलं-गहनम्, तस्मिन् स्थितः । 2. पञ्चमी विभक्तिः । 3. विगता असवः प्राणाः यस्य स व्यसुः, तस्य । 4. पणयोषा नियोगिता च । 5. आतङ्कः-भयम् तेन । 6. मत्स्यः । 7. यस्याः दीक्षायाः सेवावशगः इत्यर्थः । 8. रत्नकम्बलेन तत्क्षणं जातं रजोहरणं भजति इति रत्नक० ।

धर्मलाभोऽस्तु ते राजन्नित्युक्त्वा धीरविक्रमः । स[१] निःससार संसारपारावारप्रकम्पनः ॥८०॥
किं **कोशा**वेश्म यात्येष विप्रतार्य व्रतेन माम् । एवं गवाक्षदत्ताक्षस्तमैक्षत महीपतिः ॥८१॥
रम्येऽप्यदत्तनयनं गर्ह्ये[२]ऽप्यविकृताननम् । अवलोक्य मुनिं यान्तमुर्वीकान्तः शिरोऽधुनात् ॥८२॥
**सम्भूतविजया**चार्यपदोपान्तमुपेत्य सः । सुधीः सामायिकोच्चारपूर्वकं व्रतमादित ॥८३॥
मुद्रामथाऽयमुर्वीशः सर्वव्यापारकारणम् । **श्रीयकस्य** कराब्जे[1]ऽब्जवासातल्पमिव न्यधात् ॥८४॥
**स्थूलभद्र**वियोगार्त्तां वार्त्ताभिरमृतोर्मिभिः । प्रतिबोधयितुं **कोशा**मश्रान्तं **श्रीयको** ययौ ॥८५॥
दुःखोक्तिषु सदुःखोऽयं तामुवाच कदाचन । इदं व्यरचयद्देवि ! सर्वं **वररुचिः** खलः ॥८६॥
अनेन नाशितस्तात[३]स्त्वत्प्रियश्च प्रवासितः । तद्वैरपारं गच्छाव आवां देवि ! यदीच्छसि ॥८७॥
कथं त्विति तयोक्तेऽथ शिश्राय **श्रीयको** गिरम् । त्वद्भगिन्यां **वररुचिः** सरुचिः खलु खेलति ॥८८॥
तद्विप्रतार्य विप्रोऽयं मदिरां यदि पाय्यते । ततः पतित इत्येष धिक्क्रियेत [४]कुलद्विजैः ॥८९॥
तयैतत्प्रतिपन्नं च कारितं च तया रयात् । **कृत्या[५]कृत्येषु मुह्यन्ति वेश्यावश्या ध्रुवं जनाः** ॥९०॥
पिबेद् **वररुचि**र्नित्यमित्यवेत्य ततः कृती । वैरपारङ्गतोऽस्मीति सप्रीतिः **श्रीयकः** स्थितः ॥९१॥
**शकटाला**त्यये राजसभान्तः प्राविशत् पुनः । विप्रः क्षिप्रमसौ दीपव्यये सर्प इवालयम् ॥९२॥
नित्यं सत्कविरित्येष राज्ञा सन्मानितो मुहुः । उद्यत्सभाजनैरायान् पूजितश्च स भाजनैः ॥९३॥
राजा कदाचिदेकान्ते सगद्गदतरस्वरम् । संस्मरन् **शकटालस्य** श्रेयांसि **श्रीयकं** जगौ ॥९४॥
यथा दिवस्पतेर्वाचस्पतिर्मन्त्री तथा मम । शकटालोऽभवद्विश्वनिकटाऽऽलोकदर्पणः[६] ॥९५॥
सिंहेनेव गुहा कल्पद्रुमेणेव द्युमेदिनी । रविणेवोर्ध्वदिक् तेन विना भाति न मे सभा ॥९६॥
प्रकाशैककरोऽस्माभिः स स्वनाशभयाज्जडैः । प्रदीपनभयाद्रत्नप्रदीप इव नाशितः ॥९७॥
**श्रीयको**ऽप्याह किं स्वामिन् ! कुर्मो **वररुचि**स्तदा । मुधा डिम्भान् प्रपाठ्येदं कारयामास मद्यपः ॥९८॥
भूपोऽप्यधत्त किं सत्यं विप्रो मद्यं पिबत्ययम् । सचिवोऽवोचत प्रातः सर्वं दर्शिष्यते स्फुटम् ॥९९॥
मध्येसभं प्रभातेऽथ मन्त्रिप्रच्छन्नशिक्षितः । सर्वेषामब्जमेकैकं ददावुद्यानमालिकः ॥१००॥
उन्मीलन्मदनफलक्षोदकीर्णोदरं पुनः । करे **वररुचेः** पद्ममर्पयामास मालिकः ॥१०१॥
शुशुभे स सभालोको लालितैकैकपङ्कजैः । जातापत्यैरिव करैरद्भुतां मुदमुद्वहन् ॥१०२॥
मन्त्री तत्पद्ममाघ्राय जगौ [2]कटरि सौरभम् । क्वेदृशी ददृशे पद्ममालिका मालिकाऽद्य भोः ॥१०३॥

---

१. सन्निः H, L । २. गर्हे – P, KH, C । ३. तत्पतिश्च – P त्वत्पतिश्च – C, KH । ४. ततो द्विजैः D, K, A, सद्भिर्द्विजैः – C सपापधीः – B, कुलध्वजैः P । ५. कृत्येविमु...P । ६. र्पणं – C ।

टि. 1. अब्जवासा-लक्ष्मीः । अब्जे वासो अस्याः इत्यर्थः तस्याः तल्पं शय्या । मुद्रायाः विशेषणम् । 2. कटरि – प्रशंसार्थमव्ययम् ।

मुखेनात्मसखेनात्र[१] सहालिङ्गनसङ्गतिम् । कुर्वाणमिव राजीवमाजघ्रे केन केन न ॥१०४॥
अदत्त नासिकाद्वारि द्विजोऽपि जलजं निजम् । उच्छ्वासेनाऽग्रहीद्गन्धमथ तच्चूर्णगर्भितम् ॥१०५॥
तद्गन्धाद् वान्तरजनीपीत[1]चन्द्रप्रभासुरः । धिक्कृत्य हा कृतो लोकैर्निरियाय[२] नृपालयात् ॥१०६॥
प्रायश्चित्तं ततस्तप्तत्रपुपानं चकार च । जगाम च यमग्राममग्रामटत्वमयं द्विजः ॥१०७॥
**श्रीयको**ऽपि पितृस्वैरवैरा[2]कूपारपारगः । चिरं चचार राज्यार्थपरार्थस्वार्थवर्त्मसु ॥१०८॥
**स्थूलभद्र**स्तु सम्भूताचार्यक्रमसपर्यया । अधीतसूत्रः सूत्रार्थः कृतार्थोऽतपत् सत्तपः ॥१०९॥
[3]तपात्यये तपोराशित्रयमेत्य पुरो गुरोः । जग्राहाभिग्रहान् पापनिग्रहा[३]नुसृतोदयान् ॥११०॥
उपोषितश्चतुर्मासीमहं सिंहगुहामुखे । स्थास्यामि कायोत्सर्गेणेत्येकोऽभिग्रहमग्रहीत् ॥११२॥
दृग्विषाहिबिलद्वारि चतुर्मासीमुपोषितः । स्थातास्मि कायोत्सर्गेण द्वितीयोऽभ्यग्रहीदिति ॥११२॥
उपोषितः कृतोत्सर्गः कूपमण्डूकिकासनः । स्थास्याम्यहं चतुर्मासीं तृतीयोऽप्यभ्यदधादिति ॥११३॥
सम्भूतविजयः शक्तिं मत्वा तानन्वमन्यत । यावत्तावदभाषिष्ट **स्थूलभद्रो** महामुनिः ॥११४॥
**कोशा**वेश्यागृहे चित्रशालायां षड्रसाशनः । स्थातास्मि प्रावृषमहं ममैषोऽभिग्रहः प्रभो ! ॥११५॥
**सम्भूतविजया**चार्यस्तं विचार्य वशेन्द्रियम् । विज्ञाय चोपयोगेन शक्तं तत्रान्वमन्यत ॥११६॥
गुरुं नत्वाऽथ सर्वेऽपि यथोक्तकृतयेऽगमन् । **स्थूलभद्रो**ऽप्यगात् कोशालयं कोशालयं रतेः ॥११७॥
अभ्युत्थिताग्रतः कोशा पद्मकोशायिताञ्जलिः । नाथ ! स्वागतमेह्येहि किं करोमीत्युवाच च ॥११८॥
**स्थूलभद्रो**ऽभ्यधाद् भद्रे ! धर्मलाभोऽस्तु तेऽर्प्पय । चित्रशालां चतुर्मासनिवासविधये मम ॥११९॥
अनुज्ञातस्तया तस्यां सज्जितायां जितेन्द्रियः । उत्तमाङ्गे स्मरस्येव जितकाशी ददौ पदम् ॥१२०॥
सुकुमारशरीरोऽयं व्रतभारेण भङ्गुरः । इहायातोऽपि सहसा न किञ्चित् वक्ति लज्जया ॥१२१॥
तल्लज्जां मज्जयाम्यस्य शृङ्गाररससागरे । ध्यात्वेति षड्रसाहारैः सा वेश्या तमभोजयत् ॥१२२॥
मनोरथाढ्या भ्रूचापदुस्सहाचलदृग्[४] हहा । मुनिं[५] गजगतिः साऽऽप धर्मं कामचमूरिव ॥१२३॥
बहिर्दृशा बहिश्चारुं तां वीक्ष्य न स रक्तवान् । अन्तर्दृशाऽन्तर्मलिनां दृष्ट्वा न च विरक्तवान् ॥१२४॥
[4]सैकताना कटाक्षौघान् कोटिप्राप्तगुणा मुनौ । नताङ्गी कामकोदण्डवल्ली[६]भल्लीरिवाऽऽतनोत् ॥१२५॥
परब्रह्ममयध्यानसन्निरुद्धाखिलेन्द्रियः । न मूर्च्छित इवाऽबोधि तान्यस्त्राणि लगन्ति सः ॥१२६॥
अस्मारयदियं प्राच्यं यद्यद्विलसितं परम् । तत्तदालोचयन्मेने तां स धर्मसखीं सुधीः ॥१२७॥

---

१. नाथ - C, KH । २. निरयाय - P, A, KH । ३. नुत्स्मृतोदयात् - KH, नुत्सृतो... B, C, निसृतोदयात् - H । ४. हया...P, C, K । ५. गजपतिः - P । ६. भिल्ली - P ।

टि. 1. चन्द्रप्रभा सुरा - मदिराविशेषः । वान्ता रजनीपीता चन्द्रप्रभासुरा येन स इत्यर्थः, वररुचेर्विशेषणम् । 2. अकूपारः-समुद्रः । 3. तपात्यये-ग्रीष्मर्तोरन्ते । 4. सा एकताना इति विग्रहः ।

व्योम्नीव चित्ररचनं पयसीवाऽग्निदीपनम् । तस्या विलसितं सर्वं तत्तत्तस्मिन्मुधाऽभवत् ॥१२८॥
नित्यं नव्योदयच्छोभा तत्क्षोभाय दिने दिने । एवं चकार सा ध्यानरसान्न तु चचाल सः ॥१२९॥
तस्मिंस्तदुपसर्गौघैर्ध्यानं प्रत्युत दिद्युते । सत्त्वं वीरवरे वैरिप्रहारनिवहैरिव ॥१३०॥
अथ प्रागिव मोहेन त्वयि रन्तुं कृतोद्यमाम् । धिक् मामिति स्वं निन्दन्ती पदोस्तस्य पपात सा ॥१३१॥
[1]तस्येन्द्रियजयोत्कर्षैरुपसर्गैस्तु दुस्तरैः । तदैव वेश्या वेश्यात्वधर्मध्यानाच्चचाल सा ॥१३२॥
प्रपद्य श्रावकत्वं सा जग्राहेममभिग्रहम् । राजा यस्मै प्रसादान्मां दत्ते भोक्ता स एव मे ॥१३३॥
निर्व्यूढाभिग्रहास्तेऽथ पादमूलं गुरोरगुः । त्रयोऽपि साधवो धर्म्यास्त्रिलोकीविभवा इव ॥१३४॥
आगच्छतः क्रमादूचे गुरुस्तान् किञ्चिदुत्थितः । स्वागतं नाम युष्माकमहो दुष्करकारकाः ! ॥१३५॥
**स्थूलभद्र**मथायान्तमभ्युत्थायाब्रवीद् गुरुः । स्वागतं ते महाभाग ! कृतदुष्करदुष्करः(र !) ॥१३६॥
ते त्रयोऽप्यथ सासूयाः साधवो दध्युरित्यहो । सम्भाषणं गुरोरत्र मन्त्रिपुत्रत्वहेतुकम् ॥१३७॥
षड्रसाहारहारी चेत् कृतदुष्करदुष्करः । वर्षान्तरक्रमेणेदं प्रतिपत्स्यामहे तपः ॥१३८॥
एतच्चेतसि निश्चिन्त्यामर्षिणस्ते महर्षयः । उत्कृष्टसंयमाः कष्टमष्टमासीमवाहयन् ॥१३९॥
प्राप्तायां प्रावृषि प्रीतस्ततः सिंहगुहामुनिः । जगृहेऽभिग्रहं स्थूलभद्रव्यूढं गुरोः पुरः ॥१४०॥
विज्ञाय **स्थूलभद्रेण** सस्पर्द्धमुपयोगतः । तमक्षमं च कार्येऽस्मिन्नाचार्येणाऽभ्यधीयत ॥१४१॥
**स्थूलभद्र** इव **स्थूलभद्र** एवेत्यभिग्रहम् । निर्वाहयितुमीशः स्यात् **कोऽर्कादन्यो दिनं सृजेत्** ॥१४२॥
अभिग्रहो गृहीतोऽयं तव प्राक्तपसामपि । नाशाय भविता पूर्वभुक्तानामतिभुक्तवत् ॥१४३॥
इत्याचार्यैर्निषिद्धोऽपि गृहीततदभिग्रहः । प्राप कोशालये चित्रशालायां **स्थूलभद्र**वत् ॥१४४॥
स्पर्द्धया **स्थूलभद्र**स्य प्राप्तोऽथैष परीक्ष्यते । इत्येनं षड्रसाहारैः **कोशा** स्वयमभोजयत् ॥१४५॥
ततः कृतोरुशृङ्गारा [१]भृङ्गाराऽभ्युन्नतस्तनी । स्मराधिष्ठानदेवीव **कोशा** मुनिमियाय तम् ॥१४६॥
स तां वीक्ष्यैव चुक्षोभ शोभयाऽपहृतेन्द्रियः । **चार्वङ्ग्या को न पात्येत को न [२]दह्येत [2]कीलया** ॥१४७॥
स्मरातुरं कुरङ्गाक्षी याचमानमुवाच तम् । अवश्यं वसुवश्या स्मो वेश्या हि भगवन् ! वयम् ॥१४८॥
वदति स्म यतिः [3]स्मारविकाराकुलितस्ततः । प्रसीद सुन्दरि ! धनं [३]व्योम्नः पुष्पमिव क्व मे ॥१४९॥
अपूर्वसाधो**र्नेपाल**भूपालो रत्नकम्बलम् । दत्ते तमानयेत्येनं निर्वेदयितुमाह सा ॥१५०॥
**नेपालाय** चचालायमकालेऽपि द्रुतं ततः । पङ्के मज्जत्पदो[४]ऽभ्यस्यन्नि[५]र्वाऽधोगमनं मुनिः ॥१५१॥
गत्वा प्राप्य नृपात् रत्नकम्बलं चलिते मुनौ । कीरश्चौरपतेराख्यल्लक्षमेतीति वर्त्मनि ॥१५२॥

---

१. शृंगारा... P, D । २. सह्येत लीलया – P । ३. व्योम्नि – P । ४. न्यस्य....P । ५. निवांधो – P, B निर्बाधागगनं...H ।

टि. 1. इन्द्रियजयोत्कर्षा एव उपसर्गाः किं विशिष्टाः ? दुस्तराः, तैः सा वेश्या वेश्यात्वधर्मध्यानाच्चचाल इत्यन्वयः । 2. कीला– अग्निशिखा, तया । 3. स्मरस्येदं – स्मारः [६।३।१६०] तस्येदम् इत्यनेन अण् ।

किमेतीत्यथ सज्जेषु स चौरेष्वाययौ मुनिः । दृष्ट्वा न किञ्चिदस्तीति तैर्मुक्तः प्रचचाल च ॥१५३॥
शकुनिः पुनराचख्यौ लक्षं यातीदमित्यथ । किमस्ति सत्यं ब्रूहीति स्माह चौरपतिर्यतिम् ॥१५४॥
न्यस्तो मध्येऽस्य वंशस्य वेश्यायै रत्नकम्बलः । अस्तीत्यभिहिते चौरपतिना मुमुचे मुनिः ॥१५५॥
गत्वाऽथ स ददौ **कोशा**वेश्यायै रत्नकम्बलम् । गृहप्रणालिकापङ्के निःशङ्केयं न्यधत्त तम् ॥१५६॥
मुनिः स्माह महामूल्यो महाकष्टेन कम्बलः । मयाऽऽनिन्ये त्वया निन्ये पङ्कान्तः पङ्कजाक्षि ! किम् ॥१५७॥
तयोचे शोचसीमं किं निःसीमं मूढ ! शोच्यताम् । बहुकष्टार्जितं मज्जत् पापे स्वं जन्म मानुषम् ॥१५८॥
तदुक्त्या व्यक्तसंवेगस्तामित्यूचे मुनिस्त्वया । मोहसुप्तो भवदवे दीप्ते साध्वस्मि बोधितः ॥१५९॥
अघानि निरघे ! हन्तुमतीचारभवान्यहम् । गुरुप्राये ! गुरुं यामि धर्मलाभोऽस्तु तेऽन्वहम् ॥१६०॥
**कोशा**ऽप्युवाच युष्माकं मया ब्रह्मव्रतस्थया । आशातना कृता बोधकृते सा क्षम्यतां प्रभो ! ॥१६१॥
इच्छामीति गदन् गत्वा गुरूणां सविधे व्यधात्[१] । स तपांसि प्रथीयांसि रचितालोचनः पुनः ॥१६२॥
मुदा ददेऽन्यदा **कोशा** रथिने पृथिवीभुजा । बभाज राजवश्येति तमकामाऽपि सा पुनः ॥१६३॥
क्वचिन्नान्यः पुमान्मान्यः **स्थूलभद्रा**दृते कृती । रथिनोऽस्य पुरः सुष्ठु तुष्टुवे नित्यमित्यसौ ॥१६४॥
आसाद्य मन्दिरोद्यानं विज्ञानं शयने स्थितः । अथ तस्यै रथी स्वीयं स मदी समदीदृशत् ॥१६५॥
स आम्रलुम्बीं बाणेन विद्ध्वा योधशिरोमणिः । पुङ्खपुङ्खार्पितैर्बाणैः सुप्रापं पाणिना व्यधात् ॥१६६॥
अर्द्धचन्द्रेण तद्वृन्तं छित्त्वा स शयनस्थितः । हस्ताऽऽत्तां तां ददौ तस्यै स्तुत्यै च मुखमैक्षत ॥१६७॥
पश्य सम्प्रति विज्ञानमवधानपरो मम । इत्युक्त्वा सार्षपे राशौ साऽनृत्यदचलेक्षणा[२] ॥१६८॥
तद्राशौ सूचिका पुष्पपिहिता निहिता ततः । नृत्यन्ती तन्मुखे सा न विद्धा पुष्पं च नाऽचलत् ॥१६९॥
स नृत्तकलया तुष्टो रथी सर्वपथीनया[1] । जगाद सादरं कान्ते ! किं ते वद ददाम्यहम् ॥१७०॥
साऽवदद् वद किं चक्रे मया येनाऽसि रञ्जितः । जातिसिद्धमिवाभ्याससिद्धं किञ्चिन्न चित्रकृत् ॥१७१॥
तरन्ति तिमयोऽम्भोधिं व्योम्नि वल्गन्ति पक्षिणः । देवा जगत्सु यान्तीति जातिसिद्धं न चित्रकृत् ॥१७२॥
अभ्याससिद्धं ते लुम्बि[३]कर्त्तनं मम नर्त्तनम् । न किञ्चिद् दुष्करं ह्येतत् कृतं तुष्ट्या तदावयोः ॥१७३॥
भोगोज्ज्वलवपुः **स्थूलभद्रो** भोगैकलालितः । अजात्युत्थमनभ्यस्तं यच्चक्रे दुष्करं हि तत् ॥१७४॥
भोगान् समं मयाऽभुङ्क्त यत्र द्वादशवत्सरीम् । मद्भाजि चित्रशालायां सोऽस्थात् तत्राक्षतव्रतः ॥१७५॥
लाक्षेव वह्निसान्निध्ये स्त्रीसान्निध्ये श्वसन्[४] पुमान् । द्रुतं द्रवीभवत्येव तेनैव मुनिना विना ॥१७६॥
दास्यहं षड्रसं भोज्यं चित्रशाला च तादृशी । नोन्मादं तस्य कुर्मः स्म खेलतः[५] संयमश्रिया ॥१७७॥

१. न्यधात् - P । २. दचलक्षणे - A, L, दचलेक्षणे P, च्चंचलत्कणे - C दचलत्कणौ - D, K । ३. लुंचि - P । ४. वसन्- H; त्वसन् - C, श्वसन् - D, न्वसन् - A । ५. खेलंतः-P ।

टि. 1. सर्वादेः पथ्यङ्गकर्म....[७।१।९४] इत्यनेन ईनः सर्वपथं व्याप्नोति ।

दासीं गणयतस्तस्य मां पूर्वप्रेयसीं तदा । दृढप्रेमाऽधिकस्थेमा संयमश्रीरजायत ॥१७८॥
**स्थूलभद्र**स्तुतिकथामाधुर्यस्वादमीलितम् । उन्मीलत्योष्ठयुगलं स्तुतौ तस्यैव तत्पुनः ॥१७९॥
रथी प्रथीयसीं प्रीतिं प्रथयन्नथ तां जगौ । भद्रे ! कः **स्थूलभद्रो**ऽयं यस्त्वयाऽपीति वर्ण्यते ॥१८०॥
तयोचे **नन्द**भूपालमन्त्रीन्दु**शकटालभूः** । स्तूयते सुकृतायैव मया स्वल्पधियाऽप्ययम् ॥१८१॥
ततश्चमत्कृतः प्रोचे रथिकः प्रथिताञ्जलिः । तस्य दासानुदासोऽस्मि यस्तादृक् तादृगप्यभूत् ॥१८२॥
संविग्नोन्तरिति तया दधत्या धर्मदेशनाम् । बोधितो मोहनिद्रातः कृत्याकृत्यमबोधि सः ॥१८३॥
सा च प्रबुद्धं बुद्ध्वा तं स्वमभिग्रहमभ्यधात् । तच्चाकर्ण्य [1]चमत्का[१]राचान्तचित्तोऽयमूचिवान् ॥१८४॥
ईदृगीदृग्गुणं **स्थूलभद्रं** त्वद्दर्शिताध्वना । अहं भद्रे ! तु यास्यामि त्वं तिष्ठाऽभिग्रहे सुखम् ॥१८५॥
इत्युक्त्वा सद्गुरोरग्रे स जग्राह कृती व्रतम् । **स्थूलभद्रो**ऽपि भगवानाततानाऽतुलं तपः ॥१८६॥
दुष्कालोऽभूज्जगत्कालो द्वादशाब्दीमितस्तदा । कष्टं तोयधितीरस्थः साधुसङ्घस्तमत्यगात् ॥१८७॥
क्रमादगुण्यमानेऽथ साधूनां विस्मृते श्रुते । समुदायं व्यधात् सङ्घः **पाटलीपुत्र**पत्तने ॥१८८॥
यो योगाऽध्ययनोद्देशो यस्याभूत्तं तमग्रहीत् । एकादशाङ्गीमेकत्र सङ्घः संहितवानिति ॥१८९॥
उद्यमी **दृष्टिवादाय** तद्विदे **भद्रबाहवे** । आह्वानाय मुनिद्वन्द्वं सङ्घः प्रहितवानथ ॥१९०॥
सङ्घं व्यज्ञपयत्ताभ्यां सोऽपि प्रारब्धमस्ति यत् । महाप्राणाभिधं ध्यानं भावि नाऽऽगमनं ततः ॥१९१॥
अनुशिष्य मुनी चान्यौ श्रीसङ्घः प्राहिणोत् पुनः । गत्वा नत्वा च तौ **भद्रबाहु**माचार्यमूचतुः ॥१९२॥
सङ्घादेशं न यः कुर्याद्दण्डः कार्योऽस्य कीदृशः । अथाचार्योऽयमाचख्यौ सङ्घबाह्यः क्रियेत सः ॥१९३॥
तावुच्चैरूचतुः सङ्घस्त्वां बाह्यं कुरुते ततः । सोऽप्यूचे किं प्रभुः सङ्घः [२]करोत्येवं करोत्वदः ॥१९४॥
मयि प्रसन्नः श्रीसङ्घः प्रहिणोतु [३]महामतीन् । शिष्यानवश्यं दास्यामि तेभ्योऽहं सप्त वाचनाः ॥१९५॥
एकां भिक्षात आयातस्तत्र दाताऽस्मि वाचनाम् । द्वितीयां कालवेलायां तृतीयां च बहिर्भुवि ॥१९६॥
तुर्यां विकालवेलायां [४]तिस्रस्त्वावश्यकक्षणे । एवं सङ्घस्य कार्यं च मम कार्यं च सेत्स्यति ॥१९७॥
इत्यागत्योदिते ताभ्यां श्रीसङ्घः प्रीतिसङ्कटी । न्ययुङ्क्त **स्थूलभद्रा**दिमुनीन्द्रशतपञ्चकम् ॥१९८॥
तानवाचयदाचार्यो वाचनाल्पतया [५]तु ते । **स्थूलभद्रं** विनो[६]द्विग्नाः स्थानं निजं निजं ययुः ॥१९९॥
उद्विज्यसे कथं नेति स पृष्टः सूरिणा जगौ । नोद्विज्ये वाचनाल्पत्वं किन्तु तृष्णां न हन्ति मे ॥२००॥
तमवोचदथाचार्यो ध्यानं पूर्णमिवास्ति मे । तदन्ते तृप्तिपर्यन्तं दातव्या तव वाचना ॥२०१॥
स सूरिः पूरितध्यानस्तमथाऽवाचयत्तथा । नित्याकण्ठसुधापानं यथात्मानं स बुद्धवान् ॥२०२॥

---

१. रावांत...A रवांत...L 'रचांत' D, H, C, K । २. करोत्वेवं - P । ३. महामुनीन् - P, K, D । ४. तिस्र आव...P । ५. नु - C । ६. द्वक्ताः - P ।

टि. 1. चमत्कारेण आचान्तं चित्तं यस्य स ।

अवधानसमाधानप्रधानतरमानसः । पपाठ दशपूर्वाणि द्विवस्तूनानि स क्रमात् ॥२०३॥
आत्तव्रता विहारेणाऽत्रान्तरे पूतभूतलाः । [१]भगिन्यः **स्थूलभद्रस्य** वन्दनाय समाययुः ॥२०४॥
ताः प्रणम्य गुरुं स्थूलभद्रः क्वेति बभाषिरे । सूरिर्न्यवेदयत्तासामत्र देवकुलेऽस्ति सः ॥२०५॥
मूर्त्ताः शान्तीरिवायान्तीः स्थूलभद्रो निभाल्य ताः । स्वयमाश्चर्यचर्यायै [1][२]हार्यक्षीं तनुमातनोत् ॥२०६॥
पुरो हरिं निरीक्ष्यैता गुरुमित्यभ्यधुर्भिया । प्रभो ! विदार्य ज्येष्ठार्यमस्ति हस्तिरिपुः पुरः ॥२०७॥
मत्वोपयोगयोगेन गुरुरब्रूत गच्छत । वन्दध्वमस्ति वस्तत्र ज्येष्ठार्यो न परं हरिः ॥२०८॥
गतास्ततः कलामूलं **स्थूलभद्र**मवेक्ष्य ताः । चमच्चक्रुर्नमश्चक्रुश्चैनं ज्येष्ठा जगाद च ॥२०९॥
भगवन् ! सममस्माभिः **श्रीयको**ऽपि व्रतं श्रितः । किन्तु कर्त्तुमयं शक्तो नैकभक्तमपि क्षुधा ॥२१०॥
प्रत्याचख्यौ स यामं मद्गिरा पर्युषणाक्षणे । पारणाकारणोत्तालः काले प्रोक्तः पुनर्मया ॥२११॥
प्रत्याख्याह्यद्य पूर्वाह्णं पर्वेदं प्राप्यते कुतः । चैत्यानां परिपाट्यैव सुखं यास्यत्यसौ क्षणः ॥२१२॥
तदपि प्रतिपेदेऽसौ ततः पूर्णेऽवधौ पुनः । उक्तो मयापराह्णार्द्धप्रत्याख्यानं व्यधत्त सः ॥२१३॥
तत[2]स्तमीसमीपेऽसौ सुखं यास्यति निद्रया । तदद्य मुच्यतां भक्तमित्युक्तः स चकार तत् ॥२१४॥
तदर्द्धरात्रिवर्द्धिष्णुः, क्षुधाबाधः स धीनिधिः । स्मृतपञ्चनमस्कारो ममार [3]दिवमार च ॥२१५॥
ऋषिघातं चकाराहमिति स्वं धिक् चकार तत् । पुरः श्रमणसङ्घस्य प्रायश्चित्तं ययाच च ॥२१६॥
सङ्घोऽप्यूचे न किञ्चित्ते प्रायश्चित्तेऽस्ति कारणम् । कृतं तत्तारणायैव तद्विशुद्धतया त्वया ॥२१७॥
अग्रेसङ्घं ततोऽवोचं शोचन्ती [३]स्वमहं पुनः । इदं यदि जिनः ख्याति संवित्तिर्भाति तन्मम ॥२१८॥
तन्मां नेतुं जिनस्यान्ते सङ्घः प्रतिमया स्थितः । एत्य शासनदेवी च तं विनम्य व्यजिज्ञपत् ॥२१९॥
नीत्वा **सीमन्धरस्वामि**पार्श्वेऽमूं यावदानये । पूज्यैः स्थातव्यमित्येवं तावन्मद्विघ्नशान्तये ॥२२०॥
इत्युक्त्वा मामियं निन्ये श्रीजिनोत्तंससंसदि । श्रीमत्**सीमन्धर**स्वामी तदाऽवन्दि मुदा मया ॥२२१॥
आर्येयं **भरतात्** प्राप्ता निर्दोषेति जिनो जगौ । व्याचक्रे चूलिकायुग्मं कृपया मत्कृतेऽपि च ॥२२२॥
देव्याऽथ भग्नसन्देहा नीताहं पौषधाश्रयम् । श्रीसङ्घस्याऽर्प्पयामास चूलिकायुगलं च तत् ॥२२३॥
इत्याख्याय ययौ सेयं स्वाश्रयं सपरिच्छदा । वाचनार्थमथाचार्यं **स्थूलभद्रो**ऽगमन्मुनिः ॥२२४॥
नोवाच वाचनां तत्राऽयोग्योऽसीति [४]गदन् गुरुः । स च दीक्षादिनाद्येव दध्यौ स्वस्यापरा[५]धिताम् ॥२२५॥
ऊचे च शास्तर्मे किञ्चिदागो नाऽऽगच्छति स्मृतिम् । शान्तं पापं न मनुषे कृत्वाऽपीति गुरुर्जगौ ॥२२६॥
स्मृत्वा च तन्मुनिः सूरेः पपात पदयोरयम् । नेदृग्भूयः करिष्यामि क्षमध्वमिति चाऽभ्यधात् ॥२२७॥

१. भगिनः - P । २. हार्यक्षं...KH, C । ३. स्वमहं मुहुः-C, K, L; स्वंमुहुर्मुहुः B, H । ४. जगद्गुरुः-P, K । ५. धितं-C जितां KH ।

टि. 1. हर्यक्षः सिंहः तत्सम्बन्धिनी तनुः हार्यक्षी तनुः, ताम् । 2. तमी - रात्रिः । 3. दिवम् आर (ऋ धातुः) प्राप्तः इति विग्रहः ।

भूयः कुर्याः कृथा मा वा कृतवानधुना पुनः । तत्ते न वाचना देयेत्युज्जगार गिरं गुरुः ॥२२८॥

गुरोः शमयितुं रोषं सोऽथ सङ्घमसज्जयत् । **शान्तिं धराधरस्याग्निर्नैति धाराधरं विना** ॥२२९॥

सूरिर्भूरिनयः[1] सङ्घमूचेऽसौ विकृतो यथा । अल्पसत्त्वास्तथान्येऽपि विकरिष्यन्त्यतः परम् ॥२३०॥

तन्मय्येवावशिष्टानि सन्तु पूर्वाणि सम्प्रति । अस्यैष दोषदण्डोऽभूदन्यशिक्षानिषेधतः ॥२३१॥

उक्तोऽथ बाढं सङ्घेन पूर्वोच्छेदोऽस्तु मा मयि । इत्येतद्वाचनाहेतोः सूरिरूरीचकार गाम् ॥२३२॥

न देया शेषपूर्वाणां कस्मैचिद्वाचना त्वया । इत्यभिग्राह्य सूरिस्तं ग्राहयामास वाचनाम् ॥२३३॥

**स्थूलभद्र**स्ततो खर्व[2]सर्वपूर्वधरो धराम् । विजहार जगद्बोधकार्यमाचार्यकं वहन् ॥२३४॥

तपस्तीव्रतरं तप्यमानो मानोपमर्दकः । सम्पूर्णायुर्विपद्याऽऽप द्यामयं व्रतपद्यया[3] ॥२३५॥

**इति स्थूलभद्रकथानकम् ॥**

अधुना गाथाक्षरार्थः । तत्र **ते धन्याः** स्पृहणीयपुण्यभाजस्**ते साधवस्तेभ्यो नमो ये अकार्यं प्रति विरता** अनाचारपराङ्मुखाः, अनेकतच्छब्दग्रहणमादरातिशयार्थं **धीरा** निष्प्रकम्पा **व्रतमसिधारं** करवालधारासञ्चरणवत् दुश्चरं **चरन्ति** स्वशक्त्यनुसारेणाऽनुतिष्ठन्ति **यथा स्थूलभद्रमुनि**रिति ॥५९॥

व्रतस्य असिधारतामेवाह-विषीदन्ति एतेषु सत्सु दुर्मेधसः संयमं प्रतीति निरुक्ता**द्विषयाः** शब्दादयस्त एव विवेकिनां संयमशरीरविदारणकारणतया दारुणविपाकत्वेन त्रासजनकत्वात् सर्वदिग्भावाच्च[4] **असिपञ्जरं** करवालमन्दिरं तस्मि**न्निव लोके** विषयमयत्वप्राधान्येनेह युवतीजनस्वरूपे विश्वे किमित्याह–**वसन्ति तपःपञ्जरे साधवः** इति निर्वाहपदेन सम्बन्धः । तपोऽनशनादि द्वादशभेदभिन्नं मनोवाक्कायनियमनरूपम्, तदेव विषयखड्गसम्पातरक्षणक्षमत्वात् पञ्जरमिव, तस्मिंस्तपःपञ्जरे । ज्ञानादिभिरुपायैर्मोक्षसाधकत्वात् साधवो वसन्ति निराबाधतया शाश्वतबुद्ध्या विश्वस्तं तिष्ठन्ति । के इव कुत्र ? **असिपञ्जरे तीक्ष्णे** निरूपचरितोत्तेजितखड्गपञ्जरे । बहिर्लोके **पञ्जरगता सिंहा इव**, तपःपञ्जरे साधवोऽपि वसन्ति । अयमत्र भावः-सिंहानां किल पञ्जरस्थानां यदा मदावसरो भवति, तदा ते पञ्जरभङ्गाय प्रहर्तुमुत्तिष्ठन्ते, तदवस्थांश्च तान् भीषयितुं बहिस्तेषां पश्यतां भीषणोत्खातनिष्कृपकृपाणपाणिभिः पुरुषैः प्राणिनो निपात्यन्ते, तदभिमुखानि च करालानि करवालान्युद्गीर्यन्ते, तद्भयाच्च ते पञ्जराऽभ्यन्तर एव निलीनास्तिष्ठन्ति । एवं साधवोऽपि युवतीलोकेन शब्दादिविषयविषमोत्खातखड्गेन खण्ड्यमानमनेकसांसारिकविपद्घातैः प्राणिग्राममाकलय्य भवनिपातकातरतया तपोऽनुष्ठानपञ्जरमध्ये यत्नेन तिष्ठन्तीति ॥६०॥

एवंविधस्य च महासत्त्वसेवनीयस्य तपोऽनुष्ठानस्य गुरूपदेशो मूलमिति गुर्वाज्ञाकारिणं स्तुत्वा, तदतिक्रमकारिणोऽनेनैव दृष्टान्तेन प्रत्यवायमाह —**यः करोति अप्रमाणं गुरुवचनं** सामाचारीप्ररूपणात्मकं

---

१. र्यास्तथा... C ।

टि. 1. भूरिनयः-दीर्घदृष्टिः । 2. खर्वः-नीचः न्यूनः इति यावत् स चासौ सर्वः संपूर्णः पूर्वधरश्च । 3. पद्या-मार्गः, तया । 4. सर्वासु दिक्षु सद्भावात् विषयाः एव असिपञ्जरम् ।

सामान्येनाऽऽचार्यवाक्यं, तदुक्तमवज्ञया नैवाऽनुतिष्ठतीत्यर्थः । अत एव निर्भाग्यतावशान्मन्दबुद्धिर्न **च लाति** न गृह्णात्यु**पदेशं,** विशेषतस्तमेवोद्दिश्य दीयमानं गुरुणेति गम्यते **स पश्चात्तथा शोचति** खिद्यते **उपकोशागृहे यथा तपस्वी** कथानकोक्तः प्राग्वर्षे **सिंहगुहावासी**[१]ति ॥६१॥ तस्य च यत्सम्पन्नं तदेवाह–

**जेट्ठव्वयपव्वयभर-समुव्वहणववसियस्स अच्चंतं ।**
**जुवइजणसंवइयरे, जइत्तणं उभयओ भट्ठं ॥६२॥**

कनिष्ठान्यणुव्रतान्यपेक्ष्य **ज्येष्ठव्रतानि** महाव्रतान्येव दुर्वहत्वात् **पर्वतभर**स्तस्य **समुद्वहन**मभ्युपगमेनोत्पाट्य जीवितपर्यन्तप्रापणं **तद्व्यवसितस्य** मयेदं कर्त्तव्यमिति बद्धकक्षस्य, **अत्यन्तम्** अतिशयेन **युवतिजनसंव्यतिकरे उपकोशो**पकण्ठे सति, **यतित्वं** श्रामण्यम् **उभयतः** प्रक्रमात् व्रतित्वगार्हस्थ्याभ्याम् उभाभ्यां **भ्रष्टं** च्युतम् । तथाहि–तदाऽसौ चरणपरिणामाभावान्न यतिः, नापि च गृहस्थो बहिर्वृत्त्या यतिपाखण्डोपलब्धेरिति ॥६२॥

ननु कथं तस्याऽब्रह्मप्रार्थनामात्रेणैव यतित्वनाश इत्याह–

**जइ ठाणी जइ मोणी, जइ मुंडी वक्कली तवस्सी वा ।**
**पत्थंतो य अबंभं, बंभा वि न रोयए मज्झं ॥६३॥**

**यदि स्थानी** कायोत्सर्गिको **मौनी** सङ्केतसंज्ञादिसंन्यासेन निरुद्धवाक्यप्रसरो **मुण्डी** अपनीतकेशो **वल्कली** तरुत्वग्निवसनस्**तपस्वी** विकृष्टतपोनिष्टप्तदेहो, **वा**शब्दाज्जात्यादिपरिग्रहः, अत्र यदिशब्दाः सर्वेऽभ्युपगमे मुहुस्तद्ग्रहणं च शेषाऽशेषगुणयुक्तोऽपि किं बहुना, सर्वगुणसम्पूर्णोपीत्यादरख्यापनार्थं **प्रार्थयन्**भिलषन् **अब्रह्म** मैथुनं **ब्रह्मापि** आस्तां तावदन्यो लोकप्रसिद्ध्या परमेष्ठ्यपि **न रोचते मह्यं** [1]जिनवचनरहस्यनिःसारतया प्रतिभासते ममेत्यर्थः ॥६३॥

युक्तं चैतत् तथाह–

**तो पढियं तो गुणियं, तो मुणियं तो य चेइओ अप्पा ।**
**आवडिय-पेल्लियाऽऽमंतिओ वि जइ न कुणइ अकज्जं ॥६४॥**

इहाऽपि मुहु**स्तत** इत्यभिधानम् आदरख्यापनार्थम् उक्तादन्यत्राऽसूयासूचनार्थं च । तथा च सति न पौनरुक्त्यम् । उक्तं च–

**"वीप्सानुवादाऽऽदरहेत्वसूयाभृशार्थनिर्देशनविस्मयेषु ।**
**सङ्ख्याप्रशंसास्मृतिसम्भ्रमेषु स्यान्नेषदर्थेषु च पौनरुक्त्यम्"** ॥१॥ [ ]

एवमन्यत्रापि यथासम्भवमभ्यूह्यं, पठनं **पठितं** भावे क्तप्रत्ययः सूत्रस्य ग्रहणमित्यर्थः, एवं **गुणितं** तस्यैव परावर्त्तनं, **मुणित**मर्थज्ञानं, यद्वा कर्मणि क्तः पठितं गुणितं मुणितं च सूत्रमिति शेषः । **ततश्च चेतित आत्मेति च**शब्दस्य समुच्चयार्थस्य व्यवहितसम्बन्धत्वात् । ततश्चेतित आत्मा यथावत् प्रत्यभिज्ञातः,

१. वासीयतिः KH ।

टि. 1. जिनवचनरहस्यस्य निर्गतः सारः यस्मात् स, तस्य भावः तेन रूपेण प्रतिभासते, न रोचते इत्यर्थः ।

ततस्तत्सर्वं सफलमिति शेषः । यदि किमित्याह–आपतितः—कथञ्चिदवर्जनीयसन्निधिप्रतिवेशादिवशतो दुःशीलसंसर्गगतः, प्रेरितः—पापमित्रैरकार्यकरणं प्रति नुन्नः, आमन्त्रितो—युवत्यादिभिरभ्यर्थितः, कर्मधारये **आपतितप्रेरितामन्त्रितोऽपि** अपिशब्दः क्वचित् त्रयस्याऽपि सम्भावनार्थः । आस्तामन्यादृशो **यद्येवं**विधोऽपि **न करोत्यकार्यं** नाऽऽचरत्यब्रह्म सामान्येन सिद्धान्तप्रतिषिद्धं वा ततः पठितादिकं सर्वं सफलं नान्यथेति ॥६४॥

तर्हि तस्य पश्चात् कुतः शुद्धिरित्युच्यते–गुरोः सम्यगालोचनापूर्वं निवर्तनात् । तथा चाह –

**पागडियसव्वसल्लो, गुरुपायमूलम्मि लहइ साहुपयं ।**
**अविसुद्धस्स न वड्ढइ, गुणसेढी तत्तिया ठाइ ॥६५॥**

**प्रकटितसर्वशल्यः** प्रकाशीकृतमूलोत्तरगुणापराधः, **गुरुपादमूले** आचार्यचरणान्तिके, न यत्र क्वचन । **लभते साधुपदम्** अविशुद्धपरिणामोदयान्नष्टमपि प्राप्नोति श्रामण्यमिति । व्यतिरेकमाह-**अविशुद्धस्य** गुरुपादमूलेऽनालोचितातिचारतया **न वर्द्धते गुणश्रेणि**र्ज्ञानादिगुणसन्ततिः, सशल्यतयाऽशेषं धर्मानुष्ठानं सम्पूर्णमनुतिष्ठतोऽपि न वृद्धिं प्राप्नोति, किं तर्हि ? यावती अपराधकाले स्थिता, **तावती तिष्ठति** । दूषितपरिणामतया सद्धर्मानुष्ठानविकलस्य पुनरपयात्येवेति ॥६५॥

सम्प्रत्येतत्कथानकैकदेशेनैव गुणेषु मत्सरिणां महानिर्विवेकतामाह–

**जइ दुक्करदुक्करकारओ त्ति भणिओ जहट्ठिओ साहू ।**
**तो कीस अज्जसंभूइ-विजयसीसेहिं न वि खमियं ॥६६॥**

**यदि दुष्करदुष्करकारको**ऽतिदुष्करविधा**तेति भणितो**ऽतिसम्भ्रमाऽऽदराभ्यां गुरुणेति गम्यते । को ? **यथास्थित**स्तथाविधः सत्य एव **साधुः स्थूलभद्र**महर्षिः **ततः किमिति आचार्यसम्भूतविजयशिष्यैः** सिंहगुहावास्यादिभिस्तपस्विभिस्तद्वचनं **नापि क्षान्तं** न सोढमपि, आस्तां स्वस्मिंस्तथाविधसम्भावनाऽभ्यासा-भिलाष इति ॥६६॥ भूय इदमेवाह–

**जइ ताव सुव्वओ सुंदरो त्ति कम्माण उवसमेण जई ।**
**धम्मं वियाणमाणो, इयरो किं मच्छरं[1] वहइ ? ॥६७॥**

**यदि तावत् कर्मणां** चारित्रपरिणामविबन्धकानामनुदयप्राप्तानामु**पशमेन** उपलक्षणत्वादुदयप्राप्तानां क्षयेण हेतुभूतेन, **सुव्रतः** सदाचारः सन् **यतिः**[2] साधुः **सुन्दर इति** शोभनोऽयमिति कृतिभिः स्तूयत इति शेषः । ततो गुणाधिकविषयप्रमोदसाध्यं **धर्मं** पुण्यविशेषं **विजानानो**ऽवगच्छन्, **इतरः** स्वयमपि धार्मिकम्मन्य इव **किं मत्सरं** तं प्रति द्वेषं **वहति** चित्ते धारयति, नाऽत्राऽविवेकं विहायाऽन्यो हेतुरस्तीति भावः ॥६७॥

अत्र दृष्टान्तेन दोषमाह–

**अइसुट्ठिओ त्ति गुणसमुइओ त्ति जो न सहइ जइपसंसं ।**
**सो परिहाइ परभवे, जहा महापीढपीढरिसी ॥६८॥**

---

१. मच्छरो – P । २. यदि – P ।

**अतिसुस्थितो** मूलोत्तरगुणेषु दृढतराऽऽपन्नपरिणामः **गुणैः** साधुजनोपष्टम्भकैर्वैयावृत्त्यकरणादिभिः । **समुदितः** समुदायेन सम्भूय उन्नतिं प्रापितः **इति** एवंरूपां **यतिप्रशंसां** साधुश्लाघां कृतिभिः क्रियमाणामिति गम्यते, **यो न सहते** न क्षमते, **परिहीयते परभवे** पुंभावादिभ्रंशेन हीनो भवति भवान्तरे, **यथा महा-पीठपीठऋषी** इति समासार्थः । व्यासार्थः **श्रीऋषभनाथचरिते** प्रागुक्त एव ॥६८॥

असहनस्य ऐहिकं दोषमाह—

**परपरिवायं गेण्हइ, अट्ठमयविरल्लणे सया रमइ ।**
**डज्झइ य परसिरीए, सकसाओ दुक्खिओ निच्चं ॥६९॥**

**परपरिवादम्** आत्मेतराऽवर्णवादं, **गृह्णाति** आदरेणाऽभ्युपगम्य करोति । त[1]**थाष्टानां मदानां** कार्ये कारणोपचाराज्जात्यादीनां, **विरल्लणे** वचसा विस्फारणे, **सदा रमते**ऽभिष्वजति । **दह्यते च परश्रिया** आत्मेतरलक्ष्म्या हेतुभूतया । **च**शब्दात्तद्भ्रंशार्थं च यतते । **सकषाय**स्तीव्रतरक्रोधादिसन्तापः प्राणी **दुःखितो नित्यम्** असातग्रस्तः सदा भवतीत्यैहिको दोषः ॥६९॥

अथ तस्याऽऽमुष्मिकं दोषमाह—

**विग्गहविवायरुइणो, कुलगणसंघेण बाहिरकयस्स ।**
**नत्थि किर देवलोए वि, देवसमिईसु ओगासो ॥७०॥**

**विग्रहः** शस्त्राशस्त्रिप्रायः कलहः, **विवादो** वाक्कलहस्तद्**रुचे**स्तदभिलाषशीलस्य । अत एव **कुल-गण-सङ्घेन बहिष्कृतस्य** निष्काशितस्य सतो, **नास्ति** न विद्यते, **किलशब्दः** परोक्षाप्ताऽऽगमवादसंसूचकः **देवलोकेऽपि** सौधर्मादौ **देवसमितिषु** सुरसार्थमध्ये**ऽवकाशो**ऽन्तःप्रवेष्टुमवढौकम् । तदुश्चरितदोषात् परलोकेऽपि स न लभते शुभं स्थानमिति भावः ॥७०॥

तदेवं मात्सर्यादविद्यमानदोषग्राहिणोऽवद्यमुक्तम्, सम्प्रति विद्यमानदोषग्राहिणोऽपि दोष एवेत्याह—

**जइ ता जणसंववहार-वज्जियमकज्जमायरइ अन्नो ।**
**जो तं पुणो विकंथइ, परस्स वसणेण सो दुहिओ ॥७१॥**

**यदि तावत् जनसंव्यवहारवर्जितं** लोकप्रसिद्ध्याऽपि प्रतिषिद्धम् अतिनिन्दनीयत्वात् सर्वजन-वर्जित**मकार्यं** चौर्यपारदार्यादिक**माचरति** सेवते, **अन्यः** पापप्रेरितः परः कश्चित्तदेष तावदल्पस्वादलाम्पट्यात् स्वयं कृतेन अवसानविरसतया राजपुरुषाक्रमणताडनमारणादिना व्यसनेन दुःखितो [2]भवतु । **यः पुनस्तदीयं** तदकार्यं **पुन**र्भूयो **विकत्थते** जने प्रकाशयति, **परस्य** सम्बन्धिना **व्यसनेन** विपन्निपातरूपेण, **स दुःखितो** निष्फलान्तस्तापभाक् भवतीत्यर्थः ॥७१॥

तदेवं परापवादस्यानर्थहेतुत्वमुक्तम् । सम्प्रति तत्समानदुर्विपाकं मुनीनां महापातकपञ्चकं वर्ज्य-मित्याह—

---

१. यथा - P । २. भवति - C ।

**सुट्ठु वि उज्जममाणं, पंचेव करेंति रित्तयं समणं ।**
**अप्पथुई परनिंदा, जिब्भोवत्था कसाया य ॥७२॥**

**सुष्ठ्वपि** सर्वोत्कर्षेणाऽपि **उद्यच्छन्तं** तपःसंयमयोरुत्तिष्ठमानं **पञ्चैव** पापान्तरसाहाय्यनिरपेक्षाणि **कुर्वन्ति** जनयन्ति **रिक्तकम्** अपनीतसकलपुण्यगुणतया शून्यकं **श्रमणं** साधुम् । कानि तानि पञ्चेत्याह– **आत्मस्तुति**रात्मश्लाघा, यदुक्तम्–

**"मोहस्य तदपि विलसितमभिमानो [1]यत्परप्रणीतायाम् ।**
**तत्तमसोऽपि तमिस्त्रं याऽऽत्मस्तुतिरात्मना क्रियते" ॥ [ ]**

तथा **परनिन्दा** इतरगर्हा, यतः–

**"गुणान्विमुच्य यो दोषान् परेषां भाषते जडः ।**
**स विष्ठाशूकरस्यैति कणराशिद्विषस्तुलाम्" ॥ [ ]**

तथा **जिह्वा** रसना, यतः–

**"निरवद्यायामुक्तौ सत्यां[2] भुक्तौ च यस्य रसनायाः ।**
**स्वदते तदितरदुभयं त्रिदोषजडधीः स किं साध्यः ?" ॥ [ ]**

तथा **उपस्था** स्पर्शनेन्द्रियं, तदेकदेशविशेषश्च–

**"निष्क्रम्य ये संसृतियोनिचक्रात्, जन्माप्तवन्तो विरतिप्रधानम् ।**
**तामेव तत्रैव भवे [3]भजन्तो योनिं पुनः किं न हि गर्हितास्ते" ॥ [ ]**

तथा **कषायाः** क्रोधादयश्चत्वारस्ते च एकतया गृहीताः । यतः–

**"सद्गतिच्छादिनां मोहधूम्यया [4]कृष्णवर्त्मनाम् ।**
**कषायाणां कणेनापि भस्मतामेति संयमः" ॥ [ ]**

**च**शब्दः प्रत्येकमेते पञ्चाऽपि समुचिताश्चेति । मन्यामहे मुनीनाममूनि पञ्चाऽपि पातकान्युच्चैः दुष्कृतमिव यैः सुकृतं तपोऽपि नरकं नरं नयति ॥७२॥

पुनरपि परावर्णवादिनो दोषाधिक्यं [१]दर्शयन्नद्रष्टव्यतामाह–

**परपरिवायमईओ, दूसइ वयणेहिं जेहिं जेहिं परं ।**
**ते ते पावइ दोसे, परपरिवाई इय [२]अपेच्छो ॥७३॥**

**परपरिवादमतितो**ऽन्यदोषोद्घाटनबुद्धितो हेतोः **परं यैर्यैर्वचनै**र्वचनीयैः[5] सदसद्दोषोत्कीर्त्तकैर्वाक्यैः कारणे कार्योपचाराद्दोषैः करणभूतै**र्दूषयति**, जनमध्ये दुष्टं प्रकाशयति । **तांस्तान् दोषान् परपरिवादी** अन्यदोषसूचकः **प्राप्नोति** परभवे तत्तद्दोषभाजनं भवति इत्यनेन कारणेन इहभवेऽपि तत्तद्दोषकारणकर्मबन्धदुष्टतया-**ऽप्रेक्ष्यो**ऽद्रष्टव्यो विलोकनस्याऽप्यतिपापिष्ठतयाऽनर्ह इति यावत् ॥७३॥

---

१. दर्शयंस्तत् द्रष्ट... KH । २. अपिच्छो – P, C ।

टि. 1. परेण प्रणीतायां कृतायां श्लाघायां यद् अभिमानः तदपि मोहस्य...इत्यन्वयः । 2. त्रिदोषः-वातपित्तकफानां विषमावस्था भुक्तिविषये दोषरूपा । 3. अब्रह्मसेवनेन इत्यर्थः । 4. कृष्णवर्त्मन् (पुं०) – अग्निः । 5. वचनीयं – निन्दनीयं वचनं, तैः ।

एवंविधाश्च गुरोरुद्वेगकारका भवन्तीत्याह—

**थद्धा च्छिद्दप्पेही, अवण्णवाई सयंमई चवला ।**
**वंका कोहणसीला, सीसा उव्वेयगा गुरुणो ॥७४॥**

**स्तब्धा** गर्वेणोद्धुरकन्धराः, **छिद्रप्रेक्षिणो** मत्सरितया गुरोरपि दोषस्थाननिरीक्षणप्रकृतयः । **अवर्णवादिनो** गुरोरपि दोषोद्घट्टनशीलाः । **स्वयंमतयो** गुर्वनधीनबुद्धयः, स्वेच्छया यत्किञ्चनकारिणः । **चपलाः** कायमनोभ्यां तरलास्तत्र कायेन असमञ्जसगात्रविक्षेपिणो मनसा परापरशास्त्रांशग्राहिणोऽस्थिरस्वभावाः । **वक्राः** कुटिला मायाविनोऽ[1]प्राञ्जलवाचश्च । **क्रोधनं** स्वपरयोः कोपजनकं **शीलं** [2]समाधानं **येषान्ते** । तथाभूताः **शिष्याः गुरोरा**चार्यस्य **उद्वेजका** मनःसन्तापहेतवो भवन्तीति ॥७४॥

किञ्च—

**जस्स गुरुम्मि न भत्ती, न य बहुमाणो न गोरवं न भयं ।**
**न वि लज्जा न वि नेहो, गुरुकुलवासेण किं तस्स ॥७५॥**

**यस्य गुरौ न भक्ति**रभ्युत्थानासनदानादिका सेवा, **न च बहुमान** आन्तरप्रीतिविशेषः । **न गौरवं** समानदर्शितया महनीयो महीयानिति बुद्धिः । **न भयम**कार्ये प्रवर्त्तमानस्य । **नापि लज्जा** गुरोः सम्बन्धिनी त्रपा-कथमहं पश्चात् पूज्यानां मुखं दर्शयिष्ये इत्यादिका । **नापि स्नेहः** [१]प्रतिबन्धः । अपिशब्दौ समुच्चयार्थौ

**"सरुषि [२]नतिस्तुतिवचनं, तदभिमते प्रेम तद्द्विषि द्वेषः ।**
**दानमुपकारकीर्त्तनममूलमन्त्रं वशीकरणम्"** ॥ [ ] इत्यादि गुणान्तराभावसम्भावनार्थौ वा । प्रतिपदं नञाऽभिधानं नैर्गुण्यातिशयख्यापनार्थम् । एवंविधस्य **तस्य गुरुकुलवासेन** गुर्वधीनगच्छमध्यावस्थानेन **किं** ? न किञ्चित्तदाधेयगुणविकलत्वादित्यभिप्रायः ॥७५॥ तथा—

**रूसइ चोइज्जंतो, वहइ अ हियएण अणुसयं भणिओ ।**
**न य कम्हि करणिज्जे, गुरुस्स आलो न सो सीसो ॥७६॥**

**रुष्यति** तत्कालमेव क्रुध्यति, **[३]चोद्यमानो** विशेषतो दोषमुत्कीर्त्यानुशास्तिप्रतोदेन प्रेर्यमाणः । **वहति च हृदयेन अनुशयं भणितः** स्मारणवारणादिभिरनुशिष्टः क्रोधानुबन्धचित्तेन धारयति । **च**शब्दात् कालान्तरे क्रोधानुबन्धकार्यं च दर्शयति । **न च कस्मिन्न**पि एकस्मिन्नपि कर्त्तव्ये विनयवैयावृत्त्यादौ **करणीये** वर्तते इति शेषः । **गुरोरालो**ऽनर्थरूपो दुर्दान्ततया दुस्तरत्वात्, आलः अलीको वा शिष्यगुणशून्यत्वात् मृषारूपो **नाऽसौ शिष्यो**ऽनुशासनानर्हत्वादिति ॥७६॥

व्यतिरेकमुक्त्वा अन्वयेन सुशिष्यानाह—

**उव्वीलण-सूअण-परिभवेहिं अइभणिय-दुट्ठभणिएहिं ।**
**सत्ताहिया सुविहिया, न चेव भिंदंति मुहरागं ॥७७॥**

---

१. प्रतिषेधः P, प्रतिसंबंधः C । २. नतिः C । ३. नोद्यमानो - C, P, B, H, K ।

टि. 1. प्राञ्जलः - ऋजुः न प्राञ्जलः इति अप्राञ्जलः । 2. समाधानं - प्रणिधानं इत्यर्थः ।

**उत्पीडनम**वज्ञया अपकर्णनं--लज्जाकरमर्मोद्घटनादिभिरुद्व्रीडनम् । **सूचनं** पैशून्यकरणम् असद्दोषारोपणनिकारपूर्वं **शोचनं** वा । **परिभव**स्तिरस्कारस्तैर**तिभणितदुष्टभणितैर**सम्बद्धभाषणकर्कशाभिधानैः, एभिर्हेतुभिर्हेतुभूतैः **शप्ता** आक्रुष्टाः, **हिता** आक्रोष्टॄनपि प्रतिमत्सरत्यागेन तत्कारुण्येन शुभाशया **सत्त्वाधिका** वा । **सुविहिताः** सदाचारमुनयो **नैव भिन्दन्ति मुखरागं** न विच्छायमुखा भवन्ति । **च**शब्दान्मनोवाग्भ्यामपि तान्प्रति न विक्रियां भजन्ति ॥७७॥ तथा—

**माणंसिणो वि अवमाण-वंचणा ते परस्स न करेंति ।**
**सुहदुक्खुग्गिरणत्थं, साहू उयहि व्व गंभीरा ॥७८॥**

**मनस्विनोऽपि** विशिष्टमानार्हमनोभाजोऽपि । **अपमान-वञ्चने**-पराभव-प्रतारणे **साधवः परस्या**ऽन्यस्य **न कुर्वन्ति** जनयन्ति । किमर्थं ? **सुखदुःखोद्गिरणार्थं** सुखदुःखयोः, कारणे कार्योपचारात् पुण्यापुण्ययोः, उद्गिरणं वमनं क्षयो मोक्ष इति यावत् तदर्थम् । कथम्भूताः साधव ? इत्याह—**उदधय इव गम्भीरा** अतुच्छत्वात् परैरलब्धमध्या इति ॥७८॥

मौनमधिकृत्य भूय उपदिशति—

**मउया निहुयसहावा, हासदवविवज्जिया विकहमुक्का ।**
**असमंजसमइबहुयं, न भणंति अपुच्छिया साहू ॥७९॥**

**मृदवो** नम्रस्वभावाः **निभृतस्वभावाः** मनोवाक्कायचेष्टा झलझलायितरहितप्रकृतयः । **हासेन** हसनेन **द्रवः** परोत्प्रासनरूपो विप्लवस्त**द्विवर्जिता**स्तच्छून्याः । विरुद्धा रागादिहेतुतया, **विरूपा कथा** राज-देश-भक्तस्त्र्यादिविषया, **तया मुक्ताः** स्वयमनौचित्यतस्त्यक्ताः । **असमंजसं** विरुद्धमसम्बद्धं च, समञ्जसमपि **अतिबहुकं** भूरितराऽऽलापरूपं **न भणन्ति** न भाषन्ते, **अपृष्टाः** परेणाननुयुक्ताः **साधव** इति ॥७९॥

पृष्टैरपि यद्भाष्यं तदाह—

**महुरं निउणं थोवं, कज्जावडियं अगव्वियमतुच्छं ।**
**पुव्विं मइसंकलियं, भणंति जं धम्मसंजुत्तं ॥८०॥**

**मधुरं** श्रोतुराह्लादकं **निपुणं** सूक्ष्मार्थं **स्तोकं** मितं **कार्याऽऽपतितं** प्रस्तुतप्रयोजनानुत्तीर्णं **अगर्वित**मनुत्सिक्तम् **अतुच्छ**मलब्धमध्यं **पूर्वं** प्राग्भाषणा**न्मतिसंकलितं** बुद्धिसंयोजितं **भणन्ति** भाषन्ते वाक्यमिति शेषः । **यत् किं ? धर्मसंयुक्तं** निरवद्यमिति ॥८०॥

एवं ज्ञानिनामक्षेपेण मोक्षः अज्ञानिनां तु तपःक्लेशोऽपि अल्पफल इत्याह—

**सट्ठिं वाससहस्सा, तिसत्तखुत्तोदयेण धोएणं ।**
**अणुचिन्नं तामलिणा, अन्नाणतवो त्ति अप्पफलो ॥८१॥**

**षष्टिर्वर्षसहस्त्राणि** नैरन्तर्येण, **त्रिःसप्तकृत्वा** एकविंशतिवारान्, **उदकेन धौतेन** भैक्षेणेति गम्यम्, **अनु** गृहत्यागात्पश्चा**च्चरितं** सेवितं **तप** इति शेषः । केन ? **तामलिना**, तथाऽप्यसौ ज्ञानिसाध्यमपवर्गमनुत्तरसुरत्वं वा

न लभे । इत्यर्थापत्त्या निश्चीयते **अज्ञानतप** इति **कृत्वा अल्पफल**मित्यफलमित्यक्षरार्थो ॥८१॥ भावार्थः सम्प्रदायगम्यः । स चायम् –

**[ तामलिकथानकम् ॥ ]**

**तमालिनी**ति नीतिज्ञजनताजनितालया । पूरस्ति सम्पदां पस्त्यं[1] कुटुम्बी तत्र **तामलिः** ॥१॥

स **मौर्यपुत्रः** स्वं पुत्रमनुशास्य महाशयः । कुटुम्बस्वामिनं कृत्वा प्राणामं[2] व्रतमाददे ॥२॥

षष्ठैस्तपस्यन्नुद्बाहुः शश्वदातापनापरः । पात्रे दारुमये भिक्षामग्रहीदात्ममानतः ॥३॥

ततो भागत्रयं दत्त्वा जलस्थलखचारिणाम् । एकविंशतिधा धौतं तुर्यांशं स्वयमाहरत् ॥४॥

तिर्यङ्मनुष्यदेवेभ्यः सर्वेभ्यो विनयाऽऽनतः[१] । प्रणामं व्रतयामास स प्राणामव्रती मुनिः ॥५॥

षष्टिं वर्षसहस्राणि तपस्तप्त्वा स दुस्तपम् । कुण्डिकां पादुके पात्रं त्यक्त्वाऽनशनमग्रहीत् ॥६॥

तदा च **बलिचञ्चा**यां राजधान्यां च्युते हरौ । देवदेव्योऽसुराः सर्वे मार्गयन्ति स्म नायकम् ॥७॥

एत्य संदर्श्य देवर्द्धिं प्रार्थितः प्रणयेन तैः । निरीहो न स्पृहाञ्चक्रे कथञ्चन स तापसः ॥८॥

गतेषु तेषु द्वौ मासावासाद्यानशनं[3] तथा । **ईशान**कल्पमीशानः सोऽवसानवशादशात्[4] ॥९॥

विडम्ब्यमानं तत्क्रोधादसुरैस्तत्कलेवरम् । अधाक्षीदवधेर्बुद्ध्वा बलिचञ्चां दृशैव सः ॥१०॥

निस्तेजोभिर्निराधारैरसुरैर्दीनमानसैः । अनुनीतो विभुश्चक्रे तां दृशैव पुनर्नवाम् ॥११॥

असावजीवं जीवं च सम्यञ्चम्[5]अधिगम्य चेत् । दयामयं तपः कुर्यात् तल्लभेत महोदयम् ॥१२॥

**ईशाने**शानतां भुक्त्वा दिव्यां जीवः स **तामलेः** । गन्ता **महाविदेहे**षु ततोऽपि ब्रह्मणः पदम् ॥१३॥

**इति तामलिकथानकम् ॥**

ननु दुष्करमप्येतत्तपोऽल्पफलमिति पक्षपातमात्रम्-मैवम् तत्र संयमाभावादुन्मार्गप्रख्यापनाच्चेत्याह—

**छज्जीवकायवहगा, हिंसगसत्थाइं उवइसंति पुणो ।**

**सुबहुं पि तवकिलेसो, बालतवस्सीण अप्पफलो ॥८२॥**

पृथिव्यादि**षड्**विध**जीवबाधकाः** सन्तः स्वयं परेषामपि **हिंसकशास्त्राणि** पशुवधादिगर्भार्थानि वेदादी**न्युपदिशन्ति** व्याचक्षते । **पुनः**शब्दस्य विशेषणार्थत्वात्, परमेष्ठिशासनं प्रति पराङ्मुखाश्च ते, अनेन हेतुना **सुबहुरपि तपःक्लेशो बालतपस्विनाम्** अज्ञानकष्टव्रतिनां **तामलि**प्रभृतीना**मल्पफलो** भवति । अथवा अपि सम्भाव्यते एतत् अफलो निष्फलः संसाररूपानिष्टफलत्वात् वा अफल इति ॥८२॥

जैनसाधूनां पुनर्नैवम्, यतः—

**परियच्छंति[२] य सव्वं, जहट्ठियं अवितहं असंदिद्धं ।**

**तो जिणवयणविहिण्णू, सहंति बहुयस्स बहुयाइं ॥८३॥**

---

१. विनयान्वितः H, A, K, D, B विनयाततः KH । २. अपरिअच्छंति - P ।

टि. 1. पस्त्यं (नपु०) गृहम् । 2. प्राणामं-व्रतविशेषम्, तम् । 3. मासौ आसाद्य अनशनं इति विग्रहः । 4. शास् धातोः ह्य०भू० तृ०पु० एकवचनरूपः । 5. सम्यञ्चं-यथातथम् ।

**पर्यवस्यन्ति** बुध्यन्ते, **चशब्दात्** श्रद्दधते च । **सर्वं** निःशेषं जीवादिकं **यथास्थितं** सर्वज्ञोपदेशाद**वितथं** सद्भूतम् । अत **एवासन्दिग्धं** निःसंशयं **ततस्तस्माद्यथावस्थिताऽसन्दिग्धपरिच्छेदाद्धेतो**र्**जिनवचनविधिज्ञाः** सर्वज्ञप्रवचनप्रकारवेदिनः **सहन्ते** तितिक्षन्ते **बहोः** प्राकृतलोकस्य सम्बन्धीनि **बहूनि** दुर्वचनादीनीति गम्यते । स्वकर्मणः फलमिदं नैषां दोष इति जिनागमप्रकारभावनाविशेषादिति ॥८३॥

यत्पुनर्मन्दबुद्धीनां बालतपस्विष्वेव रागस्तत्र हेतुमाह—

**जो जस्स वट्टए हियए, सो तं ठावेइ सुंदरसहावं ।**
**वग्घी छावं जणणी, भद्दं सोमं च मन्नेइ ॥८४॥**

**यः** कश्चि**द्यस्य** कस्यचित् मोहोदयात् कारणान्तरेण वा **वर्त्तते हृदये** लगति चित्ते । **स तं स्थापयति** समर्थयते असुन्दरमपि **सुन्दरस्वभावम्** । दृष्टान्तमाह-**व्याघ्री शावमा**त्मीयं शिशुं **जननी** तदीयजनयित्री **भद्रं** सुखं जन्तुसुखावहं **सौम्यं च** क्रोधादिविकाररहितं शान्तं च **मन्यते** चिन्तयतीति ॥८४॥

न केवलं यतीनां गृहिणामपि विवेकादुत्तरोत्तरफलावाप्तिरिति दृष्टान्तेनाह—

**मणिकणगरयणधणपूरियम्मि [१]भवणम्मि सालिभद्दो वि ।**
**अन्नो किर मज्झ वि सामिओ त्ति जाओ विगयकामो ॥८५॥**
**न करंति जे तवं संजमं च ते तुल्लपाणिपायाणं ।**
**पुरिसा समपुरिसाणं, अवस्स पेसत्तणमुविंति ॥८६॥**
**सुंदरसुकुमालसुहोइएण विविहेहिं तवविसेसेहिं ।**
**तह सोसविओ अप्पा, जह न वि नाओ सभवणे वि ॥८७॥**

तत्र कथानकमुक्त्वा सुखावगमाय गाथार्थः पश्चात् कथयिष्यते । तच्चेदम्—

**[ शालिभद्रकथानकम् ॥ ]**

द्वीपेऽस्ति **जम्बूद्वीपे**ऽत्र **भरत**क्षेत्रभूषणम् । नयराजगृहं **राजगृहं** नाम बृहत्पुरम् ॥१॥
तत्र श्री**श्रेणिको** नाम धर्मारामद्रुमो नृपः । दिशः सुरभयामास यशःकुसुमसौरभैः ॥२॥
तन्मान्योऽजनि **गोभद्र**श्रेष्ठी **भद्रा** तु तत्प्रिया । निश्यपश्यच्च सा स्वप्ने शालिक्षेत्रं [1]फलेग्रहि ॥३॥
सुपुत्रजन्म स्वप्नार्थं तस्याः श्रेष्ठी न्यवेदयत् । दोहदं दानधर्मेषु जातं चाऽयमपूरयत् ॥४॥
असूत सूनुं कालेऽथ भद्रा [2][२]भाभरभासुरम् । वैमल्यभाजनं [३]मुक्ताशुक्तिर्मुक्ताफलं यथा ॥५॥
स्वप्नौचित्यात् [४]कृत**शालिभद्र**नाम्नाऽन्वितः सुतः । पित्राऽष्टवर्षदेशीयः पाठितश्चोज्ज्वलाः कलाः ॥६॥
इभ्यैरभ्यर्थ्य च [3]प्रत्ताः कन्यास्तत्कान्तिमोहितैः । द्वात्रिंशतं स तं श्रेष्ठी यौवने पर्यणाययत् ॥७॥

---

१. भुवण....P, C । २. भारतभूषणं - KH, भाभद्रभासुरं - P । ३. मुक्त्वा - C, KH, H, मुक्तामुक्ति... - K । ४. कृतः - C, K, B, KH, H, D, A, L ।

टि. 1. फलेग्रहि-फले फलं (कर्मण आधारत्वविवक्षा) गृह्णाति धारयति स्वीकरोति वा इति इन्, अलुक्समासः इत्यर्थः । 2. भा कान्तिः तस्याः भरः समूहः तेन भासुरं दीप्तिमन्तं सूनुम् । 3. प्रदत्ताः इत्यर्थः [स्वरादु...४।४।९] इत्यनेन त् आदेशः ।

विमानस्य समानेऽथ समं ताभिर्निकेतने । देवीभिः सह देवेन्द्र इव स व्यलसत्तराम् ॥८॥
पितृभ्यां पूरितैर्भोगैः प्रीतिमग्नोऽतिपुण्यभाक् । [1]नोद्धाम्नि मणिसौधे सो वेद भेदमहर्निशोः ॥९॥
श्रीमद्वीरपदोपान्ते **गोभद्रो**ऽथ व्रतं ललौ । विधिनाऽनशनं कृत्वा मृतोऽभूद[2]मृताशनः ॥१०॥
स भाग्यैः **शालिभद्रस्य** सुतवात्सल्यतः सुरः । सभार्यस्याऽप्यदान्नित्यं दिव्यं मण्डनमण्डलम् ॥११॥
कदाऽप्यानिन्यिरे राज्ञे वणिजो रत्नकम्बलान् । तेन ते न स्म गृह्यन्ते मूल्यबाहुल्यबाधया ॥१२॥
गतेषु तेषु भूनाथमूचे कान्ताऽथ चेल्लणा । एकोऽद्य गृह्यतां मह्यं कथञ्चित् रत्नकम्बलः ॥१३॥
वणिग्भिर्याचमानेऽथ राज्ञि [१]व्यज्ञपि मूल्यतः । जग्राह भद्रा **गोभद्र**पत्नी तान् रत्नकम्बलान् ॥१४॥
इति ज्ञात्वा नृपेणैकः प्रवीणः प्रहितः पुमान् । यथामूल्यं ययाचैकं **भद्रा**तो रत्नकम्बलम् ॥१५॥
भद्रा तं प्राह [3]नैतोऽसि किं तूर्णमधुनैव ते । छित्त्वा दत्ता वधूभ्योऽङ्घ्रिमृजायै रत्नकम्बलाः ॥१६॥
कार्यं चेत्पूर्यते किञ्चि[4]च्चिरत्नै रत्नकम्बलैः । तदमी शतशः सन्तीत्येवं विज्ञप्यतां विभुः ॥१७॥
गत्वेत्याख्यदसौ राज्ञे राज्यूचे **चेल्लणा** ततः । अस्माकं वणिजां [२]चैवं दीपार्काणामिवान्तरम् ॥१८॥
**श्रेणिके**न तमेवाऽथ पुरुषं प्रेष्य कौतुकात् । आहूते **शालिभद्रे** सा **भद्रा**ऽऽगत्य व्यजिज्ञपत् ॥१९॥
न याति जातु मत्पुत्रो धरित्रीश ! बहिः स हि । गृहागमेन मे नाथ ! तत्प्रसादं प्रतन्यताम् ॥२०॥
**श्रेणिकः** कौतुकी तत्तु प्रत्यपद्यत सोद्यमः । स्थापयित्वा क्षणं [5]क्षोणिप्रियं गृहमियं गता ॥२१॥
चित्रकत्वक् विचित्राभमणिवस्त्रमयीमियम् । अट्टशोभां व्यधान्मध्ये स्ववेश्म-नृपवेश्मनोः ॥२२॥ युग्मम् ॥
ततो राजा तयाऽऽहूतः पुरुहूतकृतामिव । अट्टशोभामतिक्षोभात् पश्यन् प्राप तदालयम् ॥२३॥
शातकुम्भमयस्तम्भोन्मीलन्नीलाश्मतोरणम् । इन्द्रनीलावनिव्यक्तमौक्तिकस्वस्तिकोत्करम् ॥२४॥
कृतोल्लोचं दुकूलैश्चानुकूलैर्जनतादृशाम् । अदृष्टपूर्वं तमसां रत्नसम्भिन्न[३]भित्तिकम् ॥२५॥
किं विशन् दिवमस्मीति विभ्रमी विस्मितोऽविशत् । तद्दिव्यसुरभिद्रव्यधूपितं भूपतिर्गृहम् ॥२६॥ विशेषकम् ॥
[४]**भद्रा** सिंहासनेऽध्यास्य चतुर्थ्यां भुवि पार्थिवम् । गत्वाऽथ सप्तमीं भूमिं **शालिभद्र**मभाषत ॥२७॥
श्रेणिकोऽस्त्यागतः पुत्र ! तमेहि क्षणमीक्षितुम् । स जगौ गृह्यतां मातर्युक्तमूल्यात्त्वयैव सः ॥२८॥
कृत्वा समर्घ्यं यदि वा महर्घ्यं, क्रयाणकं **श्रेणिक**नामधेयम् ।
यथा तथा मातरिदं गृहाण, क्रयाणमम्बैव किमत्र पृच्छा ॥२९॥ [उपजातिवृत्तम्]
**भद्रा**भ्यधान्न तद्द्रव्यं क्रेतव्यं किन्तु स प्रभुः । चौरेभ्यश्च परेभ्यश्च पाता [6]पस्त्यमुपेयिवान् ॥३०॥
इति श्रुति[५]पथाऽपूर्वपान्थे वचसि दुःखितः । स दध्यौ धिगिदं जन्म यन्ममापीश्वरः परः ॥३१॥

---

१. विज्ञपि – P । २. चेदं P । ३. मस्तकं – P । ४. भद्र – A भद्रे – P । ५. पथात्पूर्व – P ।

टि. 1. न उद्धाम्नि-उद्धृतं धाम यस्मिन् स उद्धामा, तस्मिन् न वेद इत्यन्वयः । 2. देवः । 3. नाऽऽयातोऽसि इत्यर्थः । 4. चिरत्नः- चिरे भवः, त्नप्रत्ययः पुराण इत्यर्थः । 5. राजानम् । 6. गृहम् ।

अतः परं परायत्तवृत्ते[१]र्भोगै[२]रलं मम । ग्रहीष्ये चरणं चारु श्री**वीर**चरणान्तिके ॥३२॥
इति संवेगभङ्गीभिस्तुङ्गीकृतमना अपि । स मातुरुपरोधेनाऽऽगत्य राजानमानमत् ॥३३॥
आलिङ्ग्य भूभुजाऽङ्केनोत्सङ्गेऽथ सुतवद्धृतः । घ्रातश्च मूर्ध्नि सोऽश्रूणि [३][1]कूणिताऽऽस्योऽमुचत् क्षणात् ॥३४॥
**भद्रा**ऽथ भूपमूचेऽस्य देवभूयं गतः पिता । नित्यं दत्ते सभार्यस्य दिव्यमङ्गस्य मण्डनम् ॥३५॥
तन्मनुष्योचितैर्गन्धवासवासःस्रगादिभिः । दूयतेऽसौ मनुष्योऽपि सुतस्तन्मुच्यतां द्रुतम् ॥३६॥
तादृक्षदुःखदेनाऽथ कर्मणेव महीभुजा । विमुक्तः सप्तमीभूमिमूर्ध्वं मुक्तिमिवागमत् ॥३७॥
स्थापितो **भद्रया** भोक्तुमुपरोधान्नृपस्ततः । सस्नौ स्नानीयपानीयस्नेहचूर्णैरयं रयात् ॥३८॥
[2]स्नातः पपात स्नानाम्बुवाप्यां राज्ञोऽङ्गुलीयकम् । विलोललोचनोऽसौ तद् व्यलोकयदितस्ततः ॥३९॥
**भद्रा**ऽऽदेशादथो दास्या क्षिप्ते वाप्या जलेऽन्यतः । तदिङ्गालवदालोकि दीप्ताऽऽभरणमध्यगम् ॥४०॥
किमेतदिति राज्ञाऽथ दासी पृष्टाऽभ्यधादिह । नित्यं मण्डनं निर्माल्यमस्म[४]दीशस्य दृश्यते ॥४१॥
विस्मितः सपरीवारो भूमिभुग् बुभुजे ततः । अर्चितश्चित्रचीरालङ्करणैरालयं ययौ ॥४२॥
इच्छतेऽथ भवाम्भोधेः क्षोभं **गोभद्र**सूनवे । **धर्मघोष**मुनिं धर्मसुहृदाऽऽगतमाख्यत ॥४३॥
रयादथ रथारूढो गूढोदूढव्रतग्रहः । गत्वा ननाम तं नाम चतुर्ज्ञानमसौ मुनिम् ॥४४॥
कथमन्यो न नाथः स्यादित्थं पृष्टो[५]ऽमुना मुनिः । जगौ ये गृह्णते दीक्षां ते स्युर्विश्वत्रयेश्वराः ॥४५॥
तर्हि मातरमापृच्छ्य ग्रहीष्यामि व्रतं द्रुतम् । इत्युदित्वा मुनिं नत्वा **शालिभद्रो**ऽगमद् गृहम् ॥४६॥
नत्वाऽथ सोऽभ्यधाद् **भद्रां** मातः ! पातकघातकः । धर्मः श्री**धर्मघोष**स्य मुखादद्य मया श्रुतः ॥४७॥
**भद्रा**ऽभ्यधाद् व्यधाः साधु वत्स ! तस्य पितुः सुतः । **क्रीडत्यङ्केषु पङ्कस्य सिंहपोतः कदापि किम्** ॥४८॥
स बभाषेऽम्ब ! सेवे तद् व्रतं तृष्णाहरं सरः । सुतस्तस्य नृसिंहस्य भीतो भवदवानलात् ॥४९॥
साऽब्रवीद् वीर ! युक्तोऽसौ व्रतारम्भः परं तव । सुखैकलालितः कष्टं नेह देहः सहिष्यते ॥५०॥
स बभाषे भवन्त्येव पुमांसः सुखमांसलाः । व्रतकष्टाऽसहा मातः ! कातरा न गुणोत्तराः ॥५१॥
भोगाऽऽबन्धं क्रमान्मुञ्च मर्त्यगन्धं सहस्व तत् । इत्यभ्यासवशाद् ग्राह्यं व्रतं पुत्रेत्युवाच सा ॥५२॥
प्रतिपद्येति मात्रोक्तमेकामेकां दिने दिने । प्रियामौज्झद् भवाभोगचूलिकां तूलिकां[६] च सः ॥५३॥
कनिष्ठा **शालिभद्र**स्य स्वसा **धन्या**ह्वयं प्रियम् । स्नपयन्ती पयो [3]नेत्रप्रसृत्याऽपि तदाऽमुचत् ॥५४॥
किं रोदिषीति कान्तेन सा पृष्टाऽभिदधे यतः । व्रतार्थी नाथ ! मद्भ्राता भोगानुन्मुञ्चति क्रमात् ॥५५॥
सर्वं विमोक्तुं सहसा यस्योल्लासि न साहसम् । हीनसत्त्वः स ते बन्धुरित्याह स हसन्निमाम् ॥५६॥

---

१. वृत्तै - L, H, B । २. भोग्यै - KH । ३. कूणिताख्य... P । ४. दीदृश दृश्यते - P । ५. महामुनिः- KH । ६. चूलिकां - D, P ।

टि. 1. संकुचितं आस्यं यस्य स । 2. वर्तमानकर्तरिकृदन्तषष्ठ्येकवचनरूपः । 3. नेत्रप्रसृत्याऽपि पयोऽमुचत्, अरुदत् इत्यर्थः ।

चेत् त्यक्तुं शक्यते सर्वं तत्किं न त्यज्यते स्वयम् । इत्यन्याभिः स नर्मोक्त्या दयिताभिरभाष्यत ॥५७॥
**धन्यो**ऽथ स्माह धन्योऽहं व्रतविघ्ना अपि व्रतम् । यूयं यदनुमन्यध्वे गृह्णाम्यह्नाय तेन तत् ॥५८॥
अथ ता व्यथिताः प्रोचुर्नाथ ! नर्मोक्तियुक्तितः । कस्मादकस्मादस्मांश्च श्रियश्चोज्झसि लालिताः ॥५९॥
[१]धनोच्चयाश्च यूयं च चञ्चला निश्चलं पदम् । व्रजितुं प्रव्रजिष्यामीत्युदित्वाऽथ स उत्थितः ॥६०॥
त्वामेवानुपतिष्यामः **पतिः स्त्रीणां हि दुस्त्यजः** । इति ता ब्रुवतीर्**धन्यो** धन्यंमन्योऽन्वमन्यत ॥६१॥
व्रतमैहत **धन्यश्च** श्री**वीरश्च** समाययौ । उद्यानभाजि **वैभारगिरौ किं दुर्लभं सताम्** ॥६२॥
दत्त्वा दानं [1]सदारोऽपि [2]सदाऽऽरोपितविस्मयः । गतः शिबिकया धन्यः श्री**वीरा**दादित व्रतम् ॥६३॥
श्रुत्वेदं **शालिभद्रे**ण जितंमन्येन मानिना । द्राग्**वीर**पदपर्यन्ते वव्रजेऽथ प्रवव्रजे ॥६४॥
स्वामिनैव समं शश्वद् विहरन्तौ महामुनी । **धन्यश्च शालिभद्रश्च** तौ सञ्जातौ बहुश्रुतौ ॥६५॥
एकद्वित्रिचतुर्मासोपवासा[3]दितपारणौ । तावशोषयतां रक्तं मूर्त्तं रागमिवात्मगम् ॥६६॥
मुनी तपःकृशावेतौ स्वजन्मभुवमन्यदा । स्वामिनैव समं **राजगृह**माजग्मतुः पुरम् ॥६७॥
भवनीरनिधेस्तीरतरुं **वीर**जिनं जनाः । एत्याऽनमन्नमन्दाय निर्मलाय फलाय ते ॥६८॥
मासान्तपारणे **धन्यशालिभद्र**महामुनी । भिक्षार्थमुद्यतौ काले त्रिकालज्ञं विनेमतुः ॥६९॥
पारणं मातृहस्तेन तवेति प्रभुणोदितः । इच्छामीति वदन् धन्ययुतो **भद्रा**सुतोऽगमत् ॥७०॥
गतौ **भद्रा**गृहद्वारि क्षामता[२]धारिविग्रहौ । अदृष्टपूर्वाविव तौ न केनाऽप्युपलक्षितौ ॥७१॥
श्री**वीरं शालिभद्रं** च **धन्यं** चाऽऽनन्तुमुत्सुका । वैयग्र्येण न **भद्रा**ऽपि साधुबुद्ध्या व्यबुद्ध तौ ॥७२॥
महायती प्रतीक्ष्याथ क्षणमात्र[३]मपेयतुः । निरीयतुः पुरीवप्रप्रतोलीतोऽपि तौ ततः ॥७३॥
दधिविक्रयिणी काऽपि पुरः पुरमुपेयुषी । उत्प्रस्नवस्तनी जज्ञे **शालिभद्र**निभालनात् ॥७४॥
आपत्य प्रणिपत्य द्राग् भक्तिभङ्गितरङ्गिता । [4][४]उद्यावधि दधि प्रादादप्रमादा च सा तयोः ॥७५॥
एत्यार्हच्चरणोपान्तमालोच्य रचिताञ्जलिः । **भद्राभू**रभ्यधाद्भर्तुः पारणं मातृतः कथम् ? ॥७६॥
जगाद भगवान् **शालिग्राम**मेतत्पुरन्तिकम् । एका **धन्या**ऽभिधा योषाऽऽगच्छदुच्छन्नवंशिका ॥७७॥
साऽङ्गजं **सङ्गमं** बालमात्मना सममानयत् । ग्रामीणवत्सरूपाणां चारणाय मुमोच च ॥७८॥
कदाचिदुत्सवेऽन्यस्मिन् ग्रामे बालः स **सङ्गमः** । प्रत्योकः पायसं पश्यन् जननीं तदयाचत ॥७९॥
कुत्र मे पायसं पुत्र ! दुस्थाया इत्ययं तया । उक्तोऽप्ययाचतैवोच्चै**र्दौस्थ्यं जानन्ति नार्भकाः** ॥८०॥
स्मारं स्मारं पुरालक्ष्मीं तारं तारं रुरोद सा । पृष्टाऽऽसन्नगृहस्त्रीभिर्मिलित्वा दुःखकारणम् ॥८१॥
कथितेऽथ तया काऽपि [5][५]पीयूषं कापि तण्डुलान् । खण्डं कापि घृतं कापि ददुः सा च पपाच तत् ॥८२॥

---

१. धन्यो...P । २. हारि – P । ३. मुपेयतुः....A, B । मुपेययुः D । ४. हृष्टावधि – C हृद्यावधि – K, KH, D, A, B, L, H । ५. तंदुलान्पायसं बहु – P । टि. 1. सभार्योऽपि । 2. सतां आरोपितः विस्मयो येन सः । 3. इतं प्राप्तं पारणं ययोः तौ । 4. उद्यं कथनीयं तस्यावधिः पराकाष्ठा यथास्यात् तथा प्रादात् । 5. दुग्धं ।

स्थालं समर्प्य बालस्य सखण्डघृतपायसम् । केनाऽपि हेतुनाऽयासीत् प्रतिवेशिगृहाय सा ॥८३॥
तदैव दैवतः कश्चिन्मुनिर्मासमुपोषितः । प्राप्तः पारयितुं तत्र बालं तारयितुं च तम् ॥८४॥
स दध्यौ साध्वभूत् साधुर्भाग्यैरागाद् गृहं मम । दरिद्रस्येव कल्पद्रुरन्धस्येव सुधाञ्जनम् ॥८५॥
अहो ! पात्रमहो ! वित्तमहो ! चित्तमिदं त्रयम् । दुर्लभं मन्दभाग्यानां ममोद्धूतम[१]हो अहम् ॥८६॥
इति प्रफुल्लपुलकः स्थालमुत्पाट्य हृष्टहृत् । स ददौ पायसं साधुरग्रहीत्तदनुग्रही ॥८७॥
गतश्च स यतिर्धन्या सम्प्राप्ता च गृहान्तरात् । ददौ भुक्तमनेनेति पुनः पुत्राय पायसम् ॥८८॥
बुभुक्षया स बुभुजे तदाऽऽकण्ठम[२]कुण्ठया । रजन्यां तदजीर्णेन स्मृतसाधुर्मृतः सुधीः ॥८९॥
स तद्दानप्रभावेन **शालिभद्रो** भवानभूत् । सा ते मातेह वीक्ष्य त्वां [३]वात्सल्यात् प्रत्यलाभयत् ॥९०॥
दध्नाऽथ पारणं कृत्वा नाथमापृच्छ्य सात्त्विकौ । **शालिभद्रश्च धन्यश्च** गतौ **वैभार**भूभृतम् ॥९१॥
प्रत्युपेक्ष्य ततस्तत्र सुपवित्रे शिलातले । ताभ्यामनशनं भेजे **पादपोपगमा**भिधम् ॥९२॥
एत्य **भद्रा**ऽथ तीर्थेशं नत्वाऽपृच्छन्मुनी क्व नु । तौ **शालिभद्रधन्यौ** किं भिक्षार्थमपि नाऽऽगतौ ॥९३॥
तद्वृत्ते प्रभुणोक्तेऽथ दुःखं मनसि बिभ्रती । **वैभाराद्रिं** ययौ **भद्रा श्रेणिक**श्चावनीविभुः ॥९४॥
वीक्ष्य शैलशिलामूर्ध्नि [1]तदुत्कीर्णाविवाऽथ तौ । **भद्रा** रुरोद सुतरां रोदयन्त्युपलानपि ॥९५॥
स्वमप्यस्वमिवावासं प्राप्तोऽपि स्वल्पभाग्यया । मयाद्य वत्स ! न ज्ञातः प्रमादेन क्षमस्व तत् ॥९६॥
मुक्तामपि कदाप्येष [४]हृष्टो मां प्रीणयिष्यति । एषोऽपि भङ्कुमारब्धस्त्वया मेऽद्य मनोरथः ॥९७॥
वीर ! निर्वाहयारब्धं किन्त्वेवं पृच्छ्यसेऽधुना । त्वं तल्पतूलिकाशायिन् ! शिलातल्पे कथं स्थितः ? ॥९८॥
इत्यार्त्तां तां नृपः स्माह मूढे ! हर्षेऽपि रोदिषि । ईदृक्चरित्रो यत्पुत्रः [५]सैषा त्वं स्त्रीषु देवता ॥९९॥
इत्यादिवादिना **राजगृहेन्द्रेण** प्रबोधिता । नत्वा यती ययौ सद्म **भद्रा**ऽपि **श्रेणिको**ऽपि च ॥१००॥
शुद्धध्यानेन सिद्धिं तौ यान्तौ प्रस्खल्य मृत्युना । नीतौ **सर्वार्थसिद्धा**ख्ये विमानेऽथ महामुनी ॥१०१॥

**इति शालिभद्रकथानकम् ॥**

अथ गाथार्थः-**मणय** उत्तमग्रावभेदा वज्रादयः, **कनकं** स्वर्णं, **रत्नानि** चर्मकम्बलादीनि, **धनं** चतुष्पदादि[2]स्वापतेयं तैः **पूरिते भवने** गृहे, **शालिभद्रोऽपि** एवंविधविषयसामग्रीसम्पूर्णोऽपि मनागपि दुःखाभावादसम्भाव्यवैराग्य इत्यपिशब्दार्थः । **अन्यः किल ममापि स्वामिक इति** हेतो**र्जातो विगतकामो** विषयान् प्रति निरभिलाषो बभूवेति ॥८५॥

इत्थं च चेतसि चिन्तितवान्—**न कुर्वन्ति ये तपो**ऽनशनादिकं, **संयमं च** पृथिव्यादिरक्षणात्मकं, **ते पुरुषास्तुल्यपाणिपादानां समपुरुषाणां** दृश्यैरवयवैर्निर्विशेषाणाम् **अवश्यं** निश्चितं **प्रेष्यत्वमुपयान्ति** किङ्करत्वं प्राप्नुवन्तीति ॥८६॥

---

१. महात्रयं - KH । २. कंठया - P । ३. वाच्छल्यात् - P । ४. दृष्टौ - P । ५. सैकाः P, KH । सैकास्त्वं स्त्रीश्च K, D ।

टि. 1. शिलायां उत्कीर्णौ इवेत्यर्थः । 2. स्वापतेयं-वित्तं, धनं इति यावत् ।

तस्यैव तपःप्रकर्षमाह—**सुन्दरः** सुरूपः[१], **सुकुमारो** मृदुशरीरः, **सुखोचितो** लालितेन्द्रियः, **तेन** तथाविधेन **विविधैर्**नानारूपैस्**तपोविशेषैर**ष्टमादिभिस्**तथा शोषित आत्मा** तेन प्रकारेण कृशीकृतो देहः, **यथा न विज्ञातः स्वभवनेऽपि** नोपलक्षितः स्वगृहेऽपीति ॥८७॥

**शालिभद्र**शरीरशोषणकष्टाधिसहनप्रस्तावादवन्तीसुकुमारमहर्षिमनुस्मारयति—

**दुक्करमुद्धोसकरं, अवंतिसुकुमालमहरिसीचरियं ।**
**अप्पा वि नाम तह तज्जइ त्ति अच्छेरयं एयं ॥८८॥**

**दुष्करं** दुरनुष्ठेयम् अत एव **उद्धर्षकरं** रोमहर्षजनकम् **अवन्तिसुकुमारमहर्षेश्चरितं** कथम् **आत्माऽपि** जीवस्वरूपत्यागानुपपत्तेः, कथञ्चिज्जीवाभेदाच्च देहोऽपि **नामेति** प्रसिद्धमिदमागमज्ञानामित्याह **तथा** कथासिद्धप्रकारेण **त्यज्यते इत्याश्चर्यमेतद**द्भुतमित्यक्षरार्थः ॥८८॥ अथ भावार्थसमर्थनाय कथानकमुच्यते—

**[ अवन्तीसुकुमारकथानकम् ॥ ]**

श्री**सुहस्तिन** आचार्याः विहृत्य **विदिशापुरः**[२] । देवाधिदेवोपास्त्यर्थ**मवन्तीमा**ययुः पुरीम् ॥१॥
तत्रेभ्यवल्लभां **भद्रा**मनुज्ञाप्य प्रतिश्रयम् । यानशालामलञ्चक्रुः सूरयः शमभूरयः ॥२॥
तत्र प्रदोषे तेऽन्येद्युः सुधामधुकिरा गिरा । गुणयन्ति स्म **नलिनीगुल्मा**ध्ययनमात्मना ॥३॥
ललन् **भद्रा**त्मजो**ऽवन्तीसुकुमारो** निजालये । द्वात्रिंशत्कामिनीजानिरुन्निद्रस्तत्[३] तदाशृणोत् ॥४॥
सोऽभिनीयेत किं क्वापि नाटकादीति विस्मितः । शृण्वन्हर्म्याऽग्रतो हर्षादुत्ततार रसोत्तरः ॥५॥
क्वेदं दृष्टमिति ध्यायन्नथ प्राग्जातिमस्मरत् । अमर्त्यो **नलिनीगुल्मे** प्राग्भवेऽभूवमित्यसौ ॥६॥
भूयोऽपि **नलिनीगुल्मा**ऽऽयल्लको[1]ल्लासिचेतसा । तेनागत्य नमस्कृत्य विज्ञप्ताः सूरयो रयात् ॥७॥
यूयं वित्थ कथं चेत्थमहं जानेऽनुभूतितः । **अवन्तीसुकुमारो**ऽहं **नलिनीगुल्मत**श्च्युतः ॥८॥
मन्येऽद्य[४] विशदावासं दावासन्नमिवात्मना[५] । क्रीडां पीडां वधूर्व्याधींस्तद्विना निधनं धनम् ॥९॥
स्मृतदेवर्द्धिवर्द्धिष्णुतदुत्कण्ठारसाकुलः । युष्मत्प्रसादात् प्रव्रज्य श्रयिष्ये तां पुनः श्रियम् ॥१०॥
प्रार्थिताऽपि न मे माता दाताऽनुमतिमित्यसौ । आलोच्य लुञ्चनं चक्रे केशानां कर्कशाशयः ॥११॥
स्वयं गृहीतलिङ्गोऽभून्मेति मत्वाऽथ सूरिभिः । दीक्षा ददे मुदे तस्य स्वहस्तेन सुहस्तिभिः ॥१२॥
दीर्घकालं व्रतं नाऽलं विधातुमिति स प्रभुम् । अनुज्ञाप्य श्मशानेऽगात् कुञ्जे कन्थारि[2]वीरुधाम् ॥१३॥
तत्र प्रायो[3]पवेशाय स्मरन्नेष गिरो गुरोः । इङ्गिनीं साधयामास धर्मानुध्यानधन्यधीः ॥१४॥
मृदुपादतलोद्गीर्णशोणिताघ्राणवाणिनी[4] । शिवागत्य समं बालैस्तस्याश्नात् क्रमतः[६] क्रमौ ॥१५॥
ऊरू द्वितीययामे[७] च तृतीये जठरं तथा । भक्षयन्त्यां स भेजेऽस्यां **नलिनीगुल्म**सम्पदम् ॥१६॥

---

१. स्वरूपः-P । २. विधिनापुरः P । ३. निनिरुन्निद्रस्तदा... P । ४. द्युविशदावासं - L । ५. वात्मनः-C । ६. क्रमशः- C । ७. मे य - B, मेव - P, D, A ।

टि. 1. आयल्लकः उत्कण्ठा । 2. कन्थारिः-तीक्ष्णकण्टकाकीर्णवृक्षविशेषः, तस्य लता, तासाम् । 3. प्रायः अनशनं, तं स्वीकाराय इत्यर्थः । 4. वाणिनी-उन्मत्ता ।

तत्र गन्धोदकैः पुष्पैः सुगन्धैर्ववृषुः सुराः । लोकोत्तरं तदालोकि ज्ञानालोकेन सूरिभिः ॥१७॥
वधूवर्गैः सह प्रातर्भद्रा श्रुत्वेति तद्गुरोः । सर्वं लौकिकमन्तेष्ठिविधिं चक्रे शुचाकुला ॥१८॥
समं स्नुषाभिः सा भद्रा व्रतं वैराग्यतोऽग्रहीत् । वधूरापन्नसत्त्वैका गृहस्वामित्वमातनोत् ॥१९॥
तत्पुत्रः स्वपितुः कालक्षेत्रे देवकुलं व्यधात् । **महाकाला**ख्यया लोकैस्तदात्तमधुना पुनः ॥२०॥

**इति अवन्तीसुकुमारकथानकम् ॥**

युक्तं चैतदित्याह —

**उच्छूढसरीरघरा, अन्नो जीवो सरीरमन्नं ति ।**
**धम्मस्स कारणे सुविहिया सरीरं पि छड्डुंति ॥८९॥**

**अवक्षिप्तशरीरगृहा** दूरक्षिप्तदेहगेहाः देहस्य गेहत्वमेव द्रढयति-कथम् ? **अन्यो जीवः, शरीरमन्य**दिति भावनया **धर्मस्य कारणे** धर्मनिमित्तमाश्रित्य **सुविहिताः** साधवः, **शरीरमपि त्यजन्ति** धनकनकस्य का वार्त्तेत्यर्थः ॥८९॥

कथ**मवन्तीसुकुमार**स्तत्कालमेव तद्विमानमासादितवान् इत्यत आह—

**एगदिवसं पि जीवो, पव्वज्जमुवागओ अनन्नमणो ।**
**जइ वि न पावइ मोक्खं, अवस्स वेमाणिओ होइ ॥९०॥**

किं बहुकालापेक्षया **एकमपि दिवसं जीवः** उपलक्षणत्वादेकमुहूर्तमपि वा, **प्रव्रज्यामुपागतो** भागवतं व्रतं प्रतिपन्नः, **अनन्यमना** निश्चलचित्तः सन्, मोक्षं प्राप्नोति धृतिसंहननकालादिसामग्रीविरहाद् **यद्यपि न प्राप्नोति** न लभते **मोक्षं** तथाऽप्य**वश्यं** नियमेन **वैमानिको** विमानपतिर्देवो **भवति** चरणसहायस्य सम्यग्दर्शनस्याणीयसोऽपि महोदयफलत्वादिति ॥९०॥

धर्मार्थं देहत्यागकारिणां बाहुल्यदर्शनार्थमिहैव दृष्टान्तान्तरमाह—

**सीसावेढेण सिरम्मि, वेढिए निग्गयाणि अच्छीणि ।**
**मेयज्जस्स भगवओ, न य सो मणसा वि परिकुविओ ॥९१॥**

आवेष्टनमावेष्टः **शीर्ष**स्य शिरस आवेष्टः **शीर्षावेष्टस्तेन** [1]करणभूतेन **शिरसि वेष्टिते निर्गते अक्षिणी मेतार्यस्य भगवतो न च**-नैवाऽसौ **मनसापि परिकुपित**स्तत्कारिणि, वाक्कायाभ्यां तु का वार्त्तेति सङ्क्षेपार्थः, विस्ताराऽर्थस्तु **'सुट्ठु वि जई जयन्तो'** इत्यादि गाथायामुपरिष्टाद् वक्ष्यते ॥९१॥

तदेवं यथा तेन शरीरं त्यक्तं तत्पीडाकारिणि न च क्रुद्धस्तथा सर्वमहर्षीणां कर्तुं युक्तमित्युपदिशति—

**जो चंदणेण बाहुं, आलिंपइ वासिणा व तच्छेइ ।**
**संथुणइ जो व निंदइ, महरिसिणो तत्थ समभावा ॥९२॥**

**यः** कश्चि**च्चन्दनेन** गोशीर्षादिना, **बाहुं** भुज**मालिम्पति** [1]समालभते, **वास्या वा** काष्ठघटनोपकरणेन

१. कारण...P ।

टि. 1. समा + लभ् विलिम्पने ।

**तक्ष्णोति** त्वचमुल्लिखति य इति वर्त्तते, तदनेन शारीरिकं रागद्वेषयोः कारणमुक्तम्, अधुना मानसमाह-**संस्तौति** श्लाघते, **यो वा निन्दति** गर्हते, **महर्षयः** सुसाधव**स्तत्र** चन्दनावलेपकादौ । **समभावा**स्तुल्यचित्ताः, न चन्दनावलेपकस्तावकयोस्तोषवन्तः[1] नाऽपि वासीतक्षकनिन्दकयो रोषभाज इति ॥९२॥

एवंविधगुणप्रकर्षस्य गुरूपदेश एव हेतुरिति गुरुवचनग्राहिण उपबृंहयन्निदमाह—

**सीहगिरिसुसीसाणं भद्दं गुरुवयण सद्दहंताणं ।**
**वयरो किर दाही वा-यण त्ति न विकोवियं वयणं ॥९३॥**

अस्या भावार्थो **वज्रस्वामि**चरिते प्रागेवोक्तः । **सिंहगिरिसुशिष्यानां भद्र**मस्त्विति गम्यं, कीदृशानां ? प्राकृतत्वादनुस्वारलोपे, **गुरुवचनं श्रद्दधतां** भावसारं परिगृह्णतां, तथाहि **तैर्वज्रः किल दास्यति वाचना-मित्या**चार्यसम्बन्धि **न विकोपितं वचनं**, न विचारितं वाक्यम् अपि तु निर्विकल्पं तथेति प्रतिगृहीतमिति ॥९३॥

किञ्च—

**मिणु गोणसंगुलीहिं, गणेहि वा दंतचक्कलाइं से ।**
**इच्छं ति भाणिऊणं, कज्जं तु त एव जाणंति ॥९४॥**

**मिनु गोनसमङ्गुलीभि**र्मिमीष्व विषधरभेदं करशाखाभिरिति, यदि गुरवो ब्रूयुः यद्वा **गणय** परि-सङ्ख्याहि **दन्तचक्राणि** दशनमण्डलानि **से** त्ति अस्य गोनसस्येति ब्रूयुः, तत्र शिष्येण **इच्छामीति भणित्वा** गुरुवाक्यं वाचा प्रतिपद्य **कार्यं तु तदेव** क्रिययाऽपि, तदेव सम्पाद्यं नान्यथा विनयवैतथ्यप्रसक्तेः, तुशब्दस्य विशेषार्थत्वादादेशाऽनन्तरं कालविलम्बे प्रतिपृच्छ्य कार्यम् । किमित्येवं ? यतो **जानन्ति** गुरवो निरपाय-सापायं सर्वं ज्ञपरिज्ञया प्रत्याख्यानपरिज्ञया च विदन्तीति साध्यवहारं[2] पाठान्तरं वा "**इच्छंति भाणियव्वं कज्जं तु त एव जाणंति**" **इच्छामी**ति शिष्येण **भणितव्यं** न गुरुवचनप्रतिघातः कार्यः । किमित्येवं ? यत**: कार्यं तु** तथाविधे भणने प्रयोजनं पुन**स्त एव** गुरव एव **जानन्ति** विशिष्टतरज्ञानत्वात्, तुशब्दादिहापि तदेवेति ॥९४॥

तथाहि—

**कारणविऊ कयाई, सेयं कायं वयंति आयरिया ।**
**तं तह सद्दहियव्वं, भविअव्वं कारणेण तहिं ॥९५॥**

**कारणविदो** हेतुयुक्तिज्ञाः, **कदाचित्क**स्मिंश्चित् प्रस्तावे **श्वेतं काकं वदेयुराचार्याः**, धवलं वायसं ब्रूयुर्गुरवः । **तद्व**चनं **तथा श्रद्धातव्यं** भावसारं तथेति प्रतिपत्तव्यं, किमितीत्याह ? **भवितव्यं कारणेन [तत्र]** वाक्ये न खलु निष्प्रयोजना गुरूणां गिरः प्रवर्त्तन्त इति । कारणं त्विह अपुनर्बन्धकान् जीवान् कृतग्रन्थिभेदतया अष्टाविंशतिसत्कर्मणश्च जीवानधिकृत्य श्वेतपाक्षिकत्वादिलक्षणमा[१]गमप्रसिद्धं वेदितव्यम् ॥९५॥

---

१. जिसिम्मवट्टो पुग्गलपरिअट्टो चेव होइ संसारो ते सुक्कपक्खिआ खलु सेसा पुण किण्हपक्खम्मि । अत्राऽयं पाठः 'C' आदर्शे दृष्टः ।

टि. 1. स्तावकः-स्तोता । 2. अध्यवहारेण सहितम् इत्यर्थः ।

एवं गुरुवचनकारिणां गुणमाह—

**जो गिण्हइ गुरुवयणं, भण्णंतं भावओ विसुद्धमणो ।**

**ओसहमिव पिज्जंतं, तं तस्स सुहावहं होइ ॥९६॥**

**यो गृह्णाति गुरुवचनं** गुरुणो**च्यमानं भावतो**ऽन्तःकरणेन **विशुद्धमना** निर्विकल्पचित्तः, **औषधमिव पीयमानं तद्** गुरुवचनं गृहीतं **तस्य सुखावहं** भवति, कर्माशयामयोच्छेदकत्वादिति ॥९६॥

एवंविधान् गुर्वादेशवर्तिनः सुशिष्यान् स्तौति—

**अणुवत्तगा विणीया, बहुक्खमा निच्चभत्तिमंता य ।**

**गुरुकुलवासी अमुई, धन्ना सीसा इय सुसीला ॥९७॥**

**अनुवर्त्तका** अनुकूलवृत्तयो **विनीता** गुरोः प्रतिपत्तिकारिणः सर्वकृत्यकारिणश्च[१], **बहुक्षमा** नीरोषतया सर्वसहा **नित्यभक्तिमन्तो** गुरोः सदान्तःकरणप्रतिबन्धभाजो **गुरुकुलवासिनः** स्वगुर्वधिष्ठितगच्छवासिनः[२], **अमोचकाः** सदेश[2]देशापरित्यागिनः स्वगुरुपादानामादेश[३]भीरुतया नासन्नदेशत्यागेन दूरवर्त्तिनः यद्वा **अमोचकाः** श्रुतवाचनादिकार्येण गुरुमुपसम्पद्य तत्कार्यपर्याप्त्या कृतकृत्यतया भूयः स्वगुरुकुलं गता अपि, तस्योपसम्पद्गुरोर्मनसा प्रतिबन्धापरित्यागेन न पक्षपातं मुञ्चन्तीति अमोचकाः । **धन्याः शिष्या इति सुशीलाः**, भाग्यभाजो विनेया एवं शुभस्वभावाः स्वपरयोः समाधिजनकत्वादिति ॥९७॥

सुशिष्याणामेवान्वय-व्यतिरेकाभ्यां फलमाह—

**जीवंतस्स इह जसो, कित्ती य मयस्स परभवे धम्मो ।**

**सगुणस्स य निग्गुणस्स उ, अयसोऽकित्ती अहम्मो य ॥९८॥**

**सगुणस्य जीवतः** प्राणान् धारयतः, **इह** लोके **यशः** अहो पुण्यवानयमिति श्लाघारूपः शृङ्गारः । **कीर्त्तिश्च** तथारूपैव **मृतस्य** संशब्दना । **परभवे** लोकान्तरे **धर्मश्च** सुदेवगत्यादिः, कार्यकारणोपचाराद्धर्मफलं भवतीति । व्यतिरेकमाह—**निर्गुणस्या**नुवर्त्तकादिगुणदोषशून्यस्य पुनर्जीवतो**ऽयशो** मृतस्या**ऽकीर्तिरधर्मश्च** परलोके दुर्गतिहेतुर्भवतीति ॥९८॥

अथ स्वयमुत्सर्गनिष्ठतया दुर्विदग्धः, सुविहितंमन्योऽपि कारणादपवादसेविनमपि गुरुं न मीमांसेत, किंतु निर्विकल्पं सेवेतेत्याह—

**वुड्ढावासे वि ठियं, अहव गिलाणं गुरुं परिहवंति ।**

**दत्तो व्व धम्मवीमंसएण दुस्सिक्खियं तं पि ॥९९॥**

इह वृद्धः—क्षीणजङ्घाबलः, तस्य आ मर्यादया ऋतुबद्धवर्षाकालयोर्मासचतुर्मासाभ्यधिकं वसनं **वृद्धावासः, तस्मिन्नपि स्थितम्** आस्तामनियतविहारिणम्, **अथवे**ति पक्षान्तरद्योतकः—**ग्लानं** रोगासहिष्णुमप-

१. कराश्च - C । २. सेविनः C । ३. दानामुपदेशभी - D, L ।

टि. 1. आशयः-वासना । 2. सदेशः - समीपः ।

वादपदेषु वर्त्तमानमिति गम्यते, **गुरुं परिभवन्ति** मन्दभाग्यतया दुर्बुद्धयो धर्माचार्यमवमन्यन्ते । क इव **दत्त इव**, केन **धर्मविमर्शकेन** धर्ममयकुत्सितविमर्शेन 'वयं निरपवादधर्माणः सुविहिताः, अयं तु सातिचारत्वान्न तथा,' इत्येवंविधकुविकल्पेन **दुःशिक्षितं** दुरभ्यस्तं दुर्गतिहेतुत्वाद्दुष्टचेष्टितं, **तदपि** सुविहितंमन्यस्याऽपि गुरु-परिभवनमास्तां निरुपाधिदुर्विनीततयेत्यपिशब्दार्थः ॥९९॥

**दत्त**कथानकं '**कारणनीयावासी**'त्यादिगाथायां **सङ्गम**स्थविराचार्यकथानकान्तरुपरिष्टात् वक्ष्यते । दुर्विनीतदृष्टान्तमुक्त्वा विनेयस्य गुरुप्रतिबन्धदार्ढ्यं दृष्टान्तेनाह—

**आयरियभत्तिरागो, कस्स सुनक्खत्तमहरिसीसरिसो ।**
**अवि जीवियं ववसियं, न चेव गुरुपरिभवो सहिओ ॥१००॥**

**आचार्यभक्तिरागो** गुरुगोचरान्तरस्नेहः **कस्य सुनक्षत्रमहर्षिसदृशः** न कस्यचिदन्यस्य, तेनैव हि **जीवितमपि व्यवसितं** विशेषेणावसानं नीतं, **नैव गुरुपरिभवः** आचार्यतिरस्कारः, **सोढः** क्षान्तः **च**शब्दात् प्रतिपक्षस्तिरस्कृतश्चेति ॥१००॥ **सुनक्षत्राख्यानकं** चैवम्—

**[ सुनक्षत्रमहर्षिकथानकम् ॥ ]**

श्री**वीरो** विहरन्नुर्व्यां **श्रावस्त्यां** कर्हिचित्पुरि । भगवान् भविनां भाग्यवासरः समवासरत् ॥१॥
धर्माख्यां पर्षदि श्रुत्वोत्थितायां षष्ठपारणः । आदाय भिक्षामक्षाममतिः प्रत्यागतो जिनम् ॥२॥
**गौतमो**ऽपृच्छदश्रावि **श्रावस्त्या**मटता मया । **गोशालो** यज्जिनंमन्यस्तत्तथ्यं नाथ ! नाऽथवा ॥३॥ युग्मम् ॥
अथो कथोपसर्गेषु यथोक्ता तस्य **मङ्खले**: । तथैव **गौतमस्या**ग्रे जगौ तां जगतांगुरुः ॥४॥
तथाष्टाङ्गनिमित्तज्ञस्तेजोलेश्यातिदुस्सहः । जने जिनोऽहमस्मीति व्याहरन् विजहार सः ॥५॥
स **मङ्खो मङ्खले**: सूनुराजीवकव्रतोऽधुना । दीक्षापर्यायतो वत्स ! चतुर्विंशतिवत्सरः ॥६॥
अजिनोऽपि जिनोपज्ञज्ञानेनैव जिनीभवन् । अस्ति **हालाहलाख्यायाः** कुम्भकार्याः किलापणे ॥७॥ युग्मम् ॥
तां जगाद जगद्गोप्ता यथाग्रे **गौतमं** कथाम् । व्यस्तारि सा तथा तथ्या मिथोऽनुकथनाज्जनैः ॥८॥
श्रुत्वा जनादनिष्टं तत् जिनाऽऽदिष्टं स **मङ्खसूः** । ह्रीणश्चुकोप गोपायन्निदं चरितमात्मनः ॥९॥
जिनस्य शिष्य**मानन्द**स्थविरं षष्ठपारणम् । दृष्ट्वा चरन्तमाचष्ट क्रोधनः स तपोधनम् ॥१०॥
**आनन्दं** विब्रुवन्नुच्चैः सोद्यमः सोद्यमां तथा । दृश्यतां स्वगुरुर्गच्छन्नस्मत्तेजसि भस्मताम् ॥११॥
तस्मै निवेदयैवेदमनुत्वामागतोऽस्म्यहम् । मा भैषीस्तस्य शिष्येषु त्वमेको मित्र ! मुच्यसे ॥१२॥
जिनास्थानमथा**ऽऽनन्दो** गत्वाऽऽनन्दोज्झितो जिनम् । विज्ञस्तदुक्तं विज्ञप्याऽपृच्छत् तच्छक्तिसम्पदम् ॥१३॥
जिनोऽवोचत् परं दग्धुं विदग्धं वत्स ! तत्तपः । जिनतेजस्यनन्ते तु शक्तिस्तस्य विलीयते ॥१४॥

---

१. तं अन्य KH तमन्य - P, B । २. दुरुपाधि - P । ३. कं तदुपरि - KH, K, C, D, A । ४. आनन्दविब्रु - C, D, K, A । आनन्दविक्रम...L । ५. दुर्ग - C ।

टि. 1. आत्मानं सुविहितं मन्यते इति सुविहितंमन्यः, तस्य । 2. भाग्यवासरः-भाग्यं उद्घटनाय वासरः सदृशः ।

अक्रोधभाजिनः किन्तु परितापं जिना अपि । लभन्ते तेजसा तेन तदाश्चर्यं पुनर्महत् ॥१५॥
कथय**ानन्द** वत्स ! त्वं तत्सर्वं **गौतमा**दिषु । मा कोऽपि कोपयत्वेनं धर्मप्रश्नैरिहागतम् ॥१६॥
तेनाऽथ नाथनिर्दिष्टे तथैव विहिते सति । ससमाजः समाजग्मे जिनस्यानेन पापिना ॥१७॥
स्थित्वाऽग्रे जिनमूचे त्वं [1]काश्यपास्यतिकश्यपः । **मङ्खु**पुत्रं मृषा ब्रूषे यन्मां शिष्यं तथात्मनः ॥१८॥
अयं न भवसीत्युच्चैरुच्चावचवचाः शठः । **सर्वाणभूति**नाऽभाषि जङ्गपूकोऽसहिष्णुना ॥१९॥
दीक्षितः शिक्षितश्चासि धर्माचार्येण येन रे ! । तमेवापवदन् पाप ! हक्पथान्नापयासि किम् ॥२०॥
गोशाले भ्राष्ट्रवत्तेजोलेश्यया ज्वलिते ततः । [2]गुरुभक्ति[१]चणोऽपप्तत् परलोकहिताय सः ॥२१॥
विपद्य वासनोल्लासभासुरः सुरसम्पदम् । **सहस्रारे** स **सर्वाणभूति**र्भेजेऽतिभूतिमान् ॥२२॥
[२]अवदद् दुर्मदो भूयस्तद्वदेव जिनं प्रति । तद् दुःश्रवं **सुनक्षत्रः** सेहे [3]**सर्वाण**वन्न हि ॥२३॥
सुनक्षत्रेऽपि साक्षेपं तदधिक्षेपवादिनि । **मङ्खु**सूर्मुमुचे मङ्क्षु महत्तेजो महाधमः ॥२४॥
तदपप्तत्तमां तेजस्तेन तप्तस्ततो मुनिः । त्रिः प्रणम्य जिनं तेने व्रतोच्चारं विशुद्धधीः ॥२५॥
क्षमयित्वाखिलं सङ्घं सर्वजीवानपि स्वयम् । स्वालोचितप्रतिक्रान्तः प्रपेदे कल्प**मच्युतम्** ॥२६॥
मा भूद् भूयोऽपरः कोऽपि **मङ्खु**कोपहविर्मुनिः । श्री**वीर**स्तमुवाचेति स्वयमेवोदयद्दयः ॥२७॥
यत्त्वां सत्यं वदन्त्येते मदन्तेवासिनं जनाः । तस्यापलापे सापेक्षस्त्वमेव त्वमिवाधमः ॥२८॥
[4]भवतामरसादित्यीभवता भवता बत । मानिनाऽनात्मनीनेन मुनिहत्या कुतः कृता ॥२९॥
संवृणु [३]स्वं वृणु श्रेयो मोघमातनु मा [5]तमः । शिवं प्रति [४]भवान् कम्प्रः सम्प्रत्यपि भवोद्यतः ॥३०॥
प्राप्तैः कृपासुधासिन्धोर्वाक्सुधाबिन्दुभिः प्रभोः । तैः स जज्वाल **गोशाल**स्तप्ततैलकटाहवत् ॥३१॥
[५]वीरनीराजिनी मुक्ता तेजोलेश्याऽपि तेन या । तयाऽपि भूयः प्रत्येत्य स एव परितापितः ॥३२॥
ततोऽन्तस्तापमापन्नो वीक्षापन्नो जिनं जगौ । भावी काश्यप ! मृत्युस्ते मध्ये षण्मासमित्यसौ ॥३३॥
तीर्थेशस्तमथोऽवादीदहं वर्षाणि षोडश । भद्र ! केवलिपर्यायं पालयिष्येऽनुपप्लवः ॥३४॥
दीप्तपित्तज्वराक्रान्तदेहस्याद्यदिनात्पुनः । छद्मस्थस्यैव मृत्युस्ते सप्तमेऽह्नि भविष्यति ॥३५॥
[६]स्वागतो वसतिं पित्तोपप्लवादिति विप्लुतः । आलापैर्मद्यपोऽश्लीलैः सोऽतिचक्राम षट् दिनान् ॥३६॥
शान्तं कथञ्चिन्मिथ्यात्वपिधानं तस्य तत्तदा । आविरासीच्च सम्यक्त्वनिधानं सद्विपाकतः ॥३७॥
जिनाशातनया साधुहत्यया चात्मना कृतम् । निनिन्दे दुष्कृतं स्वं च धिक्चकाराविकारधीः ॥३८॥

---

१. चणः पेते – C, KH । २. अवादीत् – KH । ३. त्वं – KH । ४. भवात् – KH, C । ५. वीरमीशंप्रति – B वीरनीरापतिर्मु – H । ६. सगतो L स्वांगतो – K, D, KH ।

टि. 1. कश्यं मदिरां पिबति इति कश्यपः, तं अतिक्रान्तः अतिकश्यपः काश्यप ! त्वं अतिकश्यपः असि इति वाच्यम् । 2. [७।१।१७५] हैम० सूत्रेण 'प्रसिद्ध' अर्थे 'चण' प्रत्ययः । 3. सर्वाणभूतिः इव । 4. भव एव तामरसं कमलं तस्य विकासने आदित्य इव इत्यर्थः । 5. तमः अज्ञानं इत्यर्थः ।

भूयो विनेयानाहूयोवाच वाचमिमामथ । जिनोऽहं नैव सत्येन श्री**वीरो** भगवान् जिनः ॥३९॥
सोऽसत्प्रलापी पापीयान् साधुघातीति वादिनः । [1]शुम्बेन मां पदोर्बद्ध्वा मध्येश्रावस्ति कर्षत ॥४०॥
इहाऽर्थे शपथैर्बद्ध्वा विनेयानिति नीतिमान् । उत्पेदे **द्वादशे कल्पे गोशालः** क्षालिताशयः ॥४१॥
[2]व्यसौ तत्र वसत्यन्तः शिष्यैरालिख्य तां पुरम् । द्वारं पिधाय तत् गुप्तं गुरोरुक्तमकारि तैः ॥४२॥
मृतकस्य क्रियाच्चादिः प्रकाशमखिलाऽपि तैः । आत्मभक्तेः समुचिता रचिता नु चितावधिः ॥४३॥
विहृत्य **मेण्ठक**ग्रामे स्थितश्चैत्येऽथ **कोष्ठके** । **गौतमेन** गुरुः पृष्टः समाचष्टेति तद्गतिम् ॥४४॥
**सर्वाणश्च सुनक्षत्र**महर्षिश्च दिवश्च्युतौ । अवतीर्य विदेहेषु महानन्दं गमिष्यतः ॥४५॥
**गोशालो**ऽप्यात्मपापानि निन्दित्वाऽन्ते**ऽच्युते**ऽगमत् । **विद्भिस्तथा गति र्गीता जन्तोरन्ते यथा मतिः** ॥४६॥
प्रागनन्तभवाभ्यासाद्धर्मस्याऽऽशातनापरः । नापरः कश्चिदप्यस्ति प्रायो **गोशाल**सन्निभः ॥४७॥
च्युतो**ऽच्युता**च्च **भरते**ऽत्रैव **विन्ध्या**द्रिसन्निधौ । **पुण्ड्र**देशे **शतद्वारपुरे** [१]**संमुचि**भूपतेः ॥४८॥
**भद्रा**कुक्षिभवः पुत्रो **महापद्मो**ऽभिधानतः । क्रमाद्दासीकृतासीमनृपः स भविता नृपः ॥४९॥
**पूर्णभद्र-माणिभद्र**यक्षसेनौघसन्निधेः । आख्यास्यन्ति प्रजा [3]**देवसेन**मेनं महोत्कटम् ॥५०॥
चतुर्दन्तं गजं शुभ्रम[4]भ्रमू(मु)वल्लभोपमम् । प्राप्यारूढश्च **विमलवाहना**ख्यां स लप्स्यते ॥५१॥
प्राक्संस्कारवशाविष्टः प्रद्विष्टः श्रमणेषु सः । विधाता विविधां बाधां वृद्धवाक्यानधीनधीः ॥५२॥
रथारूढोऽन्यदोद्याने त्रिज्ञानं मुनिपुङ्गवम् । आतापिनं कृतोत्सर्गं स द्रक्ष्यति **सुमङ्गलम्** ॥५३॥
क्रुद्धो मुनिं रथाग्रेण हत्वा तं पातयिष्यति । उत्थायावस्थितं भूयस्त्रिस्तथैव स दुष्टधीः ॥५४॥
अथोपयोगादवधेर्ज्ञात्वा **गोशालकं** च तम् । **सुमङ्गलो** जगादैवं स्मारयन्**मङ्खु**पुत्रताम् ॥५५॥
नाऽसि रे ! **देवसेन**स्त्वं न वा **विमलवाहनः** । प्रत्यनीकोऽसि **गोशाल** ! **महापद्मो**ऽपि नासि रे ॥५६॥
धिक्त्वामाशातितो येन धर्माचार्यो जिनोत्तमः । दुष्ट ! प्लुष्टश्च सर्वाणः **सुनक्षत्रश्च** स त्वया ॥५७॥
तेषामेव स्मरेः क्षान्तमरे जीवसि नाधुना । स्वतेजोलेश्ययेत्युक्त्वा धक्ष्यति क्षितिपं स तम् ॥५८॥
श्रामण्यमनुपाल्यान्ते मुनिः **सर्वार्थ**मेष्यति । ततश्च्युतो **विदेहे**षु भूत्वा मोक्षमवाप्स्यति ॥५९॥
श्रीसङ्घप्रत्यनीकानां धार्मिकेषु दुरात्मनाम् । वधोऽपि न वधः पुण्यमनुबध्नात्य[5]सौ यतः ॥६०॥
सप्तम्याद्यासु पृथ्वीषु द्विर्द्विस्तिर्यक्षु लक्षशः । उत्पत्स्यते स सर्वत्र **मङ्खुो** दाहाद्विपत्स्यते ॥६१॥
भवान् दुःखप्रदान् भूरीन् भ्रान्त्वानन्तमने[6]हसम् । उत्पत्स्यते स पापात्मा वेश्या **राजगृहा**द्बहिः ॥६२॥

---

१. नमुचि - KH ।

टि. 1. शुम्बं-रज्जुः । 2. विगता असवः प्राणाः यस्मात्-व्यसुः तस्मिन् । 3. पूर्णभद्रमाणिभद्रयक्षाणां देवानां सेनायाः सान्निध्यात् हेतोः देवसेनः इत्याख्या इत्यर्थः । 4. अभ्रमुः ऐरावणहस्तिनःस्त्री, तस्याः वल्लभः=अभ्रमुवल्लभः-ऐरावणहस्ती इत्यर्थः । 5. वधः । 6. अनेहस्-कालः ।

हता पौरभुजङ्गेन भूयो भूत्वा पणाङ्गना । भूत्वा विप्राङ्गना भूत्वा दवदग्धा विपत्स्यते ॥६३॥
असुरोऽ**ग्निकुमा**रेषु भूत्वा भूत्वा पुनर्नरः । बुद्ध्वा विराद्धश्रामण्योऽसुरेषु भविता पुनः ॥६४॥
असुरेषु सुरेष्वेवं नृत्वेनान्तरितान् भवान् । पूरयित्वा स **सर्वार्थसिद्धि**मेष्यति शुद्धधीः ॥६५॥
ततश्च्युतो **विदेहे**षु सुधीर्भूत्वा वणिक्सुतः । दृढप्रतिज्ञः प्रव्रज्य केवलज्ञानमाप्स्यति ॥६६॥
त्रिकालज्ञोऽथ निःशेषान् मुनिभ्यः प्राग्भवानसौ । निवेद्याऽथ विशेषार्थमुपदेक्ष्यति शिक्षयन् ॥६७॥
आचार्यप्रतिकूलत्वं वर्जनीयं प्रयत्नतः । आचार्याराधनादेव येन धर्मः प्रसीदति ॥६८॥
श्रीमानर्हन् सदाप्यर्हस्तस्माद्विद्या गरीयसी । विद्योपनिषदां कन्दस्ताभ्यामपि गुरुर्गुरुः ॥६९॥
अर्हद्विद्यागुरूणां हि त्रयाणां नान्तरं विदुः । तेषां कुर्वन्ति ये भेदं धर्मं भिन्दन्ति ते शठाः ॥७०॥
प्रबोधयन्[१] नरान् भूरीन् **वीरो** देशनयाऽनया । **मङ्खु**लेश्योदितात्तापात् किं त्वभूदतिसारकी ॥७१॥
आमयाविनमालोक्य श्री**वीरं** प्रावदन् जनाः । लेश्यातप्तो हहा सत्यं किं जिनोऽपि विपत्स्यते ॥७२॥
इदं निशम्य **सिंहर्षि**मुच्चैर्गुप्तविलापिनम् । ज्ञात्वाऽऽहूय जिनोऽवोचत् वत्सेति किमु तप्यसे ॥७३॥
**रेवत्यु**पासिकाधाम्नि गच्छ पक्वोऽस्ति यस्तया । अस्मभ्यमेव **कूष्माण्ड**कटाहस्तं तु मा ग्रहीः ॥७४॥
यस्तु पक्वस्तयाऽऽत्मार्थे कटाहो **बीजपूरकः** । तमानय मुने ! तेन सन्तोषं वितनोमि वः ॥७५॥
**रेवत्या**लयमेत्य **सिंह**मुनिरप्यादत्त दत्तं तया,
शुद्धं भेषजमत्र हेम विबुधैर्वृष्टं[२] च तुष्टात्मभिः ।
**सिंहे**नार्पितमौषधं जिनपतिश्चासेव्य सेव्यः सता-
मुल्लाघोऽजनि लोक[३]भावजरुजां[४] सुश्लाघ उल्लाघनः[1] ॥७६॥ [शार्दूलविक्रीडितवृत्तम्]

**इति सुनक्षत्रमहर्षिकथानकम् ॥**

अयं च परमगुरौ भगवति धर्माचार्यभक्तिरागात् त्रैकालिकस्य महापुण्यराशेर्भाजनम् । तथा चोक्तम्—

**पुण्णेहिं चोइआ पुरकडेहिं सिरिभायणं भवियसत्ता ।**
**गुरुमागमेसिभद्दा, देवयमिव पज्जुवासंति ॥१०१॥**

**भव्यसत्त्वाः** प्रत्यासन्नसिद्धयो जन्तवः, **पुराकृतैः** पूर्वभवोपार्जितैः[५] **पुण्यैश्चोदिताः** प्रेरिताः, अनेन प्राक्काल-शुद्धिरुक्ता । वर्त्तमाने तु काले **श्रीभाजन**मिहलोक एव ज्ञानादिलक्ष्मीपात्रं, ते **आगमिष्यद्भद्राश्च** परलोके स्वर्गापवर्गप्राप्तेर्भाविकल्याणाः सन्तस्ते **गुरुं** धर्माचार्यं, **देवतामिव** परमात्मबुद्ध्यैव **पर्युपासते** आराध्यन्तीति ॥१०१॥

यतः सुखावाप्तिदुःखपरिहारौ प्राणिनां प्रायस्तत्प्रसादाऽधीनौ इत्याह—

**बहुसोक्खसयसहस्साण, दायगा मोयगा दुहसयाणं ।**
**आयरिया फुडमेयं, केसिपएसी य ते हेऊ ॥१०२॥**

**बहुसौख्यशतसहस्राणां दायकाः** प्रचुरसुखलक्षाणां दातारस्तथा **मोचकाः दुःखशतेभ्यः**, के ?

---

१. प्राबोधयन् - K, B, D । २. मृष्टं P, A दृष्टं-D, K, KH । ३. जंतुभाव...B । ४. भुजां-KH, L । ५. वार्जितः-P, KH, C, A ।

टि. 1. उल्लाघनः-निपुणः ।

**आचार्या** गुरवः **स्फुटमेत**न्निःसन्दिग्धमिदम् । अत्राऽर्थे **केशि**नामा गणधरः **प्रदेशि**नामा **च** राजा शिष्यः **तावु**भावपि **हेतुः** हेतुरिह दृष्टान्तः, यदुक्तं **न्यायभाष्ये**–'**उदाहरणसाधर्म्यात् साध्यसाधनं हेतु**'रिति सङ्क्षेपार्थः ॥१०२॥ अथ विस्तरार्थः कथया कथ्यते तथाहि–

**[ केशि-प्रदेशिकथानकम् ॥ ]**

पुर्या**मामलकल्पायां सूर्याभो**ऽभ्येत्य निर्जरः । नत्वा [1]समवसृत्यन्तः श्री**वीरा**य व्यजिज्ञपत् ॥१॥
**गौतमा**दिमहर्षीणां दर्शयिष्येऽद्य भक्तितः । दिव्यं नाट्यविधिं शुद्धमनुजानीहि मां प्रभो ! ॥२॥
विज्ञप्तस्त्रिरिति स्वामी **सूर्याभेन** महर्द्धिना । नाऽऽदिदेश जिनः किञ्चिन्न च प्रत्यादिदेश तम् ॥३॥
ऐशान्यामथ पीठस्थः सव्यासव्यभुजद्वयात् । विचक्रेऽष्टशतं देवो देवानप्सरसस्तथा ॥४॥
अथ मर्त्येष्वसम्भाव्यं दिव्यं दिव्यर्द्धिवर्द्धितम् । स द्वात्रिंशद्विधं नाट्यं संदर्श्य स्वर्ययौ पुनः ॥५॥
श्री**वीरं गौतमो**ऽपृच्छत् कोऽयं ? बोधिः कुतोऽस्य वा । धर्म्येण कर्मणा केन ऋद्धिरस्याथवेदृशी ॥६॥
अथाऽऽह श्री**महावीरः** शृणु **गौतम** ! कौतुकम् । यदेष नरकस्थाने विमाने वासमासदत् ॥७॥
तथाहि **श्वेतवी**पूर्यां **प्रदेशी**त्यभवन्नृपः । प्रिया च **सूर्यकान्ता**ऽस्य **सूर्यकान्त**श्च नन्दनः ॥८॥
तस्यालङ्घ्यवच**श्चित्रो** राजकार्यात्कदाचन । **श्रावस्त्यां** सचिवोऽयासी**ज्जितशत्रु**नृपान्तिके ॥९॥
सोऽपश्यत् **केशिनं** तत्र श्री**पार्श्व**गणधारिणम् । तं चतुर्ज्ञानमानम्य गृहिधर्मं प्रपन्नवान् ॥१०॥
**श्वेतव्यां** नेतुमाचार्यः **केशी** चित्रेण मन्त्रिणा । स्वभूभुजः प्रबोधाय विज्ञप्तस्तमथादिशत् ॥११॥
इहलोकैकधीः क्रूरः परलोकपराङ्मुखः । साहसैकरसश्चण्डः स कथं बोधमर्हति ॥१२॥
ऊचेऽत्र चित्रः सन्त्यन्ये धनिनो ये तपोभृताम् । सदा सत्कारसन्मानदानप्रणयपेशलाः ॥१३॥
भर्त्तस्तत्र विहारेण प्रसीदानुगृहाण तान् । वर्त्तमानेन योगेन मेने तद्वचनं मुनिः ॥१४॥
अथो यथोक्तया साधुचर्यया विहरन् गुरुः । **श्वेतवीं स** पुरीं प्राप्तः पुण्यो[१]द्याने बहिः स्थितः ॥१५॥
नियुक्तैस्तच्च विज्ञप्तं श्रुत्वा चित्रः प्रमोदवान् । तत्रस्थ एव तं नत्वा चित्ते चिन्तितवानिदम् ॥१६॥
अयं चेन्नरकं गन्ता प्रभुर्मय्यपि मन्त्रिणि । ततः स्वामिप्रसादानामहं स्यामनृणः कथम् ? ॥१७॥
ततः केनाप्युपायेन [२]गुरुमेनं नयाम्यहम् । **प्रतिकर्त्ता रुजां वैद्यो गुरुर्दुष्कर्मणां पुनः** ॥१८॥
वाहवाहनिकाव्याजात्तत्र निन्ये स भूपतिम् । यत्र पर्षद्गतो धर्मं सतामाचष्ट [३]सद्गुरुः ॥१९॥
विश्रामकामस्तत्पार्श्वद्रुमच्छायामुपेत्य सः । चित्रमाह व्यथार्त्तः किं रारटीति यदित्यसौ ॥२०॥
न ज्ञायतेऽन्तिके गत्वा श्रुत्वा निश्चीयतां ततः । तेनेति प्रेरितो राजा सूरेः शुश्राव देशनाम् ॥२१॥
गिरेः शृङ्ग इवोत्तुङ्गे मर्त्त्यत्वेऽपि प्रमादिनः । [2]उत्पथस्थास्थ भो ! भव्याः ! पित्सवः किं भवावटे ? ॥२२॥

---

१. द्यानब – C । २. गुरुं येन – P, C, KH, B । ३. तद्गुरुः – P ।

टि. 1. समवसरणमध्ये । 2. उत्पथस्थास्थ इत्यस्य [व्यत्यये लुग् वा] १।३।५६...सूत्रेण मध्यसकारस्य लोपः ।

पापात्मानः कथं निद्रां कुर्वन्ति निशि निर्भयाः । दीर्घीभूता हि सा तेषां नरकाह्वानदूतिका ॥२३॥
आत्मकर्माऽन्यलोकादि परोक्षत्वान्न चेन्मतम् । तत्पितामहपित्राद्या अपि स्युस्ते न सम्मताः ॥२४॥
वाचः परप्रबोधाय प्रोच्यन्तेऽतीन्द्रियश्च [1]सः । तद्वक्तुमपि नो युक्तं प्रत्यक्षैकप्रमाणिनाम् ॥२५॥
धर्मिणं च विनात्मानमिच्छादिगुणसंश्रयम् । धर्मत्वादिह चैतन्यमन्यथा नोपपद्यते ॥२६॥
प्रत्येकं तन्न भूतेषु व्यूढेष्वपि ततः कथम् । दृशा त्वचापि [१]वैकार्थग्रहणात्तच्च नाक्षजम् ॥२७॥
भिन्नेन्द्रियगृहीतार्थानुसन्धातारमन्तरा । न स्मृतीच्छादयो भावा घटन्तेऽमी कथञ्चन ॥२८॥
इच्छादयः सजातीनां जन्याश्च जनकाश्च यत् । [२]भवाभ्यां भूतभाविभ्यां [३]द्वये तेऽप्यभिचारिणः ॥२९॥
अतुल्याः फलतस्तुल्यारम्भोपायवतां क्रियाः । अदृष्टेनाऽविनाभावं न त्यजन्तीह कर्हिचित् ॥३०॥
चेतनस्येति कर्माणि कर्तुश्च परलोकिनः । तस्यानुमानसिद्धस्यात्मनो हित[४]मिहातनु ॥३१॥
स्वसंवेदनमध्यक्षमहमस्मीति या मतिः । प्रत्यक्षोऽप्येष तेनात्मा तत्र मुह्यथ किं मुधा ? ॥३२॥
अतीन्द्रियाणां चार्थानामियमेव प्रमेयता । यं प्रमातारमाचष्टे सर्वज्ञः स उपास्यताम् ॥३३॥
उत्कर्षः परिमाणस्य यथाऽऽकाशे तथा मतेः । विश्रान्तो यत्र [2]वैमत्यं धिग् जडास्तत्र कुर्वते ॥३४॥
श्रीसर्वज्ञं तमाराध्य शरण्यं शिवनायकम् । रत्नत्रयमयो मार्गस्तदादिष्टः प्रपद्यताम् ॥३५॥
[3]वाद्यस्त्रवदथो हित्वा स नृपोऽन्त्यकथाद्वयम् । आद्यया कथया शिष्यवदूचे युक्तितो गुरुम् ॥३६॥
भदन्त ! मत्पितात्यन्तं क्रूरस्तन्नरकं गतः । भवन्मतेन मन्माता धर्मिष्ठा तद्दिवं गता ॥३७॥
तयोरहं प्रियस्तादृग् यादृक् कोऽपि न कस्यचित् । तावेत्य पितरौ कस्मान्मां न बोधयतोऽधुना ॥३८॥
गुरुः प्रत्याह तत्रैको गुप्तिक्षिप्त इवावशः । आगन्तुं कर्मभिर्बद्धो नारको लभते कथम् ॥३९॥
सङ्क्रान्तप्रीतयः कामासक्ताः पूर्णमनोरथाः । मर्त्याऽनधीनकृत्याश्च कथमायान्तु वा सुराः ॥४०॥
[५]ऊर्द्धं [4][६]गव्याः शतान्यष्टौ सहस्रमपि कर्हिचित् । मर्त्यानां याति दुर्गन्धस्तेनेहाऽऽयान्ति नाऽमराः ॥४१॥
अर्हत्कल्याणमुख्येषु महोत्सव[७]मखेषु ते । मर्त्यलोके [5]मखभुजः समायान्तीह नान्यथा ॥४२॥
भूपोऽन्वयुङ्क्त भूयोऽपि मयैकस्तस्करः प्रभो ! । क्षिप्त्वान्तःकुम्भि तद्द्वारं दृढं नीरन्ध्रितं स्वयम् ॥४३॥
कालेन स मृतो दृष्टः कृम्याकुलकले[८]वरः । तज्जीवनिर्गमोऽन्येषामागमो वाऽभवत्कथम् ॥४४॥
चूर्णपेषं च पिष्ट्वाऽपि चौरे जीवो विलोकितः । प्रति[6]प्रतीकमप्यत्र प्रत्यभिज्ञायि नो पुनः ॥४५॥

---

१. तैका...K चैकार्थ....KH, L, H, C । २. भावा....KH । ३. द्वयोप्यव्यभिचारिणः-D ...प्यव्यभि...KH, C, B । ४. महातनुः- C, ...तनुः P, KH, मयातनु - D । ५. ऊर्द्ध - B, H । ६. गत्या - H, B, L, D, KH, C, गवा - K । ७. मुखेषु - K । ८. वरी - C ।

टि. 1. सः - परप्रबोधः । 2. विपरीता मतिः विमतिः तस्या भावः वैमत्यम् । 3. वादिनः अस्त्रं इति वाद्यस्त्रम्, तद्वद् धृष्टतापूर्वं आलापनम् हित्वा । 4. गव्या(स्त्री) - क्रोशद्वयम् । 5. मखभुजः- देवाः । 6. प्रतीकः-अवयवः ।

न चैकस्मिन्मया सद्यः श्वासं रुद्ध्वा विपादिते । प्राक् पश्चाच्च तुलाभेदः सदसज्जीवभूरभूत् ॥४६॥
गुरुरूचेऽथ नीरन्ध्रकुम्भिकान्तर्यदा नरः । शङ्खं वादयते शब्दः स बहिः श्रूयते कथम् ? ॥४७॥
अभिघात्याभिघातित्वे तस्मिँश्चाव्यभिचारिणी । न मूर्त्तत्वं विना तस्माद् द्रव्यस्कन्धात्मको ध्वनिः ॥४८॥
सौक्ष्म्यान्मूर्त्तोऽपि तच्छब्दः कुम्भीमध्याद्विनिःसरन् । अमूर्त्तस्यास्य जीवस्य सन्देहं न भिनत्ति किम् ? ॥४९॥
पिष्टस्यारणिकाष्ठस्य चूर्णे वह्निर्न वीक्षितः । स चास्त्येव यथा तत्र जीवोऽप्येवं विचिन्त्यताम् ॥५०॥
दृतौ च वायुना पूर्णे नाऽपूर्णेऽपि च भिद्यते । तुला तथैव जीवेऽपि नृप ! किं न विमृश्यते ॥५१॥
इत्थं [1]विवर्त्तसूक्ष्माणां मूर्त्तानां विविधा गतिः । अमूर्त्तस्य स्वभावेन तद्वक्तव्यं किमात्मनः ॥५२॥
शक्तं सूक्ष्मं चिदात्मानमात्मानं कर्मवर्मितम् । निश्चित्येति महाराज ! कुरु धर्ममनातुरः ॥५३॥
क्रमागतामपि क्ष्माप ! त्यज नास्तिकतामतिम् । किं दरिद्रतया श्रेयः ? श्रियं संश्रय सन्मुखीम् ॥५४॥
निद्रां मुक्त्वाऽथ मिथ्यात्वमयीं बोधोदयादयम् । धर्मगुरोः प्रसादेन [2]द्वादशात्मानमाप सः ॥५५॥
राजा दृढव्रतो धर्मं पालयन् गृहमेधिनाम् । चिराद्वैराग्यमापैष विषयेषु विषेष्विव ॥५६॥
**सूर्यकान्ता** तु तद्भार्या पुरुषान्तररागिणी । ददौ विषं विरक्ताऽस्मै किल पौषधपारणे ॥५७॥
ज्ञात्वापि वेदनार्त्तस्तत्त्राऽद्विष्टमनोगतिः । कृतपञ्चनमस्कारः स्वयमारोपितव्रतः ॥५८॥
स्मृत्वा हृदि गुरोः पादानादाय स्वधिया धृतिम् । **सौधर्म**कल्पे **सूर्याभ**विमाने विबुधोऽभवत् ॥५९॥ युग्मम् ॥
देवः स [१]एष **सूर्याभ**श्चतुष्पल्योपमस्थितिः । ततश्च्युतो **विदेहे**षु सिद्धिं यास्यति शुद्धधीः ॥६०॥

**इति केशि-प्रदेशिकथानकम् ॥**

एतदेवाह–

**नरयगइगमणपडिहत्थए कए तह पएसिणा रन्ना ।**
**अमरविमाणं पत्तं, तं आयरियप्पभावेणं ॥१०३॥**

**नरकगतिगमनपरिहस्थके** देशीवचनात् अधोगतिप्रस्थानदक्षे **कृते** निर्वर्त्तिते कर्मणीति गम्यं **तथा प्रदेशिना राज्ञा अमरविमानं प्राप्तं तदाचार्यप्रभावेन** गुरुप्रसादेनेति ॥१०३॥

तदेवं गुरुराराधनीय एवेत्युक्तम् । अथ गुरुणाऽपि शिष्यः सम्यगनुशासनीय इत्याह–

**धम्ममइएहिं अइसुंदरेहिं कारणगुणोवणीएहिं ।**
**पल्हायंतो व्व मणं, सीसं चोएइ आयरिओ ॥१०४॥**

**धर्ममयै**र्निरवद्यत्वात् [२]धर्मनिर्वृत्तैर्वचनैरिति विशेष्यं गम्यं तथा **अतिसुन्दरै**र्वाक्यदोषरहितैस्तथा **कारणं** स्वस्य भणनप्रयोजनं हितत्वादि **गुणाः** शिष्यमाणस्य ज्ञानभाजनतादयः, ताभ्या**मुपनीतै**रुपढौकितैः शिष्य–

---

१. एव - KH, B । २. निवृत्तै....B, KH, P, C ।

टि. 1. विवर्त्तः–विकारः तेन हेतुभूतेन सूक्ष्मः तेषाम् । 2. द्वादशात्मा–सूर्यः, भावप्रधाननिर्देशत्वात् सूर्यत्वमाप इत्यर्थः ।

प्रतीतावारोपितैः **प्रह्लादयन्निव मनो** मनस्विनोऽपीति गम्यं, प्रशब्दस्य ह्लादनं प्रति प्रकर्षवाचित्वात् सत्य-वचनैरिति ज्ञेयं, ह्लादमात्रस्याऽसत्यैरपि वाक्यैः सम्भवात् । यतः —

**"सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम् ।**
**प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः"** ॥१॥ [ ] इति ॥१०४॥

येन च प्राणात्ययेऽपि प्रियमप्यसत्यं नोक्तम् , तं दृष्टान्तद्वारेण उपदिदिक्षुराह—

**जीयं काऊण पणं, तुरुमिणिदत्तस्स कालियज्जेण ।**
**अवि य सरीरं चत्तं, न य भणियमहम्मसंजुत्तं ॥१०५॥**

**जीवं** जीवितं प्राणधारणं तम्, **कृत्वा पणं** मूल्यं प्राणितमपि व्ययनीयं विधायेत्यर्थः । **तुरमिण्यां दत्तस्य** राज्ञः पुर इति गम्यते, **कालिकाचार्येण शरीरमपि त्यक्तं च**शब्दात् स्वाभिप्रायेण, न पुनस्त्यक्तमेव, **न च भणितमधर्मसंयुक्तं** पापसम्बद्धं वाक्यमितिशेषः इत्यक्षरार्थः ॥१०५॥ अथ कथा—

## [ कालिकाचार्यकथानकम् ॥ ]

**तुरमिण्यां** पुरि ख्यातः **कालिको**ऽभूद् द्विजोत्तमः । **भद्रा** सहोदरी तस्य स्वस्रीयो **दत्त** इत्यभूत् ॥१॥
**कालिकाख्यः** स सम्बुध्य वैराग्याद् व्रतमग्रहीत् । शास्तारं तं विना जज्ञे दत्तोऽत्यन्तं निरर्गलः ॥२॥
द्यूतमद्यप्रसक्तोऽसौ बहिर्ब्राह्मण्यतः स्थितः । अविचारश्च्युताचारोऽनैषीद्धर्ममधर्मताम् ॥३॥
पुरि तत्रैव दुर्दैवात् **जितशत्रु**महीपतेः । करुणाकणदुष्कालः सेवामेवाऽऽतनोदसौ ॥४॥
प्रापितः स प्रधानत्वमनीतिज्ञेन भूभुजा । पापस्तमेव निर्वास्य स्वयं राजा बभूव सः ॥५॥
दुर्वृत्तः प्लवगव्यालव्याघ्रमार्जारवह्निवत् । नोपकारैरपि ग्राह्यस्तद्वर्ज्यः प्रथमं बुधैः ॥६॥
**ये कुलाचारतो भ्रष्टाः परलोकादभीरवः । तेषां कुर्वीत विश्वासं न कथञ्चन पापिनाम्** ॥७॥
दत्त आदत्त राज्यं तत् [1]प्रकृतीनां विभेदतः । स निलीय स्थितः क्वापि पापिनोऽस्य भिया नृपः ॥८॥
राजचक्रं स चाक्रम्य [१][2]दुर्दुरूटोऽतिकूटधीः । अविनीतः प्रकृत्याऽभूत् प्रकृतिद्वेषभाजनम् ॥९॥
चक्रे पशुवधप्रीत्या मखानेष निरन्तरम् । तथैव हर्षस्तस्याऽभूत् यथा पश्यति शोणितम् ॥१०॥
तत्राऽऽगात् **कालिका**चार्यः श्रुतोपनिषदांनिधिः । **भद्रा**नुरोधतस्तस्य निकटे कटुधीर्ययौ ॥११॥
तेन यज्ञफलं पृष्टो गुरुरादिष्टवानथ । धर्मात् त्रिविष्टपप्राप्तिरधर्मान्नरको ध्रुवः ॥१२॥
तद्भूयोऽप्यनुयुक्तोऽथ श्रुतज्ञानोपयोगतः । आदिदेश [3]संदेशस्थो नरकस्तव तत्फलम् ॥१३॥
प्रवेक्ष्यति यदाऽकस्माद् विष्टालेशस्तवानने । श्वानकुम्भ्यां तदा पाका[4]न्निष्ठा ते सप्तमे दिने ॥१४॥
अथाऽऽह कुपितो मृत्युः स्यान्मातुल ! कुतस्तव । स्वेच्छयाऽहं व्रतं कृत्वा स्वर्यास्यामीति सोऽवदत् ॥१५॥
मुक्त्वा तस्याऽन्तिके योधान् सौधान्तस्थः स दुर्मतिः । सहाऽह्ना तेन सप्ताहमतिक्रम्याऽथ निर्ययौ ॥१६॥

---

१. दुर्दरूढो-P दुर्दरूढो-A, D, H मुर्द्धरूढो-C दुर्द्धरोप्यति-L ।

टि. 1. प्रजानाम् । 2. दुर्दुरूटः-नास्तिकः । 3. सदेशस्थः-समीपस्थः । 4. निष्ठा-अन्तः ।

तद्विरक्तैस्तदा भूपैर्जितशत्रुर्महानृपः । आनीय प्रगुणीचक्रे छन्नः सन्नद्धसाधनैः ॥१७॥

रक्ष्यमाणेषु मार्गेषु देवद्रीचा[1]ऽत्र केनचित् । उत्सृज्योत्सर्ग औत्सुक्यान्निर्माल्यैश्छादितो द्रुतम् ॥१८॥

तत्रैव दैवदुर्योगादश्वारूढस्य भूभुजः । वेगादश्वखुरोत्खातो विड्लेशो वदनेऽविशत् ॥१९॥

स तेन प्रत्ययेनाथ प्रत्यग्व्यावृत्त्य पार्थिवः । यावत्प्रासादमायाति तावद् बद्धः स मन्त्रिभिः ॥२०॥

भूयोऽप्याविरभूत्तत्र **जितशत्रु**र्नरेश्वरः । स श्वानकुम्भिकामध्ये निधायाऽपच्यताऽधमः ॥२१॥

तन्मुक्ताः **कालिका**चार्यं परितस्ते पदातयः । प्रणेशुरथ राजन्यैराचार्यः पर्यपूज्यत[१] ॥२२॥

**इति कालिकाचार्यकथानकम् ॥**

विपर्यस्तोपदेशे दोषमाह—

**फुडपागडमकहेंतो, जहाट्ठियं बोहिलाभमुवहणइ ।**
**जह भगवओ विसालो, जरमरणमहोयही आसि ॥१०६॥**

**स्फुटं** शब्दतः **प्रकट**मर्थतः तथाविधं **स्फुटप्रकटमकथयन् यथास्थितं** सत्यं धर्ममिति गम्यते, स **बोधिलाभं** प्रेत्य जिनधर्मावाप्ति**मुपहन्ति** नाशयति, **यथा भगवतो वीरस्य विशालो** विस्तीर्णो **जरामरणमहोदधिः** संसारसमुद्र **आसीत्** तस्य तदात्मकत्वात् ॥१०६॥

एतच्च श्री**महावीरदेवचरित**प्रस्तावे **मरीचि**भवे **कपिलं** प्रति '**कविला इत्थं पि इहयं पि**' इत्यत्रोक्तमेव तन्मूलं हि भगवान् संसारं भ्रान्तः । तथा च सति—

धर्मः सत्त्वं व्रतं काष्ठा सर्वं वाचि प्रतिष्ठितम् । सैव वाक् वितथा यस्य प्रतिष्ठा तस्य कीदृशी ॥१॥

गोचरीकृत्य कामार्थौ मायी धर्मेण शुध्यति । धर्मं तु गोचरीकृत्य मायिनो हाऽधमाऽधमाः ॥२॥

स्त्री-भ्रूण-ब्रह्म-गोघातपातकेभ्योऽतिदुस्तरम् । वैतथ्यं धर्मवाक्यानामभ्यधुः पातकं महत् ॥३॥

श्रुत्वा जगद्गुरोरब्धिकोटिकोटिमितं भवम् । प्रज्ञापयन्ति ये मिथ्या तेषामहह धृष्टता ॥४॥

अर्हन्**वीरो** जगज्जैत्रवीर्यो वज्रिभिरर्च्चितः । मिथ्यावादार्ज्जिताः सेहे गोपालादिकदर्थनाः ॥५॥

इति ये तु स्वल्पभवभ्रमास्ते व्रतान्न चलन्तीत्याह—

**कारुण्णरुण्णसिंगारभाव-भयजीवियंतकरणेहिं ।**
**साहू अवि य मरंति, न य नियमधुरं विराहंति ॥१०७॥**

**कारुण्यं** करुणोत्पादनं **रुदितं** च परिदेवितं **शृङ्गारभावाः** कामोद्दीपका योषितां लीलादयो **भयं** राजादेस्त्रासः तैः, **जीवितान्तकरणं** प्राणप्रहाणं, कारुण्यादिभिर्जीवितान्तःकरणं, तैरनुकूलप्रतिकूलोपसर्गैर्हेतुभूतैरपि **साधवोऽपि चे**त्यभ्युच्चये, **म्रियन्ते न च** नैव **नियमधुरां** व्रतभारं **विराधयन्ती**ति पठन्ति च 'न य नियनियमं विराहंति' त्ति सुगमम् ॥१०७॥

---

१. पूयतेः-C पूजित - K।

टि. 1. देवद्र्यङ्-देवार्चकः, तेन ।

अथैवंविधेषु मुनिषु प्रमादोऽपि व्रतफल इत्याह—

**अप्पहियमायरंतो, अणुमोयंतो वि सुग्गइं लहइ ।**
**रहकार दाणअणुमोयगो मिगो जह य बलदेवो ॥१०८॥**

**आत्महितं** स्वपथ्यं तपःसंयमादिकं, तथाविधपात्रप्राप्त्या तं प्रति दानबहुमानादिकं च **आचरन्न नुमोदयंश्च** चेतसा तथा समर्थयंश्च **सुगतिं** स्वर्गादिकां **लभते** । क इव **रथकारस्तद्दानाऽनुमोदको मृगो** हरिणो **बलदेवश्च यथा** सुगतिं लब्धवन्तश्चशब्दस्य व्यवहितसम्बन्धादित्यक्षरार्थः ॥१०८॥ भावार्थाय कथानकं यथा—

## [ बलदेवकथानकम् ॥ ]

श्री**नेमि**च[१]रणोद्दिष्टचरणं शरणं श्रितान् । विना **द्वैपायन**प्लुष्टे पुरि [1]**हरिपुरी**जने ॥१॥
**जरासुत**शरार्त्या च परलोकं गते **हरौ** । एत्य **सिद्धार्थ**देवेन सम्मोहं त्याजितो **बलः** ॥२॥ युग्मम् ॥
उवाच ब्रूहि **सिद्धार्थ** ! किं मे सम्प्रति साम्प्रतम् । **सिद्धार्थ** ऊचे जैनेन्द्रं वचः स्मर कुरु व्रतम् ॥३॥
**हरेः** कलेवरं स्कन्धात् षण्मासान्तेऽवतार्य सः । **सिद्धार्थेन** समं सिन्धोः सङ्गमे तदपूजयत् ॥४॥
तदा चागतमानर्च चारणर्षिं मुदा बलः । न कस्याञ्चिद्दशायां हि तादृशानां व्यतिक्रमः ॥५॥
कालोचिता[२][2]समासीनस्तमुपासीनमन्तिके । स खेचरमुनिर्वाचमवोचत हलायुधम् ॥६॥
श्रीजिनादेशतो देशाज्जगती[3]मल्ल[३]पल्लवात् । बान्धवाऽऽधिविमुग्धस्य तव बोधार्थमागतः ॥७॥
तं दृष्ट्वा **नेमि**नादिष्टं नवशोको[४]ऽरुदद् **बलः** । **इष्टे दृष्टे[५] हि सन्दीप्य शुचः शाम्यन्ति देहिनाम्** ॥८॥
मनः शून्यं दिशः शून्याः सर्वं शून्यं त्वया विना । हा वत्स ! वत्सल ! क्वाऽसि देहि प्रतिवचो मम ॥९॥
राज्यभोगेऽत्युदारस्त्वं बद्धमुष्टिस्तथाऽऽहवे । दायादं मां तु तत्राऽपि सन्त्यज्याऽद्य गतोऽसि किम् ॥१०॥
सर्वास्त्रप्रियशिष्येण बन्धूनां शल्यहारिणा । त्वया विरहितो नाऽद्य वत्स ! जीवितुमुत्सहे ॥११॥
सन्देशदेशनावाक्यसुधाभिस्त्रिजगद्गुरोः । मुनिर्निर्वापयन् दुःखदवं **यादव**मब्रवीत् ॥१२॥
संसारेऽत्र श्रियः कामा बन्धुसङ्गम उत्सवाः । **सर्वं सरसमापाते विपाके विरसं पुनः** ॥१३॥
श्रीशालिशलभैर्जीवमकरन्दमधुव्रतैः । को नार्दितो वपुर्दंशैः दुर्विधेः शासनाक्षरैः ॥१४॥
जरा लुनाति लावण्यं तारुण्योद्यानतस्करी । कालः कपिरिवादत्ते देहिनां जीवितं फलम् ॥१५॥
न विघ्नो व्यसनं वैरं हेतुः कश्चिदथापरः । दृष्ट्वा तूत्कृष्टमुत्कृष्टं हन्त हन्त्येष दुर्विधिः ॥१६॥
[4]प्रत्यादत्ते य[६]दाऽर्थानामनित्यत्वमनित्यता । तदा रज्येत को मुक्त्यै विरज्येत भवाच्च कः ॥१७॥
विधेः सिद्धविधेयार्थलक्षणा भवितव्यता । लिपिरेखेव भालस्था दृष्टा केनात्मनो दृशा ॥१८॥
अनन्तैः पुद्गलावर्त्तैर्लीढैः किल रसायनैः । कालः कवलयत्येष बाल एवाखिलं जगत् ॥१९॥
सदसत्कुर्वतः सर्वं पर्यायाणां विपर्ययात् । महामायेन्द्रजालस्य पश्य कालस्य कौतुकम् ॥२०॥

---

१. रणोद्दिष्टचरणौ- B, रणौविष्टचरणौ - C, रणौद्दिष्टचरणौ - P । २. तासनासी - L, D, C, B, K । ३. पल्लवात् - A, KH । ४. ऽवदः - P । ५. दृसे - P । ६. यथार्था - D, K ।

टि. 1. द्वारिकापुरी तस्या जनः तस्मिन् । 2. आसः-आसनम्, तम् । 3. मल्लः-देशविशेषः । 4. यदा अर्था अनित्यता अनित्यत्वं प्रत्यादत्ते, अर्थाः नित्याः स्युः इत्यर्थः ।

[१]सम्पत्त्यै च विपत्त्यै च कालः [२][1]कालयति प्रजाः । [2]मृषा हर्षविषादाभ्यां परः परवशो जनः ॥२१॥
येन **कंस-जरा[३]सन्ध-शिशुपालादयो** हताः । तदन्तकोऽपि तेनैव हतः कालेन तेऽनुजः ॥२२॥
**प्रायः परोपदेशेषु पुरुषः पण्डितो न कः ? । स सुधीः परवत् पूर्वमात्मानमनुशास्ति यः** ॥२३॥
यद्दुर्विपाकदृष्टान्ताद्बोध्याः [3]पञ्चजनाः परे । तस्य स्वयं न चेद्बोधः कोऽधमस्तत्समस्ततः ॥२४॥
शोच्यं शोचतु नामासौ यः परेण न शोच्यते । शोचत्यासन्ननाशोऽपि सेयमन्धपरम्परा ॥२५॥
स्वजने मृत्युना छिन्ने क्लीबस्यैवोचिताः शुचः । धर्म्माऽभ्यासेन धीरस्तु [4]तद्वधायैव धावति ॥२६॥
अर्हद्धर्मसुधाकुण्डे स्नातो जातोऽसि पावनः । मा विषादमिषादस्य [5]निषादस्य वशो भव ॥२७॥
कर्माष्टव्यालकुल[४]भूर्नाममन्त्रेऽपि **नेमिनः** । त्वां विषादविषावेगो बाधते [५]साधु ते न तत् ॥२८॥
देवस्ते जिन एवास्तु गुरुश्चात्र जगद्गुरुः । क्षान्त्यादिर्दशधाभिन्नः सम्यग्धर्मोऽपि निर्मलः ॥२९॥
कृतशोकविरामश्च परामर्शेन तद्गिराम् । चारणर्षिगिरा **रामः** संयमारामतामधात् ॥३०॥
अथ तस्मिन् मुनौ याते **तुङ्गिकाशिखरं** गतः । **सिद्धार्थ**कृतसान्निध्यस्तीव्रं तेपे हली तपः ॥३१॥
रामः पुरे विशन् क्वापि कदाचिन्मासपारणे । कूपकण्ठस्थयाऽदर्शि स्त्रिया सार्भकयैकया ॥३२॥
**बलं** विलोकयन्त्याथ रूपमोहितया तया । स्थाने कुम्भस्य डिम्भस्य गले रज्जुरबध्यत ॥३३॥
तं कूपे क्षेप्तुकामेयं रामेण स्वयमैक्षि च । अचिन्ति चेदं धिग् धिग् मे रूपं पापनिबन्धनम् ॥३४॥
प्रवेक्ष्यामि क्वचिन्नाऽतः परं जातु पुरादिषु । भिक्षया पारयिष्यामि दारुहारिजनाद्वने ॥३५॥
प्रबोध्याऽथ पुरन्ध्रीं तां पुरं त्यक्त्वा वनं गतः । मासिकाद्यं तपः सीरी सुदुस्तपमतप्त च ॥३६॥
काष्ठादिहारिभिर्दत्तैः प्रासुकैरन्नपानकैः । स चकार तपोवृद्ध्यै पारणं प्राणधारणम् ॥३७॥
आचख्युस्तेऽपि काष्ठादिहृतः स्वस्वमहीभृताम् । कश्चिन्नरश्चरन्नस्ति तपोऽरण्ये सुरोपमः ॥३८॥
तेऽपि भूपतयो दध्युः कोऽप्ययं तप्यते तपः । मन्त्रं जपति वाऽस्माकमाकाङ्क्षन् पदसम्पदम् ॥३९॥
तद् वध्योऽयं तपःसिद्धेरर्वागित्यथ ते नृपाः । चमूभिर्युगपज्जग्मुः समीपं सीरिणो मुनेः ॥४०॥
नित्यं सन्निहितस्तस्य **सिद्धार्थ**स्त्रिदशस्तदा । पार्श्वे सहस्रशः सिंहान् विचकार भयङ्करान् ॥४१॥
[6]यथागतमथाऽगुस्ते भीत्वा नत्वा महामुनिम् । **नृसिंह** इति च ख्यातिधाम **राम**स्तदाद्यभूत् ॥४२॥
तपस्यतो वने तस्य मुनेर्धर्मोपदेशतः । व्याघ्रसिंहादयः शान्तिमासदन् वासनाभृतः ॥४३॥
श्राद्धतामाश्रयन् केऽपि भेजुर्भद्रकतां परे । इतरे प्रतिमां प्रापुरन्येऽप्यनशनं दधुः ॥४४॥

---

१. सम्पत्त्यैव विपत्त्यैव - B, A, H । २. कवलते भृशं - KH कलयति - K, B, D कणलयेत्प्रजाः-L कवलयष्यति - H । ३. सिन्धु - D, B, K । ४. भूतानां मन्त्रे...H, B, KH, A । ५. साधुतेनमत् - B ।

टि. 1. प्रेरयति इत्यर्थः । 2. मृषा (अव्य०) - वृथा । 3. पञ्चजनः-पञ्चभिर्भूतैर्जन्यते इति, मनुष्यः इत्यर्थः । 4. मृत्योर्वधाय इत्यर्थः । 5. निषादः - चण्डालः । 6. क्रियाविशेषणम् इदम् ।

मांसाहारमुचो धर्मरुचो निर्मत्सरा मिथः । नामी सामीप्यममुचन् मुनीन्दोस्तस्य शिष्यवत् ॥४५॥
तस्य प्राग्भवसम्बन्धी यतेर्जातिस्मरो मृगः । कोऽप्यतिक्षान्तिमापन्नः सदाऽऽसन्नचरोऽजनि ॥४६॥
आराध्याराध्य **रामर्षि**मयं बभ्राम हर्षितः । मृगो मृगयमाणोऽन्नधारिणः काष्ठहारिणः ॥४७॥
यदैक्षत तदैव द्रागेत्य ध्यानाचलं **बलम्** । भिक्षादातॄन् स पादाब्जलोलमौलिरजिज्ञपत् ॥४८॥
क्षणादभ्युज्झितध्यानरोधस्तदुपरोधतः । रामो जगाम भिक्षायै सदाग्रेसरतन्मृगः ॥४९॥
केऽप्येकदा ययुस्तत्र कान्तारे रथकारकाः । तरूनृजुतरान् सारान् शतशश्चिच्छिदुश्च ते ॥५०॥
स निरीक्ष्य कुरङ्गस्तान् सीरध्वजमजिज्ञपत् । सद्यस्तदुपरोधेन सोऽपि ध्यानमपारयत् ॥५१॥
स्थितेषु तेषु भोज्यार्थमथ मासिकपारणे । रामो भिक्षार्थमगमत् पुरोगमकुरङ्गकः ॥५२॥
तं वीक्ष्य विस्मितो दध्यावग्रणी रथकारिणाम् । अहो मुनिः कुतोऽमुत्र मरौ कल्पतरुर्यथा ॥५३॥
अहो महो[1] महोदारमहो रूपमहो शमः । ममाद्य सफलैवाऽभूदेतेनातिथिना तिथिः ॥५४॥
इति चिन्तोत्थरोमाञ्चः पञ्चाङ्गस्पृष्टभूतलः । स ननाम च **रामर्षिं** भिक्षामुपनिनाय च ॥५५॥
रामोऽपि दध्यौ श्राद्धोऽयमहो शुद्धाशयो महान् । भिक्षां दित्सति मे नाकफलकर्मनिबन्धनम् ॥५६॥
इति ध्यायन् सुधासिन्धुर्विश्वबन्धुरसौ बलः । स शरीरनिरीहोऽपि महर्षिर्भैक्ष्यमाददे ॥५७॥
ऊर्ध्वाननः पुनर्बाष्पप्लुतदृग्युगलो मृगः । रामं च रथकारं च निध्यायन् ध्यातवानिति ॥५८॥
अहो महर्षेः कारुण्यमहो पुण्यं वनच्छिदः । यदेषोऽङ्गाऽनपेक्षोऽपि भिक्षयाऽन्वग्रहीदमुम् ॥५९॥
नमोऽस्मै जितमेतेन पुण्यराशिर्महानयम् । भक्तात्मा भक्तपानैर्यस्तपोब्धिं पर्यलाभयत् ॥६०॥
न दीक्षाग्रहणे साधुर्[१]भिक्षादाने च न प्रभुः । एकोऽहं मन्दभाग्योऽस्मि धिङ् मां पशुतया हतम् ॥६१॥
इत्युद्भूत[२]शुभध्याना[३]ः पादपेन त्रयोऽपि ते । अर्द्धच्छिन्नेन वात्योर्मिपतितेन हता मृताः ॥६२॥
**कामपालः**[2] पालयित्वा व्रतं वर्षशतं तदा । ताभ्यां युतो ययौ **ब्रह्मलोके पद्मोत्तरालये** ॥६३॥

**इति बलदेवकथानकम्** ॥

तदित्थं सद्गोचरमनुमोदनमपि महाफलमुदाहृतम् । सम्प्रति असद्विषयस्य महाकष्टानुष्ठानस्यापि अल्पफलमाह—

**जं तं कयं पुरा पूरणेणं अइदुक्करं चिरं कालं ।**
**जइ तं दयावरो इह, करेंतो तो सफलयं हुंतं ॥१०९॥**

**यत्तत् कृतं** कष्टानुष्ठानमिति शेषः, **पुरा** पूर्वं **पूरण**नाम्ना श्रेष्ठिना **अतिदुष्करं चिरं कालं यदि तद्दयापरः** सन्निह श्रीवीतरागशासनस्थितो**ऽकरिष्यत्ततः सफलमभविष्यत्** मोक्षादिसाधकं सम्पद्येत इति ॥१०९॥

---

१. साधोर्भि - B, A, साधुभि - P । २. इत्यद्भुत....B, D, P, K, L । ३. ध्यानात् - KH ।

टि. 1. महस्-तेजः । 2. कामपालः-बलदेवः ।

**पूरण**कथा अधः श्री**महावीर**चरिते **चमरो**त्पातप्रस्तावे उक्तैव ।

श्रीसर्वज्ञशासनस्थस्तु कारणादपवादपरोऽपि यतनापर आराधक एवेत्याह—

**कारणनीयावासे, सुट्ठुयरं उज्जमेण जइयव्वं ।**
**जह ते संगमथेरा, सपाडिहेरा तया आसि ॥११०॥**

**कारणेन** असमयजङ्घाबलविरहविहारयोग्यक्षेत्राभावादिना, **नित्यवासे** विभज्य नवधा क्षेत्रं, **सुष्ठुतर**-मतिशयेन**ोद्यमेन यतितव्यं** यतना कार्या, **यथा** एवं कुर्वन्त**स्ते सङ्गमस्थविरा** नाम आचार्याः **सप्रातिहार्या** देवतासम्पाद्यातिशयभाजस्**तदासन्**निति ॥११०॥ अथ **सङ्गमस्थविराचार्यकथा** चेयम् । तथाहि—

**[ सङ्गमस्थविराचार्यकथानकम् ॥ ]**

पुरे कदाचित् **कोल्लाके** वृद्धाः **सङ्गम**सूरयः । दुर्वर्षे व्यसृजन् [१]गच्छमन्यतः श्रुतसूरयः ॥१॥
विभज्य नवधा क्षेत्रं स्वयं तत्रैव तु स्थिताः । तपोमाहात्म्यतस्तेषां सान्निध्यं देवताऽकरोत् ॥२॥
गच्छेन प्रेषितोऽन्येद्युस्तदुदन्तगवेषकः । क्रमात्तत्रैव शय्यायामेत्य **दत्तो**ऽनमद् गुरुम् ॥३॥
**दत्तेन** चिन्तितं चित्ते यतनां वसतेरपि । न करोत्येष तन्नून[1]मवसन्नोऽभवद् गुरुः ॥४॥
मूढश्चित्ते विकल्प्येति पापसङ्कल्पसङ्कुलः । अनात्मज्ञो मुनिमन्यस्तस्थौ पृथगुपाश्रये ॥५॥
अन्विष्य गुरुणाऽऽकार्याऽटितुं नीतः सहात्मना । पुरे भिक्षामनासाद्य सङ्क्लिष्टोऽज्ञायि सूरिभिः ॥६॥
अथ कस्यचिदिभ्यस्य भवनेऽभ्येत्य सूरिभिः । बालको रेवतीग्रस्तो मा रोदीरित्यभाष्यत ॥७॥
बाले मुक्तेऽथ रेवत्या विरते रुदिताद् गुरुः । तन्मात्रा मोदकान् दत्तान् **दत्ता**यैवाऽऽर्प्पयन् मुदे ॥८॥
तं प्रेष्योपाश्रये सूरिर्भिक्षां माधुकरीं स्वयम् । प्रान्तामपि समादायाऽपारयद्वसतौ गतः ॥९॥
सायमावश्यकेऽवोचदालोचनविधौ गुरुः । वत्स ! त्वं सम्यगालोच्य प्रतिक्रमणमातनु ॥१०॥
किमसम्यगिहास्तीति दत्तेनोक्ते जगौ गुरुः । धात्रीचिकित्सयोः पिण्डो भुक्तोऽद्याऽऽलोच्यतां स तत् ॥११॥
दत्तः प्रत्याह तुच्छेषु कुलेषु भ्रमितः पुरा । भिक्षां प्राप्याऽथ भुक्ते च दोष आरोपितो मयि ॥१२॥
अहो मयि महान् स्नेहो मम नेहोचिता स्थितिः । एकाक्यैव गुरुः स्थित्वा नान्यं संसहतेऽधुना ॥१३॥ युग्मम्॥
आसित्वाऽस्मिन् प्रतिक्रान्ते गतेऽथ निजमाश्रयम् । विचक्रेऽन्धतमो घोरं देवी सन्निहिता गुरोः ॥१४॥
रक्षांसीवाथ [2]पाथोदा वात्याऽऽवर्त्तविवर्त्तिनः । [3]करकासायकासारं ववृषुस्तदुपाश्रये ॥१५॥
भीतोऽथ दत्तः पूत्कुर्वन्नाहूतो गुरुणाऽवदत् । कथं नश्यामि पश्यामि न किञ्चित्करवाणि किम् ? ॥१६॥
प्रदीप्याऽथ कराऽऽमर्शान्निजामेवाङ्गुलीं गुरुः । आलोकेनाऽमुना वत्साऽऽगच्छेत्याहूतवानयम् ॥१७॥
क्षुद्रः शठश्च किं सूरेर्दीपोऽप्यस्तीति चिन्तयन् । गुरुमूलं गतः साक्षाद् देव्याऽशास्यत स स्वयम् ॥१८॥
चित्ते [२]तवेयमतिदुर्मतिरीदृशी धिक्, मीमांसितुं तव गुरून्ननु कोऽधिकारः ? ।
हित्वा गुरोर्गुणगणा न गुणेषु लीनः; साक्षात् [4]कुलीन इति संविदितोऽसि सत्यम् ॥१९॥ [वसन्ततिलकावृत्तम्]

---

१. वर्षम... P । २. बलेय – A बतेय – H, D, K, छतेय – L, B चतेय – KH, P ।

टि. 1. अवसन्नः-शिथिलः । 2. मेघाः । 3. करका(स्त्री) मेघोपलः, स एव सायकः बाणः, तस्याऽऽसारो वेगवान् वर्षः, तम् इत्यर्थः । 4. कुत्सिते लीनः कुलीनः इत्यर्थः ।

**दत्तो** भयादथ रयात् प्रणिपत्य सूरीन् , ऊरीचकार चरणौ शरणं तदीयौ ।
इत्थं सदाचरणजङ्गमकल्पवृक्षः; श्री**सङ्गमस्थविरसूरि**रिति प्रसिद्धः ॥२०॥ [वसन्ततिलकावृत्तम्]

**इति सङ्गमस्थविराचार्यकथानकम् ॥**

एतच्च प्राक् '**वूढावासे वि ठिअं**' इत्यादि गाथायामनूदितमेवेति । तदित्थं कारणे नित्यवासमनुज्ञाय विपर्यये दोषमाह–

**एगंतनिअयवासी, घरसरणाईसु जइ ममत्तं पि ।**
**कह न पडिहिंति कलिकलुसरोसदोसाण आवाए ॥१११॥**

**एकान्तनियतवासिनो** निष्कारणं सर्वदा एकत्र वसनशीलाः तथा **गृहशरणादिषु** गृहं सदनं, शरणं तदेकदेशः 'कूण'[1] (खूणो) इति प्रसिद्धः, आदिशब्दात् तदनुगामिनां धनस्वजनादीनां ग्रहः, तेषु नित्यवासादास्तां स्वीकारो **यदि ममत्वमपि** ममीभावमपि ममेति निपातो मूर्च्छाकृतपरिग्रहस्वीकारवाची । तच्चेन्ममत्वं करिष्यन्तीत्यध्याहार्यम् । ततः **कथं न पतिष्यन्ति कलिकलुषरोषदोषाणामापाते** मीलके[2]ऽपि तु पतिष्यन्त्येव । तत्र कलिः-कलहः, कलुषं-कर्मबन्धजनितं पापं, रोषः-क्रोधः, दोषशब्देन शेषकषायाः सूच्यन्ते । भविष्यत्कालप्रयोगश्चाऽत्र उपदेष्टु**र्धर्म्मदास**गणेरपेक्षया पश्चात्कालभाविसाधूनामुपदेशार्थमिति ॥१११॥

कुत एवमित्याह–

**अविकत्तिऊण जीवे, कत्तो घरसरणगुत्तिसंठप्पं ।**
**अवि कत्तिया य तं तह, पडिया असंजयाण पहे ॥११२॥**

**अविकर्त्त्य जीवान्** षड्विधान् खननच्छेदादिना विराधनामकृत्वा, **कुतो गृह-शरणगुप्ति** अगार-तदेकदेशानां गुप्तिः पालनं वृतिप्राकारादिना, तत् **संस्थाप्यं** प्रतिविधेयम् ? अतो**ऽपि** सम्भाव्यते-एतत् **कर्त्तित्वा** छित्त्वा स्वयं **च**शब्दात्परेण कर्त्तयित्वा च, **तं** जीवषड्वर्गं, **तथा पतिता असंयतानां पथि** मार्गे, तया वृत्त्या वे[3]षस्याऽकिञ्चित्करत्वादिति ॥११२॥

आस्तां गृहस्थवद् वृत्तिर्गृहस्थसम्बन्धमात्रमपि यतेर्दोषायैवेत्याह–

**थेवोऽवि गिहिपसंगो जइणो सुद्धस्स पंकमावहइ ।**
**जह सो वारत्तरिसी, हसिओ पज्जोयनरवइणा ॥११३॥**

**स्तोकोऽपि गृहिप्रसङ्गो** गृहस्थसंसर्गो, **यतेः शुद्धस्य** मुनेर्निर्मलस्य, **पङ्कं** मलम्, **आवहति** प्रापयति, **यथा स वारत्तऋषिर्हसितः प्रद्योतनरपतिना** गृहस्थसंसर्गोत्थमालिन्यतः । तथाऽन्योऽपि हस्यत इत्युपनयः ॥११३॥ **वारत्तर्षिकथा** चैवम्–

**[ वारत्तर्षिकथानकम् ॥ ]**

दधार **धारिणी**जानिश्चम्पायां राज्यसम्पदम् । नृपतिर्नामधामभ्यां **मित्रप्रभ** इति श्रुतः ॥१॥

---

१. क्षण - A, K, P, C, H । २. नीलके - C, A, B मेलके - L । ३. शेषस्या...D, K वेषः स्यात् - P ।

तत्रास्ति **धनमित्राख्यः** सार्थेशो राजवल्लभः । **धनश्री**कुक्षिभूस्तस्य **सुजातो**ऽजनि नन्दनः ॥२॥
योषिल्लोचनलेह्याऽङ्गलावण्यललिताकृतिः । स सौभाग्य[१]सुधा[1]गङ्गासञ्जातः कस्य न प्रियः ॥३॥
वेषभूषास्मितोल्लापकलालीलादिचेष्टितम् । यदासीत्तस्य तत्कस्य नोपजीव्यं तदाऽजनि ॥४॥
मन्त्रिणो **धर्मघोष**स्याऽन्येद्युरन्तःपुरं महत् । **प्रियङ्गुमञ्जरी**मुख्यं यातमैक्षत तं पथि ॥५॥
दध्युस्तास्तं विलोक्याऽपि धन्यंमन्या वयं किल । भोक्ता यस्यास्त्वयं तस्याः सौभाग्योपरि मञ्जरी ॥६॥
**प्रियङ्गुमञ्जरी** कृत्वा तद्वेषामन्यदा रहः । सर्वाः सपत्न्यस्तल्लीलाविनोदैररमन्त ताः ॥७॥
दध्यौ स **धर्मघोष**स्तद्वीक्ष्य छन्नं तदिङ्गितम् । सर्वाः शङ्के दुराचारास्तेनोच्छिष्टाः कृता इमाः ॥८॥
एतद्वधाय निध्याय कृतोपायः स [२]कूटधीः । गुप्तान् कृत्वा द्विषद्दूतान् कृत्रिमांस्तानधारयत् ॥९॥
अवाचयच्च तल्लेखानेकान्ते नृपतेः पुरः । **मित्रप्रभः सुजाते**न घात्यो राज्याऽर्द्धहारिणा ॥१०॥
राजा बुद्ध्वेति लेखार्थं साक्षाद्दुष्कीर्तिभीतितः । निश्चिकाय किलोपायं **सुजात**स्य वधे रहः ॥११॥
**सुजात**मन्यदाऽऽकार्य कार्यस्य किल कस्यचित् । समर्प्य लेखमप्रैषीच्च**चन्द्रध्व**जनृपान्तिकम् ॥१२॥
प्रत्यन्तनगरे राज्ञस्तस्यै**वारुष्करा**भिधे । **सुजातः** क्रमतो गत्वाऽपश्यच्च**चन्द्रध्वजं** नृपम् ॥१३॥
अपि ग्राहितसङ्केतस्तं हन्तुं भूभुजा [३]पुरा । दृष्ट्वा **चन्द्रध्वज**स्त्वेनमत्यन्तं प्रीणितोऽन्तरा ॥१४॥
नृपः प्रज्ञाप्य वृत्तान्तमेकान्ते गुप्तमेव तम् । स्वीयस्वसुः प्रदानेन कृतार्थमकरोत्ततः ॥१५॥
पत्न्या **चन्द्रयशो**नाम्न्या तया सह नवोढया । त्वग्दोषिण्या वसन् जज्ञे सोऽपि त्वग्दोषदूषितः ॥१६॥
सा धर्मे बोधिता तेन रत्नत्रयपवित्रिते । दध्यौ धिक् कर्ममर्माणि मद्दोषादेव दूषितः ॥१७॥
अथ साऽनशनं भेजे तमनुज्ञाप्य वल्लभम् । आराधनाविधिं शुद्धां [2]सविधे स व्यधापयत् ॥१८॥
साऽथ भूत्वा सुरः सद्योऽवधेर्बुद्ध्वाऽऽगतोऽब्रवीत् । विभूतिस्त्वदधीनाऽसौ समादिश करोमि किम् ॥१९॥
सोऽप्याह प्रकटीभूय पितृभ्यां यदि सङ्गतः । आदास्येऽहं तदा दीक्षां कामो मे पूर्यतामयम् ॥२०॥
**चम्पो**द्यानेऽथ तं नीत्वा नृपतौ कुपितोऽमरः । शीलां विकृत्य दीनेऽस्मिन् सर्वं सत्यं न्यवेदयत् ॥२१॥
ततः सुजातं सञ्जाताऽनुशयोऽभ्येत्य तद्वनम् । क्षमयित्वा गजारूढं पुरे निन्ये पुरेश्वरः ॥२२॥
**धर्मघोष**ममात्यं स स्वदेशान्निरवासयत् । शीलादि सर्वं गीर्वाणः शान्तः संहृतवानथ ॥२३॥
तमापृच्छ्य गते तत्र स्वस्थानमथ नाकिनि । नृपादनुज्ञामासाद्य सुजातो व्रतमग्रहीत् ॥२४॥
पितृभ्यां सहितः कृत्वा चारित्रमतिनिर्मलम् । केवलज्ञानमासाद्य महोदयमवाप सः ॥२५॥
**धर्मघोषः** शुचां पात्रं [४][3]पात्रटीरोऽथ भर्त्सितः । भ्रान्तदेशान्तरः श्रान्तः शान्तो निर्वेदमाप्तवान् ॥२६॥

१. मुधागंजा H सुधागुंजा - B, D, K, KH, सुधापुञ्जात् - L । २. मूढधीः P । ३. पुरः L । ४. पात्रदारोथ - C पात्रदीरथ - H पुत्रदौष्ठ - B, K, L, D ।

टि. 1. गञ्जा(स्त्री) - आकरः । 2. सविधे-समीपे । 3. पात्रटीरः- मन्त्री ।

प्राप्तो **राजगृहे** दीक्षामाप्याऽथ स्थविरान्तिके । गीतार्थो **वारदत्ता**ख्यं नगरं स क्रमादगात् ॥२७॥
तत्राऽथ काले भिक्षायाः सैषणासमितो मुनिः । जगाम धाम धन्यस्य **वारदत्तस्य** मन्त्रिणः ॥२८॥
सर्प्पिर्मधुविमिश्राच्च पायसादुपढौकितात् । बिन्दुं दृष्ट्वा च्युतं तत्र भिक्षां नैच्छन्महामुनिः ॥२९॥
गते भिक्षामनादाय सविमर्शो मुनीश्वरे । [1]मत्तवारणगो **वारदत्त**श्चित्ते व्यचिन्तयत् ॥३०॥
बिन्दुर्जातु च्युतो दातुरवद्यं[१] विद्यते[२]ऽत्र किम् । भिक्षा प्रेक्षावताऽनेन नाऽऽत्ता निर्हेतुकं न तत् ॥३१॥
ततस्तस्मिन्निपेतुश्च बिन्दौ मधुनि मक्षिकाः । [३]आजगामाऽऽजिहीर्षुस्ताः [2]कुड्यमत्स्योऽथ सस्पृहः ॥३२॥
तं प्रत्यथोपदुद्राव [3]प्रतिसूर्यशयानकः । स पश्चादोतुना दूरादेत्य द्रुतमुपद्रुतः ॥३३॥
तम[4]गारमृगोऽधावदगारान्तश्चरोऽन्तिकात् । पुप्लुवे तमभिक्रुध्यन्नध्वनीनः शुनः पुनः ॥३४॥
गृहचारभटाः श्वानप्रतिग्राहानुबन्धिनः । भग्नाः पान्थभटैर्भूयः सम्भूय बहवोऽचलन् ॥३५॥
अथैतेषां च तेषां च रोषभाजां शराशरि । खड्गाखड्गि क्रमेणा[४]ऽऽसीद् बाहूबाहवि चाऽभवत् ॥३६॥
अनीकं प्रत्यनीकानामध्वन्यानां विधूय तत् । प्रत्यायाते स्व[५][5]पादाते मन्त्रिणेति व्यतर्क्यत ॥३७॥
भिक्षात्ता हेतुनैतेन जाने नाऽनेन साधुना । अहो निपुणदृष्टत्वाद्धर्म्मस्य निरवद्यता ॥३८॥
[6]सुपर्वपर्वतोऽद्रीणां कल्पद्रुर्भूरुहां यथा । धर्मस्तथैव धर्माणां जैन एको विराजते ॥३९॥
कस्मादकस्मादस्माकमत्राभ्यस्त इवाधुना । स्वसंवेदनसिद्धेयं प्रत्यभिज्ञाऽतिवल्गति ॥४०॥
इति चिन्तावशस्वान्तः [६]शान्तः [७]श्रद्धाविशुद्धधीः । व्रतं पूर्वभवाभ्यस्तं श्रुतं चाऽस्मरदुज्ज्वलम् ॥४१॥
देवतादत्तनेपथ्यो वारदत्तमुनीश्वरः । स्वयम्बुद्धत्वमध्यास्य [८]**सुंसुमारपुरं** ययौ ॥४२॥
[९]**धुन्धुमार**नृपस्तत्र तस्या**ऽङ्गारवती** सुता । प्रव्राजिकां जिगायोच्चैर्धर्ममर्मविवादिनीम् ॥४३॥
तत्प्रद्वेषात्तया चित्रपटरूपोपढौकनात् । अनुरक्तीकृतश्चण्डप्रद्योतस्तामयाचत ॥४४॥
**धुन्धुमार**नृपः कन्यावरणार्थमुपागतम् । साक्षेपवादिनं दूतं गले धृत्वा निराकरोत् ॥४५॥
प्रद्योतः स्वयमागत्य चतुरङ्गबलान्वितः । रुषारुणोऽरुणत् क्षिप्रं सुंसुमारपुरेश्वरम् ॥४६॥
कृत्वा दुर्गबलं सोऽपि सावष्टम्भोऽल्पसाधनः । युयुत्सुरुत्सुकोऽपृच्छत् कञ्चिन्नैमित्तिकं कृती ॥४७॥
अधिवास्य निमित्तस्य देवतां सोऽपि तत्त्ववित् । खेलतः स्वेच्छया सायं त्रासयामास बालकान् ॥४८॥
आगु**र्नागा**ऽऽलये बाला रक्ष रक्षेति भाषिणः । आसीदुपाश्रये यत्र **वारदत्तमुनीश्वरः** ॥४९॥
त्रस्तास्ते बालकास्तेन मा भैष्टेत्यनुभाषिताः । तदुपश्रुत्य निश्चिक्ये भयं नेति निमित्तवित् ॥५०॥

---

१. रविद्यं L रविद्यां - D, K रविद्ये - P । २. विद्यंते - A, H चिन्त्यते - L । ३. व्याजगाम - P । ४. गैवं - P, C, KH । ५. स्वपादांते - C स्वपादानां - KH । ६. श्रान्तः - L, P, D । ७. शुद्धा - P, KH, D । ८. शुंशुमार - KH, C सिंशु... K, H, D शिंशु...B । ९. धन्धु...D, K, B, KH ।

टि. 1. मत्तवारणं गवाक्षः, तत्रस्थः इत्यर्थः । 2. कुड्यमत्स्यः-गृहोलिका, 'गरोली' इति भाषायाम् । 3. प्रतिसूर्यशयानकः-कृकलासः सरटः इति यावत्, 'काकींडो' इति भाषायाम् 4. अगारमृगः-श्वानः । 5. पादातः-पदातिः । 6. सुपर्वपर्वतः-मेरुगिरिः ।

राजाऽपि तन्मुनेस्तस्य वाक्यमादाय धर्मवित् । निःसृत्य जित्वा बद्ध्वा च प्रद्योतं प्राविशत् पुनः ॥५१॥
**धुन्धुमार**स्तमाहाऽथ निवेश्यासनि भूभुजम् । हतेन न त्वया कीर्तिर्यथाऽद्य विजितेन नः ॥५२॥
दत्ताऽ**ङ्गारवती** तुभ्यमियं प्राणप्रियाऽऽत्मजा । अद्यप्रभृति जामाता जयस्तम्भश्च मे भवान् ॥५३॥
परं यथा सपत्नीषु मानिनीयं ममात्मजा । मानोन्नतं शिरो धत्ते त्वं तथा कर्तुमर्हसि ॥५४॥
अथाऽभिमत्य तत्सर्वं परिणीय नृपात्मजाम् । पराजयं जयं मेने कृतकृत्यो महानृपः ॥५५॥
तामेकदा नृपोऽपृच्छदनेकानीकनायकः । त्वत्पित्राऽल्पबलेनाऽपि जिग्ये कस्य बलादहम् ॥५६॥
उपश्रुतौ[1] मुनेर्वाक्यं **वारदत्त**स्य तत्तया[१] । राजा विज्ञप्तमाकर्ण्य स्वयं मुनिमुपस्थितः ॥५७॥
स्मयमानाननो वाचमुवाच वरदाय ते । **वारदत्त**निमित्तज्ञमुनयेऽस्तु नमोनमः ॥५८॥
आव्रतादुपयुज्याऽथ स्मृत्वा मा भैर्गिरं च ताम् । स्वालोचित[२]प्रतिक्रान्तः शान्त[३]स्वान्तोऽतपत्तपः ॥५९॥

**इति वारत्तर्षिकथानकम् ॥**

सामान्येन गृहस्थसम्बन्धदोषमभिधाय युवतिसम्बन्धदोषमधिकृत्य विशेषमाह—

**सब्भावो वीसंभो, नेहो रइवइयरो च जुवइजणे ।**
**सयणघरसंपसारो, तवसीलवयाइं फेडेज्जा ॥११४॥**

**सद्भावो**ऽकालवसतौ विद्यमानता **विश्रम्भो** विश्वासः **स्नेहः** प्रीतिः, **रतिव्यतिकरः** शृङ्गारकथोल्लापः **च**शब्दादनुक्तेङ्गितादिग्रहः **युवतिजने** स्त्रीलोकविषये, **स्वजनगृहसम्प्रसार**स्ताभिः सह बन्धुविषयो गृहविषयश्च पर्यालोचः, एते सद्भावादयस्**तपो**ऽनशनादिकं, **शीलव्रतानि** मूलगुणान् **विनाशयेदि**ति ॥११४॥

**वारदत्तर्षि**कथासम्बद्धमेवाह—

**जोइसनिमित्तअक्खर-कोउयआएसभूइकम्मेहिं ।**
**करणाणुमोयणेहि य, साहुस्स तवक्खओ होइ ॥११५॥**

**ज्योतिषं** ग्रहगोचरं ज्ञानं, **निमित्तं** होराउपश्रुत्यादि, **अक्षराण्या**[2]लिङ्गितादीनि, केवलकादि[४]प्रसिद्धानि, **कौतुक**मौषधादिभिर्ग्रहानुकूल्यादिजनकं स्नानम्, **आदेशो** देवताद्युपदेशः । **भूतिकर्म** रक्षादिग्रहः, मन्त्राद्युपलक्षणं चैतत्, **तैर**विषये स्वयं कृतैः **कारणानुमोदनाभ्यां च** तेषां, **साधो**स्तपस्यतोऽपि **तपःक्षयो भवति** तपोविरोधित्वात्तदनुष्ठानस्येति ॥११५॥

प्रवृत्तिदोषादीषदपि तानि नासेव्यानीत्याह—

**जह जह कीरइ संगो, तह तह पसरो खणे खणे होइ ।**
**थेवो वि होइ बहुओ, न य लहइ धीइं निरुंभंतो ॥११६॥**

**यथा यथा क्रियते सङ्गो** दुरनुष्ठानैरिति गम्यते, **तथा तथा प्रसरो**ऽतिप्रवृत्तिरूपः **क्षणे क्षणे भवति**

---

१. तत्त्वया - P । २. आलो...P । ३. शान्तः - P । ४. केवलिका... C, KH, P ।

टि. 1. उपश्रुतिः (स्त्री)-दैवप्रश्नः, तस्मिन् विषये । 2. आलिङ्गितः-तन्त्रसारोक्तः प्रमाणोपेताक्षराणां मन्त्रविशेषः ।

पराऽपरकार्य[१][1]लवेऽभिवर्द्धते । कार्या[२]दल्पीयसि को दोष ? इत्याह—**स्तोकोऽपि भवति बहुः** प्रमादस्याऽनन्तभवाभ्यस्तत्वात्, स च सङ्गानुष्ठाता **न च नैव लभते धृतिं** सुस्थतां **निरुध्यमानो** गुर्वादिभिर्वार्यमाण इत्यर्थः ॥११६॥ स्तोकस्य बहुभावे युक्तिमाह—

**जो चयइ उत्तरगुणे, मूलगुणे वि अचिरेण सो चयइ ।**
**जह जह कुणइ पमायं, पिलिज्जइ तह कसाएहिं ॥११७॥**

**यस्त्यजति उत्तरगुणान्** पिण्डविशुद्ध्यादीन्, **मूलगुणानपि** महाव्रतान्यपि **अचिरेण** स्वल्पकालेन **स त्यजति । यथा यथा करोति प्रमादं** शैथिल्यं, **प्रेर्यते** स्वगुणेभ्यश्च्याव्यते प्राप्तावकाशतया **तथा कषायैः** प्रमादव[2]द्वीप्सया स्थितैः क्रोधादिभिरित्यर्थः ॥११७॥ व्यतिरेकमाह—

**जो निच्छएण गिण्हइ, देहच्चाए वि न य धिइं मुयइ ।**
**सो साहेइ सकज्जं, जह चंडवडिंसओ राया ॥११८॥**

**यः** सोपस्कारत्वात् सदनुष्ठानं **निश्चयेन गृह्णाति देहत्यागेऽपि** शरीरव्ययेऽपि **न धृतिं मुञ्चति । स साधयति स्वकार्यं यथा चन्द्रावतंसको राजा** इत्यक्षरार्थः ॥११८॥ भावार्थाय कथा चेयम्—

**[ चन्द्रावतंसककथानकम् ॥ ]**

निजभूतिपराभूतनाके **साकेत**पत्तने । **चन्द्रावतंसकः** स्वामी भुवोऽजनि वतंसकः ॥१॥
प्रिया **सुदर्शना**ऽसूत तस्य भूतलवज्रिणः । उभौ **सागरचन्द्रं** च **मुनिचन्द्रं** च नन्दनौ ॥२॥
**सागरेन्दु**नरेन्द्रेण यौवराज्ये प्रतिष्ठितः । **मुनिचन्द्र**कुमारस्यादायि **तूज्जयिनी** पुरी ॥३॥
भूकान्तस्य द्वितीयाऽपि कान्ताऽस्य **प्रियदर्शना** । सूते स्म **गुणचन्द्रं** च **बालचन्द्रं** च नन्दनौ ॥४॥
न्यायधर्मैकमर्मज्ञः सर्वज्ञागमपारगः । अरञ्जयदुभौ लोकौ राजा **चन्द्रावतंसकः** ॥५॥
प्रजाकार्याणि सर्वाणि कुर्वाणोऽपि नरेश्वरः । अशून्यं क्षणमप्येष चक्रे पुण्यधनार्ज्जनैः ॥६॥
सायं [3]स्वायंभुवोपास्तिपस्त्यादास्थानमेत्य सः । नीराजनाविधौ वीते विसृज्याऽऽस्थानराजकम् ॥७॥
अन्तरन्तःपुरं प्राप्तोऽन्यदा [4]विशदवासनः । चक्रे सामायिकं राजा यामदीपशिखावधि ॥८॥ युग्मम् ॥
पल्यङ्कपाल्या देवस्य ध्वान्ते माऽस्तु दुरासिका । प्रतियाममिति क्षिप्तं तैलं दीपेऽनभिज्ञया ॥९॥
यद्वत्तैलेन तेनाऽयं जाज्वलीति स्म दीपकः । तद्वदेव स राजर्षेस्तदा सद्ध्यानदीपकः ॥१०॥
स स्वामी पूर्वमप्यासीद्भोगभाजां क्षमाभुजाम् । योगभाजामपि तदा जज्ञे समतया तया ॥११॥
क्षमी दयालुर्धर्मिष्ठः कृतज्ञो यः स्वयं प्रभुः । तस्यानुजीविनः स्थाने शक्राय स्पृहयन्ति न ॥१२॥

---

१. लवैरभि - H । २. दलीयसि - H ।

टि. 1. लवः- कालविशेषः । 2. वीप्सा - व्याप्तिः तेन प्रकारेण स्थितैः । 3. स्वयम्भूः-जिनः, [तस्येदम्] ६।३।१३० सूत्रेण अण्, स्वायंभुवः, तस्य संबन्धि उपास्तिपस्त्यं तस्मात् । उपास्तिः-सेवाचिन्तनादि क्रियते यत्र तद् पस्त्यं गृहम् । 4. विशदा निर्मला वासना यस्य सः ।

निशावसानेऽस्तमितेऽथ दीपे, **चन्द्रावतंसो**ऽपि नरेन्द्रचन्द्रः ।
हित्वा तनुं धातुमयीं नराणां, ज्योतिर्मयीमाप विमानभाजाम् ॥१३॥ [उपजातिवृत्तम्]

**इति चन्द्रावतंसककथानकम् ॥**

किञ्च—

**सीउण्हखुप्पिवासं, दुस्सेज्जपरीसहं किलेसं च ।**
**जो सहइ तस्स धम्मो, जो धिइमं सो तवं चरइ ॥११९॥**

**शीतं** हिमम् , **उष्णं** घर्मं, **क्षुधं** बुभुक्षां, **पिपासां** तृष्णां, **दुःशय्यां** निम्नोन्नतविषमां वसतिं, **परीषहा** नानारूपाः पीडाः, **क्लेशं** दिव्याद्युपसर्गजनितं बाधनं **च, यः सहते** क्षमते **तस्य धर्मः** नान्यस्य । पुनर्विशिनष्टि-**यो धृतिमान्** निष्प्रकम्पः **स तपः** परीषहोपसर्गाधिसहनरूपं **चरति**, इतरस्यार्त्यादिना धर्मक्षतिकारित्वादिति ॥११९॥ केवलं सैव धृतिर्विदितजिनप्रवचनानामवश्यंभाविनीति दृष्टान्तेनाह—

**धम्ममिणं जाणंता, गिहिणो वि दढव्वया किमुअ साहू ? ।**
**कमलामेलाहरणे, सागरचंदेण एत्थुवमा ॥१२०॥**

**धर्ममिमं** सर्वज्ञप्रणीतं **जानन्तो गृहिणोऽपि दृढव्रता** भवन्ति । **किमुत साधवस्**तैस्तन्मात्रसाधनत्वात् सुतरां दृढव्रतैर्भाव्यमिति भावः । **कमलामेलाहरणे सागरचन्द्रेणाऽत्रोपमे**ति गाथार्थः ॥१२०॥

भावार्थस्तु कथायाम् । तथाहि—

**[ सागरचन्द्रकथानकम् ॥ ]**

**द्वारकायां** पुरा **रामपौत्रो निषधनन्दनः** । श्रीमान् **सागरचन्द्राख्यः** साङ्गोऽनङ्ग इवाऽजनि ॥१॥
तत्रैव **कमलामेला**[१] **धनसेन**नृपात्मजा । प्रत्तो[1]**ग्रसेन**पुत्रस्य **नभःसेन**स्य सा किल ॥२॥
तदा च नभसः प्राप्तः सदने **नारदो** मुनिः । लीलाललितलोलेन **नभःसेनेन** नाऽर्चितः ॥३॥
ईर्ष्यातप्तोऽयमुत्पत्य **सागरा**गारमागतः । अर्घपाद्यासनैस्तेन विनयेनाऽथ पूजितः ॥४॥
आश्चर्यमनुयुक्तश्च समाचष्ट कलिप्रियः । कन्याऽस्ति **कमलापीडा** सा[2]ऽऽपीडः सर्वयोषिताम् ॥५॥
सा तु दातुमुपक्रान्ता यस्मै सोऽञ्चति नौचितीम् । तत्पितृभ्यां तदारब्धा काचमाणिक्ययोस्तुला ॥६॥
तस्यामस्य समुत्पाद्याऽनुराग[२]मिति कौतुकी । जगाम कमलापीडाधाम तत्राऽर्चितस्तया ॥७॥
तत्पृष्टः किञ्चिदाश्चर्यमित्यूचेऽथाऽस्ति तद्द्वयम् । **सागरेन्दु**र्यथा रम्यो **नभःसेन**स्तथाऽन्यथा ॥८॥
[3]**नैषधे**ऽथाऽनुरक्तां तां विरक्ता**मुग्रसेनजे** । सोऽपि रक्तस्त्वयीत्येवमादिश्याऽऽश्वास्य निर्ययौ ॥९॥
उक्त्वा तद्रागमागत्य गते भूयः कलिप्रिये । रागः **सागरचन्द्र**स्य जागरूकोऽभवत्तराम् ॥१०॥
उन्मत्तरसवत् पीत्वा भृशं तस्याः कथारसम् । उन्मत्तः सर्वमप्येतत्तन्मयं पश्यति स्म सः ॥११॥

---

१. पीडा - P, A, C, KH, B, D, K । २. मति...P ।

टि. 1. प्रत्ता दत्ता उग्रसेनपुत्रस्य इत्यन्वयः । 2. आपीडः-मुकुटम् । 3. सागरचन्द्रे ।

तदालोक-तदालापतदालिङ्गनतत्परः । अलीकचेष्टः कस्यैष चित्रं चिन्तां च नातनोत् ॥१२॥
**शाम्ब**स्तद्वार्त्तमन्वेष्टुं वार्त्तां श्रुत्वा समागतः । प्रच्छन्नः पाणिपद्माभ्यां पिदधे तस्य लोचने ॥१३॥
ज्ञाताऽसि **कमलामेले** ! [१]श्रयोत्सङ्गं ममाऽधुना । नाम्ना स [1]प्राकृतेनैव **शाम्ब**मप्याह तत्परः ॥१४॥
स्मयमानाननः **शाम्ब**श्चुम्बन्मूर्ध्नि जगाद तम् । वत्साऽहं **कमलामेलः** पितृव्यस्ते विलोकय ॥१५॥
विलोक्य नत्वा चोवाच ह्रियं हित्वाऽथ **सागरः** । कमलां मेलय स्वोक्तमलीकं तात ! मा तनु ॥१६॥
कुमारैः **सागर**प्रेम्णा [२]सकलैरपरैरपि । **शाम्बो** मद्योपरोधाभ्यां कृतः परवशस्तदा ॥१७॥
ओमित्युक्त्वाऽथ **शाम्बेन** स्वयं प्रज्ञप्तिविद्यया । सुरङ्गयाऽपहृत्यैनामारामे **द्वारका**बहिः ॥१८॥
कृत्वा [2]कलिप्रियं पार्श्वे कुमारैः कृतमङ्गलः । सुलग्ने **कमलापीडां सागरः** परिणायितः ॥१९॥ युग्मम् ॥
परेऽपि जन्यास्तां कन्यामन्विष्यन्तः शुभे क्षणे । तत्रारामे चिराद् दृष्ट्वा हरिमेत्य व्यजिज्ञपत् ॥२०॥
कैश्चिद्विद्याधरैर्देव ! कन्या जह्रे त्वयि प्रभौ । स्वच्छन्दं सन्ति तेऽप्यत्र प्रमाणं त्वमतः परम् ॥२१॥
आदिष्टेऽथ बले मग्ने **शाम्ब**विद्या[३]बलोदधौ । यावच्चलति **गोविन्दः** स्वयं दोर्दर्पदुर्द्धरः ॥२२॥
**नारदेन** समं तावदेत्य **जाम्बवती**सुतः । नत्वा यथावदाचख्यौ **वासुदेवाय** सस्मितम् ॥२३॥
ऊढेति [3]**रामपौत्र**स्य दत्ता साऽस्यैव शार्ङ्गिणा । इतरे तद्[4]गृहान् गत्वा स्वामिना क्षमिताः स्वयम् ॥२४॥
तया दयितया लक्ष्मीः कृतार्थाऽजनि नैषधेः । गृहस्थतेव सद्धर्म्मसम्पदा सङ्गता मिथः ॥२५॥
द्वादशात्मा गृहस्थानां धर्मो रविरिवोज्ज्वलः । **श्रीनेमि**शासनात् तेन पाल्यते वासितात्मना ॥२६॥
महाव्रतानां तुलनां चिकीर्षुरयमन्यदा । प्रतिमाश्रा[४]वकीभावं भेजे मुनिरिव क्षमी ॥२७॥
कदाचित् पर्वणि क्वाऽपि श्मशानाऽऽसन्नभूतले । बहिः स प्रतिमां भेजे शैलस्तम्भ इव स्थिरः ॥२८॥
द्विष्टश्छिद्रं **नभःसेन**स्ततः प्रभृति मार्गयन् । वैरनिर्यातनोपायं निश्चिकाय तदाऽधमः ॥२९॥
निकषा निष्कषायं तमभ्येत्यार्द्रमृदा स्वयम् । तन्मौलौ मुकुटस्थाने कुटकण्ठं न्ययोजयत् ॥३०॥
कुलाङ्गारश्चिताङ्गारैः स तं भृत्वा गतोऽन्यतः । सद्ध्यानाग्निस्फुलिङ्गत्वं भेजिरेऽन्यस्य ते पुनः ॥३१॥
शमाऽमृतह्रदः पीडामधि[५]सह्य [६]सुदुस्सहाम् । जगाम [७]त्रिदिवं धाम **सागरः** पुण्यसागरः ॥३२॥

**इति सागरचन्द्रकथानकम् ॥**

दृष्टान्तान्तरेण इदमेवाह—

**देवेहिं कामदेवो, गिही वि न वि चाइओ तवगुणेहिं ।**
**मत्तगयंदभुयंगम-रक्खसघोरट्टहासेहिं ॥१२१॥**

---

१. श्रेयो...P, B, K, D । २. सवालै....K, D । ३. बलेदधौ - P । ४. वर्की - H, B । ५. रुह्य - P । ६. संदुःसहं - A, C सदुस्सह H सदुस्सहं - KH, B । ७. त्रैदिवं C, K, KH, H, B, A, D ।

टि. 1. प्राकृतेन-स्वभावसिद्धेन नाम्ना-कमलामेला इति नाम तस्य स्वभावसिद्धं जातं इत्यर्थः । 2. कलिप्रियं-नारदम् । 3. सागरचन्द्रस्य । 4. गृहः(पुं) (बहु०) - कुटुम्बम् गृहं वा ।

देवैर्देवकृतैः **कामदेवो गृह्यपि** श्रावकोऽपि **न च** नैव **च्यावितो** भ्रंशित**स्तपोगुणेभ्यः**, कैस्तैर्देवकृतैरित्याह— **मत्तगजेन्द्र-भुजङ्गम-राक्षसघोराट्टहासै**रिति गाथासमासार्थः ॥१२१॥

विस्तरार्थस्तु कथायां तथाहि—

## [ कामदेवश्रावककथानकम् ॥ ]

आराद् गङ्गातरङ्गाणां नृत्याचार्यैरिवोज्ज्वलैः । अस्ति चैत्यध्वजैश्चारु[१]**श्चम्पे**ति प्रथिता पुरी ॥१॥
**जितशत्रु**नृपस्तत्र क्षत्रसङ्ग्रामसत्रभूः । अभूद्भुजद्रुमारूढश्रीलताफलपुष्प[२]भूः ॥२॥
श्रितानां कामदः कामं **काम[३]देव** इति श्रुतः । विचित्रविभवस्तत्र ने[४]तृमित्रमभूद् गृही ॥३॥
मन्दिरं सुन्दरं तस्य सौभाग्यस्योपभोगभूः । सधर्मचारिणी तस्य **भद्रा**ऽभूद्धर्मचारिणी ॥४॥
निधौ व्यवहृतौ वृद्धौ षट् षट् हाटककोटयः । आसन् व्रजाश्च दशगोसहस्रीमितयोऽस्य षट् ॥५॥
चराचरगुरु**र्वीरः** कदापि विहरन् महीम् । **पुण्यभद्रा**भिधोद्यानं तत्रेत्य समवासरत् ॥६॥
आजगाम **कामदेवः** पद्भ्यामेव प्रभुं ततः । शुश्राव श्रावकीभूतो देशनां क्लेशनाशिनीम् ॥७॥
कामदेवः प्रपेदेऽथ पुरो विश्वत्रयीगुरोः । स द्वादशविधं श्राद्धधर्मं निर्मलवासनः ॥८॥
स्त्रीः प्रत्याख्यद् विना **भद्रां** षट् व्रजीं च विना व्रजान् । षट् षट् कोटीर्विना स्वर्णं वृद्धौ व्यवहृतौ निधौ ॥९॥
विना पञ्चहलशतीं क्षेत्राणि शकटानि च । शतानि पञ्च [1]पञ्चर्ते दिग्यात्रायां भरोद्धृतौ ॥१०॥
विना चत्वारि चत्वारि यात्रिकाणि वहन्ति च । वाहनानि [2]दन्तकाष्ठं विनार्द्रां मधुयष्टिकाम् ॥११॥
अङ्गमार्जनमप्येकां गन्धकाषायिकां विना । विना च क्षीरामलकं फलानि सकलान्यपि ॥१२॥
अभ्यङ्गं च विना तैले सहस्रशतपाकिमे । विना सुगन्धिगन्धाढ्यमुद्वर्त्तनकवस्तु च ॥१३॥
स्नानस्य च क्रियामम्भःकुम्भानष्टौ विनौष्ट्रिकान् । तथा निवसनं क्षौमयुगलेन विनाऽखिलम् ॥१४॥
विलेपनान्यपि विना घुसृणाऽगुरुचन्दनैः । कृत्स्नं च कुसुमं जातिदाम-तामरसे विना ॥१५॥
मुद्रां च कर्णिकां चर्त्ते सर्वाण्याभरणानि च । तुरुष्कागुरुधूपेभ्यो विना धूपनकर्म च ॥१६॥
घृतपूर्णात् खण्डखाद्यादन्यद् भक्ष्यमशेषकम् । काष्ठपेयां विना पेयामोदनं कलमैर्विना ॥१७॥
[3]कलाय-माष-मुद्गैश्च विना सूपमशेषतः । विना शारदगोसर्प्पिः सर्प्पींषि निखिलान्यपि ॥१८॥
शाकं स्वस्तिकमण्डूकीपल्यङ्काभ्यां विनाऽपरम् । तेमनं स्नेहदाल्यम्लाज्जलं व्योमजलात्परम् ॥१९॥
विना सुरभि ताम्बूलं मुखवासमशेषतः । प्रत्याख्यायेति स प्रीतः प्रभुं नत्वा गृहं ययौ ॥२०॥
एत्य धर्मक्रियाभद्रा प्रिया **भद्रा**ऽथ तस्य सा । जग्राहाऽग्रेजिनं स्वस्य पावकं श्रावकं तपः ॥२१॥
भारं न्यस्य कुटुम्बस्य **कामदेवः** सुते ततः । तस्थौ पौषधशालायामप्रमादी व्रतोद्यमे ॥२२॥
ध्यानस्थितस्य तस्यैकः क्षोभायाऽऽप्य पिशाचताम् । निशीथेऽभ्युत्थितो मिथ्यादृष्टिर्दुष्टतरः सुरः ॥२३॥

---

१. चारुचंपे...KH, C । २. पुष्टभूः D, KH, K । ३. देवोतिविश्रु...H, D, B, K । ४. नेतुर्मि - C नेत्रमि - P, KH, D ।

टि. 1. पञ्च ऋते - पञ्च विना इत्यर्थः । 2. दन्तविशुद्ध्यर्थं काष्ठं दन्तकाष्ठम् । 3. कलायः-वटाणा इति भाषायाम् ।

केशा विलासविपिनं भालमासनपट्टकः । भ्रू-नासे छत्रदण्डौ च कालस्येवेह रेजिरे ॥२४॥
दृशौ चक्रे यमक्रीडारथस्येवाऽद्भुतभ्रमे । कपोलौ मृतिकुल्याया विपुले पुलिने इव ॥२५॥
नासाच्छिद्रे च बिलवत् कालमृत्यु-भुजङ्गयोः । वक्रताक्रूरतानित्यलीलादोले इव श्रुती ॥२६॥
वृतिः श्मश्रुततिर्दौष्ट्यवासग्राम इवानने । औष्ठौ मृत्युवणिग्गोप्यलोकगोपनगोणिवत् ॥२७॥
ज्वालानुकारजिह्वालं करालं वक्त्रकोटरम् । मृत्योर्लोकपशुस्तोमहोमकुण्डमिवोत्कटम् ॥२८॥
कर्मान्तराय[1] कस्मैचिच्छेत्तुं जीवमहीरुहान् । सज्जिताः कर्मकर्मारैः[2] कुठारा इव दन्तकाः ॥२९॥
चिबुकं लम्बकण्ठाऽग्रपर्यवष्टम्भ[१]कीलवत् । अतितुङ्गवपुःस्तम्बरज्जुप्रालम्बवद्भुजौ ॥३०॥
अतिवृद्धचलत्कोशकरयष्टिवदिन्द्रियम् । ऊर्ध्वाङ्गभारदीर्णाधःशरीरार्धकवत्क्रमौ ॥३१॥
क्षुद्भुक्तजीवन्मातङ्गतृट्पीतार्णवभूरिव । उल्लासातिघोरश्च घोषस्तस्याल्पिताऽभ्रदिक् ॥३२॥
छुच्छुन्दरीमयशिरोमाल्यः सरटहारभृत् । कर्णावतंसनकुलः स भुजङ्गमयाङ्गदः ॥३३॥
तैः शेषैरिव कीनाशनिर्माणपरमाणुभिः । सृष्टमुत्कृष्टमाकृष्टं धृत्वाऽसिं पर्यधावत ॥३४॥
भ्रूभङ्गोद्दामगीः कामदेवमेवमथाऽवदत् । रे रे मुञ्चेदमारब्धं छिन्दे वा त्वच्छिरोऽधुना ॥३५॥
तेन प्रलपतेत्युच्चैरत्युच्चैश्च मुहुर्मुहुः । ध्यानान्नाऽचालि स स्थानात् पवनेनेव पर्वतः ॥३६॥
व्रजन् विजययात्रायै मिथ्यात्वस्येव युग्यताम् । तत्क्षोभाय स देवोऽभूदिभ[२]वैभवभृत् ततः ॥३७॥
अधीरधार्मिकयशःकीर्तिग्राससदृग्रदः । धीरधार्मिकविक्षोभारम्भपापैरिवासितः ॥३८॥
वहन् कुण्डलितं कालरात्रिकुण्डलवत्करम् । गर्जया जर्जरीकृत्य जगदेनं जगाद सः ॥३९॥
अप्रार्थितप्रार्थक ! रे मुञ्चेदं दुर्गुरूदितम् । कुर्वे तवाङ्गभङ्गं वा शुण्डारदपदादिभिः ॥४०॥
मुहुरित्युच्चकैर्जल्पन्नप्यनाप्तोत्तरः करी । क्रुधा चिक्षेप तं व्योम्नि भान्तं खेचरवद्रुचा ॥४१॥
स तं पतन्तं दन्ताग्रे धृत्वा क्षिप्त्वा द्रुतं क्षितौ । विवेध कदलीवेधं पङ्कमर्दं ममर्द च ॥४२॥
लीनो ध्यानसुधाम्भोधौ स एभिः कुम्भिताडनैः । अधोऽधो निममज्जेह वज्रमज्जेव नाऽदलत् ॥४३॥
सुराधमोऽथ मिथ्यात्वमहाकरिकरोपमम् । तत्प्रक्षोभाय भौजङ्गमङ्गमङ्गीचकार सः ॥४४॥
तथैवाऽऽलप्य तं भोगी योगीश्वरमनुत्तरम् । भोगानावेष्टयद्गाढं वध्रेण वरवंशवत् ॥४५॥
दंशं दंशं तदङ्गेषु वर्षं वर्षं विषाणि च । तस्य व्यवर्द्धयद्ध्यानधर्मं स्वस्य भवं फणी ॥४६॥
ततः स्वरूपमास्थाय सत्प्रभाप्रसरः सुरः । साधु साध्वित्यनल्पोक्तिः कामदेवं जजल्प सः ॥४७॥
स्तुतोऽसि वास्तोष्पतिना[3] यथा दिवि तथाऽसि भोः ! । न प्रभुत्वबलादाख्यदवस्तुनि स वस्तुताम् ॥४८॥
यथा यथा परीक्षार्थं तापितोऽसि तथा तथा । तव प्रववृधे ध्यानं सुवर्णस्येव वर्णिका ॥४९॥

---

१. काल - KH, A, K, D । २. भूदैभः...P । , भूद्दैव...D ।, भूदैव - C ।

टि. 1. कर्मान्तरं-अन्यत्कर्म, तस्मै । 2. कर्म एव कर्मारः शिल्पी तैः । 3. वास्तोषपतिः-इन्द्रः, तेन ।

क्षम्यतां मे परीक्षार्थं कृतं यत्ते[१] कदर्थनम् । इत्युक्त्वाऽयं ययौ देवः [1]प्रभाधौतन[२]भा दिवम् ॥५०॥
एवं परीषहान् सोढुः सभावर्त्ती जगद्गुरुः । प्रशंसां **कामदेवस्य** कामारिरपि निर्ममे ॥५१॥
जगाम **कामदेवो**ऽपि प्रातः पारितपौषधः । जगत्प्रभुप्रणामाय विमायश्रावकव्रतः ॥५२॥
बभाषेऽथ सभामध्ये **गौतम**प्रभृतीन् प्रभुः । **कामदेवो**ऽयमप्येवं गृही सेहे परीषहान् ॥५३॥
स धीरः स च धन्यात्मा न भग्नो यः परीषहैः । भवद्भिरपि तत्तत्र यतितव्यं यतीश्वराः ! ॥५४॥
एकादशाऽप्यथ श्राद्धप्रतिमा [2]मतिमानसौ । **कामदेवः** क्रमादेव प्रपेदे [3]वृजिनच्छिदः ॥५५॥
ततः संलेखनामेष विधाय विधिवत्सुधीः । गृहीताऽनशनः सोऽन्ते व्यपद्यत समाहितः ॥५६॥
चतुष्पल्यस्थितिः कल्पे सो**ऽरुणाभे** सुरेऽभवत् । **विदेहे**षु नृदेहेन सिद्धिं यास्यत्यतश्च्युतः ॥५७॥

**इति [३]कामदेवाख्यानम् ॥**

अविवेकिनः पुनर्निष्कारणं कुप्यन्ति । तद्द्वारेण चाऽभुक्तभोगा एवानर्थकं कुगतौ पतन्तीत्याह–

**भोगे अभुंजमाणा वि, केइ मोहा पडंति अहरगइं ।**
**कुविओ आहारत्थी, जत्ताइ [४]जणस्स दमगो व्व ॥१२२॥**

**भोगान्** विषयान्, **अभुञ्जाना अपि केचित्** प्राणिनो, **मोहादज्ञानात् पतन्त्यधरगतिं** यान्ति नरकम् । दृष्टान्तमाह–**कुपित आहारार्थी** भोजनप्रार्थकः, **यात्रायामुद्यानिकायां जनस्योपरि द्रमक इव** रङ्क इवेति ॥१२२॥ तत्कथा चैवम्–

**[ द्रमककथानकम् ॥ ]**

पुरे **राजगृहे** लोकाः कदाचित् क्वचिदुत्सवे । ययुरुद्यानिकाहेतोर्वैभाराद्रे[4]रुपत्यकाम् ॥१॥
निशम्याऽऽरक्षकेभ्यस्तन्नगरान्तः क्षुधातुरः । तत्राऽगात् **द्रमकः** कश्चिन्निर्भाग्यानां शिरोमणिः ॥२॥
दानशौण्डेषु लोकेषु प्रमत्तेषु तदोत्सवे । दुष्कर्मवशतो भिक्षां क्वापि न प्राप पापधीः ॥३॥
कोपतः सोऽपि तं लोकं सर्वं चूरयितुं हठात् । गिरिं **वैभार**मारोहत् तलं यातुमिवातुरः ॥४॥
खनित्रेण खनित्वाऽधः पिपातयिषुरुत्सुकः । गण्डशैलं गरीयांसं निःसङ्गमकरोत्तराम् ॥५॥
तेनैव पतता तूर्णं चूर्णितः सैष दुर्मतिः । सप्तमं नरकं प्रायश्चित्तायेव जगाम च ॥६॥
गिरेरुपरि निर्घातं गण्डशैलस्य [५]पित्सतः । श्रुत्वा त्रस्तस्य लोकस्य जज्ञे नेषदपि क्षतिः ॥७॥

**इति द्रमककथानकम् ॥**

---

१. यत्तत् - C, P । २. नाभोदि...K, नभांदि - B । ३. कामदेवकथा - P । ४. किंचित् - P । ५. पिच्छतः P, पश्यतः C ।

टि. 1. प्रभया धौतं नभः येन स प्रभाधौतनभाः । 2. मतिमान् असौ । 3. वृजिनं पापं छिनत्ति इति वृजिनच्छिद्, ताः । 4. उपत्यका–पर्वतस्यासन्ना अधोभूमिः, ताम् ।

तदेतदविवेकमूलं सर्वं विज्ञाय विवेकसिद्धये जिनागमे प्रमादो न कार्य इत्याह—

**भवसयसहस्सदुल्लहे, जाइजरामरणसागरुत्तारे ।**
**जिणवयणंमि गुणागर !, खणमवि मा काहिसि पमायं ॥१२३॥**

**भवशतसहस्रदुर्लभे** जन्मलक्षदुष्प्रापे **जातिजरामरणसागरोत्तारे** मुक्तिरूपतटप्रापकत्वात्, **जिनवचने** सर्वज्ञभाषिते, शिष्यमुत्साहयितुमामन्त्रयति, **हे गुणाकर** ! ज्ञानाद्युत्पत्तिस्थान ! **क्षणमपि** स्वल्पकालमपि **मा कार्षीः प्रमादं** शैथिल्यं, किन्तु तद्ग्रहणासेवनाभ्यामुद्योगं विदध्या इति ॥१२३॥

प्रमादेषु प्रथमं रागद्वेषौ विजेयावित्याह—

**जं न लहइ सम्मत्तं, लद्धूण वि जं न एइ संवेगं ।**
**विसयसुहेसु य रज्जइ, सो दोसो रागदोसाणं ॥१२४॥**

**यन्न लभ्यते**[1] **सम्यक्त्वं लब्ध्वापि, यन्न एति संवेगं** नाप्नोति मोक्षाभिलाषं **विषयसुखेषु च** शब्दादिजन्येषु, **रज्यते** प्रसज्यते, **स दोषो रागद्वेषयो**र्नाऽन्यस्यापराधस्तयोरेव जीवविपर्यासहेतुत्वादिति ॥१२४॥ ततः किमित्याह—

**तो बहुगुणनासाणं, सम्मत्तचरित्तगुणविणासाणं ।**
**न हु वसमागंतव्वं, रागदोसाण पावाणं ॥१२५॥**

**तस्माद्** बहुगुणो नाशो ययोरिति **बहुगुणनाशयोः सम्यक्त्वचारित्रगुणानां** ज्ञानादीनां **विनाशयोः**, साक्षात् प्रलयरूपयोः **न हु** नैव **वशमागन्तव्यं रागद्वेषयोः पापयोर्न** तदायत्तैर्भाव्यमिति ॥१२५॥ यतः—

**न वि तं कुणइ अमित्तो सुट्ठु वि सुविराहिओ समत्थो वि ।**
**जं दोवि अणिग्गहिया, करंति रागो य दोसो य ॥१२६॥**

**नापि** नैव, **तत्करोत्यमित्रं, सुष्ठ्वपि** नितरां[2], **सुविराधितः** प्रखलीकृतः, **समर्थोऽपि** लब्धात्मलाभोऽपि, **यत् द्वावपि अनिगृहीतौ** उच्छृङ्खलौ, **कुरुतो रागश्चद्वेषश्च** तयोः प्रत्येकमनन्तभविकमरणहेतुत्वादिति ॥१२६॥ यत्तौ कुरुतस्तदाह—

**इह लोए आयासं, अयसं च करेंति गुणविणासं च ।**
**पसवंति य परलोए, सारीरमणोगए दुक्खे ॥१२७॥**

**इह लोके आयासं** शरीरमनस्तापम्, **अयशो**ऽपकीर्त्तिं, **कुरुतो गुणानां** ज्ञानादीनां माहात्म्यहेतूनां **विनाशं च, प्रसुवाते च परलोके**ऽन्यजन्मनि **शारीरमनोगतानि दुःखानि** रागद्वेषौ, तयोर्दुर्गतिहेतुत्वादिति ॥१२७॥ एवं च—

**धिद्धी अहो अकज्जं, जं जाणंतो वि रागदोसेहिं ।**
**फलमउलं कडुयरसं, तं चेव निसेवए जीवो ॥१२८॥**

---

१. लभते - C, K, KH, H, L, D, B । २. सुतरां - P ।

**धिग् धि**गिति वीप्सा सम्भ्रमे, **अहो** इति आमन्त्रणे, पश्यत यूयं-धिक्कारार्ह**मकार्यं यत् जानानोऽपि रागद्वेषाभ्याम्** हेतुभूताभ्यां असत्प्रवृत्तेः कार्यं **फलम् अतुलं** महत् **कटुकरसं** तीव्रविपाकं, तथाऽपि **तदेव** तत्कारणभूतमसच्चेष्टितमेव **निषेवते जीव** इति ॥१२८॥

तथाहि—

**को दुक्खं पाविज्जा ? कस्स व सुक्खेहिं विम्हओ हुज्जा ?।**
**को व न लहिज्ज मोक्खं ?, रागद्दोसा जइ न होज्जा ॥१२९॥**

**को दुःखं प्राप्नुयात्** ? न कोऽपि हेत्वभावात्, **कस्य वा सौख्यैः** प्राप्तै**र्विस्मय** आश्चर्यं **भवेत्** ? विबन्धकाभावेन सुलभत्वात् न कस्यचित् । **को वा न लभेत मोक्षं ? रागद्वेषौ यदि न भवेतामि**ति ॥१२९॥

तदिदं मूलप्रकृती रागद्वेषावधिकृत्योक्तम् । सम्प्रति तद्विकृतीरुद्दिश्याह—

**माणी गुरुपडणीओ, अणत्थभरिओ अमग्गचारी य ।**
**मोहं किलेसजालं, सो खाइ जहेव गोसालो ॥१३०॥**

**मानी** सगर्वो, **गुरुप्रत्यनीक** आचार्यप्रतिकूलो**ऽनर्थभृतो**[1] दुःशीलत्वादपायपूरितः, **अमार्गचारी** उत्सूत्रसेवी, **चः** समुच्चये, एवंविधो यः **स मोघं** निष्फलं **क्लेशजालं** शिरस्तुण्डमुण्डनादिसमुत्थं खेदवृन्दं **खादति** आत्मसात्करोति, **यथैव गोशालः** पूर्वोक्तस्वरूपो भगवच्छिष्याभास इति ॥१३०॥ किञ्च—

**कलहणकोहणसीलो, भंडणसीलो विवायसीलो य ।**
**जीवो निच्चुज्जलिओ, निरत्थयं संजमं चरइ ॥१३१॥**

**कलहनं** वाचा कलिकरणं, **क्रोधनं** स्वपरयोः क्रोधजननं **तच्छील**स्तत्समाधानः, **भण्डनशीलो** यष्टिमुष्ट्यादिघातनरूपकलिसमाधानः, **विवादशीलो** राजकुलादिव्यवहारे स्वरसप्रवृत्तिः, **च**शब्दः स्वगतानेक-भेदसूचनार्थः । **जीवो नित्योज्ज्वलितः** सदा क्रोधाध्मातो **निरर्थकं संयमं** शमप्रधानं व्रतं **चरती**ति ॥१३१॥

यतः—

**जह वणदवो वणं दवदवस्स जलिओ खणेण निद्दहइ ।**
**एवं कसायपरिणओ, जीवो तवसंजमं दहइ ॥१३२॥**

**यथा वनदवो वनं दवदवस्स**त्ति द्रुतं द्रुतं **ज्वलितः, क्षणेन निर्दहति । एवं कषायपरिणतः** क्रोधादिपरिणामं प्राप्तो **जीवस्तपःसंयमम्** उपशमव्रतरूपं **दहती**ति ॥१३२॥

सम्प्रति कषायैर्यथा यावत्तपो हन्यते, तथा तदियत्तां वक्तुकाम आह—

**परिणामवसेण पुणो, अहिओ ऊणयरओ व होज्ज खओ ।**
**तह वि ववहारमित्तेण, भण्णइ इणमं जहा थूलं ॥१३३॥**

**परिणामवशेन** तीव्रमन्दाऽध्यवसायायत्ततया, **पुनः** प्रतिपिपादयिषिताद**धिको** विशिष्ट **ऊनतरको वा**

---

१. भूतो - A, H, B । भरितः - L ।

हीनतरको वा **भवेत् क्षय**स्तपःसंयमयोरितिगम्यं, **तथाऽपि व्यवहारमात्रेण भण्यते इदं** वक्ष्यमाणं, **यथा स्थूलं** बादरदृष्ट्या न सूक्ष्मेक्षिकयेति ॥१३३॥

तदेवाह—

**फरुसवयणेण दिणतवं, अहिक्खिवंतो य हणइ मासतवं ।**
**वरिसतवं सवमाणो, हणइ हणंतो अ सामण्णं ॥१३४॥**

**परुषवचनेन** कर्कशवाक्येन, **तपो दिवसकृतं**, तपउपलक्षणत्वात् संयमं च हन्तीति सम्बन्धनीयम्, **अधिक्षिपन्** जात्यादिभिर्हीलयन् **मासतपः, वर्षतपः शपमानः** आक्रोशन् **हन्ति, घ्नन्** प्रहरन् पुनः **श्रामण्यम्** आजन्मसञ्चितं सकलं व्रतपर्यायमिति ॥१३४॥

**अह जीवियं निकिंतइ, हंतूण य संजमं मलं चिणइ ।**
**जीवो पमायबहुलो, परिभमइ जेण संसारे ॥१३५॥**

**अथ जीवितं** प्राणितव्यं, **निकृन्तति** च्छिनत्ति मारयतीत्यर्थः, **हत्वा च संयमं** चशब्दात्सकलकालजनितं तपश्च क्षयं नीत्वा, **मलं चिनोति** पापकर्म बध्नाति, **जीवः प्रमादबहुलः परिभ्रमति, येन** पापकर्मणा बद्धेन हेतुभूतेन, **संसार** इति ॥१३५॥

ततः क्षन्तव्यमेवेत्युपदिशति—

**अक्कोसणतज्जणताडणाओ, अवमाणहीलणाओ य ।**
**मुणिणो मुणियपरभवा, दढप्पहारि व्व विसहंति ॥१३६॥**

**आक्रोशो** दुर्वाक्यैः शपनं, **तर्जना** साक्षेपमङ्गुल्यादिभिर्भर्त्सना, **ताडना** रज्ज्वादिभिर्घातदानम्, **अपमानः** परिभवः, **हीलना** निन्दा, **चौ** समुच्चयार्थौ, एताः सर्वा अपि **मुनयो मुणितपरभवा** ज्ञातपरलोकमार्गा **दृढप्रहारिवद् विषहन्ते** इति ॥१३६॥ **दृढप्रहारिकथा** चैवम्—

### [ दृढप्रहारिकथानकम् ॥ ]

पुरे क्वापि वसन् कोऽपि द्विजो दुर्नयदुर्द्धरः । आक्षिप्तो रक्षकैर्धन्यंमन्योऽगाच्चौरपल्लिकाम् ॥१॥
स्वतुल्यं पल्लिपश्चौर्यशौर्यक्रौर्यादिभिर्गुणैः । तं मत्वा पुत्ररहितः पुत्रत्वेनान्वमन्यत ॥२॥
ख्यातो **दृढप्रहारी**ति स जन्तून् प्रहरन् दृढम् । स्वस्थाने पल्लिनाथेन स्वाऽन्त्यकाले निवेशितः ॥३॥
साकं लुण्टाकचक्रेण कदाचिल्लुण्टनाय सः । ययौ **कुशस्थलं** नाम ग्राममुद्दामदुर्नयः ॥४॥
दरिद्रो **देवशर्मे**ति तदा तत्र द्विजोऽर्भकैः । क्षाराम्बुधिरिव क्षीरं दीनैः क्षीरान्नमर्थितः ॥५॥
स क्वापि तन्दुलान् क्वापि दुग्धमभ्यर्थ्य पायसम् । सिद्धं विधाप्य मध्याह्ने ययौ स्नानाय सोत्सवः[1] ॥६॥
आपत्य तदपत्यानां जीवितस्यापि जीवितम् । जगृहुः क्रन्दतां चौराः तत्क्षीरान्नं क्षुधातुराः ॥७॥
ते गत्वाऽऽख्यन् पितुर्डिम्भा रुदतामिह तात ! नः । क्षैरेयीं जगृहुश्चौराः श्यामिकां चक्षुषामिव ॥८॥

---

१. सोत्सुकः B, सोत्सकः KH ।

क्रुधा क्षुधा च सन्तप्तस्तदाऽऽकर्ण्योद्यतार्गलः । द्रागेत्य राक्षसाविष्ट इव दस्यून् स पिष्टवान् ॥९॥
तद्भयार्त्तेषु चौरेषु खड्गी चौराधिपोऽचलत् । [1]गामध्यस्थां द्विधा कुर्वन् कपाटीमिव दुर्गतेः ॥१०॥
द्विजस्य धावतस्तस्य नालिकेरमिवाऽथ सः । मौलिं पूरापतत्पाप[१]नद्यर्चार्थमपातयत् ॥११॥
हा क्रूर ! किं करोषीति क्रोशन्त्याः स द्विजस्त्रियाः । पापवापाय गर्भिण्या गर्भक्षेत्रमदारयत् ॥१२॥
द्विखण्डितेन गर्भेऽस्याः सद्यो भ्रूणेन कम्पिना । चौरराजस्य पापद्रुद्विपल्लव इवाबभौ ॥१३॥
तं भ्रूणं पश्यतस्तस्य निष्कृपस्याप्यभूत् कृपा । [2]कुहूरात्रेरिव ज्योत्स्ना क्षाराब्धेरिव पद्मिनी ॥१४॥
द्विजडिम्भास्तदा हा हा मातर्मातः ! पितः ! पितः ! । इत्यारटन्तो धावन्तस्तच्चित्ते शल्यतामगुः ॥१५॥
नग्नान् दीनरवानेतान् पश्यन् दध्यौ मलिम्लुचः । अपितृणां गतिः कैषामब्जानामनपामिव ॥१६॥
ईदृग्दुष्कर्मभारेण पापपङ्के सुदुस्तरे । ममाऽधो मज्जतः कः स्यादुपायः कोऽवलम्बनम् ॥१७॥
स्वकर्मवैराद्वैराग्यादिति ध्यायन्नसौ तदा । साधूनपश्यदुद्याने श्रेयःकुसुमपादपान् ॥१८॥
तान् नत्वाऽयं जगौ पापभागहं भाषितोऽपि हि । भवामि पाप्मने कुष्ठायेव स्पृष्टोऽपि कुष्ठभाग् ॥१९॥
येषामेकतमेनाऽपि नरः स्यान्नारकीव्यथः । ब्रह्म-स्त्री-भ्रूण-गोघात-पातकान्यद्य तान्यहम्[3] ॥२०॥
अपीदृशं गतं पापभूयं यूयं पुनीत माम् । न चण्डाल[4]चतुर्वेदभेदकृद् द्योतनो रविः ॥२१॥
तैर्दिष्टमथ खड्गाभतीव्रं तं जगृहे व्रतम् । अयं **दृढप्रहारी**ति कम्पितं तस्य कर्मभिः ॥२२॥
अदः पापं स्मरिष्यामि यत्र भोक्ष्येऽह्नि तत्र न । धास्यामि च क्षमां सोऽयमित्यभिग्रहमग्रहीत् ॥२३॥
अवस्कन्दितपूर्वेऽस्मिन्नेव ग्रामे **कुशस्थले** । विजहार महात्माऽयं कर्मनिर्मन्थकर्मठः ॥२४॥
आस्ते स्त्री-भ्रूण-गो-ब्रह्महन्ताऽसौ ग्रामलुण्ठकः । इत्यतर्जि जनैर्गच्छन् स भिक्षार्थं गृहे गृहे ॥२५॥
इत्यघं [२]स्मार्यमाणश्च कुट्यमानश्च लोष्टकैः । भुक्तवान्नाह्नि स क्वाऽपि कोपं क्वापि न चक्रिवान् ॥२६॥
स यष्टिमुष्टिलोष्टाद्यैस्ताड्यमानो मुहुर्जनैः । भग्नं मम कुकर्मेति ध्यायन्नैतदभावयत् ॥२७॥
लोकः प्रहारको नाऽयमयं किं तूपकारकः । गृह्णाति मम पापानि ददाति सुकृतानि यः ॥२८॥
हहा सत्कृपयैवामी घातैरपि निषिध्य माम् । स्थाने ममाऽमी नरक[३]गुप्तौ वेक्ष्यन्ति बान्धवाः ॥२९॥
इयत्पापमसावेकः कथं सोढेत्यमी मम । लोष्टादिघातैस्तद्द्रङ्क्त्वा गृह्णन्तीव लवं लवम् ॥३०॥
इत्यादिभावनाभोगसुरभिः केवलीभवन् । **दृढप्रहारी** तत्कालमालिलिङ्गे शिवश्रिया ॥३१॥

**इति दृढप्रहारिकथानकम् ॥**

---

१. नद्यचार्य - A, B, D, K, KH, L, H । २. स्मर्य - P, D । ३. गुप्तावेष्य - C ।

टि. 1 मार्गस्थितां गां द्विधा कुर्वन् इत्यर्थः । 2. कुहूरात्रिः- अमावस्या, तस्याः । 3. अकरवम् इति गम्यते । 4. ब्राह्मणः ।

किञ्च—

**अहमाहउ त्ति न य पडिहणंति सत्ता वि न य पडिसवंति ।**
**मारिज्जंता वि जई, सहंति सहस्समल्लु व्व ॥१३७॥**

**अहम् आहतोऽनेनेति, न** तं **प्रतिघ्नन्ति** प्रत्येकाभिप्रायादहमित्येकवचनं, **शप्ता अपि न प्रतिशपन्ति,** किं बहुना ? **मार्यमाणा अपि यतयः सहन्ते सहस्रमल्लवदिति** ॥१३७॥ तत्कथा चैवम्—

**[ सहस्रमल्लकथानकम् ॥ ]**

पुरे **शङ्खपुरे** राजा बभूव **कनकध्वजः** । रसेन **वीरसेना**ह्वस्तमसेवत सेवकः ॥१॥
ग्रामपञ्चशतीमात्रामपि वृत्तिं महीभुजा । दीयमानां स नादत्ते सेवामेवाकरोत् परम् ॥२॥
**कालसेना**ऽभिधानेन मडम्बपतिनाऽन्यदा । **कनकध्वज**राजस्य देशः सर्वोऽप्युपद्रुतः ॥३॥
[१][1]हृणीयमानस्त[2]न्मात्रमभिषेणयितुं स्वयम् । कस्तं जेताऽस्तु भूनेताऽऽस्थाने स्वानाह सेवकान् ॥४॥
**वीरसेन**स्तदा नत्वा प्राञ्जलिः प्राह भूभुजम् । मामेवादिशतं जेतुमिहान्यैः किं महाजनैः ॥५॥
उपेक्षितः समासन्नैः कूणिताक्षैः कटाक्षितः । सैक एव समादिष्टो विशेषज्ञेन भूभुजा ॥६॥
नृपादेशमथाऽऽसाद्य तेजसा तिरयन् सभाम् । साहसैकरसोत्साहः प्रतस्थे भुजकौतुकी ॥७॥
उल्लङ्घ्य स्वामिसीमानमसमानभुजाबलः । सेनान्तः कालसेनस्य **वीरसेनो**ऽविशत् क्रमात् ॥८॥
तद्भटैरेक एवाऽयं कीदृक् कर्त्तेत्यवज्ञया । दूरादेव दुरालोको विद्युद्दण्ड इवेक्षितः ॥९॥
केचित् पेतुः परे नेशुर्निलीयुरितरेऽन्तरा । स्रस्तान्यस्त्राणि केषाञ्चित् तं वीक्ष्याऽऽयान्तमन्तिके ॥१०॥
पातयन्नुरसा धृष्टधीरानन्तिकचारिणः । प्राप्तः काल इवोत्तालः **कालसेनं** करेऽग्रहीत् ॥११॥
बद्ध्वा तं च सहाऽऽनीय महानीडितविक्रमः । उपढौकितवानेत्य **कनकध्वज**भूभुजे ॥१२॥
अहो **सहस्रमल्लो**ऽयमिति स्तुत्वाऽवनीभुजा । दत्त्वा जनपदं नीतो महासामन्ततामसौ ॥१३॥
प्रसादितोऽथ भूपालः **कालसेने**न भक्तिभिः । भूयःसन्धाय तं प्रैषीद्देशोपरि महाशयः ॥१४॥
पुरे सहस्रिणस्तस्य विहरन्नन्यदाभ्यगात् । नाम्ना **सुदर्शनः** सूरिर्विन्दनीयो मनीषिणाम् ॥१५॥
तमागत्य नमस्कृत्य धर्मं श्रुत्वा च कृत्यवित् । प्राह साहस्रमल्लो मां दीक्षध्वमुचितोऽस्मि चेत् ॥१६॥
उपयुज्याऽथ स ज्ञानी ग्राहयामास तं व्रतम् । सोऽप्यधीतागमः प्राप जिनकल्पं मुनिः क्रमात् ॥१७॥
विहरन् **कालसेन**स्य मण्डले स गतोऽन्यदा । द्रागेत्य प्रत्यभिज्ञाय प्राग्वैरादर्दितोऽमुना ॥१८॥
सेहे तथा समर्थोऽपि तदा तस्य कदर्थनाम् । समाः क्षमायां कोपे वा तादृशा एव तादृशाम् ॥१९॥
आक्रुष्टो वा हतो वाऽथ यावद् व्यापादितोऽथवा । समतामिव तत्याज न तावत् करुणां मुनिः ॥२०॥
कृतार्थजन्मा सर्वार्थगीर्वाणत्वमवाप्य सः । भेजे प्रतिभुवं मुक्तेरनुत्तरसुखश्रियम् ॥२१॥

**इति सहस्रमल्लकथानकम् ॥**

---

१. ह्रिणीयमान...P ।

टि. 1. लज्जमानः । 2. मडम्बपतिमात्रम् ।

अनेन च **सहस्रमल्ल**दृष्टान्तेन सर्वसाधूनां क्षन्तव्यमेवोचितमित्याह—

**दुज्जणमुहकोदंडा, वयणसरा पुव्वकम्मनिम्माया ।**
**साहूण ते ण लग्गा, खंतीफलयं वहंताणं ॥१३८॥**

**दुर्जनमुखं** खलाननं, विनिर्गमहेतुतया **कोदण्डं** धनुर्येषां ते तथा भेदकत्वाद् **वचनान्येव शरास्ते** च **पूर्वकर्मनिर्मिताः** पुराकृत[१]तदुष्कृतजनिताः । शराश्च ज्याकर्षका करमुष्टिः[२] **पूर्वा, तत्कर्मणा** तद्व्यापारेण **निर्मिताः** सामर्थ्यं नीताः । **साधूनां ते न लग्ना** [इत्यत्र] भूतनिर्देशः सिद्धमिदमिति त्रैकालिकत्वज्ञापनार्थः, तन्निवारणकारणत्वात् **क्षान्तिरेव फलकम्** अड्डनं[३][1] **वहतां** धारयतामिति ॥१३८॥

पूर्वकर्मकृतास्ते वचनशरा इति विवरीतुम् अधीरधीरयोर्दृष्टान्तं प्रथममाह—

**पत्थरेणाहओ कीवो, पत्थरं डक्कुमिच्छइ ।**
**मियारिओ सरं पप्प, सरुप्पत्तिं विमग्गइ ॥१३९॥**

**प्रस्तरेणाहतः क्लीवः**[2] श्वानो रोषणतया, **प्रस्तरं दष्टुमिच्छति** भक्षयितुं वाञ्छति, न च शक्नोति । **मृगारिस्तु** सिंहः पुनः **शरं** वपुर्भेदकत्वात् **प्राप्य** शरीरेणासाद्य, **शरोत्पत्तिं मृगयते** । कुतोऽयमायात इति तदुत्पत्तिमूलं निभालयतीति ॥१३९॥

क्लीव इवाविवेकी उपसर्गकारिणं लोष्टमिवाऽपचिकीर्षुर्यतते, विवेकी तु सिंह इव तन्मूलोत्थानमन्वेषयन्नेवं भावयति—

**तह पुव्विं किं न कयं, न बाहए जेण मे समत्थो वि ।**
**इण्हिं किं कस्स व कुप्पिमो त्ति धीरा अणुप्पेच्छा ॥१४०॥**

**तथा पूर्वं** प्राग्जन्मनि, **किं न कृतं** कुशलकर्म, **येन मां न बाधते समर्थोऽपि,** आस्तामधमः प्रभविष्णुरपि, अतो ममैवायं दोषो नापकर्तु**रिदानीं किं कुप्यामः** निष्कारणं किं क्रुध्यामः, **कस्य वा**ऽन्यस्योपरि **इति** पर्यालोच्य **धीरा अनुत्प्रेक्षा** अविह्वला भवन्तीति ॥१४०॥ तदेवं द्वेषत्यागमुक्त्वा रागत्यागं दृष्टान्तेनाह—

**अणुराएण जइस्स वि, सियायवत्तं पिया धरावेइ ।**
**तह वि य खंदकुमारो, न बंधुपासेहिं पडिबद्धो ॥१४१॥**

**अनुरागेण** स्नेहेन, **यतेरपि** सतः, **सितातपत्रं पिता** जनको, **धारयति, तथापि** प्रतिबन्धकारणे सत्यपि, **स्कन्दकुमारो** महर्षिर्न **बन्धुपाशैः** स्वजनप्रेमबन्धनैः, **प्रतिबद्ध** इति ॥१४१॥ अत्राख्यानकम्—

**[ स्कन्दकुमारकथानकम् ॥ ]**

**श्रावस्ती**त्यस्ति पूस्तस्यां नृपः **कनककेतनः** । पत्न्यां **मलयसुन्दर्यां स्कन्दको**ऽस्य च नन्दनः ॥१॥
तस्याऽनुजा **सुनन्दा** च नन्दिनी मेदिनीभुजा । ददे[४] **पुरुषसिंहाय** सा **काञ्च्यां** पुरि भूभुजे ॥२॥
सौन्दर्यौदार्यशौर्यादिगुणानां **स्कन्दकस्तु** सः । मिथःप्रीतिसुधापानसंपीति[५][3]सदनं स्थितः ॥३॥

---

१. कृतजनिताः KH, C, A, D, P, K, L । २. मुष्टिपूर्वा - A, B । ३. ओड्डनं - KH, उड्डनं - C । ४. ददौ - D, K, C । ५. मपीति - KH, सपीतिं - L । सप्रीतिः D, K ।

टि. 1. अड्डनं-'ढाल' इति भाषायाम् । 2. क्लीवः-निर्वीर्यः कायरः इति यावत् । 3. राज्ञ एकत्र भोजनं, पानं इति सपीतिः ।

श्रावस्त्यामन्यदा पुण्योद्यानं बहिरुपेयुषः । सूरेर्**विजयसेन**स्य वन्दकः **स्कन्दको**ऽगमत् ॥४॥
धर्मं श्रुत्वा सवैराग्यः स्पृहयालुः शिवश्रियम् । स स्वं पितरमापृच्छ्य साग्रहो जगृहे व्रतम् ॥५॥
व्रतादनु पिताऽस्योच्चैः सितमातपवारणम् । अजस्रं धारयामास वात्सल्यात् परिचारकैः ॥६॥
**प्रतिकूलेऽनुकूले च द्विष्टैः शिष्टैश्च कल्पिते । द्वेषमूर्च्छोभयत्यागात् संयमी खलु संयमी ॥७॥**
श्रद्धालौ तीव्रनिर्बन्धे भक्तिमातन्वति स्वयम् । विधिवत् प्रतिषेधेऽपि शान्ताः सम्यगुदासते ॥८॥
क्रमेणाऽधीतसिद्धान्तः स्वगुरूणामनुज्ञया । जिनकल्पं प्रपद्याऽयं विजहार धरातले ॥९॥
क्रमात् **काञ्चीं** पुरीं प्राप्तो रथ्यायां विहरन्नसौ । गवाक्षगतयाऽदर्शि सहोदर्या **सुनन्दया** ॥१०॥
बन्धुर्बन्धुसधर्मा वा सातपत्रैः[१] क ईक्ष्यते । इत्यस्याः संशयानाया मुदा हृदयमस्फुरत् ॥११॥
दृशा तमेव पश्यन्ती स्निग्धयाश्रु[२]विमिश्रया । तत्त्वा[1]द्भावानभिज्ञेन दृष्टा प्रियतमेन सा ॥१२॥
तद्दृष्टिरागमेवागस्तेनोत्प्रेक्ष्य विशङ्किना । अघानि चिन्वताऽघानि मुनिर्निशि दुरात्मना ॥१३॥
अन्तःपुरोपरि स्रस्ता रक्ताक्ता शकुनेर्मुखात् । सम्यक् विलोकिता प्रातर्महर्षेर्मुखपोतिका ॥१४॥
किमेतदिति पृष्टाऽथ **प्रियादासी** जगाद ताम् । स ह्यो दृष्ट[2]चरः[३] साधुर्निशि केनाऽपि घातितः ॥१५॥
मूर्च्छिता तन्निशम्यैव महीपीठे लुलोठ सा । दास्यैवाश्वास्य पृष्टाऽथो जगाद करुणां गिरम् ॥१६॥
भ्राताऽयं **स्कन्दको** ज्यायान् मा भूदिति मतिर्मम । यत्तपस्तप्यते सोऽपि तीव्रमित्यस्ति मे श्रुतिः ॥१७॥
न चैवमन्यमालोक्य नेत्रयोर्मनसश्च मे । निर्वृतिर्जायते हञ्जे[3]ऽतितरां कातराऽस्मि तत् ॥१८॥
सम्यक् प्रवृत्तिमन्वेष्टुं जनकस्याऽथ वेश्मनि । सा प्रैषीन्मानुषं सोऽपि प्रत्यायातो न्यवेदयत् ॥१९॥
जिनकल्पो गतः काञ्चीमिति श्रुत्वाऽथ तद्गिरम् । मोहेन मूर्च्छता मूर्च्छां प्रापिता साऽपि तापिनी[४] ॥२०॥
शनैः संज्ञां समासाद्य माद्यद्दुःखा रुरोद सा । हा मद्वत्सल ! हा बन्धो ! हा क्वाऽसीति प्रलापिनी ॥२१॥
जनकान्निर्विशेषस्य दैवता[4]दुत्तमस्य च । अग्रजस्य मुनेः कीदृग् मङ्गल्यं निर्ममे मया ॥२२॥
अहो सहोदरत्वेऽपि कियदन्तरमावयोः । तीर्थानां पावनः स त्वमहं पापेषु पापिनी ॥२३॥
विलपन्त्येवमन्यान्यैरपूर्वैः प्रेक्षणेक्षणैः । साऽनीयत विशोकत्वं चिरान्मन्त्रिमहत्तमैः ॥२४॥
अद्यापि तत्प्रभृत्येव तत्र देशे मृगीदृशाम् । अवधिः प्रेक्षणीयानां भ्राजते भ्रातुरुत्सवः ॥२५॥

**इति स्कन्दकुमारकथानकम् ॥**

अमुमेवार्थं समर्थयति–

**गुरु गुरुतरो य अइगुरू, पिइमाइअवच्चपियजणसिणेहो ।**
**चिंतिज्जमाणगुविलो, चत्तो अइधम्मतिसिएहिं ॥१४२॥**

---

१. त्रकिमीक्ष्यते– L त्रःकईष्यते – K त्रःसईष्यते – KH । २. श्रतिमिश्रया – P श्रवि....A । ३. वरः–P, A, KH, C । ४. तापसी A ।

टि. 1. परमार्थतः इत्यर्थः । 2. [भूतपूर्वे पृचरट्] ७।२।७८ इत्यनेन चरट् प्रत्ययः, दृष्टपूर्वः इत्यर्थः । 3. हञ्जे – दास्या आमन्त्रणार्थकोऽयं शब्दः । 4. दैवतः–देवः, तस्मात् ।

**गुरुर्गुरुतरोऽतिगुरुः** क्रमेण **पितृमात्रोरपत्येषु प्रियजनेषु** च तेषां द्वन्द्वे तेषु तद्विषयः **स्नेहः** । तत्र **गुरुः** पितृमातृजः स्नेहो दुस्त्यजत्वात्, **गुरुतरो**ऽपत्यस्नेहो दुस्त्यजतरत्वात्, भार्याभगिन्यादिप्रीतिः प्रियजनस्नेहः सुदुस्त्यजतमत्वात् **अतिगुरु**स्तद्वियोगादौ मरणादिदर्शना**च्चिन्त्यमान**श्चायं **गुपिलो** गहनतमः, **त्यक्तोऽतिधर्मतृषितै**र्धर्म्मलम्पटैः साधुभिर्विरुद्धत्वात् तस्येति ॥१४२॥

यतः—

**अमुणियपरमत्थाणं, बंधुजणसिणेहवइयरो होइ ।**
**अवगयसंसारसहाव-निच्छयाणं समं हिययं ॥१४३॥**

**अमुणितपरमार्थानां बन्धुजनस्नेहव्यतिकरो भवति** । **अवगतसंसारस्वभावनिश्चयानां** निर्ज्ञातविशरारुरूपसंसारस्वरूपनिश्चयानां साधूनां, **समं** तुल्यं तेषु बन्धुषु रागत्यागात् तदितरेषु द्वेषत्यागाच्च एकोदासीनस्वभावं **हृदय**मिति ॥१४३॥

वत्सलेषु बन्धुषु स्नेहः कथं त्याज्य इत्यपि मृगतृष्णा तेषामिहाप्यनर्थहेतुत्वादिति सप्तभिर्दृष्टान्तैः प्रतिपादयितुमिदमाह—

**माया पिया य भाया, भज्जा पुत्ता सुही य नियगा य ।**
**इह चेव बहुविहाइं, करंति भयवेमणस्साइं ॥१४४॥**

**माता पिता च भ्राता भार्या पुत्राः सुहृदश्च** मित्राणि, **निजकाश्च** स्वजनाः, सर्वत्र **च**शब्दाः समुच्चये । **इहैव बहुविधानि** नानाप्रकाराणि, **कुर्वन्ति भयवैमनस्यानि** त्रासमनोदुःखानीति समुदायार्थः ॥१४४॥

अवयवार्थं तु प्रतिद्वारं विवक्षुरिदमाह—

**माया नियगमइविगप्पियम्मि अत्थे अपूरमाणम्मि ।**
**पुत्तस्स कुणइ वसणं, चुलणी जह बंभदत्तस्स ॥१४५॥**

**माता** जननी, **निजकमतिकल्पिते** स्वकबुद्धिचिन्तिते**ऽर्थे**ऽ**पूर्यमाणे**ऽसङ्घट्टमाने, **पुत्रस्य करोति व्यसन**मापदम् । **चूलनी यथा ब्रह्मदत्तस्ये**ति समासार्थः । व्यासार्थस्तु **ब्रह्मदत्तचरिते** प्रागुक्त एव ॥१४५॥

पितरमधिकृत्याह—

**सव्वंगोवंगविगत्तणाओ, जगडणविहेडणाओ य ।**
**कासी य रज्जतिसिओ, पुत्ताण पिया कणयकेऊ ॥१४६॥**

**सर्वाङ्गोपाङ्गविकर्त्तनाः** सकलाऽवयवच्छेदनाः, **जगडनविहेडनाः** कदर्थनविबाधनाश्च, **अकार्षीत्** कृतवान्, **च**शब्दात् कारितवांश्च । **राज्यतृषितः** पुरा ममैते राज्यं हरन्तीति बुद्ध्येत्यर्थः, **पुत्राणां पिता कनककेतु**र्नाम राजेति ॥१४६॥ **कनककेतु**कथा चैवम्—

**[ कनककेतुकथानकम् ॥ ]**

सम्पदां धामनि पुरा पुरे **तेतलि**नामनि । अत्युग्रशासनो जज्ञे राजा **कनककेतनः** ॥१॥

[1]मन्दाक्ष[2]दाक्ष्य[3]दाक्षिण्य[4]क्षुण्णधीस्तस्य भूभुजः । कान्ता कान्तिपराभूतपद्मा **पद्मावती**त्यभूत् ॥२॥
सत्कलादयितो मन्त्री कलादस्तस्य भूभुजः । नाम्ना **तेतलिपुत्रो**ऽभूत् **पोट्टिला**जानिरुत्तमः ॥३॥
राज्ये गृध्नुर्नृपो [5]ब्रध्नतेजा[6]स्त्रस्नुर्निजाङ्गजान् । जातमात्रानपि व्यङ्गीचकार [7]भृशदारुणः ॥४॥
नयने नासिकां कर्णौ करं चरणमङ्गुलीः । निकृन्तन् कस्यचित् किञ्चित्तानन‍र्हांश्चकार सः ॥५॥
अनाश्वस्तस्तथाप्येतान् यौवनाभिमुखान् पिता । चिक्षेप दुर्गकारायामशनेनाऽपि सीदतः ॥६॥
जन्मनि व्यङ्गिताङ्गत्वं स्याद्येषा[१]मङ्गमङ्गलम् । तेषां कारैव कौमारभुक्तिर्युक्तिमिहाञ्चति ॥७॥
[8]राजबीजार्थिनोऽमात्याः प्रियापत्याः स्त्रियस्तथा । मनसानि[२]च्छतोऽप्यासन् भर्तु[३]श्छन्दोऽनुवर्त्तिनः ॥८॥
अन्यदाऽथ महास्वप्नसूचिताऽद्भुतवैभवम् । **पद्मावती** महादेवी दध्रे दोहदलक्षणम् ॥९॥
अनागतममात्येन तस्य जातस्य गुप्तये । सा [४][9]मन्त्रं मन्त्रवद् गुप्तं **पद्मावत्य**करोदिति ॥१०॥
अमात्यस्य प्रियाऽऽपन्नसत्त्वा साऽप्यस्ति **पोट्टिला** । गर्भयोर्व्यत्यये राज्ञी मन्त्रिणा [10]संविदं व्यधात् ॥११॥
राज्ञी प्रासूत सा सूनुमनूनशुभलक्षणम् । कन्या तु मन्त्रिणः पत्न्या दैवयोगादजायत ॥१२॥
रक्षापरा परावर्त्त्य कन्यया तं निजाङ्गजम् । उत्सवं मन्दिरे राज्ञो मन्त्रिणश्च व्यधादियम् ॥१३॥
जातकर्मणि वृत्तेऽस्य विशुद्धौ सूतकस्य च । महेन सचिवश्चक्रे तं नाम्ना **कनकध्वज**म् ॥१४॥
कुमारोऽयं समारोहन्नूद्ध्वोर्द्धं च वयः शनैः । कलाः पुष्टिलया पुष्टिं नीयमानोऽग्रहीत्तराम् ॥१५॥
तस्य **तेतलिपुत्रस्य** कस्यचित् कर्मणो वशात् । इष्टापि सा तथाऽकस्मादनिष्टाऽजनि **पोट्टिला** ॥१६॥
विशेषात् धर्मशुश्रूषां सा पुरस्कृत्य [५]**पोट्टिला** । उपास्ते व्रतिनीश्चित्ते सुभगङ्करणाशया ॥१७॥
एकां कदाचिदेकान्ते सा प्रवीणां प्रवर्त्तिनीम् । अवादी[11]न्मन्युदीनास्या मातः ! पातकतो[12]ऽव माम् ॥१८॥
अत्राऽहं **मूषिकारस्य** श्रेष्ठिनो दयितात्मजा । दृष्ट्वाऽनुरागतोऽभ्यर्थ्य परिणीताऽस्मि मन्त्रिणा ॥१९॥
प्राणा अपि ममाधीना [६]प्रसादः प्रागभूदिति । न मां प्रत्यभिजानाति परावृत्त इवाधुना ॥२०॥
यन्मामकमकर्मेदं मातरातङ्ककारणम् । प्रसीद [13]सीदतात् तन्मे भाग्यमा[७]सीदतात् पुनः ॥२१॥
आर्याप्युवाच सा कार्याद्यतस्त्वं यतसेऽधुना । नाऽयं पतिव्रताचारोऽस्माकं च महती क्षतिः ॥२२॥
वत्सेऽभिधत्से किं नाम त्वमनालोच्य तत्त्वतः । कथं पतिव्रता नारी [14]कुहकेषु मतिं क्षिपेत् ॥२३॥

---

१. मंगलक्षणं - C। २. पिभुवोप्या...B, निभ्नुवो...A। ३. छन्दा...K, KH, B, D, L। ४. मन्त्रि - C मंत...KH, A, मंत्रंतत्ववद्-L मंत्रमंत्रंवद् - D, K। ५. पुष्टिला - C, A। ६. प्रासादात् KH, प्रमादः-D, K प्रासादः-L, H। ७. सीदतां - KH, C सीदता - L।

टि. 1. मन्दाक्षं - लज्जा। 2. दाक्ष्यं - कौशल्यं। 3. दाक्षिण्यं-पराभिप्रायानुसरणम्। 4. क्षुण्णं-अभ्यस्तं। 5. ब्रध्नः-सूर्यः तस्य तेज इव तेजो येषां ते, तान्। 6. त्रस्नुः-कायरः भीरुः। 7. भृशं-अत्यन्तं। 8. राजबीजं-राजवंशजं राजवीर्यं वा। 9. मन्त्रः-गुप्तभाषणम्, तम्। 10. संविद्-संकेतः, तम्। 11. शोकेन दीनास्या दीनवदना। 12. अव-रक्ष माम्। 13. सीदतात्-नाश्यतात् अकर्म इति अनेनाऽन्वयः। 14. कुहकं माया, शाठ्यं इति यावत्।

मन्त्रमूलबलात् प्रीतिः पतिद्रोहोऽभिधीयते । विषदानप्रकारो हि वशीकरण[१][1]संविधिः ॥२४॥
असत्कर्मापि सत्कर्म मन्येऽहं येन साम्प्रतम् । विच्छिन्नः प्रीतिपाशस्ते स हि संसारबन्धनम् ॥२५॥
**कामो हि विपदां मूलं कामत्यागस्तु सम्पदाम्** । [२]विकामश्च सकामश्च मतौ मे स्वस्थ-रोगिणौ ॥२६॥
सुखादापृच्छ्य भर्त्तारं विगतस्नेहबन्धनम् । गृहाण व्रतमानन्दवशीकरणकारणम् ॥२७॥
तस्या वचन[३]मापीय कर्णाभ्याममृतोपमम् । विषयानलजं तापं सा मुमोच मनस्विनी ॥२८॥
[४]आपृच्छताग्रहेणाऽथ प्रियं तेतलिनन्दनम् । सोऽनुमेने प्रतिश्राव्य प्रतिबोधं किलात्मनः ॥२९॥
अथ श्रामण्यमादाय तपस्तप्त्वाऽतिदुस्तपम् । स्वल्पैरेव दिनैराप सा पदं स्वर्निवासिनाम् ॥३०॥
कालेन पृथिवीपाले कालस्यालयमीयुषि । तस्मिन् **कनककेत्वाख्ये** राज्याऽनर्हीकृतात्मजे ॥३१॥
सामन्तमन्त्रिवर्गे च किं कृत्यमिति मुह्यति । राज्ञी प्रोवाच मा कार्षुश्चिन्तां मन्त्रिमहत्तमाः ! ॥३२॥
गर्भाद् गर्भान्तरं नीतो मया गुप्तोऽस्ति रक्षितः । गृहे **तेतलिपुत्रस्य** पुत्रो मे कनकध्वजः ॥३३॥
कृताभिषेकस्तैः सर्वैः स बभूवाऽवनीधवः । तस्य **तेतलिपुत्रो**ऽयं राज्ये सर्वेश्वरोऽजनि ॥३४॥
नृपादप्यधिकस्याऽस्य सुखिनस्त्रिदशादपि । बोधाय [५]**पोट्टिला**देवो नाऽवकाशमलब्ध सः ॥३५॥
**उत्तमाः सुखिनो बोध्या दुःखिनो मध्यमाः पुनः । सुखिनो दुःखिनो वाऽपि बोधमर्हन्ति नाऽधमाः** ॥३६॥
सुखमत्तस्य तत्तस्य न विना दुःखदर्शनम् । भवेद् बोध इति ध्यायन्निश्चिकाय सुधाशनः ॥३७॥
निष्कारणमथाकस्मादस्मै देवानुभावतः । चुकोप मन्त्रिणे [2]धात्रीगोपस्**तेतलिसूनवे** ॥३८॥
मन्त्रिणा मौलिना लीढचरणेनाऽथ पार्थिवः । यावद्विज्ञप्यते तावन्निर्दाक्षिण्योऽन्यतो गतः ॥३९॥
निर्विद्याथ गतः सद्म [६]मन्त्री परिजनैरपि । परिभूतो विषेणाऽपि न ममारामरेच्छया ॥४०॥
शस्त्राणि कुण्ठतां भेजुः पाशरज्जुरशीर्यत । प्रविश्य कक्षं मुक्तस्तं नाऽधाक्षीदा[3]शुशुक्षणिः ॥४१॥
अन्धावगाधेऽथाऽपप्तज्जानुदघ्नत्वमाप सः । मन्त्री दिशमथाऽऽदाय नगरान्निरगादयम् ॥४२॥
पुरीपरिसरेऽप्युग्रं तत्रा[4][७]ऽदृष्टचरं पुरा । अरण्यमग्रतो मार्गेऽगाधगर्त्तं च दृष्टवान् ॥४३॥
करालकरवालां च पार्श्वयोस्तस्करावलीम् । अद्राक्षीदनुधावन्तं क्रुधावन्तं च कुञ्जरम् ॥४४॥
अत्रान्तरे च भीभग्नधैर्या[८]द्गिरिमाद्भुतः । दध्यौ क्वाऽसि प्रिये ! वाचं देहि प्रतिविधेहि माम् ॥४५॥
क्षमस्वाऽऽगस्त्वमागत्य दर्शनं देहि [5]मामव । तदुक्तेनेति चाऽऽकृष्टिमन्त्रे[९]णैवैत्य **पोट्टिला** ॥४६॥
भीतस्य खलु भोः कामं जन्तोः प्रव्रज्यया विना । जगाद शरणं नान्यस्**तेतले**ः सुतमित्यसौ ॥४७॥ विशेषकम् ॥
तथेति प्रतिपेदाने भावतस्तत्र मन्त्रिणि । स मायां शमयामास समग्रां **पुट्टिला**ऽमरः ॥४८॥

---

१. सन्निधिः - K, D, । २. निःकामश्च - P । ३. माकर्ण्य - K, B, D, A, H, L । ४. महाग्रहादथापृच्छत् - K, C, D, KH । ५. पुट्टिला - B, C । ६. मित्रैः C । ७. दृष्टवरं - C । ८. गिरिगा - P गिरिमा - A, L, H । ९. णेवैत्य - P, B, D, A, KH, H ।

टि. 1. संविधिः उपायः । 2. धात्रीगोपः राजा । 3. आशुशुक्षणिः-अग्निः । 4. अदृष्टपूर्वम् इत्यर्थः । 5. माम् अव-रक्ष ।

**कनकध्वज**राजोऽथ प्रत्यावृत्तमनाः स्वयम् । मात्रा समं समभ्येत्य क्षमयामास मन्त्रिणम् ॥४९॥
प्रशान्तोपप्लवः शान्तस्वान्तो दान्तेन्द्रियश्च सः । आपृच्छ्य क्ष्मापतिं मन्त्री निश्चक्राम विमानगः ॥५०॥
भवापस्मार[१]मुक्तोऽसौ सस्मार प्राक्तनं भवम् । चतुर्दशापि पूर्वाणि पूर्वाधीतानि चाऽस्मरत् ॥५१॥
धाराधिरूढवैराग्यः सोऽपूर्वकरणक्रमात् । अवाप केवलज्ञानं संमुखीनमिवागतम् ॥५२॥
देवतादत्तलिङ्गोऽथ सिद्धः कालेन तेतलिः । बोधहेतुः प्रबुद्धानां ज्ञातेषु ख्यातिमासदत् ॥५३॥ [ग्रन्थाग्रं-५९४९]

**इति कनककेतुकथानकम् ॥**

अथ भ्रातृवैसदृश्यमुद्दिश्याह–

**विसयसुहरागवसओ, घोरो भायाऽवि भायरं हणइ ।**
**आहाविओ वहत्थं, जह बाहुबलिस्स भरहवई ॥१४७॥**

**विषयसुखरागवशगः** कारणे कार्योपचारात् साम्राज्यसुख[२]लोभपरवशः, **घोरः** प्रहरणग्रहणभयङ्करो, **भ्राताऽपि भ्रातरं हन्ति, आधावितो वधार्थम**भिमुखमागतो व्यापादननिमित्तं, **यथा बाहुबलिनो भरतपति**श्चक्रीति ॥१४७॥ **भरतकथा** चैवम्–

**[ भरतकथानकम् ॥ ]**

**अयोध्या**यां पुरा भर्तुर्वृत्ते ज्ञानमहोत्सवे । आयुधानां स्वयं धाम जगाम **भरतेश्वरः** ॥१॥
चक्री चक्रं नमस्कृत्य क्षत्रप्रत्यक्षदैवतम् । अष्टाहिकोत्सवं चक्रे तत्रैव निवसन्नसौ ॥२॥
अथ [1]प्रास्थानिके लग्ने कृतप्रस्थानमङ्गलः । अनुचक्रं दिशि प्राच्यां करिरत्नेन सोऽचलत् ॥३॥
छत्रचर्माश्वसेनानीखड्गदण्डपुरोधसः । कुटुम्बी मणिकाकिण्यौ वर्द्धकिश्च नृपानुगः ॥४॥
चचाल रत्नस्तोमोऽयं देवताकृतसन्निधिः । दिगन्तभूपतीनां तु चकम्पे हृदयावनिः ॥५॥ युग्मम् ॥
चेले समं ततस्तेन सामन्तैश्च समन्ततः । सितांशुनेव नक्षत्रैः स्फुरत्तेजोमयात्मभिः ॥६॥
तरङ्गैरिव पाथोधेस्तुरङ्गैर्वायुचञ्चलैः । चलितं कलितोत्साहैः प्रतिकूलेऽप्यभङ्गुरैः ॥७॥
अथ प्रतस्थे वेगेन हास्तिकं गर्जितोर्जितम् । प्रत्यर्थिक्षितिभृत्तेजोदाववारिदमण्डलम् ॥८॥
निजानाकारयन्तोऽथ कारयन्तोऽरितर्जनम् । ध्वजाञ्चलैश्चलैश्चेलुः समेनैव पथा रथाः ॥९॥
अनुचक्रं व्रजन्ती च द्विगव्यूतिप्रयाणकैः । तीरे नीरेशितुः प्राप पतिप्रीत्येव [2]वाहिनी ॥१०॥
तत्र वर्द्धकिरत्नेन [3]निर्मितानमितश्रियः । आवासानावसन्ति स्म सैनिकाः स्मेरविस्मयाः ॥११॥
चक्रे पौषधशालां च विशालां रत्नशालिनीम् । वर्द्धकिर्वर्द्धितानन्दश्चक्रिणः पुण्यपुञ्जवत् ॥१२॥
तस्यामुत्तीर्य सद्वीर्यः कुञ्जराद् राजकुञ्जरः । प्रविवेश नभोदेशमिवार्कः पूर्वपर्वतात् ॥१३॥

---

१. युक्त H, L । २. लाभ - KH, D ।

टि. 1. प्रस्थानसमयसम्बन्धि तूर्यादि । 2. वाहिनी-सेना, नदी च । 3. निर्मितान् अमितश्रियः इति सन्धिविच्छेदः ।

दर्भसन्दर्भनिष्पन्नस्[1]स्रस्तरे स्रस्तपातकः । उपवासत्रयं चक्रे तत्र वक्रेतराशयः ॥१४॥
अथ प्रथितचातुर्यस्तुर्येऽहनि [१]महामहाः । सुगन्धिभिर्जलैः स्नातो बली बलिविधिं व्यधात् ॥१५॥
सर्वाण्यस्त्राण्युपादाय शक्रदायादविक्रमः । अथारूढो रथं चक्री गरुत्मन्तमिवाच्युतः ॥१६॥
नाभेयभू रथं [2]नाभिद्वयसे पयसि स्थिरम् । विरचय्य समुद्रान्तः समुन्मुद्रितकार्मुकः ॥१७॥
सौवर्णं विस्फुरद्वर्णं नामाङ्कितमथो शरम् । पुङ्खमध्यमुखाधीशसुपर्णभुजगासुरम् ॥१८॥
दिशि **मागध**तीर्थस्य पत्युरत्युज्ज्वलाकृतिम् । क्ष्मापश्चिक्षेप साक्षेपं विद्युद्दण्डमिवाम्बुदः ॥१९॥ विशेषकम् ॥
सभायां **मागधेश**स्य पक्षसूत्कारदारुणः । स चेषुर्वेगसम्पन्नः पन्नगारिरिवाऽऽपतत् ॥२०॥
अथ भ्रकुटिभीमास्यः सलास्याधरपल्लवः । बालार्क[3]शोणदृक्कोणः प्राह **मागध**तीर्थपः ॥२१॥
जिघृक्षुः को हरेर्दंष्ट्रां कः क्षेप्ता ज्वलने पदम् । भ्रान्तारघट्टचक्रारमध्ये कः कुरुते करम् ॥२२॥
क एष मयि निःशेषशस्त्रविस्तृतकौशले । अक्षिपन्[4]मार्गणं मृत्युमार्गमार्गणदूतवत् ॥२३॥
इत्युत्तस्थौ समं वीरैर्धीरैः कोपातिपाटलैः । स [5]निस्त्रिंशैः स्फुरद्धूमैर्ज्वालावर्त्तैरिवानलः ॥२४॥
अथ व्यालोकयामास तन्मन्त्री तस्य पत्रिणः । अक्षराणि [6]फले[२] [7]दूतजिह्वायामिव शुद्धधीः ॥२५॥
**वृषभ**स्याऽऽदिदेवस्य सूनु**र्भरत**चक्रभृत् । इत्यादिशति वो दण्डं दत्त राज्ये स्पृहा यदि ॥२६॥
वर्णानिमानमात्येन्द्रः प्रबलोऽप्यवलोक्य सः । मुमोच मदमुद्दामः प्रेक्ष्य मन्त्रमिवोरगः ॥२७॥
पतिं प्रति प्रतिज्ञातत्यागहेतोरदोऽवदत् । स्वामिन् ! विमुञ्च संरम्भमम्भःपतिरिव प्रगे ॥२८॥
असावसमशौण्डीर्यश्चक्री भूचक्रभूषणम् । भवतो **भरत**क्षेत्रपतिश्चिक्षेप सायकम् ॥२९॥
एतस्य भागधेयानि मागधेश ! विरेजिरे । प्रतिवासरवर्द्धीनि स्पर्द्धीनि प्रथमेन्दुना ॥३०॥
अनल्पोऽपि हि कल्पान्ते क्षीयते क्षीरनीरधिः । सुपर्वपर्वतः सोऽपि कम्पतेऽहर्पतिः पतेत् ॥३१॥
[8]पोत्री धात्रीतलं मुञ्चेत् पविश्छविमथ त्यजेत् । अङ्गभङ्गमसौ किं तु भजेन्न हि महाभुजः ॥३२॥
अस्मै षट्मेदिनीखण्डमण्डनाय महीभुजे । दण्डमुद्दण्डकोदण्डदोर्दण्डाय प्रयच्छ तत् ॥३३॥
निशम्य सम्यगित्येष वचनं सचिवेशितुः । समं भुजाभृतां [9]तत्या तत्याज [३]परुषां [10]रुषम् ॥३४॥
तत्काण्डदण्डं दण्डं च समादाय समागतः । नत्वा श्री**भरतं** वाचमित्युवाच स **मागधः** ॥३५॥
ममैव [४]पुण्ये नैपुण्यं ममैव प्रगुणा गुणाः । तेजस्वी यस्य नाथस्त्वमम्भोजस्येव भास्करः ॥३६॥

---

१. महामहा – D, महात्मनाः A, महामहः L, महामनाः – H, KH । २. लैर्दू – K, B, A, D । ३. परुषारुषः C, परुषारुषं KH । ४. पुण्यनैः A, B, KH ।

टि. 1. स्रस्तरः–आसनम् । 2. नाभिद्वयसम्–नाभिप्रमाणं, तस्मिन् [७।१।१४२] वोर्ध्वं...इत्यनेन सूत्रेण द्वयसट् प्रत्ययः । 3. शोणः–रक्तः । 4. मार्गणः–बाणः तम् । 5. निस्त्रिंशः–क्रूरः, तैः । 6. फलः–इषोरग्रभागः, तस्मिन् । 7. दूतस्य संदेशवाहकस्य जिह्वा, तस्याम् । 8. पोत्रिन् – धात्रीवाहकः वराहः । 9. ततिः–श्रेणी, तया । 10. रुष् (स्त्री) – क्रोधः, ताम् ।

अतः परं गतः पारं सिन्धोरप्यस्मि ते वशः । जानीहि मां हि[1]मांशुश्रीश्चकोरमिव सेवकम् ॥३७॥
तं विसृज्य प्रसन्नेन रथोऽथ पृथिवीभुजा । जवादचाल्यताऽम्भोधेः संरम्भाच्च मनोरथः ॥३८॥
प्राप्तोऽथ क्ष्मापकोटीरः कटकं जितकण्टकः । **मागधाधीश**मुद्दिश्य स्पष्टमष्टाह्निकां व्यधात् ॥३९॥
अथाऽनुचक्रं चलिता चक्रवर्त्तिचमूस्तदा । तटं जगाम सङ्ग्रामदक्षिणा दक्षिणाम्बुधेः ॥४०॥
**वरदामा**धिनाथोऽपि तत्र **मागध**नाथवत् । विगृह्य जगृहे दण्डमखण्डं चक्रवर्त्तिना ॥४१॥
विहिताष्टाह्निकस्तत्र चक्रमार्गानुगः क्रमात् । विपश्चित् पश्चिमं प्राप तीरं नीरनिधेरयम् ॥४२॥
[2]प्रभासान्द्रः **प्रभासेन्द्रं** जित्वा तत्रापि पूर्ववत् । चिन्तारत्नशिरोरत्नसुवर्णादी[१]न्यदण्डयत् ॥४३॥
तत्कृताष्टाह्निकः श्रीमाननुचक्रं चलद्बलः । ययौ चक्री महासिन्धुः **सिन्धोर्**दक्षिणरोधसि ॥४४॥
पूर्ववत् पौषधागारे विरचय्याष्टमं तपः । असावसाधयद्वेगाद्देवतां **सिन्धु**देवताम् ॥४५॥
अथ सा नभसाऽभ्येत्य तरसा **भरतेश्वरम्** । ऊचे तवाहं राजेन्दो ! किंकरेव करोमि किम् ? ॥४६॥
अथो यथावदाधाय प्राभृतं सा भृतं श्रिया । जगाम चामरीभूतमुक्ताताडङ्कदीधितिः ॥४७॥
तत्रापि तापितारातिर्विहिताष्टाह्निकः क्रमात् । प्राचीं प्रति चचालाऽयं चक्रानुचरसैनिकः ॥४८॥
[२]तटीं बिभ्राण[३]मद्वैतां **वैताढ्य**मगमन्नगम् । **भरतार्द्ध**द्वयीसीमारूपं भरतभूपतिः ॥४९॥
दक्षिणेऽथ नितम्बेऽस्य स्तम्बेरममनोरमाम् । चमूममूमुचदमूममूढक्रमविक्रमः ॥५०॥
राजाऽष्टमं तपस्तेने तेनाऽथ चलितासनः । आययौ मङ्क्षु **वैताढ्यकुमारो**ऽवधिबोधितः ॥५१॥
प्रौढानि ढौकयित्वाथ ढौकनान्येष चक्रिणे । अद्यादि तव दासोऽहमित्युदित्वा जगाम च ॥५२॥
प्रकल्पिताष्टमतपःपारणेनाथ भूभुजा । अष्टाह्निकोत्सवादूर्ध्वमादिश्यत चमूपतिः ॥५३॥
**सुषेण** ! गच्छ **वैताढ्य**सिन्धुदक्षिणनिष्कुटम् । शाधि निर्बाधमुत्तीर्य **निम्नगां** चर्मरत्नतः ॥५४॥
इत्यादेशमथाऽऽसाद्य माद्यत्करिकुलाकुलैः । सार्द्धमर्द्धीकृतैः सैन्यैः **सुषेणो निम्नगा**मगात् ॥५५॥
नदीमदीनसत्कर्मा [3]चर्मानद्धेन वर्त्मना । अथोत्ततार सेनानी रसेनानीतसम्मदः ॥५६॥
सिंहलान् सिंहतुल्यौजा बर्बरान् गर्वपर्वतः । यवनान् यव[४]नाश्वश्रीः कालः कालमुखान् रणे ॥५७॥
अपरानपि राजश्रीजनको योनकादिकान् । पराजिग्ये सुखेनैव **सुषेण**[4]ध्वजिनीपतिः ॥५८॥ युग्मम् ॥
जित्वेति **सिन्धुमु**त्तीर्य कीर्यमाणयशा जनैः । चक्रिणो ढौकयाञ्चक्रे तद्दण्डान् दण्डनायकः ॥५९॥
तत्तमिस्रागुहाद्वारकपाटोद्घाटनाय सः । आदिष्टश्चक्रिणा चक्रे गत्वा तत्राऽष्टमं तपः ॥६०॥
**कृतमाला**भिधं देवमथोद्दिश्य चमूपतिः । **तमिस्रा**कन्दराद्वारि वितेनेऽष्टाह्निका[५]महम् ॥६१॥

---

१. दीनादण्ड...C । २. तटीबि - KH, K, L । तटीबि - H, B, D । ३. मद्वैता - KH, K, L, P मद्वैतं H, B, मद्वैत - L । ४. नाशुश्रीः - L । ५. महः KH, C ।

टि. 1. चन्द्रः । 2. प्रभया सान्द्रः मनोहरः प्रभासान्द्रः चक्री । 3. चर्मरत्नेनाऽऽबद्धेन मार्गेण । 4. ध्वजिनी-सेना ।

हयारूढः प्रणम्याऽथ कपाटे कन्दरामुखे । जघान दण्डरत्नेन करेणेव तमोऽशुमान् ॥६२॥
कपाटे अपि ते सद्यो दण्डघातेन रंहसा । पश्चादभूतां वीरस्य पक्षद्वयबले इव ॥६३॥
वाजिनं विनिवर्त्याऽथ प्रतिलोमं चमूपतिः । राज्ञे विज्ञपयामास कपाटोद्घाटनक्रियाम् ॥६४॥
सिन्धुरस्कन्धमारूढः पुरतो **भरतेश्वरः** । मणिरत्नं समारोप्य तमःशमनहेतवे ॥६५॥
प्रविवेश गुहागर्भं समं निजचमूचरैः । तारकानिकरैः साकम[1]भ्रान्तरिव चन्द्रमाः ॥६६॥ युग्मम् ॥
मार्गे चैकोनपञ्चाशन्मण्डलानि चकार सः । लोकाऽऽलोकाय काकिण्या वामदक्षिणपक्षयोः ॥६७॥
उन्मग्नां च निमग्नां च नद्यौ वीक्षितवानथ । तरत्यश्माऽपि पूर्वस्यां नान्यस्यां तूलमप्यहो ॥६८॥
बद्धया वर्द्धकेर्बुद्ध्या पद्यया सोऽनवद्यया । समुत्ततार ते नद्यौ यमभ्रूभङ्गभङ्गुरे ॥६९॥
अथोत्तरगुहाद्वारकपाटप्रत्तनिर्गमः । सचक्रः स व्रजन् रेजे सभानुरिव वासरः ॥७०॥
स तां गुहामतिक्रम्य **भरतार्द्धम**थोत्तरम् । विवेश जेतुं कान्तारमिव सिंहोऽतिरंहसा ॥७१॥
तत्र चापातमात्रेऽपि जनतात्रासहेतवः । मानिनो धनिनः शूराः क्रूराकारपराक्रमाः ॥७२॥
कालाः [2]कालायसेनेव क्लृप्ताङ्गा भिल्लभूभुजः । अदृष्टपूर्वाभिभवा **वसन्त्यापात**सञ्ज्ञकाः ॥७३॥ युग्मम् ॥
किरातैरथ युद्धाय सन्नद्धा[१]यत्तपत्तिभिः । चक्रिणः कृपणीचक्रे चमूचक्रं रणाङ्गणे ॥७४॥
ततः सुषेणसेनानीः [3]सेनानीरनिधेर्विधुः । तुरङ्गरत्नमारूढः खड्गरत्नकरोऽचलत् ॥७५॥
तं समायान्तमालोक्य भिल्लाः सम्मुखगामिनः । पतङ्गा इव रङ्गन्तः प्रदीपस्य विरेजिरे ॥७६॥
सौवर्ण्णं फलकं बिभ्रन् कालक्रूरासिभासुरम् । **सुषेणो**ऽभाज्जितं दीप्त्या दिनेशमिव साङ्गजम् ॥७७॥
सोढुं प्रतापमेतस्य क्षमायामक्षमा अमी । **सिन्धो**स्तीरं गता गोत्रदेवताऽऽराधनं व्यधुः ॥७८॥
तेषामाराधनेनाऽथ सुरा **मेघमुखा**भिधाः । एत्य प्राहुरहो वत्साः ! किमारब्धमिदं मुधा ॥७९॥
दूरे वयमयं जेतुं शक्रेणाऽपि न शक्यते । अलङ्घ्यशासनश्चक्री पृथिवीपाकशासनः ॥८०॥
तथाऽपि वयमेतस्य युष्माकमनुरोधतः । उपसर्गं करिष्याम इत्युक्त्वा ते तिरोऽभवन् ॥८१॥
अथ **मेघमुखै**र्देवैर्घनाडम्बरमम्बरे । विचक्रे चक्रिसैन्योर्द्धं दिगन्ताऽऽतङ्ककारणम् ॥८२॥
रसन्तो विरसं मेघा भुक्तं वार्द्धेर्जलैः समम् । उद्वमन्तो व्यलोक्यन्त [२]वाडवाग्निं तडिच्छलात् ॥८३॥
धारामुशलपातेन खण्डयन्त इव क्षितिम् । राक्षसा [३]इव तेऽभूवन् घना भीषणमूर्त्तयः ॥८४॥
चर्मरत्नम[4]थो चक्री यावद् द्वादशयोजनीम् । पाणिस्पर्शेन विस्तार्याऽऽरोहत् सह चमूचरैः ॥८५॥
छत्ररत्नमथाऽप्युच्चैस्तावन्मात्रं नभोङ्गणे । चर्मरत्नस्थलोकानामुपरिष्टात् व्यजृम्भत ॥८६॥

---

१. यतप - A, B, P, H यप...K, D । २. वडवा...B, K । ३. एव - P, C, KH ।

टि. 1. अभ्रस्यान्तर् मध्यभागे । 2. कालायसं कृष्णलोहं तेन क्लृप्ताङ्गाः निर्मिताङ्गाः इत्यर्थः । 3. सेना एव नीरनिधिः समुद्रः, तस्योल्लासकरणे विधुरिव । 4. अथो, अथ-अव्ययौ ।

छत्रदण्डोपरिन्यस्तमणिरत्नप्रभावतः । शममन्तस्तमः प्राप सम्पुटे छत्रचर्मणोः ॥८७॥
प्रातरुप्तानि धान्यानि गृहिरत्नेन चर्मणि । निष्पत्तिमापुः सन्ध्यायां तथा शाकफलाद्यपि ॥८८॥
अन्नैः शाकैः [१]फलाद्यैश्च गृहिरत्नप्रभावतः । सद्यः प्रतिगृहं प्राप्तैर्लोकः स्वर्गीव सोऽ[२]भवत् ॥८९॥
[1]तरदण्डमिवालोक्य तल्लोकैः सम्पुटं जले । भुवनेषु कृता शङ्के ब्रह्माण्डमिति कल्पना ॥९०॥
सप्तमेऽह्नि व्यतिक्रान्ते चक्री [३]चित्तमिति व्यधात् । [2]प्रत्यनीकं ममाप्युच्चैः प्रत्यनीको नु कोऽम्बुदः ॥९१॥
अथ तस्य प्रभोश्चित्तानुवर्त्तनपराः सुराः । सहस्राः षोडशाप्युद्यद्[४]भ्रूकुटीभङ्गभीषणाः ॥९२॥
गत्वा मेघमुखान् देवान् [3][५]नेत्रारुणविभानिभान् । उद्गिरन्त इव क्रोधमिदं वचनमूचिरे ॥९३॥ युग्मम् ॥
अरे रे केन वो दत्ता दुर्दैवेनेदृशी मतिः । चक्री न यदि दृष्टोऽयं तत् किं नाम्नाऽपि न श्रुतः ॥९४॥
यात तद्दूरतः क्रूरा नैव यावदयं प्रभुः । दम्भोलिनेव चक्रेणाऽभिहन्ति भवतां शिरः ॥९५॥
इति यक्षवचः श्रुत्वा तैर्द्रुतं विद्रुतं ततः । दुग्धधौतमिव व्योम वैमल्यमभजत् तदा ॥९६॥
ढौकने स्वर्णमाणिक्यगजवाजिव्रजानथ । आदाय म्लेच्छपाः सर्वे **भरतं** शरणं ययुः ॥९७॥
**भरतो**ऽपि प्रसाद्यैतान् विससर्ज्ज महाशयः । **[६]नैतेषु पक्षपातित्वमुत्तमानां हि लक्षणम्** ॥९८॥
**सिन्धोर**थोत्तरं वार्द्धिगिरिसीमान्तनिष्कुटम् । जित्वा **सुषेण**तश्चक्री ययौ क्षुद्र**हिमालयम्** ॥९९॥
दक्षिणोऽथ नितम्बेऽस्य न्यस्य सैन्यं नरेश्वरः । व्यधादुद्दिश्य **हिमवत्कुमारं** स तपोऽष्टमम् ॥१००॥
रथारूढोऽष्टमान्तेऽथ रथाग्रेण **हिमाचलम्** । त्रिस्ताडयित्वा **हिमवत्कुमार**स्येषुमक्षिपत् ॥१०१॥
द्वासप्ततिमथो गत्वा योजनान्यम्बरात्पतन् । **हिमाचलकुमारेण** वीक्षितः स शरः पुरः ॥१०२॥
विद्यामिवाऽथ कोपाग्नेः स्तम्भनीं **हिमवत्पतिः** । वीक्ष्य नामाक्षरश्रेणिं काण्डदण्डेऽतिभक्तिमान् ॥१०३॥
[4]सुमनःसुमनोमालां तथा गोशीर्षमौषधीः । ह्रदाम्भः कटकान् बाहुरक्षान् दिव्यांशुकान्यपि ॥१०४॥
गत्वा **भरत**पादान्ते प्राभृतीकृतवानयम् । **महात्मनां हि पुण्यानि किं न यच्छन्ति वाञ्छितम्** ॥१०५॥ विशेषकम् ॥
आर्षभिस्तं विसृज्याऽथ चलितः कलितः श्रिया । जघानर्षभकूटाद्रिं त्रिः शीर्षेण रथस्य सः ॥१०६॥
तत्पूर्वकटके चक्री काकिणीरत्नतोऽलिखत् । चक्रवर्त्यवसर्प्पिण्यां **भरतः** प्रथमोऽस्म्यहम् ॥१०७॥
व्यावृत्त्याऽथ गतः सैन्ये पारणं वैरिवारणः । विधायाऽष्टाहिकां चक्रे तत्र कृत्यविचक्षणः ॥१०८॥
अथ निर्दैन्यसैन्योऽयं चक्री चक्रमनुव्रजन् । उदग्नितम्बे वैताढ्यगिरेः सैन्यं न्यवीविशत् ॥१०९॥
तस्मिन्नमिविनम्याख्यौ जेतुं विद्याधरेश्वरौ । अक्षिपत् क्षितिपः क्षिप्रमभग्नप्रसरं शरम् ॥११०॥

---

१. फलाढ्यै – B, KH । २. वसत् – P । ३. चिन्ता...C । ४. भृकुटी – C, P । ५. मित्रारुणविलोचनान् – KH, ...निभानिभान् – A, H । ६. नकोपि – P ।

टि. 1. तरद् अण्डमिव इति वाच्यम् । 2. प्रति अनीकं सैन्यं प्रति इत्यर्थः । 3. नेत्रयोः अरुणा या विभा कान्तिः तया निभाः देदीप्यमानाः, तान् । 4. सुमनःसुमनोमाला-देवपुष्पाणां माला ताम् ।

अथ तौ कुपितौ वीक्ष्य चक्रनायकसायकम् । प्राप्तौ साकं निजानीकैर्युद्धश्रद्धासुदुर्द्धरौ ॥१११॥
समं विद्याधरबलैर्व्योम्नि विद्याधरेश्वरौ । विलोक्य समरं घोरमारेभे भरतेश्वरः ॥११२॥
दोर्दण्डयोः समारोप्य कोदण्डं विदधे तदा । जयश्रियः प्रवेशाय भरतो रणतोरणम् ॥११३॥
अथ द्वादशवर्षान्ते वर्षान्त इव भास्करः । करैरिव शरैश्चक्री विपक्षानक्षिपद् घनान् ॥११४॥
प्रनष्टेऽथ बले प्रह्वौ विद्याधरनरेश्वरौ । **भरतेशं** नमस्कृत्य भक्तितो वाचमूचतुः ॥११५॥
त्वं क्षमस्व क्षमास्वामिन्नेतद्दुर्वृत्तमावयोः । **प्रणिपातावधिः क्रोधः सतां हि परिकीर्तितः** ॥११६॥
स [1]चिरत्नानि रत्नानि नमिर्नमितमस्तकः । ढौकने ढौकयामास क्षमासक्ताय चक्रिणे ॥११७॥
स्त्रीरत्नेनाऽथ कन्दर्पजगज्जयपताकया । स्वापत्येन भुवपत्ये प्राभृतं विनमिर्व्यधात् ॥११८॥
एतौ च सुतयोर्न्यस्य विद्याधरधुरीणताम् । गृहीतदीक्षौ तीर्थेशसेवामेवाऽथ चक्रतुः ॥११९॥
अथ त्रिपथगातीरे सैन्यं न्यस्य नरेश्वरः । असाधयत् **सुषेणेन** गाङ्गमुत्तरनिष्कुटम् ॥१२०॥
तं चाऽष्टमतपःसम्पल्लम्पटीकृतमानसा । उपतस्थे स्वयं **गङ्गादेवी** विविधढौकनैः ॥१२१॥
तदासौ नृपमालोक्य तस्मिन्नेवानुरागिणी । ईर्ष्ययेवेषुभिर्जघ्ने विषमैर्विषमेषुणा ॥१२२॥
असौ तत्रैव तत्प्रेमवारिवारणतां गतः । निनाय नायको भूमेः सहस्राब्दीं घटीमिव ॥१२३॥
अथ **खण्डप्रपाता**ख्यां गुहामभ्येत्य भूपतिः । **नाट्यमालं** सुरं तत्र साधयामास पूर्ववत् ॥१२४॥
गुहां तामप्यतिक्रम्य **तमिस्रा**वन्नरेश्वरः । सैन्यं निवेशयामास [2]सैकते [3]सौरसैन्धवे ॥१२५॥
तत्राऽष्टमेन तपसाऽसाधयद् वसुधाधवः । निधीन् यक्षसहस्रेण प्रत्येकं कृतसन्निधीन् ॥१२६॥
साधयित्वा **सुषेणेन गङ्गा**दक्षिणनिष्कुटम् । नृपोऽचालीदथा**ऽयोध्यां** प्रति सिंहो गुहामिव ॥१२७॥
सुखं सैन्यरजःकीर्णा तुरङ्गैरुदतारि या । कष्टं मदाम्भोगम्भीरा सैव [4]सैवलिनी द्विपैः ॥१२८॥
रथाश्चेलुर्जयाद् भूमेर्भ्रमयन्तो ध्वजांशुकम् । पत्तयोऽप्यनुकुर्वाणाः कृपाणावर्त्तनैरिमान् ॥१२९॥
गोरसप्राभृतभृतो ग्रामवृद्धान् पदे पदे । भूपः स्वयमभाषिष्ट तद्भाषामौग्ध्यकौतुकी ॥१३०॥
इति क्ष्मापश्चमूरेणुपूरैः पिहितभानुभिः । एकच्छत्रामिव भुवं निर्माय स्वपुरीं ययौ ॥१३१॥
तदा च रत्नवप्राग्रे सङ्क्रान्तानां चमूनृणाम् । आरोहतामिवारूढैः पौरैः प्रीत्या करोऽर्प्पितः ॥१३२॥
अभ्युद्यातस्ततः प्रातर्गौरवात् पौरमन्त्रिभिः । सैन्यैरनुगतः पुण्ये मुहूर्ते कृतमङ्गलः ॥१३३॥
स्फुरत्कपाटपक्ष्माढ्यप्रतोलीनेत्रवर्त्मना । अथाविशत् पुरस्तस्या हृदि सौभाग्यभूर्नृपः ॥१३४॥ युग्मम् ॥
बन्दिवृन्दमुखाम्भोजस्फुरत्षट्पदशब्दितैः । भासुराभ्युदयो भाभिर्दिवाकर इवापरः ॥१३५॥

---

१. श्राद्धासमुद्धरौ - P श्रद्धासदुर्द्धरौ - K, D, KH ।

टि. 1. चिरत्नानि - पुरातनानि । 2. सैकतम् - प्रचुराः सिकता यस्मिन् नदीतटे तद् सैकतं, तस्मिन् । 3. सुरसिन्धुः- गङ्गानदी, तत्सम्बन्धी, तस्मिन् । 4. नदी ।

पश्यन्तीनां पुरो हारयष्टियुग्मेऽभिबिम्बितः । हृदि स्फुटीभवत्कामद्वितीय इव योषिताम् ॥१३६॥
व्यालोलानिव कल्लोलानानन्दक्षीरनीरधेः । पश्यन् वातेरितान् केतुपटाननुनिकेतनम् ॥१३७॥
भासुरं रभसाऽऽरब्धवाद्यनृत्यादिकौतुकैः । कृतमाङ्गलिकं लोकं मञ्चे मञ्चे कृतार्थयन् ॥१३८॥
बालाः पुत्रीरिव तदा सुप्रौढा भगिनीरिव । जननीरिव वृद्धास्तु निर्विकारं विलोकयन् ॥१३९॥
समाससाद सदनं सदनन्तगुणो नृपः । अमन्दानन्दसन्दोहकन्दो हरिपराक्रमः ॥१४०॥ षड्भिः कुलकम् ॥
अभ्येत्याभ्येत्य भूपालैः क्रमशः परिकल्पितम् । स भेजे चक्रवर्त्तित्वाभिषेकं द्वादशाब्दिकम् ॥१४१॥
स पश्यन् स्वजनान् सर्वान् **सुन्दरीं** मन्दिरोदरे । ददर्श कर्शिताकारां कलामिव [1]कलावतः ॥१४२॥
कृशत्वकारणं तस्याः सापेक्षमथ भूभुजा । पृष्टा नियोगिनः प्रोचुर्नाऽस्माकं देव ! दूषणम् ॥१४३॥
प्रभोः षष्टिसहस्राब्दीं दिग्जयादिदिनादियम् । आचामाम्लानि विदधे व्रतग्रहणसाग्रहा ॥१४४॥
चक्रिणा च व्रतायाऽसौ विसृष्टा**ऽष्टापदे** गिरौ । दक्षा दीक्षां प्रभोः पार्श्वे जगृहे गृहनिस्पृहा ॥१४५॥
चक्रिराज्याभिषेकेऽथ तस्मिन् द्वादशवार्षिके । आगतानागतान् लोकान् प्रभुत्वादवलोकयन् ॥१४६॥
निजाऽनुजाननायातान् विज्ञाय न्याय[2]वित्तमः । तान् प्रति प्रेषयामास दूतान् भूतलवासवः ॥१४७ ॥ युग्मम् ॥
यदि राज्यार्थिनस्तद्भोः ! **भरतं** कुरुत प्रभुम् । [१]दूतोक्तिमिति ते श्रुत्वा जगदु**र्भरतानुजाः** ॥१४८॥
विभज्य राज्यमस्माकमेतस्यापि भवत्प्रभोः । तातेन दत्तमस्मत्तः स किमाच्छेत्तुमिच्छति ॥१४९॥
अधिकेन न नः कार्यं रक्षितुं स्वं स्वयं क्षमाः । अयोगक्षेमकृत्तस्मान्नाथः कथमयं भवेत् ॥१५०॥
बलीयानथ यद्येष निःशेषद्वेषिशातनः । तदेतु वयमप्येते पितुस्तस्यैव सूनवः ॥१५१॥
किं तु तातमनापृच्छ्य वयं स्वच्छन्दकारिणः । अग्रजेन समं क्रोधाद्योद्धुमीहामहे न हि ॥१५२॥
इत्युक्त्वा**ऽष्टापदे** गत्वा नत्वा [3]निर्वृजिनं जिनम् । तत्ते **भरत**सन्दिष्टं सर्वमुर्वीभुजोऽभ्यधुः ॥१५३॥
सिञ्चन्निव सुधावृष्ट्या वसुधामृषभः प्रभुः । तानुवाच ज्वलत्क्रोधवह्नेरह्नाय शान्तये ॥१५४॥
चपला चपलेव श्रीर्भात्यसौ भुवनान्तरे । कल्याणवाञ्छया वत्सास्तत्तां गृह्णीत किं मुधा ॥१५५॥
किं च स्वःसम्भवैर्भोगैर्या तृप्तिरभवन्न वः । सा मर्त्यभोगैर**ङ्गारकारक**स्येव किं भवेत् ॥१५६॥
तथाह्यम्भोदृतिं कश्चिद् गृहीत्वाङ्गारकारकः । रीणवारिण्यरण्येऽगादङ्गारकरणोद्यतः ॥१५७॥
भीष्मग्रीष्मार्ककार्कश्यकृशानुकृतया तृषा । स तृप्तिं नाप्तवान् सर्वं पायं पायं पयो दृतेः ॥१५८॥
क्वचित्तरुतले सुप्तः स्वप्ने सदनमागतः । [4]परेत इव पानीयं समग्रमपि सोऽपिबत् ॥१५९॥
तथाऽप्यच्छिन्नतृष्णोऽयं भ्रामं भ्रामं जलाशयान् । वह्निरौ[5]र्व इवापूर्वः सर्वानुर्व्यामशोषयत् ॥१६०॥

---

१. इत्युक्त - C दूतोक्त...KH, K ।

टि. 1. चन्द्रस्य । 2. वित्तमः - उत्तमः । 3. पापरहितम् । 4. परेतः-पिशाचः । 5. और्वः-वडवाग्निः ।

अथैकं कश्मलक्षारदुरापसलिलं मरौ । कूपं प्राप्य भ्रमन् मेने प्रत्यक्षं क्षीरनीरधिम् ॥१६१॥
तत्रापि स तृषाक्रान्तः पयसे कुशपूलकम् । संयोज्य रज्जुभिः क्षिप्त्वा सरसं तरसाऽकृषत् ॥१६२॥
अतिनिम्नतया कूपः कुभूप इव सेवकात् । यातः स्वदत्तमादत्त सर्वस्वं तृणपूलकात् ॥१६३॥
पूलकादथ निश्चोत्य पाश्चात्यांस्तोयविप्रुषः । स चातक इवाम्भोदादुन्मुखस्तृषितः पपौ ॥१६४॥
तत्तृष्णा याऽस्य न छिन्ना वारिधेरपि वारिभिः । किं सा निरङ्कुशा शुष्यत्कुशाग्रपयसा त्रुटेत् ॥१६५॥
युष्माकमपि तद्वत्सा ! या दिव्यैरपि नाऽत्रुटत् । मर्त्यलोकभवैर्भोगैस्तृष्णा किं सा त्रुटिष्यति ॥१६६॥
श्रुत्वेति देशनां भर्तुर्लक्ष्मीसुखपराङ्मुखाः । अथाष्टानवतिर्भेजुस्ते व्रतं **भरता**नुजाः ॥१६७॥
दूतास्ततो निवृत्त्याऽथ स्वामिने विस्मयस्मिताः । सोदराणां यथावृत्तं वृत्तान्तं ते व्यजिज्ञपन् ॥१६८॥
अथ प्राज्यानि राज्यानि तेषां **भरत**भूपतिः । जग्रसे निखिलान्येष सर्वाऽन्नानीव भस्मकी ॥१६९॥
अपरेद्युर्नृपश्रेणीवेणीसंमार्जितक्रमम् । व्यजिज्ञपन्नृपं नत्वा **सुषेणो** गर्वपर्वतः ॥१७०॥
कृत्वाऽपि दिग्जयं स्वामिन् ! चक्रमायुधमन्दिरे । एतद् विशति नाऽद्याऽपि यथा शिष्यशठो मठम् ॥१७१॥
अथ सर्वो[1]पधाशुद्धबुद्धिः सचिवपुङ्गवः । उवाच वाचमाचार्य इव क्ष्मावासवाग्रतः ॥१७२॥
स्वामिन् ! को नाम दिग्यात्राकर्त्तरि त्वयि भर्त्तरि । तिष्ठेदद्यापि चण्डांशौ तमस्काण्डं कियच्चिरम् ॥१७३॥
आ ज्ञातमथवा स्वामिन्नवश्यं न वशंवदः । स **बाहुबलि**भूपालस्तवैवाऽवरजो बली ॥१७४॥
अपि विश्वं स [१]सामर्षः सवायुरिव पावकः । विश्वं दग्धुमलं खड्गधूमान्धीकृतशात्रवः ॥१७५॥
षट्खण्डं **भरत**क्षेत्रं जित्वाऽपि जगतीपते । अजित्वा तं जगद्वीरं वास्तवस्तव [2][२]कस्तवः ॥१७६॥
एतस्याऽविजये देव ! दिग्जयव्याजतस्त्वया । अस्मिन् षट्खण्डभूखण्डे कृतं देशान्तरेक्षणम् ॥१७७॥
तदेष देव ! भवतो युज्यते प्राज्यतेजसः । नोपेक्षितुं क्षितिस्वामिन्नमितामितशात्रवः ॥१७८॥
अथ प्रथमतो न त्वं बान्धवं बन्धुवत्सलः । योद्धुमुत्सहसे दूतं तत्कश्चित् प्रेषयाऽधुना ॥१७९॥
वीरम्मन्यो न मन्येत तवाज्ञां यदि वाऽनुजः । तदा यदा[3]युधीयानां बुध्यते तद्विधीयताम् ॥१८०॥
इत्यमात्योदिते दूतं दक्षस्**तक्षशिलां** प्रति । स वेगेन **सुवेगा**ख्यं [4]निसृष्टार्थं विसृष्टवान् ॥१८१॥
अथास्खलद्गतिर्वायुरिवाऽयं वेगतोऽगमत् । निवारितोऽपि शकुनैः **सुवेगो** दौत्यदक्षिणः ॥१८२॥
निम्नगा-नगर-ग्राम-कान्तार-गिरि-गह्वरान् । **सुवेगः** स लघूल्लङ्घ्य **बहली**देशमासदत् ॥१८३॥
श्रीमद्**बाहुबलि**स्वामियशःसुरभिताननैः । कान्तं वनान्तविश्रान्तैः क्रीडद्गोपाङ्गनाजनैः ॥१८४॥

---

१. सामर्थ्यः - C समार्षः - L, सामर्थः - P, A, K, D । २. स्तव - P, A, KH ।

टि. 1. उपधा - उपायः । 2. कः स्तवः, १।३।५६ [व्यत्यये लुग्वा] इत्यनेन स्लोपः । 3. आयुधेन जीवति इति आयुधीयः [आयुधादीयश्च] ६।४।१८ इत्यनेन 'ईय' प्रत्ययः । 4. निसृष्टार्थः-'उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् । संदिष्टः कुरुते कर्म निसृष्टार्थः स उच्यते ।

गायन्तीभिश्चरित्राणि श्री**युगादि**जिनेशितुः । नन्दनादेत्य [1]दैत्यारिस्त्रीभिः सान्द्रीकृतद्रुमम् ॥१८५॥
अलङ्कारप्रभाभिन्नतमिस्रासु दिनेष्विव । तमिस्रास्वपि पान्थस्त्री[2]पाणिंधमभवत्पथम् ॥१८६॥
उपेत्य स्वर्गिणां स्वर्गादद्भुतश्रीदिदृक्षया । हृतानामद्भुतैर्भोगैर्दुस्त्यजीभूतभूतलम् ॥१८७॥
असावासाद्य तं देशमपूर्वाद्भुतवैभवम् । जन्मान्तरमिव प्राप्तः कृत्यं विस्मृतवानिव ॥१८८॥ पञ्चभिः कुलकम् ॥
अथ तक्षशिलां **बाहुबलि**बाहुबलोर्जिताम् । नगरीं स गरीयस्याः सम्पदः पदमासदत् ॥१८९॥
पश्यन्नस्यामसौ पुर्या वैभवं भुवनाद्भुतम् । उन्मुखो ददृशे लोकैर्विक्रीतेभ्य [3]इवोद्धृतः ॥१९०॥
क्षणं प्राप्य नृसिंहस्य सिंहद्वारं सविस्मयः । तस्थौ रथादथोत्तीर्य स्मरन्निव स वाचिकम् ॥१९१॥
गच्छन्नथाऽग्रतश्चक्रिप्रताप इव मूर्त्तिमान् । तस्थौ राजकुलद्वारि वारितो वेत्रिभिः क्षणम् ॥१९२॥
अथ **बाहुबले**राज्ञां द्वास्थेनासाद्य सादरम् । प्रावेश्यत **सुवेगो**ऽयं सहर्षः पर्षदन्तरे ॥१९३॥
स सम्भ्रान्तः सभासद्भिः क्वचिन्नीलाश्मकुट्टिमे । जलभीत्यो[१]द्धरन् वासः सहासमवलोकितः ॥१९४॥
आकाशस्फटिकस्तम्भस्खलिताङ्गतया क्वचित् । अन्यत्राऽपि चचाराऽसौ न्यस्तहस्तः पुरः पुरः ॥१९५॥
रत्नस्तम्भसमालम्बिप्रतिबिम्बमवेक्ष्य सः । कृच्छ्रेण जज्ञे विज्ञोऽपि तत्त्वतः पृथिवीपतिम् ॥१९६॥
नमस्कृत्य नृपं पुञ्जीभूत[२]हारः स भूतले । विशिष्टो विष्टरे वेत्रिनिर्दिष्टे विनिविष्टवान् ॥१९७॥
मुखाब्जविलस[4]द्वाणी रणन्नूपुरहारिणीम् । उज्जगार गिरं कर्णसुधां स वसुधाधवः ॥१९८॥
[5]कच्चित् कुशलमार्यस्य कच्चित् कुशलिनी प्रजा । कुशली कच्चिदार्यस्य सेनान्यादिपरिच्छदः ॥१९९॥
स षट्खण्डं क्षमाखण्डमाखण्डलपराक्रमः । साधयन्न क्वचित् कच्चिदार्यः प्राप पराभवम् ॥२००॥
आवर्जिता जिताः कच्चित् तथार्येण महीभुजः । यथान्वहं वहन्तस्तामाज्ञां न स्युर्विषादिनः ॥२०१॥
समं जनानुरागेण स्पर्द्धया वृद्धिगामिनः । आर्यस्य धर्मकामार्था न बाधन्ते परस्परम् ॥२०२॥
इत्युक्त्वाऽवस्थिते राज्ञि दूतः सद्भूतमब्रवीत् । कस्तस्य कुशलप्रश्नः कुशलं जगतोऽपि यः ॥२०३॥
कस्तस्मिन् सैन्यलेशे च देशे वाऽकुशलक्रमः । यस्मिन् सुरकृतोपास्तिः शान्तिकृद्बान्धवस्तव ॥२०४॥
तिष्ठेत पुरतः कश्चिद् दिग्जैत्रे तत्र शात्रवः । अर्के विक्रामति ध्वान्तविक्रमः क्रमतां कुतः ॥२०५॥
अनेकैः सममेकाऽपि नानादेशनिवेशिभिः । तस्याऽऽज्ञा मन्यते मूर्ध्नि विधेरिच्छेव जन्मिभिः ॥२०६॥
भूभुजस्तस्य षाड्गुण्योपायशक्तित्रयादयः । फलन्ति चिन्तितैरर्थैः साक्षात् कल्पद्रुमा इव ॥२०७॥
निर्बाधमेव सेवन्ते पुरुषार्थास्त्रयोऽपि तम् । विभागा इव सन्ध्याया दिवसं भास्वरोदयम् ॥२०८॥
नृपैर्ललाटिकीभूतैः सेवितोऽपि परैः परम् । न मोदते स दूरस्थानपश्यन्ननुजान्निजान् ॥२०९॥

---

१. द्धरद्वासः - A, H । २. हारस्य - KH ।

टि. 1. देवीभिः । 2. गमनागमनेन हेतुभूतेन ध्वनिना व्याप्तः पन्थाः यत्र तम् - देशस्य विशेषणम् । 3. अवशिष्टः । 4. वाणी - सरस्वती, बहुव्रीहिः । 5. कच्चित् - प्रश्नार्थकोऽव्ययः ।

सत्यामपि स्यान्नो यस्यां बान्धवानां विलोकनम् । श्रियं सारामिमां काराऽनुकारां गणयत्ययम् ॥२१०॥
विजित्य जगतीमस्य विनीतायामुपेयुषः । सम्बन्धिभिः सुहृद्भिश्च चक्रे चक्रिपदोत्सवः ॥२११॥
तवाग्रजन्मनस्तस्मिन्नुत्सवे पृथिवीभुजः । लक्ष्मीजीवितरक्षार्थं के स्वयं न समाययुः ॥२१२॥
अनायातानयं ज्ञात्वा महे द्वादशवार्षिके । किलाऽऽकारयितुं भ्रातॄन् प्रेषयामास पुरुषान् ॥२१३॥
विकल्प्यानल्पसङ्कल्पाः[१] किमप्येते सुमेधसः । आगत्य तातपादान्ते दान्तात्मानो व्रतं व्यधुः ॥२१४॥
तदयं तद्वियोगार्त्तिगर्त्तसम्पातकातरः । समागत्य समुद्धर्तुं साम्प्रतं[1] तव साम्प्रतम्[2] ॥२१५॥
यद्यपि भ्रातृभावेन त्वं पुरा न समागमः । वक्त्यन्यथा तथाप्येष सर्वथा दुर्मुखो जनः ॥२१६॥
तत् स्वयं हर्षसोत्कर्षदृष्टिपीयूषवृष्टिभिः । द्विजिह्व[3]प्रभवद्दोषमोषः[२] कर्तुं तवोचितः ॥२१७॥
स[३] स्वयं दानसन्मानपूरितार्थिमनोरथः । त्वत्प्रणामान्न नामाऽन्यज्जगन्मान्यः समीहते ॥२१८॥
धीरा न चित्ते वित्तेष्टं[4] चेष्टन्ते किन्तु तेजसे । **मुक्तापङ्क्तिधिया हन्ति सिंहः किं हस्तिमस्तकम्** ॥२१९॥
[5]भ्राता ममाऽयं भूभर्त्ता मा स्म भूरिति निर्भयः । राज्ञामाज्ञाधनानां हि ज्ञातेयं[6] क्वोपयुज्यते ॥२२०॥
समन्युरथ तं वीरंमन्यस्त्वमवमन्यसे । भासि भास्वति तत् तस्मिन्नुद्यत्खद्योतपोतवत् ॥२२१॥
पुत्रस्त्वमपि नाभेयप्रभोर्भरतवत् ततः । कुलप्रभुरसि स्वामिन् ! हितं जल्पामि तत्तव ॥२२२॥
करालगरलः सर्पः पावकः पवनोद्धुरः । प्रभुः प्रौढप्रतापश्च विश्वास्या न त्रयोऽप्यमी ॥२२३॥
जीवितव्येन राज्येन कार्यं तद्विद्यते यदि । तदा रक्षौषधं मूर्ध्नि धार्यतां भ्रातृशासनम् ॥२२४॥
नित्यं वितन्यते यत्र सेवा देवासुरैरपि । भवतो मर्त्यमात्रस्य सेवायां तत्र का त्रपा ॥२२५॥
एवं वदति दूतेऽत्र **सुनन्दा**नन्दनो निजम् । भुजं विलोकयामास रोमाञ्चकवचाञ्चितम् ॥२२६॥
अवोचदधरज्योतिर्मिश्रदन्तांशुदम्भतः । कोपपाटलितां साक्षादिव वाचं धराधवः ॥२२७॥
ज्यायानयं मम भ्राता यदीच्छति समागमम् । युक्तं तदेष तातस्य तुल्यः पूज्यो हि सर्वथा ॥२२८॥
युक्तं तदपि यत्प्रैषीत् प्रभुस्ते **भरतेश्वरः** । आकारणानि बन्धूनां[४] गुरोः कृत्यमिदं यतः ॥२२९॥
तेषु तातानुयातेषु स्वयं यत्त्वेष ते विभुः । तेषां राज्यानि जग्राह स्नेहोऽयं दूत ! नूतनः ॥२३०॥
कनिष्ठैर्विजितो ज्येष्ठः प्रवादो[५] मा स्म भूदयम् । इत्यन्वगुरमी तातं जितकाशी तदेष किम् ॥२३१॥
त्वद्भर्ता **भरत**क्षेत्रं जित्वा तन्मां विरोधयन् । निष्पन्नं हेम नागेन नियतं दूषयत्ययम् ॥२३२॥
भ्रातृभावादनायाते निर्भये वा स्वभावतः । किन्तु मय्येव लोकोऽयमबद्धवदनोऽभवत् ॥२३३॥

---

१. संकल्पान् – C । २. द्दोषःमोषः – D, द्दोषमोघः – KH, दोषमोघः A । ३. सोऽन्वहं – K, L, D । ४. साधूनां – P । ५. प्रमादो – P, K प्रभादो – A ।

टि. 1. अधुना । 2. योग्यम् । 3. द्विजिह्वः सर्पः, पक्षे दुष्टपुरुषः । 4. वित्तेष्टं – धनस्पृहा, क्रियाविशेषणम् । 5. अयं भूभर्त्ता मम भ्राता इति निर्भयः मा स्म भूः इत्यन्वयः । 6. ज्ञातेर्भावः बन्धुत्वम् ।

किं वा यदेष भ्रातॄणां राज्यानि नृपतिस्तव । जग्रसे श्वेव वान्तानि तथा तत्राऽप्यभूदयम् ॥२३४॥
मम प्रभुरसावेव सेव्यः श्री**नाभिनन्दनः** । सुरासुरनृपैः क्लृप्तप्रथः प्रथमतीर्थकृत् ॥२३५॥
पिता गुरुर्वा स्वामी वा जन्मन्येकत्र जन्मिनाम् । एक एव भवेन्नान्यस्तत्किं तेन करोम्यहम् ॥२३६॥
स मम ज्येष्ठभावेन प्रणामं यदि लप्स्यते । न प्रभुत्वाभिमानेन पुनः स्वप्नेऽपि ते पतिः ॥२३७॥
यच्च मत्तोऽपि तेजांसि नाथस्ते नाथते ध्रुवम् । [1]कक्षस्य वह्नितस्तेजोवाञ्छामनुकरोति तत् ॥२३८॥
ज्ञातेयं क्वोपयुज्येत राज्ञां मिथ्येति ते वचः । मयि सत्यप्ययं राज्यश्रियं भुङ्क्ते कुतोऽन्यथा ॥२३९॥
ते चान्ये ये दधुर्भास्वत्यस्मिन् खद्योतपोतताम् । अहं तु हन्त तस्य स्याम[2]स्तभूधरबन्धुरः ॥२४०॥
त्रैलोक्यपूजितो यस्य पिता श्री**ऋषभ**प्रभुः । किं चायमनुजः [१]शौर्यतृणीकृतजगत्त्रयः ॥२४१॥
सुरासुरनरैः सोऽयं सेव्यो यत्तदिदं कियत् । इदं वद यदेतस्य पुरः कोऽयं सुरेश्वरः ॥२४२॥ युग्मम् ॥
तन्न त्रपाऽस्य सेवायां करुणा नु ममाद्भुता । लज्जिष्यतेऽसौ मां वीक्ष्य यत्पुरा [3]खुरलीजितः ॥२४३॥
पुरा कारासुखं प्राप यच्चास्मद्भुजपञ्जरे । तत्किं विस्मृतमेतस्य चाटुकृच्चाटुगर्विणः ॥२४४॥
तद्गच्छ त्वं समायातु स स्वयं भवतः प्रभुः । यथास्य गर्वदुष्कर्मप्रायश्चित्तं [२]ददाम्यहम् ॥२४५॥
दूतोऽथ धैर्यमालम्ब्य सभयः स सभागृहात् । निःससार सभासद्भिः कूणिताक्षं निरीक्षितः ॥२४६॥
सज्जीकृतायुधान् वीरान् मृत्युभृत्यानिवोद्यतान् । पश्यन् सुवेगो वेगेन निरगान्नृपमन्दिरात् ॥२४७॥
नवः क इव दूतोऽयं भरतस्य महीभुजः । किमन्योऽपि नृपो ज्येष्ठः स्वामिनोऽस्यैव बान्धवः ॥२४८॥
'[३]क्वेयत्कालं गतः सोऽभूज्ज'याय **भरत**क्षितेः । 'अत्रामुं स कुतः प्रैषीद'नुजाकारणेच्छया ॥२४९॥
'अस्य बन्धोः किमुत्कण्ठा' न किन्तु प्राभवस्पृहा । 'मन्त्रे किं नाखुर'प्यस्य शतशः सन्ति मन्त्रिणः ॥२५०॥
'तैः स किं बलिनं सिंहं खलीकुर्वन् न वारितः' । प्रत्युत प्रेरितोऽमीभि**र्बुद्धिः कर्मानुसारिणी** ॥२५१॥
जितं किं हारयत्येष षट्खण्डं मण्डलं भुवः । जितकाशितया वेत्ति न मूढः [4]प्रौढिमात्मनः ॥२५२॥
इत्थं पथि कथाः शृण्वन् मिथः पौरमुखोद्गताः । दूरादुल्लङ्घयामास **सुवेगो** नगरीमिमाम् ॥२५३॥ कुलकम् ॥
क्रमेणाऽथ प्रयातोऽयमटवीं भिल्लसङ्कुलाम् । श्री**बाहुबलि**भूपालबलैराटविकैर्वृताम् ॥२५४॥
तत्र शार्ङ्गधरान् कांश्चित् पर्शुस्पर्शपरान् परान् । एकानश्मायुधानन्यान् कुन्तदन्तुरिताम्बरान् ॥२५५॥
अयं मूर्त्तानिवोत्साहान् श्री**बाहुबलि**भूभुजः । भिल्लानालोकयामास **सुवेगः** कम्पिताऽऽकृतिः ॥२५६॥ युग्मम् ॥
अटवीं तामथोल्लङ्घ्य कथञ्चिददतिभीषणाम् । चक्रिणो देशमासाद्य स्वं मेने स पुनर्नवम् ॥२५७॥

---

१. शौर्यः तूलीकृत.....K, D, शौर्यतृणीभूत.....C, शौर्यतूलीकृत....L । २. करोम्यहं – KH, C । ३. कियत्कालं...KH ।

टि. 1. कक्षः उत्तरीयवस्त्रस्य पश्चादञ्चलः । 2. अस्तभूधरः अस्ताचलः । 3. खुरली-धनुर्विद्याभ्यासः, तस्मिन् विषये जितः । 4. प्रौढिः – शक्तिः, सामर्थ्यम् ।

अपक्वान्यपि धान्यानि लुनीत[१] ननु रंहसा । अपूतान्यपि गुप्तासु क्षिपत क्षोणिखानिषु ॥२५८॥
अतिभारसहानुच्चैः शकटान् कुरुतोत्कटान् । लभ्यदेयानि सङ्क्षिप्योच्चलितुं भवतोद्यताः ॥२५९॥
यस्माद् **भरत**भूपालमभिषेणयितुं बली । श्रूयतेऽभ्युद्यतो **बाहुबलि**र्बाहुबलोन्मदः ॥२६०॥
प्रतिक्षेत्रं प्रतिग्रामं चक्रिदेशनिवासिनाम् । व्याकुलत्वं विलोक्येति चिन्तयामासिवानसौ ॥२६१॥ कलापकम् ॥
अहो विग्रहवार्त्तेयमस्मत्तो वेगवत्तमा । अग्रे भूत्वा यतः कश्चिन्नागतः श्रूयते त्वसौ ॥२६२॥
अहो प्रौढप्रतापत्वं श्री**बाहुबलि**भूभुजः । स्वस्थानस्थेऽपि यत्तस्मिन्नस्माकं भयमीदृशम् ॥२६३॥
चिन्तयन्निति सम्प्राप्तो विनीतायां स नीतिमान् । विज्ञो विज्ञपयामास यथावन्नृपतेः पुरः ॥२६३॥
चेलाञ्चलेन चेद्भानुश्छाद्यते तरुणच्छविः । यदि ज्वालाकुलो वह्निर्भवेद् ग्राह्यश्च मुष्टिना ॥२६५॥
तवानुजस्तथाप्येष स्वामिन् ! षट्खण्डभूपतेः । उत्कर्षिपौरुषो[२] नान्यैर्जेतुं शक्यः सुरैरपि ॥२६६॥ युग्मम् ॥
श्रुत्वेति **भरताधीशः** सोत्साहो मन्त्रिभाषितैः । प्रयाणं कारयामास पुरीं तक्षशिलां प्रति ॥२६७॥
सम्पन्नपुलका कुन्तैः स्विन्ना करिमदाम्बुभिः । स्वैरं भर्त्रा[३] बलाक्रान्ता चकम्पे काश्यपी[1] तदा ॥२६८॥
मारुतस्य मुखे धूलिं क्षिपन्तश्चरणोद्धृताम् । वाजिनः परितोऽधावन् सत्वराः सत्त्व-राजिनः ॥२६९॥
द्विषद्यशोमहश्चन्द्रभानुच्छादनहेतवे । वहन्तो मेघलेखाभान् खड्गान् वीरास्तदाऽचलन् ॥२७०॥
वंशनासास्तुरङ्गाक्षाः पताकातिलकास्तदा । प्रचेलुश्चक्रताडङ्का रथाः सेनाननश्रियः ॥२७१॥
स्थिरा[2]मस्थिरयद्वेगात्तच्चचाल बलं तदा । उद्यद्धूलिभरैरब्धिं गम्भीरमगभीरयत् ॥२७२॥
**बहली**देशसीमानमसमानपराक्रमः । आचक्राम क्रमाच्चक्री वियद्देशमिवांशुमान् ॥२७३॥
ज्ञात्वा तत् परिघप्रायबाहु**र्बाहुबली** बलम् । निजमुत्साहयामासोत्पातवात इवोदधिम् ॥२७४॥
तद्भेरीनलिकायन्त्रप्रेरितैः समरोर्मिभिः । भटाः प्रदीपितक्रोधवह्नयश्चेलुरुच्चकैः ॥२७५॥
नेदुस्तदा रिपुप्राणप्रयाणपटहोपमाः । निःस्वाननिकराः[3] शब्दैरुदरम्भरयो दिशाम् ॥२७६॥
संसिच्य मदपाथोभिः संवीज्य श्रुतिमारुतैः । करिणः कम्पयामासुः शीतार्त्तामिव मेदिनीम् ॥२७७॥
खनन्ति स्म खुरैः क्षोणिं जवना[4] वाजिराजयः । आक्रष्टुमिव पानीयं सेनायास्तृप्तिहेतवे ॥२७८॥
तरङ्गैरिव सध्वानैर्बलै**र्बाहुबलि**स्तदा । महीमाच्छादयामास कल्पान्तभ्रान्तवार्द्धिवत् ॥२७९॥
उपान्ते चक्रिसेनायाः सेनामयमवासयत् । प्रातस्तिमिरधोरिण्याः सूरोऽनूरु[5]प्रभामिव ॥२८०॥
गाम्भीर्यं दर्शयन्तोऽपि तदा सैन्यैः कदर्थिताः । तत्कालं कलयामासुः कलुषत्वं जलाशयाः ॥२८१॥

---

१. ततनु - B, P । तनतु - A तात्रानि - L, तातनु - D, K । २. उत्कर्षितरुषोमात्यै...A उत्कर्षिरुषो - B । ३. भर्त्ता - KH, K, D भर्तृ - L ।

टि. 1. काश्यपी-पृथ्वी पक्षे स्त्री । 2. स्थिरा - पृथ्वी । 3. निःस्वाननिकराः-ध्वनिसमूहाः । 4. जवनाः वेगवत्यः वाजिराजयः । 5. अनूरुः-सूर्यस्य सारथिः, अरुणः ।

स्थूला [१]स्थूलततिस्तेने तदा गुरुगिरिश्रियम् । तटाऽर्गलितमातङ्गगण्डशैलाऽतिदुर्गमा[२] ॥२८२॥
गुरुडम्बरमौलिस्थरत्नकुम्भसमानताम् । रविर्लिप्सुरिव प्राप तदास्तगिरिमस्तकम् ॥२८३॥
अस्ताऽचलपतद्भानुगोलकोच्छलितैरथ । पाथोभिरिव पाथोधेस्तमोभिर्व्यानशे नभः ॥२८४॥
तदाऽर्कमन्दरक्षोभान्निःसरन्त्या इव श्रियः । उन्ममज्ज मुखाम्भोजमम्भोधेरिन्दुकैतवात् ॥२८५॥
सेनाभटेषु कुर्वत्सु शस्त्रजागरणोत्सवम् । खड्गं जागरयामास शशाङ्कोप्यङ्ककैतवात् ॥२८६॥
स्तुतिव्रतानामन्योऽन्यं वचनाहुतिभिर्भृशम् । दिदीपे नृपयो[1]र्बद्धबोधः क्रोधधनञ्जयः ॥२८७॥
तत[2]स्ततरणोत्साहैः सैन्ययोरुभयोर्भटैः । रणदेव्याः पुरस्तेने निद्रैव प्रथमं बलिः ॥२८८॥
बलयोस्तूर्यनिर्घोषैर्मृगं त्रस्तमिवा[३]ङ्कतः । दिदृक्षुरथ शीतांशुरगादस्ताऽद्रिकाननम् ॥२८९॥
ततः पूर्वाद्रिमारूढे देवे दिवसभर्त्तरि । रागेणाभ्यागमस्ताभ्यां [3]चक्राभ्यामुपचक्रमे ॥२९०॥
सुभटः सुभटं [4]यन्ता यन्तारं रथिनं रथी । आसदत् सादिनं सादी बलयोरुभयोरपि ॥२९१॥
छिन्नाः [४]प्रोड्डीनकाण्डालीमण्डपेन रवेः कराः । पतिता इव भान्ति स्म क्षितौ [5]क्षतजकैतवात् ॥२९२॥
उद्धूतधूलिजे ध्वान्ते द्रष्टुं द्विष्टानिव क्रुधा । धावन्ति स्म भटाः प्रेङ्खत्कुन्तदीपकपाणयः ॥२९३॥
भुजाभृतां भुजादण्डैः शिरोभिश्च क्षितिच्युतैः । कृतान्तकिङ्कराश्चक्रु[6]र्दण्डकन्दुककौतुकम् ॥२९४॥
ये तरस्वितया तेरुर्भटाः सङ्गरसागरम् । आसन् रुधिरवाहिन्यस्तेषामप्यतिदुस्तराः ॥२९५॥
अश्वानामश्ववाराणामप्यङ्गैर्मिलितैर्मिथः । शिरोभिः पतितैर्युद्धं किन्नराणामिवै[५]क्ष्यत ॥२९६॥
दन्तिदन्ताग्रसङ्घट्टजन्मा वह्निकणोत्करः । रजोघनतमिस्रान्तर्भेजे खद्योतपोतताम् ॥२९७॥
[7]प्रस्थानानि स्वबाहूनामिव प्रीताः सुरस्त्रियः । भटानां भाविभर्तॄणां स्रजं कण्ठेषु चिक्षिपुः ॥२९८॥
बिभ्रद्भिः शुशुभे खड्गलेखां धूमशिखासखीम् । रुषारुणैर्भटैर्भर्तुर्मूर्त्तैस्तेजोऽनलैरिव ॥२९९॥
अथ **बाहुबलेः** सैन्यैर्**भरतेश**स्य वाहिनी । कल्लोलिनीशकल्लोलैरिव पश्चाद्व्यधीयत ॥३००॥
पुरस्कृत**सुषेणो**ऽथ रणाय **भरतेश्वरः** । स्वयं रविरिवोत्तस्थेऽग्रेसरारुणसारथिः ॥३०१॥
युद्धे श्रद्धालुमालोक्य ज्यायांसं भ्रातरं पुरः । तुल्यं **बाहुबलि**र्भूपोऽभूदोकः शोकहर्षयोः ॥३०२॥
गृहीतरणदीक्षोऽथ प्रज्वलन्निव तेजसा । हरेः समः समारोहत् कुञ्जरं राजकुञ्जरः ॥३०३॥
तौ स्वयं जगतीमल्लौ वीक्ष्य युद्धोद्यतौ तदा । हन्त चेतांस्यकम्पन्त त्रिविष्टपसदामपि ॥३०४॥

---

१. स्थलतति...H स्थूलतनि – C । २. दुर्गमाः– A, K, KH । ३. वान्तकः P, वार्कतः A । ४. प्रोद्दण्ड – P, KH । ५. मवैक्षत – P, KH ।

टि. 1. बद्धबोधः–अवरुद्धः बोधःविवेकः येन स क्रोधधनञ्जयः । 2. ततः विस्तृतः रणे युद्धे उत्साहः येषां ते, तैः । 3. चक्रं–सैन्यं पक्षे चक्रवाकपक्षी । 4. यन्ता – हस्तिपकः । 5. क्षतजम् – रुधिरः । 6. दण्डकन्दुककौतुकम् – 'होकी' इति भाषायाम् । 7. प्रस्थानानि – गमनायाभिमते स्थानेऽल्पोपध्यादेः प्रेषणम् । 'प्रस्थाणु' इति भाषायाम् ।

अथो भरतमभ्येत्य दत्त्वाशीर्वादमादरात् । देवा एवमवोचन्त प्रशान्तं स्वान्तशान्तये ॥३०५॥
षट्खण्ड**भरत**क्षेत्रविजये तव सर्पतः । सम्मुखीनोऽभवत्कश्चिन्न चेन्**नाभेयनन्दनः** ॥३०६॥
दोर्दण्डकण्डूभेदाय तत्किं नाम महाभुज ! । निजेन बन्धुना सार्द्धं युद्धसज्जो न लज्जसे ॥३०७॥ युग्मम् ॥
अथाह चक्री गीर्वाणान् युक्तमेतद्भवद्वचः । किन्तु सम्यग् न जानीथ बन्धुना रणकारणम् ॥३०८॥
न दोःकण्डूभरच्छेदबुद्धिर्युद्धे निबन्धनम् । हेतुः किन्तु रथाङ्गस्याप्रवेशः शस्त्रमन्दिरे ॥३०९॥
अनुप्रविश्य मां शस्त्रगृहे चक्रं प्रवेश्य च । षट्खण्ड**भरत**क्षेत्रपतिर्भूयान्ममाऽनुजः ॥३१०॥
अनेन वचसा **बाहुबलिं** बोधयताऽधुना । यदि युद्धनिषेधाय युष्माकमयमुद्यमः ॥३११॥
अथोचुस्ते पुनर्देवा यद्यसौ नहि बुध्यते । तथापि नाऽस्त्रैर्योद्धव्यमाज्ञात्र ऋषभप्रभोः ॥३१२॥
दृष्टि-वाग्-दण्ड-दोर्दण्ड-युद्धैरेव बलाबलम् । युवयोर्ज्ञास्यते किं तदाऽऽयुधैर्दारुणै रणे ॥३१३॥
ओमित्युक्तवति क्ष्मापे ततो जग्मुर्दिवौकसः । नृपं **बाहुबलिं** मूर्त्तमिव वीररसं प्रति ॥३१४॥
जयेत्याशिषमुद्दाम्नीं दत्त्वा प्रीतेन चेतसा । सुधामधुमुचा वाचा प्राहु**र्बाहुबलिं** सुराः ॥३१५॥
ज्यायानयं नयोत्तंस ! किं न सत्क्रियते त्वया । संरम्भः किमयं वीर ! **भरतं** प्रति सम्प्रति ॥३१६॥
जेया रागादयस्तावद् ये **युगादि**जिनेशितुः । तदङ्गजस्य ते तात ! पोषस्तेषां किमु क्षमः ॥३१७॥
नतिमात्रेण यस्तोषं भजत्येष तवाग्रजः । कथङ्कारं तमाराध्य नात्मसात्कुरुषे क्षमाम् ॥३१८॥
अथ **बाहुबलिः** प्राह सुरान् गम्भीरया गिरा । इत्थं कथमविज्ञातवस्तुतत्त्वैरिवोच्यते ॥३१९॥
यद्यसौ भ्रातृभावेन मत्तः सत्कारमिच्छति । युक्तं तदेष यत्तातसम एव ममाग्रजः ॥३२०॥
परं प्रौढप्रतापत्वाज्जितकाशितया तया । आक्रम्य नमयेद्यन्मां न तदेतदहं सहे ॥३२१॥
विनष्टं न तदद्यापि किमप्यस्ति महौजसः । दूरादपसरत्वेष वलितोऽस्मि रणादहम् ॥३२२॥
अपरक्ष्मापसामान्यामाज्ञां कारयितुं पुनः । मयि क्रोधोद्धतं धावन् दन्तीवाद्रौ भविष्यति ॥३२३॥
तदनिष्टफलो भाति मन्त्रहीनस्य निश्चितम् । वह्निमुष्टिंधयस्येव नरेन्द्रस्यायमुद्यमः ॥३२४॥
ऋते न तातपादांस्तु स्वामी मम भवेत् परः । विना दिनाधिपं किं स्यात्कोकस्याऽन्यः प्रियाकरः[1] ॥३२५॥
अथाहुरमराः श्रीमन्निःसीमगुणगौरव[2] ! । कार्येऽत्र विशदाऽप्येषा नास्माकं क्रमते मतिः ॥३२६॥
एकतश्चक्रिणश्चक्रं त्वत्प्रणामसमीहया । न विशत्यायुधागारं बिभ्राणमकृतार्थताम् ॥३२७॥
अन्यतस्तव पश्यामः सर्वथा विनयं वयम् । तत्किं युक्तं भवेद्वक्तुमस्माकं जगतीपते[3] ! ॥३२८॥
अभ्यर्थयामहे किन्तु भवन्तं भुवनातिगम्[4] । युद्धेन न हि योद्धव्यं प्राणिप्राणापहारिणा ॥३२९॥
दृग्-वाग्-दण्डादियुद्धेन बलाबलपरीक्षणम् । कृत्वा जयो व्यवस्थाप्यः साक्षिणोऽमी भवामहे ॥३३०॥

---

१. प्रियङ्करः - C, D । २. गौरवः-P, A; गौरवं - KH, H । ३. जगतीपतेः - P, KH, L । ४. भुवनप्रभोः - KH भुवनप्रभो - P ।

तथेति प्रतिपेदाने प्रार्थनां पृथिवीपतौ । नातिदूरस्थितास्तस्थुर्मध्यस्थास्ते दिवौकसः ॥३३१॥
अथ स्वामिसमादेशादारुह्य करिणो रणात् । जवान्निवारयामासुर्नृपयोः पुरुषा भटान् ॥३३२॥
राजाज्ञामथ राजन्याः सैन्ययोरुभयोरपि । श्रुत्वा ववलिरे कष्टं रुष्टा मुष्टा इवाहवात् ॥३३३॥
श्रुत्वा सङ्गरमङ्गाङ्गि सैनिकास्तेऽथ चक्रिणः । परस्परमिति प्रोचुः शोचन्तो देवमन्त्रितम् ॥३३४॥
अहो धिगिदमायातं सङ्कटं स्वामिनोऽधुना । समं श्री**बाहुबलि**ना बलिना सह यो रणः ॥३३५॥
नियुद्धबुद्धिदानेऽस्मिन् दोषः को वा दिवौकसाम् । ईदृशानां मुधा नाम कौतुकं को न पश्यति ॥३३६॥
जानता भुजयोर्वीर्यमनुजस्य महीभुजा । एतन्मेने न जानीमस्तत्काऽपि भवितव्यता ॥३३७॥
स्वसैनिकानां श्रुत्वेति गिरो **भरत**भूपतिः । बलं दर्शयितुं स्वस्य तानह्वायेदमब्रवीत् ॥३३८॥
मया दृष्टोऽद्य दुःस्वप्नः किल शृङ्खलमण्डलैः । बद्ध्वाऽऽकृष्य तटाद् भूपाः कूपान्तर्मामपातयन् ॥३३९॥
अशिवस्य विभेदाय स्वप्नार्थोऽयं ततोऽधुना । अवश्यं सत्यतां नेयो भवद्भिर्बलशालिभिः ॥३४०॥
अनिच्छतामिदं राज्ञां प्रभोर्व्यसनसाहसम् । आज्ञां दत्त्वा स राजेन्दुः कूपमेकमकारयत् ॥३४१॥
अवटस्य तटे तस्य निविष्टो भरतेश्वरः । शृङ्खलानां सहस्रेण वामहस्तावलम्बिना ॥३४२॥
सर्वसैन्याभिसारेण सर्वैरुर्वीभुजां गणैः । सर्वस्थाम्ना समालम्ब्य समाकृष्यत पीठतः[१] ॥३४३॥ युग्मम् ॥
ससैन्यानपि राजन्यान् शृङ्खलासु विलम्बिनः[२] । रोमभ्यो नाधिकान्मेने बलवान् भरतेश्वरः ॥३४४॥
हृद्यं हृद्यङ्गरागं स तेने तेनैव पाणिना । पेतुस्ते तु समं दत्तसङ्केता इव भूभुजः ॥३४५॥
दृष्टेन च बलेनास्य सम्भावितपराक्रमाः । भूभुजो भेजिरेऽम्भोजस्मेरवक्त्रास्तदा मुदम् ॥३४६॥
अथ श्रीबाहुबलिना समं समरसीमनि । प्रथमं दृष्टियुद्धाय प्रतिज्ञां कृतवान् नृपः ॥३४७॥
उभावभिमुखौ तत्र निमेषविमुखेक्षणौ । प्रत्यूषपूष[1]-पूर्णेन्दुविभ्रमं बिभ्रतुश्चिरम् ॥३४८॥
निरीक्ष्य निर्निमेषत्वं समरं यातयोस्तयोः । तदाद्यनिमिषीभावं मन्ये मन्युभुजो[2]ऽभजन् ॥३४९॥
सन्तप्ते सोष्मणो[३] **बाहुबले**रालोकनाच्चिरम् । स्नपयित्वाश्रुभिश्चक्री प्रावृणोत्पक्ष्मणा दृशौ ॥३५०॥
अहो जितं जितं **बाहुबलि**ना बलिनाऽमुना । इत्थं कलकलं चक्रुस्तदा विजयसाक्षिणः ॥३५१॥
दृग्सङ्ग्रामजितेनाऽथ समं **भरत**भूभुजा । प्रारेभे शब्दसमरं दक्षस्तक्षशिलाविभुः ॥३५२॥
विवस्वदश्ववित्रासी शशिसारङ्गभङ्गकृत् । चक्रिणा सिंहनादोऽथ लोडितः क्रोडिताम्बरः ॥३५३॥
चमत्कारिणि विश्वानां विरते भारते ध्वनौ । सिंहनादो महान् **बाहुबलि**नो व्यानशे दिशः ॥३५४॥
क्षयाब्दगर्जिसंवादे नादे तस्मिन् विसर्प्पति । अभूदकालकल्पान्तशङ्कातङ्कातुरं जगत् ॥३५५॥
त्रुट्यत्पर्वतशृङ्गेण क्षुभ्यदम्भोधिनाधिकम् । विजिग्ये तेन शब्देन भूयो **भरत**भूपतिः ॥३५६॥

---

१. सर्वतः - B, A । २. विलम्बितान् - C । ३. सोष्मणा - P ।

टि. 1. प्रातःकालसूर्यः । 2. मन्युभुक् - देवः ।

अथ हस्तप्रहारेण रणं निश्चित्य दुर्मदौ । तावपासरतां शक्तिधन्यौ वन्यौ गजाविव ॥३५७॥
**भरतेना**हतः प्राणमुष्ट्या मुष्ट्याऽथ मूर्द्धनि । क्षणं **बाहुबलि**र्ध्वान्तैर्वव्रे रविरिवाम्बुदैः ॥३५८॥
सद्वृत्तस्यैव [1]कौलीनं मुनेर्मन्युरिव क्षणात् । ययौ शशधरस्येव राहु**र्बाहुबले**स्तमः ॥३५९॥
ततो **बाहुबले**र्मुष्टिवज्रपातेन ताडितः । पपात शैलवच्चक्री समं सैन्यमनोरथैः ॥३६०॥
बन्धुना विधुना सिक्तश्चन्दनैरमृतैरिव । कैरवाकरवन्मूर्च्छामथाऽमुञ्चत चक्रभृत् ॥३६१॥
निश्चित्याऽथ प्रचण्डेन दण्डेन समरोत्सवम् । अधावतामुभौ भीष्मौ धृतदण्डौ यमाविव ॥३६२॥
ततः शिरसि दण्डेन हतो **भरत**भूभुजा । **सुनन्दासूनु**राजा तु ममज्ज भुवि कीलवत् ॥३६३॥
अथ मग्नौ क्रमौ तस्माद्भूतलात् पङ्किलादिव । लीलयैव क्रमेणाऽयमुद्दधार धराधवः ॥३६४॥
**तद्बाहुबलि**ना मौलौ दण्डेन **भरतो** हतः । ममज्ज लज्जयैवोच्चैराकण्ठमवनीतले ॥३६५॥
बभूव क्षितिमग्नस्य चक्रिणः स्फुटमाननम् । शोकश्यामं निजयशःशशिग्रासेन राहुवत् ॥३६६॥
मग्नो गर्त्तादथाकर्षि चक्री कोद्दालिभिर्भटैः । उत्तमर्णैरिव प्रत्तदेयवित्तोऽधमर्णकः ॥३६७॥
आससाद विषादस्तद्भरतं परितो जितम् । चक्री नाऽहमसौ चक्री ध्यायन्तमिति चेतसि ॥३६८॥
अथाकस्मात् करेऽमुष्य चक्रित्वभ्रान्तिभित्तये । आरुरोह ज्वलच्चक्रं रविबिम्बमिवाम्बरे ॥३६९॥
तेन पार्श्वगतेनोच्चैश्चक्री चक्रेण सोऽज्वलत् । मार्त्तण्डमण्डलेनेव मार्त्तण्डोपलपर्वतः ॥३७०॥
अथ ज्योतिष्पथे सुस्थांस्त्रासयंस्त्रिदिवौकसः । वधाय बन्धोर्निःशङ्कश्चक्री चक्रं मुमोच सः ॥३७१॥
कल्याणशालिनो **बाहुबले**र्मेरोरिव व्यधात् । चक्रं प्रदक्षिणाचक्रं [2]चक्रबान्धवबिम्बवत् ॥३७२॥
गोत्रे न प्रभवत्येव चक्रमित्यवलिष्ट तत् । अमोघमप्यनिष्पाद्य चक्रवर्तिमनोरथम् ॥३७३॥
सस्मयं भस्मयिष्यामि सचक्रं चक्रवर्तिनम् । इत्युत्पाट्य क्रुधा मुष्टिं **सुनन्दाभू**रधावत ॥३७४॥
गतो वक्त्रं हहा चक्रवर्त्यसौ [3]समवर्त्तिनः । ईदृक् कलकलारावो बभाराम्बरगह्वरम् ॥३७५॥
अत्रान्तरे विवेकार्कतेजःशाम्यन्मनस्तमाः । दध्यौ [4]प्रवीरतामानी मानी नाभेयसम्भवः ॥३७६॥
जगतीं जिष्णुरप्येष योधैः क्रोधादिभिर्जितः । तदन्यविजितं जेतुमेनं धिग् धिग् ममोद्यमम् ॥३७७॥
तज्जयामि यदि प्रेतानेतान् जितजगत्त्रयान् । सत्यं तत्तनुजन्माऽस्मि तस्य विश्वप्रभोरहम् ॥३७८॥
स ध्यात्वेति नवद्वारे [5]पुरे [6]तेषां सदास्पदे । शिरःपरिसरादुच्चखान तत्केशकाननम् ॥३७९॥
निवार्य सर्वव्यापारानसौ निश्चलनिश्चयः । स्वतन्त्रस्तत्र पानान्नप्रवेशमरुधत्ततः ॥३८०॥
बन्धवो लघवः सर्वे केवलज्ञानशालिनः । कथं वन्द्या मया साक्षाद् गत्वा तातस्य सन्निधौ ॥३८१॥

---

टि. 1. कौलीनं – लोकापवादः । 2. चक्रबान्धवः – सूर्यः । 3. समवर्त्तिन् (पुं) – यमः, तस्य । 4. प्रवीरतामानी – स्वस्य प्रवीरतां मन्वानः 5. पुरं – नगरं पक्षे शरीरम्, तस्मिन् । 6. क्रोधादिकषायाणाम् ।

तत् प्राप्य केवलज्ञानमिहैवानन्दमन्दिरम् । भूत्वा समः स्वबन्धूनां गन्ताऽहं तातसंसदि ॥३८२॥
निश्चित्येति चिरं चित्ते तत्रैव कृतवान् कृती । कायोत्सर्गविधिं मोहमहीपतिजयो[१]र्ज्जितः ॥३८३॥
तं तथास्थितमालोक्य बान्धवं वसुधाधवः । व्यषीदत् कर्मणा स्वेन बाष्पाविलविलोचनः ॥३८४॥
धिगेतच्चक्रवर्त्तित्वं बन्धुभिर्विरहो यतः । **किं तेन काञ्चनेनाऽपि येनाशु त्रुटति श्रुतिः** ॥३८५॥
मन्ये धन्यमहं काकं साकं यः स्वजनैर्निजैः । अप्यल्पां बलिमादत्ते नात्मानं त्यक्तबान्धवम् ॥३८६॥
या निजैर्बन्धुभिः सार्द्धं संविभज्य न भुज्यते । पुंसः श्रियमिमां मन्ये विधिर्व्याधिमिव व्यधात् ॥३८७॥
इति ध्यायन् विषण्णात्मा बन्धुमध्यात्म[२]बन्धुरम् । निपत्य पादयोश्चक्री निजगाद सगद्गदम् ॥३८८॥
सूनुस्त्वमेव तातस्य नाऽहं हतकविक्रमः । वध्ये मयि दयालुर्यः शमं सोम ! समासदः ॥३८९॥
हतकोऽहं पुरा मुक्तः समग्रैरपि बन्धुभिः । एकं त्वमपि मुञ्चन्मां तात ! मा कृपणं कृथाः ॥३९०॥
तातराज्यमिदं पातु ताततुल्यगुणो भवान् । चक्रवर्त्त्यपि वर्त्तिष्ये तवाहं वाहभृत्यवत् ॥३९१॥
स्वचेष्टिताग्निसन्तप्ते मुञ्च वागमृतच्छटाम् । मयि [३]प्रलपति भ्रातर्दयाकर ! दयां कुरु ॥३९२॥
वदन्निति ततश्चक्री सचिवैरुच्यते स्म सः । नाथ ! **बाहुबलिः** सोऽयं न वक्ता निश्चितव्रतः ॥३९३॥
इति तद्वचनैश्चक्री जानन् बान्धवनिश्चयम् । उन्मुखः साश्रुदृक् पदन्यस्तहस्तोऽवदत्पुनः ॥३९४॥
न चेद्दास्यसि तन्मा दा वाचं वाचंयमाग्रणीः । किं प्रसन्नाक्षिदानेऽपि क्वापि स्या[1]दवकीर्ण्णिता ॥३९५॥
अथ तुष्टिसुधावृष्ट्या दृष्ट्या किञ्चिन्मुनीश्वरः । अपश्यद् **भरतं** हर्षोदञ्चिरोमाञ्चकञ्चुकम् ॥३९६॥
अथ नेत्राम्बुसम्पातनिर्धौतौ शमिनः क्रमौ । केशपाशेन संमार्ज्य निर्ययौ **भरतेश्वरः** ॥३९७॥
ततः सोमयशाः **सोमयशा बाहुबलेः** सुतः । स्वयं **तक्षशिलाराज्ये भरते**नाभ्यषिच्यत ॥३९८॥
ततः समं समग्रेण बलेन बलिनांवरः । ययाव**योध्यां** चक्रं च विवेशाऽऽयुधवेश्मनि ॥३९९॥
इतश्च सत्त्वावष्टम्भनि[2]स्तरङ्गीकृताकृतिः । तस्थौ **बाहुबलि**र्ध्यानबद्धनिश्चलनिश्चयः ॥४००॥
ततः क्षमाभृतां नाथे तत्र त्रैलोक्यजित्वरे । क्रुधा हैमनवातास्त्रं हिमालय इवामुचत् ॥४०१॥
ज्वलद्ध्यानानलध्वस्तजाड्यज्वरविजृम्भिते । तस्मिन् हेमन्तमाहात्म्यं तदेतन्मोघतां गतम् ॥४०२॥
[3]स्वनामधेयचौराणां तपसां वासदायिनः । बाधामाधातुमेतस्य माघमासः समासदत् ॥४०३॥
लोहं वज्रे खलः साधौ ग्रीष्मकाल इवोदधौ । दधौ तपोनिधौ तस्मिन् [4]फाल्गुनः [5]फल्गुवल्गितम् ॥४०४॥
चक्रिणाप्यजितं **बाहुबलिं** जेतुमिवोत्सुकः । [6]पुष्पमासं पुरश्चक्रे पुष्पेषुस्त्रिजगज्जयी ॥४०५॥

---

१. ज्जितं - C । बन्धुरः KH । ३. प्रणयिनि - C ।

टि. 1. अवकीर्णिता - अवकीर्णी - भग्नव्रतः, तस्य भावः । 2. स्थिरीकृतशरीरः । 3. तपः-माघमासः, स्व=माघमासः, स्वस्य नामधेयः=तपस्, तस्य चौरः, तेषां, वासदायिन् - बाहुबलिः तस्य बाधां आधातुं इति अन्वयः कार्यः । 4. फाल्गुनः-फाल्गुनमासः । 5. निरर्थकचेष्टितम् । 6. पुष्पमासः चैत्रमासः ।

भ्रमद्भ्रमरधूमाढ्यैः[१] किंशुकाशोकचम्पकैः[२] । मधुः[1] कुसुमबाणस्य ज्वलनास्त्रनिभैर्बभौ ॥४०६॥
जितमोहमहीनाथे तस्मिन्मथितमन्मथे । मधोः किं नाम कुर्वन्तु सायकाः शीर्णनायकाः ॥४०७॥
अजितेऽथ स्मरेणास्मिन् मुनौ चक्रिविजित्वरे । भीष्मो ग्रीष्मोदयाच्चक्रे चक्रबन्धुः[2] पराक्रमम् ॥४०८॥
करानथ किरत्यर्के खादिराङ्गारदारुणान् । अभूद् **बाहुबलिः** कामं प्रशमामृतवारिदः ॥४०९॥
जगज्जनानुरागेण स्फूर्ज्जतेव समन्ततः । मुनिरासीत् किलाऽऽताम्रो न पुनस्तपनातपात् ॥४१०॥
पश्यन्नस्य तपस्तीव्रमाग्नेयास्त्रमिवोदितम् । रविरुल्लासयामास जलदास्त्रं तपात्यये ॥४११॥
चक्रिदण्डनिपातं यस्तृणायापि न मन्यते । प्रभवन्तु कुतस्तस्मिन् धारादण्डाः पयोमुचाम् ॥४१२॥
ऊढप्रतिज्ञाभारोऽयं न वोढुं शक्यते मया । इतीव पन्नगेन्द्रेण प्रेरिताः फणिनां गणाः ॥४१३॥
रसातलोद्गताः श्यामाः कुटिलभ्रान्तिशालिनः[३] । दध्रुः सर्वाङ्गमुल्लास्य तं लताततिकैतवात् ॥४१४॥ युग्मम् ॥
शिलीमुखगणैर्[3]बाणासनान्तर्[4]विनियोजितैः । तस्य क्षोभाय संरम्भमथारेभे घनात्ययः[5] ॥४१५॥
अथ सत्त्वाद्भुतेनास्य जलैरप्यमलाशयैः । अहासि शरदि प्रीतैर्विकस्वरमुखाम्बुजैः ॥४१६॥
शुक्लध्यानेऽमुनाऽऽरब्धे भ्रष्टकेकिच्छदच्छलात् । शेषध्यानमहांसीव[6] महीपीठे शुचाऽलुठन् ॥४१७॥
मुनेर्यशःप्रतापाभ्यामिव नैर्मल्यमर्ज्जितम् । क्रमादम्बुदमुक्तेन्दुभानुमन्[7]मण्डलच्छलात् ॥४१८॥
श्री**नाभिसूनु**ना **ब्राह्मीसुन्दर्यौ** प्रेषिते ततः । ज्ञानाधीश[8]प्रवेशार्हतन्मनःसौधशुद्धये ॥४१९॥
कुञ्जरादुत्तर भ्रातर्वाच्यमेतदिति प्रभुः । शिक्षां ददौ तयोर्यान्त्योर्ज्ञानश्रीकृष्टिमन्त्रवत् ॥४२०॥
स्थानं तदथ ते याते न मुनीशमपश्यताम् । दृष्टो गुल्मस्तु वल्लीनां सोच्छ्वासः पुरुषाकृतिः ॥४२१॥
तत्र सम्भाव्य तं ताभ्यामुक्तां शुश्राव तां गिरम् । पार्श्वस्थगुप्त[४]कैवल्यलक्ष्मीकर्णेजपां मुनिः ॥४२२॥
भ्रातरुत्तर मातङ्गादित्याकर्ण्य तयोर्वचः । चिन्ताचान्तमतिभ्रान्त[५]स्तस्थिवान् स मुनिश्चिरम् ॥४२३॥
शब्दोऽयं नियतं **ब्राह्मीसुन्दर्योः** श्रुतिसुन्दरः । भाषेते चानृतं नैते न चारूढोऽस्मि हस्तिनम् ॥४२४॥
विकल्पं कल्पयन्नेवं दध्यौ वन्दे लघून्न यत् । मानोऽयमेव मे हस्ती तत्रारूढोऽस्मि धिग् जडः ॥४२५॥
सत्यं मत्वेति तातेन दयां मयि वितन्वता । व्रतिन्यौ प्रतिबोधाय प्रेषिते शीलसद्मनी ॥४२६॥
केवलज्ञानिनो बन्धून् लघूनपि गुणाधिकान् । करिष्ये तदहं मूर्ध्नि पुष्पस्तोमानिवामलान् ॥४२७॥
ध्यात्वेति पादमुद्यम्य भिन्ने मानमतङ्गजे । अलाभि मुनिसिंहेन केवलं मौक्तिकं फलम् ॥४२८॥
मानेऽथ सर्वथा मुक्ते स्फुरन्त्या केवलश्रिया । आश्लिष्टस्य तदा तस्य विलीनं मनसा रयात्[६] ॥४२९॥
दिवि दुन्दुभयो नेदुरभवन् पुष्पवृष्टयः । प्राप्तास्तं वन्दितुं भक्तिभासुराश्च सुरासुराः ॥४३०॥

---

१. धूपाद्यैः - P । २. पल्लवैः - P । ३. कुटिला - C । ४. मुक्त - P । ५. मतिर्भ्रान्त - B, P, C । ६. रसात् - B, A, D, KH, H । टि. 1. मधुः वसन्तः । 2. चक्रबन्धुः - सूर्यः । 3. शिलीमुखः - भ्रमरः पक्षे बाणः । 4. बाणासनम्-बाणः शब्दः, तस्य आसनम्-कर्णः पक्षे धनुः । 5. घनात्ययः शरद् ऋतुः । 6. शेषध्यानानां - आर्त्तरौद्रधर्मध्यानानां महांसि इव । 7. भानुमान्-सूर्यः । 8. ज्ञानाधीशः - केवलज्ञानम् ।

अथो परिवृतः श्रीमान् सुरसार्थैर्महामुनिः । जगदीशस्य समवसरणं प्राप पापभित् ॥४३१॥
प्रभुं प्रदक्षिणीकृत्य गत्वा केवलपर्षदि । उपाविक्षन्मुनिर्मुक्तालतायामिव नायकः ॥४३२॥

**इति भरतकथानकम् ॥**

ततश्च सुष्ठूक्तं प्राक्, '[1]**धम्मो मएण हुंतो**' इत्यादि ॥

अथ भार्यास्नेहेऽपि प्रतिबन्धः स्वप्न[१]दृष्टार्थप्रत्याशायमान इदमाह—

**भज्जा वि इंदियविगार-दोसनडिया करेइ पइपावं ।**
**जह सो पएसिराया, सूरियकंताए तह वहिओ ॥१४८॥**

**भार्यापि** पत्न्यपि आस्तामन्या, **इन्द्रियविकारदोषनटिता** चक्षुराद्यतिप्रसङ्गोपप्लवविगोपिता अथवा इन्द्रियविकारदोषैर्**नटिता** नर्त्तिता स्वाधीनीकृत्य आत्मादेशं कारिता । **करोति पतिपापं** भर्तृहत्यारूपमित्यर्थः, **यथा स प्रदेशि**[२]**राजः सूर्यकान्तया तथा** विषदानप्रकारेण **वधितो** मारित इति । **प्रदेशिकथायामे**तत् प्रागेव कथितम् ॥१४८॥ पुत्रस्नेहविपरिणतिं विवृण्वन्नाह—

**सासयसुक्खतरस्सी, नियअंगसमुब्भवेण पियपुत्तो ।**
**जह सो सेणियराया, कोणियरण्णा खयं नीओ ॥१४९॥**

**शाश्वतसौख्ये** मोक्षसुखे, **तरस्वी** क्षायिकदर्शनत्वात्प्राप्तिसमुत्सुकः । **निजकाङ्गसमुद्भवेन** पुत्रेण **प्रियपुत्रः** सन् **यथाऽसौ श्रेणिकराजः कोणिकराजेन क्षयं नीत** इत्यक्षरार्थः ॥१४९॥

भावार्थस्तु कथायाम् । तथाहि—

**[ श्रेणिककथानकम् ॥ ]**

[2]काश्यपीकर्णपूराभे पुरे **राजगृहे**ऽभवत् । शौर्याधि[३]रोहनिःश्रेणिभुजः **श्रेणिक**भूपतिः ॥१॥
तस्या**भयकुमारा**ख्यः कलासौधं धियांनिधिः । **सुनन्दा**कुक्षिकेदारनलिनं नन्दनोऽजनि ॥२॥
कन्यां **चेटक**भूपस्य रूपस्य कुलदेवताम् । **चेल्लणां श्रेणिकः** क्षोणे[3]रर्यः पर्यणयत्ततः ॥३॥
अवियुक्तौ सदाऽप्येकचित्तौ तावथ दम्पती । बुभुजाते समं भोगान् भारुण्डाविव पक्षिणौ ॥४॥
राजकुञ्जरभोग्याऽथ गर्भस्थं **चेल्लणा**ऽर्भकम् । कुतोऽप्यापतितं भेजे वनी केशरिणं यथा ॥५॥
गर्भस्थेऽस्मिन्नभूत्तस्या दोहदो भर्तृभक्षणे । अविवेकेन गर्भिण्या बुद्धेर्धर्मादने यथा ॥६॥
दुर्दोहदेन तेनेयं दू[४]षितं दुःखिता सती । स्वममन्यत धर्मज्ञा [4]गौणकौणपयोषितम् ॥७॥
अस्थानरोगवत् ह्रीणा कस्याऽप्यग्रे कुदोहदम् । तं सा व्यङ्क्तुमशक्तैव कृशाऽजनि दिने दिने ॥८॥
उपायकोटिभिरपि क्रूरं पातयितुं न तम् । गर्भं शशाक सा कर्म निकाचितमिवाचितम् ॥९॥
कृशताकारणं जाग्रदाग्रहेण महीभुजा । पृष्टा ह्रीनीचदृग् गर्भं शपन्तीव शशंस सा ॥१०॥
अथाऽभयं वितीर्यास्यै क्रूरदोहदपूरणे । उपायमभयं भूपः प्रच्छन्नं पृच्छति स्म सः ॥११॥

---

१. दृष्टान्तः - A, KH । २. राजा - A, KH । ३. रोहितश्रे.... KH । ४. दुःखितं D, B, K ।

टि. 1. गाथा-२५ । 2. पृथ्व्याः कर्णभूषणम् । 3. अर्यः स्वामी । 4. गुणेन निष्पन्नः गौणः, कौणप राक्षसः, तस्य योषित्, ताम् ।

शशस्य पिशितं बद्ध्वोदरे छन्नं शशत्वचा । उत्तानोऽशेत भूनेता तन्मतिप्रेरितस्ततः ॥१२॥
राज्ञोऽथानुज्ञया राज्ञी कृपाणीपाटितं रहः । मूर्च्छां गतस्य तन्मांसं भक्षति स्मातिराक्षसा ॥१३॥
धैर्येण वारिता गर्भक्रौर्येण प्रेरिता मुहुः । सेयं विश्रम्य विश्रम्य मांसास्वादपथेऽचलत् ॥१४॥
पूर्णे बुद्ध्याऽनया भर्तृद्रोहदे दोहदे ततः । धिग् मां पतिघ्नीं पापा[१]मित्युक्त्वा मोहमियाय सा ॥१५॥
मन्त्रेणाभयदत्तेन पश्य मामक्षतं प्रिये ! । इत्युत्थित[1]मिलापालमालोक्येयममोदत ॥१६॥
जातोऽथ पितृवैरीति तयाऽत्याजि वने सुतः । तन्म[2]त्वा हा धिगित्युक्त्वा तत्राऽगादुत्सुको नृपः ॥१७॥
तमशोकतले वीक्ष्य तत्पल्लवमिवार्भकम् । हस्ताभ्यामेष्यते भूपो मृत्यवेऽर्घमिवाग्रहीत् ॥१८॥
अथैत्य स प्रियां प्राह निर्मले ! कर्म किं कृतम् । सर्पिणीतो मनाग्हीनं चण्डालीतोऽधिकं त्वया ॥१९॥
चम्पकद्युति[२]सौरभ्यैर्भूयो भूयोऽपि भावितात् । रम्भागर्भादिवोत्कीर्णो मूढे !ऽत्याजि सुतः कुतः ॥२०॥
सा जगौ राजगौराङ्गी नाथ ! तद्दोहदादयम् । मृत्यवे तव दुर्गत्यै मम तत्किं सताऽमुना ॥२१॥
अथाह पार्थिवः सूनुस्त्यक्त ईदृक्तनुर्वने । विरहान्मृत्युदः सद्यः पातकान्नरकाय च ॥२२॥
कर्मैव सर्वकृत्पुंसां मत्वैवं मा कृथा इदम् । दुष्कीर्त्तिपातकमयं कर्म लोकद्वयाहितम् ॥२३॥
अनिच्छन्त्यपि तं साथ नरेशस्य निदेशतः । **चेल्लणा**ऽपालयद्बालं **स्त्रीभिर्लङ्घ्या न भर्तृवाक्** ॥२४॥
अशोकवनिकायान्तर्दृष्टश्चन्द्र इवोज्ज्वलः । महीचन्द्रस्ततो**ऽशोकचन्द्र** इत्यभ्यधत्त तम् ॥२५॥
तस्याङ्गुलिर्वनीमध्येऽधिष्ठितस्य कनिष्ठिका । विव्यधे कुक्कुटीपिच्छमूलशूलेन कोमला ॥२६॥
रुदतस्तुदती तस्याङ्गुलिः पूतिविभूति[३]भृत् । प्रेम्णाऽक्षेपि मुखे राज्ञा निर्विकल्पहृदैव सा ॥२७॥
तस्याऽऽशु निर्व्यथस्याऽथ क्रमरूढव्रणाङ्गुलिः । कूणिकाऽभूदभिदधे तन्मित्रैः **कूणिके**त्यसौ ॥२८॥
क्रमेण **चेल्लणा** जज्ञे पुनर्नयननन्दनौ । सुतौ **हल्लविहल्ला**ख्यौ प्राचीवेन्दुदिवाकरौ ॥२९॥
त्रयस्ते **चेल्लणा**देव्या भास्वन्तो विश्रुताः सुताः । यै रराज स राजेन्दुस्त्रिशिखः शेखरो भुवः ॥३०॥
पितुर्द्विषं पुपोषाम्बा कूणिकं गुडमोदकैः । भक्तौ **हल्लविहल्लौ** तौ शर्करामोदकैः पुनः ॥३१॥
मत्कृते कारयत्येवं नृप एवेति कूणिकः । दुष्टहृत्कलुषः पुष्टिं क्रमादिन्दुरिवासदत् ॥३२॥
महेन महता स्नेहमोहमग्नो महीपतिः । तेन **पद्मावतीं** नाम राजपुत्रीं व्यवाहयत् ॥३३॥
सुशीलासु कुलीनासु राज्ञीष्वन्येऽपि सूनवः । **श्रेणिकस्य** द्विषच्छेदो[४]त्ताला**ः कालादयो**ऽभवन् ॥३४॥
पुत्रवृद्ध्या च राज्यस्य समृद्ध्या च स भूपतिः । श्री**वीर**भक्त्या चात्मानमेव धन्यममन्यत ॥३५॥
कदाचिदाचितनयस्तनयः प्रथमो नृपम् । इलातलमिलन्मौलिः प्रणिपत्य व्यजिज्ञपत् ॥३६॥
अभयोऽहं मुधा तात ! कातरं पाहि पाहि माम् । अभीरुकुलकोटीर ! भीरुर्जातोऽस्मि ते सुतः ॥३७॥

---

१. पापिष्ठामि... KH । २. सौरभ्यो भूयो... KH । ३. कृत् - A, B, K, D, H । ४. त्तालश्का...A, H, त्तालाका...L, K, D; त्तालाट्वा... KH ।

टि. 1. इलापालः-नृपः तम् । 2. मत्वा-ज्ञात्वा ।

अब्रूत भूतलपतिः ससम्भ्रमतमस्ततः । मा भैर्वत्स ! कुतो भीतिर्जगत्त्राणक्षमस्य ते ॥३८॥
अथ मौलिमिलत्पाणिरभ्यधादभयो भयम् । तात ! पातकचौरेभ्यः सञ्चरद्भ्य इतस्ततः ॥३९॥
तदादिश दिशः शुभ्रीकुर्वन् कीर्त्तिसितैः स्मितैः । परिव्रजामि श्री**वीर**स्वामिनः पादयोः पुरः ॥४०॥
अथाचष्ट नृपः स्पष्टमस्ति ते वत्स ! सद्गतिः । तां दर्दुरसुरक्रीडासूचितामूचिवान् विभुः ॥४१॥
तत्कथं दृग्पथं मुक्त्वा मम यास्यसि निर्मम ! । अगृहीतव्रतस्याऽपि न ते चलति सा गतिः ॥४२॥
तदिदानीमिदं राज्यं मदीयमुरीकुरु । पुत्र ! प्रीणय मच्चक्षुरस्ति पश्चादपि व्रतम् ॥४३॥
**अभयो**ऽभिदधे लभ्या सा गतिर्न व्रतं विना । **स्वगृहेऽपि गृही गच्छत्यगृहीतपथः कथम्** ॥४४॥
आख्यच्चरमराजर्षि**मुदायन**मुनिं जिनः । तदात्तराज्यं न म्लेच्छमिव मां स्पृशति व्रतम् ॥४५॥
गुरौ लब्धेऽपि सर्वज्ञे धर्मज्ञे पितरि त्वयि । न चेद् गृह्णे व्रतं मत्तः प्रमत्तः कोऽस्तु तत्परः ॥४६॥
इत्युक्त्वा पादलग्नेना**ऽभये**नाऽभ्यर्थितो नृपः । शिवाः शिवस्य पन्थानस्तवेत्याह सगद्गदम् ॥४७॥
चरमस्ते प्रणामोऽयमित्युक्त्वाऽथ द्रुतं गतः । [1]प्रभो**राजगृहे** दीक्षां सुतो राजगृहेशितुः ॥४८॥
दुकुले कुण्डले ते च दत्त्वा **हल्लविहल्लयोः** । भूपमापृच्छ्य भेजेऽथ [१]**सुनन्दा** त्वभयं व्रतम् ॥४९॥
चिरं चरित्वा रुचिरं साभिग्रहशतं व्रतम् । मृत्वा सुपर्वा **सर्वार्थसिद्धे**ऽभूदभयोऽद्भुतः ॥५०॥
आत्तव्रते गुणग्रामश्रीधामन्यभये तदा । निश्चिक्ये राज्यभारार्हं **कूणिकं श्रेणिकः** सुतम् ॥५१॥
दध्यौ च सारवस्तूनि भूमिखण्डानि च स्वयम् । ददे विभज्य पुत्रेभ्यो नैषां स्याद् विग्रहो यथा ॥५२॥
इति हारं ददावष्टादशचक्रमवक्रधीः । गजं **सेचनकं** चैष राजा **हल्लविहल्लयोः** ॥५३॥
मन्त्रमत्रान्तरे चक्रे **कूणिकः** क्रूरकर्मकृत् । भ्रातृभिर्दशभिः **काला**दिभिः कालानुकारिभिः ॥५४॥
धराधूर्ये सुते जाते युज्यते भूपतेर्व्रतम् । नाऽयं जराऽऽतुराङ्गोऽपि पिता राज्यं च दास्यति ॥५५॥
बद्ध्वामुं भुज्यते भागैर्भूरिका दशभिः स्वयम् । बद्धोऽपि नैष दुष्कीर्त्यै विवेकविकलः किल ॥५६॥
कारागारान्तरे क्षिप्तो यच्च तच्च वदन्मुदे । पञ्जरे कीरवत् कूरं खादन् जीवत्वसौ चिरम् ॥५७॥
अथोग्रैरङ्गजै रोगैरिव पुत्रैर्नियम्य सः । काष्ठापवरकेऽधारि वारिताऽन्नजलो नृपः ॥५८॥
पूर्वापराह्णयोः पापः कशापातशतं पितुः । बद्धस्य **कूणिको**ऽदत्त मर्कटस्येव कौतुकी ॥५९॥
**श्रेणिक**स्याऽन्तिकं कस्याऽप्यदाद् गन्तुं न **कूणिकः** । केवलं मातृदाक्षिण्यान्न्यषेधन्नैष **चेल्लणा**म् ॥६०॥
आर्द्रीकृतेषु स्नातेव सुरया शतधौतया । कुल्माषपिण्डीं केशेषु गर्भकीकृत्य **चेल्लणा** ॥६१॥
उपेत्य **श्रेणिकं** पिण्ड्या तया छन्नमभोजयत् । शतधौतसुराबिन्दून् केशान्मुक्तानपाययत् ॥६२॥ युग्मम् ।
सा नित्यमित्यकार्षीच्च पतिभक्त्याऽश्रुवर्षिणी । राज्यभोगाधिकं तच्च मेने दुर्दशया नृपः ॥६३॥
सुरालवभवस्वादवशादवनिशासनः । तृषोत्पातकशाघातवेदनां वेद न स्म सः ॥६४॥

---

१. सुनंदामुभयोव्रतं... KH, सुनंदात्वभयोव्रतं - A ।

टि. 1. प्रभोः आजगृहे ।

एवं च तापितपितुस्तपतस्तस्य दुर्मतेः । **कूणिकस्या**ऽभवत्**पद्मावत्यां** पद्माननः सुतः ॥६५॥
वर्द्धापिकाश्च सस्पर्धा धनैः संवर्ध्य दासिकाः । अन्तरन्तःपुरमगादगाधमुदथो नृपः ॥६६॥
ददर्शायमनादर्शे स्वं बिम्बितमिवात्मजम् । अभित्तौ चित्रितमिव स्वं जग्राह करेऽथ सः ॥६७॥
तमात्मनः पुनस्सृष्टिं सुधावृष्टिं दृशां भृशम् । दर्शं दर्शं नृपः श्लोकमेकमित्यपठन्मुदा ॥६८॥
वत्स ! त्वद्दर्शनानन्दी जीवन्मुक्त इवाऽस्म्यहम् । किं मे स्वर्गापवर्गाभ्यां जीव त्वं शाश्वतीः समाः ॥६९॥
मुहुर्मुहुर्महानन्दपीयूषलहरीमिव । पपाठ स इदं श्लोकमालोक्य तं च नन्दनम् ॥७०॥
वृद्धस्त्रीभिर्नृपकराच्छय्यायामथ शायितः । बभौ बालो मरालोऽब्जादुपेत इव सैकतम् ॥७१॥
उत्सवैरुत्सुकीकुर्वन् लोकं तस्य सुतस्य सः । **उदायी**ति महादानप्रदायी विदधेऽभिधाम् ॥७२॥
उत्कर्षेण पितुः सार्द्धमवर्द्धत दिने दिने । बालोऽयमावृतः क्षत्रैर्नक्षत्रैरिव चन्द्रमाः ॥७३॥
कदाचित्क्वापि भूपालो रूपालोकनकौतुकी । तं हस्तान्नामुचद्बालं बालो रत्नमिवामलम् ॥७४॥
कदाऽप्युरौ धृतस्यास्य भुञ्जानेन महीभुजा । अत्रान्तर्घृतधारावत् मूत्रधारापतत्ततः ॥७५॥
बालं नाऽचालयद्वेगभङ्गभीतो मनागपि । अन्नं मूत्रार्द्रितमितः क्षिप्त्वाऽथ बुभुजे नृपः ॥७६॥
तत्रोपविष्टामूचे च **कूणिकश्चेल्लणा**मथ । मातर्ममेव कस्याऽपि[१] पुत्रेऽभूत्प्रीतिरस्ति वा ॥७७॥
समयं समयज्ञाऽथ वक्तुं विज्ञाय **चेल्लणा** । रोषरूक्षोक्तिराचष्ट रे कीदृक् प्रेम ते सुते ॥७८॥
रे क्रूरकर्मचण्डालस्तथा त्वं पालितो यथा । श्री**श्रेणिके**न तत् के न विदन्ति विदितं जनाः ॥७९॥
गर्भस्थोऽपि पितृद्वेषी रे ज्ञातोऽसि कुदोहदात् । [२]पपे च नौषधं किं किं त्वां हन्तुं रोगवन्मया ॥८०॥
त्रायमाण इव क्रूरैः **श्रेणिकस्य** कुकर्मभिः । मया त्वं पात्यमानोऽपि तदा रे पाप ! नाऽपतः ॥८१॥
दुरात्मन् ! जातमात्रोऽपि त्याजितस्त्वं वने मया । आनीतः सुकृतज्ञेन स्वयं राज्ञा कृतघ्न ! रे ॥८२॥
[३]रुजा ते रुदतो बाल्ये कृमिपूयाविलाङ्गुलिः । स्वं मक्षिकां विचिन्त्येव रे राज्ञा स्वमुखे धृता ॥८३॥
येनेत्थं पालितो बाल्ये त्वं रे ! पश्याऽद्य स त्वया । देवतास्थानपूज्योऽपि कामवस्थामवापितः ॥८४॥
**कूणिको**ऽभिदधे तत्किं मह्यं गुडमयानयम् । मोदकान् प्राहिणोद्धल्लविहल्लाभ्यां सितामयान् ॥८५॥
शान्तं पापं कदाऽप्येतत्स कारयति वत्सलः । पितृद्विषे कृतं तत्ते मयेत्यूचेऽथ **चेल्लणा** ॥८६॥
तर्हि निक्षेपवद्राज्यमर्पयिष्याम्यदः पितुः । तत्पादाम्बुजरोलम्बीभूय स्थास्यामि च स्वयम् ॥८७॥
सहसाकारिणं धिग् मां धिग् मां क्रूरतराशयम् । राजश्रीस्वैरिणं धिग् मां धिग् मां जनकवैरिणम् ॥८८॥
इत्युक्त्वाऽर्धाऽऽहृते शौचमादायाह्नाय **कूणिकः** । पितुः पा[1]दान्दुकान् भङ्क्तुमधावद्धृतमुद्गरः ॥८९॥
तमात्तमुद्गरं वीक्ष्याऽऽयान्तं भङ्ग्याऽनयाऽप्ययम् । हन्ताऽद्य मामिति नृपोऽभुङ्क्त तालपुटं विषम् ॥९०॥

---

१. हे – A, K, B, KH । २. पापेचनौ...KH; पापवानौ – B, A, पपेवानौ – D, K, L । ३. राजा ते रुदतो - H, A, B; रुजातो रोदतो... K, D ।

टि. 1. अन्दुः-शृङ्खला ।

गतोऽथ **कूणिकः** कारां विलोक्य जनकं व्यसुम् । [1]ओष्ठकण्ठकपालानुमानपूत्कारमारटत् ॥९१॥
हा तातपादा ! यूयं क्व मां विमुच्यैककं गताः । दीनो जनजनाधीनो भविष्याम्यधुना कथम् ॥९२॥
न्यस्तं जीवन्तमत्र त्वां [१]शबशेषं विलोकये । भाण्डशेषं निधिमिव स्वयं मुक्तमभाग्यकः ॥९३॥
चण्डालो दूर एवास्तु सेवमानोऽपि पाप्मने । इति मां सेवकं ज्ञात्वा तात ! यातोऽसि कुत्रचित् ॥९४॥
अहं तवाप्रियगिरां त्वं च प्रियगिरां मम । स्थितावुत्कण्ठितावेव कोप्यगान्नावकीर्णिणताम् ॥९५॥
क्षमयाम्यनुगत्यापि तात ! त्वामधुनाऽप्यहम् । इत्यालपन्नृपः सोऽभूत्तदैव [२]मरणोत्सुकः ॥९६॥
क ऊर्ध्वदेहिकं कर्म भर्तुः कर्त्ता मृते त्वयि । तत्समाप्य क्रमादेव देव ! रच्यं [३]यथोचितम् ॥९७॥
इति प्रबोधितोऽमात्यैः कृतिभिः कृतवानयम् । कुर्वंस्तिरस्क्रियां स्वस्यां **श्रेणिकस्या**ङ्गसंस्क्रियाम् ॥९८॥
मृतेऽस्मिन्पितृशोकेन द्विट्लोके यान्तु मा श्रियः । इत्यमात्या जरत्पत्रमेकं राज्ञः पुरोऽनयत् ॥९९॥
तत्र क्लृप्तां लिपिं ते चाऽवाचयत् यत्[2]कुहूदिने । पिण्डं दत्तं सुतैः प्रीत्या भुञ्जन्ते पितरो मृताः ॥१००॥
मृते त्वयि पितुः पिण्डं को दाता तैरितीरितः । कुहूषु कल्पयन् पिण्डान् सोऽस्थान्मृत्युपराङ्मुखः ॥१०१॥
अपारमार्थिकं पिण्डदानं लोके तदाद्यभूत् । **लोकः कृतानुकारी हि परमार्थपराङ्मुखः** ॥१०२॥
शय्यासनान्नस्थानानि पितुः पश्यन् पदे पदे । **अशोकचन्द्रः** शोकेन मुहुर्मुहुरबाध्यत ॥१०३॥
पुरे **राजगृहे** राजगृहे च स्थातुमक्षमः । अन्यामन्यायदमनः शोकात्सोऽकारयत् पुरीम् ॥१०४॥
चम्पकाद्भुतचारुत्वसूचिताभ्युदये क्वचित् । देशे निवेशिता साऽभू**च्चम्पेति** प्रथिता पुरी ॥१०५॥
तस्यां पुरि स्थितो राजा यशश्चन्द्रिकया जगत् । गौरयन्नपि मालिन्यं हृदयान्न मुमोच सः ॥१०६॥

**इति श्रेणिककथानकम् ॥**

सुहृत्प्रीतिरप्यविचारितरमणीयेत्याह—

**लुद्धा सकज्जतुरिआ, सुहिणो वि विसंवयंति कयकज्जा ।**
**जह चंदगुत्तगुरुणा, पव्वयओ घाइओ राया ॥१५०॥**

**लुब्धा** लोभिनः, **स्वकार्यत्वरिता** आत्मार्थोत्सुकाः **सुहृदोऽपि विसंवदन्ति** अन्यथा भवन्ति, शत्रवो भवन्ति **कृतकार्या** निष्पन्नस्वप्रयोजनाः, **यथा चन्द्रगुप्तगुरुणा चाणक्येन पर्वतको** म्लेच्छपति**र्घातितो** व्यापादितो **राजा**, तथान्येऽपि कृतकृत्येन सुहृदा मार्यन्त इत्युपनयः । यतः- "**यं मन्येत ममाभावादस्याभावो भवेदिति । तस्मिन् कुर्वीत विश्वासं यथा पितरि वै तथा ॥१॥ यं मन्येत ममाभावादमुमर्थागमः स्पृशेत् । न कार्यस्तत्र विश्वासो यथा शत्रुस्तथैव सः**" ॥२॥ [ ] इति ॥१५०॥ **चाणक्यकथा** चैवम्—

**[ चाणक्य-पर्वतकथानकम् ॥ ]**

ग्राम**श्चणक**नामास्ति **गोल्ल**देशे ललामवत् । **चणी**ति तत्र विप्रोऽभूत् भार्या चास्य **चणेश्वरी** ॥१॥
स च जन्मप्रभृत्येव श्रावकत्वमभावयत् । ज्ञानिनो मुनयोऽवात्सुः कदाचन तदालये ॥२॥

---

१. शिवशेषं - A, KH । २. नृपसोत्सुकः P । ३. यथोदितं - K, D ।

टि. 1. ओष्ठौ कण्ठः यावत् कपालम् अनु कपालपर्यन्तं मानः प्रसारः, तादृशपूत्कारपूर्वकं आरटत् । 2. कुहूः-अमावस्या ।

तदैव दैवतो जातस्तस्य जातरदः सुतः । तं जातमात्रमानिन्ये मुनीनां नमनाय सः ॥३॥
आक्रान्तनिखिल[1]क्षोणिकान्तमुद्भ्रान्तपौरुषम् । मुनयो भाविनं भूपं तमाख्यद्दन्तलक्षणैः ॥४॥
अयं भूपत्वलाभेन मा भून्नरकभागिति । ग्राव्णाऽघर्षच्छिशोर्दन्तान् पीडामगणयंश्चणी ॥५॥
पात्रान्तरितराज्यश्रीरयं पालयिता भुवम् । ख्यातं मुनिवरैरेभिरदश्च रदघर्षणात् ॥६॥
सूनो**श्चाणक्य** इत्यस्य नाम व्यरचय**च्चणीः** । श्रावकः सोऽप्यभूद्भूरिविद्यानद्यालिसागरः ॥७॥
स कुलीनस्य विप्रस्य कन्यामेकामुपायत । कदाचिद् भ्रातुरुद्वाहे पितृगेहं ययौ च सा ॥८॥
भूरिभूषणभाराभिस्त्रपुकुण्डलमण्डना । स्वसृभिः श्रीमदूढाभिरगूढं हस्यते स्म सा ॥९॥
लीना विवाहनिर्वाहं यावदावासकोणके । तस्थौ निरुपमानं साऽपमानं दधती हृदि ॥१०॥
गताऽथ श्वशुरावासं निश्वासं बिभ्रती बहुम् । रुदती सेयमेकान्ते कान्तेनेति न्यगद्यत ॥११॥
करोषि रोषिता केन वदनं तन्वि ! नन्विदम् । इदानीमिन्दुना तुल्यं दृग्जलैः सज्जकज्जलैः ॥१२॥
जल्पसङ्कल्पितो येनापमानस्तव मानिनि ! । विश्राम्यामि प्रिये ! तस्य प्राणेषूप[१]क्रमश्रमात् ॥१३॥
श्रीभाजि स्वसृलोकेऽहं दारिद्र्येणाऽपमानिता । तस्य प्राणेषु विश्राम्य यदि विश्राम्यसि प्रिय ! ॥१४॥
इत्युक्ते कान्तया जातवित्तार्जनमनोरथः । स ययौ **पाटलीपुत्रं नन्द**भूपालपालितम् ॥१५॥
दत्ते दानं सदानन्दो **नन्दो** विप्रकुलेऽतुलम् । इति विज्ञाय राज्ञः स प्रविवेश निकेतनम् ॥१६॥
तत्राऽऽसनेषु दत्तेषु स स्थितः प्रथमासने । सदा भद्रासनं **नन्द** एवाऽलङ्कुरुते स्म यत् ॥१७॥
इहैतः सह **नन्देन** तदोचे **नन्दनन्दनः** । नृपस्य श्रियमाक्रम्य न्यषीदत् क इह [२]द्विजः ॥१८॥
ऊचे काचन **चाणक्यं** साम्नाऽथ नृपदासिका । भोः ! प्रसीद निषीदास्मिन् द्वितीयस्मिन् द्विजासने ॥१९॥
स्थास्यतीह मदीयोऽसौ कमण्डलुरिति ब्रुवन् । न्यधात् कमण्डलुं सोऽत्र नामुञ्चत् प्राच्यमासनम् ॥२०॥
इत्थं तृतीये दण्डं च तुरीये जपमालिकाम् । उत्थाप्यमानः सोऽमुञ्चद् ब्रह्मसूत्रं च पञ्चमे ॥२१॥
ऊचेऽथ चेटी धृष्टोऽयमहो नोज्झेन्नृपासनम् । विशेष एष पीठानि शेषाण्यपि रुणद्धि यत् ॥२२॥
शक्यः कारयितुं किञ्चिन्न साम्ना कथमप्यसौ । [2]व्यालशुण्डालवद्दण्डसाध्यो हा दुष्टधीर्द्विजः ॥२३॥
एवं विचार्य **चाणक्यश्च**रणेनाहतस्तया । उत्तस्थौ कोपशोणाक्षो दण्डदून इवोरगः ॥२४॥
**नन्द**मुत्कन्दयिष्यामि सपुत्रपशुबान्धवम् । इति प्रतिज्ञां **चाणक्यश्च**क्रे लोकस्य पश्यतः ॥२५॥
नगरान्निर्जगामाऽथ दवानल इव ज्वलन् । त्रस्यल्लोकविमुक्ताध्वा कोपचण्ड**श्चणि**प्रसूः ॥२६॥
पात्रान्तरधरित्रीशो भविष्यामीति स स्मरन् । सम्भ्रमी बम्भ्रमीति स्म पश्यन् राज्योचितं नरम् ॥२७॥
पदे पदेऽपमानं स स्मारं स्मारं रुषा ज्वलन् । अल्पीचक्रे भुवं गच्छन् ग्रामाद् ग्रामं पुरात्पुरम् ॥२८॥
अवात्सु**र्नन्द**भूमीन्दोर्यत्र बर्हिणपोषकाः । तं ग्राममेष भिक्षायै प्रव्राड्वेषोऽन्यदाऽविशत् ॥२९॥

---

१. क्रमात् – KH । २. पृथग् भूपति – A ।

टि. 1. क्षोणिकान्तः – भूपः, आक्रान्ताः निखिलाः क्षोणिकान्ताः येन सः, तम् । 2. दुष्टहस्ती इव ।

मयूरपोषकविभोर्बभूव दुहितुस्तदा । गर्भिण्याः पूर्णपीयूषभानुपानस्य दोहदः ॥३०॥
अत्याकुलस्तं तद्बन्धुसन्दोहो दोहदं ततः । आख्याय पूरणोपायम[1]पृच्छच्चणिनन्दनात् ॥३१॥
आचष्ट **चणि**भूर्जातमपत्यं मम दत्थ चेत् । तदस्याः पूरयामीन्दुबिम्बपानमनोरथम् ॥३२॥
अपूर्णः सुभ्रुवां गर्भद्रोहदो दोहदो भवेत् । इति तत्प्रतिपेदाते तन्मातापितरौ वचः ॥३३॥
शिरःस्फुरितपूर्णेन्दुभ्रमदच्छिद्रचन्द्रकम् । अकारयदथोदारं **चणि**भूस्तृणमण्डपम् ॥३४॥
संशिक्ष्यैकः पुमान् गुप्तः स्थापितो मण्डपोपरि । सा मण्डपतले बाला राकानिशि च शायिता ॥३५॥
क्षीरपूर्णं मृजाजातभ्राजनं रौप्यभाजनम् । मुक्तं छिद्रमितं छिद्रतलक्षोणितले ततः ॥३६॥
निशीथे शशभृद्बिम्बे तदन्तःप्रतिबिम्बिते । सुप्तामुत्थाप्य तां बालां **चणि**सूनुरवोचत ॥३७॥
बाले ! तव विशालेन भाग्येन भुवमागतः । स्वेच्छया पीयतां सोऽयमिन्दुरिन्दुमुखि ! त्वया ॥३८॥
अथेयमपिबत् दुग्धं बिम्बितेन्दु यथा यथा । आच्छादयति तच्छिद्रं पुमान् गुप्तस्तथा तथा ॥३९॥
पयो निपीतं पिहितं छिद्रमुल्लसितं तमः । पीतः शीतगुरित्येषा मुमुदे कुमुदेक्षणा ॥४०॥
तस्याः सुतं भविष्यन्तं मत्वा राज्यधरं द्विजः । द्रव्यार्जनमना द्रष्टुमारेभे धातुवादिनः ॥४१॥
प्रतापं वीरकोटीरकरवाललतेव तत् । समये तनयं धामस्तोमस्यूतमसूत सा ॥४२॥
पितृभ्यामभिधानेन **चन्द्रगुप्त** इतीरितः । स क्रमाद्ववृधे बालो जगदालोकचन्द्रमाः ॥४३॥
[2]बालः खेलन् स भूपालः स्वयं भूत्वा सदार्भकान् । सचिवादिपदन्यस्तान् सप्रसादममोदयत् ॥४४॥
हरीकृत्य करीकृत्य वाहयामास सोऽर्भकान् । शैशवेऽपि शशी हन्त महो वहति हृत्प्रियम् ॥४५॥
भ्रमन् क्रमवशात्तत्र **चणि**पुत्रः समागमत् । तं तथा वीक्ष्य खेलन्तं विस्मितश्च स्मितश्च सः ॥४६॥
चाणक्योऽथ परीक्षार्थममुं बालकमालपत् । दानेन राजते राज्यं राजन् ! किञ्चन यच्छ मे ॥४७॥
स जगाद यथाकाममिमा ग्रामगवीर्द्विज ! । गृहाण निगृहाण द्राग् दारिद्र्यजमुपद्रवम् ॥४८॥
ततश्चणिसुतोऽवोचदहं ग्रामगवीरिमाः । गृह्णन् गोविन्दवृन्देन यदि हन्ये ततः किमु ॥४९॥
सोऽभ्यधादर्भको विप्र ! मा भैषीर्मयि दातरि । नरेशवश्यं विश्वं हि भवन्तं हन्त हन्तु कः ॥५०॥
**चणि**पुत्रोऽथ विज्ञाय धन्यं विज्ञानिनं च तम् । कस्य पुत्रोऽयमित्यर्भानपृच्छत् तत्परिच्छदान् ॥५१॥
तैरूचे जातमात्रोऽपि मात्रा पित्रा च कल्पितः । प्रव्राजकाय कस्मैचित् तत्प्रव्राजकसूरसौ ॥५२॥
अथैनं **चणि**भूरूचे त्वं यदीयोऽसि सोऽस्म्यहम् । स्याद्वत्स ! समागच्छ राज्यं साक्षाद् ददामि ते ॥५३॥
इत्याकर्ण्य द्रुतं **चन्द्रगुप्तश्चणिसुता**ङ्गुलीम् । समालम्बे राज्यश्रीवल्लिशाखाशिखामिव ॥५४॥
**चाणक्यः** पुत्रमाणिक्यं तमादाय द्रुतं द्रुतम् । पलायिष्ट बलात्कारं शङ्कमानः स तत्पितुः ॥५५॥
धातुवादार्जितैर्वित्तैरथोदग्रपरिग्रहम् । चक्रं चकार **चाणक्यो** नन्दकन्दच्छिदोत्सुकः ॥५६॥

---

१. पप्रच्छ - D । २. बाल्ये - C ।

कदापि चपलापातमापत्य **चणि**नन्दनः । रुरोध योधपटलैः **पाटलीपुत्र**पत्तनम् ॥५७॥
तदल्पं बलमालोक्य नन्दोऽनल्पबलस्ततः । पशुप्राग्भारकलया दलयामास विक्रमी ॥५८॥
**चाणक्यश्चन्द्रगुप्तेन** समं समयवित्तमः । पलायिष्ट [१]स्तुतपदस्तदानीं मनसाऽपि सः ॥५९॥
आदिशत् सादिनो **नन्दश्चन्द्रगुप्त**ग्रहेच्छया । **अहतो हन्त मुच्येत छित्त्वा पुच्छमहिर्न हि** ॥६०॥
एकः सादी मनोवेगविवादी द्रुतमापतत् । दृष्टश्च चणिपुत्रेणादिष्टश्च स शिशुर्नृपः ॥६१॥
प्रविशैतत् सरो वत्स ! वीचिषु [२]प्रचलास्वितः । दृष्टादृष्टः क्षणं तिष्ठेः शरदभ्रेषु चन्द्रवत् ॥६२॥
अथैवं कृतवत्यस्मिन्निविश्य सरसीतटे । **चणि**सूनुः स्वयं ध्यानलीनो योगीव तस्थिवान् ॥६३॥
भदन्त ! ध्रियते ध्यानं यद्धर्मेण भवादृशैः । दृष्टो नन्दस्य तस्यारि**श्चन्द्रगुप्तः** क्वचित् त्वया ॥६४॥
इत्यागत्याश्ववारेण तेन पृष्ट**श्चणि**प्रसूः । मौनभङ्गभियाऽङ्गुल्या **चन्द्रगुप्त**मदीदृशत् ॥६५॥
सरःप्रवेष्टुमामुक्तमुक्तयेऽथ नतः स्थितः । तत्खड्गेनैव स भट**श्चाणक्ये**न द्रुतं हतः ॥६६॥
**चन्द्रगुप्त**मथाहूय हयमारोप्य तं कृती । सञ्चरन् वीचिवेगेन **चणि**सूनुरवोचत ॥६७॥
अदर्शि सादिनस्तस्य भवानङ्गुलिलीलया । मया वत्स ! यदा किं किं तदा हृदि तवाऽभवत् ॥६८॥
आचष्ट **चन्द्रगुप्तो**ऽपि तदा मेऽभूदिदं हृदि । नूनमेवं मम श्रेयः पश्यत्यार्यो विचार्यकृत् ॥६९॥
अचिन्तयच्च **चाणक्यः** सदाऽयं मे वशो भृशम् । गुरोः सुशिष्य इव न ध्रुवं व्यभिचरिष्यति ॥७०॥
त्वरया पुनरायाति दूरान्नादिनि सादिनि । **चाणक्यो**क्त्याऽविशच्चन्द्रस्[1]तल्ले तप्त इव द्विपः ॥७१॥
[2]अर्ण्णोऽभ्यर्ण्णस्थितं तूर्णं स जगौ रजकं द्विजः । त्वत्पङ्क्तौ कुपितो भूपस्[3]त्रस्य चेज्जीवितुं मतिः ॥७२॥
सोऽप्यारादश्ववारं तं वीक्ष्याऽनश्यद्द्विजस्तु सः । चीराण्यारब्ध निर्णेक्तुं किं न जानन्ति धीधनाः ! ॥७३॥
द्रुतमेत्याश्ववारोऽसौ पृच्छन् पूर्वाश्ववारवत् । मारितो मतिमच्चूलामणिना **चणि**सूनुना ॥७४॥
चचाल पुनरुत्ताल**श्चन्द्रश्चणि**भुवा सह । [३]सुखैकसिन्धुर्मध्याह्नक्षुधाऽथ विधुरोऽभवत् ॥७५॥
पथि ग्रामादथायान्तं **चाणक्यः** कञ्चिदैक्ष्यत । भट्टं सद्यः कृताहारं सोद्गारं तुन्दमार्जिनम् ॥७६॥
ऊचे तं **चणि**भूर्भट्ट ! ग्रामे [4]पालिर्लगेन्न वा । भट्टो जगौ लगत्येव सम्प्रत्येवालगन्मम ॥७७॥
पुनः पप्रच्छ **चाणक्यः** किं भट्ट ! बुभुजे त्वया । स आख्यत्[5]तरसं शालि दधिशालिकरम्भकम् ॥७८॥
भ्रमतो मम भक्ताय ग्रामे वेला लगिष्यति । तन्मिलिष्यन्ति दुर्वारा अश्ववारा विरोधिनः ॥७९॥
ईशो न पदचारेऽपि **चन्द्र**स्तु क्षुधयाऽऽतुरः । राज्यबीजमयं कृत्यैरकृत्यैरपि रक्ष्यते ॥८०॥
एतद्विचिन्त्य **चाणक्य**स्तस्य भट्टस्य तत्क्षणम् । उदरं दारयामास प्रोल्ललास करम्भकः ॥८१॥

---

१. श्रुतपद - C हृतपद.... A, L, H द्रुतपद - B । २. प्रबलास्वितः - C प्रचलान्वितः - A, KH प्रबलान्वितः- P । ३. मुखैकसिन्धुमध्याह्न - P, A; मुखैकसिन्धुर्मध्या... B, C । सुखैकसिन्धुमध्याह्न - K, D, H ।

टि. 1. तल्लं - जलाशयः, तस्मिन् । 2. अर्णस्(नपुं) - जलम् । 3. त्रस गत्यर्थकधातोः आज्ञार्थ-द्वि० पु० एकवनचरूपः । 4. पालिः - भोजनपङ्क्तिः । 5. तरसं - मांसम् ।

तं **चाणक्य**गिरा चन्द्रः करम्भं बुभुजेऽघृणः । **कृत्याकृत्यविचारो हि गुर्वाज्ञासु न धीमताम्** ॥८२॥
**चाणक्यश्चन्द्रगुप्तेन** समं गच्छन् दिनात्यये । प्राविशत्कमपि ग्रामं वैद्या[१]लयमिवातुरः ॥८३॥
भ्रमन् गृहे गृहे भिक्षाकृते चणिसुतस्ततः । इयाय रोरवृद्धायाः कस्याश्चिदपि सद्मनि ॥८४॥
तत्रैकः शिशुरत्युष्णे पेयान्ने परिवेषिते । करं मध्येऽक्षिपत् क्षिप्ततैले कवललोभतः ॥८५॥
बालं दग्धाङ्गुलिं वृद्धा तं रुदन्तं रुषाऽवदत् । मत्सूनुरपि धिग्मूर्खश्चणिसूनुरिवासि रे ॥८६॥
**चाणक्यः** श्रुततद्वाक्यः प्रविश्यान्तर्निकेतनम् । वृद्धां पप्रच्छ पुत्रेऽस्मिन् किं चाणक्यनिदर्शनम् ॥८७॥
जरत्याचष्ट **चाणक्यो** देशं नाऽसाधयद्बहिः । प्रागेवाऽगात् पुरीं राज्ञः प्रापदप्राज्ञताफलम् ॥८८॥
बालोऽप्ययमभुञ्जानः पार्श्वात् पूर्वं शनैः शनैः । क्षिपन्नत्युष्णपेयान्तः पाणिं **चणि**भुवः सदृक् ॥८९॥
स्त्रीयं वृद्धाप्यहो कीदृग्बुद्धिरित्यवधारयन् । अगमद्धिमवत्कूटसन्निवेशं **चणिप्रसूः** ॥९०॥
तत्र **पर्वतका**ख्येन मैत्र्यं **पर्वत**भूभुजा । चिरं चकार **चाणक्यो नन्द**निष्कन्दनैकधीः ॥९१॥
**चाणक्य**स्तं कदाप्यूचे नन्दमुन्मूल्य मूलतः । बान्धवाभ्यामिवावाभ्यां राज्यं राजन् ! विभज्यते ॥९२॥
इत्यथ प्रतिपद्याऽभूदुद्धतः **पर्वता**धिपः । **चाणक्यचन्द्रगुप्ता**भ्यां पक्षवान् केशरीव सः ॥९३॥
मूर्त्तशक्तित्रयमिव त्रयश्चन्द्रादयोऽथ ते । बहिर्नन्दमहीदेशं भङ्क्तुमारेभिरेऽभितः ॥९४॥
नाऽशाकि नाकिशौर्यैरप्येकं भङ्क्तुं पुरं तु तैः [२]। भिक्षायै भिक्षुवेषोऽत्र तदविक्ष**च्चणि**प्रसूः ॥९५॥
पुरे परिभ्रमन्नत्र सप्तापश्य**च्चणि**प्रसूः । सकलाः [1]सकलाराशिरनाद्या मातृदेवताः ॥९६॥
अचिन्तय[2]**च्चणेश्वर्याः** सूनुर्नूनमिदं पुरम् । न तावद् भज्यते यावदेताः सन्तीह देवताः ॥९७॥
कथमुत्थापयाम्येता इतिचेता**श्चणि**प्रसूः । पुरोद्विष्टः कदा भावीत्यापृष्टो नागरैर्जगौ ॥९८॥
सन्त्येता देवता यावदेव तावदहो कुतः । भविष्यति पुरोद्विष्टो नेष्टो ह्यासामविग्रहः ॥९९॥
अथ तैर्भङ्क्तुमारेभे तद्देव्योको यथा यथा । [3]त्रस्तं **चाणक्य**सङ्केताद् बहिः सैन्यं तथा तथा ॥१००॥
ततः प्रमोदवद्भिस्तैर्मूलादुन्मूलितं द्रुतम् । तद्देवीधाम **को नाम कामं धूर्त्तैर्न वञ्च्यते** ॥१०१॥
तत्प्रभावप्रभाहीनं दीनं तत्पत्तनं ततः । द्रागभज्यत तैः सिंहमुक्तं वनमिव द्विपैः ॥१०२॥
क्रमेण विक्रमेणामी देशं संसाध्य सर्वतः । पुरं **नन्दस्य** रुरुधुर्गुरुधुर्यचमूचयाः ॥१०३॥
क्षीणकोशचमूशक्तिर्भाग्यभङ्गेन नन्दराट् । धिग् धिग् कर्माणि **चाणक्याद्**धर्मद्वारमयाचत ॥१०४॥
दूतानाचष्ट **चणि**सूरभयं तस्य भूपतेः । यच्छक्नोति तदादाय रथेनैकेन गच्छतु ॥१०५॥
अथ भार्यां च कन्यां च यथाशक्ति धनं तथा । **नन्दः** स्यन्दनमारोप्य पुरात् कीर्त्तेश्च निर्ययौ ॥१०६॥
प्रविशन्तं पुरे **चन्द्रगुप्तं** चन्द्रमिवाम्बरे । दृष्ट्वा कुमुद्वतीवेष्टमानन्दन्नन्दनन्दिनी ॥१०७॥

---

१. लयइवातुरः - P, KH । २. ततोऽसौ - KH ।

टि. 1. कलानां राशिः कलाराशिः तेन सह वर्तते इति सकलाराशिः चणिप्रसूः । 2. चणेश्वरी - चाणक्यमाता । 3. अपसृतं ।

दृगुत्सङ्गप्रसङ्गेन तमङ्गीकृतमात्मना । आलिलिङ्ग च सर्वाङ्गमियं चङ्गमनङ्गवत् ॥१०८॥
भावज्ञोऽथाऽवदन्**नन्दः** पुत्रि ! यत्र रुचिस्तव । व्रज तत्र प्रशस्यं ते क्षत्रकन्याः स्वयंवराः ॥१०९॥
अथ **नन्द**रथं मुक्त्वा **चन्द्रगुप्त**रथे रयात् । तस्यां समधिरोहन्त्यां भग्नाश्चक्रे नवाऽऽरकाः ॥११०॥
अमङ्गलकरी केयमेतीत्येतन्निषेधकृत् । **चन्द्रश्चणिभुवा**ऽभाषि मा मैनां वत्स ! वारय ॥१११॥
आचष्टे नवचक्राऽऽरभङ्गमङ्गलभाषया । इयं नव भवद्वंश्यनरानिह नराधिपान् ॥११२॥
श्रियेव मूर्त्तया साकं तया कंसारिवत्ततः । क्षीरोदसोदरच्छायं नृपवेश्म विवेश सः ॥११३॥
विभक्तु[१]मनसौ **नन्द**सम्पदं **चन्द्रपर्वतौ** । सुरक्षितां सुरूपाङ्गीं कन्यामेकामपश्यताम् ॥११४॥
कस्मैचन द्विषे दातुं विषेणाऽऽजन्म सा पुनः । अभ्यासजीर्णजीर्णेनाऽवर्द्धि **नन्दे**न धीमता ॥११५॥
तदा तदङ्गसङ्गेन मृता भूतलपातिनी । मक्षिकाऽलक्षि काचिद् धीचणेन **चणि**सूनुना ॥११६॥
विषकन्येति तां मत्वा **चणि**भूर्धीषणैकभूः । **चन्द्रपर्वतका**वूचे समं तदनुरागिणौ ॥११७॥
**नन्द**श्रीसंविभागेऽभूत्तवैका **चन्द्र** ! कन्यका । द्वितीया **पर्वत** ! ततस्तवास्तु द्युतिपार्वती ॥११८॥
इत्युक्त्वा तत्क्षणादेव **पर्वतः** प्रीतिपर्वतः । तद्विवाहमहोत्साहमारेभे मारविह्वलः ॥११९॥
तत्पाणिपीडनस्वेदात्सर्वतः **पर्वते** ततः । नुन्ना यज्ञाग्नितापेन समक्रामन्विषत्विषः ॥१२०॥
संक्रान्ततद्विषाक्रान्तशिथिलाखिलविग्रहः । घूर्णन्नव्यक्तवर्णोक्ति**श्चन्द्रं पर्वतको**ऽभ्यधात् ॥१२१॥
अये ! कवलितो ज्वालकालकूट इवाकुलः । न वक्तुमपि शक्तोऽस्मि वत्स ! पाहि ह हा प्रिये ! ॥१२२॥
मान्त्रिका मान्त्रिका वैद्या वैद्या इत्यथ भाषिणम् । **चाणक्यः चन्द्रगुप्तं** भ्रूसंज्ञयैव न्यवारयत् ॥१२३॥
**पर्वतः** सोऽथ **चाणक्य**वञ्चितः प्राप पञ्चताम् । एकस्त्ववापदैश्वर्यं मौर्यो **नन्द**स्य तस्य च ॥१२४॥

**इति चाणक्य-पर्वतकथानकम् ॥**

निजकस्नेहोऽपि परिणामदारुणतया किम्पाकफलमधुपरिणाममनुवदतीत्याह—

> **नियया वि निययकज्जे, विसंवयंतंमि हुंति खरफरुसा ।**
> **जह रामसुभूमकओ, बंभक्खत्तस्स आसि खओ ॥१५१॥**

**निजका अपि** स्वजना अपि, **निजककार्ये** स्वप्रयोजने **विसंवदन्ति** विघटमाना **भवन्ति । खरपरुषाः खराः** कर्मणो निष्ठुराः **परुषा** वाचा कर्कशाः, **यथा रामसुभूमकृतो ब्रह्मक्षत्रस्य** अर्च्यत्वात् ब्रह्मणः पूर्वनिपातः, **आसीत् क्षयः** यथायोग्यं रामकृतः क्षत्रक्षयः, सुभूमकृतस्तु ब्रह्मक्षय इति समासार्थः ॥१५१॥ व्यासार्थः कथायामेव । तथाहि—

**[ सुभूमकथानकम् ॥ ]**

**वसन्तपुरभूरग्नि**र्नाम व्युच्छिन्नवंशकः । दारकः पर्यटन् देशानवापत्तापसाश्र[२]मम् ॥१॥
**अग्निं यमः** कुलपतिः सुतत्वेन तमग्रहीत् । ततोऽभू[३]द्**यमदग्न्याख्यः** स तेपेऽचाद्भुतं तपः ॥२॥
जैनशैवमती **वैश्वानरधन्वन्तरी** सुरौ । स्वस्व[४]धर्मप्रकृष्टत्वं वाग्भिर्व्यवदतां तदा ॥३॥

---

१. विभंकु - H, A, B, KH । २. श्रयं - KH, K । ३. भूज्जम - B, A । ४. स्वकर्म - B, A ।

जैनेषु प्रथमो यो य उत्कृष्टस्तापसेषु तौ । परीक्ष्यौ गुणवत्तायामित्यभून्निर्णयस्तयोः ॥४॥
**मिथिलाया** नृपो भावयतिः **पद्मरथ**स्तदा । **चम्पां श्रीवासुपूज्या**ख्यात् गुरोर्व्रतचिकीर्व्रजन् ॥५॥
दृष्टश्चैकोऽह्रिगस्ताभ्यां प्रारब्धश्च परीक्षितुम् । पानान्ने ढौकिते धीरस्तृट्क्षुधार्त्तोऽपि नाददे ॥६॥ युग्मम् ॥
ताभ्यां वज्रशलाकाभैः कण्टकैः पूरिते पथि । क्षरद्रक्तांह्रिरप्येष [१]तूलपूल इवाचलत् ॥७॥
गीतादिभिर्मनःक्षोभदक्षैरक्षोभितोऽभितः । सिद्धपुंरूपतस्ताभ्यां पुरोभूयेत्यभाषि सः ॥८॥
युवाऽसि दीर्घमायुस्ते भोगाः सन्ति मनीषिताः । कालेऽस्मिन्न तपो भाति प्रभात इव भोजनम् ॥९॥
राज्ञोचे किं तपः कुर्याद्देहभारासहो जरन् । तपः प्रौढायुषः प्रौढं दशामानेन दीपभाः ॥१०॥
जाने तानेव भोगान् भो ! यत्र चित्रा [२]मनोरतिः । तद्भात्यद्य तपो भोज्यमिव देवार्चिनः प्रगे ॥११॥
सत्त्वाद्रिमथ तं नुत्वा तौ गतौ तापसोत्तमम् । तपस्तेजस्ततेरग्निं जमदग्निं परीक्षितुम् ॥१२॥
जटावल्लितरोस्तस्य तौ देवौ श्मश्रुगुल्मके । स्थितौ कुलायं निर्माय चटकद्वन्द्वरूपिणौ ॥१३॥
चटकं चटका यामि हिमालयमितीरिणम् । त्वमन्यासक्त एवासि [३]नायासि द्रुतमभ्यधात् ॥१४॥
आचष्ट चटकः कान्ते ! प्रिया स्वान्ते त्वमेव मे । न यद्येमि च काले तद् गृह्ये गोघातपातकैः ॥१५॥
पापेन तापसस्यास्य गृह्येऽहमिति शप्यताम् । भान्ति मोघानि गोघातपातकानि हि तत्पुरः ॥१६॥
एवमुक्ते चटकया तापसः कोपमाप सः । पाणिभ्यां पक्षिणौ मङ्क्षु धृत्वा च प्रत्युवाच तौ ॥१७॥
चण्डत्वमिव चन्द्रेऽर्के कलङ्कमिव रे मयि । पापौ पापं दिशन्तौ वां गमयामि यमालयम् ॥१८॥
अलपत् [1]कलविङ्कस्तं क्रुधाऽलं ते मुधा तपः । अपुत्रस्य गतिर्नास्तीत्यपि किं न श्रुता श्रुतिः ॥१९॥
मन्वानस्तत्तथैवायमध्यायदथ तापसः । अपुत्रस्य [४]तपोऽभून्मे ही भस्मनि[५]हुतोपमम् ॥२०॥
भ्रान्तं तं वीक्ष्य नन्वन्तर्द्धन्वन्तरिरतप्यत । मुधैते मुनयो मूढाः स इति श्रावकोऽजनि ॥२१॥
प्रत्येत्य प्रत्ययात् प्रीतौ तिरोभूतां च तौ सुरौ । अगमज्**जमदग्नि**स्तु पुरं नेमिककोटिकम् ॥२२॥
**जितशत्रुं** नृपं भूरिकन्यं कन्यां ययाच सः । या त्वां कन्या शतादिच्छेद्देया सेति नृपोऽभ्यधात् ॥२३॥
[६]स भूपः कन्यकाः स्माह कन्यकान्तःपुरे गतः । युष्मत्तो धर्मपत्नीत्वमेका मे काऽपि यात्विति ॥२४॥
श्यामं भिक्षाचरं क्षामं तं वीक्ष्य कृतथूत्कृतीः । स कोपात्तापसः शापात्कुब्जिका विततान ताः ॥२५॥
वीक्ष्यैकां नृपकन्यां स प्राङ्गणे रेणुखेलिनीम् । **रेणुके** ! काङ्क्षसीत्युक्त्वा मातुलिङ्गमदर्शयत् ॥२६॥
इच्छामीति स्फुरत्पाणिं तां स पाणिग्रहस्पृहः । हृष्टोऽग्रहीद् दृढं [७]रोरनरो रत्नमिवोरसा ॥२७॥
चाटुवादी गवार्दींश्च तां च तस्मै ददौ नृपः । शालीशतं स चैकोनं शक्त्यानयदकुब्जताम् ॥२८॥

---

१. तूलचूल - P, A, D, K, KH, C । २. मनोगतिः KH, मनोरमाः K, D मतिः - P । ३. यासीहततोद्रुतम् - H, B, A; यासिद्रुतमित्यगात् - P, C यासिद्रुतमूचिवान् - KH; यासिद्रुतमेत्यगाः - L; यासिद्रुतमभ्यगात् - K । ४. ततो - P । ५. हुतंयथा - L, C, K, A, H, KH, D, B । ६. स भूपकन्यकाः - L, D, K । ७. बालां - KH ।

टि. 1. कलविङ्कः - चटकः ।

आनीय साऽश्रमे प्रेमलीलया लालिताऽमुना । क्रमाच्च यौवनस्फीता परिणीता यथाविधि ॥२९॥
ऋतुकालेऽथ बालेयं तेनोक्ता त्वत्कृते चरुम् । साधयामि प्रिये ! येन स्याद् ब्रह्मौघस्तुतः सुतः ॥३०॥
प्रियाऽस्ति **हास्तिनपुरेऽनन्तवीर्य**नृपप्रिया । मत्स्वसाऽस्यै चरुः साध्यः क्षात्रोऽपीति तयौच्यत ॥३१॥
तौ चरू स्वकृशोदर्यै तत्सौदर्यै च सोऽप्यथ । ब्रह्मक्षात्रमहःपात्रमहन्यस्मिन्नसाधयत् ॥३२॥
अरण्ये हरिणीवाऽहं जाता मा तादृगस्तु मे । पुत्रोऽपीति धिया क्षात्रं रेणुका चरुमाहरत् ॥३३॥
ब्राह्म्यं चाऽदाच्चरुं स्वस्रे तयोर्जातौ सुतौ ततः । **रामश्च कृतवीर्यश्च** मिथो व्यस्तकुलोचितौ ॥३४॥
ऋषिवंशेऽपि सञ्जातः क्षत्रयोग्यं वहन्महः । उल्लसन् शुशुभे रामस्तडिद्दामवदम्बुदे ॥३५॥
तत्रातिसारकी कोऽपि कष्टभ्रष्टनभोगतिः । आगाद्विद्याधरो रामस्तं भक्त्योपाचरत्तराम् ॥३६॥
तद्दत्तां पार्शवीविद्यां रामोऽन्तःशरगह्वरम् । साधयित्[१]वोदितः **पर्शुराम** इत्युदितो जनैः ॥३७॥
ययौ **हस्तिपुरे**ऽन्येद्युः स्वसृसङ्गाय **रेणुका** । श्यालीति [२]नर्मलोलेन सा भेजे तत्र भूभुजा ॥३८॥
तस्मात्तया सुतो जज्ञे निन्ये तां ससुतामपि । **जमदग्नि**र्निजं धाम **कामार्त्ते क्व विवेकिता** ॥३९॥
तां क्रुद्धः पर्शुना **पर्शुरामः** क्षत्रेण पुत्रिणीम् । फलान्तरेण फलितां गृहवल्लीमिवाच्छिनत् ॥४०॥
ज्ञापितस्तद्भगिन्या तत्क्रुद्धो **हस्तिपुराधिपः** । गत्वा तदाश्रयं भङ्क्त्वा ववले वालितव्रजः ॥४१॥
क्वचित् क्रीडारुचिः श्रुत्वा **राम**स्तामहितां कथाम् । एत्याऽऽकुलं कुलपतिं वीक्ष्य क्रोधादधावत ॥४२॥
चतुरङ्गचमूभङ्गघोरस्पर्शेन पर्शुना । तनू**मनन्तवीर्य**स्य स द्रुखण्डमखण्डयत् ॥४३॥
सभ्यैर**नन्तवीर्य**स्य **कृतवीर्यः** कृतः पदे । एत्य तातवधक्रोधात् **जमदग्निं** जघान सः ॥४४॥
प्रतिहत्याऽथ तं रामो ध्वस्तवीरं च तत्पुरम् । मृगराज इव ध्वस्तमृगो वनमराजयत् ॥४५॥
**कृतवीर्य**प्रिया गुर्वी निरगात् प्रियदुःखभाक् । पुरात्तेनाऽहिनेवाऽऽर्त्ता कलविङ्कीव नीडतः ॥४६॥
सा तापसाश्रमं प्राप तापसैश्च कृपारसैः । न्यस्य गर्भगृहे गर्भवती साऽपालि बालिका ॥४७॥
तस्याश्चतुर्दशस्वप्नसूचितः क्रमतः सुतः । खादन् भूमिमभूदुक्तः **सुभूम** इति तत्तया ॥४८॥
मध्येभूमिगृहं गुप्तः स दुःसह[३][1]महोरयः । ववृधे **पर्शुरामस्य** कालाऽहिरिव बालकः ॥४९॥
भूत्वा **परशुरामस्तु हस्तिनापुर**भूपतिः । निःक्षत्रां सप्तकृत्वः क्ष्मां व्यधात् पितृवधक्रुधा ॥५०॥
सप्तवारान् विलूनेऽपि क्षत्रियक्षेत्रमण्डले । स्वयमेवाभवद्रामः शिलोञ्छाय प्रयाणभाक् ॥५१॥
गुप्तोऽपि निधिवद्यत्र क्षत्रियोऽभूत्त्विषोऽक्षिपत् । **रामस्य परशु**स्तत्र दृष्टिरञ्जनिनो यथा ॥५२॥
कदाऽपि तापसमहीं तां **रामस्य** गतस्य सः । जज्वले **परशुः** क्षत्रसत्तारोषानलैरिव ॥५३॥
कोऽप्यत्र क्षत्रियोऽस्तीति राज्ञा कुलपतिः क्रुधा । पृष्टः प्राह तपस्यन्तः सन्तीह क्षत्रिया अमी ॥५४॥
विरराम ततो **रामः** क्रोधतस्तत्प्रबोधतः । जगाम धाम सङ्ग्रामश्रमविश्राममकामनः ॥५५॥

---

१. त्वोत्थितः C । २. मर्मलौल्येन - P । ३. मनोरथः - D, K ।

टि. 1. महसां रयः - प्रवाहः - महोरयः ।

स स्थालं दृग्मुदे क्षुण्णद्विट्दंष्ट्राभिरपूरयत् । भोजितान्तकसत्कारहेतुमुक्ताफलैरिव ॥५६॥
भोक्ताऽमूः पायसीभूता दंष्ट्राः सिंहासनेऽत्र यः । स ते वधाय दैवज्ञा इत्याख्यन् राज्ञि पृच्छति ॥५७॥
तत्राऽवारं पुरे सत्रागारं राज्ञा विधाय तत् । पुरस्तु दंष्ट्रापात्रं तन्न्यासि सिंहासनं धुरि ॥५८॥
ततः पद्मश्रियं मेघनादो विद्याधरः सुताम् । नैमित्तोक्त्या **सुभूमाय** दत्त्वाऽभूत् सेवकः स्वयम् ॥५९॥
किं लोकोऽयमियानेव रन्तुमस्त्यधिकोऽपि वा । आश्रमाऽनन्यगोऽपृच्छत्सुभूमो जननीमिति ॥६०॥
रे वत्सा ! ऽऽश्रमकूपैकभेक ! लोकाऽर्णवो महान् । यस्याश्रमोऽयमायाति न बिन्दुतुलनामपि ॥६१॥
हसन्तीदं तदोदीर्य कृतवीर्यनृपप्रिया । वृत्तं तत्पितृवृत्तान्तं रुदती तु न्यवेदयत् ॥६२॥
तच्छ्रुत्वा स क्रुधा दीप्तः प्रयातो **हस्तिनापुरम्** । तत्र सिंहासनासीनो दंष्ट्रापायसमाहरत् ॥६३॥
जघान **मेघनाद**स्तद्रक्षाविप्रान् क्रुधोत्थितान् । **रामो**ऽप्यत्र क्रुधा कालदूताहूत इवापतत् ॥६४॥
क्षिप्तः **सुभूमे रामेण** शशाम परशुर्ज्वलन् । प्रदीपनमिवोद्दामं पुरो दीप्ते प्रदीपने ॥६५॥
अस्त्राभावात् **सुभूमेन** दंष्ट्राभाजनमुद्धृतम् । तत्पाणिचिह्नचक्रस्य सङ्गेनैवाप चक्रताम् ॥६६॥
**सुभूमः** सोऽष्टमश्चक्री तेन चक्रेण चञ्चता । पञ्चतामनयद्**रामं** छिन्नमूर्द्धतया रयात् ॥६७॥
सप्तकृत्वः क्षितिं चक्रे **रामो** निःक्षत्रियां यथा । क्रमात् **सुभूम**स्त्रिः सप्तकृत्वो निर्ब्राह्मणां तथा ॥६८॥
चक्रसाधितषट्खण्डोऽप्यखण्डक्रोधचण्डतः । रौद्रध्यानी निववृते न स क्षत्रो द्विजक्षयात् ॥६९॥
चतुष्कषायः पञ्चत्वं प्राप्य षट्खण्डभूपतिः । सप्तमं नरकं प्रापदष्टमश्चक्रवर्त्यसौ ॥७०॥

**इति सुभूमकथानकम् ॥**

ईदृशमव्यवस्थं स्नेहं पर्यवस्य यतयः किं कुर्वन्ति इत्याह—

**कुलघरनिययसुहेसु य, सयणे य जणे य निच्च मुणिवसहा ।**
**विहरंति अणिस्साए, जह अज्जमहागिरी भयवं ॥१५२॥**

**कुटुम्बभवनस्वकीयसातेषु च**शब्दाद्देशादौ, **च स्वजने**, सम्बन्धिबन्धुवर्गे, **जने** सामान्यलोके, **च**शब्दो विशेषाभावद्योतकः । **नित्यं** प्राकृतत्वादनुस्वारलोपः । **मुनिवृषभाः** सुसाधवो **विहरन्ति अनिश्रया** कुलादिनिश्रामकृत्वा निरालम्बनतयेत्यर्थः । अत्र दृष्टान्तः **यथार्यमहागिरिर्भगवाना**चार्य इति ॥१५२॥ अत्राख्यानकम्—

**[ आर्यमहागिरिकथानकम् ॥ ]**

**स्थूलभद्र**मुनीन्द्रस्य शिष्यावभवतामुभौ । आचार्यवर्यौ नाम्नाऽऽ**र्यमहागिरिसुहस्तिनौ** ॥१॥
चरणाविव धर्मस्य ज्ञानस्य नयने इव । तावभूषयतां साङ्गदशपूर्वधरौ धराम् ॥२॥
निकाचनाभिर्मोक्षस्य वाचनाभिरनेकशः । शिष्यान्निष्पादयामास क्रमे**णार्यमहागिरिः** ॥३॥
निजं **महागिरि**र्गच्छभारं न्यस्य **सुहस्तिनि** । एकोऽभून्मनसा कामं जिनकल्पार्हवृत्तिधीः ॥४॥
व्युच्छेदाज्जिनकल्पस्य गच्छस्थोऽपि तदर्हकृत् । **महागिरि**र्महीपीठे विजहार महातपाः ॥५॥
ते धर्मदेशनसुधासिन्धवो विश्वबन्धवः । सूरयः **पाटलीपुत्र**मगुर्नगर[1]मन्यदा ॥६॥

---

१. मुन्मदाः - KH, C ।

**वसुभूति**र्महेभ्योऽत्र बोधितः श्री**सुहस्ति**भिः । जीवाजीवादितत्त्वज्ञो जज्ञे श्रावकशेखरः ॥७॥
**वसुभूतिः** शुभारम्भो गुरुव्याख्याऽनुवादवान् । प्रबोधयितुमारब्धसंरब्धः स्वजनानपि ॥८॥
तेन बोधयितुं ते न शेकिरे पङ्कजानि हि । बोध्यान्यपि न बोध्यन्ते दीपेन तपनं विना ॥९॥
प्रतिबोधयितुं बन्धुवर्गं मोहनिरर्गलम् । निन्ये विज्ञप्य तद्धाम्नि **वसुभूतिः** स्वयं गुरून् ॥१०॥
जिनागमवनीपुष्पसद्धर्ममधुवाहिनी । प्रत्याख्या भवतापस्य व्याख्याऽऽरम्भि **सुहस्ति**ना ॥११॥
तत्र भिक्षार्थमाचार्यस्तदा चा**ऽऽर्यमहागिरिः** । आययौ च ववन्दे च तेनाभ्युत्थाय सूरिणा ॥१२॥
श्रेष्ठी जगाद गगनस्येव सर्वगुरोस्तव । किं कोऽप्येष गुरुः स्वामिन्नहो बत महाद्भुतम् ॥१३॥
श्री**सुहस्ती** तमाह स्म गुरवः खल्वमी मम । तपश्चरन्तस्त्यागार्हं भक्तं पानं च गृह्णते ॥१४॥
अताहृग्भक्तपानाप्तौ सन्ति सम्यगुपोषिताः । जानन्त्यन्यदपथ्यं हि कर्मरोगच्छिदोत्सुकाः ॥१५॥
इत्यस्मै सूरिराख्याय धर्मं व्याख्याय निर्मलम् । प्रतिबोध्य च तद्बन्धून् निजमाश्रयमागमत् ॥१६॥
**वसुभूति**रभाषिष्ट शुद्धधीः स्वजनानथ । मुनिमीदृक्षमीक्षध्वे यदा भिक्षार्थमागतम् ॥१७॥
तस्मै भक्तं च पानं च त्यज्यमानं प्रदर्श्य तत् । मुदा तदा प्रदातव्यं भवेद्बहुफलं हि तत् ॥१८॥
अथ तत्रैव भिक्षार्थं प्राप्तोऽन्येद्यु**र्महागिरिः** । तच्चक्रुस्ते च भक्त्या तत्प्रतिलाभनलोभिनः ॥१९॥
ज्ञात्वा ज्ञानादशुद्धं तदनादाय महामुनिः । तदा जगाम वसतिं जगाद च **सुहस्तिनम्** ॥२०॥
महत्यनेषणाऽकारि ह्यः कृत्वा विनयं त्वया । भिक्षामसज्जयन्मह्यं ते हि त्वदुपदेशतः ॥२१॥
नेदं पुनः करोमीति **महागिरि**गुरुं ततः । **सुहस्ती** क्षमयामास विनीतो [1]विनतो [2]यतः ॥२२॥
**जीवन्तस्वामि**प्रतिमारथयात्रां निरीक्षितुम् । गताववन्तीमन्येद्यु**र्महागिरिसुहस्तिनौ** ॥२३॥
नृपस्तदा च तत्राऽऽसीदमित्रासीनविक्रमः । **सम्प्रति**र्नाम सङ्ग्रामसामग्रीयितदोर्युगः ॥२४॥
उत्सवादथ **जीवन्तस्वामि**नो निर्ययौ रथः । पश्यतामपि संसारकान्तारोत्तारकारणम् ॥२५॥
नयनस्थानतानीत**महागिरिसुहस्ति**ना । अन्वीयमानः सङ्घेन पुर्यां पर्यटति स्म सः ॥२६॥
क्वचिदस्खलितः प्राप राजद्वारमथो रथः । जीवो मोक्षमिवाशेषसुरासुरनुतोदयः ॥२७॥
राजाऽथ राजसौधस्य गवाक्षे चक्षुषीव सः । कनीनिकापदं पुष्णन्नपश्यत् श्री**सुहस्तिनम्** ॥२८॥
दध्यौ च क्वचिदप्येष शान्तवेषः [3]सुखो दृशाम् । मयाऽदर्शि मुनिः किन्तु हन्त न स्मृतिमेति मे ॥२९॥
विमृशन् भृशमित्येवं नृदेवः स विमूर्च्छितः । पपात भुवि मेघाम्भोभिन्नाचलतटाश्मवत् ॥३०॥
उचिते रचिते व्यग्रैरुपचारे परिच्छदैः । जातजाति[4]स्मृतिः पृथ्वीपतिरप्युत्थितस्ततः ॥३१॥
स राजन्यः पुराजन्मगुरुं जानन् **सुहस्तिनम्** । स्पर्द्धाऽभिधावितमनःपवनप्रतिमक्रमः ॥३२॥
एत्यावनीतलमिलन्मौलिर्मौलिर्महीभुजाम् । **ननामोच्चैःपदं गन्तुमुत्पा[5]तो नतिपूर्वकः** ॥३३॥

---

१. ऽवनतो – C । २. ऽग्रतः – KH, P । ३. सुवेषतां – KH, शुभोदृशां – L मुखो दृशां – C । ४. स्मरः – KH । ५. तो नतिपूर्वकम्– KH, तोन्नतिपूर्वकः – A, H, तोन्नतिपूर्वकं – L ।

अपृच्छदथ पृथ्वीन्दुः सानन्दः श्री**सुहस्ति**नम् । जिनधर्मद्रुमः केन फलेन फलति प्रभो ! ॥३४॥
आख्यद्गुरुस्तरोस्तस्य सुपक्वममृतं फलम् । अपक्वफलभेदास्तु कल्पाश्चानुत्तराश्च ते ॥३५॥
पुनर्मुनिं महाधर्मवप्रं पप्रच्छ पार्थिवः । अव्यक्तस्य फलं नाम स्वामिन् ! सामायिकस्य किम् ॥३६॥
श्री**सुहस्ती** महस्तीर्थङ्करधर्मस्य धारयन् । गदति स्म जगत्यस्मिन् राजन् ! राज्यादि तत्फलम् ॥३७॥
सन्देहक्षेपयन्त्राग्रोच्छलद्यष्टिनिभाङ्गुलीम् । [1]नखच्छोटनिकां जातप्रत्ययोऽथ ददौ नृपः ॥३८॥
पुनः प्रणम्य पादाग्रन्यस्तहस्तः **सुहस्ति**नम् । युष्माभिरुपलक्ष्येऽहं न वेति नृपतिर्जगौ ॥३९॥
उपयोगेन विज्ञाय गुरुर्गिरमथाददे । किं नोपलक्षयेऽहं त्वां शृणु योऽसि नरेश्वर ! ॥४०॥
विहरन्तः सहाचार्यैः श्री**महागिरि**नामभिः । सगच्छाः पुरि **कौशाम्ब्याम**गच्छाम पुरा वयम् ॥४१॥
महत्त्वात्परिवारस्य वसतेरपि लाघवात् । आवां तत्र धरित्रीश ! पृथक् पृथगवस्थितौ ॥४२॥
तदाऽभूदतिदुर्भिक्षं तत्रास्मासु विशेषतः । मुदा तु दातुमारेभे भक्तं भक्तमना जनः ॥४३॥
कस्याऽपि श्रेष्ठिनः सौधं भिक्षायै साधवस्तदा । विविशुश्चाविशच्चैको रङ्कस्तत्पृष्ठतो रयात् ॥४४॥
[2]इच्छाकाराधिकाराधिलङ्घिनीं तत्र लेभिरे । साधवो विविधां भिक्षां विलक्षस्यास्य पश्यतः ॥४५॥
प्राप्य भिक्षामथाऽमीषामीयुषां वसतिं प्रति । अनुगः स जगौ रङ्को भोज्यं मे दीयतामिति ॥४६॥
साधवोऽभिदधुर्दानं जानन्ति गुरवः खलु । तदधीना वयं किञ्चिन्न स्वयं दातुमीश्वराः ॥४७॥
साधूनन्वेवमन्वेत्य वसतिं वीक्ष्य तत्र नः । दीनाननः क्षुधाधीनः स भोजनमयाचत ॥४८॥
अथेदं साधवोऽप्याख्यन्नस्मत्तोप्यमुना पथि । अयाच्यत क्षुधालीनस्फूर्त्तिना दीनमूर्त्तिना ॥४९॥
विदितं चेदमस्माभिरुपयोगप्रयत्नतः । रङ्कः प्रवचनाधारो यद्भाव्येष भवान्तरे ॥५०॥
रङ्कः प्रियोक्तिलीलाभिरथाऽस्माभिरभाष्यत । व्रतं चेद् भजसे भोज्यं लभसे रभसेन तत् ॥५१॥
अचिन्तयदयं रङ्कश्चिरं कष्टमयोऽस्म्यहम् । तद्वरं व्रतजं कष्टं यथेष्टं यत्र भुज्यते ॥५२॥
इत्यथ प्रतिपेदानं व्रतादानं तदैव तम् । प्रव्राज्य भोजयामः स्म भोजनैर्मोदकादिभिः ॥५३॥
अथाहारं महारम्भः स्वादु स्वादु तथाऽऽदित । रुरोध स यथा गर्भमरुत्पथकथामपि ॥५४॥
कृतान्तप्रतिहारेण तेनाहारेण पीडितः । मृत्योरङ्कमसौ रङ्कस्तस्यामेव ययौ निशि ॥५५॥
साधुर्मध्यस्थभावेन धराधीश ! विपद्य सः । पद्मवत्त्वं मृणालस्य **कुणाल**स्याऽङ्गभूरभूः ॥५६॥
पुनर्विज्ञपयामास मुनीशमवनीश्वरः । भगवन् ! भवतामेव प्रसादादासदं श्रियः ॥५७॥
अकारयिष्ये युष्माभिर्दर्शनस्पर्शनं न चेत् । प्रभो ! तदभविष्यन्मे श्लाघ्या रङ्कदशा क्व सा ॥५८॥
इहापि गुरवः पूर्वजन्मवद्यूयमेव मे । प्रसीदताऽऽदिशत मां किङ्करः किङ्करोम्यहम् ॥५९॥
**सुहस्ती** भगवानाह राजन्नाजन्मशर्मदम् । जिनधर्मं भज स्वर्गापवर्गादिफलद्रुमम् ॥६०॥

टि. 1. 'चपटी' इति भाषायाम् । 2. स्वस्य इच्छाया विषयादपि अतिक्रान्तां भिक्षां लेभिरे इत्यर्थः ।

प्रत्यपद्यत राज्ञाऽथ तदन्यैश्च तदाज्ञया । अर्हन् देवो गुरुः साधुः प्रमाणं जिनवागिति ॥६१॥
श्रीमानणुव्रतगुणव्रतशिक्षाव्रतस्थिरः । शुद्धश्रद्धोऽजनि श्राद्धवरः **सम्प्रति**भूपतिः ॥६२॥
नाऽर्चया स जिनाऽर्चाया[1] वन्ध्यं सन्ध्यात्रयं व्यधात् । न साधर्मिकवात्सल्यसाधकत्वेन च क्षणम् ॥६३॥
सुधासिन्धुसदृग्जीव[१]दयात्तहृदयात्मनि । पराभवोऽभवन्नेह ज्वलद्भवदवोद्भवः ॥६४॥
धृतसाप्तपदीनेभ्य इव दीनेभ्य उच्चकैः । अदारिद्र्यनिदानानि स दानानि सदा ददौ[२] ॥६५॥
महीं स याव**द्वैताढ्य**मद्वैताढ्यपराक्रमः । चकार श्रीजिनागारमुक्तालङ्कारभारिणीम् ॥६६॥
त्रिखण्ड**भरत**क्षेत्रतता धर्ममयी लता । तस्य स्तबकितेवाऽभूज्जिनावासैः पदे पदे ॥६७॥
श्रीसङ्घेन सहर्षेण वर्षेऽन्यत्र व्यतन्यत । चैत्ययात्रोत्सवस्तत्र वित्रस्तदुरितः पुरि ॥६८॥
प्रत्यहं तीर्थयात्रायां ते मण्डपममण्डयन् । श्रीसङ्घेन सह श्रीमत्**सुहस्ति**गुरवः स्वयम् ॥६९॥
अग्रे**सुहस्ति** तत्पादरेणुम्मन्यो महामनाः । निषसाद भवाद्भीतो नित्यं सङ्कुच्य **सम्प्रतिः**[३] ॥७०॥
होतव्यमोहद्रव्यस्य चैत्ययात्रामहाक्रतोः । पूर्णाहुतिमथारेभे श्रीसङ्घो रथयात्रया ॥७१॥
अमूल्यमणिमाणिक्यमयोऽर्हत्प्रतिमारथः । दिद्युतेऽति[४]द्युतिर्दीप इव मोहतमोहतौ ॥७२॥
रथेऽर्हत्प्रतिमास्नात्रपूजाद्यं माद्यदुद्यमैः । धार्मिकैः कर्मनिर्मन्थोपक्रमेण प्रचक्रमे ॥७३॥
विशन्त्यो भूतले स्नात्रजलधारा जिनाङ्गतः । उद्धारका नारकाणां रज्ज्वालम्बा इवाबभुः ॥७४॥
वस्त्रबद्धाननैः श्राद्धैर्गुणस्तुत्यक्षमैरिव । विभोर्विलेपनं चक्रे सुरभिद्रविणद्रवैः ॥७५॥
प्रभोर्भवमहाम्भोधितरणे तरणेरिव[2] । रेजे पुष्पमयी पूजा लग्नफेनलवाऽऽलिवत् ॥७६॥
धूपधूमचयः स्वामिगात्रस्पर्शपवित्रधीः । द्यां ययौ धूमयोनित्वलब्ध्यै[3] भूतापहन्मतिः[4] ॥७७॥
प्रकाशैकमयैर्दीपैः प्रभोरारात्रिकच्छलात् । केवलस्य कृतं श्राद्धैरवतारणमङ्गलम् ॥७८॥
धूर्यीभूतैरथ रथः श्राद्धैरन्तःस्थतीर्थकृत् । स्वयमात्मैव संसाराच्चैत्यद्वारादकृष्यत ॥७९॥
स्वस्वशाश्वतचैत्येभ्यो वालयित्वा विलोचनम्[5] । चमत्कृतैः ससम्यक्त्वैर्दृश्यमानो विमानिभिः ॥८०॥
चञ्चच्चतुर्विधातोद्यहृद्योरुप्रेक्षणीयकः । आनन्दनिद्रानिर्मग्नजनस्वप्नायितोत्सवः ॥८१॥
सरासैः श्राविकालोकैर्भ्रमद्भिर्मण्डलायितैः । धर्मार्णवमहावर्त्तैरिव मज्जितपातकः ॥८२॥
पूज्यमानजिनो भक्तैः प्रत्यट्टाट्टालकालयम् । काश्मीरनीरपूरेण दीयमानच्छटोऽग्रतः ॥८३॥
चतुर्विधमहासङ्घचतुरङ्गचमूवृतः । रथस्तीर्थपतेर्मोहद्रोहिण्या यात्रयाऽचलत् ॥८४॥ पञ्चभिः कुलकम् ।
त्रिखण्डक्ष्मातलोद्धारधुर्यैः **सम्प्रति**भूपतेः । भाग्यैः[५] स कृष्यमाणोऽपि राजद्वारं शनैर्ययौ ॥८५॥
नुदन् सर्वाङ्गमाराभिरिवारात्पुलकैरघम् । द्रुतं रथमथागच्छल्लोकदत्तपथो नृपः ॥८६॥

---

१. दयाभूह - B, दयार्द्रह - L दयानूह - C । २. ययौ - P । ३. सम्प्रति - D, K, B, A, L, H, P । ४. द्युतिदीप - K । ५. भाग्यैराकृ....C । टि. 1. जिनानां अर्चा प्रतिमा, तासां अर्चा पूजा । 2. तरणिः - यानपात्रम् । 3. धूमयोनित्वं - मेघत्वप्राप्त्यै । 4. पृथ्वीतापहरणबुद्धिः इत्यर्थः । 5. विलोचनं - नेत्रम् ।

कर्माणि छेतुमष्टापि स्पष्टमष्टप्रकारया । पूजयाऽपूजयज्जैनीं **सम्प्रतिः** प्रतिमां मुदा ॥८७॥
तदैवाहूय सम्यक्त्वं ग्राहयित्वाथ **सम्प्रतिः** । आ**वैताढ्या**न्तसामन्तान् कामं तानित्यवोचत ॥८८॥
अयि ! भक्ता मयि स्वैरं भवन्तश्चेद्भवन्तु तत् । श्रमणानामघौघैकत्रासकानामुपासकाः ॥८९॥
इत्यमुष्य निदेशेन स्वस्वदेशेषु देशपाः । ते जैनं तेनिरे धर्मं श्रमणोपास्तितत्पराः ॥९०॥
इति प्रत्यन्तदेशानप्यर्हन्मुनिजनोचितान् । विधाय शुद्धधीर्दध्यौ निशीथे **सम्प्रति**र्नृपः ॥९१॥
अप्यनार्येषु देशेषु विहार्याः साधवो मया । क्वचिन्मदाज्ञाभूषा भूर्मा धर्मरहिता स्म भूत् ॥९२॥
अथानार्यान् जगौ राजा प्रदातव्यः करो मम । यथा यथैत्य याचन्ते मत्पुमांसस्तथा तथा ॥९३॥
इति **सम्प्रति**ना साधुवेषभाजः शुभा जनाः । प्रहिता विहिताचारैरनार्यानित्यशिक्षयन् ॥९४॥
एभिरेभिर्द्विचत्वारिंशता दोषैरदूषितम् । नीरान्नपात्रचीरादि देयं भक्तिभरेण नः ॥९५॥
इहेह कालेऽध्येतव्यमेतदेतद्दिने दिने । लोपयिष्यति वः कोपकम्प्रः सम्प्रतिरन्यथा ॥९६॥
परितोषं धराभर्तुस्तस्य कर्तुमथोद्यताः । [1]तेनिरे ते नराः सर्वमेभिरादिष्टमिष्टवत् ॥९७॥
साधुचर्योचिताचारचातुरीचारचारुषु । इत्थं जातेष्वनार्येषु राजाऽऽचार्यान् व्यजिज्ञपत् ॥९८॥
प्रभो ! परप्रबोधैकसाधीयांसोऽपि साधवः । कुतो नाऽनार्यदेशेषु विहरन्त्यार्यदेशवत् ॥९९॥
गुरवो जगुरुर्वीश ! तत्रोत्सर्पति न ध्रुवम् । ज्ञानदर्शनचारित्रश्रीरोषधिरिवोषरे ॥१००॥
प्रोवाच **सम्प्रतिः** साधून् भगवन् ! प्रेष्य सम्प्रति । पश्यताचारचातुर्यमनार्यमनसामपि ॥१०१॥
आचार्यवर्यै राज्ञोऽतिनिर्बन्धात् केऽपि साधवः । गन्तु**मन्ध्रा**दिदेशेषु समादिदिशिरे ततः ॥१०२॥
तानुदीक्ष्य मुनीनेते पुमांसः सम्प्रतेरिति । मत्वा प्राक् शिक्षयाऽनार्या वार्यादि प्रत्यलाभयन् ॥१०३॥
श्रावकत्वमनार्येषु तदार्येष्विव साधवः । निरवद्यं निरूप्याख्यन् गत्वा गुरुषु विस्मिताः ॥१०४॥
इति साधुविहारार्हाननार्यविषयानपि । व्यक्ताभ्यां शक्तिबुद्धिभ्यां विधाय मुमुदे नृपः ॥१०५॥
नृपः कृपणतां प्राच्यजन्मनो मनसा स्मरन् । पुरद्वारेष्ववाराणि सत्रागाराण्यकारयत् ॥१०६॥
दीनदुःस्थितभुक्तावशिष्टं भक्तघृतादिकम् । विभज्याऽऽददिरे तत्र सत्रागाराधिकारिणः ॥१०७॥
गृह्णीते नीतितः शिष्ट[१]मोदनं को दिनं प्रति । इति पृष्टा नृपेणाख्यंस्तन्निसृष्टा यथातथम् ॥१०८॥
भूपोऽभ्यधत्त यद्भक्तमवश्यमवशिष्यते । व्रतिनामेव तद्देयमकृताकारितार्थिनाम् ॥१०९॥
भवद्भ्यो विभवं भूरि गृहनिर्वाहहेतवे । दास्यामि कामितं यद्वः पूरयिष्यामि तच्च भोः ॥११०॥
राज्ञ इत्याज्ञया तेऽन्नं साधुभ्यो ददिरे च तत् । तत्तेऽप्याददिरे शुद्धबुद्धयः शुद्धिदर्शनात् ॥१११॥
वस्त्रपात्रान्नदध्यादिप्रासुकद्रव्यविक्रयम् । ये कुर्वन्त्यथ तानुर्वीपतिः **सम्प्रति**रूचिवान् ॥११२॥
साधुभ्यः सञ्चरद्भ्योऽग्रे ढौकनीयं स्ववस्तु भोः । ते यदाददते पूज्यास्तेभ्यो दातव्यमेव तत् ॥११३॥

---

१. मोदिनं – A, K, D, P मोदकं – B ।

टि. 1. एभिः आदिष्टं सर्वं ते नराः इष्टवत् तेनिरे ।

अस्मत्कोशाधिकारी च छन्नं दास्यति याचितः । मूल्यमभ्युल्लसल्लाभं समस्तं तस्य वस्तुनः ॥११४॥
अथ ते पृथिवीभर्तुराज्ञया तद्वयधुर्मुदा । अशुद्धमपि तच्छुद्धबुद्ध्या त्वादायि साधुभिः ॥११५॥
सेहे स्वयं **सुहस्ती** तु सदोषं तद्विदन्नपि । **सूनोरिव सुशिष्यस्य को न रागेण लिप्यते** ॥११६॥
**सुहस्तिन**मथाऽऽचार्यमुवा**चार्यमहागिरिः** । किं जानन्नपि राजाऽन्नमादत्से दोषदूषितम् ॥११७॥
सुहस्त्यूचे प्रभो ! भक्तिमुक्ता अपि ददत्यदः । राजानुवर्त्तनरसोज्जागरा नागराः स्वयम् ॥११८॥
**महागिरि**गुरुः प्राह शान्तं पापं किमात्थ भोः । मायिकोऽसि विसंभोगस्तन्नो नूनमतः परम् ॥११९॥
पृथक्कुलानां साधूनां सामाचार्यैव सङ्गतिः । सामाचारीविभेदेन विभेदोऽतः परं नु नौ ॥१२०॥
भयेन डिम्भवद्वेपमानो मानयितुं गुरून् । पादानादाय शिरसा **जगादार्यसुहस्त्यथ** ॥१२१॥
हहा महापराधोऽयं मयैको विदधे विभो ! । क्षम्योऽयमेकवारं मे कुर्वे नेदृगतः परम् ॥१२२॥
श्री**महागिरि**रूचेऽथ क्वैष दोषस्तवाऽथवा । जगदुर्जगदुत्तंसा **वीर**पादाः पुरा ह्यदः ॥१२३॥
यदस्मच्छिष्यसन्ताने समाचारः शमात्मनाम् । पतत्प्रकर्षो भविता परतः **स्थूलभद्र**तः ॥१२४॥
**स्थूलभद्र**मुनीन्द्रस्य शिष्यावावां बभूविव । त्वया सत्यमसत्योक्तेः स्वामिनो रचितं वचः[१] ॥१२५॥
इत्यसंभोगकल्पं स सङ्कल्प्यैव **महागिरिः** । **अवन्त्या** निर्ययौ नत्वा **जीवन्तस्वामिनं** जिनम् ॥१२६॥
पुरा श्री**वीर**समवसरणे समुपेयुषः । **दशार्णभद्र**भूपालसम्बोधे[२] विबुधेशितुः ॥१२७॥
गजेन्द्रोऽग्रक्रमौ यत्र न्यधात्तल्लिपिरस्ति च । तद् गजेन्द्रपदख्याति ययौ तीर्थं **महागिरिः** ॥१२८॥ युग्मम् ॥
निर्मायाऽनशनं तत्र मायादिमलवर्जितः । कायमुन्मुच्य नाकाय जगाम श्री**महागिरिः** ॥१२९॥
अपि **सम्प्रति**भूपालः पालितश्रावकव्रतः । पूर्णायुरासीद्गीर्वाणो निर्वाणं च गमी क्रमात् ॥१३०॥

**इति आर्यमहागिरिकथानकम् ॥**

व्रतिनो निर्लोभतामित्थमेव दृष्टान्तान्तरेणोपदिशति–

**रूवेण जुव्वणेण य, कन्नाहि सुहेहिं घरसिरीए य ।**
**न य लुब्भंति सुविहिया, निदरिसणं जंबुनामो त्ति ॥१५३॥**

**रूपेण** सुन्दरेण **यौवनेन** उदग्रेण, **च**शब्दात् कलाभिश्च **कन्याभि**रद्भुतगुणाभिः **सुखैर्गृहश्रिया च** एतैर्हेतुभि**र्नैव लुभ्यन्ते** लोभं नैव यान्ति **सुविहिताः** साधवः । **निदर्शनं** दृष्टान्तो **जम्बूनामेति** ॥१५३॥ **जम्बूस्वामिचरितं** चैवम्–

**[ जम्बूस्वामिचरितम् ॥ ]**

**मगधो**ऽध्वगधोरण्याः श्रान्तिहर्त्ता श्रियः पदम् । अस्ति त्रिविष्टपादेशो देशो भूखण्डमण्डनम् ॥१॥
छायोच्छेदितसन्तापाः स्फुरत्यत्राद्भुतश्रियः । भूपरूपा बभुर्यत्र तरवः सरवद्विजाः[1] ॥२॥
यस्मिन् भजन्ति पर्यन्तहरितः सरितः सदा । भूमेः श्यामांशुकस्यूतप्रान्तकान्तदुकूलताम् ॥३॥

---

१. मुनिः - P । २. सम्बोधिः C सम्बोधि - A, KH, B ।

टि. 1. रवेण ध्वनिना सह वर्त्तन्ते ते च ते द्विजाश्च इति सरवद्विजाः येषां ते द्विजाः पक्षिणः, बन्दिजनाश्च ।

ग्रीष्मेऽपि वारि यच्छन्तो महिषैः [1]स्थानपूरुषैः । यस्मिन्नदुर्न दुर्भिक्षमम्भसां जातुचिद् घनाः ॥४॥
[2]काष्ठासु दशसु ग्रामः **सुग्राम** इति विश्रुतः । तदन्तर्विद्यते ह्यविद्युत्तेजस्विपूरुषः ॥५॥
यल्लक्ष्मीलेखया [3]शेषलेखपुर्यौ विनिर्ज्जिते । स्थानं निम्नं च शून्यं च जग्मतुर्ल्लज्जिते ध्रुवम् ॥६॥
**राष्ट्रकूटान्वयः** श्रीमानार्यवानार्यवागभूत् । तत्राद्रिकूटतुल्या**न्नकूटः** कौटुम्बिकाग्रणीः ॥७॥
तस्याजनि गुणैर्वर्या मर्यादा जलधेर्वधूः । जाह्नवीशुभ्रनीरेव **रेवती** शीलशालिनी ॥८॥
एतयो**र्भवदत्तश्च** **भवदेवश्च** विश्रुतौ । अभूतां निहताशर्मधर्मकर्मयुतौ सुतौ ॥९॥
इभ्यः **सुस्थित**सूरिभ्यः स्वैरं वैराग्यतोऽन्यदा । **भवदत्तो** निजगृहे निःस्पृहो जगृहे व्रतम् ॥१०॥
अनुसूरिपदद्वन्द्वमथासौ पृथिवीतले । बभ्राम [4]भ्रामकाश्मानम[5]श्मसार इवान्वहम् ॥११॥
एकदात्मद्वितीयः सन् सूरीनापृच्छ्य कश्चन । निजग्रामे जगामेच्छन् बन्धुं व्रतयितुं व्रती ॥१२॥
साधुः पाणिग्रहारम्भग्रहिलेन कनीयसा । न वीक्षितोऽप्यसौ हर्षप्रकर्षान्धेन बन्धुना ॥१३॥
कनिष्ठमथ धिक् कुर्वन् गुर्वन्तिकमगान्मुनिः । विलक्षो रविलक्षोरुतपस्तेजास्ततो नु किम् ॥१४॥
गुरोः पुरे मुनौ तस्मिंस्तत्तथ्यं कथयत्यथ । **भवदत्तो**ऽवदत्तोषाद् धिक् तत्कठिनतामिति ॥१५॥
तदोचे मुनिनाऽन्येन **भवदत्तो** वदन्नदः । भ्राताऽस्य कठिनस्त्वं तन्मृदुं दीक्षय सोदरम् ॥१६॥
सन्धासन्धानतोऽभाषि **भवदत्ते**न तन्मुदा । इदं बुध ! विधातव्यं गुरौ मगधगामिनि ॥१७॥
विहरन् [6]मिहिरश्रीको देशाद्देशान्तरं क्रमात् । अगमन्मगधान्सूरिर्नभोभागानिवामलान् ॥१८॥
स्वग्रामं **भवदत्तो**ऽथ ययावेको गुरोर्गिरा । भयाय नासहायत्वं सिंहस्येव महामुनेः ॥१९॥
**नागिलां वासुकी**जाने**र्नागदत्त**स्य नन्दिनीम् । कनीयान् **भवदेवो**ऽग्रेपाणौ जग्राह साग्रहः ॥२०॥
जनान्मत्वेति तत्त्वज्ञः किंकर्त्तव्यतया जडः । मन्दं मन्दममन्दश्रीर्निजं धाम जगाम सः ॥२१॥
अब्जखण्डं त्रियामार्त्तं मार्त्तण्ड इव दूरतः । स्वजनं स्मेरयन्नग्रे शमभूः समभूत्ततः ॥२२॥
ते तु हेतुममुं पुण्यनैपुण्यस्य मुनिं जनाः । नमश्चक्रुर्निचक्रुश्च दुरितं स्फुरितोद्यमाः ॥२३॥
मुनिना धर्मलाभोऽथ निर्मलाभो विनिर्ममे । तेषां तमस्ततिच्छेदी दिशामिव निशाधवः ॥२४॥
अस्ति मे गुरुरासन्नग्रामे [7]सन्नतमाः शमी । भोक्तव्यं तत्र गत्वेति जगाद स्वजनान्मुनिः ॥२५॥
तदाशु प्रासुकाऽन्नेन स यतिः प्रतिलाभितः । उत्सुकस्तैः सदाचारसहकारशुकैः स्वकैः ॥२६॥
**नागिला**याः किलाऽऽयामरम्याक्ष्या वक्षसि स्वयम् । तन्वानो मण्डनं तस्याः [१]कृतकल्याऽन्यमण्डनः ॥२७॥
मुनिमागतमाकर्ण्य वधूं मुक्त्वार्द्धमण्डिताम् । द्विपो [२]वल्लीरिव सखीरवधूयाग्रतो गताः ॥२८॥

---

१. कृतकन्यान्य.... K, D । २. दंतै - C ।

टि. 1. धनैः प्रतिनिधितया नियोजितैः स्थानपूरुषैर्महिषैः । 2. काष्ठा दिशा । 3. शेषपुरी च लेखपुरी च इति शेषलेखपुर्यौ - पातालपुरी, स्वर्गपुरी च पातालपुरी निम्नं, स्वर्गपुरी च शून्यं जग्मतुः इत्यर्थः । 4. भ्रामकाश्म - लोहचुम्बकः । 5. अश्मसारः - लोहः । 6. मिहिरः- सूर्यः । 7. सन्नं नष्टं तमः अज्ञानं येन स सन्नतमाः ।

स्फूर्त्तिमन्तर्वहन् धर्मं मूर्त्तिमन्तमिवाग्रजम् । **भवदेवो** जवादेवाऽऽजगाम च ननाम च ॥२९॥ विशेषकम् ॥
सर्प्पिषः कल्पनीयस्य पात्रं भ्रात्राऽर्प्पितं करे । सत्यंकारं व्रतस्येव **भवदेवः** सुधीर्दधौ ॥३०॥
प्रचचाल स चा[1]ऽऽलस्यमुक्तो मुनिमतल्लिका । अस्तोकबन्धुलोकेन परितः परिवारितः ॥३१॥
दूरतो वलितास्तस्य नत्वा नत्वाऽथ बान्धवाः । समीरे संमुखे सिन्धुप्रवाहस्येव वीचयः ॥३२॥
बाल्यक्रीडादिवार्त्ताभिरनार्त्ताभिः प्रवर्तकम् । धृताज्यभाजनः साधुमनुजस्त्वनुजग्मिवान् ॥३३॥
आनिनाय भवान् बन्धुं मानिनायक ! दीक्षितुम् । इत्यथ व्रतिभिः पृष्टः प्राप साधुर्गुरोः पुरः ॥३४॥
प्रणम्य रम्यचारित्ररत्नरत्नाकरं गुरुम् । मुनिर्न्यवेदयद्बन्धुं समायातं व्रताय तम् ॥३५॥
सत्यमित्यथ पृष्टोऽसौ **भवदेवो**ऽथ सूरिभिः । ज्यायानृषिर्मृषाभाषी मा भूदित्यन्वमंस्त तत् ॥३६॥
ततः स्वबन्धुसम्बन्धबन्धनाऽऽबद्धचेतसः । **नागिला**गुणरक्तस्य तस्य दीक्षां ददौ गुरुः ॥३७॥
भवदत्तप्रयुक्तेन नियुक्तो गुरुणा स्वयम् । एकेन मुनिना साकं ग्राममन्यं जगाम सः ॥३८॥
अद्याऽपि भवदेवोऽयं नाऽऽयातीति समागताः । बन्धवो **भवदत्ते**न साक्षाद्गत इतीरिताः ॥३९॥
बन्धूपरोधरुद्धात्मा **भवदेवो** व्रते स्थितः । नित्यं ध्यायति चित्तेन **नागदत्त**सुतां तु ताम् ॥४०॥
कालेन सुचिरेणाऽथ शुचिरे[2]णाङ्कवन्मुनिः । तपस्तपनपूर्वाद्रि**र्भवदत्तो** दिवं ययौ ॥४१॥
अकुर्वता व्रतादीनि भ्रातरि स्वर्गयातरि । अलागि **नागिला**ध्याने **भवदेवेन** तेन तु ॥४२॥
अथ सुप्तां मुनिश्रेणीं निशि मुक्त्वाब्जिनीमिव । स भृङ्ग इव गन्ताऽभूत् कान्तां कैरविणीमिव ॥४३॥
अथ श्लथगुणग्रामः **सुग्राम**ग्रामसीमनि । गत्वाऽसौ मण्डपाहूतशैत्ये चैत्ये स्थितः क्वचित् ॥४४॥
आययौ वृद्धया साकमेकया सविवेकया । तदात्र कापि कामद्रुवात्या [3]कात्यायनी पु[१]रः ॥४५॥
एतां श्वेताम्बरोऽपृच्छत् **रेवत्यार्यवतोः** कथाम् । तौ प्रमीतौ ततः श्रुत्वा सोऽपृच्छन्**नागिला**कथाम् ॥४६॥
स्वयं सा **नागिला** चित्ते भवदेवं विचार्य तम् । पप्रच्छ **भवदेवो**ऽसि **नागिला**जानिरित्यथ ॥४७॥
एष प्रियाविशेषो[२]क्तस्तदाह स्मरदाहवान् । भवत्या **भवदेवो**ऽहं भद्रे ! कथमबोधिषि ॥४८॥
सद्मनश्छद्मना नीत्वा पुराऽहं ग्राहितो व्रतम् । भ्रात्रा [३]मात्राधिकप्रीतिर्नागिलावशगोऽपि सन् ॥४९॥
तद्भ्रातरि गते स्वर्गमनर्गलतमस्य मे । मानसं **नागिला**प्रीतिरधुनाऽतिधुनोति सा ॥५०॥
मन्मनःसहकारस्य सा शुकी वासुकीसुता । अस्ति वा नास्ति वा साक्षादिदं वद ममाग्रतः ॥५१॥
तदेवं **भवदेवे**ऽस्मिन् जल्पाके घस्मरस्मरे । वृद्धाया **नागिला**सख्याः सूनुः प्राप्तः पुरो बटुः ॥५२॥
जगादायमिदं मातरहमस्मि निमन्त्रितः । दक्षिणार्थं गमिष्यामि गेहमेहि त्वरातुरा ॥५३॥
दुग्धमुच्छालयिष्यामि धर्त्तव्यं भाजनं त्वया । भुक्तं श्राद्धाऽन्नमुद्गीर्य यथाऽऽगत्य पिबामि तत् ॥५४॥
वदन्तमित्यवादीत्तं **भवदेवो** हसन्निव । भविष्यसि कथं न त्वमिति लिप्सुर्जुगुप्सितः ॥५५॥

---

१. पुरात्-L, C, पुरा-B। २. क्त आह-स्मस्मर-L क्तप्राहस्मस्मर-B क्तमाहस्मर-H क्तदाहस्म-A। ३. ममाधिक-B माधिक-A।
टि. 1. अविलम्बेन इत्यर्थः । 2. एणाङ्कः - चन्द्रः । 3. कात्यायनी - अर्द्धजरती स्त्री ।

**भवदेव**मुवाचाऽथ **नागिला** वेत्सि यद्वद: । प्रिया तवाहं [१]मां वान्तां तद्भोक्तुं यतसे कुत: ॥५६॥
मूढाशय ! नवामूढामिव मामागत: स्मरन् । जराजर्जरितां पश्य संसारस्य क्व सारता ॥५७॥
**एतस्मिन् शुचिवस्तूनां मलिनीकारकारणे । देहे जरापराधीने मुधा मुह्यन्ति जन्तव: ॥५८॥**
विषं माममृतं दीक्षामन्यथा मा स्म मन्यथा: । तद् व्याघुट्य झटित्येव गुरुं भज कुरु व्रतम् ॥५९॥
इति प्रबोधित: प्रीतो **नागिला**या गिराऽचिरात् । साधु साध्विति तां स्तुत्वा साधु: सूरिं स्यादयात् ॥६०॥
आलोच्य तद्गुरोरग्रे तदुग्रं स व्रतं व्यधात् । येनाऽजनिष्ट सौधर्मे प्रभाभिर्भासुर: सुर: ॥६१॥
क्षेत्रे **महाविदेहे**ऽथ विजये **पुष्कला**ऽभिधे । देशे **विश्वप्रिये पुण्डरिकिण्यां** पुरि चक्रिण: ॥६२॥
पत्न्यां **यशोधरा**ख्यायां **वज्रदत्त**स्य नन्दन: । नाम्ना **सागरदत्तो**ऽभूद् **भवदत्तो** दिवश्च्युत: ॥६३॥ युग्मम् ॥
अथ पित्रा पवित्राङ्गीर्धन्या: कन्या: सहस्रश: । पुत्र: शत्रुद्रुमद्रोहकरिणा परिणायित: ॥६४॥
मूर्त्तिभि: किल सोत्कर्षस्वभोगफलकर्मण: । स समन्तात् समन्ताभि: क्रीडन् भूपालभूर्बभौ ॥६५॥
एकदाऽनेकदारान्तर्वर्त्ती मन्दिरमूर्द्धनि । स्थितोऽन्तरिक्षे सोऽद्राक्षीत् स्वर्णवर्णं पयोमुचम् ॥६६॥
तमाक्रान्तनभश्चक्रं तुङ्गशृङ्गशताकुलम् । पश्यन्मेरुमिव स्मेरसमाज: समजायत ॥६७॥
क्षणाद्वातोद्धते धाराधरे विधुरतां गते । भावेषु भङ्गुरीभावं कुमार: स व्यचारयत् ॥६८॥
प्रतिबुद्ध: स्वयं बुद्ध्या व्रतं जग्राह साग्रह: । तत: **सागरदत्तो**ऽयं सूरे**रमृतसागरात्** ॥६९॥
कृपाणतीव्रताजैत्र[२]व्रतायत्तेन तेन तत् । अज्ञानमवधि ज्ञानमवधिख्याति बिभ्रता ॥७०॥
तत्रैव विजये **वीतशोका**यां पुरि भूपते: । पुत्र: **पद्मरथा**ख्यस्य **वनमाला**ङ्गसम्भव: ॥७१॥
**भवदेवो**ऽभवच्च्युत्वा दिव: **शिव** इति श्रुत: । कुमार: सुकुमाराङ्गी: कुमारी: सोऽप्युदूढवान् ॥७२॥
स्थित: सह महेलाभि: सोऽन्यदा सदनोपरि । नाम्ना **कामसमृद्ध**स्य सार्थवाहस्य वेश्मनि ॥७३॥
मुनिं **सागरदत्ता**ख्यमात्तभिक्षं विलोकयन् । स्वर्णवृष्टिं सुरै: सृष्टां दृष्ट्वा हृष्टोऽभवत्तदा ॥७४॥ युग्मम् ॥
अथ स्थानगतं पापवारणं कृतपारणम् । गत्वा नत्वा मुनिं राजाङ्गजोऽन्ते समुपाविशत् ॥७५॥
ततोऽसौ देशनां तेने मुनिर्मानेभकेसरी । सर्वास्तथा कथा: पूर्वजन्मजाता न्यवेदयत् ॥७६॥
सोऽपि भूपाङ्गभू: श्रुत्वा विशुद्ध: प्रतिबुद्धवान् । नत्वा यतिं गत: प्रष्टुं पितरौ निश्चितव्रत: ॥७७॥
पितृभ्यामननुज्ञातस्ततश्चाऽकृतभोजन: । गत्वा पौषधशालायां तस्थावस्थानमंहसाम् ॥७८॥
इभ्यात्मजेन भूभर्तुरादेशात् **दृढधर्मणा** । श्राद्धेन बोधितोऽभुङ्क्त षष्ठादाचाम्लपारण: ॥७९॥
ईदृक्तप:प्रकाशी च प्रासुकाशी व्रतीव स: । तत्र शुश्रूषितस्त्रुट्यत्कर्मणा दृढधर्मणा ॥८०॥
अथ द्वादशवर्षान्ते भावनिर्व्यूढसंयम: । **विद्युन्माली**ति देवोऽभूत् **ब्रह्मलोके**ऽद्भुतद्युति: ॥८१॥
श्री**वीर:** समवासार्षीत् पुरे राजगृहेऽन्यदा । तदीयपादपद्मा[1]ली विद्युन्माली तदाऽभवत् ॥८२॥

१. सा – B, L, H । २. व्रतजनेन – C ।

टि. 1. अलिन् – भ्रमर: ।

शक्रादिसुरचक्रेषु काचेष्विव मणिर्ज्वलन् । अकरोद् दुष्करं किं किं देवोऽसौ पूर्वजन्मनि ॥८३॥
**श्रेणिक**क्षोणिकान्तेन पृष्टः स्पष्टमिति प्रभुः । **तद्विद्युन्मालिनः** सर्वं पूर्ववृत्तं न्यवेदयत् ॥८४॥ युग्मम् ॥
भविष्यति भुवि स्वामिन् कीदृशोऽयमितश्च्युतः । इति पृष्टे नृपेणाऽह पुनस्त्रिभुवनप्रभुः ॥८५॥
सप्तमेऽह्नि पुरेऽत्रैव **ऋषभ**श्रेष्ठिसूरसौ । **जम्बू**नामाऽवसर्पिण्यां भावी चरमकेवली ॥८६॥
**तद्विद्युन्मालिनः** कान्ताश्चतस्रो विनयानताः । तीर्थेशमिति पप्रच्छुः काऽस्माकं भाविनी गतिः ॥८७॥
श्रेष्ठिनां तनुजीभूय यूयमप्यस्य योषितः । भविष्यथ पुरेऽत्रैव तदिदं विभुरभ्यधात् ॥८८॥
पुरा च नगरेऽत्रैव **वैभारगिरि**कानने । **सुधर्मस्वामिनं** नन्तुं गताऽभूदृषभप्रिया ॥८९॥
सा शुश्राव तदा सिद्धपुत्रं विद्याधरं प्रति । कथ्यमानं गणभृता ध्रुवं **जम्बू**विचारणम् ॥९०॥
ततो **जम्बू**विचारान्ते सा पप्रच्छ गणेश्वरम् । भविष्यति तनुजन्मा कथं मे कथ्यतामिति ॥९१॥
गणेशं वीक्ष्य सावद्यप्रश्नतो मौनमास्थितम् । अभाषि **धारिणी** शीलधारिणी सिद्धसूनुना ॥९२॥
सति ! व्रतिपतिर्नेदं सावद्यं कथयिष्यति । भवत्यै कथयिष्यामि सुतार्थमहमेव यत् ॥९३॥
मम वाचा त्वमाचाम्लान्यष्टोत्तरशतं कुरु । पुत्रस्तदन्ते भावीति सिंहस्वप्नेन सूचितः ॥९४॥
इत्याकर्ण्य गृहं गत्वा सा सर्वं तत्तथा व्यधात् । **विद्युन्माली** च तत्कुक्षौ स च्युत्वाऽवातरद्दिवः ॥९५॥
स्वप्नं पत्ये वितत्येयं[१] प्रातः कृतजिनार्च्चना । अथ प्राचीव भास्वन्तं काले सुतमसूत च ॥९६॥
असौ **जम्बू**विचारस्य प्रक्रमे समभूदिति । पितृभ्यां विहितो **जम्बूकुमार** इति नामतः ॥९७॥
**पद्मावती समुद्रस्य** प्रेयसी सुषुवे सुताम् । **समुद्रश्रिय**मुन्मुद्रचन्द्रसान्द्रमुखत्विषम् ॥९८॥
**समुद्रदत्त**प्रेयस्या जज्ञे **कमलमालया** । नन्दिनी किल **पद्मश्रीः** पद्मश्रीदस्युलोचना ॥९९॥
पुत्री **सागरदत्त**स्य जनिता **विजयश्रिया** । **पद्मसेने**ति निश्छद्मसेनेव स्मरभूभुजः ॥१००॥
सुता **कुबेरदत्त**स्य दयितायां **जयश्रियाम्** । आसीत्**कनकसेने**ति कनकस्पर्द्धिदीधितिः ॥१०१॥
**विद्युन्मालि**सुरस्यैताश्चतस्रश्चित्तवल्लभाः । गृहेषु श्रेष्ठिनामेषामवतेरुर्दिवश्च्युताः ॥१०२॥
तथा **कुबेरसेनस्य नभःसेने**ति नन्दिनी । सञ्जाता **कमलवती**कुक्षिपल्वलवारला[२][1] ॥१०३॥
श्रेष्ठि**श्रमणदत्तस्य सुषेणा**कुक्षिसम्भवा । सुताऽभूत् **कनकश्री**स्तां न कः श्रीवदमन्यत ॥१०४॥
सुषुवे च **सुषेण**स्य प्रिया **वीरमती** पुनः । सुतां **कमलवत्या**ख्यां साक्षादिव दिवः श्रियम् ॥१०५॥
**वसुपालित**गेहिन्या सुषुवे **जयसेनया** । रतिरूपजयश्रीवज्**जयश्री**रिति नन्दिनी ॥१०६॥
दिक्पालराजधानीनामष्टौ मूर्त्ता इव श्रियः । सेवन्ते तत्पुरं बाला जैत्रं **जम्बू**गुणेन ताः ॥१०७॥
दातुं ताः पितृभि**र्जम्बूकुमार**स्य पितार्थितः । सर्वं मेने न कस्तुल्यगुणसङ्गाय कौतुकी ॥१०८॥
तदानीं च महामोहमेघसन्दोहमारुतः । श्री**सुधर्मा** समायासी**द्वैभारगिरि**काननम् ॥१०९॥

---

१. तत्येषा - KH । २. वारिला - A ।
टि. 1. वारला - हंसी ।

श्रुते तस्मिन् समायाते निर्यातं नगरादथ । जनैर्भृङ्गैरिवाम्भोजादुदिते[1]ऽम्भोजबान्धवे ॥११०॥
स **सुधर्म**गणाधीशं नमस्कर्तुं समागमत् । तदा **जम्बूकुमारो**ऽपि समारोपितसंमदः ॥१११॥
तदा मुनीन्दुः प्रारेभे देशनां दशानांशुभिः । पुरो **जम्बू**वपुः सिञ्चन् प्रसादैरिव देहिभिः ॥११२॥
भवेद् भवार्णवः पुंसां सुतरः सुतरामसौ । न्यञ्चनोदञ्चनोग्राश्चेन्न स्युः श्रीचयवीचयः ॥११३॥
मेघानामिव लोकानामायुर्गलति नीरवत् । चपलेव चला लक्ष्मीः पाण्डुतेवैति विश्रसा ॥११४॥
तदायुषा च लक्ष्म्या च वपुषा चास्थिरात्मना । चिरस्थिरतरं रत्नत्रयं ग्राह्यं विवेकिना ॥११५॥
तत्रोपाश्रयभैषज्यपुस्तकान्नांशुकादिभिः । साहाय्यं ज्ञानिनां तन्वन् ज्ञानमाराधयेद् गृही ॥११६॥
सङ्घवात्सल्य-जैनेशवेश्मयात्रार्च्चनादिभिः । प्रभोः प्रभावयन् तीर्थं सम्यक् सम्यक्त्वमर्ज्जयेत् ॥११७॥
भक्त्या चारित्रपात्रेषु तथावश्यककर्मभिः । तपोभिरपि चारित्रं गृहमेधी समेधयेत् ॥११८॥
काले पाठादिभिर्ज्ञानमशङ्काद्यैश्च दर्शनम् । मूलोत्तरगुणैः शुद्धैश्चारित्रं भजते यतिः ॥११९॥
इति रत्नत्रयाल्लेभे हतमोहतमोभरैः । चिराद् गृहस्थैः सद्योऽपि यतिभिः शाश्वतं पदम् ॥१२०॥
ये तु मोहग्रहग्रस्ताः प्रमादस्य वशंगताः । अशरण्यैर्भवारण्ये भ्रमितव्यं सदापि तैः ॥१२१॥
**जम्बू**रम्बूज्ज्वलं पीत्वा घनादिव गुरोर्वचः । महीरुह इवाऽमुञ्चत् सद्यो भवदवव्यथाम् ॥१२२॥
नत्वा मुनीन्द्रमुन्निद्रव्रतग्रहमहोद्यमः । जगामाऽयममायः सन् सदनं मदनं द्विषन् ॥१२३॥
सत्वरः पितरौ नत्वा **जम्बूः**[1] कम्बूल्लसद्यशाः । निजगादाऽयमादाय व्रतं प्रीतो भवाम्यहम् ॥१२४॥
इत्याकर्ण्य ततः कर्णतप्तत्रपुनिभं वचः । सुतं व्रतनिषेधाय पितरावूचतुस्तराम् ॥१२५॥
एकस्त्वमावयोर्दीपो भानुर्भू-नभसोरिव । त्वां विना वत्स ! नितमां तमांस्यभिभवन्ति नौ ॥१२६॥
मनोरथशताहूतस्तपोभिरतिदुष्करैः । दुर्लभस्तात ! लब्धोऽसि त्वमुदुम्बरपुष्पवत् ॥१२७॥
तच्चिरोद्भूतमस्माकं मनोरथमहीरुहम् । विदग्ध ! दग्धुं किं नाम वाग्ज्वालाभिः प्रगल्भसे ॥१२८॥
ययाचिरे चिरेणैता दासीकृतरतिद्युतः[2] । अष्टौ याः कन्यकास्तुभ्यं त्यजस्येताः कुतः[3] सुत ! ॥१२९॥
विवाहमण्डपान्तस्त्वं वधूभिरभितो वृतः । वशाभिरिव यूथेशो मानसं[4] नौ प्रमोदय ॥१३०॥
त्वत्सङ्गसुभगंमन्याः कन्याः परिणयन्निमाः । कुतूहलं श्रुतोलूलुरवयोः पूरयाऽऽवयोः ॥१३१॥
आशानामिव तत्तासामन्तश्चन्द्र इव स्फुरन् । धाम्ना स्वेनाऽऽवयोर्नेत्रकुमुदानां मुदं कुरु ॥१३२॥
श्रुत्वा पित्रोरिमां वाचमचलव्रतनिश्चयः । उचितज्ञः कुमारोऽयमभ्यधान्मधुरं वचः ॥१३३॥
तावदाचर्यत ब्रह्मचर्याय नियमो मया । कुतूहलाय वां कार्यं पाणिग्रहणमप्यदः ॥१३४॥
विवाहस्य द्वितीयेऽह्नि ग्रहीष्यामि पुनर्व्रतम् । क्षेप्यस्तद्वत्सवात्सल्यान्नाऽहं भवदवानले ॥१३५॥
आसां मृगीदशां प्रेमस्थेमसम्बन्धबन्धने । पतित्वेन पतित्वाऽसौ क्व मोक्षाय यतिष्यते ॥१३६॥

---

१. जम्बू - P, KH, B, C । २. द्युतिः KH, P । ३. कुतः सुतः - K, B, D, A, L, H कुतस्ततः - KH । ४. मानसे नः - C ।
टि. 1. अम्भोजबान्धवः-सूर्यः, तस्मिन् ।

इत्यालोच्य मिथस्ताभ्यां पितृभ्यां तन्मतं वचः । अकारि च मुदा पाणिग्रहोपक्रमणक्रमः ॥१३७॥ युग्मम् ॥
अथ **जम्बूकुमारेण** ज्ञापिते स्वव्रतोद्यमे । पितॄन् किंकार्यतामूढानाहुस्तानिति कन्यकाः ॥१३८॥
इहाऽपि परलोकेऽपि **जम्बूस्वामी** गतिः स नः । मार्त्तण्ड इव मार्तण्डग्रावपावकरोचिषाम् ॥१३९॥
स मन्मथपथेऽस्माभिस्तेनात्मा[1]ध्वनि वा वयम् । नेतव्याः सत्यमित्यस्तु स्पर्द्धाबन्धः परस्परम् ॥१४०॥
महासतीषु धन्यानां कन्यानां वचनैरिति । तेऽप्युद्दिश्य विवाहस्य दिनमानन्दिनः स्थिताः ॥१४१॥
अथाननेन्दुनिर्गच्छदुलूलुसुधया तया । स्त्रीषु सञ्जीवयन्तीषु [1]भवदग्धं मनोभवम् ॥१४२॥
बन्धूनामुपरोधेन विरोधेन तु चेतसः । लग्ने **जम्बूकुमारो**ऽयमुपयेमे कुमारिकाः ॥१४३॥ युग्मम् ॥
सह ताभिः स्मरशैरः स हताभिस्तदा वदन् । गतस्पृहो गृहावासे वासवेश्मन्यवास्थितः ॥१४४॥
इतश्च **विन्ध्यो विन्ध्याद्रौ** व्यधाज्**जयपुर**प्रभुम् । पुत्रं [2]**प्रभु**मथ ज्येष्ठः **प्रभवो** निरगात् क्रुधा ॥१४५॥
चौरपञ्चशतीयुक्तः कुर्वन्नुर्व्यां स चौरिकाम् । जज्ञे**ऽवस्वापिनी-तालोद्घाटिनी**विद्ययोः पदम् ॥१४६॥
गृहं तदा तदागत्य **जम्बूस्वामि**निषेवितम् । विद्ये प्रयुज्य तन्वानश्चौर्यं स्तम्भमवाप सः ॥१४७॥
केनाऽहं स्तम्भितो भृत्यैः सहितोऽपीति चिन्तयन् । दृशं प्रतिदिशं चौरग्रामणीरक्षिपत्ततः ॥१४८॥
अथ सुप्तेऽखिले लोके कुमारं स्त्रीभिरावृतम् । अपश्यज्जाग्रतं सोऽब्जखण्डे कैरवखण्डवत् ॥१४९॥
**प्रभव**स्तमुवाचाऽथ **जम्बू**नामानमानतः । [3]स्तम्भिनीं देहि मे विद्यां गृह्णन् विद्याद्वयं मम ॥१५०॥
**जम्बूस्वामी** ततो वाचमाचष्टे स्म शमैकभूः । नास्ति मे स्तम्भिनीविद्या त्वद्विद्याभ्यां च किं मम ॥१५१॥
काङ्क्षामि यदहं गेहविरहं निरहङ्कृतिः । व्रतं प्रातर्ग्रहीष्यामि **सुधर्मस्वामि**सन्निधौ ॥१५२॥
अथाह **प्रभवः** श्रीमन्निति [2]प्राभवभाग् भवान् । भुनक्ति नैव किं भोगान् व्रताय यतते कुतः ॥१५३॥
वरेणेदमथाऽवादि तथावादिनि तस्करे । सावधानीभवत्कर्णस्त्वमाकर्णय मद्गिरम् ॥१५४॥
अशरण्यो महारण्ये सार्थः कोऽपि मलिम्लुचैः । [4]अलुण्ट्यत यथा व्योम्नि ताराभारः पयोधरैः ॥१५५॥
सार्थे त्रस्ते समस्तेऽपि कश्चिन्मर्त्त्योऽटवीतटे । तत्रैवैकः स्थितो मूढः शाखीवोग्रदवोद्धृतः ॥१५६॥
सिन्धुरेणाद्धुरेणाऽथ समारब्धो वनान्तरे । धावन्मृत्युभयाज्जीर्णकूपे झम्पामयं ददौ ॥१५७॥
तत्रावटतटोद्भूतवटशाखाविनिर्गतम् । पादं बन्धुमिवाभीष्टमाश्लिष्टः सोऽन्तरा पतन् ॥१५८॥
अथ कूपतलेऽद्राक्षीत् करालमुखकोटरम् । क्षणादजगरं कालनगरोदरसोदरम् ॥१५९॥
परितोऽपश्यदाशास्तु निराशासुस्थितश्च सः । चतुरो यमनिर्मुक्तान् यामिकानिव पन्नगान् ॥१६०॥
किं चालम्बनशाखायामीक्षामास सितासितौ । आखू मूलं खनन्तौ स निष्कारणखलाविव ॥१६१॥
तस्य दुर्भूपवत् कूपद्वारस्थस्य [3]विषाणिनः । स ददर्श कुटुम्बीव क्लीवः प्रसृमरं करम् ॥१६२॥

---

१. ध्वनिना - KH । २. प्रभम....B, H, A । ३. स्तंभर्नी - A, C, D, H । ४. अमुष्यत - KH ।

टि. 1. भवः शिवः तेन दग्धः भवदग्धः मनोभवः कामदेवः, तम् । 2. प्राभवः - प्रभुता, तां भजति इति प्राभवभाग् । 3. विषाणिन् - हस्तिन्, तस्य ।

मधुच्छत्रोत्थिता हस्तिहस्ताहतिचले वटे । लग्नाश्च मक्षिकास्तस्मिन् ऋजौ लुब्धा इवेश्वरे ॥१६३॥
मधुमण्डाच्च्युतास्तस्य वदने मधुबिन्दवः । निपेतुश्चातकस्येव मन्दा वारिदबिन्दवः ॥१६४॥
नासौ मधुमधुस्वादसुखलालसमानसः । तदनेकविधं दुःखं स्मरति स्म रतिं वहन् ॥१६५॥
अथ व्योमपथक्रोडे कोऽपि विद्याधरश्चरन् । तं वीक्ष्य करुणाविष्टः क्रष्टुं बन्धुरिवाऽऽययौ ॥१६६॥
दत्तहस्ते ततस्तस्मिन् मधुबिन्दुविलोभिनः । स्थितिर्वा निर्गमो वास्य किं युक्तमिति कथ्यताम् ॥१६७॥
[१]अथो हसन्नसावाह कुमारमिति राजसूः[1] । किं पृष्टं ? वेत्ति मूढोऽपि, निःसृतिस्तस्य शस्यते ॥१६८॥
व्यक्तमित्युक्तवत्यस्मिन्नुपहासिनि हर्षितः । ऊचे **जम्बूकुमारो**ऽपि सुधाकवचितं वचः ॥१६९॥
पुरुषो यः स संसारी संसारस्तु महाटवी । मानुष्यजन्मकूपश्च नरकोऽजगरस्त्वधः ॥१७०॥
सर्प्पाः कषायाश्चत्वारश्चतसृष्वपि दिक्षु ते । यमश्च मूर्ध्नि मातङ्गो मक्षिका व्याधयः पुनः ॥१७१॥
छिन्तश्च द्रुलतामायुराखू पक्षौ सितासितौ । प्रीणन्ति जन्तुं कष्टेऽस्मिन् विषया मधुबिन्दवः ॥१७२॥
**सुधर्मस्वामि**ना विद्याधरेणेवेति कष्टतः । कृष्यमाणो निषेध्येऽहं किं त्वया विषयेच्छया ॥१७३॥
इत्थं विषयसम्बन्धनिषेधेन निरुत्तरः । **प्रभवः** प्राह दन्तांशु[2]नासीरविदितं वचः ॥१७४॥
कुटुम्बमिति सन्त्यज्य निःशेषं निर्विशेषधीः । कुर्वन् जनकयोः पीडां व्रीडामपि विमुञ्चसि ॥१७६॥
उक्ते च **प्रभवे**नेति श्री**जम्बू**रवदत्तदा । महात्मन् ! श्रूयतामेकं **ज्ञातेयस्य कथानकम्** ॥१७७॥
आसीत् **कुबेरसेने**ति **मथुरायां** पणाङ्गना । यदीयवदनस्येन्दुः स्नपनप्रतिमासमः ॥१७८॥
साऽन्यदा दैवयोगेन तनयां तनयं यमौ । कीर्त्तिप्रतापौ भूपासिलेखेवाऽसूत नूतनौ ॥१७९॥
सन्त्याजयन्त्याः कुट्टिन्या निराकृत्य वचोविषम् । एकादशाहं सा हन्त पाययामास तौ पयः ॥१८०॥
**कुबेरदत्त** इत्याख्याजुषं पुत्रस्य मुद्रिकाम् । पुत्र्याः **कुबेरदत्ते**ति नामभाजं च सा व्यधात् ॥१८१॥
मञ्जूषायामथो रत्नराजिभाजिन्ययोजयत् । तदपत्यद्वयं माता [२]कातरा कुट्टिनीभयात् ॥१८२॥
यमुनाम्भसि मञ्जूषां मुदां निधिमिवात्मनः । चिक्षेप वितरन्तीव सा जलाञ्जलिमश्रुभिः ॥१८३॥
अथ **सूर्यपुरो**पान्ते **यमुना**वाहवाहिता । पेटेयमिभ्ययुग्मेन दृष्टा हृष्टान्तरात्मना ॥१८४॥
आकृष्योद्घाट्य तां पेटा[३]मन्तर्वीक्ष्य शिशुद्वयम् । दायादाविव सर्वस्वमाददातां विभज्य तौ ॥१८५॥
तौ तयोः श्रेष्ठिनोर्गेहे संवर्द्धेते सहोदरौ । यथा वलक्षपक्षस्य कौमुदीकौमुदीपती ॥१८६॥
अङ्गुलीमुद्रिकानाम्ना ख्यातयोरेतयोर्मिथः । विवाहं चक्रतुः श्रेष्ठिमुख्यौ तौ युग्मिनोरिव ॥१८७॥
क्षिप्ता **कुबेरदत्ते**न प्रेमवत्याः करेऽन्यदा । निजनामाङ्किता मुद्रा वैराग्यस्येव पत्रिका ॥१८८॥
वीक्ष्य मुद्रां स्वमुद्रावत् प्रियं सा प्राह विस्मिता । नाम्नाऽङ्केन च किं साम्यमनयोरावयोरिव ॥१८९॥
तदावां सोदरौ शङ्के नाऽनयोः श्रेष्ठिनोः सुतौ । आभ्यामपि क्वचिल्लब्ध्वाऽज्ञानात् परिणायितौ ॥१९०॥

---

१. अहो – C, KH । २. कारिता – A । ३. मभिवीक्ष्य – B ।

टि. 1. प्रभवः । 2. नासीरं – अग्रेसरं सैन्यम् ।

सत्यमित्याग्रहादद्य प्रष्टव्यौ पितरौ ततः । ज्ञातव्यमेव जन्म स्वमालोच्येति समुत्थितौ ॥१९१॥
पितरावाग्रहात्पृष्ट्वा मत्वात्मचरितं च तत् । निश्चित्य सोदरत्वं च पाणिग्रहमशोचताम् ॥१९२॥
इति निःसारसंसारवैराद्वैराग्यवासितौ । स्थितावधोमुखावेव प्रगे कुमुदिनीन्दुवत् ॥१९३॥
ततः **कुबेर**मापृच्छ्य पितरौ च विरक्तया । **कुबेरदत्तया**ऽग्राहि जिनदीक्षाऽतिदक्षया ॥१९४॥
स्वान्ते नामाङ्कितं मुद्रारत्नमस्थापयच्च सा । बोधं **कुबेरदत्त**स्य मूर्त्तिमन्तमिवोज्ज्वलम् ॥१९५॥
गतः **कुबेरदत्त**स्तु भूरिक्रीतक्रयाणकः । मथुरायां पुरि स्फारव्यवहारविहारतः ॥१९६॥
यस्यां **कुबेरसेना**यामुत्पन्नः स किलाऽभवत् । शशी निशीव कान्तोऽभूत्तस्या एव स धिग् विधिम्[१] ॥१९७॥
कालात् **कुबेरसेना**यां **कुबेर**स्य सुतोऽभवत् । भवव्यामोहसर्वस्वसारेणेव विनिर्मितः ॥१९८॥
**कुबेरदत्ता** तत्सर्वं शुद्धोत्पन्नावधिः सती । तस्याऽसमञ्जसं ज्ञात्वाऽभूत् बोधयितुमुत्सुका ॥१९९॥
गोपितस्वाङ्गुलीयाऽसावनुज्ञाप्य प्रवर्त्तिनीम् । भवाब्धौ मज्जतो भ्रातुर्बेडेव[1] **मथुरां** ययौ ॥२००॥
पुरः **कुबेरसेना**या याचित्वा वसतिं च सा । तस्थावस्थानकेऽप्य**न्योपकृतिः कृतिनां व्रतम्** ॥२०१॥
पुरः स्फुरन्तमालोक्य **कुबेरा**ङ्गजमन्यदा । व्रतिनी व्रतनीतिज्ञा सा बभाषे मृषोज्झिता ॥२०२॥
बाल ! त्वमसि मे पत्युः सोदरत्वेन [2१]देवरः । माता तथावयोरेका तेनाऽसि मम सोदरः[२] ॥२०३॥
जातोऽसि मे सपत्न्या त्वमपत्यमिति[३] तेन मे । त्वत्पिता मे सपत्नीभूः पौत्रस्त्वमसि[४] मे ततः ॥२०४॥
मन्मातृभर्तुः सोदर्यस्त्वं पितृव्योऽसि[५] तन्मम । सहोदरस्य सूनुस्त्वं भ्रातृव्योऽप्यसि[६] मे ततः ॥२०५॥
मातापि तव माता[१] मे धृतावावां ययोदरे । सा मन्मातृभुजङ्गस्य माता तन्मे पितामही[२] ॥२०६॥
मत्सपत्नीतनूजस्य पत्नी सा मे वधूरिति[३] । मद्भर्तुः साऽभवन्माता मम श्वश्रूरतो[४] मता ॥२०७॥
मद्बान्धवस्य पत्नी सा भ्रातृजाया[५] ततो मम । सा पुनर्मत्पतेः पत्नी सपत्नीति[६] ममाऽभवत् ॥२०८॥
मज्जनन्या भुजङ्गो यत् त्वत्पिता तत्पिता[१] मम । मत्पितृव्यस्य [3]ते सोऽभूत् पिता तन्मे पितामहः[२] ॥२०९॥
मम तस्य च माताऽभूदेका मे सोदरः[३] स तत् । मद्भर्तृजननीभर्त्ता स तेन श्वशुरोऽपि[४] मे ॥२१०॥
स च जग्राह मत्पाणिं जातः पतिरतो[५] मम । स मदीयसपत्न्याश्च सूनुः सूनुर्ममाऽप्यतः[६] ॥२११॥
अथो मिथो विरुद्धं तन्निशम्य शमिनीवचः । **कुबेरो**ऽपृच्छदागत्य किमेतदिति विस्मयी ॥२१२॥
इति तस्मै **कुबेरा**य पृच्छते व्रतिनी ततः । तन्मुद्रारत्नमज्ञानध्वान्तदीपमिवाऽऽर्प्ययत् ॥२१३॥
मुद्रारत्नेन तेनाऽथ दिननाथनिभेन स । प्रबुद्धोन्तर्गतं मोहं भृङ्गं पद्म[4] इवामुचत् ॥२१४॥
लज्जितः स्वचरित्रेण गृहीत्वा व्रतमुज्ज्वलम् । धीमान् **कुबेरदत्तो**ऽसौ यौवनेऽपि ययौ वने ॥२१५॥
व्रतव्रतति[5]वृक्षेण यशोनिर्झरभूभृता । कर्मकुञ्जरसिंहेन तेनारण्यानि रेजिरे ॥२१६॥

---

१. विधिः - KH, C, A, H ।

टि. 1. बेडा - नौका । 2. क्रमाङ्कः प्रथमः १-६-कुबेरदत्ताया बालेन सह सम्बन्धाः, द्वितीयः १-६ तस्या एव कुबेरसेनया सह, तृतीयः १-६ तु कुबेरदत्तेन सह, इति अष्टादश सम्बन्धाः सूचिताः । 3. ते-तव, बालस्य । 4. पद्मः (पुं) - कमलम् । 5. व्रततिः (स्त्री) लता ।

भावनां भावयन्नेष स्मृतपञ्चनमस्कृतिः । जगाम त्रैदिवं धाम कामसा[1]मजकेसरी ॥२१७॥
मत्वा **कुबेरसेना**ऽपि तादृग् विषयविप्लवम् । भवे विरक्ता जग्राह गृहवासोचितं व्रतम् ॥२१८॥
इत्थं कथाप्रथापाथोधौतमोहमलस्य मे । कुतो ज्ञातेयः सम्बन्धः **प्रभव** ! प्रभविष्यति ॥२१९॥
राजपुत्रः पुनः प्राह कुतोऽपुत्रस्य ते गतिः । जगाद **जम्बूः** पुत्रस्य कथयामि कथां शृणु ॥२२०॥
अस्ति देवालयस्तम्भोत्तम्भितव्योममण्डपा । निकेतमालिनी ख्याता पुरी नाम्ना **तमालिनी** ॥२२१॥
श्री**महेश्वरदत्तो**ऽभूदिभ्यस्तत्र पुराग्रणीः । प्रथितः प्रौढमिथ्यात्वपाथोधिजलकुञ्जरः ॥२२२॥
दुश्चारिणीकुलाचार्यभूताऽभूताऽस्य वल्लभा । **नागिले**ति पुरि ख्याता कामारामैकसारणिः ॥२२३॥
सोऽन्यदा महिषं हत्वा जनकश्राद्धपर्वणि । अङ्कस्थं तस्य मांसेन लग्नो भोजयितुं सुतम् ॥२२४॥
तदा च गृहमभ्येत्य वलितो वक्रिताननः । [१]दृष्टश्रेष्ठः मुनिश्रेष्ठः पठन् श्लोकमिमं मुहुः ॥२२५॥
पुष्णाति स्वपितुर्मांसैः शत्रुमुत्सङ्गसङ्गिनम् । विधत्ते च पितुः श्राद्धमहो मोहस्य वल्गितम् ॥२२६॥
महेश्वरस्तदाकर्ण्य तूर्णमेत्य मुनीश्वरम् । नत्वाऽपृच्छत् प्रभो ! प्रोक्तं किमेतदसमञ्जसम् ॥२२७॥
इत्याग्रहपरे तत्रोवाच वाचंयमाग्रणीः । विज्ञाय ज्ञानतस्तस्योपकारं करुणापरः ॥२२८॥
**नागिलायाः** किलायातो यस्त्वयोपपतिः पुरा । अघानि घनमावासक्रोडे क्रीडन् यदृच्छया ॥२२९॥
[२]तत्काल एव मुक्तात्मवीर्य एवावतीर्य सः । **नागिलो**दरजातत्वात् तवाऽयं तनयोऽभवत् ॥२३०॥
महिषस्यामिषैर्यस्य भवता तर्पितः पिता । जीवः **समुद्रदत्त**स्य स एष भवतः पितुः ॥२३१॥
याऽसौ शुनी पुनर्द्वारि महिषास्थीनि खादति । मन्यस्व मतिमन्नेतां स्वामम्बां **बहुला**भिधाम् ॥२३२॥
त्वद्गृहे ज्ञानतो ज्ञात्वा तदेतदसमञ्जसम् । तद्बोधाय तव श्लोकं पठित्वा वलितोऽस्म्यहम् ॥२३३॥
तदिदं भवता ख्यातमत्र कः प्रत्ययः प्रभो ! । पृष्टो **महेश्वरे**णेति स मुनिः पुनरब्रवीत् ॥२३४॥
अन्तर्गृहं शुनी नीता जातजातिस्[३]मृतिः सती । रत्नजातं तदेषा तन्निखातं दर्शयिष्यति ॥२३५॥
इत्युदित्वा मुनौ याते या तेन कथिता शुनी । तत्तथा दर्शितं तस्मै तयाऽन्तर्गृहनीतया ॥२३६॥
साधो[2]राधोरणस्येव स तस्माद्वचनाङ्कुशात् । उत्पथस्थिति[४]मव्याजं तत्याज श्रेष्ठिकुञ्जरः ॥२३७॥
पितृपुत्रादिसम्बन्धमवबुध्येति विप्लुतम् । मन्यते मित्र ! न त्राता तदात्माऽपि कुतः सुतः ॥२३८॥
अमुद्रश्रीः **समुद्रश्रीः** प्रियमित्थमथाभ्यधात् । प्रेममुक्त ! मयाप्युक्तं युक्तमित्यवधार्यताम् ॥२३९॥
इमां विभूतिमद्भुतां मुक्त्वा मुक्त्यै कृताग्रहः । मा भूस्त्वमुभयभ्रष्टः स्वामिन् ! स इव कर्षुकः ॥२४०॥
ग्रामः **सुसीम**नामाऽस्ति सीमन्तो देशसम्पदः । निवासदुर्गं यः श्रीणां सर्वतः कणपर्वतैः ॥२४१॥
तत्राऽभूत् कर्षुकः कोऽपि ग्रामीणग्रामणीर्महान् । कङ्गुकोद्रवमुख्यानि धान्यानि वपति स्म सः ॥२४२॥

---

१. दृष्टः श्रेष्ठः - A, दृष्टस्तेन - D, K पृष्टः श्रेष्ठी - KH दृष्टः श्रेष्ठी - C, L । २. तत्कालमेव त्यक्तात्मवीर्य....B, A । तत्कालमेवमुक्त...D । ३. स्मृती सति A ....स्मृता सती - KH । ४. तिंमत्याजं - H तिमन्याज्यं B ।

टि. 1. सामजः - हस्ती । 2. आधोरणः हस्तिपकः ।

अथ धान्योत्करे तस्मिन् प्राच्यपुण्य इवोद्गते । अकुण्ठस्वजनोत्कण्ठो दूरं ग्रामं जगाम सः ॥२४३॥
जहृषुः कर्षुके तत्र दृष्टेऽपि स्वजनास्ततः । घनाघन इवौत्सुक्यप्रचलाः [1]प्रचलाकिनः ॥२४४॥
तं नमश्चक्रिरे केऽपि केपि तेन च नीचकैः । गृहं तदा तदीयं तत्तोषैकार्णवतां गतम् ॥२४५॥
अथो पृथुगुडस्पष्टस्वादुमण्डकमण्डलीम् । सोऽभुक्तपूर्वां पूर्णेन्दुमण्डलीमिव भोजितः ॥२४६॥
सहर्षः कर्षुकोऽवादीत्ततस्तान् स्वजनान्निजान् । सुधाऽपि सा मुधा तत्र यत्रैते गुडमण्डकाः ॥२४७॥
तद्दत्त बीजमेतेषां निजग्रामे वपामि यत् । येन तस्मिन् समस्तोऽपि स्यात् सुधाभोजनो जनः ॥२४८॥
इक्षुगोधूमयोर्बीजमेतैस्तस्य समर्प्पितम् । अरघट्टेक्षुवाटादिकर्माऽपि ज्ञापितं ततः ॥२४९॥
बीजं तदा मुदाऽऽदाय [१]सदनाय समुत्सुकः । दुस्थो धनमिवोपार्ज्य तदानार्यः स निर्ययौ ॥२५०॥
सद्यः स्वग्राममासाद्य वार्यमाणोऽपि नन्दनैः । जातकल्पमतिस्वल्पमतिः क्षेत्रं लुलाव सः ॥२५१॥
सञ्चितेनाथ वित्तेन तेन मण्डकलोभिना । पातालरूपः कूपोऽत्र निर्मातुमुपचक्रमे ॥२५२॥
[२]खातं खातं ततः कूपं नोदबिन्दुरपीक्षितः । तेन भाग्यच्युतेनेव द्रव्यांशोऽपि धनार्थिना ॥२५३॥
अधन्यस्य न धान्यानि न चार्थश्चिरसञ्चितः । अतिलुब्धस्य तस्याऽऽसन्न च ते गुडमण्डकाः ॥२५४॥
त्वमप्युपनतानेवं प्रभो ! भोगान्परित्यजन् । मुक्तिश्रीसुखलोभेनोभयभ्रष्टो भविष्यसि ॥२५५॥
अथ **जम्बूकुमारो**ऽपि तामुवाच वचस्विनि ! । मांसातिलोल[2]काकोलकेलिं न कलयाम्यहम् ॥२५६॥
धात्रीधम्मिल्लतुल्योऽस्ति प्रसिद्धो **विन्ध्य**भूधरः । सोत्सेकाः केकिनो यत्र गर्जद्भिर्कुञ्जरैर्घनैः ॥२५७॥
सङ्क्षेप इव विन्ध्यस्य [३]महिमेव च जङ्गमः । कोऽपि क्रोडेऽस्य चिक्रीड दुर्द्धरः सिन्धुरेश्वरः ॥२५८॥
अथ दुर्भूपवद् भीष्मे ग्रीष्मे तापयति क्षितिम् । विन्ध्याद्रितनयां रेवां सेवार्थमुपजग्मिवान् ॥२५९॥
स कुञ्जरो जरोपात्तशक्तिर्ग्रावस्खलत्पदः । श्रोतस्तीरावनीखण्डे गण्डशैल इवाऽपतत् ॥२६०॥
दन्तिनो दुर्बलस्याऽस्य कान्तारान्तरपातिनः । असुरत्नं हृतं कालकिङ्करैस्त[४]स्करैरिव ॥२६१॥
दुष्टाः संवेष्टयामासुर्गतासुमथ तं द्विपम् । शृगालप्रमुखाः स्वामिमुक्तं पुरमिवारयः ॥२६२॥
आहत्याऽऽहत्य मांसानि विस्तीर्णं ते वितेनिरे । द्विरदस्य गुदे द्वारं नरकस्येव दुर्द्धियः ॥२६३॥
द्वारेण करिणस्तेन [3]करटाश्चरटा इव । सारमास्वादयामासुः प्रविश्याऽऽशु सहस्रशः ॥२६४॥
निगोद इव तत्रैव तन्वानानां गतागतम् । जन्तूनामिव काकानां कोऽप्यभव्य इव स्थितः ॥२६५॥
अन्तरन्तर्ययौ काको मांसान्यास्वादयन्नयम् । खनन् गजपतेरङ्गं सुरङ्गाकृदिव क्षितिम् ॥२६६॥
करटेऽन्तर्गते तत्र चौरे क्रूर इव क्षणात् । आरक्षक इव ग्रीष्मो गुदद्वारं न्यमीमिलत् ॥२६७॥
भूरिवर्षासु [4]वर्षासु परासुस्तदसौ द्विपः । क्रोडे वीचीकरैर्नीतो मात्रेव सरिता सुतः ॥२६८॥
गतोऽन्तर्वारिधेरेव रेवावाहप्रवाहितः । इभः पोतनिभः काकं साकं तमपि सोऽनयत् ॥२६९॥

१. वपनाय - KH, A । २. खानं.... D, B, K । ३. हिमवानिव - L । ४. स्तत्करैः...D, K, C । सस्करै....A ।

टि. 1. प्रचलाकिन्-मयूरः । 2. काकोलः-काकविशेषः । 3. करटः कुत्सितं रटति, काकः । 4. वर्षासु-वर्षाकाले ।

अथ तस्य गुदद्वारे विशद्वारिविदारिते । नि:ससाराऽहिदष्टस्य चिराज्जीव इव द्विक: ॥२७०॥
आशु नि:सृत्य संसृत्य वपुस्तस्य द्विपस्य स: । दिक्षु काको वराकोऽथ साक्षेपं चक्षुरक्षिपत् ॥२७१॥
अयं तोयमयं विश्वं पश्यन्नश्यंश्चतुर्दिशम् । पुनर्व्यावृत्त्य तत्रैव तस्थौ करिकलेवरे ॥२७२॥
अथ वारिभरापूर्णे मग्ने करिणि मग्नवान् । द्विक: सोऽपि तदाधार: स्वामिनीवानुजीवक: ॥२७३॥
काकवत् करिण: काये स्त्रीनिकायेऽनुरागवान् । कथं नाम निमज्जामि सोऽहं मोहेऽम्बुधाविव ॥२७४॥
अथाऽभाषिष्ट निश्छद्मश्री: **पद्मश्री**रदस्तदा । न वा नरवर ! प्रज्ञा वानरस्येव तस्य ते ॥२७५॥
जातख्याति क्षितावस्ति **हस्तिनागपुरं** पुरम् । चन्द्राश्मकलशैर्यत्र स्वयंभुपयस: प्रपा: ॥२७६॥
तत्र**ारिकेशरी** नाम क्षोणिसुश्रोणिवल्लभ:[1] । यद्यशोभिरशोभिष्ट विष्टपं नित्यचन्द्रिकम् ॥२७७॥
अनेकदासभूपालैरेकदा सहितो नृप: । मृगव्यायां जगामायमात्तनीलनिचोलक:[2] ॥२७८॥
वीरै: सह सहस्रेण स विवेश वनाद् वनम् । घनाद् घनं निशानाथ इव ताराभरै: समम् ॥२७९॥
वर्षत्सु शरधाराभिर्वीरेषु जलदेष्विव । निकुञ्जपुञ्जगेहेषु निलीनं वनचारिभि: ॥२८०॥
गर्वात्तथा स्थिरीभूता: सिंहास्तद्दत्तदृष्टय: । यथा मृगैर्भयोत्तालैर्दत्तफालैर्ललङ्घिरे ॥२८१॥
अथाऽयं पृथिवीनाथो मृगनाथोद्गतश्रम: । अवाप तापच्छेदाय जाह्नवीं स्वयश:सखीम् ॥२८२॥
जाह्नवीतीरकान्तारे तद्वीरै: स्वैरचारिभि: । नानाविधसुधाहृद्यविद्यमानफलोत्सुकै: ॥२८३॥
अदर्शि कामिनी काऽपि पुष्पभूषणभूषिता । प्रत्यक्षा वनदेवीव वनश्रीरिव जङ्गमा ॥२८४॥ युग्मम् ॥
अथादाय नरेन्द्रायताममी काममूर्त्तये । अदर्शयन् वनाम्भोधिलब्धां श्रियमिव स्त्रियम् ॥२८५॥
एतां सुरनदीसेवाफलमाकलयन्नृप: । आदाय कुन्ददायाददशनामविशत् पुरम् ॥२८६॥
सपत्नीं रत्नगर्भाया रत्नगर्भितभूषणाम् । पुण्यपण्यपरिक्रीतस्तां वितेने नरेश्वर: ॥२८७॥
अपरेद्यु: पुमान् कश्चिद् इदं पुरमरञ्जयत् । अनार्त्तं नर्त्तयन्नेकं वानरं नरजित्वरम् ॥२८८॥
अथ भूपाय केनाऽपि तदकथ्यत कौतुकम् । सोऽपि चाऽऽकारयाञ्चक्रे तं नरं धृतवानरम् ॥२८९॥
तां प्रियां स्वर्वधूबद्धस्पर्द्धामर्धासनस्थिताम् । कुर्वन्नुर्वीपतिर्भेजे सम्मदैकास्पदं सद: ॥२९०॥
अनीनृतत्तत: सोऽपि नरस्तं वानरं पुर: । तूर्याणि वादयन् दिक्षु जिघृक्षुर्जनमानसम् ॥२९१॥
न वानरो नरीनर्त्ति ताप्यमानमना: पुन: । नृपप्रियामुखाम्भोजन्यस्तदृष्टिस्तु रोदिति ॥२९२॥
विलक्षे भिक्षुकेऽथास्मिन् सा राज्ञी वानरं जगौ । अये ! मया निषिद्धस्त्वं तदा किमकृथास्तथा ॥२९३॥
कृतक्षोभेण लोभेन लम्भितोऽसीदृशीं दशाम् । **हृताखिलकलाशोभोऽतिलोभो हि न शोभन:** ॥२९४॥
बोधयित्वा तदात्मानं मानं वानर ! मा कुरु । यो यथा वर्त्तते कालस्तं तथैवानुवर्त्तय ॥२९५॥
इति प्रबोधितो देव्या नृत्यन्नत्यद्भुतं तदा । निर्व्याजं रञ्जयामास वानर: स नरेश्वरम् ॥२९६॥

---

टि. 1. क्षोणि:-पृथ्वी सैव शोभना श्रेणि: कटी यस्या: सुश्रोणि: स्त्री तस्या: वल्लभ: नृप: इत्यर्थ: । 2. निचोलक: - वर्म ।

कृतार्थीकृत्य पृथ्वीशस्तं वानरधरं नरम् । किमेतदिति तां राज्ञीं पप्रच्छ सपरिच्छदः ॥२९७॥
विस्मितेनावनीशेन पृष्टा स्पष्टमुवाच सा । स्वःसोपानतरङ्गाया गङ्गायास्तीरकानने ॥२९८॥
किलाऽऽसीद्वानरद्वन्द्वमद्वन्द्वप्रीतिमन्दिरम् । निर्दम्भस्मरसंरम्भरसप्रसरपेशलम् ॥२९९॥ युग्मम् ॥
तदन्यदा निदाघर्त्तौ क्रीडारसवशंवदम् । सममेव समारूढं तीर[1]वानीरवीरुधम् ॥३००॥
तामन्दोलयता कामं कपिना कम्पसम्पदा । दूरतो विनिपाताख्यं प्राप कापेयतः फलम् ॥३०१॥
वानरोऽयं नरो भूतस्तीर्थस्यास्य प्रभावतः । प्रियामालोकयामास हर्षौत्सुक्यस्पृशा दृशा ॥३०२॥
भैरवादिव वानीरात् वानरी साऽपतत्ततः । नारीभूत्वा पतीयन्ती तमेव निजवल्लभम् ॥३०३॥
ययौ ननु मनुष्यत्वमथ साप्यहह क्षणात् । जातजातिस्मृतिरिव स्मरन्ती कपि[१]जन्म तत् ॥३०४॥
ततो रतिः स्मरेणेव प्रीतेन प्रेयसा प्रिया । हर्षोत्कर्षादिहाऽरण्ये चिरं चिक्रीड संयुता ॥३०५॥
मुधाकृतसुधासाररससारतरैः फलैः । मुदा तदानीमेताभ्यां हसिता द्युसदोऽपि ते ॥३०६॥
क्रीडंस्तया सहान्येद्युस्तं वानीरमवाप्य सः । तामुवाच युवा चक्षुः क्षिपन् प्रेमोन्मुखं मुखे ॥३०७॥
असौ पशूनां वानीरो नरतां प्रथते यथा । तथा मन्ये मनुष्याणां देवभावं प्रदास्यति ॥३०८॥
प्रिये ! तदेहि वानीरमेनमारुह्य लीलया । पुनर्भूतलपातेन देवभावोऽनुभूयते ॥३०९॥
मनुष्यत्वेऽपि किं तुच्छमावयोर्विद्यते प्रिय ! । तेन वल्लभ ! लोभोऽयमतिमात्रो न युज्यते ॥३१०॥
वार्यमाणोऽपि वानीरात् स वानरवरो नरः । झम्पासम्पातमाधाय पुनर्वानरतां गतः ॥३११॥
पूरितो दुःखपूरेण नरत्वस्पृहयाऽथ सः । पुनः पपात वानीरात् गतः पुरुषतां न तु ॥३१२॥
मनुष्यभावमोक्षाय [२]चटून्यपि प[३]टूनि सः । तस्याश्चकार चक्रे तु न तया तदमूढया ॥३१३॥
साऽहं तस्य प्रिया प्राप्ता वसन्ती निर्जने वने । त्वत्पत्तिभिः सरित्तीरे कृष्टैर्मत्पुण्यतन्तुभिः ॥३१४॥
अटव्यामटताऽनेन पतिः प्राप्तः स एष मे । दक्षेण शिक्षितो नृत्यं मां वीक्ष्य विकलोऽभवत् ॥३१५॥
तत् प्राणेश ! मया सोऽयं निर्बुद्धिर्बोधितोऽधुना । ततो मयि विसस्मार प्रेमा[2]पस्मारमात्मनः ॥३१६॥
इत्याकर्ण्य कृताऽऽश्चर्यां कपेश्चर्यां स भूपतिः । लोभातिशयमेतस्य दूषयामास मांसलम् ॥३१७॥
तत्पुण्यसम्भवान् भोगान् मुक्त्वा काङ्क्षन् परं पदम् । नाथ ! त्वमुभयभ्रष्टो हास्यः स इव मा स्म भूः ॥३१८॥
अथ स्म वाचमाचष्टे **जम्बू**स्तां प्रेयसीं प्रति । न स्यां [3]विप्रतिसारस्य वश्योऽहं **पुण्यसार**वत् ॥३१९॥
पुरं **भोगपुरं** भोगहारि नारीमनोहरम् । अस्ति हस्तिमदामोदराजिराजगृहाङ्गणम् ॥३२०॥
श्रेष्ठी **धनावहो** नाम तत्राऽजनि जनप्रियः । विभाव्य वैभवं यस्य धनदोऽप्यधनायते ॥३२१॥
प्रिया **गुणवती** तस्य जज्ञे श्रीः श्रीपतेरिव । [4]मीनकेतुः स मीनत्वं यल्लावण्योदधौ दधौ ॥३२२॥
देवोपयाचितशतैः पूज्यपूजोपबृंहितैः । कृतप्रमोदसन्दर्भमथ गर्भं बभार सा ॥३२३॥

---

१. जन्मना - A जन्मवत् B, KH, K, L, D । २. चाटून्य - K, D, L । ३. तिपटू - B, L, D, B ।

टि. 1. वानीरः - वृक्षविशेषः । 2. अपस्मारः - रोगविशेषः । 3. विप्रतिसारः - पश्चात्तापः । 4. मीनकेतुः- कामदेवः ।

गृहं कलाकलापस्य निष्पुण्यानां शिरोमणिः । तनयस्तव भावीति तां कोऽपि ब्राह्मणोऽवदत् ॥३२४॥
अथासौ वासरैः पूर्णैः **पुण्यसारा**भिधं सुतम् । असूत नूतनं चूतमिव काननमेदिनी ॥३२५॥
कलाचार्यकदम्बेभ्यः स पपौ सकलाः कलाः । मुखेभ्यः सरितां श्रीमानपः[1] पतिरपामिव ॥३२६॥
नन्दिनीं **बन्धुदत्त**स्य नाम्ना **बन्धुमती**मसौ । **धनावहेन** स प्रीतिप्रवाहेण विवाहितः ॥३२७॥
कदाचित् त्रिदिवं याते ताते कृतमृतक्रियः[१] । समुद्धरतरस्कन्धो[२] गृहभारं बभार सः ॥३२८॥
अभाग्यैर्वैभवं तस्य क्षीणं तच्चिरसञ्चितम् । सलिलं पल्वलस्येव चण्डरोचिर्[३]मरीचिभिः ॥३२९॥
अथाऽसौ वैभवभ्रंशविगलत्पौरगौरवः । समारुरोह बोहित्थं **सुस्थित**श्रेष्ठिना समम् ॥३३०॥
लङ्घयन् लहरीः पोतो हरीनिव महाभटः । तीर्त्वा युद्धमिवाम्भोधिं परं प्रारमवातरत् ॥३३१॥
आकारितं पताकाभिरिव संमुखमागतम् । रत्नद्वीपमथ प्राप्तः पोतः पवनवेगतः ॥३३२॥
अन्तर्जलधिमाविश्य दर्शितस्फारगौरवैः । नाङ्गरैस्त्याजितः कामं पोतस्तरलतां तदा ॥३३३॥
उत्तीर्य धैर्यमालम्ब्य पोतात् प्राणभयादिव । अहंपूर्विकया लोकः प्रपेदे द्वीपमेदिनीम् ॥३३४॥
**पुण्यसार**स्तदा **रत्नद्वीपे** रत्नमहीतलम् । नित्यं खनत्यनिर्विण्णः स्वदारिद्र्यमिवोन्नतम् ॥३३५॥
निष्पुण्यः **पुण्यसारो**ऽसावसाराणि कथञ्चन । रत्नान्यवाप नो चिन्तामणिं तु चिरचिन्तितम् ॥३३६॥
अहं समं समेष्यामि नाऽसम्पूर्णमनोरथः । इत्थं स कथयामास गन्तुकामेऽथ सुस्थिते ॥३३७॥
समं तमसमायान्तमपि वित्तप्रदानतः । कृत्वा प्रमुदितं तीर्णः पोतेनाऽर्णःपतिं[2] वणिक् ॥३३८॥
स तथैव ततो रत्नखानिं खनति नित्यशः । शतशो वार्यमाणोऽपि तदधिष्ठातृदैवतैः ॥३३९॥
अपरेद्युः खनन्नेष दारिद्र्यध्वान्तदीपकम् । चिन्तामणिं पुरोऽपश्यद् **दुरापं किं सुनिश्चितैः** ॥३४०॥
असावथ नमस्कृत्य चिन्तामणिमयाचत । स्वर्णलक्षमपश्यच्च तत्तदैव गृहान्तरे ॥३४१॥
स्वर्णं रत्नं च तत्प्राप्य तीरे नीरेशितुः स्थितः । नरस्य भग्नपोतस्य संज्ञापदमुदञ्चयत् ॥३४२॥
[3]नौवित्त**धनदेव**स्य गन्तु**र्भोगपुरं** प्रति । आरुरोह स बोहित्थे नीतस्तत्प्रेषितैर्नरैः ॥३४३॥
पोते तद्विदितं हेम्नामारोपयदयं चयम् । तेषामकथयच्चिन्तामणिं न तु रहस्यवत् ॥३४४॥
एकादाऽसौ त्रियामायां यामयुग्मे समुत्थितः । प्रीतो विभुं[4] विभावर्या विभावर्यं न्यभालयत् ॥३४५॥
एताः श्वेतांशुभासः किं किं ताश्चिन्तामणित्विषः । भान्ति क्लान्तिभिदः सोऽथ चेतस्येतदचिन्तयत् ॥३४६॥
अथ भ्रान्तिभिदे मूढः कटीपटकुटीपुटात् । चकर्ष हर्षसम्पूर्णः पूर्णेन्दुस्पर्द्धिनं मणिम् ॥३४७॥
पश्यन्नसौ निशारत्नं चिन्तारत्नं च तन्मुहुः । युतजातसुतद्वन्द्वनिभालिस्त्रीनिभो बभौ ॥३४८॥
पपात वातकम्पेन प्रमोद इव पिण्डितः । मणिस्तस्य करादब्धौ रविरस्तगिरेरिव ॥३४९॥

---

१. प्रियः KH, L श्रियः A । २. मुद्ध- K, C । ३. बोधि - B, रोचे - KH ।

टि. 1. अपां पतिः - समुद्रः । 2. अर्णःपतिः समुद्रः । 3. नावा वित्तः विख्यातः नाविकः इत्यर्थः । 4. विभावर्याः विभावर्यं विभुः - रात्रेः दीप्तिमान् स्वामी - चन्द्रः, तम् ।

स्थाप्यतां स्थाप्यतां पोतो मुषितो मुषितोऽस्म्यहम् । इत्थं कलकलैः पूर्णं तेने तेनेदमम्बरम् ॥३५०॥
**धनदेव**स्ततः पोतं मरुद्गतिमतिष्ठिपत् । कुतस्त्वमाकुलतमस्तमपृच्छदतुच्छधीः ॥३५१॥
प्रभाजितनभोरत्नं चिन्तारत्नं ममाऽपतत् । तदुद्धारय पाथोधेर्दारिद्र्यादप्यगाधतः ॥३५२॥
जीवितव्यं मयि स्वस्मिन् कीर्त्तिरारोप्यतां त्वया । हर्षात् कर्षय रत्नं तमित्युवाच शुचैव सः ॥३५३॥
यत्र लोकचमत्कारि भवताऽकारि शब्दितम् । तदत्याजि पयो दूरे [1]वायुपूरेद्धपोततः ॥३५४॥
उत्तार्यं तन्मनः खेदान्नेदानीं लभ्यते मणिः । नौवित्तेनेति नीतिज्ञो बोधितो मौनमाप सः ॥३५५॥
तद्वदत्र भवाम्भोधौ रत्नं मानुषजन्म यत् । **सुधर्मस्वामि**पोतेऽपि लब्धे किं हारयामि तत् ॥३५६॥
**पद्मसेना**ऽथ निश्छद्मसेना कन्दर्प्पभूभुजः । श्री**जम्बूस्वामिनं** प्राह व्रतोत्साहधुरन्धरम् ॥३५७॥
मा भूदुभयथा भ्रष्टो [१]भोगिनीव भवानपि । तथा शृणु कथामेतामस्मिन्नेव पुरे पुरा ॥३५८॥
धनेन धनदाकारः स्वर्णकारशिरोमणिः । **देवदत्त** इति ख्यातिपात्रं धात्रीतलेऽभवत् ॥३५९॥
तस्याभूद् **देवदिन्नाख्यः** सूनुर्विष्णोरिव स्मरः । कामभूमीपतेर्दुर्गं **दुर्गिला**ऽस्य प्रियाऽभवत् ॥३६०॥
कदाऽपि सा स्वयं नद्यास्तीरे नीरेच्छया ययौ । वक्षोजतुल्यताप्रीत्या कुम्भौ मूर्द्धनि बिभ्रती ॥३६१॥
घटौ तटे तटिन्याः सा मुक्त्वा मज्जनकाङ्क्षया । विवेश पयसः क्रोडं निर्व्रीडक्रीडया रयात् ॥३६२॥
सहेलं तत्र [२]खेलन्तीं [३]महिलां ग्रहिलां मदात् । व्यलोकयत् युवा कोऽपि कन्दर्पज्वरजर्जरः ॥३६३॥
तरुणस्तां प्रति प्राह स साहसनिधिस्ततः । तव पृच्छन्ति सुस्नातं तरवस्तन्वि ! नन्विमे ॥३६४॥
तयाऽपि तन्मनःसभ्यमभ्यधायि तदा मुदा । एभ्यः स्वस्ति तरुभ्योऽस्तु स्पृहा पूर्णाऽस्तु पृच्छते ॥३६५॥
मदनस्तदनेनामुं वचसा जितपत्रिणा । जघान हृदये तूर्णं घूर्णमानशिरोऽम्बुजम् ॥३६६॥
तत् तद्भाषितपीयूषैः सिक्तेऽस्य वपुषि क्षणात् । श्यामो रराज रोमाञ्चः शृङ्गाराङ्कुरकोटिवत् ॥३६७॥
बालान् फलार्थिनस्तीरे सहकारतरोस्तले । कृत्वा फलभरैः प्रीतानपृच्छत् केयमित्यसौ ॥३६८॥
नाम्ना धाम्ना च तां मत्वा शिशुभ्यः स वहन् मुदम् । कृतार्थप्रायमात्मानं मेने मन्मथसन्निभः ॥३६९॥
स्नात्वा साऽपि सरित्तीरे स्थित्वा साकं सखीजनैः । जलक्लिन्नाङ्गसंलग्नस्वप्रभानिह्नुतांशुका ॥३७०॥
घ्नन्ती कटाक्षनाराचैरमुं भ्रूचापचापलात् । चचालाऽथ मनःस्मेरमदना सदनाय सा ॥३७१॥ युग्मम् ॥
चक्षुःपथमथ त्यक्त्वा गतायां तत्र तापवान् । तदङ्गसङ्गसुभगे तत्राऽम्भसि ममज्ज सः ॥३७२॥
उपचारैस्ततः स्फारैः कामी कामपि तापसीम् । अयमाराधयामास कुलटाकुलदेवताम् ॥३७३॥
तापसी [2]तापसीर्णाङ्गमनङ्गाहतमाह तम् । प्रीता क्रीताऽस्मि दानेन किङ्करेव करोमि किम् ॥३७४॥
युवाऽप्युवाच तां मातर्**देवदिन्न**स्य वल्लभाम् । **देवदत्त**स्नुषां नाम्ना **दुर्गिलां** मम मेलय ॥३७५॥
प्रार्थिता कुर्वती केलिलीलां कल्लोलिनीजले । मम भ्रूभङ्गभङ्गीभिः सङ्गमङ्गीचकार सा ॥३७६॥

---

१. भोगिनीजम्बुको यथा – A, B, L । २. क्रीडन्ती – D, K । ३. दुर्गिलां – A, H ।

टि. 1. वायूनां पूरेण इद्धः प्रेरितः पोतात् तद् पयः दूरे अत्याजि इति अन्वयः । 2. तापेन सीर्णं पीडितं अङ्गं यस्य स-तापसीर्णाङ्गम् ।

तदूरीकृत्य सा भैक्षच्छद्मना सद्मगामिनी । जगाद **दुर्गिलां** व्यग्रां स्थालीक्षालनकर्मणा ॥३७७॥
तया कुपितया तादृग्वदन्ती तापसी ततः । निर्भर्त्स्य पृष्ठे हस्तेन हता स्थालीमषीजुषा ॥३७८॥
इत्यवज्ञावशाज्जातपश्चात्ता[१]पाऽथ तापसी । तदेतत् कथयामास तस्याऽऽवासमुपेयुषी ॥३७९॥
वीक्ष्य दक्षः स तं हस्तं श्यामं पञ्चाङ्गुलीवृतम् । स्वं कृष्णपञ्चमीरात्रौ निमन्त्रितममन्यत ॥३८०॥
स [1]पञ्चेषुप्रपञ्चेषु विपश्चित् पञ्चमीतिथौ । तपस्विनीं पुनः प्रैषीद् भक्तिभिर्**दुर्गिलां** प्रति ॥३८१॥
अविलक्षा च सा भिक्षादम्भसंरम्भसंवृता । **देवदत्त**गृहं गत्वा पुनस्तामाह साहसात् ॥३८२॥
उच्चैः प्रपञ्चिताऽऽटोपा सकोपा साऽपि तापसीम् । निर्भर्त्स्य गृहपाश्चात्यद्वारेण निरसारयत् ॥३८३॥
व्रीडापीडाभरा[2]भुग्नकन्धराबन्धबन्धुरा । अथाकथयदस्मै सा रुदती [3]सुदतीकथाम् ॥३८४॥
तदुक्तपश्चिमद्वारनिष्कासकथया ततः । अयमाहूतमात्मानं मेने पश्चिमवर्त्मना ॥३८५॥
निष्पन्नमात्मनः कार्यं मत्वा स प्राह तापसीम् । वाच्या क्वापि न पापिष्ठा मातः! साऽतःपरं त्वया ॥३८६॥
इमां च शान्तसन्तापां दत्तप्रस्तुत[२]वस्तुतः । चकार कारणं [३]सिद्धेः स्मरस्मरणदुर्म्मदः ॥३८७॥
अथ मन्मथदीपेन प्रकाशितपथो निशि । स्मरार्त्तो **देवदत्त**स्य तस्य धाम जगाम सः ॥३८८॥
पाश्चात्यवर्त्मना कामविवशः प्रविशन्नसौ । ददर्श **दुर्गिला**मग्रे साऽपि तं स्निग्धया दृशा ॥३८९॥
समाप्य गृहकृत्यानि पत्यौ निद्रावशंवदे । ययावुपपतिं हृष्टा सा गृहोपवनावनौ ॥३९०॥
अनारत[४]रतश्रान्ता सह तेन हताशया । सा स्वापमाप तत्रैव समं भर्त्तेव निर्भरम् ॥३९१॥
तदानीं कायचिन्तार्थमुत्थायोपवनं गतः । **देवदत्तः** स्नुषां तत्र तदवस्थां व्यलोकयत् ॥३९२॥
विपश्चिन्निश्चयायाऽथ सुतवासगृहं गतः । एकाकिनं सुतं वीक्ष्य प्राप्तस्तत्र वने पुनः ॥३९३॥
रुषा स्नुषापदाम्भोजादभिज्ञानकृते कृती । मन्दं मन्दं स्वहस्तेन मञ्जीरमुदतीतरत् ॥३९४॥
क्रमादुत्तार्यमाणे सा नूपुरे जातजागरा । गुरुमालोकयामास यान्तं कलितनूपुरम् ॥३९५॥
ससम्भ्रममथोत्थाप्य कृपणा प्राणवल्लभम् । नूपुरोत्तारवृत्तान्तं सनिर्वेदं न्यवेदयत् ॥३९६॥
क्रियमाणे प्रिय ! प्रातर्दिव्ये साहायकं त्वया । किञ्चिन्मम विधातव्यं सेत्युक्त्वा विससर्ज तम् ॥३९७॥
वहन्नत्यद्भुतं भीतिभारं सोऽपि युवा जवात् । पथा यथागतेनाऽधोवदनः सदनं ययौ ॥३९८॥
**दुर्गिला** तु समालिङ्ग्य निद्रारसवशीकृतम् । पतिं जागरयामास मांसलस्नेहनाटिका ॥३९९॥
महेलया तया सार्द्धं वर्द्धितोद्दामहेलया । तदा विद्राणनिद्रोऽयं चिक्रीड व्रीडमुक्तया ॥४००॥
तत्राऽथोपवने नीत्वा तं रतिश्रान्तिशान्तये । निद्रामुद्रितनेत्राब्जं व्रीडितेव जगाद सा ॥४०१॥
पादादुत्तार्य मञ्जीरं मम पश्य पिता तव । अयं प्रयाति निर्लज्जः कुलाचारः क एष वः ॥४०२॥

---

१. पा च – D, K । २. वस्तुनः – A, वस्तुना – L । ३. सिद्धि – D, सिद्धौ – A, H, B । ४. रतश्चासौ – A ।

टि. 1. कामस्य ये प्रपञ्चाः तेषु विपश्चित् निपुणः । 2. ०आभुग्न ०वक्रीकृतः । 3. सुष्ठु दन्ताः यस्याः सा सुदती, तस्याः कथा सुदतीकथा, ताम् ।

सहोपपतिना सुप्ता गुप्ताऽसौ विपिनान्तरे । ध्यात्वेति त्वत्पिता मन्ये चकर्ष मम नूपुरम् ॥४०३॥
तत्साक्षादेव भाषस्व पितरं हितरञ्जकः । कलङ्कं मत्कुले प्रातरयमानेष्यते[१]ऽन्यथा ॥४०४॥
निशम्येति गिरं देवदिन्नः कान्तामवोचत । शीलैकसज्जे ! लज्जेऽहमिदानीमेव तं ब्रुवन् ॥४०५॥
वक्ष्ये प्रातस्त्वितिस्पष्टसन्धाकर्त्तरि भर्त्तरि । असौ सुष्वाप निस्तापा पटुः कपटनाटके ॥४०६॥
देवदिन्नोऽथ कोपेन पावकेनेव संज्वलन् । प्रिययोत्थापितः प्रातः प्रयातः पितरं प्रति ॥४०७॥
मयैव सह सुप्ताया व[२]धूट्या नूपुरं हृतम् । भ्रान्तेन भवता यत्तदर्प्यतामित्यवोचत ॥४०८॥ युग्मम् ॥
सुतं तमितिवक्तारमाह स्वर्णकृदग्रणीः । त्वां वीक्ष्य सुप्तमत्रैतत् पांशुलाया[1] हृतं मया ॥४०९॥
अथेति श्वशुरेणोक्ते दुर्गिला साऽऽह साहसात् । भुज्यते प्रविधाय स्वं निष्कलङ्कं कुलं किल ॥४१०॥
अथो सुवर्णकारेण कुटुम्बं मेलितं निजम् । स्वजना **दुर्गिला**याश्च समाहूताः समन्ततः ॥४११॥
असत्यं हन्ति पादाधश्चारिणं यः क्षणाज्जनम् । यक्षस्य तस्य ते चैत्ये जग्मुर्दुर्गिलया समम् ॥४१२॥
स्नात्वा पवित्रगात्रा सा यावच्चैत्याय गच्छति । तावद् ग्रहिलतादम्भाज्जारेणाऽऽलिङ्गिताऽग्रतः ॥४१३॥
धिग् धिग्मा मा स्पृश त्वं मां वदन्तीत्यथ **दुर्गिला** । तस्माद्विमोचिता पार्श्ववर्तिभिः स्नपिता पुनः ॥४१४॥
अथ चैत्यान्तरे गत्वा यक्षं संपूज्य च स्वयम् । सा भालकुड्मलीभूतपाणिपद्मा व्यजिज्ञपत् ॥४१५॥
मुक्त्वा कर[३]ग्रहीतारं ग्रहिलं च नरो यदि । कोऽपि लग्नो मदङ्गे तद्देव ! कार्याऽस्मि भस्मसात् ॥४१६॥
इत्यूचुषी तदा यक्षे संशयारूढचेतसि । अधश्चरणयोरेषा निःससार धियांनिधिः ॥४१७॥
शुद्धा शुद्धेति वाचस्तत्तालास्फालनगर्भिताः । उल्लासिता जनशतै रुरुधुर्गगनाङ्गणम् ॥४१८॥
स्वयं [४]दृष्टान्यपार्श्वस्थस्नुषासंशुद्धिचिन्तया । तदादि **देवदत्त**स्य निद्रा नाऽऽयादहर्निशम् ॥४१९॥
दिनैः कतिपयैर्मत्वा विनिद्रं तं पुराधिपः । निजस्यान्तःपुरस्यान्तश्चकार किल यामिकम् ॥४२०॥
सुप्तो जागर्त्ति वा सोऽयमित्युत्थाय मुहुर्मुहुः । राज्ञीमेकां स पश्यन्तीं ज्ञात्वा सुप्तोऽथ कैतवात् ॥४२१॥
[५]सत्यसुप्तममुं ज्ञात्वा राज्ञी जालकनिर्गता । अधस्तात् हस्तिना निन्ये भूतलं तलवर्त्तिना ॥४२२॥
अथ हस्तिपकेनाऽसौ कुपितेन चिरागता[६] । हस्तिहिञ्जीरघातेन निजघ्ने जघने[2] घनम् ॥४२३॥
जाग्रद्यामिकवृत्तान्तकथनेन प्रसेदुषा । तेन सा ध्वस्तकोपेन समं चिक्रीड निर्भरम् ॥४२४॥
तूर्णं गवाक्षमारुह्य स्वर्णकारोऽपि कौतुकी । सविस्मयस्तयोस्तानि चरितानि व्यलोकयत् ॥४२५॥
तं हस्तिपकमालिङ्ग्य प्रत्यूषसमयेऽथ सा । राज्ञी करिकरेणैव प्रस्थिता प्रति जालकम् ॥४२६॥
स्वस्थाने स्वर्णकारोऽपि समागत्याऽऽशु सुप्तवान् । वासवेश्मनि सुष्वाप साऽपि क्षितिपवल्लभा ॥४२७॥
हृदि दध्यावथ स्वर्णकारस्तच्चरितस्मितः । के वयं यन्नरेन्द्राणामप्यसौ विप्लवप्लवः ॥४२८॥
इति निर्वृतिमासाद्य सद्यो निद्रां प्रियामिव । भेजे चिरतरप्राप्तिगाढाश्लेषपरामसौ ॥४२९॥

---

१. न्यदा - KH । २. वध्वाः - KH । ३. गृहीतारं - K, D, B, KH, L । ४. दृष्ट्वा - C । ५. सत्यं - H, B । ६. चिरागतां - K ।
टि. 1. पांशुला-व्यभिचारिणी । 2. जघनम् - नितम्बः ।

अथाऽकथ्यत भूपाय सुप्तः परिजनैरयम् । सुघोरघर्घरारावजितशूकरयूथपः ॥४३०॥
निद्रा तथा विनिद्रेण तेनाऽद्य यदवाप्यत[१] । तन्मन्ये कारणं किञ्चिदुत्थाप्यस्तदसौ न हि ॥४३१॥
इत्यादिष्टपरीवारस्तं सप्तमदिनोत्थितम् । रहस्याकार्य पप्रच्छ क्ष्मापः स्वापस्य कारणम् ॥४३२॥
समग्रं चरितं तस्मिन्निवेद्याऽथ गते सति । राजा समजनि क्रोध-त्रपासंतप्तमानसः ॥४३३॥
अथ कृत्वा किलिञ्जेन[1] कुञ्जरं राजकुञ्जरः । स्थित्वा रहसि राज्ञीः स्वाः समाहूयेदमब्रवीत् ॥४३४॥
दुःस्वप्नोऽद्य मया दृष्टस्तत्सत्यीकृत्य हन्यताम् । पर्यस्तवसनं हस्तिन्यस्मिन्नारुह्यतां ततः ॥४३५॥
इत्यादिष्टा नरेन्द्रेण सर्वाः शुद्धान्तयोषितः । उत्तेरुर्द्विपमारुह्य पूर्वाद्रिमिव तारकाः ॥४३६॥
सा तु दुष्टा बिभेमीति भाषमाणा महीभुजा । हताऽभिमन्त्रितेनेव पद्मेन पतिता भुवि ॥४३७॥
अथास्या जघनं राजा शृङ्खलाकिणकश्मलम् । ददर्श शैवलालीढजाह्नवीपुलिनोपमम् ॥४३८॥
अथाऽऽह तां हतां राजा कोपाटोपारुणेक्षणः । अन्यासामपि भीरूणां भीरुतां प्रतिपादयन् ॥४३९॥
यासि द्विपकराज्जारं, बिभेषि तु कटद्विपात् । मोदसे शृङ्खलाघातैः पद्मघातेन मूर्च्छसि ॥४४०॥
इति ब्रुवन् भ्रुवं भाले समारोप्याऽतिकोपनः । धृत्वा केशेषु लोकेशः कृष्टवान् पिष्टवांश्च ताम् ॥४४१॥
अथ हस्तिपकं हस्तिराजं हस्तिगतिं च ताम् । हन्तुं नूतनमारेण नृपः किञ्चिदचिन्तयत् ॥४४२॥
ततः क्षितिपतिः साकं साकम्पैः स्वजनैर्भयात् । वैभारपर्वतं यातो निन्ये तत्र च तत्त्रयम् ॥४४३॥
अथादिशन्नृपो हस्तिपकं साकं स्त्रियाऽनया । आरुह्यारोपय रयात् द्विपं मूर्ध्नि गिरेरिति ॥४४४॥
सममृत्युसमस्थानगतिहर्षादुभाविभम् । अधिरूढावथाम्भोदं रोहिणीशशिनाविव ॥४४५॥
हस्ती हस्तिपकेनाऽथ प्रेरितो गिरिमूर्धनि । आरुरोह पयोवाह इव मन्देन वायुना ॥४४६॥
अथारूढं गिरेर्मूर्ध्नि मिण्ठमाज्ञापयन्नृपः । पातयैनं द्विपं शैलात् कैलासगिरिगौरवात् ॥४४७॥
इत्युक्ते क्षितिनाथेन निषादिकृतसंज्ञया । एकोऽम्बरे निरालम्बश्चरणः करिणा कृतः ॥४४८॥
पातयेति नृपादेशान्मिण्ठनुन्नः पुनः करी । पदं द्वितीयमुद्दध्रे समारोढुमिवाम्बरम् ॥४४९॥
हाहाकारमथाऽऽधाय पूर्लोकः शोकपूरितः । ईदृक्षं रक्ष रक्षेभमिति भूपं व्यजिज्ञपत् ॥४५०॥
रोषदोषखनिः क्ष्मापस्तमपेक्ष्य[२] पुरीजनम् । उवाच पातयेत्युच्चैस्तदा हस्तिपकं पुनः ॥४५१॥
तृतीयं मेण्ठ[३]नुन्नोऽथ पादमुत्पाटयन् करी । गिरावेकपदस्तस्थौ तपस्यन्निव मुक्तये ॥४५२॥
लोकैरथ भृशं हाहाकारव्याहारवीचिभिः । क्षपितः क्षितिपालस्य कोपाग्निः करिणं प्रति ॥४५३॥
अथावनीधवेनाऽयं निषादी भाषितस्तदा । कथञ्चिदुत्तरत्येष करी जीवन् गिरेरिति ॥४५४॥
आवां मुञ्चसि जीवन्तौ यद्युत्तरति तत्करी । इति विज्ञापयामास मेण्ठः पृथ्वीपतिं प्रति ॥४५५॥
अभयं ते वयं दद्मः पद्यासद्य द्विपं मम । उत्तारय रयादेतत्तदादिशदमुं नृपः ॥४५६॥

---

१. वाप्यतः A। वाप्युत - C। २. तमुपेक्ष्य - C। ३. मेठ - A।

टि. 1. किलिञ्जः - कटः, तेन।

इत्यादेशान्नरेशस्य मुदितेन निषादिना । उत्तारितः करी शैलादात्मा च शमनाननात्[1] ॥४५७॥
अथ चक्षुःपथं भर्तुर्विहाय सहितस्तया । चचाल सोऽयमुत्तालगतिर्देशान्तरं प्रति ॥४५८॥
प्रान्ते ग्रामस्य कस्याऽपि निशि देवकुलान्तरे । तौ लीनौ नलिनक्रोडे तस्थतुर्भ्रमराविव ॥४५९॥
समयेऽथ निशीथस्य ग्रामात्तत्कोऽपि[१] तस्करः । सलोप्त्रः प्राविशच्चैत्यं तलारक्षैरनुद्रुतः[२] ॥४६०॥
उदिते विदितो भानौ ग्राह्योऽयमिति निश्चयात् । ऊर्ध्वास्ते पत्तयश्चैत्ये दध्रुर्नीरन्ध्रवप्रताम् ॥४६१॥
सोऽपि चौरश्चरन्नन्तश्चैत्यमग्रस्फुरत्करः । लुठितस्याथ मिण्ठस्य शरीरं पाणिनाऽस्पृशत् ॥४६२॥
निद्राविद्राणचैतन्ये तस्मिन्नथ निषादिनि । चौरः सञ्चारयाञ्चक्रे करं कमलकोमलम् ॥४६३॥
कथञ्चिदप्यथो राज्ञीकुचभूधरमूर्द्धनि । प्राणरक्षणदुर्गेऽस्य तस्करस्य करो ययौ ॥४६४॥
तत्कोमलकरस्पर्शमनुभूय नृपाङ्गना । मनोभवार्त्ता तं वार्त्तामपृच्छत् को भवानिति ॥४६५॥
तेनोक्तमस्मि चौरोऽहमधिरोहन्मृतिर्यतः । एतच्चैत्यं चतुर्दिक्षु मत्कृते वेष्टितं भटैः ॥४६६॥
भयवन्तं ब्रुवन्तं तमित्याह क्षितिपाङ्गना । मा भैषीर्भवतः प्राणरक्षा दक्ष ! करिष्यते ॥४६७॥
हृत्वा त्वया यदानीतं तदस्योच्छीर्षके त्यज । तदेहि दूरतो यावस्तावदावां स्मितस्मरौ ॥४६८॥
निशम्य सम्यगायातं मृत्युशान्तिमहौषधम् । एतस्या वचनं चौरश्चकार स यथोचितम् ॥४६९॥
क्षणेन सापि गौराङ्गी चौराङ्गीकरणोद्यता । हस्त्यारोहममुञ्चत्तं **चित्तं को वेत्ति योषिताम्** ॥४७०॥
अथोदिते द्युतिपतौ ध्वान्तद्रुमदवानले । विविशुर्विवशाः कोपाच्चैत्यं चौरार्थिनो भटाः ॥४७१॥
लोप्त्रवन्तं तदारक्षाः क्रोधाद्दध्रुर्निषादिनम् । तन्वन्तस्तुमुलारावानुल्ललन्तस्तदा[३] मुदा ॥४७२॥
सेयं मुग्धा मम वधूश्चौरेण जगृहेऽमुना । नाऽहं चौर इति[४] जल्पन् स ततश्चकृषे भटैः ॥४७३॥
समं मलिम्लुचेनाऽथ नाथभूतेन पांशुला । चचाल चैत्यतस्तस्मात् कलङ्कैकनिकेतनम् ॥४७४॥
प्रस्थिताभ्यामथैताभ्यां[५] ददृशे पुरतः[६] सरित् । अम्भःकुम्भिकरोदञ्चदम्बुचुम्बितटद्रुमा ॥४७५॥
चौरोऽथ चिन्तयाञ्चक्रे न या निजविभोरभूत् । भविष्यति कुतः सा मे कामेषुविवशीकृता ॥४७६॥
अस्याः सर्वस्वमादाय मायया तद् व्रजाम्यहम् । मनोरथं मदीयं हि नदीयं पूरयिष्यति ॥४७७॥
इति निश्चित्य तामूचे चौरश्चपललोचनाम् । दुस्तरा सिन्धुरेषास्ति गतिनिर्ज्जितसिन्धुरे ! ॥४७८॥
एककालं न भवन्तीं वसनाभरणादि च । उत्तारयितुमीशोऽहं तत्पूर्वं सर्वमर्प्पय ॥४७९॥
ततस्तीरे विमुच्यैतत् सर्वं सर्वाङ्गसुन्दरि ! । भवन्तीं पुनरानेतुमहमेष्यामि सत्वरम् ॥४८०॥
साऽपि तद्वचसा प्रीता वसनाभरणादिकम् । तस्यार्पयित्वा चौरस्य शरस्तम्बान्तरे स्थिता ॥४८१॥
स्वभावनिस्त्रपां दौष्ट्यनिस्त्रपस्तां विलोकयन् । दायादवत्तदादाय स विवेशाऽऽपगापयः ॥४८२॥

---

१. ग्रामांतः कोपि - C । २. रलंद्रुतः KH रनुद्रुतं - A रनुद्धुतः D । ३. वमु - A, K । ४. इदं K, KH । ५. अन्विता.... C । ६. परितः A, B ।

टि. 1. शमनः यमः तस्य आननं मुखं तस्मात् ।

स्वपतित्यागिनीं न त्वां स्वप्नेऽपि स्पृहयाम्यहम् । तामित्युक्त्वा नदीं तीर्त्वा तस्करः स तिरोदधे ॥४८३॥
साऽपि किं करवाणीतिवाणिनी मूढमानसा । एकं जम्बुकमद्राक्षीन्मांसखण्डजुषं मुखे ॥४८४॥
जिघृक्षुः स तिमिं सिन्धो[1]रम्बु[१]कच्छेऽथ जम्बुकः । मांसखण्डं पुरो मुक्त्वाऽधावद्यावदयं रयात् ॥४८५॥
तावदम्बुनि मग्नेऽस्मिन्मत्स्ये विचलितस्तदा । चक्रन्द जम्बुको दुःखी शकुन्या पिशिते हृते ॥४८६॥ युग्मम् ॥
तं तथास्थितमालोक्य गतदुःखेव साऽहसत् । **प्रौढान्यपि हि दुःखानि विस्मार्यन्तेऽतिकौतुकैः** ॥४८७॥
हसन्तीमसतीमेतां व्यक्तमूचे स जम्बुकः । मां किं मांस-तिमिभ्रष्टं नग्ने ! हससि निस्त्रपे ! ॥४८८॥
भ्रष्टां [२]जाराच्च चौराच्च किं नात्मानं हसस्यहो । **मूढो ह्यद्रौ ज्वलत्पश्येन्न पुनः पादयोरधः** ॥४८९॥
जल्पाके जम्बुकेऽमुष्मिन्निति वृत्तं नृभाषया । चिन्तयामास सा यावदाविष्कृतचमत्कृतिः ॥४९०॥
स दिव्यपुरुषो भूत्वा भूरिभूषणभूषितः । जगाद [३]सादरं वाचं भूयस्तां तावदुच्चकैः ॥४९१॥ युग्मम् ॥
निजं जानीहि मां पूर्णहिमांशुमुखि ! कामुकम् । अहं स हंसगमने ! शिखारत्नं निषादिनाम् ॥४९२॥
त्वामादाय गते चौरे चौरबुद्ध्याऽथ रक्षकैः । अहं दुःखलतामूलशूलायामधिरोपितः ॥४९३॥
**जिनदासं** तदासन्नचरं वीक्ष्य वणिग्वरम् । आर्त्तोऽयाचं पयः पातुं पयोदमिव चातकः ॥४९४॥
नमोऽर्हद्भ्य इति न्यस्य मन्त्रं मयि तदाऽऽतुरे । पानीयाय जगामाऽयमन्तर्ग्रामं वणिग्वरः ॥४९५॥
अथ शूलास्थितस्तेन मन्त्रेण मुखरस्तदा । जातोऽहं केतकीपत्रप्राग्रजाग्रद्द्विरेफवत् ॥४९६॥
आरक्षाऽनुज्ञया श्रेष्ठी पयः पाययितुं मया । दृष्टो हृष्टेन मातेव वेगा[४]दागामुकस्तदा ॥४९७॥
अपीतेनाऽपि तृप्तोऽहं पयसा दृक्पथस्पृशा । स्मरन्नतितरां मन्त्रं प्राणैर्मुक्तोऽस्मि तत्क्षणात् ॥४९८॥
तन्मन्त्रध्यानमाहात्म्यात् भूत्वाऽहं ज्ञानवान् सुरः । तव मोहव्यपोहाय व्यधां [2]फेरण्डताण्डवम् ॥४९९॥
जैनं भज ततो धर्ममम् त्वमपि भामिनि ! । नैव स्वर्गापवर्गश्रीर्यत्प्रसादाद्दुरासदा ॥५००॥
चन्द्रचारूणि चीराणि परिधाप्य प्रबोध्य ताम् । अथाऽयमानयत् क्वापि पत्तने व्रतिनीमठे ॥५०१॥
इत्यसौ बोधिता तेन रविणेव सरोजिनी । दधौ हृदि तदा साधुधर्मं हंसमिवोज्ज्वलम् ॥५०२॥
तत् त्वं सा कम्बुकण्ठीव स जम्बुक इवापि च । मा स्म भूरुभयभ्रष्टो मुक्त्यर्थं मुक्तवैभवः ॥५०३॥
श्रीमान् **जम्बू**रथोचे तां स्त्रीचेतांसि प्रबोधयन् । **विद्युन्मालीव** नैवाहं मोहे मज्जामि भामिनि ! ॥५०४॥
अस्ति संततसञ्चारिताराविश्रामभूमिका । नभ[3]स्तम्बेरमस्तम्भो **वैताढ्य** इति भूधरः ॥५०५॥
तस्याऽवनिस्तनस्येव मूर्ध्नि काश्मीरपत्रवत् । पुरमस्ति मणिस्तोममयं **गगनवल्लभम्** ॥५०६॥
तत्र विद्याधरौ **विद्युन्मालि-मेघरथाभिधौ** । **वैताढ्य**श्रीमुखस्यास्य नगरस्य दृशाविव ॥५०७॥
अथ साधयितुं विद्यां मातङ्गीनामविश्रुताम् । मन्त्रयामासतुर्विद्याधरौ प्रीतिधुरन्धुरौ ॥५०८॥
चण्डालकन्यामुद्वाह्य तद्गृहे विहितास्पदैः । विद्या वर्षाऽवधिब्रह्मचर्यदेषा हि साध्यते ॥५०९॥

---

१. कस्थोऽथ - A । २. राज्याच्च - C । ३. सोदरो - A, सादरो - C । ४. दागान्मुदा... L ।

टि. 1. अम्बुकच्छः-पुलिनम्, जलप्रदेशो वा, तस्मिन् । 2. फेरण्डः - जम्बुकः । 3. स्तम्बेरमः-हस्ती ।

भूखण्ड[१]मण्डने गत्वा साधयावः क्वचित्पुरे । देवतामिति निश्चित्य तौ **वसन्तपुरं** गतौ ॥५१०॥
स्थित्वा चण्डालवेषेण तत्र चण्डालपाटके । एतौ चण्डालमुख्यानां चक्रतुः सेवनक्रियाम् ॥५११॥
ततस्तैः सेवया प्रीतैरेतौ सम्भाषितौ मिथः । कस्याऽङ्गजौ ? कुतः प्राप्तौ ? किमारम्भौ युवामिति ॥५१२॥
तावूचतुरिति म्लेच्छराजपुत्राविहागतौ । साकेतपुरवास्तव्यावावां पित्रा निराकृतौ ॥५१३॥
तदावाभ्यामिहागत्य यूयमेव निषेविताः । **विना सत्प्रभुसेवाभिः क्व पूर्यन्ते मनोरथाः** ॥५१४॥
इति श्रुत्वा तयोर्वाचं तदा चण्डालशेखराः । ते बभूवुर्मुदामोदमन्दिरं मेदुरप्रभाः ॥५१५॥
तदानन्दमयैरेभिस्तावेतौ परिणायितौ । [1]स्वाजन्याय स्वपुत्रीभ्यां लताभ्यामिव भूरुहौ ॥५१६॥
ब्रह्मचर्येण रोचिष्णुरथ **मेघरथः** कृती । वसंस्तत्रैव वर्षेण तां विद्यां वशमानयत् ॥५१७॥
**विद्युन्माली** तु चण्डालीं तामकामयताऽधमः । साऽपि गर्भं दधौ तस्य स्थिरीकरणकार्मणम् ॥५१८॥
असिद्धमथ सिद्धस्तमाह **मेघरथस्**तदा । किमकारि त्वया मूढ ! मग्नोऽसि म्लेच्छताम्बुधौ ॥५१९॥
इत्याकर्ण्य त्रपामग्नो **विद्युन्माली** जगाद तम् । एकवारं सदाचार ! क्षम्यतां विप्लवो मम ॥५२०॥
इदानीं साधयिष्यामि विद्यां निर्जितमन्मथः । वाच्यः प्रीतिप्रकर्षेण वर्षेणाऽहं त्वया पुनः ॥५२१॥
एवमस्तु गदित्वेति स्फुरद्विद्या[२]पदच्छदः । धीमान् पक्षीव वृक्षाग्रमारुरोह नभस्तलम् ॥५२२॥
[2]समान्ते स समायातः [3]समायातं पुनः कृती । बन्धुप्रेमगुणाऽऽकृष्टो म्लेच्छं **मेघरथो**ऽग्रजः ॥५२३॥
अग्रे तावदसौ **विद्युन्माली** बालं करे धरन् । पुनर्गर्भितचण्डालीशाली तेन विलोकितः ॥५२४॥
सोऽपि मेघरथं वीक्ष्य त्रपयाऽभूदधोमुखः । रसातलप्रवेशाय द्रष्टुं रन्ध्रमिवावनौ ॥५२५॥
उक्तो **मेघरथेना**ऽथ बन्धो ! बन्धोऽयमेतया । कुतः शटितया रज्ज्वा गजस्येवाऽभवत् तव ॥५२६॥
अथाधोमुख एवेदं **विद्युन्माली** जगाद तम् । बन्धो ! विद्याऽमुनाऽब्देन साधयिष्याम्यहं पुनः ॥५२७॥
निशम्येति गतः सोऽपि यावद्वर्षत्रयं पुनः । एहिरेयाहिरां चक्रे मग्नो मोहे तु सोऽधमः ॥५२८॥
दुःखदावाग्निदाहाय नाऽहं मोहाटवीतरुः । तन्वि ! तद्भविष्यामि स्त्रीलताजालवेष्टितः ॥५२९॥
गिरं **कनकसेना**ऽथ सुधानाथभवामिव । अभ्यधाद् **धारिणी**पुत्रं प्रति प्रतिकृती रतेः ॥५३०॥
शास्त्रव्यापारपारीणो धुरीणो बुद्धिशालिनाम् । एष्यस्यनुशयं नाथ ! त्वं **शङ्खधमको** यथा ॥५३१॥
**शालिग्राम** इति ग्रामः ख्यातः क्ष्मातलभूषणम् । लोलश्रीकेलिशैलाभकणकूटोऽस्ति विस्तृतः ॥५३२॥
कौटुम्बकस्य कस्याऽपि तत्रैकः क्षेत्ररक्षकः । प्रेष्योऽजनि ध्वनत्कम्बुनादत्रासितभक्षकः ॥५३३॥
एकदायमुपादाय पाणौ शङ्खं निशामुखे । दूरे जगाम ग्रामस्य क्षेत्ररक्षणदक्षिणः ॥५३४॥
निशीथसमये हृत्वा कुतोऽप्यतिघनं धनम् । तत्क्षेत्रस्य समीपेन चौराः केचित्तदाऽव्रजन् ॥५३५॥

---

१. मंडले - KH । २. पदेच्छया - A परिच्छदः C पदःच्छदः KH ।

टि. 1. स्वजनस्य भावः स्वाजन्यः, तस्मै । 2. समा - वर्षः तस्य अन्तः पर्यवसानः, तस्मिन् । 3. म्लेच्छानां मध्ये समायातं एकीभूतं इत्यर्थः ।

तेन तत्रान्तरे क्षेत्रान्तरे मालाग्रवर्त्तिना । कम्बुरम्बुधरध्वानवाद्यवाद्यत हेलया ॥५३६॥
तदाकर्ण्य तदा कम्बुशब्दितं ते मलिम्लुचाः । त्यक्त्वाऽऽशु गोधनं नेशुः प्राप्तारक्षकशङ्कया ॥५३७॥
ततस्य गोधनप्राप्तिपुण्याकर्षणमन्त्रताम् । ततान कम्बुनिःस्वानगौरवं चौरवञ्चकम् ॥५३८॥
विभातायां विभावर्यां चर्यां कुर्वन् स गोधनम् । वीक्ष्य निःशेषमादाय दातुं ग्रामाय चाऽगमत् ॥५३९॥
अथ ग्रामस्य कामं स पूरयन् भूरिगोधनैः । दत्तैस्तथा यथा दुस्थो[१] ययौ धनदयक्षताम् ॥५४०॥
अन्यदाऽपि निशीथिन्या निशीथे गोधनाशया । क्षेत्रमालाधिरूढोऽसौ शङ्खं धमति धैर्यवान् ॥५४१॥
त एव तस्करास्तत्र निशीथेऽन्येद्युराययुः । हृताद्भुतधना धैर्यजितकीनाशकिङ्कराः ॥५४२॥
दध्मौ शङ्खं क्षणेऽमुष्मिन् सोऽपि क्षेत्रस्य रक्षकः । आह्वातुमिव दुर्बुद्धिः दूरादापदमात्मनः ॥५४३॥
आकर्ण्यते तदा कम्बोः शब्दमब्दविजित्वरम् । किमेतदिति संरब्धाश्चौराश्चिरमचिन्तयन् ॥५४४॥
अत्रैव शङ्खशब्दोऽभूत् पुराऽपि प्रापितज्वरः । भयादकस्मादस्माकमाकस्मिकविकस्वरः ॥५४५॥
नरः शङ्केऽस्ति केदाररक्षकः शङ्खवादकः । भ्रमिताः स्मः पुरा स्पष्टं कष्टं तेन दुरात्मना ॥५४६॥
इति निश्चित्य ते चौराः शङ्खस्वनमनूद्यताः । स **शङ्खधमको** यत्र तत्र क्षेत्रान्तरे ययुः ॥५४७॥
मुष्टिभिस्ताडयित्वा तं भङ्क्त्वा शङ्खं च सक्रुधः । हृत्वा च तद्धनं मङ्क्षु चौरास्ते जग्मुरुन्मुदः[२] ॥५४८॥
प्रभूते सति वित्तेऽस्मिन्नधिकाधिकवाञ्छया । स इव त्वं विदग्धोऽपि भव माऽऽस्पदमापदः ॥५४९॥
अथ **जम्बूः**[३] स तामाह सतामाहतविप्लवः[1] । स्यामहं किमु मूर्खत्वान्मुमूर्षुः स **कपिर्यथा** ॥५५०॥
अस्ति हस्तिकुलोत्खातै रत्नैरेवाम्बुवाहितैः । रत्नाकरीकृताम्भोधिर्विन्ध्यो नाम धराधरः ॥५५१॥
अनेकमुनिमाहात्म्याददाहात्मकतां गतः । तद्वनान्तर्दव इवाभूत्कोऽपि कपियूथपः ॥५५२॥
उद्भूतरुचिसम्भारास्तारा इव निशाकरः । कामं कामयते सर्वाः स एकः कपिकामिनीः ॥५५३॥
कपिः कोऽप्यंसलंमन्यः[2] कदाचिन्मदनातुरः । वञ्चयित्वाऽधिपं रेमे तत्प्रियाभिर्यथेप्सितम् ॥५५४॥
तं युवानं[४] बलिष्ठं च वीक्ष्य शाखामृगस्त्रियः । जरत्कपिरतोद्विग्ना दधुर्मुदमुदित्वरीम् ॥५५५॥
सममेष परीरम्भसम्भ्रमेण कपिस्त्रियः । कामकोपवशात्कम्पसम्पदां पदमादधौ ॥५५६॥
एताश्च नखदन्तादिमृदुकण्डूयनादिकम् । रचयामासुरन्योन्यं रहो गलितचेतनम्[3] ॥५५७॥
अथ यूथपतिर्दूरादेतदालोक्य दुस्सहम् । अधावत्तारबूत्कारं[५] लहरीजित्वरत्वरः ॥५५८॥
युवा कपिरपि प्रेक्ष्य तं समायान्तमभ्यगात् । जवाज्जितं तु चेतोऽपि मुक्त्वा स्त्रीमध्य एव सः ॥५५९॥
गृहीतगृहिणीकोपसाटोपहृदयं तदा । स तं वालीव सुग्रीवमुग्रक्रोधमयोधयत् ॥५६०॥
परस्परपरिक्षिप्तप्रतीष्टग्रावगोलकैः । तौ घ्नन्तौ वनदेवीनामाश्चर्यं चक्रतुश्चिरम् ॥५६१॥

---

१. दुःखं ददौ – KH, D । २. रुन्मदः – A, B, KH, D, H रुन्मदीः – C । ३. जम्बू – A, K, KH, B । ४. मेव – K, H । ५. पूत्कारं – A, B, H बूत्कार – C ।

टि. 1. सतां प्रापितदुःखः इत्यर्थः । 2. अंसलः – बलवान् । 3. क्रियाविशेषणमिदम् ।

अथ कच्छाभपुच्छौ तौ क्षुरीकाराविव क्षणात् । ऊर्ध्वौ पाश्चात्यपादाभ्यामङ्गं विविशतुर्मिथः ॥५६२॥
जवेनाऽथ जरन् दूरागतिखिन्नः कपीश्वरः । यूना स्त्रीदृष्टिपुष्टेन निर्भग्नस्त्रासमासदत् ॥५६३॥
श्रान्तो युद्धाद्भयाद् भ्रान्तस्तृष्णाक्रान्तः क्वचित् कपिः । जलस्य जलधीर्जानिन्ना[1][2]ऽऽलोकत शिलाजतु[3] ॥५६४॥
शिलाजतुनि स क्षिप्त्वा मुखं सलिलकाङ्क्षया । उद्धर्तुमक्षमः पाणी मूर्खः प्राणकृतेऽक्षिपत् ॥५६५॥
तावत्तावपि तत्रैव विलग्नौ वज्रलेपवत् । तदुद्धारधिया मूर्खः पश्चात् पादौ न्ययुङ्क्त तत् ॥५६६॥
लग्नौ तावपि तत्रैव सतृष्णस्य क्रमौ हरेः । तेन कीलितसर्वाङ्ग इव मृत्युमवाप सः ॥५६७॥
तदक्षिप्तपदः पूर्वमाकृषेद्वदनं स चेत् । अवश्यं तस्य तन्न स्याद् दुर्मतेर्मृत्युरीदृशः ॥५६८॥
भवादृशां वचस्तृष्णाप्रेरितो[4]ऽहमपि भ्रमात् । सजामि रागगैरेये[1] गौराङ्गि ! कपिवन्न हि ॥५६९॥
**नभःसेना**थ वक्ति स्म व्यक्तं लोभेन भूयसा । नाथ ! यास्यसि निर्बुद्धिस्त्वं **बुद्धिस्त्री**व हास्यताम् ॥५७०॥
ग्रामः सस्यश्रियां धाम **नन्दिग्राम** इति श्रुतः । अस्ति विस्तीर्णकेदारसङ्कीर्णीभूतभूतलः ॥५७१॥
तत्र **सिद्धिश्च बुद्धिश्च** प्रसिद्धे वृद्धयोषितौ । अभूतां स्फारदारिद्र्यमन्दिरे सख्यसोदरे ॥५७२॥
ग्रामेऽत्र **भोलिगो** नाम यक्षो विख्यातवैभवः । वित्तस्याऽभूत्प्रभूतस्य[5] दाता सेवाधने जने ॥५७३॥
सिद्धिराराधयामास ततस्तं भक्तिभासुरा । दीनारद्वितयं तुष्टो ददौ तस्यै स चान्वहम् ॥५७४॥
अभुङ्क्त काष्ठपात्रे या सा भुङ्क्ते हेमभाजने । दास्यं व्यधत्त याऽन्येषां तस्या दास्योऽभवन् गृहे ॥५७५॥
कुटीरे याऽवसद् भग्ने सौधे वसति साऽनिशम् । दधौ या चीवरं जीर्णं दुकूलैः साऽऽनुकूल्यते ॥५७६॥
इत्थमालोक्य तां **बुद्धिः सिद्धिं** सिद्धोरुवैभवाम् । प्रीत्या रहसि पप्रच्छ साकूतं कौतुकादिति ॥५७७॥ विशेषकम् ॥
कुलक्रमागतः स्वामी दारिद्र्यं तावदावयोः । कुतो विभवपाथोधिजलदेवीव वर्त्तसे ॥५७८॥
अथ सा कथयामास तुष्टो यक्षः स भोलिगः । दीनारद्वितयं दत्ते सम्पन्नेत्राभमन्वहम्[2][6] ॥५७९॥
इति तस्या निशम्याऽसौ वाचं निश्चित्य चेतसि । तमाराद्धवती यक्षं **बुद्धि**र्भक्तिभरोत्तरा ॥५८०॥
तुष्टो जगाद यक्षोऽथ किमु त्वं याचसीति ताम् । द्विगुणं **सिद्धि**तो देयं ममेत्येषाऽवदन्मुदा ॥५८१॥
ददौ यक्षोऽन्वहं तस्यै दीनारांश्चतुरस्ततः । अथ सा प्रथते **बुद्धि**रपि **सिद्धि**रिवान्वहम् ॥५८२॥
**बुद्धेः सिद्धि**मिमां ज्ञात्वा **सिद्ध्या**राद्धः पुनर्ददौ । ततोऽपि द्विगुणं यक्षः सेवाकृत्कल्पपादपः ॥५८३॥
आराद्धस्तत्पुन**र्बुद्ध्या** यक्षः प्रत्यक्षतां गतः । द्विगुणं कल्पयामास प्रत्यहं **सिद्धि**त्रृद्धितः ॥५८४॥
सिद्ध्याराद्धः पुनर्यक्षः किं करोमीत्यभाषत । तत्प्रार्थितोऽथ वामाक्ष्णा काणीकृत्य तिरोऽभवत् ॥५८५॥
**बुद्ध्या**ऽथ पुनराराध्य **सिद्धे**र्द्विगुणमर्थितः । यक्षो **बुद्धि**मथाऽबुद्धिमन्धीकृत्य तिरोदधे ॥५८६॥
तद्वत्त्वमपि तन्नाथ ! ऋद्धिं प्राप्याऽपि दुर्ल्लभाम् । अनुत्तरां श्रियं वाञ्छन्नपाये निपतिष्यसि ॥५८७॥

---

१. जानित्र – K, D जनित्रा – L, जानत्रा – B, A । २. त्रालोकंते – L, त्रलोकत – K, D । ३. शिलाजतुः KH, L, B, A, H ।
४. पूरितो – B । ५. भूतरतस्य – B भूतरभूतस्य – H भूरितरस्य C । ६. त्रेवाभवन्हं – D, K त्तेवायमन्वहं – L त्रेवाभमन्वहं – B ।
टि. 1. गैरेयं – शिलाजतु, तस्मिन् । 2. सम्पदः नेत्रः नायकः, तस्य आभा इव आभा यस्य तद् दिनारद्वितयम् ।

ऊचे **जम्बूकुमारो**ऽथ समारोपितनिश्चयः । उत्पथप्रस्थितिं कुर्वे नैवाहं **वाजिराज**वत् ॥५८८॥
श्रीवशंवदसौन्दर्यं श्री**वसन्तपुरं** पुरम् । अस्ति क्षितिवधूहारताराप्राकारभासुरम् ॥५८९॥
**जितशत्रु**नृपस्तत्र सुत्रामप्रतिमः श्रिया । आसीद्दोःस्तम्भदम्भोलिलोलिताखिलभूमिभृत् ॥५९०॥
लसन्यशः[१]कुमारस्य यदीयस्य विसर्प्पतः । बभौ नभःपथोत्सङ्गे शशी सहचरश्चिरम् ॥५९१॥
अन्यदा स नृपोऽवादीद् वाहरत्नपरीक्षकान् । सर्वोत्कृष्टोऽस्ति मे वाजी राज्ये कोऽपीति कथ्यताम् ॥५९२॥
अथ ते गदिते राज्ञा हयविद्याविदो हयम् । चकृषुः सैन्यतो वार्धेरिन्द्रवाहमिवामराः ॥५९३॥
भूपाय दर्शयामासुर्दर्शनीयममुं हयम् । ते पूर्णलक्षणं भानुरथाकृष्टमिवाष्टमम् ॥५९४॥
किञ्च विज्ञपयाञ्चक्रुस्ते [1]महीशक्रमक्रमात् । वाहोऽयं यस्य राज्ये स्यान्न स जेयः परैरिति ॥५९५॥
तदसौ वसुधाहार ! [2]सुधाहारहयोपमः । रक्षणीयः प्रयत्नेन सम्पूर्णाऽष्टाङ्गलक्षणः ॥५९६॥
इत्याकर्ण्य गिरं तेषां सविशेषं मुदं वहन् । किञ्चिद्विचिन्तयामास हयन्यासकृते नृपः ॥५९७॥
निश्चिकाय नृपो योग्यं **जिनदासं** वणिग्वरम् । भाति यद्यशसः शैलनाथः [3]प्राथमकल्पिकः ॥५९८॥
असावगर्हगार्हस्थव्रतमाणिक्यवारिधेः । धर्मैकध्यानधन्यस्य तस्य न्यासाय कल्पते ॥५९९॥
इत्यालोच्य तमाकार्य कार्याकार्यविवेककृत् । तं न्यासमर्प्पयामास मेदिनीवासवो हयम् ॥६००॥
अर्प्पितः स नरेन्द्रेण समुद्रेणेव चन्द्रमाः । जगृहे जिनदासेन नभसेव महीयसा ॥६०१॥
**जिनदासो**ऽद्भुततमं तमङ्गीकृत्य वाजिनम् । [4]निशान्तमाप तेजस्वी निशाऽन्तमिव भास्करः ॥६०२॥
तच्चारुचतुरङ्गाय तुरङ्गाय व्यधाद्वणिग् । [5]इन्दिरामन्दिरायाऽस्मै मन्दुरां मन्दिरान्तरे ॥६०३॥
श्वेतस्यास्य हयस्याधः क्षिप्ता कोमलवालुका । प्राप्ता दीप्तिजितेवासौ सेवार्थं चन्द्रगोलिका ॥६०४॥
समग्रभुवनस्यापि श्रीवशीकारकारणम् । श्रीजिनं वाजिनं वाऽयमेकं ध्यायति धीरधीः ॥६०५॥
यथा यथा हयो वृद्धिं स प्रयाति तथा तथा । खुरैर्नृपविपद्वल्लिमूलानि खनति ध्रुवम् ॥६०६॥
सह स्वराज्यसम्पत्त्या विपक्षविपदा समम् । सर्वाङ्गाणि तुरङ्गोऽयं तुङ्गच्छविरवीवृधत् ॥६०७॥
निनाय नीरपानाय हयनायकमन्वहम् । स श्रेष्ठी स्वयमारुह्य रक्षादक्षः सरोवरे ॥६०८॥
वलमानोऽन्तरातीर्थनाथं वाहस्थितस्ततः । त्रिः स प्रदक्षिणीकृत्य नत्वाऽभ्येति निकेतनम् ॥६०९॥
निजावास-जिनावास-जलावासपथत्रयम् । मुक्त्वा हयो न जानाति मार्गमन्यं पुरान्तरे ॥६१०॥
अथाऽरिपृथिवीनाथाश्चेतस्येतदचिन्तयन् । कुतोऽस्य वर्द्धते राज्यमस्माकं क्षीयते पुनः ॥६११॥
अथाऽकथ्यत सर्वेषां तेषां गूढतरैश्चरैः । वाहरत्नस्य माहात्म्यं तस्य तेजोमयाकृतेः ॥६१२॥
[२]पृथ्वीनाथस्य कस्याऽपि मन्त्री प्राह ससाहसः । तं वाहमहमानेष्ये न चिराच्चौर्यचर्यया ॥६१३॥

१. कुमारेस्य – B, A । २. भूनाथस्याथ – C, D, P ।

टि. 1. महीशक्रं अक्रमात् – न क्रमः गतिः अक्रमः स्थिरभावेन इत्यर्थः । 2. सुधाहारः इन्द्रः तस्य हयः तस्य उपमा यस्य । 3. प्राथमकल्पिकः शिष्यः । 4. निशान्तं – गृहम् । 5. इन्दिरा – लक्ष्मीः ।

इति प्रतिज्ञां स प्राज्ञंमन्यः कृत्वा नृपाज्ञया । श्राद्धत्वारम्भदम्भेन प्रचचाल घनैर्धनैः ॥६१४॥
श्री**वसन्तपुरे** तत्र गत्वा श्रावकतत्त्ववित् । वक्रेच्छो रचयाञ्चक्रे स चैत्यपरिपाटिकाम् ॥६१५॥
स श्रद्धावानिव श्राद्धसद्मसु छद्मसुस्थितः । जिनार्च्चाऽभ्यर्च्चनं कुर्वन् **जिनदास**गृहं गतः ॥६१६॥
तन्वानस्तीर्थनाथस्य पूजामथ यथाविधि । स्वावासे **जिनदासेन** सानन्देनाभिनन्दितः ॥६१७॥
अथ भक्तिपथन्यस्तमनाः सन्मानतो नतः । तं साधर्मिकवात्सल्याज्जिनदासोऽवदन्मुदा ॥६१८॥
अद्याऽनवद्यजैनेन्द्रधर्मसम्बन्धबान्धवः । भोजनेन विधेहि त्वं मम धाम्नि पवित्रताम् ॥६१९॥
विनते जिनदासेऽस्मिन्निति भक्त्या वदत्यपि[१] । अनिच्छन्निव[२] तस्थौ स कार्यं पूर्णमिति स्मरन् ॥६२०॥
अथाऽसौ गाढमभ्यर्थ्य भोजितो भक्तिपूर्वकम् । स्वावासे **जिनदासेन** निशायामपि वासितः ॥६२१॥
केनाऽपि सुहृदा श्रेष्ठी **जिनदासो**ऽप्यनीनयत् । महोत्सवजुषा सौधे निजे स्थापयितुं निशाम् ॥६२२॥
असावथ निशीथिन्यामुत्थितः कूटधार्मिकः । आशु तं वाहमारुह्य निःससार त्वरातुरः ॥६२३॥
सोऽन्यतः प्रेर्यमाणोऽपि जगाम सरसीं हयः । पीत्वाम्बु वलितः प्राप्तो यत्राऽऽस्ते जिनमन्दिरम् ॥६२४॥
प्रदक्षिणात्रयं तत्र दत्त्वा पुनरगाद्गृहम् । अत्यर्थं नुद्यमानोऽपि स वाजी नान्यतो ययौ ॥६२५॥
ततो विभातशेषायां विभावर्यां भयैकभूः । मुक्त्वा वाहवरं धूर्त्तश्चपलः स पलायितः ॥६२६॥
अथाखिलनिशावाह[३]खिन्नो वाहशिरोमणिः । विवेश मन्दुरामिन्दुः प्रत्यग्गिरिगुहामिव ॥६२७॥
अथ प्रातः समायातः स मायातरुपावकः । **जिनदासो** निजं धाम धामनाथ इवाम्बरम् ॥६२८॥
अथ पृष्टो निशावृत्तं वृत्तान्तं वाजिनो जनैः । तद्धीतो मन्दुरां गत्वा श्रेष्ठी हृष्टोऽश्ववीक्षणात् ॥६२९॥
वाजिनं तमगन्तार[1]मगं तारमयं यथा । सोल्लासमर्च्चयामास **जिनदासः** प्रमोदवान् ॥६३०॥
रत्नत्रयत्रिमार्गी तद्भवाद्दक्प्रेरितोऽत्यजन् । अहं पूज्यो भविष्यामि महतां स हयो यथा ॥६३१॥
**कनकश्री**रथ प्राह स्वामिन्नित्यातुरः स्फुरन् । **पुण्यहीन** इव प्रौढपुण्योऽपि परितप्यसे ॥६३२॥
हंसाभवैजयन्तीभिर्भ्राजयन्ती नभोनदीम् । जयन्ती स्वःपुरीमस्ति **जयन्ती**ति पुरी श्रुता ॥६३३॥
धनदत्तोत्सवस्तत्र **धनदत्तो** महावणिक् । आसीद्**वसुमती**साहचर्यवर्यगृहस्थितिः ॥६३४॥
एकदा बिभरामास गर्भे **वसुमती** सुतम् । दोषाकरं दिगैन्द्रीव सवितुर्व्ययकारकम् ॥६३५॥
जातमात्रे पुनस्तत्र प्रदोषे तमसांपदे । गृहस्य गगनस्येव क्षीणो भास्वद्वसुव्रजः ॥६३६॥
जातेऽष्टवर्षमात्रेऽस्मिन् माता मृत्युमवाप सा । **पुण्यहीन** इति ख्यातिं तल्लोके गतवानयम् ॥६३७॥
तदन्यसद्मसु स्वैरं कर्म निर्माय जीवति । मत्वेति स गृहे निन्ये मातुलेनाऽतुलेच्छया ॥६३८॥
मातुलस्याऽऽगते तस्मिन् गृहं कतिपयैर्दिनैः । मुष्टं चौरैर्निशि प्रत्त[2]खातकृष्टधनोच्चयैः ॥६३९॥
अथ तं प्रथते लोको निर्भाग्यैकशिरोमणिम् । तन्निर्वेदनिधिः सोऽपि ययौ देशान्तरं प्रति ॥६४०॥

---

१. वदन्नपि – D, K, KH । २. अनिच्छन्नपि – D, K, KH । ३. वाहं – D, K, KH ।

टि. 1. अगं पर्वतं तारमयं–मेरुम् । 2. प्रत्तः–दत्तः ।

असौ पुरि तमालिन्यां मालिन्याऽङ्गीकृतस्ततः । सिषेवे वणिजांनाथं विनयी **विनयन्धरम्** ॥६४१॥
गतेऽस्मिन् दिवसैः कैश्चित् शिखिदग्धालयो वणिक् । स जनैः पुण्यवान् मेने [१]जीवन्निःसृतमानुषः ॥६४२॥
तत्खिन्नः **पुण्यहीनो**ऽयं बोहित्थमधिरूढवान् । [२]**धनावहेन** वणिजा मणिजालजुषा समम् ॥६४३॥
[1]प्रवीर [३]इव बोहित्थः प्रत्यर्थिपृतना इव । वीचीर्विदारयन्नब्धेः परं पारं स यातवान् ॥६४४॥
अथोपार्ज्य धनं भूरि चलितोऽसौ **धनावहः** । सहैव **पुण्यहीनेन** धनोपार्ज्जनशालिना ॥६४५॥
अमज्जत्तज्जले सिन्धोरन्तः प्रवहणं ततः । तत्रापि फलकं प्राप्य **पुण्यहीन**स्तु निर्ययौ ॥६४६॥
**पुण्यहीनो**ऽम्बुधिं तीर्त्वा संसारं शमवानिव । अवापदटवीं काञ्चित्कस्तूरीपत्रवद्भुवः ॥६४७॥
[2]अथो चरन्नरण्यान्तः संददर्श मुदास्पदम् । विस्मितो वेश्म यक्षस्य वनीधम्मिलसन्निभम् ॥६४८॥
स तमाराधयामास यक्षमक्षोभमानसः । आत्माऽऽहृतैर्ज्जलैः पुष्पैः फलैश्चाद्भुतभक्ति[४]भाक् ॥६४९॥
अथ तुष्टोऽवदद्यक्षः **पुण्यहीनं** प्रति द्रुतम् । मम हेममयः केकी पुरो नर्त्तितुमेष्यति ॥६५०॥
पिच्छं गच्छन्नसावेकं केकी यन्मुञ्चति स्वयम् । ग्राह्यं तद्भवता नित्यं चामीकरमयं रयात् ॥६५१॥
यक्षस्येति वचः श्रुत्वा प्रीतस्तत्र स तस्थिवान् । प्रनृत्य गच्छतो हैमं पिच्छं गृह्णाति केकिनः ॥६५२॥
एकदा तेन मूर्खेण गच्छन् [५]हैमः शिखी धृतः । एककालमशेषाणि पिच्छान्यादातुमिच्छता ॥६५३॥
तत्पाणिस्पर्शमात्रेण केकी काकीबभूव सः । पिच्छान्यग्रे गृहीतानि काकपिच्छानि चाऽभवन् ॥६५४॥
आत्मानमथ निभार्ग्यमन्वशोचदसौ तदा । तुल्यकालं ददद् दृग्भ्यां जलं लक्ष्म्यै सुखाय च ॥६५५॥
ततः स इव मूर्खत्वं वृथा त्वमपि मा कृथाः । आश्रमादिक्रमज्ञोऽपि किमज्ञ इव वर्त्तसे ॥६५६॥
तारुण्येऽपि व्रतग्राही कदापि विकृताशयः । पूर्वोपार्ज्जितपुण्यानामपि नाशाय जायसे ॥६५७॥
अथाऽवादि सुधावादि वचस्तां प्रति **जम्बुना** । न भवामि मनस्तापैकमठः **कमठो** यथा ॥६५८॥
भूधरो **विन्ध्य**नामास्ति यत्र स्पर्द्धात्परस्परम् । वियदुर्वीजुषः कुर्युर्गर्ज्जि पर्ज्जन्यदन्तिनः ॥६५९॥[3]
कादम्बिन्यटवी [4]तस्य तटेऽभूत् कामिनीनिभा । गम्भीरोऽस्यां बभौ नाभीरूपः कूपश्च कश्चन ॥६६०॥
भूरिशेवालजालेन तत्र छन्नमुखाम्भसि । कूपेऽन्तः कोटिशोऽभूवन् जीवाः क्षीवा जलोद्भवाः ॥६६१॥
कदाचिद्वातसञ्जातशैवलच्छिद्रवर्त्मना । कूर्मः कूपगतः कश्चिदिन्दुं शारदमैक्षत ॥६६२॥

---

१. जीवन्नमृतमानुषः L, C । २. धनवाहेन - A, KH । ३. इति - KH, इता - B । ४. मान् - K । ५. हेमशिखी - A, C ।

टि. 1. प्रवीरः-पराक्रमी । 2. अथो - ओकारान्तः अव्ययः । 3. इतः श्लोकचतुष्टयं A, L, H एतेषु त्रिषु आदर्शेष्वेव दृष्टम् —

सरोवरं पयःपूर्णं तस्मिन्विस्मयकारकम् । पुष्करान्तरसंचारिराजहंसं विराजते ॥
समुद्र इव गम्भीरे तस्य नीरे निरन्तरम् । उवास कमठः कश्चित् पुत्रपौत्रादिभिः सह ॥
शैवालपटलं तस्य सरसः ●पवमानतः । कदाचिदाचितमपि विरलत्वमवाप च ॥
तदन्तरे च पूर्णेन्दुस्तदानीं शुशुभेतराम् । विलोक्य कूर्मस्तं पर्व★शर्वरीशममोदत ॥

● पवमानः - वायुः तस्मात् । ★ शर्वरीशः चन्द्रः तम् । 4. विन्ध्याद्रेः ।

स्वकीयजन्मसाफल्यश्रियो मुखमिवामलम् । विलोक्य कूर्मस्तं पर्वशर्वरीशममोदत ॥६६३॥
आलोकयतु मे लोकः सर्वस्तदिदमद्भुतम् । इति वात्सल्यतोऽगच्छत् कच्छपः पयसस्तलम् ॥६६४॥
कूर्मः समानयत् यावत् कुलं तद्दर्शनाकुलम् । तावत्तच्छिद्रमाच्छादि पुनः शेवालजालकैः ॥६६५॥
भ्रामं भ्रामं जले चक्षुश्चिक्षेपो[1]र्द्ध्वं स कच्छपः । शेवालजटिले तत्र न तु पूर्णेन्दुमैक्षत ॥६६६॥
तदैनं प्राप्य सूरीन्दुं कूर्मवन्न त्यजाम्यहम् । कुतोऽस्य दर्शनं भूयो मोहच्छन्ने भवावटे ॥६६७॥
असौ **कनकवत्याह** मत्या हसितवा[१]क्पतिः । पतिं प्रति कृतिन् ! मा भूस्त्वं **मासाहसपक्षिवत्** ॥६६८॥
कश्चित् व्रश्चितुमेधांसि भीषणामटवीमटन् । उन्मुद्रितमुखं तृ[२]प्तं सुप्तं [2]हर्यक्षमैक्षत ॥६६९॥
प्रविशंस्तन्मुखे पक्षी मा साहसमिति ब्रुवन् । तेन पुंसा निषिद्धोऽपि नाऽस्थात्तन्मांसलिप्सया ॥६७०॥
सिंहेनाऽथ प्रबुद्धेन स प्रविशन् मुखान्तरे । उच्चैश्चपेटापातेन हतो हस्तिविघातिना ॥६७१॥
भार्याभिर्वार्यमाणोऽपि स इव त्वमपि स्फुटम् । पश्चात्तापास्पदं भावी तदिदं मा कृथा वृथा ॥६७२॥
अथ **जम्बू** वचः प्राह शुचिप्राहत[३]कल्मषम् । [४]अशर्मभाजनं **सोमशर्मे**व न भवाम्यहम् ॥६७३॥
पत्तनं **पाटलीपुत्र**मित्यस्ति क्षितिमण्डनम् । शौर्यवज्रायुधस्तत्र राजा **वज्रायुधो**ऽभवत् ॥६७४॥
आसीत् पुरोहितस्तस्य राज्यव्यापारभारभृत् । प्रख्यातः **सोमशर्मे**ति शर्मश्रीकेलिमन्दिरम् ॥६७५॥
एकः सखा सुखाधारः **सहमित्रा**भिधोऽन्वहम् । बद्धः प्रेमगुणेनेव तेन सञ्चरते सह ॥६७६॥
पर्वण्येव सखाऽभ्येति **पर्वमित्रा**ऽभिधोऽपरः । तं [५]प्रति श्रीनिधिं प्रातः सरोजमिव षट्पदः ॥६७७॥
**प्रणाममित्र**नामान्यः सखा तेन कदाचन । आपतन्प्रतिपच्चन्द्र इवाग्रे [६]नम्यते स्म सः ॥६७८॥
अन्वहं सहितस्तेन **सहमित्रेण** स स्फुरन् । पुर्याः पुरोहितस्तस्याश्चक्षुःश्रियमशिश्रियत् ॥६७९॥
कथञ्चित्कुपितं भूपं सम्यग् विज्ञाय सोऽन्यदा । सदनं सहमित्रस्य ययौ निशि पुरोहितः ॥६८०॥
तदनुद्घाटितद्वारं बहिःस्थित्वा कृतारवः । स भृङ्ग इव तन्मित्रसद्म पद्ममिवाऽमुचत् ॥६८१॥
पुरोधाः **पर्वमित्रस्य** ततो धाम जगाम सः । विकस्वरमुखं शैलनिकुञ्जमिव कुञ्जरः ॥६८२॥
अभ्युत्थानमथाधत्त तस्याऽयं संमदी सुहृत् । आयाताऽऽयात मद्गेहमद्य पूतमिति ब्रुवन् ॥६८३॥
पुरोहितोऽथ पर्यङ्के तन्निर्दिष्टे निविष्टवान् । पुरस्थं तं प्रति प्राह प्रौढप्रीतिधुरन्धरः ॥६८४॥
क्रुद्धः कृतान्तरूपोऽयं भूपः सम्प्रति मां प्रति । यदि नश्यामि नेदानीं तन्मां निर्दलयत्ययम् ॥६८५॥
तदशेषं विहाय त्वं सहायत्वं मम व्रज । गमिष्यामि विदेशेऽपि प्राणत्राणपरायणः ॥६८६॥
निशम्येदं तदा **पर्वमित्रेणो**क्तं त्रुटन्मुदा । यदि ते मम देहेन गेहेन विभवेन च ॥६८७॥
भवेदत्र परित्राणं ददामि तदिदं मुदा । परं राजविरुद्धेऽर्थे किं कुर्वेऽहं कुटुम्बवान् ॥६८८॥ युग्मम् ॥

---

१. वाक्पतिं - KH, L, C वाक्पति - D, B, K । २. दृप्तं - C, A, L । ३. किल्बिषं - K, D । ४. अमर्श - KH । ५. प्रीतिं - A, प्रीतः - L, प्रीतं - B । ६. नश्यते B ।

टि. 1. ऊर्ध्वं इत्यर्थः । 2. हर्यक्षः - सिंहः ।

ततः सत्यतया मित्रं यदि त्वमसि तत्प्रभो ! । कथमप्यन्यथाकारमितो देशान्तरं कुरु ॥६८९॥
अन्यथा मद्गृहे स्वामिन् ! यदि त्वामागतं नृपः । प्रातर्ज्ञास्यति तद्यन्त्रे मत्कुलं पीडयिष्यति ॥६९०॥
इत्युक्ते तेन स गच्छन्नरेश्वरपुरोहितः । अन्ववर्त्ति स्वयं किञ्चिद् दाक्षिण्यादागृहाङ्गणम् ॥६९१॥
तद्गृहान्निःसृतो गच्छन्नचिन्तयदयं स्वयम् । अहो मे मन्दभाग्यस्य न किञ्चित्त्राणकारणम् ॥६९२॥
तावेवैतौ स एवाहं जातौ किमधुनेदृशौ । आ ज्ञातमथवा नास्ति प्रसादो जगतीभुजः ॥६९३॥
न मे कुत्रापि कोप्यस्ति किमभ्रात् पतितोऽस्म्यहम् । आसीन्मम ययोरास्था तयोश्चर्येयमीदृशी ॥६९४॥
अहो मे निर्विवेकत्वं यन्नीतौ मित्रतामिमौ । यौ मयि क्षीणदाक्षिण्यावित्थं दुर्व्यसनातुरे ॥६९५॥
तृतीयस्यापि पश्यामि सुहृदः सौहृदक्रमम् । पश्चान्न हि मनो येन क्षणोति-तदवीक्षणम् ॥६९६॥
इति निश्चित्य चित्तेन तदगारमगादसौ । सच्चक्रशक्रः[1] सच्चक्रे सोऽप्यमुं गृहमागतम् ॥६९७॥
अब्रवीच्च कथं दुस्था तवावस्थेयमीदृशी । मन्दं मन्दमिदानीं च किमागमनकारणम् ॥६९८॥
अथास्य कथयामास विप्रो वृत्तान्तमात्मनः । मित्रद्वयविमुक्तस्य परित्राणार्थितां च ताम् ॥६९९॥
परं पुरा मया किञ्चिन्न तवोपकृतं तथा । इत्यात्मनोऽतितुच्छत्वं मन्दागमनकारणम् ॥७००॥
सोप्यवोचत मित्राहं समीहे त्वन्न किञ्चन । सद्भूतभक्तिग्राह्योऽस्मि तत्राभून्न्यूनता न ते ॥७०१॥
तद् भद्र ! मा स्म कार्षीस्त्वं शङ्कातङ्कातुरं मनः । मयि त्रातरि मित्रेऽस्मिन् कुतस्त्यं भूभुजो भयम् ॥७०२॥
इत्थं वाक्सुधया दत्त्वा स्वस्ति सौवस्तिकं[2] प्रति । सुगुणी प्रगुणीचक्रे रथं जवनवाजिनम् ॥७०३॥
दोःस्तम्भे बिभ्रता तेन मित्रेणासदृशं बलम् । शम्बलं च रथे तस्मिन्नारोप्यत पुरोहितः ॥७०४॥
राज्यान्तरमथो नीत्वा समुपस्थाय पार्थिवम् । तेनासौ लम्भितः कीर्त्तेरास्पदं सुखसम्पदम्[१] ॥७०५॥
त्रयाणामपि मित्राणां स स्वभावं विभावयन् । **प्रणाममित्र**मद्राक्षीत् प्राणेभ्योप्यतिवल्लभम् ॥७०६॥
दृष्टान्तोपनयश्चायं योऽत्र भूपः प्रकीर्त्तितः । स कर्मपरिणामोऽस्य सोऽयं जीवः पुरोहितः ॥७०७॥
सहजं मित्रमेतस्य शरीरं परिभाव्यताम् । तत्कर्मनृपतेः कोपे जीवेन सह न व्रजेत् ॥७०८॥
ज्ञातिप्रभृतयः सर्वे **पर्वमित्रस्य** सन्निभाः । श्मशानस्थानपर्यन्तमनुयान्तीह देहिनाम् ॥७०९॥
**प्रणाममित्र**तुल्यस्तु धर्मोऽयमवगम्यताम् । जन्मान्तरेऽपि यो जीवं गच्छन्तमनुगच्छति ॥७१०॥
जीवस्य च परत्राऽपि श्रियं यच्छति वाञ्छितम् । ज्ञाति-देहौ विहायाऽहं तत्तमाराद्धुमुद्यतः ॥७११॥
अथ मन्मथवीरस्य मूर्त्तयेव जयश्रिया । **जयश्रिया** प्रभुः प्रोचे शौचेनाञ्चितमानसः ॥७१२॥
इत्थं मोहयते नाथ ! **नागश्री**वत्तवानृतैः । नागः[२] श्रीमन्किमत्युग्रं मानसं साधु बाधते ॥७१३॥
नगरे नगरेकारकारिप्राकारचारुणि[3] । **रमणीया**भिधे राजा जज्ञे किल कथाप्रियः ॥७१४॥

---

१. संपदां - A, B । २. नागिः B, नागिला - A, नाग - D, H ।

टि. 1. सज्जनानां समूहे शक्र इव । 2. सौवस्तिकः-पुरोहितः, तम् । 3. नगः पर्वतः तस्य रे-कारं तिरस्कारं तत्कारिप्राकारेण-उत्तुङ्गेन - इत्यर्थः ।

अचीकथत् कथाः पौरान् वारंवारेण सोऽन्वहम् । स च कस्यचिदन्येद्युर्वारकोऽभूद् द्विजन्मनः ॥७१५॥
दुष्कर्मजन्मनां मौर्ख्यदारिद्र्यव्यसनापदाम् । क्रमागत इवावासः स द्विजोऽचिन्तयत्तदा ॥७१६॥
रसना रसनायैव मम धिग् वेधसा कृता । आयसीव कुशीस्तब्धा स्वनामग्रहणेऽपि या ॥७१७॥
ब्रुवे यदि न जानेऽहमिति तद् दुष्टभूपतिः । प्रवेशयति कारायां दुर्ग्राहग्रहिलो हि माम् ॥७१८॥
चिन्ताहेतुं दुहित्रा स कुमार्या भाषितोऽब्रवीत् । साऽप्यूचे तात ! मा कार्षीश्चिन्तासन्तापितं मनः ॥७१९॥
वारे तव मया तात ! कथनीया कथानिका । इत्युक्त्वा सा शुचिर्वेषं वासोभिर्विशदैर्व्यधात् ॥७२०॥
गत्वा नृपान्तिकं दत्त्वा जयेत्याशिषमाह सा । कथां शृणु यदि श्रीमन् ! कथाकौतूहली भवान् ॥७२१॥
दक्षो निक्षोभतां वीक्ष्य तादृक्षीं क्षितिवल्लभः । मेने तद्वचनस्यैव कथातः कौतुकं महत् ॥७२२॥
साऽप्याचख्यौ पुरेऽत्रैव **नागशर्मा**स्ति माणवः । **सोमश्रिया**मभूत् पत्न्यां **नागश्री**स्तस्य नन्दिनी ॥७२३॥
कस्मैचित् द्विजचट्टाय दत्त्वा तां पितरौ स्वयम् । कार्येणौद्वाहिकेनैव जग्मतुर्नगरान्तरम् ॥७२४॥
एकाकिन्यां गृहे तस्यां स चट्टः सायमागमत् । तया श्रियोऽनुसारेण चक्रे भोज्यादिरौचिती ॥७२५॥
सतूलीकं च पल्यङ्कं निजालयमहाधनम् । शयनायाऽर्पयित्वाऽस्मै चिन्तयामास सा कनी[1] ॥७२६॥
[2]महीमहीनामहिभिर्जानेऽस्ति च न मञ्चकः । शयनं तत् क्व मे भूमौ वर्यं पर्यङ्कवर्ज्जितम् ॥७२७॥
शये पर्यङ्कपर्यन्तेऽत्रैव तावन्निशामिमाम् । कोऽपि नो पश्यति ध्वान्तैर्यदन्धंकरणौषधैः ॥७२८॥
इति सुष्वाप सा तत्र निर्विकारैव बालिका । तदङ्गसङ्गे शृङ्गारसङ्कटे स द्विजोऽपतत् ॥७२९॥
लज्जाक्षोभादिसंरुद्धमनःशूलाकुलीकृतैः । प्राणैः स तत्यजे चट्टो वचनीयभयादिव ॥७३०॥
अचिन्तयत्ततः साऽपि पापिन्या धिगसौ मम । एकत्रस्वापपापद्गुरिहाऽपि सफलोऽभवत् ॥७३१॥
विभावरी विभात्येषा यावत्तावदमुं द्विजम् । निक्षिपामि क्षितेरन्तर्यथा जानाति कोऽपि न ॥७३२॥
इत्यसौ खण्डशोऽकार्षीत् तूर्णं तस्य कलेवरम् । न्यधान्निधानवद् गर्त्तं खनित्वा च स्वयं रयात् ॥७३३॥
गर्त्तं ततस्तमापूर्य लिप्त्वाऽसौ गोमयद्रवैः । पुष्पैर्गन्धैश्च धूपैश्च वासयामास तां रसाम् ॥७३४॥
पितरौ चागतौ तस्या गृहीत्वौद्वाहिकं विधिम् । अतीतस्तु कथाकालः श्रीमंस्त्वत्पुरतोऽधुना ॥७३५॥
कथं द्रक्ष्याम्यहं तामित्युक्ते राज्ञा जगाद सा । स्वामिन्नहं सा संसारनाटिकानटने नटी ॥७३६॥
कुमारि ! तदिदं सत्यं यदत्र कथितं त्वया । पृष्टेति सा पुनर्वाचमुवाच नृपतिं प्रति ॥७३७॥
याः कथास्त्वं पुराऽश्रौषीस्तथ्यास्ता भूपते ! यथा । तथेयमपि तथ्यास्तु चित्रहेत्वविशेषतः ॥७३८॥
एवं विप्लावितः क्ष्मापस्तया **नागश्रिया** यथा । तथा त्वमपि किं नाथ ! विप्लावयसि कल्पितैः ॥७३९॥
कल्याणसलिलाधारकम्बुना **जम्बुना** ततः । समगद्यत सद्यस्कहारहूर[3]निभं वचः ॥७४०॥
सन्तु दन्तुरितानन्दाः कथास्तन्वि ! तथाविधाः । असावस्तु विचारस्तु प्रमाणं यस्त्वया कृतः ॥७४१॥

---

टि. 1. कनी-दुहिता, कन्या । 2. अहिभिः अहीनां संकीर्णां महीं जाने इति अन्वयः । 3. हारहूरा - द्राक्षा ।

तथाहि गाहितस्वर्गनगरीवैभवं भुवि । पुरं **कन्दर्प्पकोशा**ख्यमस्ति कन्दर्प्पदर्पभूः ॥७४२॥
धराधौरेयतां भेजे राजा तत्र **शतायुधः** । पञ्चेषुं तृणवन्मेने यं विलोक्य त्रिलोक्यपि ॥७४३॥
सुवर्णभूमिभृद्वंश्यजातमात्रगिरिस्तनी । तस्य **लीलावती** नाम बभूव प्राणवल्लभा ॥७४४॥
शृङ्गारभारं निर्माय सा कदाचन कामिनी । तस्थौ गवाक्षमारुह्य मुह्यज्जननिरीक्षिता ॥७४५॥
तन्मुखेन्दुस्तदा[१] चन्द्रजयश्रीनाटिकानटः । बभौ मौक्तिकताडङ्कपारिपार्श्विकपेशलः ॥७४६॥
लावण्यामृतसिक्तेऽस्याः सिन्दूरतिलकं मुखे । त्रिनेत्र[1]दग्धकामद्रुनवकन्दलवद् बभौ ॥७४७॥
तन्मुखावासिनः कामभूपतेश्चामरायितम् । भेजेऽलकैर्मृदुमरुल्लोलैर्भ्रूच्छत्रपार्श्वयोः ॥७४८॥
चिक्रीड नासिकाशाखिभ्रूशाखाप्रेङ्खणाद्भुते । तस्या नेत्रद्वयी रश्मिदोलाबन्धे मनोभुवः ॥७४९॥
अदर्शि तरुणैस्तस्या रदपङ्क्ते रुचिः शुचिः । मनोरथस्फुरत्पुष्पायुधचापोत्थबाणवत् ॥७५०॥
वैकक्षमाल्यचापस्य पुष्पेषोरिषुधिश्रियम् । तस्याः शिश्राय धम्मिल्लः पुष्पपूरेण पूरितः ॥७५१॥
इत्यसौ नित्यसौभाग्यभङ्गीभाग्यनिकेतनम् । श्लिष्टा स्मरपिशाचेन सर्वाङ्गमुदयन्मुदा ॥७५२॥
[2]शम्भुक्षोभादिव दिवः समुत्तीर्णं मनोभुवम् । साऽपश्यल्ल**ललिताङ्गा**ख्यं नरं तुरगगामिनम् ॥७५३॥
शिरःपरिसरप्रेङ्खन्मायूरातपवारणम् । हरिणाक्षीमनोरत्नहरणैकमलिम्लुचम् ॥७५४॥
किञ्च श्रीचन्दनस्यन्दजनिताङ्गविलेपनम् । स्मरं रचितसन्नाहमिव लोकत्रयीजये ॥७५५॥
मानिनीमानभङ्गाय शुभ्रचीराऽपदेशतः । पर्वगर्वितशीतांशुस्फीतांशुपरिवारितम् ॥७५६॥
स्कन्धदेशसमारूढप्रौढधम्मिल्लकैतवात् । मूर्त्तशृङ्गारभारस्य नित्यं वाहीकतां गतम् ॥७५७॥ पञ्चभिः कुलकम् ॥
दत्तदृष्टिमथैतस्मिन् स्वस्य द्वैराज्यकारिणि । पञ्चेषुः पञ्चभिर्बाणैस्तां जघान घनस्तनीम् ॥७५८॥
तामसौ कामसौन्दर्यजयशाली व्यलोकयत् । ललिताङ्गोऽपि तत्काल[3]कुतुकोत्तालचनः ॥७५९॥
कामस्य तां वशीकारमन्त्रसिद्धिमिवाङ्गिनीम् । वीक्ष्योन्मुखकृतस्तम्भ इव चिन्तितवानयम् ॥७६०॥
मुखे वसति मन्येऽस्याः स्वयं मदनभूपतिः । अन्यथा कथमत्रैव स्फुरत्यविरतं रतिः ॥७६१॥
विषपीयूषयोरेषा किमुपादानकारणम् । अस्याः कटाक्षा येनैते संमोहसुखयोः क्षमाः ॥७६२॥
अस्याः काममभूत् कामः स्वयं वेधा मृगीदृशः । क्व पुराणमुनिस्त्वेतन्निर्मातुं रूपमीश्वरः ॥७६३॥
शिरो विधुन्वन् कामेषूनितस्तत इव क्षिपन् । विचिन्त्येत्यचलत् गेहं प्रति स श्रेष्ठिनन्दनः ॥७६४॥
तस्मिन् दृष्टिपथातीते सा महीपतिवल्लभा । अभूत्कामग्रहग्रस्ता योगिनीवैकमानसा ॥७६५॥
[4]प्रीतिर्न गीते नानन्दश्चन्दने न धृतिर्विधौ । आत्मनेव विना तेन जज्ञे तस्यास्तनोरिव ॥७६६॥
ज्ञात्वा विकारमाकारचेष्टिताभ्यामथ स्वयम् । यथार्थनामा तामाह चेटी **चतुरिका**ह्वया ॥७६७॥

---

१. तथा – C।

टि. 1. त्रिनेत्रः – शिवः । 2. शम्भुः – शिवः । 3. कुतुकम् – कौतुकम् । 4. तेन विना आत्मना (विना) इव तस्याः तनोः गीते प्रीतिः चन्दने आनन्दः विधौ धृतिः न जज्ञे इत्यन्वयः कार्यः ।

सत्यं स्वामिनि ! किं नाम तं युवानं समीहसे । युक्तं वा यन्मृणालिन्या रविरेव प्रियङ्करः ॥७६८॥
अथ **लीलावती** प्राह स्मरदाहातुराक्षरम् । हञ्जे **चतुरिकै**वाऽसि यदिदं कौशलं तव ॥७६९॥
वशीकृताऽबलालोकं [१]पुण्यपेशलया दृशा । कथञ्चित् तं स्मराकारं प्रीतये मम मेलय ॥७७०॥
ज्ञात्वा कुतोऽपि तं सापि **समुद्रप्रिय**नन्दनम् । **ललिताङ्ग**मुपेत्यैवं व्याजहार चटूक्तिभिः ॥७७१॥
त्वया **लीलावती**देव्याश्चौर ! जह्रे मनः किल । गताश्रयस्तु तां हन्ति हन्त बाणैर्मनोभवः ॥७७२॥
त्वद्वियोगेऽभवत्तस्याः प्रावृट्कालस्तथाऽश्रुभिः । प्रयाणोन्मुखतां भेजे यथा हंसोऽतिबाधितः ॥७७३॥
अयं वियोगो दावाग्निर्न दीपकलिका पुनः । शान्तिं याति न तन्मुग्धे ! किन्तु हन्तोपचीयते ॥७७४॥
इत्थं भवद्वियोगोत्थसन्तापोपशमाशया । वीजयन्तीं हसत्येषा मामहो कदलीदलैः ॥७७५॥ युग्मम् ॥
विशिष्टयोगतां तस्यास्त्वद्वियोगः किलाऽभजत् । भवन्मयमतः सर्वं सा पश्यत्यवनीतलम् ॥७७६॥
स्वयं तत्त्वमुपागत्य तापनिर्वापणं कुरु । युक्तं तु नाऽयशस्तस्या ग्रहीतुं तव सर्वथा ॥७७७॥
अथोचे **ललिताङ्गो**ऽपि सङ्गोपितनिजाशयः । अयि क्वाऽहं वणिग्मात्रं सा क्व वा राजवल्लभा ॥७७८॥
प्रच्छन्नमपि कर्मैतत् कर्तुं किं नाम शक्यते । सुप्तस्याऽपि हरेर्दंष्ट्रां को वीक्षितुमपि क्षमः ॥७७९॥
साऽप्यूचे मा त्वया सौम्य ! । चिन्ताऽर्थेऽस्मिन् विधीयताम् । अस्मिन् संयोजनोपाये । विधिमूर्त्तिमवैहि माम् ॥७८०॥
अथानुमतिमासाद्य सद्यः सा तस्य दूतिका । विज्ञा विज्ञपयामास राज्ञीं गत्वा यथातथम् ॥७८१॥
तद्योगकामा वामाक्षी यावदस्त्यन्यदा मुदा । पुरे तावदभूत्तत्र प्रमोदी कौमुदीमहः ॥७८२॥
स्वयं तदा मुदा द्रष्टुं शरत्कालभवां श्रियम् । आखेटकार्थं भूमिभृदलञ्चक्रे वनाऽवनिम् ॥७८३॥
तदा च राजवेश्मान्तर्विजनीभूतभूतले । साऽनङ्गप्रतिमाव्याजाल्ललिताङ्गमवीविशत् ॥७८४॥
सस्वजे सुचिरात् प्राप्य **लीलावत्यथ** तं तथा । यथा तेनैकतामाप चेतनेवात्मना समम् ॥७८५॥
कथञ्चिच्च विचारैककोविदाः सौविदास्तदा । निश्चितं कश्चिदप्यत्र प्रविवेशेति तेऽ[२]वदन् ॥७८६॥
समाप्याखेटकं राज्ञे सम्प्राप्ताय तदाऽथ ते । ऊचुर्निशान्ते कोऽप्यस्तीत्यच्छलादानपूर्वकम् ॥७८७॥
स्वयं सशब्द[1]पन्नद्धद्वयं हित्वाऽथ भूपतिः । चौरादप्यधिकं मन्दं मन्दमन्तःपुरेऽविशत् ॥७८८॥
तदा चतुरिका द्वारदत्तदृष्टिर्महीपतिम् । दृष्ट्वाऽऽयान्तं द्रुतं तत्र लीलावत्यै व्यजिज्ञपत् ॥७८९॥
स जालकपथेनाऽथ **लीलावत्या** तयापि च । क्षिप्तः पश्चात्प्रदेशस्थाशुचिकूपेऽपतत् कुधीः ॥७९०॥
दौर्गन्ध्येनान्धलस्तत्र प्राच्यभुक्तं स्मरन् सुखम् । दध्यौ स नाऽतो निर्यातो भोक्ष्ये भोगानमून् पुनः ॥७९१॥
राज्ञीदास्यौ च कूपेऽस्मिन् प्रेम्णा चिक्षिपतुः सदा । [2]फेलाऽन्ते याऽभवत्तस्य वृत्तिर्जीवनमात्रिका ॥७९२॥
सोथ प्रावृषि कूपोर्द्धगामिभिर्मलवारिभिः । प्रवाह्य बाह्यपरिखां नीतो [3]वप्रप्रणालकैः ॥७९३॥
क्षिप्तोऽथ परिखातीरे लोलकल्लोललीलया । दैवादागतया प्राप्तो धात्र्या देवतयेव सः ॥७९४॥

---

१. पुष्प - H, A, C, L । २. वादिनः - D, K विदन् - B ।

टि. 1. पन्नद्धद्वयं - उपानहौ । 2. फेला(स्त्री) अवशिष्टं अन्नम् । 3. वप्रस्य जलमार्गैः ।

अथ सङ्गोप्य मूर्च्छान्ते निजं नीतो निकेतनम् । अभ्यङ्गस्नानभोज्याद्यैः पाल्यमानोऽभवन्नवः ॥७९५॥
अत्र चोपनयो योऽभूल्ललिताङ्गोऽतिकामुकः । अतृप्तः कामभोगेषु स संसारी शुचिस्मिते ! ॥७९६॥
आपातमधुरो यस्तु परिणामे सुदुस्सहः । राजस्त्रीभोगतुल्योऽसौ विषयोत्थः सुखोदयः ॥७९७॥
तत्कूपकल्पगर्भान्तर्वासिनः फेलकोपमैः । मातृभुक्तान्नपानाद्यैर्धिगेतस्य भुजिक्रियाम् ॥७९८॥
कूपादिव ततो गर्भाद्वाहितस्याऽथ बाह्यतः । सूतिकासदने तस्य परिखोपमिता स्थितिः ॥७९९॥
धात्रिकोपमिता चाऽत्र सर्वोपग्रहकारिणी । सेयं परिणतिः पूर्वकर्मणां परिभाव्यताम् ॥८००॥
पुनः पुनर्नवीभूतं वीक्ष्य राज्ञी स्मरातुरा । अन्तराऽऽकारयेच्चेत्तं तत्किं तस्यात्र युज्यते ॥८०१॥
अथोचुर्वनिताः सोऽयमल्पबुद्धिरपि प्रभो ! । स्मरन् विष्टाऽवटोद्भूतदुःखानां तत्करोति किम् ॥८०२॥
इति **जम्बूकुमारस्य** संवेगामृतनिर्भरैः । वचोभिर्विषयाकाङ्क्षातापस्तासां शमं ययौ ॥८०३॥
अथोत्तरङ्गवैराग्यरसार्द्रीभूतचेतसः । अष्टावपि समं **जम्बूकुमार**मिदमभ्यधुः ॥८०४॥
प्रमुखे सुखदैः स्वामिन् ! परिणामेऽतिदुःखदैः । इयत्कालं हहा कष्टं विषयैर्वञ्चिता वयम् ॥८०५॥
तत्तद्विवाहसम्बन्धा[1]दन्धातमसमज्जनात् । उद्वृताः स्मस्त्वया यद्वा **श्रेयसे सङ्गतं सताम्** ॥८०६॥
आश्रितस्तत्त्वया पन्थाश्रितोऽस्माभिरपि स्वयम् । सहैव तेन नेताऽसि त्वमस्मान् शिवपत्तनम् ॥८०७॥
उवाच **प्रभवोप्यु**च्चैर्महासत्त्व ! भवद्गुणैः । कृष्टस्त्वामनुयास्यामि स्वकानापृच्छ्य निश्चितम् ॥८०८॥
मा प्रमादीर्महाभाग ! विवेकोचितमाचरेः । इत्युक्तो **जम्बुना** यातः **प्रभवो** भवनं निजम् ॥८०९॥
ज्ञात्वा **जम्बूकुमारस्य** सदारस्याऽपि निश्चयम् । श्वशुराः पितरौ चाऽऽसन् तमेवाऽनुयियासवः ॥८१०॥
अथ **जम्बूकुमारो**ऽपि विधाय जिनपूजनम् । सङ्घं विधिवदभ्यर्च्य सन्मान्य स्वजनादिकान् ॥८११॥
स्नानीयगन्धपानीयकृतमज्जनमङ्गलः । चन्दनेन सितध्यानेनेव सर्वाङ्गभासुरः ॥८१२॥
रत्नाभरणसम्भारैः सत्त्वसारैरिवाञ्चितः । असमैः कुसुमैः कामं यशोभिरिव शोभितः ॥८१३॥
स्वभाग्याम्भोधिडिण्डीरपिण्डैरिव सितांशुकैः । दिव्यैः संवीतसर्वाङ्गः कर्पूरागरुधूपितैः ॥८१४॥
दानैरानन्दयन् दीनान् तूर्यैर्मुखरिताम्बरः । वाह्यां नरसहस्रेण शिबिकामधिरूढवान् ॥८१५॥
[2]जननान्तरसौहार्दरसेन सहचारिणा । **अनादृतेन** देवेन कृतनिष्क्रमणोत्सवः ॥८१६॥
प्रवेशिताभिराक्रम्य सैन्ये चारित्रभूभृतः । स्मरसेनासमानाभिः प्रियाभिस्ताभिरन्वितः ॥८१७॥
स्फूर्ज्जज्जयजयारावप्रतिध्वनितदिङ्मुखः । मङ्गल्यधवलध्वानाकृष्टपौरवधूजनः ॥८१८॥
दुर्घटं घटयन् घण्टापथे पाणिंधमायितम् । मायूरच्छत्रखण्डेन मण्डलं तिरयन् रवेः ॥८१९॥
आलोक्यमानो लोकेन विस्मयालोलमौलिना । पौरीभिर्दीयमानाशीरक्षतक्षेपपूर्वकम् ॥८२०॥
बन्दिवृन्दमुखोद्घुष्टः स्मरवीरजयोर्ज्जितः । महामोहमहीपालमभिषेणयितुं ययौ ॥८२१॥ एकादशभिः कुलकम् ॥
**सुधर्मस्वामि**पादाब्जपावनं वनमीयिवान् । याप्ययानात्समुत्तीर्य प्रतिष्ठाचारमङ्गलः ॥८२२॥

---

टि. 1. ०अन्धातमसम् - गाढः अन्धकारः । 2. पूर्वजन्म० ।

प्रविश्य मध्यं पञ्चाङ्गसङ्गतक्षितिमण्डलः । पञ्चमं गणभृन्नाथं नत्वा **जम्बू**र्व्यजिज्ञपत् ॥८२३॥ युग्मम् ॥
संसारसागरोत्तारकर्णधारमुनीश्वर ! । मां कुटुम्बं च चारित्रयानपात्रेण तारय ॥८२४॥
ततः स्वपाणिपद्मेन गणधारिधुरन्धरः । स्वजनैरन्वितं **जम्बूकुमारं** तमदीक्षयत् ॥८२५॥
**प्रभवो**ऽप्यन्यदाऽभ्येत्य **सुधर्मस्वामि**सन्निधौ । भावशत्रुप्रतिक्षेपदक्षो दीक्षामुपाददे ॥८२६॥
गणधारिधुरीणेन तदानीं प्रभवो मुनिः । कृतः सुकृतवान् **जम्बू**पादाम्बुजमधुव्रतः ॥८२७॥
**जम्बू**प्रभृतिभिः शिष्यैः कलितः कलभैरिव । अन्यदा गणभृच्च**म्पां** यूथनाथ इवागमत् ॥८२८॥
तस्यां च बहिरुद्याने गणभृत् सपरिच्छदः । देहिनां देहवान् पुण्यवासरः समवासरत् ॥८२९॥
ततस्तदीयपादारविन्दवन्दारवो जनाः । आययुर्[1,१]ययुमुख्यानि वाहनानि समाश्रिताः ॥८३०॥
लोकमालोकयन् यान्तं **कोणिकः श्रेणिका**त्मजः । सद्यो मेदुरितानन्दो राजाप्युद्यानमागमत् ॥८३१॥
स पुण्यलभ्यमभ्यर्च्य गणभृच्चरणाम्बुजम् । आसीनः श्रोत्र[2]मसृणामशृणोद् धर्मदेशनाम् ॥८३२॥
देशनान्ते प्रभोः शिष्यवर्गे **जम्बु**मुनिं नृपः । पुरः स्मरमिवाद्राक्षीद् भवभीत्या धृतव्रतम् ॥८३३॥
अपृच्छच्च प्रभो ! कोऽयं द्विपेष्विव सुरद्विपः । सुधांशुरिव [3]धिष्ण्येषु त्रिदिवाद्रिरिवाऽद्रिषु ॥८३४॥
शालिधान्यमिवान्नेषु कल्पद्रुम इव द्रुषु । अम्भोधिष्विव दुग्धाब्धिश्चम्पकं कुसुमेष्विव ॥८३५॥
हिरण्यमिव लोहेषु रसेष्विव सुधारसः । अद्भुतस्तव शिष्येषु सविशेषं प्रदीप्यते ॥८३६॥ विशेषकम् ॥
श्रीगणेन्द्रो जगौ **जम्बूस्वामिनः** प्राक्तपोर्ज्जितम् । रूपं सौभाग्यमन्त्यं च केवलित्वं महीभुजे ॥८३७॥
तदाकर्ण्य महीनाथो हृष्ट**श्चम्पापुरीं** ययौ । **जम्बू**युतः **सुधर्मा**ऽपि श्री**महावीर**मभ्यगात् ॥८३८॥
ततः श्री**वीर**निर्वाणात् व्यतीत्य [4]दशहायनीम् । **जम्बूस्वामि**नमाधाय गच्छभारधुरन्धरम् ॥८३९॥
श्री**सुधर्मा**गणाधीशे श्रिते निःश्रेयसश्रियम् । **जम्बूः** प्रबोधयामास महीं नवदिवाकरः ॥८४०॥ युग्मम् ॥
अथ वर्षचतुःषष्टौ गतायां **वीर**निर्वृतेः । श्री**जम्बूस्वामि**ना चक्रे गच्छेशः **प्रभवः** प्रभुः ॥८४१॥
मनःपरावधी श्रेण्यौ पुलाकाहारकौ शिवम् । कल्प[२]स्त्रिसंयमी ज्ञानं नाऽऽसन् **जम्बू**मुनेरनु ॥८४२॥
जीयात्काचिद्विश्वजैत्री धरित्र्यां, सौभाग्यश्रीरद्भुता **जम्बु**नाम्नः ।
लब्धे यस्मिन् केवलज्ञानलक्ष्मीर्धन्यंमन्या नान्यमभ्याजगाम ॥८४३॥ [शालिनीवृत्तम्]

**इति जम्बूस्वामिचरितम् ॥**

अनेन यदुक्तं प्राक् '**पभवो दट्ठूण जह जंबू**' इति तदपि निरुक्तम् ॥

अत एवैहिकसुखपिपासामपास्य गुरुनियन्त्रितबहुसाधुमध्ये स्थातव्यमिति, साधुभ्यः सदृष्टान्तमुपदिशति —

**उत्तमकुलप्पसूया, रायकुलवडिंसगा वि मुणिवसहा ।**
**बहुजणजइसंघट्टं, मेहकुमारो व्व विसहंति ॥१५४॥**

---

१. र्युग्यमु - A र्ययुर्मु - D । २. कल्पस्तु - L ।

टि. 1. ययुः - अश्वः । 2. मसृणा - प्रिया, मृद्वी, श्रोत्रस्य मसृणा श्रोत्रमसृणा, ताम् । 3. धिष्ण्यम् - नक्षत्रम्, तेषु । 4. दशानां हायनानां वर्षाणां समाहारः दशहायनी, ताम् ।

**उत्तमकुलप्रसूताः** प्रवरगृहजाता **राजकुलवतंसकाः** प्रधानतया तत्तिलकभूता अपि **मुनिवृषभाः** प्रधानसाधवः । **बहवो जना** नानादेशादिभुवो **यतयः** साधवस्तेषां **सङ्घट्टं** स्मारणावारणादिरूपं सङ्कीर्णवसतौ गात्रसम्बाधरूपं वा, **मेघकुमार इव विषहन्ते** इति ॥१५४॥ अत्र कथानकम्—

**[ मेघमुनिकथानकम् ॥ ]**

इलाविलासराजीवे राजा **राजगृहे** पुरे । **श्रेणिको**ऽभूत् पुरा चित्रं पवित्रदिवसोदयः ॥१॥
**अभयाख्यः** सुतस्तस्य **सुनन्दा**कुक्षिभूरभूत् । **अशोकचन्द्रो हल्लो**ऽथ **विहल्लश्चेल्लणा**भुवः ॥२॥
**धारिणी धरणीश**स्य रमणी रमणीयरुक् । दधौ गर्भे सुतं शुद्धं काव्यं सुकविधीरिव ॥३॥
सा भवद्रुमविच्छेदामन्दनन्दनसूचकम् । स्वप्नेऽपश्यदथा[1]ऽऽबन्धबन्धुरं गन्धसिन्धुरम् ॥४॥
पूरितोऽस्या महावृष्टिहृष्टिभ्रमणदोहदः । **अभयेन** नरेन्द्राज्ञावशेनाराध्य देवताम् ॥५॥
[2]धारिणीमधुराकल्पं कल्पवल्लीव **धारिणी** । इच्छानुरूपं भूपस्य जनयामास सा सुतम् ॥६॥
मेघदोहदतो **मेघकुमार** इति विश्रुतः । ववृधे भवहृड्डिम्बडम्बरेण समं क्रमात् ॥७॥
ललनानयनानन्दः कन्दः कन्दर्प्पभूरुहः । तस्योल्ललास लावण्यपावनो यौवनोदयः ॥८॥
तदतिरूपा भूपालकन्या काऽस्तीति चिन्तिनि[3] । राज्ञि व्यज्ञपि केनाऽपि धर्मश्रीर्वर्द्धतेऽधुना ॥९॥
उपश्रुत्याऽनया भावी किं दीक्षादयितः सुतः । इति ध्यायिनि धात्रीशे सोऽभ्यधत्त पुनः पुमान् ॥१०॥
सृजन् विश्वमनःशैत्यं चैत्ये **गुणशिले** यतः । श्री**वीरः** समवासार्षीन्महर्षीनपि हर्षयन् ॥११॥
एवमुक्तवते तस्मै प्रहृष्यन् पारितोषिकम् । यद्यद्भूरि ददौ भूपस्तत्तदल्पममन्यत ॥१२॥
युतः सुतसमूहेन श्रद्धया च समृद्धया । श्री**वीरं** नन्तुमुद्याने ततः क्षितिपतिर्ययौ ॥१३॥
नत्वा नुत्वा च भावस्याऽतनुत्वाच्चरणौ विभोः । सङ्कोचितवपुस्तस्थौ पुरो विश्वगुरोर्नृपः ॥१४॥
अथ श्रुतिसुधाम्भोधिरहस्यरसवीचिकाः । जिनेन्दुर्विदधे विश्वक्लेशनाशाय देशनाः ॥१५॥
विभवन्ति भवाम्भोधौ विभवाः क्षारवारिवत् । तृष्णातुराणां तत्पाने तृष्णा प्रत्युत वर्द्धते ॥१६॥
संसारसागरे लोभावर्त्तेन भ्रमितं जगत् । मोहेन मूर्च्छितं वेत्ति नात्मनोऽनन्तकष्टताम् ॥१७॥
अयोगाग्निवियोगाग्नियोगक्लेशाग्निदुस्सहे । नरा न रागारण्येऽपि दुःखं जानन्त्यचेतनाः ॥१८॥
ईदृग्दुःखेभ्य उद्वृत्य विश्वविश्वोपकारकः । धर्मो ध्यानैकसाध्यो ये तं न ध्यायन्ति दुर्द्धियः ॥१९॥
भर्तुर्गिरं निशम्येति सम्यक्त्वं **श्रेणिको**ऽश्रयत् । तत्पुत्राः श्रावकं धर्म**मभयाद्याः** प्रपेदिरे ॥२०॥
प्रीतः श्रीतारवदनः प्रणम्य मदनद्विषम् । ततः पुरं गतः साकं तनुजैर्मनुजेश्वरः ॥२१॥
अथ धीरः पुरो भूत्वा **धारिणी-धरणीश**योः । **मेघो**ऽकिरद्गिरं मेघध्वनितां जनिताञ्जलिः ॥२२॥
तातौ ! जातः परित्रातश्चालितो लालितोऽभितः । वर्द्धितः स्पर्द्धितश्चैभिर्भवद्भ्यामद्भुतैः शुभैः ॥२३॥

---

टि. 1. आबन्धः-भूषणम्, तेन बन्धुरः मनोहरः । 2. धारिणी पृथ्वी, तस्याः मधुरं प्रियं आकल्पं आभूषणमिव सुतम् । 3. चिन्ता अस्य अस्ति चिन्तिन्, तस्मिन् ।

न प्रत्युपकृतं किञ्चित्कदाचिद्युवयोर्मया । साधयन्ति धरा-धाराधरयोर्वा किमु द्रुमाः ॥२४॥
यो योऽकारि स सोऽपूरि सर्वदा मे मनोरथः । युवाभ्यामेक एवाद्य पूर्यो दैन्याद्वदाम्यहम् ॥२५॥
स्वादितो वां प्रसादेन स्वादुः स्वादुः फलोच्चयः । अस्मि दीक्षातरुस्वादुतरामृतफलोत्सुकः ॥२६॥
अथ साश्रुदृशाऽऽलिङ्ग्य चुम्बित्वा मूर्ध्नि वत्सला । स्वहस्तेनोन्नमय्यास्यं तमभ्यधित धारिणी ॥२७॥
सुकुमारं वपुर्वत्स ! सुखैकललितं तव । दीक्षा तु कर्क्कशग्राह्या मा स्म भूस्तदिहाऽऽग्रही ॥२८॥
अथाचष्ट कुमारोऽहं सुकुमारः सुखोचितः । भवकष्टाऽसहो मातस्तन्मत्वैवं व्रते रतः ॥२९॥
प्रदीपे पाणिमङ्गारशकट्यां चरणं क्षिपन् । रक्षितोऽहं पुरेदानीं रक्ष मां भवदावतः ॥३०॥
ऊचेऽथ भूपस्तं वत्स ! भोगार्हं ते वयोऽधुना । गृहाणेदं ददे राज्यं युवा प्रीणय मे दृशौ ॥३१॥
एवमस्त्विति क्लृप्तोक्तिं राजा राज्ये नियोज्य तम् । किं तेऽधिकं ददामीति प्रीतिमग्नोऽवदत्तदा ॥३२॥
हृष्ट्याचष्टाऽथ **मेघो** मे तात ! भोगोचितं वपुः । किं भवत्यनया लक्ष्म्या यच्छ त्रिजगदीशताम् ॥३३॥
अथ भूपतिरब्रूत भूतलैकलवे सति । वश्ये विश्वत्रयैश्वर्यं कुतः सुत ! ददामि ते ॥३४॥
**मेघो**ऽभ्यधत्त मा तात ! कृपणो भूर्भवद्गिरा । लभ्यं लोकत्रयैश्वर्यं वद दीक्षां भजेति माम् ॥३५॥
छलितोऽहमनेनेति महीनेता विचिन्त्य सः । तस्याऽनुमेने त्रैलोक्यप्रभुतानिभृतं व्रतम् ॥३६॥
अथोत्सुकः कुमारोऽयं जगत्त्रयगुरोः पुरः । पाणिं जग्राह दीक्षाया रजोहरणकैतवात् ॥३७॥
नक्तं **मेघ**स्ततः सुप्तोऽनुज्येष्ठन्यस्तसंस्तरः । एहिरेयाहिराभाजां यतीनां घट्टितोंऽह्रिभिः ॥३८॥
**मेघो**ऽथ दध्यौ तृणवन्निर्द्धनो धूयते पुमान् । [1]तृणं फलर्द्धिवर्द्धिष्णु सेव्यते स्वामिवत्पुनः ॥३९॥
न पस्पृशुः करेणाऽपि श्रीपुरोगं पुरागतम् । अधुना निर्धनं धिग्मां पादैरुद्घट्टयन्त्यमी ॥४०॥
तत्प्रभाते व्रतं त्याज्यं राज्यं ग्राह्यं तदुज्ज्वलम् । इति ध्यायन्नतीत्याऽयं निशां नन्तुं जिनं ययौ ॥४१॥
अथोचे तीर्थनाथस्तं किं खिन्नोऽसि व्रतादतः । स्मर प्राग्भवमारब्धनिर्वाहालब्धपातकम् ॥४२॥
कुम्भी **मेरुप्रभो** विन्ध्यभुवि दावातुरः पुरा । [2]सरन्सरसि तत्पङ्के कर्मणीव ममज्ज सः ॥४३॥
सप्तमेऽह्नि च तत्रैव सोऽ[3]शुम्भि प्रतिकुम्भिना । तस्मिन्नेव वने भूयस्तन्नामैवाऽभवद् द्विपः ॥४४॥
स्मृतजातिर्दवालोके यूथत्राणधिया सुधीः । भङ्क्त्वा तरून् सरित्तीरे स चक्रे स्थण्डिलत्रयम् ॥४५॥
दीप्तेऽन्येद्युरयं दावे दधावे स्थण्डिला[4]न्यभि । ददर्श प्राग्भृते प्राणिमण्डलैः स्थण्डिले उभे ॥४६॥
नीचैर्गतिद्वयमिवातीत्य तत्कृपयैव ते । तृतीयं स्थण्डिलं प्राप तृतीयगतिवद् गजः ॥४७॥
मृगौघेनाग्नि[5]दूनेन किञ्चिदूने च पूरिते । तत्र तत्कृपयाऽसौऽस्थात्कायोत्सर्गीव निश्चलः ॥४८॥
कण्डूभिदे स उद्दध्रे पदं सपदि तत्पदे । शशः कोऽप्यविशत् तस्य दत्तपुण्यौघभाटकः ॥४९॥
तथैवोद्वृतपादोऽसौ द्विपः शशकृपावशः । बभौ गन्तुमिवाप्युच्चैः कृतपुण्याहमङ्गलः ॥५०॥
सार्द्धद्व्यहेन दहने शान्ते यातेषु जन्तुषु । अधावत् तृट्क्षुधाव्यग्रो वारिणे वारणेश्वरः ॥५१॥

---

१. नरः – L, C । २. स्मरन् – L, A, K, D । ३. हतः – KH, A, B, H । ४. न्प्रति – C, न्यभिः, L, D । ५ दूतेन – KH, B, A, H ।

चिरोद्धरणखिन्नैकचरणत्वेन वारणः । पपात भुवि तृट्तापात् त्र्यहेन व्ययमाप च ॥५२॥
शशकारुण्यपुण्येन पुण्ये श्रीसङ्कुले कुले । स भवानभवन्मेघ ! **साध्यते सुकृतैर्न किम्** ॥५३॥
दवत्रस्तपशूद्घट्टैस्तदा नाकम्पथा यथा । भवत्रस्तनृसङ्घट्टैस्तथा मा स्मेह कम्पथाः ॥५४॥
द्विपोऽपि राजपुत्रोऽभूर्यदेकशशकाऽभयात् । सर्वजीवाभयेनेह तत्पदं महदाप्स्यसि ॥५५॥
सर्वतोऽपि ज्वलत्येष भीमो भवदवानलः । नरकुञ्जर ! तन्मुञ्च मा स्थण्डिलमिव व्रतम् ॥५६॥
इति स्वामिगिरा मेघः स्थिरात्माऽजायत व्रते । मिथ्यादुष्कतमाधाय व्यधाच्च विविधं तपः ॥५७॥
स पालितव्रतः प्राप्तकालोऽभूद्विजये सुरः । ततश्च्युतो **विदेहेषु** देहमासाद्य सेत्स्यति ॥५८॥

**इति मेघमुनिकथानकम् ॥**

दुष्करश्च क्षुद्रसत्त्वैर्गच्छवासस्तथाहि–

**अवरोप्परसंबाहं, सोक्खं तुच्छं सरीरपीडा य ।**
**सारण वारण चोयण, गुरुजणआयत्तया य गणे ॥१५५॥**

**परस्परसम्बाधा** अन्योन्यसंघट्टनं **सौख्यं तुच्छं** न किञ्चिदित्यर्थः । **शरीरपीडा च** परीषहोदयस्याऽवश्यंभावित्वात् **स्मारणवारणचोदना गुरुजनआयत्तता च गणे** । स्मारणं–कर्त्तव्येषु अकृतेषु किमिति त्वयेदं न कृतमित्युपालम्भः । एवं वारणमकृत्येषु निषेधः । चोदना–उक्तमकुर्वाणेऽसकृत् खरमधुरवचनैः प्रवर्त्तनम् । गुरुजनायत्तता–उच्छ्वासमन्तरेण गुरुमनापृच्छ्य न किञ्चिदपि कर्तुं प्राप्यते, गच्छे इति ॥१५५॥

कृतं तर्हि गणेन, एकाक्येव धर्मं कुर्यादितिमतिं प्रत्याचक्षाण इदमाह–

**इक्कस्स कओ धम्मो ?, सच्छंदगईमईपयारस्स ।**
**किं वा करेउ इक्को ?, परिहरउ कहं अकज्जं वा ? ॥१५६॥**

**एकस्य कुतो धर्मः** किं भूतस्य ? **स्वच्छन्दगतिमतिप्रचारस्य** स्वाभिप्रायेण **गति-मत्यो**श्चेष्टा-बुद्ध्योः **प्रसरो** यस्य स तथा । **किं वा करोत्वेकः** कृत्यमसहायत्वात् । **परिहरतु कथमकार्यं वा** उपायाभावादिति ॥१५६॥ अन्यच्च–

**कत्तो सुत्तत्थागम-पडिपुच्छणचोयणा य इक्कस्स ।**
**विणओ वेयावच्चं, आराहणया य मरणंते ? ॥१५७॥**

**कुतः सूत्रार्थागमः** सिद्धान्तार्थाधिगमः । **प्रतिप्रच्छना** अनधिगताधिगमार्थं पुनः प्रश्नः । **चोदना** उत्तरपक्षाधिगमार्थं पूर्वपक्षः ताः कुतो **एकस्य** ? न कुतोऽपि एकाकितया तासां निर्गोचरत्वात् । अत एव **विनयः** पादप्रमार्ज्जनदण्डकग्रहणादिः । **वैयावृत्त्य**मौषधसम्पादनादि **आराधना वा** नमस्कारप्रत्याख्यानादिभावरूपा **मरणान्ते** न कुतोऽपीति सर्वत्र योज्यम् । वाशब्दाः सर्वत्र विकल्पार्था इति ॥१५७॥ तथा–

**पिल्लिज्जेसणमिक्को, पइन्नपमयाजणाउ निच्चभयं ।**
**काउमणो वि अकज्जं[१], न तरइ काऊण बहुमज्झे ॥१५८॥**

---

१. अकिच्चं - C ।

**प्रेरयेदुल्लङ्घयेत् एषणां** गवेषणां ग्रहणग्रासगोचराम् आगमोक्तां मार्गणा**मेकः । प्रकीर्णप्रमदाजनात्** इतस्ततो विक्षिप्तस्त्रीलोकात् सकाशात्, **नित्यभयं** एकस्येति गम्यम्, तासां चारित्र[१]धनापहारित्वात्। अत्र व्यतिरेकमाह**कर्तुमना अपि अकार्यं** कर्मोदयान्न **तरति** न शक्नोति **कर्तुं बहुमध्ये** नियन्त्रितत्वादिति ॥१५८॥

किञ्च—

**उच्चारपासवणवंत-पित्तमुच्छाइ[२]मोहिओ इक्को ।**
**सद्दवभाणविहत्थो, निक्खिवइ व कुणइ उड्डाहं ॥१५९॥**

**उच्चारप्रश्रवणे** प्रतीते, **वान्तं** वमनं, **पित्तमूर्च्छा** तापोद्रेकाद् भ्रमिः, **आदि**शब्दाद्वातविसूचिकादिग्रहः । एतैराकस्मिकै**र्मोहितो** विह्वलीकृत **एकः सद्रवभाजनविहस्तः** सपानकपात्रव्यग्रकरः सन्, वाशब्दोऽत्र यद्यर्थे, यदि तद्भाजनं विह्वलीभूतो **निक्षिपति** त्यजति तदात्म-संयमविराधना । अथोच्चारादीनि तेन गृहीतेनाचरति, ततः **करोत्युड्डाहं** प्रवचनलाघवमिति ॥१५९॥ अपि च—

**एगदिवसेण बहुया, सुहा य असुहा य जीवपरिणामा ।**
**इक्को असुहपरिणओ, चइज्ज आलंबणं लद्धुं ॥१६०॥**

**एकदिवसेन बहवः शुभाश्चाशुभाश्च जीवपरिणामा** मनोविवर्त्ता भवन्तीति शेषः । ततः किमित्याह— **एको**ऽसहायः सन् **अशुभपरिणतः** क्लिष्टाध्यवसितस्**त्यजेदु**ज्झेत् संयममिति गम्यम्, **आलम्बनं** स्वमति-कल्पितमलीकं कारणं **लब्ध्वा** प्राप्येति ॥१६०॥

प्रसक्तानुप्रसङ्गेनाऽत्र बहुदोषतामाह—

**सव्वजिणपडिकुट्ठं, अणवत्था थेरकप्पभेओ य ।**
**एक्को हु सुयाउत्तो वि, हणइ तवसंजमं अइरा ॥१६१॥**

**सर्वजिनप्रतिकुष्टं** सर्वैः श्रीऋषभादितीर्थकरैः प्रतिषिद्धमेकाकित्वमिति गम्यम्, अनेन एको जिनाज्ञा-भङ्गो दोषस्तथा **अनवस्था** द्वितीयो दोषः प्रमादबहुलत्वात् प्राणिनामपरेषामपि तथाप्रवृत्तेः । उक्तं च—

**इक्केण कयमकज्जं करेति तप्पच्चया पुणो अन्नो ।**
**सायाबहुल परंपरवोच्छेओ संजमतवाणं ति ॥१॥ [ ]**

**स्थविरकल्पभेद**श्चाधिको दोष एवं हि अयःशलाकाकल्पतापत्तेः, चशब्दात् मिथ्यात्वविराधने [३]अभ्यूह्यो । **एको हुः** सम्भावने सम्भाव्यते एतत् । **स्वायुक्तोऽपि** सुष्ठु अप्रमत्तोऽपि, परस्य किं वाच्यं, **हन्ति** तपःप्रधान संयम**स्तपःसंयमस्तम् अचिरात्** शीघ्रमिति ॥१६१॥

एतेन ये दुष्करकारकंमन्यतया, गच्छमाचार्यं चावगणय्य अतितरां स्वमत्या तपस्तप्यन्ते, ते तत्त्वतो यतय एव न भवन्तीत्युक्तम् । यदाह—कलिकालसर्वज्ञो भगवान् **हरिभद्रसूरिः**[1]—

**"जे इह होंति सुपुरिसा कयन्नुया न खलु तेऽवमन्नंति ।**
**कल्लाणभायणत्तेण गुरुयणं उभयलोगहियं ॥१॥ [ पञ्चा./५३० ]**
**जे उ तह विवज्जत्था सम्मं गुरुलाघवं अयाणंता ।**
**सग्गाहा किरियरया पवयणखिंसावहा खुद्दा ॥२॥ [ पञ्चा./५३१ ]**

---

१. प्राणा - C। २. पमाहिओ - A। ३. अप्यन्ये - C।

टि. 1. पञ्चाशक-११ गा. ३६, ३७, ३८, ३९ वृत्तिसहितः ।

**पायं अभिन्नगंठीतमाउ तह दुक्करं पि कुव्वंता ।**
**बज्झ व्व ते ण साहू धंखाहरणेण णायव्वा ॥३॥** [ पञ्चा./५३२ ]
**तेसिं बहुमाणेणं उम्मग्गणुमोयणा अणिट्ठफला ।**
**तम्हा तित्थगराणाठिए[१] सुजुत्तोऽत्थ बहुमाणो" ॥४॥** [ पञ्चा./५३३ ]

आसां गाथानामयमर्थः—ये केचन इह—मनुजलोके भवन्ति—स्युः सुपुरुषाः—उत्तमनराः, पुरुषग्रहणं नारीणामुपलक्षणं कृतज्ञका गुरुविहितोपकारविदः । न खलु—नैव ते उक्तस्वरूपा अवमन्यन्ते—अवगणयन्ति । केन हेतुनेत्याह कल्याणभाजनत्वेन—ऐहिकाभ्युदयपात्रत्वेन परलोकेऽपि स्वर्गापवर्गप्रापकत्वेन कं गुरुजनं ? धर्माचार्यम् उभयलोकहितं-लोकद्वयेऽपि उपकारकम् ।

यतोऽभ्यधायि **महाकविभिः—**

**"निर्भाग्योऽपि जडोऽप्यनाकृतिरपि प्राज्ञोपहास्योऽपि वा,**
**मूकोऽप्यप्रतिभोऽप्यसन्नपि जनाऽनादेयवाक्योऽपि हि ॥**
**पादास्पृश्यतमोऽपि सज्जनजनैर्नम्यः शिरोभिर्भवेत्**
**यत्पादद्वितयप्रसादनविधेस्तेभ्यो गुरुभ्यो नमः" ॥१॥** [ ] इत्याद्यगाथार्थः ।

अन्वयमुक्त्वा गाथाद्वयेन गुरुकुलमोचकान् निन्दन् व्यतिरेकमाह—'जे उ तह' गाहा ॥ 'पायं' गाहा ॥ ये तु—ये पुनः तथा—तस्मादुक्तप्रकाराद् विपर्यस्ता—विपरीताः कुपुरुषा अकृतज्ञा अकल्याणभाजनत्वेन गुरुजनमवमन्यन्त इत्यर्थः ते न साधव इति योगः, कथं विपर्यस्ता इत्याह- सम्यग्—यथावत् गुरुलाघवं—सारासारताविभागं गुरुकुलवासैकाकिविहारयोरिति गम्यम् । अजानन्तोऽनवबुध्यमानाः । अयमभिप्रायो यद्यपि ते गुरुकुलमनेकसाधुसङ्कीर्णतया सम्भवदनेषणा, परस्परस्नेहरोषादिदोषतया बहुदोषमेकाकित्वं चैतद्दोषाभावादल्पदोषं कल्पयन्ति । तथाऽप्येतन्न तेषां सम्यग्ज्ञानम्, आगमबाधितत्वात् । तथा स्वग्रहात्—स्वकीयाभिनिवेशादागमापारतन्त्र्यादित्यर्थः क्रियारता—भिक्षाशुद्ध्यप्रतिकर्मता-प्रान्तोपधिताऽऽतापना-मासक्षपणाद्यनुष्ठाननिरताः, तथा प्रवचनखिंसावहाः—शासनाऽपभ्राजनहेतवः । अनागमिकत्वेन एकाकित्वेन च प्रवचनगुप्तिरक्षायामसमर्थत्वात् । तथा क्षुद्राः—तुच्छाः, आत्मनि बहुमानात्, गुरुषु चाऽवज्ञापरत्वात्, कृपणा वा तथाविधजनावर्जनपरत्वात्, क्रूरा वा शेषसाधुषु पूजाविच्छेदाभिप्रायत्वात् । तथा प्रायो—बाहुल्येनाभिन्नग्रन्थयः—सकृदप्यनवाप्तसम्यग्दर्शनाः । अयमभिप्रायो-मिथ्यादृष्टयोऽपि ये भिन्नग्रन्थयस्ते नैवंविधाऽसमीक्षितकारिणो भवन्तीति । कथं तर्हि ते दुष्करतराणि तपांसि सेवन्त इत्याशङ्क्याह-तमसोऽज्ञानात् तथा—तत्प्रकारं मासक्षपणादि दुष्करमपि—प्रकृष्टमपि आस्तामदुष्करं कुर्वन्तो—विदधाना बाह्या इव—कुतीर्थिका इव न च—नैव ते गुर्वाज्ञाकारिणः साधवः—संयता विज्ञेया—ज्ञातव्याः जिनाज्ञोत्तीर्णत्वात् ।

इहैवार्थे दृष्टान्तान्तरमाह-**ध्वाङ्क्षोदाहरणेन**—काकज्ञातेन प्रयोगश्चाऽस्यैवं ये निर्गुणं वस्तु समाश्रिता न ते स्वार्थभाजो दृष्टाः, यथा मृगतृष्णासरःश्रायिणः काकाः, आश्रिताश्च निर्गुणं गच्छबहिर्भावं गच्छत्यागिन इति । **काकज्ञातं** चैवम्—

सुस्वादु शीतलं स्वच्छं पद्मरेणुसुगन्धि च । धारयन्ती जलं वापी काचिदासीन्मनोहरा ॥१॥
तस्यास्तटेऽभवत्काकास्तेषु चाल्पे पिपासिताः । अन्विच्छन्तोऽपि पानीयं नाऽऽश्रयन्ति स्म ते च ताम् ॥२॥

---

१. केपि - C।

ततो दृष्ट्वा पुरोवर्त्तिमृगतृष्णासरांसि ते । तानि प्रति प्रयान्ति स्म वापीं हित्वा जलार्थिनः ॥३॥
कश्चित् तु तानुवाचैवमेषा भो मृगतृष्णिका । यदि वोऽस्ति जलार्थित्वं तदाश्रयत वापिकाम् ॥४॥
ततः केचित्तदाकर्ण्य वापीमेव समाश्रिताः । भूयांसस्त्ववधीर्यैतन्मृगतृष्णां ययुः प्रति ॥५॥
ततो जलमनासाद्य ते विनाशमुपागताः । वापीं समाश्रिता ये तु बभूवुस्ते कृतार्थकाः ॥६॥
वापीतुल्योऽत्र विज्ञेयो गुरुगच्छो गुणालयः । धर्मार्थिनस्तु काकाभाश्चारित्रं जलसन्निभम् ॥७॥
मृगतृष्णासरस्तुल्या गुरुगच्छाद्बहिःस्थितिः । तच्छिक्षादायको ज्ञेयो गीतार्थस्तत्कृपापरः ॥८॥
चारित्राऽपात्रतां प्राप्ताः काकवत् केऽपि कुग्रहात् । गुरुगच्छ[१]बहिर्वासं संश्रिता ये तपस्विनः ॥९॥
अल्पास्तु केऽपि सद्बोधात् चारित्रे पात्रतां गताः । काका इवैव ये धन्या गुरुगच्छमुपाश्रिताः[२] ॥१०॥ इति गाथार्थः ॥
अथ गुरुत्यागिन एव कष्टविहारकारित्वेन ये बहुमन्यन्ते तान् शिक्षयितुमाह-

'तेसिं' गाहा-तेषां—गुरुकुलत्यागिनां बहुमानेन—पक्षपातेन कारणभूतेन उन्मार्गानुमोदना—अनागमिकाऽऽचारानुमतिः, किंफलेत्याह—अनिष्टफला—अनभिमतफला दुर्गतिप्रयोजनेत्यर्थः । आह च—

**"आणाए अवहंतं जो उवबूहेइ मोहदोसेणं ।**
**सो आणा अणवत्थं मिच्छत्तविराहणं पावे" ॥१॥ [ दं.प./१९५ ]**

'तम्हा'त्ति यस्मादेवं तस्मात्तीर्थकराज्ञास्थितेषु—गुरुकुलवासादिजिनादेशाश्रितेषु साधुषु युक्तः—सङ्गतोऽत्र विचारे बहुमानः पक्षपातो नेतरेष्विति गाथार्थः ॥

अथ प्रकृतमुच्यते । एकाकित्वं बहुदोषमुक्त्वा संविग्नानां सर्वापायपरिहारसामर्थ्यं स्यादेवेत्याह—

**वेसं जुन्नकुमारिं, पउत्थवइयं च बालविहवं च ।**
**पासंडरोहमसइं, नवतरुणिं थेरभज्जं च ॥१६२॥**
**सविडंकोब्भडरूवा, दिट्ठा मोहेइ जा मणं इत्थी ।**
**आयहियं चिंतिंता, दूरयरेणं परिहरंति ॥१६३॥**

**वेश्यां** गणिकां, **जीर्णकुमारीं** प्रौढकन्यां **प्रोषितभर्तृकां** गतपतिकां, चाः समुच्चयार्थाः, **बालविधवां** शैशवरण्डितां, **पाखण्डरोधाम्** अब्रह्मरोधकबहिर्वेषमुद्रां दर्शनिनीमित्यर्थः **असतीं** कुलटां, **नवतरुणीं** सद्योयौवनां, **स्थविरभार्यां** वृद्धपत्नीं च । एतासां निरुद्धमन्मथप्रसरतया उन्मार्गवाहित्वेन गाढतराऽपकारित्वदर्शनार्थं विशेषमुक्त्वा सामान्यमाह—'**टकि बन्धन**' इति वचनात् **विटङ्को** विबन्धः शुभाध्यवसायस्खलनरूपः, प्रस्तावाद् द्रष्टुः, **सविटङ्कं** शुभाध्यवसायविबन्धकम्, **उद्भटमुदारं रूपं** यस्याः सा तथा **दृष्टा** दृष्टिगोचरं पतिता **मोहयति** वैचित्र्यमानयति । **या** काचिन्**मनो**ऽन्तःकरणं **स्त्री** योषित् **ताम् आत्महितं** स्वपथ्यं **चिन्तयन्तो** वाञ्छन्तः साधवो **दूरतरेण** अतिदूरेण **परिहरन्ति** वर्जयन्तीति ॥१६२-१६३॥

अत्र स्त्रीणां प्रस्तावात्सर्वविषयमूलनिबन्धनतया उपलक्षणत्वेन अशेषविषयाणामपायहेतुतां निदर्शयति—

**सम्मद्दिट्ठी वि कयागमो वि अइविसयरागसुहवसओ ।**
**भवसंकडम्मि पविसइ, इत्थं तुह सच्चई नायं ॥१६४॥**

---
१. गच्छाद्ब - KH, H, B । २. समाश्रिताः C ।

**सम्यग्दृष्टिरपि** मिथ्यात्वेनाऽकलङ्कितोऽपि **कृतागमोऽपि** बाल्यतः प्रभृति अभ्यस्तसमस्तश्रुतोऽपि परम् **अतिविषयरागसुखवशगः** प्रभूतविषयसौख्याभिष्वङ्गाऽधीनधीः सन् **भवसङ्कटे** संसारक्लेशसम्बाधे **प्रविशति**। **अत्रार्थे तवे**ति विनेयाऽभिमुखीकरणार्थं हे विनय ! **तवा**ऽग्रे वयमुपदिशामः **सत्यकिः** पेढालपुत्र **उदाहरण**-मित्यक्षरार्थः ॥१६४॥ **सत्यकिकथा** चैवम्—

## [ सत्यकिकथानकम् ॥ ]

श्रिया विशाला **वैशाली** शालते स्म पुरी[१] पुरा । तत्रेषुकीलितद्वेषिखेटक**श्चेटको** नृपः ॥१॥
सुते तस्य मिथः प्रीतिस्यूते इव बभूवतुः । **सुज्येष्ठा चेल्लणा** चेति लावण्यललिताकृती ॥२॥
रतिप्रीत्योरिवान्योन्यमुपमानोपमेययोः । तयोः संविदभूदेको भविता पतिरावयोः ॥३॥
तत्ताते प्रार्थिते च प्रागदित्सौ **श्रेणिकः** स्वयम् । **सुज्येष्ठा**[२]संविदाऽभ्यागान्नृपो हर्तुं सुरङ्गया ॥४॥
यावदभ्येति **सुज्येष्ठा** तावत्प्रतिभयात् पितुः । तयैव प्रेरितोऽहार्षी**च्चेल्लणा**मेव भूपतिः ॥५॥
भोगाधिकारधिक्कारकारिवैराग्यरागिणी । ऐहत व्रतमादातुं **सुज्येष्ठा** स्वसृवञ्चिता ॥६॥
सम्बोध्य पितरावाप्य **चन्दनार्या**न्तिके व्रतम् । अतप्ताऽतीव सा तीव्रं तपः परमदुस्तपम् ॥७॥
अन्तर्वसति गुप्तैव[३] कदाचित्तपनातपे । आतापनां प्रतायन्ती[४] जिनाज्ञां तनुते स्म सा ॥८॥
इतश्च नाम्ना **पेढालः** परिव्राडतिखेचरः । सिद्धाऽनवद्यविद्यानां न्यासपात्रं समीहते ॥९॥
परे ब्रह्मणि लीनाया निष्कामाया य आत्मजः । जातो ब्रह्मविदा स स्यात् विद्यानां पात्रमुत्तमम् ॥१०॥
पुपुतित्रीयियिषतेत्येवमेतेन साऽन्यदा । अदर्शि दर्शनीयश्रीर्दर्शनं[1] श्रीरिवाश्रिता ॥११॥
मुष्टिग्राह्यतमो[५]मुष्टदृष्टि[६]निर्णष्टविष्टपम् । विकृत्य धूमरीमोहं विद्याविद्योतिवैभवः ॥१२॥
वायुमूर्त्तिमयस्फूर्त्तिः प्रणिधानविधानतः । तयाऽपि चाऽपरिज्ञातः शक्त्या स्वं बीजमक्षिपत् ॥१३॥ युग्मम् ॥
क्रमेणाऽथ स्फुटीभूते **सुज्येष्ठा** गर्भलक्षणे । शोधिताऽतिशयज्ञानैर्निर्विकारेति बोधिता ॥१४॥
जातः श्राद्धालये वृद्धोऽन्यदा नाम्ना स **सत्यकिः** । प्रभोः समवसरणं साध्वीभिः सह यातवान् ॥१५॥
[2][७]खेटः खेटशठस्तत्र जगज्जैत्रबलस्तदा । **श्रीवीरं कालसन्दीपः** को मां हन्तेति पृष्टवान् ॥१६॥
इतः **सत्यकि**तो मृत्युस्तवेत्युक्तेऽर्हता खगः । किं मां हन्ताऽसि[3] हन्तासि[4] ? तमिदं बाल[८]मालपत् ॥१७॥
**पेढाल**सङ्गृहीतोऽथ बाल आर्यानुलालितः । धीमानेकादशाङ्गानि कर्णश्रुत्यैव सोऽध्यगात् ॥१८॥
तीव्रप्राग्जन्मसंस्कारकारणोद्बोध[९]शोभिताः । विद्याः पितुरनुध्यानाद्विस्मृता इव सोऽस्मरत् ॥१९॥
प्राग्जन्माराधनादेव देवताः स्वयमेव ताः । स्वयं सौम्य ! वृतोऽसीति प्रत्यपद्यन्त तं प्रति ॥२०॥
त्वं **महारोहिणी**मेकां केवलं साधयाऽधुना । तत्सिद्धावेव सिद्धाः स्मः सिद्धौ मा संशयं कृथाः ॥२१॥

---

१. पुरा पुरी - B, C, A । २. सुज्येष्ठां - D, C । ३. तत्रैव - C । ४. पनायन्ती जिनाना - H, C, D, K । ५. तनोर्मुष्ट...A, L । ६. दृष्टि - B, KH, H । ७. खेटखेटः - C खेटः खेटः - D, A, K । ८. मापतत् - C । ९. शोधिताः - C ।

टि. 1. दर्शनं - दर्पणम् । 2. खेटः-अधमः । 3. असि (अव्य०)-त्वम् । 4. हन्तासि - हन् धातुः श्वस्तनी ।

तां हि साधयतो भक्त्या सप्तमोऽयं भवस्तव । तयाऽतिपातकी हि त्वं हतः पञ्चसु जन्मसु ॥२२॥
षष्ठे षण्मासशेषायुस्त्वं तुभ्यं कथितस्तया । ततस्त्वयैव सा नेष्टा तुष्टा तेनाऽस्ति सा त्वयि ॥२३॥
तथाऽपि सत्त्वाऽवष्टम्भारम्भादाराधयाऽधुना । प्रसीदति स्वयं सैव येन विघ्नापहारिणी ॥२४॥
विद्यानामित्यथादेशादसौ निश्चलनिश्चयः । [१]चर्मार्द्रं विद्धवानूर्ध्वमुखसूचीकदम्बकैः ॥२५॥
स मेधावी [1]समेध्योच्चैर्वह्निना सञ्चितां चिताम् । यावदग्निर्ज्वलत्येष प्रतिज्ञायेति चेतसा ॥२६॥
द्रुतं सञ्चरमाणश्च वामाङ्गुष्ठेन चर्मणि । विद्यां साहसनिष्ठानां पतिः स्म जपति स्वयम् ॥२७॥ युग्मम् ॥
तदैत्य **कालसन्दीप**श्चिराऽध्युषितमत्सरः । चिरं चितायां चिक्षेप दारुभारान् शनैः शनैः ॥२८॥
सप्ताहमित्थमुल्लङ्घ्य साक्षाद्भूयैव देवता । मा कार्षीर्विघ्नमस्येति स्वयं दुष्टं न्यवारयत् ॥२९॥
तं चाह साहसोत्तंस ! त्वं सत्यं सत्यसङ्गरः । यच्छ [2]प्रतीकमेकं मे येनाऽङ्गं प्रविशामि ते ॥३०॥
तद्वितीर्णेन भालेन वपुराविश्य तस्य सा । भाले बिलाऽपलापाय तृतीयं लोचनं व्यधात् ॥३१॥
मातुर्मे ब्रह्मनिष्ठाया विदधे विप्लवं कुतः । इति हन्ति स्म **पेढालं** प्रौढिमानपराधिनम् ॥३२॥
दृष्ट्वाथ **कालसन्दीपं** विद्याऽऽभोगात् पलायिनम् । लोकत्रयेऽपि तत्पृष्ठौ बम्भ्रमीति स्म सम्भ्रमी ॥३३॥
तद्वञ्चनचिकीः **कालसन्दीपः** स [3]पुरां त्रयम् । विचक्रे तच्च निर्ज्जित्य **सत्यकि**र्भस्मसाद् व्यधात् ॥३४॥
पलायन् वारिधेरन्तरन्तर्द्धानविधानकृत् । हतोऽथ **कालसन्दीपो** महापातालमाविशन् ॥३५॥
विद्याभिराविर्भूयाऽथ जगदे जगदेजनः । निर्माय मायामस्माभिर्वञ्चितस्त्वं कियच्चिरम् ॥३६॥
देशनासदनस्यान्तर्भगवच्चरणान्तिके । गोपितः **कालसन्दीपः** कोपिनस्ते भयात्परम् ॥३७॥
जगत्येकादशो रुद्रः सत्यमेवाऽसि **सत्यके** ! । विद्यानामपि मान्यस्त्वमस्मद्भक्तं विमुञ्च तम् ॥३८॥
विद्यानामुपरोधेनाऽर्हतश्चरणाश्रयात् । **सत्यकि**स्त्यक्तवैरोऽभूत् **कालसन्दीपकं** प्रति ॥३९॥
भजता[4]ऽनुत्तरं सम्यग्दर्शनं [5]खण्डपर्शुना । जिनास्त्रिकालं वन्द्यन्ते संगीयन्ते च [6]रूपकैः ॥४०॥
स चक्रवर्त्ती विद्यानां वशीकृतजगत्त्रयः । **पेढाल**स्य रुषा भेजे मत्सरं जातिभिक्षुषु ॥४१॥
तत्कन्यासु द्विजातीनां पत्नीषु च मखेषु च । स विप्लवचिकीश्चक्रे [7]धर्षणाऽऽकर्षणादिकाम् ॥४२॥
राजर्षीणामशेषाणामन्तःपुरपुरन्ध्रिषु । ऋषित्वस्येर्ष्यया रेमे तामसीं प्रकृतिं वहन् ॥४३॥
ऋषित्व-सकलत्रत्वे परस्परविरोधिनी । [8]उपचारं विनाऽन्यत्र स नाऽक्षमत **सत्यकिः** ॥४४॥
ब्रह्मचारिषु नैर्ग्रन्थ्यनैष्ठिकव्रतचारिषु । अमृष्यत महर्षित्वं सत्यमेवैष **सत्यकिः** ॥४५॥
ब्रह्मर्षिमानिनां तेन रममाणेन मानिनीः । तदीशाश्चक्रिरे क्रोधवह्निनैवाहिताग्नयः ॥४६॥
सहेलं खेऽतिखेलन्तं [9]पुष्पकेतनमन्वहम् । **नन्दीश्वरश्च नन्दी** च प्रियौ शिष्यावसेवताम् ॥४७॥

---

१. चर्माद्धं - A, L चर्मार्द्रि - KH, धर्माद्धं - L, चर्माद्र - C, चर्मार्द्र - K, चर्माद्धं - D ।

टि. 1. समेध्य - सम् + एध् + त्वा - वृद्धिं नीत्वा इत्यर्थः । 2. प्रतीकः - अवयवः, तम् । 3. पुर् (स्त्री०) - शरीरम्, तासां त्रयम् । 4. अनुत्तरं - क्षायिकसम्यग्दर्शनम् । 5. खण्डपर्शुः-शिवः, सत्यकिः । 6. रूपकं-अभिनयपूर्वकं दृश्यकाव्यम्, तैः । 7. धर्षणा-पराभवः । 8. उपचारः-सेवा, तम् । 9. पुष्पकेतनः-कामदेवः ।

अन्य**दोज्जयनी**शस्य **प्रद्योत**स्य क्षितीशितुः । **शिवां** मुक्त्वा [1]निशान्तस्त्री रमयामास सोऽखिलाः ॥४८॥
तद्वधायाऽवधायाऽथ **प्रद्योत**स्तं रुषा द्विषन् । स सभाजनमेकैकं पप्रच्छोपायमात्मना ॥४९॥
**उमा**नाम धियांधाम [2]तदोमित्यभिधाय सा । राज्ञे गाणिक्यमाणिक्यं निजमावासमासदत् ॥५०॥
सा चान्यदा गवाक्षस्था पुष्पकेण स चापतत् । अन्योन्यस्याऽतिधामानौ गतौ लोचनगोचरम् ॥५१॥
[3]भुजाग्रजन्मनोऽम्भोजादम्भोजं प्रविकस्वरम् । तस्मै स्मितमुखी सेयं याचमानाय नार्प्पयत् ॥५२॥
जगाद च न योग्यस्त्वमीदृशामप्रगल्भधीः । रमस्व मुकुलेष्वङ्गसङ्गतं नोचितीं विना ॥५३॥
[१]बहिरेव रताम्भोधेः प्लवसेऽद्यापि बालिशः । आचूलं गुल्फदघ्नेषु मग्नो [२]यस्त्वमवस्तुषु ॥५४॥
भेत्तुं दृढं [३]चलं सूक्ष्मं तदा श्री**सत्यके**र्मनः । एकैव वाणिनीवाणी पञ्चबाणी बभूव सा ॥५५॥
रूपं चारुगिरश्छेकाः कामकल्लोलिनीदृशः । एकैकमपि दुर्लङ्घ्यं व्यूढानेतान् सहेत कः ॥५६॥
स्वीचक्रेऽथ तया तस्य स तथा राग[४]सागरः । [५]छटामात्रोऽपि नान्यत्र यथाय[६]मवशेषितः ॥५७॥
मनस्तस्य तयाऽहारि दृष्टिसौष्ठवतः पुरा । रतौ कलाभिः संमूर्च्छ्य तदचङ्क्रमणं कृतम् ॥५८॥
तया संवसतस्तस्य निर्भरस्नेहमन्वहम् । जगाम सुमहान् काल एकसम्भोगलीलया ॥५९॥
विश्वासादेकजीवान्तःकरणाऽङ्गतया तयोः । सैव सेति मिथोऽप्यासीदद्वैतं प्रीतियोगतः ॥६०॥
अन्येद्युस्तं च विश्वस्तं साऽपृच्छत् तव वर्ष्मणि । सदा सन्निहिता विद्याः स्युर्दूरेऽप्यथ कर्हिचित् ॥६१॥
सदैव यन्त्रितस्वान्तो [७]रतियन्त्रक्षणं विना । सदा सन्निहिताः सन्ति सत्यमित्याह **सत्यकिः** ॥६२॥
तयाऽप्यजाकृपाणीयामप्रतर्क्य तदाऽऽयतिम् । रहस्तदा [4]तदागत्य **प्रद्योता**य निवेदितम् ॥६३॥
राज्ञां पण्याङ्गनानां च विश्रम्भं विदधीत कः । कार्यपर्याप्तये येषां मिथ्यैव हृदयाऽर्प्पणम् ॥६४॥
यथेष्टपत्रच्छेदादिखड्गाभ्यासविशारदैः । साऽपि प्रत्यायिता राज्ञा त्रैलोक्यं वञ्च्यते यया ॥६५॥
[८]घातिष्यते स एवैको भेतव्यं भीरु ! न त्वया । इति साऽऽश्वासिता धाम जगाम गजगामिनी ॥६६॥
**प्रद्योते**न द्वयं [९]घात्यमिति निर्गूढशिक्षया । तया सह रतारूढः **पेढालि**र्घातितो भटैः ॥६७॥
[5][१०]अधरीणां गतिं भेजे तदा विषयलम्पटः । उत्सर्प्पिण्यां तु भविता स श्रेष्ठः परमेष्ठिनाम् ॥६८॥
**नन्दीश्वर**मथाऽऽविश्य प्रियशिष्यं महेशितुः । क्रुधा विद्याभिराकाशे विचक्रे महती शिला ॥६९॥
[6]चण्डमाचष्ट **नन्दीशः** खमास्थायाऽतिरोषणः । उपस्थितो विनाशस्ते नासि दास हताश ! रे ! ॥७०॥
अथार्द्रपटसंवीतः संयुक्तः पौरपौरुषैः । स्वयमेव स [११]भूजानिः पूजानियम[१२]वानगात् ॥७१॥
तव दासोऽस्मि भृत्योऽस्मि प्रसीद परमेश्वर ! । कृतमज्ञानतो मन्तुमनुमन्तुं नमामि ते ॥७२॥

---

१. विरहे च...C । २. यमथवस्तुषु – KH । ३. बलं – KH । ४. सागरं – K, D, B, KH । ५. छायामात्रो... KH । ६. मवलोकितः K । ७. रतियत्र...KH, रतियत्न...-C, रतिप्रक्षणं – K । ८. पातिष्यते – K, D । ९. पात्य... K, D । १०. अथस्त्रीणां – A, L अधीराणां – K, D । ११. भूजानि – B, L भूजानिं – KH । १२. वान्जगौ – A, B, H ।

टि. 1. निशान्तं-अन्तःपुरम् । 2. तद् ओम् इति...तत्स्वीकृत्य इत्यर्थः । 3. भुजाग्रजन्म-हस्तः पाणिः इति यावत् स एव अम्भोजं, तस्मात् । 4. तद् रहः आगत्य...इत्यन्वयः । 5. अधरीणा-तिरस्कृता, ताम् । 6. चण्डप्रद्योतम् ।

जगाद [1]गामथ क्रोधादष्टधैश्वर्यमुद्वहन् । **नन्दीश्वरश्च नन्दी** च **चण्डप्रद्योत**भूभुजम् ॥७३॥
देवमेवंविधाऽवस्थमेव देवगृहे स्थितम् । **रुद्र**नाम्ना प्रतिष्ठाप्य प्रभुं सर्वत्र सर्वदा ॥७४॥
देव्या सह [2]महेशानमनावृतमनारतम् । यद्यर्च्चयसि तत् त्वं रे सह्यसे सह संपदा ॥७५॥ विशेषकम् ॥
राज्यजीवितकामेन तेन शम्भोर्महीभुजा । पर्यपूज्यत तल्लिङ्गं [१]जलाधाराश्रयं सदा ॥७६॥
लोकैरायतनेष्वेवमन्यैरपि तदर्च्यते । फलान्यपि प्रयच्छन्ति तदधिष्ठातृदेवता: ॥७७॥
पथ्यादपथ्यवदतथ्यमतीवतथ्यात् , प्राय: प्रियं च सरसं च नृणां तथा हि,
एकेन चेत् किमपि कल्पितमत्र मिथ्या; तस्मिन् गतानुगतिकी भवति त्रिलोकी ॥७८॥ [वसन्ततिलकावृत्तम्]

## इति सत्यकिकथानकम् ॥

इत्थं विषयाऽभिष्वङ्गिणां दोषमुक्त्वा गृहस्थस्याऽपि यथाविधिसाधूपास्तिपरस्य गुणानाविर्भावयति—

**सुतवस्सियाण पूया-पणामसक्कारविणयकज्जपरो ।**
**बद्धं पि कम्ममसुहं, सिढिलेइ दसारनेया व ॥१६५॥**

**सुतपस्विनां** साधूनां **पूजा-प्रणाम-सत्कार-विनय-कार्यपर:** सन् **बद्धमपि** उपार्ज्जितमपि **कर्म** ज्ञानावरणीयादि **अशुभं** क्लिष्टं **शिथिलयति** उद्वेष्टयति **दशार्हनेते**व यथा दशार्हनेता विष्णुर्बद्धं कर्मोद्वेष्टितवांस्तथान्योऽपीति । तत्र पूजा—भक्तपानवस्त्रपात्रोपकरणोपाश्रयादिभिरर्चा, प्रणामो—भावतो मूर्ध्ना नमस्कार: । सत्कारो— [1][3]जीवाऽऽदिशेत्यादिरूपो गुणस्तवगर्भ उपचार: । विनयोऽभ्युत्थानाऽऽसनदानाऽञ्जलिकरणादिसन्मान: । कार्यं—बालग्लानादिगोचरं प्रत्यनीकनिवारणादिविषयं वा अनेकरूपं तत्परस्तन्निष्ठ: सन् इत्यर्थ: ॥१६५॥ **दशार्ह**स्य कथा चैवम्—

## [ केशवकथानकम् ॥ ]

**श्रीनेमि:** समवासार्षीद्वर्षासु **द्वारका**पुरि । अन्येद्युस्तत्प्रणामाय निर्माय: **केशवो** ययौ ॥१॥
नत्वा शुश्रूषमाणोऽथ पप्रच्छ स्वामिनं **हरि:** । न किं चलन्ति वर्षासु दत्तहर्षासु साधव: ॥२॥
विश्वचक्षुरथाऽऽचख्यौ **नेमि**र्गम्भीरया गिरा । बहुजीवाकुलोत्कर्षा वर्षास्तन्नोचिता गति: ॥३॥
श्रुत्वेति श्रीपति: श्रीमान् जग्राह नियमं तदा । वर्षासु नि:सरिष्यामि क्वचिन्नाऽहं गृहाद्बहि: ॥४॥
निश्चित्येति जिनं नत्वा **हरि**र्धाम जगाम तत् । कोऽपि मोच्योऽन्तरा नेति द्वारपालं तथाऽऽदिशत् ॥५॥
**वीराख्य**स्तु पुरे तस्मिन् कुविन्दो वैष्णवाग्रणी: । अविलोक्य हृषीकेशं न भुङ्क्ते स्म कदाचन ॥६॥
आवासे न प्रवेशं स लेभे द्वारस्थितस्तत: । सपर्यां विष्णुमुद्दिश्य चक्रे नित्यमभोजन: ॥७॥
वर्षाऽन्ते निर्ययौ विष्णुर्गृहाद् भानुरिवाम्बुदात् । अपृच्छद् **वीरकं** धीर: किं कृशोऽसीति नीतिमान् ॥८॥
तद्वृत्ते कथिते द्वा:स्थैर्गृहेऽस्खलितमातनोत् । तं नाम देशनाधामाजगामोपजिनं [4]जिन: ॥९॥
साधुधर्मं जिनाधीशात् कर्ण्यमाकर्ण्य सोऽवदत् । नास्मि श्रामण्ययोग्योऽहमस्तु मे नियमस्त्वयम् ॥१०॥

---

१. जलधारा - D, C । २. जीवादिरूपो - KH ।

टि. 1. गौ-गिरा, ताम् । 2. शङ्करम्, सत्यकेर्जीव: । 3. जीव, आदिश इति । 4. जिन: - विष्णु: ।

न निषेद्धयो व्रतात्कश्चित् कार्यः किन्तु व्रतोत्सवः । सर्वस्यापि मया विष्णुरभिगृह्येत्यगाद् गृहम् ॥११॥ युग्मम् ॥
विवाह्याः स्वसुताः प्राह **कृष्णः** स्वं नन्तुमागताः । दासीत्वं स्वामिनीत्वं[१] वा भवतीभ्यो ददामि किम् ॥१२॥
याचितस्वामिनीत्वे च ताभिरभ्युद्यतो **हरिः** । ग्राहयामास ताः सर्वाः प्रव्रज्यां **नेमि**सन्निधौ ॥१३॥
कन्याऽन्यदाऽवदन्मातृशिक्षिता **केतुमञ्जरी** । भविष्यामि भुजिष्या[1]ऽहं तात ! न स्वामिनी पुनः ॥१४॥
अन्याः कन्या ममेदृक्षं मा वदन्त्विति[२] विष्णुना । तद्विवाहधिया पृष्टो विक्रमं **वीरकः** स्वयम् ॥१५॥
वीरंमन्यस्ततो **वीरः** कुविन्दोऽवोचदच्युतम् । बदरीस्थो मया ग्राव्णा कृकलासो हतो मृतः ॥१६॥
चक्रमार्गे मया वारि वहद्वामांह्रिणा धृतम् । मक्षिकाः पानकुम्भ्यन्तर्धृता द्वारस्थपाणिना ॥१७॥
सभासीनो द्वितीयेऽह्नि **विष्णु**र्भूमीभुजोऽवदत् । **वीरक**स्याऽस्य वीरत्वं कुलातीतं किमप्यहो ॥१८॥
येन रक्तफणो नागो निवसन् बदरीवणे[2] । निजघ्ने भूमिशस्त्रेण वेमतिः क्षत्रियो ह्ययम् ॥१९॥
येन चक्रक्षता गङ्गा वहन्ती कलुषोदकम् । धारिता वामपादेन वेमतिः क्षत्रियो ह्ययम् ॥२०॥
येन घोषवती सेना वसन्ती कलसीपुरे । निरुद्धा वामहस्तेन वेमतिः क्षत्रियो ह्ययम् ॥२१॥
इत्युक्त्वा पौरुषं स्पष्टं क्षत्रियेषु **जनार्दनः** । तां **केतुमञ्जरीं** कन्यां **वीरके**णोदवाहयत् ॥२२॥
**वीरक**स्तां गृहे नीत्वा तस्या दास इवाऽभवत् । आज्ञया **केशव**स्याऽथ तां दासीमिव चक्रिवान् ॥२३॥
पराभूता तु सा **विष्णो** रुदतीदं न्यवेदयत् । **कृष्णो**ऽवोचत् त्वया हित्वा स्वाम्यं दास्यमयाच्यत ॥२४॥
साऽवोचदधुनापि त्वं स्वाम्यं तात ! प्रयच्छ मे । अथ प्राव्राजयत् पुत्रीं **कृष्णो**ऽनुज्ञाप्य **वीरकम्** ॥२५॥
एकदा प्रददौ **विष्णु**र्द्वादशावर्त्तवन्दनम् । विश्वेषामपि साधूनां मुदा तदनु **वीरकः** ॥२६॥
ऊचे **हरि**र्विभुं षष्ट्यधिकैर्युद्धशतैस्त्रिभिः । न श्रान्तोऽहं तथा नाथ ! यथा वन्दनयाऽनया ॥२७॥
अभ्यधत्त ततः स्वामी श्रीमन्नद्य त्वयार्ज्जिते । साक्षात् क्षायिकसम्यक्त्व-तीर्थकृन्नामकर्मणी ॥२८॥
सप्तम्या दुर्गतेरायुरुद्धर्त्याऽद्य त्वया **हरे** ! । साधुवन्दनया चक्रे तृतीयनरकोचितम् ॥२९॥
**कृष्णो**ऽवदत् पुनर्देयं वन्दनं शमिनां मया । नारकायुर्यथा शेषं मम मूलादपि त्रुटेत् ॥३०॥
द्रव्यवन्दनमित्थं ते न भवेद् दुर्गतिच्छिदे । इत्युक्तः स्वामिनाऽपृच्छत् **वीरक**स्य फलं **हरिः** ॥३१॥
अथाऽभ्यधत्त तीर्थेशः क्लेश एवास्य तत्फलम् । वन्दिताः साधवोऽनेन यतस्त्वदनुवर्तनात् ॥३२॥
**विष्णु**वत् मुनिषु वन्दनदानं भावतो भवति पुण्यनिदानम् ।
**वीर**वत् वितथवासनमुच्चैः क्लेशमात्रफलमेव तदेव ॥३३॥ [स्वागतावृत्तम्]

**इति केशवकथानकम् ॥**

एतदेवाह—

**अभिगमण-वंदण-नमंसणेण पडिपुच्छणेण साहूणं ।**
**चिरसंचियं पि कम्मं, खणेण विरलत्तणमुवेइ ॥१६६॥**

---

१. स्वामिकात्वं - KH, D, K । २. वदन्निति - K, KH, A, D ।

टि. 1. भुजिष्या - दासी । 2. २।३।६७ [द्वि-त्रिस्वरौषधि....] हेम० इत्यनेन वनस्थनकारस्य णः ।

**अभिगमनम्** आगच्छतोऽभिमुखयानं **वन्दनं** गुणोत्कीर्त्तनं **नमस्करणं** कायमनःप्रह्वता, तेषां द्वन्द्वैकवद्भावे तेन, तथा **प्रतिप्रच्छनेन** शरीरवार्त्तादिविषयेण क्रियमाणेन, **साधूनां** ज्ञानादिभिर्मोक्षसाधकानां **चिरसञ्चितमपि** प्रभूतभवोपात्तमपि **कर्म** ज्ञानावरणादि, **क्षणेन** स्वल्पकालेन, **विरलत्वम**ल्पत्व**मुपैति** प्राप्नोति अभिगमनादिकर्तुरिति गम्यम् ॥१६६॥

तदेवं विनयवानात्मोपकारमिव आराध्यजनोपकारमपि जनयतीत्याह–

**केई सुसीलसुहम्माइसज्जणा, गुरुजणस्स वि सुसीसा ।**
**विउलं जणंति सद्धं, जह सीसो चंडरुद्दस्स ॥१६७॥**

**केचिन्न** सर्वे, **सुशीलसुधर्मातिसज्जनाः सुशीला** विशिष्टेन्द्रियसमाधानवन्तः, **सुधर्माणः** पवित्रश्रुतचारित्राः, **अतिसज्जनाः** सर्वप्राणिनाम् अमृतपरिणामतया, ते तथाविधा, **गुरुजनस्याप्या**ऽऽराध्यवर्गस्याऽपि **सुशिष्याः** प्रधानविनेयाः **विपुलां जनयन्ति श्रद्धां** संवेगरूपां क इव ? **यथा शिष्यश्चण्डरुद्रस्येति** ॥१६७॥ तत् कथानकं चेदम्–

**[ चण्डरुद्रशिष्यकथानकम् ॥ ]**

आचार्यः पञ्चधाचारपरिचर्यापरायणः । **चण्डरुद्रः** श्रुताम्भोधेः पारीणोऽजनि विश्रुतः ॥१॥
निष्ठानिष्ठुर[१]धीरे[1]नःशोषणः सैष [२]रोषणः । वसन् गच्छाददूरस्थो विजहार महातपाः ॥२॥
कदाचि**दुज्जयिन्यां** च तस्मिन्नुद्यानवासिनि । मित्रैः समं नवोद्वाहमङ्गलः कश्चिदाययौ ॥३॥
केलिप्रियतया तस्य वयस्या जगदुर्मुनीन् । अस्य व्रतं विरक्तस्य प्रसद्याऽद्यैव दीयताम् ॥४॥
गन्धमाल्याऽम्बरोदारनेपथ्यप्रथितोत्सवम् । तमालोक्य विनिश्चिक्युः साधवस्तान् प्रहासिनः ॥५॥
दध्युस्ते साधवोऽप्येवं धृष्यतां कलिना कलिः । दीक्षार्थं प्रेषयामासुर्गुरोरेवाऽन्तिकं च तान् ॥६॥
विज्ञप्तस्तद्वदेवैभिर्गुरुरप्येष रोषणः । समानयत भस्मेति तानेवाह प्रहासिनः ॥७॥
तैर्भस्मन्युपनीतेऽथ चक्रे लोचं गुरुः स्वयम् । आसन् वयस्या दीनास्याः स तु चिन्तितवानिदम् ॥८॥
गुरोः क इव दोषोऽयं दीक्षामदित योऽर्थितः । सद्भावतो गुणीभावमात्मनाऽपि नयामि ताम् ॥९॥
वयस्याः ! श्रित एवाऽहं गुरून् परमतः परम् । स विसृज्येति मित्राणि स्वयं तत्रैव तस्थिवान् ॥१०॥
ऊचे च प्राञ्जलिः सूरीन् पितृस्वजननागराः । यावत्ते न विजानन्ति तावदन्यत्र [३]गम्यते ॥११॥[2]
ततः स निजबन्धुभ्यो बलात्कारं विचिन्तयन् । गुरूनुवाच वाचं च वाचंयमशिरोमणिः ॥१॥[3]
भगवन् ! प्रसादमाधाय विहारं कुरुत द्रुतम् । अन्यथा मे स्थितस्याऽत्र बान्धवेभ्यो महद्भयम् ॥२॥
गुरुराह तदानीं भो ! नाऽहं पश्यामि यन्निशि । ततस्त्वं प्रथमं गत्वा मार्गमालोकयाऽधुना ॥३॥
गुर्वादेशमिमं प्राप्य, मार्गमालोक्य च द्रुतम् । गुरून् विज्ञपयामास स सात्त्विकशिरोमणिः ॥४॥
मया निरूपितो मार्गः, पूज्याः ! पादोऽवधार्यताम् । इत्युक्ते तेन स गुरुश्चचाल निशि सत्वरः ॥५॥

---

१. धीरेतः – D धीरेन – H, KH वीरेण – L, A । २. रोपणः – D, K । ३. गम्यतां – B ।

टि. 1. एनस्-पापम्, तं शोषयति । 2. अयं श्लोकः C, L, B, KH, K, D आदर्शेष्वस्ति, A, H आदर्शयोर्नास्ति । 3. इतः सप्त श्लोकाः A, H आदर्शयोरेव ।

ततस्तततमश्छन्ने मार्गे निम्नोन्नते गुरुः । स्खलित्वा निपतन् भूमौ शैक्षं चुक्रोश रोषणः ॥६॥
रे ! रे ! पापिष्ठ ! दुष्टेन दृष्टः पन्थास्त्वयेदृशः । गुरुणा ताडितो मूर्ध्नि दण्डेनेति व्यचिन्तयत् ॥७॥
इति श्लोकाः पाठान्तरगताः ।
प्रत्युपेक्षस्व पन्थानं निशि निर्गम्यते यथा । इत्थं गुरुभिरादिष्टे तथा साधुर्व्यधत्त सः ॥१२॥[1]
निःसस्रतुस्तमिस्रायां शिष्योऽग्रे मार्गतो गुरुः । पथि प्रस्खलितः शिष्यं दण्डेनाऽऽहतवान् पुनः ॥१३॥
तापितोऽपि स दुर्वाक्यैर्गुरुणा ताडितोऽपि च । विनेयो नाप वैवर्ण्यं स्फोटं वा जात्यहेमवत् ॥१४॥
दध्यौ च सुखमासीनो गुरुरासीन्महातपाः । मया पातकिनाऽपाति धिक्कष्टं क्लेशसङ्कटे ॥१५॥
इहलोकोपकर्तॄणां सुखं स्यादनृणः पुमान् । **गुरूणां तु ऋणान्मुक्तिः काकतालीययोगिनी** ॥१६॥
गुरूणामधमर्णत्वान्मोक्षः कौतस्कुतोऽस्तु मे । प्रत्युतानर्थदानेन ऋणार्णं प्रार्णतामगात् ॥१७॥
नमस्तीर्थकरायाऽस्तु स्वस्त्यस्तु श्रुतसम्पदे । क्व तद् द्वयं क्व वा मादृग् गुरुश्चेन्न प्रसीदति ॥१८॥
धन्यास्ते तैर्जितं तेषां सुलब्धं जन्म जीवितम् । बाला इवाऽऽर्जवेनैव ये गुरून् पर्युपासते ॥१९॥
रेजे[2] नु क्षपकश्रेणि[3]घ्नतो मोहमहाचमूम् । तदा तस्याऽवदातस्य ध्यानस्य मिषतो यशः ॥२०॥
स्थितायां धर्मसेनायां संयमेऽप्यक्षतोद्यमे । गुरुभक्त्यैकयाऽजैषीत् कर्मणां स चमूममूम् ॥२१॥
ध्यानान्तरिकया कर्मजयप्राप्तपताकया । तदासौ नितरां रेजे महासत्त्वमतल्लिका ॥२२॥
तदा सिद्ध्यङ्गनामुक्तस्वयंवरणमाल्यवत् । सौरभ्यव्याप्तविश्वान्तं केवलज्ञानमाप सः ॥२३॥
ज्ञानेन विषमांस्त्यक्त्वा समेनैव पथा नयन् । प्रत्यानिनाय स प्रीतिं स्वं प्रति व्रतिनां प्रभुम् ॥२४॥
प्रभामिवाऽथ दोषान्ते तन्मौलौ शोणितश्रुतिम् । रक्तामनूज्जिहीते[2] स्म विवेकार्कस्तदा गुरोः ॥२५॥
अहो क्षान्तिरहो शान्तिरहो दान्तिरहो व्रतम् । फलितोऽस्य फलैः स्फीतैः शैक्षस्याऽपि तपस्तरुः ॥२६॥
शैक्षोऽपि माननीयोऽयं वृथा वृद्धेन किं मया । त्रिधापि[3] यस्य मे वन्ध्यं स्थविरत्वं शमं विना ॥२७॥
इत्थं शिष्यगुणध्यानादात्मदोषानुतापतः । **चण्डरुद्रो**ऽपि रौद्रोद्यत्कर्मद्रोहि मनोऽकरोत् ॥२८॥
क्षणेन श्रेणिमासाद्य क्षीणमोहः स केवलम् । प्राप प्राप्यैव शिष्येण भक्त्येव प्राभृतीकृतम् ॥२९॥
**गुरोः स्वस्त्यस्तु पुण्यानां तेषां यैरीदृशः किल । सुशिष्यः प्राप्यते चिन्तामणिवद् गुणिनां गुणी** ॥३०॥

**इति चण्डरुद्रशिष्यकथानकम्** ॥

**चण्डरुद्रो**पाख्यानेन क्रोधादिभिर्दुराराध्योऽपि गुरुराजन्मविनयेनाराधनीय इत्युपदिश्य एतदेवाऽभव्यतया परित्याज्यस्यापि गुरोः सुशिष्याः कृतज्ञतमतया जन्मान्तरेऽपि पक्षपातमेव कृतवन्त इति दृष्टान्तेन दृढयति–

**अंगारजीववहगो, कोई कुगुरू सुसीसपरिवारो ।**
**सुमिणे जईहिं दिट्ठो, कोलो गयकलहपरिकिन्नो ॥१६८॥**

---

१. शिष्यं - A । २. रोहतः - C । ३. श्रेणिं - C, A ।

टि. 1. इतो यावत् सप्तदशमः श्लोकः A, H आदर्शयोर्नास्ति । 2. उदयं प्राप्तः इत्यर्थः । 3. वयःपर्यायश्रुतेन त्रिधाऽपि स्थविरत्वं तदनुरूपफलं शमं विना वन्ध्यं इत्यर्थः ।

**सो उग्गभवसमुद्दे, सयंवरमुवागएहिं राएहिं ।**
**करहोवक्खरभरिओ, दिट्ठो पोराणसीसेहिं ॥१६९॥**

गाथाद्वयस्यापि सुखावबोधार्थं पूर्वमुपाख्यानमुच्यते–

**[ अङ्गारमर्दकोपाख्यानम् ॥ ]**

जगर्ज्ज गर्ज्जकद्रङ्गे पुरा श्रुतसुधारसः । सूरि**र्विजयसेना**ह्वः सदा घन इवोन्नतः ॥१॥
शिष्याः प्रत्येकशस्तस्य शस्तस्य गुणसम्पदा । रत्नत्रयगरीयांसो बभूवुर्भुवनोत्तमाः ॥२॥
प्रातः कदाचिदाचार्यपादेभ्यस्ते व्यजिज्ञपन् । अदर्शि निद्रया [1]शास्तरिन्द्रजालमिवाद्य नः ॥३॥
दर्शयित्वा यतः कोलं कलभैः परिवारितम् । निद्राऽऽप सापराधेव तिरोभावं क्षणेन नः ॥४॥
स्वप्नं विमृश्य ते सम्यगधिगम्य धिया स्वयम् । जगदुर्जगदुत्तंसाः सूरयः शमभूरयः ॥५॥
सदाचारः परीवारः कदाचारः स्वयं गुरुः । रत्नैर्वृत इवाङ्गारः समेष्यत्यद्य वोऽतिथिः ॥६॥
सम्यग् यावत्प्रतिक्रम्य प्रत्युपेक्ष्योपधिं क्रमात् । ते सूत्रपौरुषीमर्थपौरुषीं च वितन्वते ॥७॥
तावदभ्याययौ सूरिः शिष्यैः पञ्चशतीमितैः । एरण्डवदसारात्मा परं कल्पद्रुमैर्वृतः ॥८॥
**रुद्रदेवो**ऽभिधानेन रूपेण विषमाकृतिः । निर्णीतो दृष्ट एवाऽयमभव्य इति सूरिभिः ॥९॥ त्रिभिर्विशेषकम् ॥
वास्तव्यैर्व्यवहारेण तथाऽप्येष सुसाधुभिः । अभ्युत्थायासनं दत्त्वा त्रिः परीयाऽथ वन्दितः ॥१०॥
अशेषं शेषकृत्यं च चक्रुस्ते गुर्वनुज्ञया । तावत्तेषां विकालस्य यावत्काल उपस्थितः ॥११॥
गुरोर्नियोगतः कोलगुरुं गुप्तं परीक्षितुम् । यतयः कायिकाभूमाविङ्गालानकिरन्निशि ॥१२॥
कीटभ्रान्त्या पदाक्रान्तेङ्गा[१]लाः कसरकध्वनेः । यतयोऽतिथयो मिथ्यादुष्कृतं भावतो ददुः ॥१३॥
श्रुत्वा तु तद्गुरुस्तद्वदिङ्गालाक्रमणध्वनिम् । म्रियन्ते जन्तवो दिष्ट्या जिनस्येति जगुः शनैः ॥१४॥
गुप्तं प्रतिचरन्तस्तत् ज्ञात्वा वास्तव्यसाधवः । गुरो**र्विजयसेन**स्य सर्वमेव व्यजिज्ञपन् ॥१५॥
ते यथार्थमथाचख्युर्व्रतिनः प्रति सूरयः । हस्तिनस्त इमे शिष्याः कोलः स च परं गुरुः ॥१६॥
धर्मदेशनयाचार्यैः प्रगे हेतूपपत्तिभिः । शिष्याः प्रबोधिताः सूरिरभव्यो भवतामिति ॥१७॥
उपायेन ततः कोलगुरुं त्यक्त्वा [२]तपस्विनः । ते श्रामण्यमसामान्यं पालयित्वा दिवं ययुः ॥१८॥
दिवश्च्युत्वा ततोऽत्रैव वर्षे **भारत**नामनि । ते **वसन्तपुरे** राज्ञो **दिलीप**स्याऽभवन् सुताः ॥१९॥
कन्याः स्वयंवरे राज्ञाऽऽहूताः **कनककेतु**ना । उद्यौवनाः कलादक्षा जग्मुस्ते **हस्तिनापुरे** ॥२०॥
भूरिभारधरं सर्पिःकुतपाक्रान्तकन्धरम् । तत्रैक्षन्त लताघातराविणं [2]रवणं च ते ॥२१॥
कृपावत्याऽथ मत्या तमत्यादरमनारतम् । तेषां विलोकमानानामभूज्जन्मान्तरस्मृतिः ॥२२॥
हा धिगाधिकरः पूर्वगुरुः करभतां गतः । अनागतं हि देवत्वे ज्ञानेनैवं निवेदितः ॥२३॥
धिगस्याऽऽचार्यता[३]मूल आचारः पञ्चधापि सः । [3]मरुत्तरुः परं मूलान्मिथ्यात्वमरुता हतः ॥२४॥

---

१. लाकसरकध्वने – A, B । २. तपस्विभिः – B, H, तपस्विनिः – A । ३. मूलं – K ।

टि. 1. हे शास्तर् ! इन्द्रजालं इव... इति वाच्यम् । 2. रवणः – करभः, तम् । 3. मरुत्तरुः – कल्पवृक्षः, आचार एव मरुत्तरुः ।

मिथ्यात्वं परमा निद्रा मिथ्यात्वं परमान्धता । मिथ्यात्वं परमो मोहो मिथ्यात्वं परमं तमः ॥२५॥

मिथ्यात्वं श्रेयसामीतिर्मिथ्यात्वं सम्पदां क्षयः । मिथ्यात्वं दुर्गतौ यानं मिथ्यात्वं पाप्मनः खनिः ॥२६॥

घनं खलु [1]खलूक्त्वा वा मूलात् मूर्च्छामयात्मनः । संसारविषवृक्षस्य मिथ्यात्वमिह बीजति ॥२७॥

सम्यक्त्वं तज्जयेनाप्य नाप्यस्माकमतः परम् । [2]साम्प्रतं [3]साम्प्रतं कर्तुं साक्षादविरतौ रतिः ॥२८॥

इत्थं [4]विषयभूतघ्नो भूत्वा भवमरुप्रियः । स तेषां सद्गतेर्मार्गे कण्टकाशनतामगात् ॥२९॥

यच्च येन यतः प्राप्यं तत्तेन तत आप्यते । तैस्तदाऽपि ततो बोधिः कुमारैर्यदलभ्यत ॥३०॥

सदा जागर्त्यहो भाग्यमभव्यः करभोऽपि यत् । तेषां बोधाय सोऽधावत् **कुत्र वा न श्रियः सताम्** ॥३१॥

तं धनै[5]र्मयमुन्मोच्य धनिकात्ते नृपात्मजाः । चैत्येष्वष्टाहिकां कृत्वाऽपृच्छन् पितरमात्मनः ॥३२॥

पण्डिताः खण्डितां कृत्वा राज्यश्रियमखण्डिताम् । दीक्षा**मार्यसमुद्रा**न्ते जगृहुस्ते नृपात्मजाः ॥३३॥

**इति अङ्गारमर्दकोपाख्यानम् ॥**

अथाक्षरार्थः । **अङ्गारजीववधको**ऽङ्गारा एव तद्विकल्पाज्जीवाः प्राणिनस्तेषां वधको विनाशकः, **कश्चित् कुगुरुः** कदाचार्यः, **सुशिष्यपरिवारः स्वप्ने यतिभिर्विजयसेना**चार्यशिष्यै**र्दृष्टः**, **कोलः** शूकरो **गजकलभपरिकीर्णो** बालेभपरिवारित इति । **स उग्रे भव** एव **समुद्रे** नानाजन्मसु भ्रमन्निति शेषः । **स्वयंवरम्** अवयवे समुदायोपचारात् स्वयंवरमण्डपम् **उपागतै राजभि**र्नृपैः । **करभः** सन्नु**पस्करभृतो** भारपूरितो **दृष्टः** । **पुराणशिष्यैः** पूर्वजन्माऽन्तेवासिजीवैरिति ॥१६८॥१६९॥

**अङ्गारमर्दक**दृष्टान्तेनैव भवाभिनन्दिजीवाननूद्य लघुकर्मकजीवस्वरूपं व्यतिरेकत आह–

**संसारवंचणा न वि, गणंति संसारसूयरा जीवा ।**
**सुमिणगएण वि केई, बुज्झंति पुप्फचूला वा ॥१७०॥**

**संसारवञ्चनाः** स्वल्पविषयगृद्धानां नारकादियातनाप्राप्त्या विप्रलम्भनास्ता, **नाऽपि** नैव **गणयन्त्या**-कलयन्ति **संसारशूकरा** भवगर्त्तकोलकल्पा गुरुकर्माणो **जीवाः** प्राणिनः । भवाभिनन्दिजीवस्वरूपमित्थमनूद्य शिवाभिनन्दिजीवस्वरूपं व्यतिरेचयति-**स्वप्नगतेनाऽपि** आस्तां जाग्रद्दशायामनुभवधर्मोपदेशादिभिः, किन्तु निद्रामेध्योद्भूतज्ञानेनाऽपि **केचित् लघुकर्मकाः बुध्यन्ते** तत्त्वमिति गम्यम् । **पुष्पचूलावदि**त्यक्षरार्थः ॥१७०॥ भावार्थाऽवबोधाय कथैवमनुश्रियते –

**[ पुष्पचूलाकथानकम् ॥ ]**

श्रीवल्लिवृद्धिकृत्कुम्भि[6]वमथु**र्मथुरा** पुरी । उदीच्यामस्ति [7]पस्त्याग्रमुक्तास्तबकबन्धुरा ॥१॥

श्रीदमित्रमिवामुत्र वणिक्पुत्रः श्रियांनिधिः । सखेव कामदेवस्य **देवदत्ता**ऽभिधोऽभवत् ॥२॥

---

१. जीवति – B वीजतिः-KH, A, H । २. बोधि B धिगधि – L । ३. ष्टाहिकां – A । ४. कल्पा जीवाः – KH, L । ५. सिद्धमध्योद्भूत – L, A निद्रामिथ्यो...D निद्रामध्यो...KH, निद्रामिध्यो – K ।

टि. 1. उक्त्वा खलु, कृतं अलं इति यावत् । 2. इदानीम् । 3. युक्तम् । 4. भूतघ्नः, मरुप्रियः, कण्टकाशनः एते त्रयोऽपि शब्दाः करभस्य वाचकाः । घटना तु एवम् गुरोर्जीवः स करभस्तेषां सद्गतेर्मार्गे वाहनत्वेन करभतामगात् कथं ? स एव-विषया एव भूतास्तेषां हन्ता तत्र निमित्तत्वात्, स अभव्यत्वात् भवमरुप्रियः । 5. मयः करभः । 6. वमथुः हस्तिकरान्निःसरन्तो जलबिन्दवः । 7. पस्त्यम्-गृहम् ।

कथञ्चिदप्यनुज्ञाप्य पितरौ वत्सवत्सलौ । दक्षिणां **मथुरा**मर्थानर्ज्जितुं सोऽन्यदाऽगमत् ॥३॥
तस्याऽन्योन्यरहस्योक्तिश्रीनिधानान्धकूपिका । **जयसिंहेन** तत्राऽभूद्वणिक्पुत्रेण मित्रता ॥४॥
स्वसाऽस्ति **जयसिंह**स्य सिंहोदरकृशोदरी । रूपं [1]रूपस्वरूपाणा**मन्निका** नाम कन्यका ॥५॥
व्याजहार स्वसारं तां **जयसिंहः** प्रगेऽन्यदा । भोक्ष्येऽद्य सह मित्रेण चित्रां रसवतीं कुरु ॥६॥
महारसाढ्यां तद्दृष्टिपीयूषरसवृष्टिभिः । चकार किङ्करीवारः सारां रसवतीं ततः ॥७॥
भोक्तुं प्रीतिगुणस्यूतहृदौ तौ सुहृदौ ततः । निविष्टौ साम्यसौहार्दसुश्लिष्टासनभाजनौ ॥८॥
महारसान् रसवतीकवलान् धवलान् स्मितैः । मिथः कथासुधापानोपदंशीचक्रतुश्च तौ ॥९॥
स्त्यानीकर्तुमिव प्रेमामृतं तादृशमेतयोः । चेलाञ्चलेन रचयाञ्चकारानिल**मन्निका** ॥१०॥
सकङ्कणक्वणस्तस्याश्चलचेलाञ्चलो भुजः । लेभे स्मराश्वसञ्चारचित्रशिक्षाकशोपमाम् ॥११॥
तां कङ्कणझणत्कारलीलावलितया दृशा । **देवदत्तो** निदध्यौ च दध्यौ च स्मरवेध्यताम् ॥१२॥
तस्यां घृतादिपात्रान्तस्तद्बिम्बे वा दृशं क्षिपन् । मन्दं मन्दं स बुभुजे तच्चिरालोकसस्पृहः ॥१३॥
भुक्तोत्तरं तरन्मुक्त्वा तल्लावण्यार्णवे मनः । स जगाम निजागारं **जयसिंहेन** सत्कृतः ॥१४॥
तेनाऽथ **देवदत्तेन** प्रहिताः सुहृदो मुदा । **जयसिंह**मयाचन्त कन्यकामेत्य सादरम् ॥१५॥
**जयसिंहो** जगादैतानुचितो रुचितो वरः । कलालीनः कुलीनोऽयं रूपी भूपीठविश्रुतः ॥१६॥
किं पुनः परमं नाम जीवित[2]व्यमियं मम । तदहं जवतो यामि यामि[3]मेनामृते मृतिम् ॥१७॥
दास्यामि तदिमां तस्मै यः स्थास्यति मदौकसि । देवतेव भृशं भक्त्या पूज्यमानो मयाऽन्वहम् ॥१८॥
सोऽद्य श्वो वाऽपि गन्तैव यतो वैदेशिको व्रजन् । पूजितोऽप्यसकृद्यत्नैः स्थापितोऽपि न तिष्ठति ॥१९॥
यद्यपत्योद्भवं यावद् **देवदत्तो**ऽत्र तिष्ठति । तदुद्वहतु [1]मज्जामिमहं मज्जामि संमदे ॥२०॥
इति श्रुत्वा च मत्वा च तन्मित्रान्तरितं वचः । [4]उदूहे **देवदत्तेन** सा महेन महीयसा ॥२१॥
खेलन् तया समं सैष मग्नः सुख[5]सुधाम्बुधौ । यान्तं जज्ञे महास्नेहो[2]ऽनेहसं नेह संस्थितः ॥२२॥
स्थितस्य तस्य तत्रैवं लेखो हृल्लेखवृद्धिकृत् । **उत्तरमथुरा**स्थाभ्यां पितृभ्यां प्रहितो तदा ॥२३॥
रुदतोरुदयद्दीर्घत्वद्वियोगनियोगयोः । अक्षीणि क्षीणतेजांसि बभूवुस्तावदावयोः ॥२४॥
आकारयति नौ कालः स आवाभ्यां निषिध्यते । नित्यं जराशिरःकम्पमिषात् त्वन्मुखमीक्षितुम् ॥२५॥
कुलीन ! दीनयोरेकवारं स्वं दर्शयाऽऽवयोः । समाधि[6]राधित्रासेन यथा स्यान्म्रियमाणयोः ॥२६॥
इत्येष लेखमालोक्य श्रवदश्रुर्व्यचिन्तयत् । धिग्मां विषयमग्नं वाक्बद्धमुन्मङ्क्तुमक्षमम् ॥२७॥
मदेकपुत्रिणौ वृद्धौ बद्धाशौ मयि वत्सलौ । पालनीये वयसि तौ धिग् मया दूरमुज्झितौ ॥२८॥

---

१. स्वरूपाणांमन्नि...K, D, KH, L स्विरूपाणामन्नि - B, H । २. व्यमिमं - D, K व्यमयं - C । ३. मेतामृते - H । ४. उद्वहे - KH । ५. सुखांबुधौ - L, KH, B, K, D । ६. राधित्रासेन - D, K, KH राधिनाशेन - C ।

टि. 1. मम भगिनीम् । 2. अनेहस् - कालः, तम् ।

उद्यदु:खाङ्कुरभरो विध्यातमदनाऽनलः । इति ध्यानेन वर्षावद्ववर्षाऽश्रुजलैरसौ ॥२९॥
तदश्रुमार्जनैर्वासः कञ्चुकं च निजाश्रुभिः । क्लेदयन्त्यथ तद्दु:खदु:खिन्यूचे तमन्निका ॥३०॥
स्वामिन् ! कस्यैष लेखेन्दुर्यत्र तेऽब्जायते मुखम् । चन्द्रकान्तायते दृष्टिरदृष्टिः कुमुदायते ॥३१॥
इत्येतयातिपृष्टोऽपि न किञ्चिदयमूचिवान् । हृदि दृग्वारिवाहिन्योः संभेदं केवलं व्यधात् ॥३२॥
तदेषा लेखमादाय दु:खस्वादाय वीक्ष्य च । मृगीदृशीदृगाचष्ट कष्टक्लिष्टं पतिं प्रति ॥३३॥
मा नाथ ! मज्ज दु:खाब्धौ बोधयाम्यद्य बान्धवम् । अचिरादेव यास्याव आवामावासमात्मनः ॥३४॥
श्वश्रूत्कण्ठोन्मुखी बन्धुमापृच्छ्याऽथ महाग्रहात् । सा प्रियेण सहाऽचालीद्वाचालीकृतदिग् गुणैः ॥३५॥
तस्या विकाशिताशेषस्वजनाऽऽननपङ्कजः । वहन्नहर्पतिस्पर्द्धामर्द्धाऽध्वनि सुतोऽजनि ॥३६॥
करिष्यतोऽस्य नामादि मदीयौ पितराविति । **अन्निकापुत्र** इत्येष **देवदत्त**स्तमभ्यधात् ॥३७॥
अथ त्रुटत्पथस्फायमानोत्कण्ठाधिकत्वरः । अग्रेपितृ जगामाऽयं रामासुतयुतः क्रमात् ॥३८॥
विनयन्[1] विनयाऽधिक्यात् दु:खं दूरवियोगजम् । **देवदत्तो** नमन् पित्रोश्चरणौ मूर्द्धनि न्यधात् ॥३९॥
ताभ्यामुत्थाप्य हर्षेणाऽऽलिङ्गितो मूर्ध्नि चुम्बितः । पृष्टश्च वत्स ! कालेन त्वया किमियताऽर्ज्जितम् ॥४०॥
दोर्भ्यामथाऽयमादाय तयोस्तनयमर्प्पयन् । वधूटीं दर्शयंश्चाख्यदर्ज्जनेयं ममेयती ॥४१॥
आवां पुत्रानपत्यत्वभीतावेतेन धीरितौ । इति तौ तेनतुस्तस्य शिशोः **सन्धीरणा**ऽभिधाम् ॥४२॥
धात्रिभिः पाल्यमानश्च लाल्यमानश्च बन्धुभिः । अवर्द्धत क्रमादेष प्रमादेषु विषण्णधीः ॥४३॥
मध्यमे वयसि प्राप **जयसिंह**मुनेः पुरः । वियोगदुस्सहं भोगभारमुन्मुच्य स व्रतम् ॥४४॥
कल्याणमयमात्मानं[2] शोधयित्वा तपोऽग्निभिः । स मुक्तिमुकुटायेव त्रिरत्नीखचितं व्यधात् ॥४५॥
अधीतस्तत्र सूत्रार्थः **सन्धीरण**महामुनिः । अभूदाचार्यवर्योऽयं गच्छव्योमहिम[3]च्छविः ॥४६॥
वाग्भिर्बोधसुधासिन्धुलहरीभिः शरीरिणाम् । तापं व्यापादयन्नेष विजहाराऽन्वहं महीम् ॥४७॥
वार्द्धके **पुष्पभद्रा**ख्यं स पुरं सपरिच्छदः । द्युपुरीजयकीर्त्त्येव गङ्गया सङ्गतं ययौ ॥४८॥
धूमकेतुर्[4]द्विषां **पुष्पकेतु**स्तत्र नृपोऽभवत् । प्रिया च तस्य रूपद्रुपुष्पं **पुष्पवती**त्यभूत् ॥४९॥
तयोः पुत्रश्च पुत्री च जितस्मर-रतिद्युती । अभूतां **पुष्पचूलश्च पुष्पचूला** च युग्मजौ ॥५०॥
समं समन्ततः केलिकलापकलितोदयौ । तावन्योन्याद्भुतप्रीती पिता प्रेक्ष्य व्यचिन्तयत् ॥५१॥
सूनोरस्याऽनुमानेन मन्ये नास्ति क्वचिद्वधूः । क्वचिदस्याश्च कन्याया नास्ति साम्यधरो वरः ॥५२॥
तन्मिथो मिथुनस्याऽस्य युक्तं समतम[5]द्युतेः । युगादिधर्मसंवादि पाणिग्रहणमङ्गलम् ॥५३॥
पृथक्पृथग्निहितयोर्मिथोऽपि विरहज्वरात् । ईदृक्प्रीतिभृतोर्जाने कुशलं नानयोरपि ॥५४॥
एतदक्षेमतः क्षेमः प्रियसूनोर्ममाऽपि न । मदक्षेमेण न क्षेमः क्षमाखण्डेऽखिलेऽपि हि ॥५५॥

---

टि. 1. दूरीकुर्वन् । 2. कल्याणं सुवर्णं, तन्मयं आत्मानं इत्यर्थः । 3. चन्द्रः । 4. अग्निः । 5. अत्यन्तं समाना द्युतिः कान्तिः यस्य तस्य मिथुनस्य इत्यर्थः । (सम + तमट् प्रत्ययः)

इदं विचिन्त्य न्यायान्धकूपरूप: स भूपति: । पुरप्रधानपुरुषान् समाहूयेदमभ्यधात् ॥५६॥
अन्तरन्त:पुरं हन्त ! रत्नं यत्किल जायते । स्वेच्छया तन्निवेशाय क: प्रभुर्ब्रूत भूतले ॥५७॥
अन्यायस्थमभिप्रायमथाऽविज्ञाय तस्य ते । जगुर्जगद्दलततेरपीच्छान्यासकृन्नृप: ॥५८॥
छलादनुमतिं तेषामित्यादाय व्यवाहयत् । नृप: प्रियानिषिद्धोऽपि तत्पुत्रमिथुनं मिथ: ॥५९॥
इत्यकार्यकृति क्ष्मापे वैराग्यरसरागिणी । प्रशान्तभवसन्तापं प्राप पुष्पवती व्रतम् ॥६०॥
क्रमेणाऽथ स भूपाल: कालधर्ममुपागत: । पुष्पवत् **पुष्पचूल**स्तु लीलयाऽलालयद्भुवम् ॥६१॥
अयमब्धिदुकूलां च **पुष्पचूलां** च वल्लभाम् । सहैव बुभुजे भोगसम्भोगरसलालस: ॥६२॥
तदा **पुष्पवती**देवी परिपाल्य व्रतं मृता । सुरोऽभवच्चाऽपश्यच्च तत्पुत्रमिथुनं तथा ॥६३॥
कृपया **पुष्पचूलायै** सुर: प्राक्प्रीतिभासुर: । स स्वप्ने दर्शयामास नरकान् [1]दरकारणम् ॥६४॥
सैषा नरकवैषम्यभीता भर्त्रे न्यवेदयत् । कम्पमानवपु: स्वप्नं यथादृष्टमहृष्टहृत् ॥६५॥
सर्वा[१]नुर्वीन्दुराहूयाऽपृच्छद्दर्शनिनस्तत: । भवन्ति हन्त कीदृक्षा: दु:खदा नरका इति ॥६६॥
अभोगपूर्त्तिरोगार्त्तिवियोगस्फूर्तिरूपिषु । सा जहास महाराज्ञी दिष्टेषु नरकेषु तै: ॥६७॥
पृष्टाश्च धरणीशेन श्री**सन्धीरण**सूरय: । आख्यन् यथा तया दृष्टाननिष्टान्नरकानमी ॥६८॥
प्रीताऽथ पार्थिववधू: पप्रच्छ स्वच्छधीर्गुरून् । दृष्टा: स्वप्नेषु युष्माभिरपि किं नरका इति ॥६९॥
आचख्यु**रन्निकासूनु**सूरयोऽथ वयं खलु । अदृष्टमपि जानीम: श्रीमत्तीर्थेशशासनात् ॥७०॥
गम्यते कर्मणा केन नरक: खरकष्टकृत् । इत्यपृच्छत् पुन: सूरीनूरीकृतभयैव सा ॥७१॥
मायामानक्रुधा कामलोभमात्सर्यत: कृतम् । कर्म स्यान्नरकायेति तां पुनर्मुनयो जगु: ॥७२॥
ज्ञातदुर्गतिदु:खायै तस्यै स्वप्नान्तरे सुर: । स्वर्गान् सोऽदर्शयत् प्रीतिसदनं तदनन्तरम् ॥७३॥
ज्ञात्वाऽथ तमपि स्वप्नं परे सर्वज्ञमानिन: । स्वर्गस्वरूपे भूपेन पृष्टे प्रत्यवदन्नद: ॥७४॥
आरोग्यं भोगसम्पत्तिरवियोग: प्रियै: सह । अयोगो दु:खपङ्क्त्येति स्वर्गलक्षणमक्षतम् ॥७५॥
नाऽमी किमपि जानन्ति निश्चित्येति नृपस्तत: । अपृच्छ**दन्निकापुत्र**सूरे: स्वर्गसदां स्थितिम् ॥७६॥
अज्ञानतिमिरध्वंसिजिनागमदिनागम: । यथास्थितानथ स्वर्गान् स मुनीन्दुर्न्यवेदयत् ॥७७॥
अथ प्रणम्य पप्रच्छ [2]महीकामुककामिनी । भगवन् ! सुगम: स्वर्गनिगम: केन कर्मणा ॥७८॥
स्वर्गापवर्गयोर्मार्गे यतिधर्मेऽथ निर्मले । दर्शिते मुनिनाथेन संविग्नैवं जगाद सा ॥७९॥
प्रभो ! प्राणेशमापृच्छ्य ग्रहीष्यामि व्रतं [२]द्रुतम् । इत्युक्त्वाऽऽपृच्छत ततस्तदर्थं नृपमादरात् ॥८०॥
जगाद जगदीशस्तामनुजानाम्यद: प्रिये ! । ममैवोकसि गृह्णीषे भिक्षां दीक्षावती यदि ॥८१॥
तथेति प्रतिपद्येयमुपादेयगुणावलि: । **अन्निकापुत्र**सूरिभ्यो दीक्षासौरभ्यमाददे ॥८२॥

---

१. नुर्वीपराहूय – D, K, नुर्वीधराहूय – KH । २. ध्रुवं – C ।

टि. 1. दर: – भय: । 2. नृपपत्नी ।

ततः [1]**सन्धीरणा**चार्यवाचार्येयं विवेकिनी । समग्रमग्रहीद् दक्षा दीक्षाशिक्षाक्रमं क्रमात् ॥८३॥
दुर्भिक्षं द्वादशाब्दीय**मन्निकासूनु**रन्यदा । भविष्यदेव विज्ञाय श्रुताऽकूपारपारगः ॥८४॥
पृथग्देशेषु निशेषं परिवारं व्यहारयत् । क्षीणजङ्घाबलस्तस्थावेकस्तत्र विवेकभूः ॥८५॥ युग्मम् ॥
आनीयान्तःपुरादन्नपानीयादि सदा ददौ । **पुष्पचूला** मुनीन्द्राय पित्रे पुत्रीव भक्तिभाक् ॥८६॥
गुरुभक्तिशुभध्यानवह्निदग्धाऽघभस्मना । केवलोज्ज्वलमात्मानं साऽऽत्मदर्शमिव व्यधात् ॥८७॥
तथैव परिचर्याकृदाचार्यस्य दिने दिने । भावं चित्तस्थमेवेयं विज्ञाय समपादयत् ॥८८॥
तां मुनीन्दुर्जगौ वत्से ! विधत्से मन्मनोरथम् । परिज्ञाय कथं काङ्क्षातुल्यकालफलोदयम् ॥८९॥
उवाच **पूष्पचूला** च वाचं सत्यानृतामिति । यस्य यः स्यात् सदासन्नः स तद्भावं न वेत्ति किम् ? ॥९०॥
आर्या पिण्डं समानिन्ये सा वर्षत्यम्बुदेऽन्यदा । ऊचे सूरिः श्रुतज्ञाऽसि वत्से ! किमिति कल्पते ॥९१॥
आर्याऽप्यवोचदप्कायैरचित्तैरुचिते पथि । पदं ददत्युपेतास्मि तदेवं कल्पते न किम् ? ॥९२॥
कथमीदृक्पथज्ञानमित्युक्ते सूरिणा ततः । सा जगौ जगदुद्द्योति केवलं मेऽवलम्बते ॥९३॥
केवल्याशातिनं धिग्मां मिथ्यादुष्कृतमस्तु मे । इति ब्रुवन् स आचार्यो दध्यौ सेत्स्याम्यहं न वा ॥९४॥
केवल्युवाच नाचार्यवर्याः ! कार्या खिदा हृदि । **गङ्गा**मुत्तरतां भावि भवतामपि केवलम् ॥९५॥
इत्याकर्ण्य वचस्तूर्णं [1]गङ्गां [2]संसृतिवत्तदा । उत्तरीतुं तरीं सूरिरारुरोह जनैः सह ॥९६॥
यत्र यत्र तटे सूरिरुपाविशदसौ तदा । मङ्क्तुं गुरुभरेणेव तत्र तत्र ननाम नौः ॥९७॥
परिहृत्य तटीर्मध्यमध्यासीने मुनौ तु नौः । प्रारेभे सर्वतो मङ्क्तुमधःकृष्टेव केनचित् ॥९८॥
ततोऽयं जाह्नवीतोयं प्रत्यक्षिप्यत नौजनैः । प्रोतः [3]प्रासेन देव्या च कयाचिद् दर्शनद्विषा ॥९९॥
दध्यौ मुनीन्दुः शूलेन प्रोतः श्रोतसि संस्थितः । धिग् मामप्कायकोटीनां विनाशायाऽम्भसि च्युतम् ॥१००॥
इति प्राणिदयाभारभावनालीनमानसः । अन्तकृत्केवलीभूय स जगाम शिवं जवात् ॥१०१॥
तस्याखिलजगच्चेतश्चमत्कारकरं ततः । गीर्वाणवर्गो निर्वाणमहिमानमिह व्यधात् ॥१०२॥
मृतानामत्र मुक्तिः स्यादिति दध्यौ तदा जनः । **प्रयाग** इति नाम्ना च तत्र तीर्थं तदाद्यभूत् ॥१०३॥

**इति पुष्पचूलाकथानकम्** ॥

इदमेवाह—

**जो अविकलं तवं संजमं च साहू करिज्ज पच्छा वि ।**
**अन्नियसुअ व्व सो नियगमट्ठमचिरेण साहेइ ॥१७१॥**

**योऽविकलं** सम्पूर्णं **तपः** सबाह्याऽभ्यन्तरम् अनशनविनयादिकं, **संयमं च** पृथिव्यादिरक्षणात्मकं

---

१. गंगासंसृति.... K, D, KH, C ।

टि. 1. सन्धीरणाचार्यस्य वाचा आर्या इयं इति वाच्यम् । 2. संसारं इव इत्यर्थः । 3. प्रासः-कुन्तः, हस्तधार्यः शल्यः ।

**साधुर्मुनि:**, **कुर्यादनुतिष्ठेत्** । **पश्चादपि** अवसानसमयेऽपि **अन्निकासुत इव** प्राच्याऽऽख्यानकोक्ताचार्य इव **स निजक**मात्मीय**मर्थं** प्रयोजनं परमपुरुषार्थलक्षण**मचिरेण** क्षिप्रं **साधयति** सम्पादयतीति ॥१७१॥

अथ तप:संयमाराधने बुद्धि:, "**आर्त्ता नरा धर्मपरा भवन्ति**" इति न्यायात् दु:खिनामेव भवतीति दुर्विदग्धविकल्पमपाचिकीर्षुराह—

**सुहिओ न चयइ भोए,चयइ जहा दुक्खिओ त्ति अलियमिणं ।**
**चिक्कणकम्मोलित्तो, न इमो न इमो परिच्चयइ ॥१७२॥**

सुखमाह्लादरूपं सञ्जातमस्येति **सुखितो न त्यजति भोगान्** शब्दादीन्, **त्यजति यथा दु:खित इत्यलीकमिदम**सत्यमेतत् । **चिक्कणकर्मोपलिप्तो नायं** दु:खितो **नायं** सुखित: **परित्यजति** भोगानतोऽत्र कर्मलाघवमेव प्रमाणं, न सुखदु:खे इति ॥१७२॥

तथाहि—

**जह चयइ चक्कवट्टी, पवित्थरं तत्तियं मुहुत्तेण ।**
**न चयइ तहा अहन्नो, दुब्बुद्धी कप्परं दमओ ॥१७३॥**

**यथा त्यजति चक्रवर्ती भरतसनत्कुमारादि:**, **प्रविस्तरं** परिग्रहं **तावन्तं** षट्खण्डभरतवर्ष-द्वासप्तति पुरवरसहस्र-षण्णवतिग्रामकोटि-द्वात्रिंशन्मुकुटबन्धनरेन्द्रसहस्र-नवनिधि-चतुर्दशरत्न-चतु:षष्टिअन्त:पुरसहस्र-सहस्रद्वयाङ्गरक्षयक्ष-षण्णवतिकोटिपदाति-चतुरशीति चतुरशीतिलक्षसङ्ख्यकरितुरगरथप्रभृतिकं **मुहूर्त्तेन** क्षणमात्रेण । अन्वयमुक्त्वा व्यतिरेकमाह-**न त्यजति तथा अधन्यो** निर्भागधेयो **दुर्बुद्धि:** कलुषमति: **कर्प्परं** घटादिकपालं **द्रमको** रङ्क इति ॥१७३॥

सञ्जातकर्मविवराणां पुनर्देहोऽपि सुत्यज एवेत्याह—

**देहो पिपीलियाहिं, चिलाइपुत्तस्स चालणि व्व कओ ।**
**तणुओ वि मणपओसो, न चालिओ तेण ताणुवरिं ॥१७४॥**

**देह:** काय: **पिपीलिकादिभिश्चिलातीपुत्रस्य** प्राक् **संसुमो**पाख्याने प्रतिपादितस्वरूपस्य **चालनीव कृत**श्छिद्रित इत्यर्थ: । **तनुकोऽपि** स्वल्पोऽपि **मन:प्रद्वेषश्चि**त्तोद्वेगो **न चालितस्तेन** महात्मना **चिलातीपुत्रेण तासां पिपीलकानामुपरी**ति ॥१७४॥

एवं च सति—

**पाणच्चए वि पावं, पिपीलियाए वि जे न इच्छंति ।**
**ते कह जई अपावा, पावाइं करेंति अन्नस्स ॥१७५॥**

**प्राणाऽत्ययेऽपि पापं पिपीलिकाया अपि ये** भगवन्तो **नेच्छन्ति** । **ते कथं यतयोऽपापा:** पुण्य-परिणामा:, **पापानि कुर्वन्त्यन्यस्य** असम्भव एवायमितिभाव: ॥१७५॥

किमित्येवमपराधिष्वपि क्षन्तव्यमेवेत्याह—

**जिणपहमपंडियाणं, पाणहराणं पि पहरमाणाणं ।**
**न करंति य पावाइं, पावस्स फलं वियाणंता ॥१७६॥**

**जिनपथाऽपण्डितानां** मकारस्यालाक्षणिकत्वात् भगवन्मार्गाप्रवीणानां **प्राणहराणामपि** किं पुनः परेषां **प्रहरतां** शस्त्रादिघातं ददतां पुरुषाधमानामिति शेषः । **न कुर्वन्ति पापानि** तदुपरि प्रतिद्रोहचिकीर्षया, **चशब्दा**न्मन्निमित्तमेतेषां वराकाणां नरकपात इति वासनया प्रत्युत करुणां कुर्वन्ति । **पापस्य फलं** दुरन्तदुर्गतिपातादिरूपं **विजानन्तो**ऽवबुद्ध्यमाना इति ॥१७६॥

व्यवहारतः पापफलमेवाऽभिधित्सुराह–

**वह-मारण-अब्भक्खाणदाण-परधणविलोवणाईणं ।**
**सव्वजहन्नो उदओ, दसगुणिओ एक्कसि कयाणं ॥१७७॥**

**वधस्ताडनं मारणं** व्यपरोपणम् **अभ्याख्यानदान**मलीकदोषारोपणम् । **परधनविलोपनं** परेषां वित्तविनाशनम् । **आदिशब्दा**न्मर्मोद्घट्टन-पैशून्यादिग्रहस्तेषाम् **एकशः कृतानाम्** एकवारं विहितानां **सर्वजघन्यो**ऽत्यन्तनिकृष्ट **उदयो** विपाको **दशगुणितः** । यदन्यस्मै किञ्चिदतिश्लथपरिणामेनाऽपि क्रियते तद्दशगुणं प्रतिप्राप्यत इत्यर्थः ॥१७७॥

जघन्यं विपाकमुक्त्वा उत्कृष्टमाह–

**तिव्वयरे उ पओसे, सयगुणिओ सयसहस्सकोडिगुणो ।**
**कोडाकोडिगुणो वा, हुज्ज विवागो बहुतरो वा ॥१७८॥**

**तीव्रतरे** उत्कटतरे । **तु**शब्दात्कालान्तरानुबन्धिनि च **प्रद्वेषे** मत्सरे सति, **शतगुणितः शतसहस्र-कोटिगुणः कोटाकोटीगुणो वा भवेद्विपाक**स्तदुदयो **बहुतरो वा** प्रद्वेषोत्कर्षस्य तारतम्यस्य नानारूपतया कर्मबन्धविपाकस्याऽपि वैचित्र्यमित्यभिप्रायं विमृश्य चैतत्परिहाराय अप्रमादिना भाव्यमित्युपदेशतात्पर्यमिति ॥१७८॥

**इत्याचार्यश्रीउदयप्रभदेवसङ्घटितायां कर्णिकाख्यायामुपदेशमालाविशेषवृत्तौ द्वितीयः परिवेषः सम्पूर्णः॥**
**शतोपरि अष्टसप्ततितमगाथान्तं विवरणम् ॥ ग्रन्थाग्रं ४२३७ आदितो ग्रन्थाग्रं ८६४७॥**

अथ **तृतीयः परिवेष**[१] आरभ्यते–

तीव्र-तीव्रतरप्रद्वेषप्रकर्षतारतम्यस्य कारणस्य अपरिमिततया, कार्यस्य कर्मविपाकस्याऽपि अपरिमितत्वं दुरन्ततमं विचिन्त्य अप्रमादोऽभ्यसनीय इति भूयोभूय आत्मनोऽप्रमादाभ्यासाऽऽयासोपदेशेन कः स्वार्थो ? **मरुदेव्यादीनां** हि कर्मणां पूर्वबन्धस्येव अप्रमादाभ्यासमन्तरेण क्षयस्याऽपि यादृच्छिकतयैव दृष्टत्वान्नकार्यमात्मवञ्चनयेति दुर्विदग्धानां मुग्धबुद्धिविप्रतारणार्थवचनचातुरीं निराचिकीर्षुराह[२]–

**के इत्थ करेंतिऽऽलंवणं, इमं तिहुयणस्स अच्छेरं ।**
**जह नियमाखवियंगी मरुदेवी भगवई सिद्धा ॥१७९॥**

**केचिद**तत्त्वज्ञा **अत्रार्थे कुर्वन्त्यालम्बनम्** अलीकावष्टम्भम् **इदं** वक्ष्यमाणं **त्रिभुवनस्याश्चर्यम्** असम्भावनास्पदतया अद्भुतं **यथा** नियम्यते नियन्त्र्यते आत्मा एभिरिति **नियमा**स्तपःसंयमादिविषया

१. षः प्रारभ्यते – *KH* । २. कीराह – *D, K, KH* ।

अभिग्रहास्तैर**क्षपिताङ्गी** अनिष्टप्तशरीरा **मरुदेवी भगवती** श्री**ऋषभनाथ**जननी **सिद्धा** निष्ठितार्था जाता । तथा वयमपि सेत्स्यामः । तस्याश्च भगवत्या अस्यामवसर्प्पिण्यां प्रथमसिद्धस्य चरितं प्राक्श्री**ऋषभदेव**चरित्रान्तर्गत-मेवोक्तम् । तत्संवादकस्तोत्रमेवेदमत्राऽध्यगीष्महि ।

## [ मरुदेवीस्तोत्रम् ॥ ]

आश्रित्य निश्चयनयात्मकमेकधैव, मार्गं शिवस्य लघु सिद्धिपदं गतायाः ।
द्वेधा [1]क्षमाधिपतिषु प्रथमस्य मातुस्त्रेधा प्रणौमि **मरुदेवि** ! पदद्वयं ते ॥१॥
मातस्त्वया त्रिभुवनाभरणैकरत्नम्, पुत्रं प्रसूय **मरुदेवि ! युगादिदेवम्** ।
चक्रे चिरादुपचितस्य मदस्य भङ्गो[3], भूमेः [2]सरोहणगिरीन्द्रभुवो वराक्याः ॥२॥
विघ्नस्त्वदासनपवित्रितकन्धरस्य, किंदघ्नतामनुपमस्य न कुञ्जरस्य ।
आरुह्य यत्र भुवनाऽग्रगताऽपि मुक्ति,-रालिङ्गिता प्रियसखीव सुखं त्वयाऽम्ब ! ॥३॥
दृग्युग्मनीलिमकृता सह कर्मणैव, त्रस्तानि केवलविलोचनदूषकाणि ।
कर्माणि देवि ! तव युक्तमुदग्रकर्म-निर्मन्थविस्तृतनयं तनयं दिदृक्षोः ॥४॥
व्याख्याध्वनौ स्फुरति मोहनिशावसान-तूर्योपमे **प्रथमतीर्थपतेः** सुदूरात् ।
अभ्युद्ययौ नयननिर्मलताऽरुणश्रीः प्राच्यां त्वयीह जिनमातरि केवलार्क्कः ॥५॥
त्वत्सूनुना जननि ! सञ्जनिताद्यथोक्तचारित्रतो महसि केवलनाम्नि जाते ।
त्वं सप्तरज्जुमिषतः किल सप्त[१]तूली-राक्रम्य साधु **मरुदेवि** ! मुदं तनोषि ॥६॥
कर्तुं स्वयं प्रगुणतामिह सिद्धिसौध-प्रावेशिकप्रकृतकौतुकमङ्गलानाम् ।
शङ्के सुतस्य भुवनाधिपतेर्मुमुक्षोः, पूर्वं गताऽसि **मरुदेवि** ! भवं विमुच्य ॥७॥
इत्थं तव स्तवनतः सुकृतं कृतं यत्, तेनाम्ब ! तीर्थपतिशासनमेतदुच्चैः ।
सूर्योदयप्रभववास्तवदीप्रतेजः-स्मेरस्य पुष्यतु सरोजवनस्य लक्ष्मीम् ॥८॥ [वसन्ततिलकाष्टकम्]

## इति मरुदेवीस्तोत्रम् ॥

अस्य च प्रथमसिद्धस्याऽग्रतोऽसंव्यवहारराशिप्रभृतिअनादिसंसिद्धवनस्पत्येकसजातीयेष्वेव अनादिधा-लब्धजन्मन इदम्प्रथमिकयैव मनुष्यस्त्रीत्वेनोत्पद्य प्राग्भवेषु तद्भवे वा अनासादितनियमविशेषस्यैवा-चिन्तनीयाश्चर्यबीजजीववीर्योल्लासवशात् क्षपकश्रेण्यारोहघातिकर्मक्षयनैश्चयिकयथाख्यातचारित्राऽवाप्ति-केवलज्ञान-शेषभवोपग्राहिकर्मक्षय-सिद्धिगमनान्यभूवन्निति हि वृद्धसम्प्रदायवेदिनः । तद्वदन्यस्यापि तपः-संयमाऽक्षपितकायस्यैव चतुर्थपुरुषार्थसिद्धिर्भविष्यतीति अपुष्टमिदमालम्बनं स्वीकृत्य न अप्रमादे प्रमादिना भवितव्यमित्यभिप्रायः ॥१७९॥ कुत एतदित्याह—

**किं पि कहिं पि कयाई, एगे लद्धीहिं केहि वि निभेहिं ।**
**पत्तेयबुद्धलाभा, हवंति अच्छेरयब्भूया ॥१८०॥**

---

१. भूमि - KH ।

टि. 1. क्षमाधिपतिषु-जिनेषु नृपेषु च प्रथमः ऋषभस्वामी तस्य । 2. रोहणगिरीन्द्रेण सह वर्त्तेऽहं इति विमर्शेन उत्पन्नः यः मदः, भूमेः तस्य मदस्य भङ्गः चक्रे इत्यन्वयः । 3. किं प्रमाणं अस्य इति किंदघ्नः, तस्य भावः किंदघ्नता, ताम् । ७।१।१४२ हेम० दघ्नट् प्रत्ययः ।

यतः **किमपि** वृषभप्रभृतिकं वस्तु निमित्ततया अधिगम्येति गम्यते । **कस्मिन्नपि** क्षेत्रे **कदाचित्** काले **एके** केचन न सर्वे, **लब्धिभि**स्तदावरणीयानां कर्मणां क्षयक्षयोपशमरूपाभिः । **कैरपि निभै**स्तस्यैव वृषभादिवस्तुनः पर्यायान्तरप्राप्तिलक्षणैरनित्यतालम्बनभूतैर्हेतुभिः, **प्रत्येकबुद्धलाभा** एकं वस्तु प्रति **प्रत्येकं बुद्धस्य** बोधस्य **लाभो** येषां ते प्रत्येकबुद्धलाभाः । **करकण्ड्वादयो भवन्त्याश्चर्यभूता**स्ततः कदाचित् काकतालीययोगिना तन्निदर्शनालम्बनेन परमपुरुषार्थसाधनयोस्तपःसंयमयोः प्रमादमाधाय मनुष्यभवप्राप्त्यादिसामग्रीवैफल्यं न विदध्यादिति ॥१८०॥

अथ के ते **करकण्ड्वादयः** प्रत्येकबुद्धा इत्यतस्तदाख्यानानि व्याचक्ष्महे—

**कालिङ्ग**को वृषभतः **करकण्डुराजः**, **पाञ्चाल**को **द्विमुख**भूपतिरिन्द्रकेतोः ।
**वैदेहि**को **नमि**रबोधि च कङ्कणैक्यात्, **गान्धार**को मुकुरिताम्रनगान्**नगातिः** ॥१॥ [वसन्ततिलकावृत्तम्]

## [ करकण्डुप्रभृतिचतुष्प्रत्येकबुद्धकथा ॥ ]

श्री**वासुपूज्य**चैत्येन नित्यमुकुटमण्डना । पुरी **चम्पे**त्यभूत् तस्यां भूपति**र्दधिवाहनः** ॥१॥
राज्ञी **पद्मावती**त्यस्य **चेटक**क्षितिपात्मजा । सा रोहत्पुण्यसन्दोहमधाद् दोहदलक्षणम् ॥२॥
धृतातपत्रा भूभर्त्रा भूपनेपथ्यधारिणी । सिन्धुरस्कन्धमारूढा किलारामे ललाम्यहम् ॥३॥
नेति दोहदमुत्पन्नं व्रीडया विनयेन च । शशाक सा कुरङ्गाक्षी प्रकाशयितुमीशितुः ॥४॥ युग्मम् ॥
कृशाङ्गी साऽसकृत् प्रीत्या पृच्छन्तं व्यक्तसौहृदम् । दोहदं ज्ञापयामास रहः पद्मावती पतिम् ॥५॥
सिन्दूरतिलकारूढः[1] सिन्दूरतिलकानुगः[2] । अथ स्वयं धृतच्छत्रोऽवनिजानिर्ययौ वनीम् ॥६॥
तदा चाम्भोधरारम्भभूरिसौरभसम्भृतैः । कान्तारबन्धुभिर्गन्धवाहैरत्याहतोऽभितः ॥७॥
स्मारं स्मारमरण्यानीं तथाऽधावत सिन्धुरः । यथा दृशापि नाऽऽसादि सादिभिः सादरानुगैः ॥८॥ युग्मम् ॥
तेनाऽतिवाहिकेनेव[3] वर्ष्मणा पुरुषः परः । देव्या चेतनया साकं पुराद्दूरमनीयत ॥९॥
नृपः सगर्भया राज्ञ्या रम्भागर्भसगर्भया[4] । सहाऽऽटत स महाटव्यां दन्तिना तेन वाहितः ॥१०॥
समनिम्नोन्नतान् दूरासन्नान् भावान् पुरः पथि । पश्यन्नभिन्नान् वेगेन कञ्चिन्न्यग्रोधमैक्षत ॥११॥
सा सुनेत्राऽथ भूनेत्रा जगदे कृतबुद्धिना । वटपादेऽवलम्बेथास्त्वं गच्छत्यग्रतो गजे ॥१२॥
वटे स्वयं विलग्नोऽथ दक्षः स क्षितिरक्षिता । अबला तु विहस्ता सा हस्तिनाऽनीयताग्रतः ॥१३॥
वटादुत्तीर्य चम्पायां निरानन्दो नराधिपः । शनैरनुत्सुकोऽयासीत् प्राप्तानुप्लव[5]सैनिकः ॥१४॥
सा तेन दन्तिना साक्षादसातेनेव कर्मणा । निर्मानुषामरण्यानीमनीयत नृपप्रिया ॥१५॥
तृष्णान्धः स दिशः कृत्स्ना व्यालो व्यालोकयन्नथ । तपनाऽऽतपसंतप्तस्सरति स्म सरःपुरः ॥१६॥

---

टि. 1. सिन्दूरतिलकः - हस्ती । 2. सिन्दूरतिलका - सौभाग्यवती स्त्री, तस्या अनुगः । 3. यथा अतिवाहिकेन वर्ष्मणा-तैजसकार्मणरूपसूक्ष्मशरीरेण परः भिन्नः, पुरुषः आत्मा चेतनारूप देव्या सह पुरात्-शरीरात्, दूरं-अन्यस्मिन् भवे नीयते, तथा इति श्लेषः । 4. सगर्भा - स्वसा, तया । 5. अनुप्लवः - अनुचरः ।

अथाऽवतीर्य सरसीं करशीकरदुर्दिनम् । कुर्वन्ना[1]कारकर्मभ्यां घनः सोऽजनि कुञ्जरः ॥१७॥
कुम्भीवाऽनतिगम्भीरमम्भोऽगात् तृष्णयाकुलः । शनैस्त्यक्ताऽऽसनैवाऽथ सा सरस्युत्ततार च ॥१८॥
नागादिव तडागाच्च पद्माङ्कात् पद्मलोचना । उत्तीर्य सा भयाक्रान्ता कान्तारान्तरथाऽभ्रमत् ॥१९॥
क्रूरेभ्योऽपि महाक्रूरं भीषणेभ्योऽपि भीषणम् । वनं तद्वीक्ष्य सा राज्ञी चिन्तयामास चेतसा ॥२०॥
विद्वान् मूर्खो भटो भीरुः श्वपाकः पाकशासनः । राजा रङ्कश्च नाऽत्येति शासनं कोऽपि दुर्विधेः ॥२१॥
वीक्ष्यते यद्यथैकत्र तदन्यत्रान्यथा क्षणात् । अहो दोलेव लोलेयं दुर्विधेर्विविधा विधा ॥२२॥
निर्माणकर्मणाख्यातः [2]पङ्कपिण्डकरो विधिः । दण्डेन भ्रमयत्येष जगच्चक्रं कुलालवत् ॥२३॥
वचसामप्यनुच्छिष्टः सङ्कल्पेनाप्यचुम्बितः । प्रावर्त्तत परावर्त्तः परत्रेवेह कीदृशः ॥२४॥
क्व तत्पुरं क्व स प्रेयान् क्व सा श्रीः क्व च स क्षणः । तत्सर्वं मेघसम्पाताद् विद्युदाभमिवाऽभवत् ॥२५॥
**विधेर्वा क उपालम्भः का वा चिन्ताऽस्तु कर्मणः । विपदां सोढुमुत्साहः पतितानां प्रतिक्रिया** ॥२६॥
श्वापदोत्थाऽऽपदोघेन घोरकान्तारगह्वरे । मरणस्य न सन्देहस्तत्प्रमाद्यामि किं मुधा ॥२७॥
धैर्यवज्रमयं वर्म विनिर्माय विवेकिनी । आराधनां मृतेरर्वाक् कृत्यशेषमिव व्यधात् ॥२८॥
चतुःशरणमास्थाय गर्हमाणा स्वदुष्कृतम् । सङ्घं धर्मं जिनान् सत्त्वान् क्षमयामास भावतः ॥२९॥
सुकृतान्यनुमोद्याऽथ धार्मिकाणां महात्मनाम् । साकारमशनादीनां प्रत्याख्यानमिति व्यधात् ॥३०॥
प्रमादोऽस्यामवस्थायां देहस्य यदि मे भवेत् । आहारोपधिदेहादि व्युत्सृजामि त्रिधाऽपि तत् ॥३१॥
सिद्धान्तसारं संसारतारणं पापवारणम् । स्मराम्यहं नमस्कारं पञ्चानां परमेष्ठिनाम् ॥३२॥
प्रेयसे स्वस्ति राज्याय नमः क्षेमोऽस्तु शर्मणे । एक एव नमस्कारः शश्वन्मां मा विमुञ्चतु ॥३३॥
चिन्तयन्ती नमस्कारं चिन्तामणिमिवाऽमलम् । दिशैकया व्रजन्ती च कञ्चित्तापसमाप सा ॥३४॥
अभिवाद्य स्थितामग्रे [3]तामसौ तापसोऽब्रवीत् । का त्वं कस्य सुता भद्रे ! कस्य चाऽसि परिग्रहः ॥३५॥
निजपस्त्यात्कुतस्त्या वा तवाऽवस्थितिरीदृशी । विश्वस्ता वद शङ्किष्ठा मा स्म नस्तापसाश्रमे ॥३६॥
सर्वमेव स्ववृत्तान्तं सा यथावदथाऽवदत् । **तपोधनेषु धन्यानां विश्वसित्येव मानसम्** ॥३७॥
तेन **चेटकराजस्य** तापसेन [4]सनाभिना । वात्सल्याऽमृतकुल्याभिर्वाग्भिः सैवमसिच्यत ॥३८॥
आः किमत्र विमर्शेन भृशमायास्यते मनः । ईदृगेवैष संसारः सर्वदा विपदां पदम् ॥३९॥
[5]अजन्मनि मनः कुर्याज्जेतुमेतामनित्यताम् । अजातेषु प्रभुर्नैषा जातं जातं तु हन्ति सा ॥४०॥
**वस्तु भूतं भविष्यच्च वस्तुतो नाऽस्ति किञ्चन । वर्त्तमानेन योगेन तेन व्यवहृतिः सताम्** ॥४१॥
अनिच्छन्त्यपि सम्बोध्य नीत्वा निजमथाश्रमम् । फलैः सोपहृतैस्तेन प्राणयात्रामकार्यत ॥४२॥
नीत्वा वसतिदेशेऽथ निष्कृत्रिमदयोदयः । मुनिस्तामूचिवान् [6]सन्नकण्ठः सोत्कण्ठमानसः ॥४३॥

---

टि. 1. आकारः आकृतिश्च कर्म चेष्टा च ताभ्याम् । 2. पङ्कः - पापं, तदेव पिण्डः तं करोति इति पङ्कपिण्डकरः । 3. तां असौ इति वाच्यम् । 4. सनाभिः समानः तेन । 5. न विद्यते जन्म अस्य इति अजन्मा तस्मिन् अजन्मनि, शाश्वते इत्यर्थः । 6. सन्नः दुःखितः रुद्धः कण्ठः यस्य सः ।

अतः परं हलैः कृष्टा सावद्याः क्षेत्रभूमयः । तपस्विनामनुल्लङ्घ्यास्तत आपृच्छ्यसेऽधुना ॥४४॥
एष **दन्तपुरस्या**ऽध्वा **दन्तवक्त्रो**ऽत्र भूपतिः । निर्भयाऽत्र गता **चम्पां** सुसार्थेन पुनर्व्रजेः ॥४५॥
एवमुक्त्वाऽऽश्रमं प्रापत्तापसः पापशातनम् । सा तु **दन्तपुरं** गत्वा साध्वीनां मूलमासदत् ॥४६॥
वन्दमाना प्रवर्त्तिन्या जगदे श्राविके ! कुतः । निवेदिते तयोदन्ते प्रत्युवाच प्रवर्त्तिनी ॥४७॥
दुःखैकसारे संसारे सुखाभासोऽत्र यः क्वचित् । स्वप्नराज्यमिव भ्रान्तिरियं विजयतेतराम् ॥४८॥
दुर्घटं घटयन्नेष सिद्धं विघटयन् हठात् । घटनोद्घटनव्यग्रो नैष निर्विद्यते विधिः ॥४९॥
जिनं जिनमतं किं च मुक्त्वा जिनमतं श्रितान् । अवस्कर इवाऽपास्यः शेषः संसारविस्तरः ॥५०॥
अग्रे विवेकिनी तासामिति वैराग्यवीचिभिः । वेगात् प्ररूढसंवेगात् तदैव व्रतमग्रहीत् ॥५१॥
व्रतविघ्नभियाऽऽख्यायि गर्भसम्भावना न या । तां प्रवृद्धां च सद्भावादबुध्यत महत्तरा ॥५२॥
तयाऽथ स्थापितैकान्ते प्रसूय क्रमतः सुतम् । गत्वा श्मशाने सा नाममुद्रायुक्तममुञ्चत ॥५३॥
रत्नकम्बलसंवीतं तं वीक्ष्याथ जनङ्गमः । श्मशानपालस्तं बालमालयं स्वं रहोऽनयत् ॥५४॥
तेन पत्याऽनपत्यायाः स स्वपत्न्याः समर्प्पितः । तद्गुप्तचर्ययाऽऽर्याऽपि विदित्वान्तर्मुदं दधौ ॥५५॥
मन्दाक्षा[1]दाश्रयं प्राप्ता साध्वीनां सा तपोधना । स जातो मृत एवेति त्यक्त एवं जगाद गाम् ॥५६॥
श्रीमान् **जनङ्गमा**गारे धाम लोकातिगं वहन् । **क्लृप्तापकर्णिता**भिख्यो ववृधे राजनन्दनः ॥५७॥
विचाराय[2] चरन्ती सा पुत्रप्रेम्णा तपोधना । चकार कोमलालापैर्मातङ्ग्या सह सङ्गतम् ॥५८॥
रममाणः स बालेषु राजते राजतेजसा । **पतितोऽपि गणे ग्राव्णां यो मणिर्मणिरेव सः** ॥५९॥
शोकाद्याहारदोषेण तस्य गर्भात् प्रभृत्यपि । **अपकर्णितना**म्नोऽभूद् दोषः **कण्डूलता**भिधः ॥६०॥
राजायमानः सामन्तीकृतबालजनाच्च सः । कारयति स्म कण्डूयां **करकण्डू**स्ततः श्रुतः ॥६१॥
तदा तस्यां च भिक्षुण्या[१]मक्षीणविनयो मुदा । मातरीव दधौ प्रीतिमन्तरात्मा हि सर्ववित् ॥६२॥
भिक्षाप्राप्तं ददौ तस्मै सरसं मोदकादि सा । **अहो प्रीतिरपत्येषु मुनिभावेऽपि दुस्त्यजा** ॥६३॥
सोऽपि षड्वर्षदेशीयः सार्वभौमोचिताकृतिः । श्मशानदेशमादेशात् पितुः पाति स्म धिग् विधिम् ॥६४॥
श्मशानं निकषाऽन्येद्युर्निष्कषायो मुनिर्मुनिम् । वंशजालीं व्रजन्वीक्ष्य वंशलक्षणविज्जगौ ॥६५॥
प्रतीक्ष्याऽतः परं वृद्धिं मूलादाचतुरङ्गुलम् । यो वंशमेनमादत्ते सोऽवश्यं राज्यमाप्नुयात् ॥६६॥
तेन मातङ्गबालेन केनचिच्च द्विजन्मना । श्रुतं श्रुतनिधेस्तच्च सुधाकवचितं वचः ॥६७॥
द्विजातिना रहो यावत् खनित्वा चतुरङ्गुलान् । स वंशश्छिन्न आच्छिन्नस्तावच्च करकण्डुना ॥६८॥
कलहं कुर्वता नीतो द्विजेन करणं शिशुः । वंशमस्मद्वनोद्भूतं दास्ये नास्येत्युवाच च ॥६९॥
इतरव्यत्ययान्मूल्यप्रत्ययाच्चाऽपि याचितः । तं दण्डमर्पयामास न **जनङ्गमनन्दनः** ॥७०॥

---

१. मक्षण – B मक्षुण्ण – L मक्षूण – D, KH, K, C ।

टि. 1. मन्दाक्षं – लज्जा, तस्मात् । 2. उच्चारभूमौ ।

पृष्टः कारणिकैः किं ते वंशः कर्त्तेति दारकः । प्राज्यं दास्यत्यसौ राज्यमस्मभ्यमिति सोऽब्रवीत् ॥७१॥ यदा ते भविता राज्यं त्वयाऽप्यस्मै तदा शिशो ! । ग्रामो द्विजाय दातव्यः स्मित्वेत्यूचुर्नियोगिनः ॥७२॥ ओमित्युक्त्वा शिशुर्वंशमादाय स्वं गृहं ययौ । रहः सम्भूय विप्रोऽन्यैस्तं तु हन्तुमुपाक्रमत् ॥७३॥ लोभः कृतमतिक्षोभः शोभते बत न क्वचित् । दायादीयति[1] राज्यार्थे यत्तथैष द्विजोऽन्त्यजम् ॥७४॥ तच्च मत्वा पिता तस्य मनीषी तन्मनीषितम् । सदारदारकोऽनेशद्देशं हित्वा जिजीविषुः ॥७५॥ क्रमाद्भुवमतिक्रामन् सकुटुम्बो **जनङ्गमः** । जगाम श्रेयसां धाम स **काञ्चनपुरं** पुरम् ॥७६॥ तत्राऽपुत्रे मृते राज्ञि पौरैरश्वोऽधिवासितः । एत्य प्रदक्षिणीचक्रे करकण्डुं सहेषितः ॥७७॥ जयशब्दं व्यधुर्वीक्ष्य पौरास्तं लक्षणान्वितम् । अनाहतं तदा नान्दीतूर्यमापूर्यत स्वयम् ॥७८॥ प्रधानैरुपनीते च परिधायाऽन्यवाससी । प्राक्शिक्षित इवाऽर्वाण[2]मारुरोह स बालकः ॥७९॥ सोऽन्तः प्रवेश्यते यावन्नागरैः प्रीतिसागरैः । म्लेच्छोऽयमिति तं तावद् द्विजन्मानो न मेनिरे ॥८०॥ रुद्धस्तैरथ तत्क्रुद्धो दण्डरत्नं यदाददे । देवतानामधिष्ठानात् तदा तदतिदिद्युते ॥८१॥ भूयः सम्भूय तद्भीतैर्विज्ञप्तः स द्विजैः प्रभुः । वर्णाश्रमाणामाचार्यस्त्वमेको देव ! राजसे ॥८२॥ त्वं महेन्द्रो महेशस्त्वं त्वं विष्णुस्त्वं प्रजापतिः । साक्षात्तेजस्त्वयि क्षात्रं पवित्रमतिजृम्भते ॥८३॥ कर्मणोत्कृष्यते वर्णः कर्मणा स निकृष्यते । वर्णानां ब्राह्मणादीनां जातिस्तत्त्वान्न कारणम् ॥८४॥ यः कर्मप्रकृतौ लीनः परब्रह्ममयः पुमान् । स जात्या कञ्चुकेनेव किं परावर्त्त्यते क्वचित् ॥८५॥ नरकेष्वथ तिर्यक्षु मनुष्येषु सुरेषु यः । आत्माऽयं नाऽवमन्तव्यः स क्वचिद् दैवतं हि सः ॥८६॥ अनेनैव निमित्तेन त्रिकालज्ञानिनो जगुः । जीवस्य हिंसया पापं जीवस्याऽहिंसया तपः ॥८७॥ अन्धे तमसि मग्नानामस्माकं त्वं महागुरुः । तेजसैव तवाऽनेन ज्ञानमुन्मीलितं हि नः ॥८८॥ नाऽराजकेषु राष्ट्रेषु हव्यं दहति पावकः । न च धर्माः प्रवर्त्तन्ते न च वर्षति वासवः[3] ॥८९॥ कुतो धनं कुतो दाराः शरीरं च कुतो नृणाम् । सर्वदेवमयस्त्राता यदि राजा न पालयेत् ॥९०॥ सर्वावलोकने सूर्यः पापानां निग्रहे यमः । कुबरो भरणे राजा प्रायश्चित्तेषु पावकः ॥९१॥ [4]तदेनस्त्वदवज्ञानजनितं नो विशोधय । तीर्थं राजा प्रजानां हि कल्मषक्षालनक्षमम् ॥९२॥ ब्रह्मज्ञैरिति विज्ञप्तो ब्राह्मणैर्वीतमत्सरः । उवाच वाचमम्भोदगम्भीरमधुरां नृपः ॥९३॥ यद्युष्माभिरिह प्रोक्तं सम्मतिस्तत्र यावताम् । तावतामेव मानोऽस्तु शेषा वध्यास्तु मे द्विजाः ॥९४॥ तैः सर्वैः सम्मतिं घुष्टामाकर्ण्याऽथ स पार्थिवः । ऊचे दन्तद्युतिक्षीरक्षालितामिव भारतीम् ॥९५॥ एतर्हि तर्हि मातङ्गान् संस्कारैः कुरुत द्विजान् । यद् द्विजः क्रियते पश्चात् संस्कारैर्ब्रह्मसूरपि[5] ॥९६॥ ख्यापयन्तो बलीयस्त्वं लोकव्यवहृतेरथ । अवोचन्त द्विजाः प्रीता भीताश्च नृपतिं प्रति ॥९७॥

---

टि. 1. दायादमिवाचरति, [हेम० ३।४।२४ आधाराच्चो...] इति सूत्रेण क्यन् । 2. अर्वाणः अश्वः तम् । 3. वासवः मेघः । 4. एनस् - अपराधः । 5. ब्राह्मणपुत्रोपि ।

यदाह देवस्तत्तथ्यं संस्कारैरेव विप्रता[1] । न हि ब्राह्मणजात्योऽपि व्रात्यो[2] ब्राह्मण्यमर्हति ॥९८॥
अद्विजस्याऽष्टवर्षाणि जातस्याऽत: परं द्विजैः । तत्त्वेनाभूततद्भावात् बटूकरणमिष्यते ॥९९॥
यद्देवो वेद तद्वेद किन्त्वयं तत्त्वनिश्चयः । व्यवहारस्तु लोकानां स्यादेवमसमञ्जसः ॥१००॥
विमृष्याऽथ विशांनाथस्तानुवाच मुदा द्विजान् । तद्द्विजाः सन्तु तेऽस्माकं **वाटधानक**वासिनः ॥१०१॥
तेनेत्युक्ते नरेन्द्रेण पुष्पवृष्टिर्दिवोऽभवत् । वागजायत दिव्या च जय जीवेति वीप्सिता ॥१०२॥
तैरथ ब्राह्मणैर्दत्तसंस्कारास्ते जनङ्गमाः । ब्राह्मण्यमलभन्तोच्चैर्देवमानवपूजिताः ॥१०३॥ उक्तं च–
"**दधिवाहनपुत्रेण राज्ञा तु करकण्डुना । वाटधानकवास्तव्याश्चाण्डाला ब्राह्मणीकृताः**" [ ] ॥१०४॥
पुरे महोत्सवेनाऽथ स प्रविश्य विशांपतिः । अनुभूयाऽभिषेकं च सप्रतापः क्रमादभूत् ॥१०५॥
वादी विप्रः स वंशस्य तं निशम्य विशांपतिम् । समाजमाजगामाऽस्य[3] ग्रामकामः क्षमापतेः ॥१०६॥
इष्टं ब्रूहीति राज्ञोक्तः स जगाद पुनर्द्विजः । चम्पायां धाम मे ग्रामं तत्तद्विषयमर्थये ॥१०७॥
अथ तस्मिन् महीनाथे **चम्पाया दधिवाहने** । ग्रामं देहि द्विजायेति तस्याज्ञां प्राहिणोन्नृपः ॥१०८॥
**दधिवाहन**राजोऽपि तं तच्छासनहारिणम् । आह स्म विस्मितः स्मित्वा क्रुद्धोऽप्यन्तश्चमत्कृतः ॥१०९॥
[4]कपोतपोतति म्लेच्छपोतः कथमनात्मवान् । यो मया सैनिकः श्येनपक्षीन्द्रेण विरुध्यते ॥११०॥
दूतवक्त्रा हि राजानस्तत् त्वं दूतो न हन्यसे । तद् गच्छेतः स एवैतु शुद्धिं तस्याऽऽतनोम्यहम् ॥१११॥
शूराणां शौर्यनिकषः पावनेभ्योऽपि पावनम् । तीर्थानामुत्तमं तीर्थं खड्गधाराजलं हि नः ॥११२॥
सद्भूतमब्रवीद्दूतः स गत्वा करकण्डवे । तदैव क्षिप्रकारी च स **चम्पा**मभ्यषेणयत् ॥११३॥
तं धर्मजयिनं मार्गे देशाभयदमागतम्[5] । उपचम्पमुपासीनमज्ञासीद् **दधिवाहनः** ॥११४॥
दुर्गमं दुर्गमन्तश्च कृत्वा सन्नह्य च स्वयम् । प्रोत्साहयन्नयं सैन्यं बहिस्ताद्यावदावति[6] ॥११५॥
प्रतीक्ष्यमाणयोः क्षेत्रे निर्णीतरणवासरम् । तदग्रसैन्ययोः सङ्ख्ये वर्तमाने शराशरि ॥११६॥
श्रुत्वा तच्चार्यिका साऽपि मुधा मा भूज्जनक्षयः । इत्येत्य तद् यथावृत्तं **करकण्डु**मबोधयत् ॥११७॥ विशेषकम् ॥
पृष्ट्वा पितृभ्यां श्रुत्वा च सद्भावेनात्मनः कथाम् । मुद्रासंवादतो मेने पितरं **दधिवाहनम्** ॥११८॥
मत्वा मातरमेवार्यां क्षत्रियं पितरं च तम् । पङ्कादिव स निस्तीर्णो मुमुदे कुमुदेक्षणः ॥११९॥
**करकण्डु**स्तथाऽप्येष प्रणन्तुं नृपमात्मना । अभिमानादनमनो न मनोऽप्यातनोत् पुरः ॥१२०॥
आर्या ज्ञापयितुं राज्ञे वृत्तान्तं तस्य सोष्मणः । सानुकम्पाऽथ **चम्पा**यामविशद् विशदाशया ॥१२१॥
तां वीक्ष्य वृद्धदास्योऽथ सौधाङ्गणमुपेयुषीम् । साश्रवः प्रत्यभिज्ञाय तस्याः पेतुः पदाब्जयोः ॥१२२॥
ज्ञापितस्तामुपेत्याऽथ सम्भ्रमाद्वीक्ष्य चात्मना । भक्त्याऽनंसीन्नरेन्द्रोऽपि तपःश्रियमिवाङ्गिनीम् ॥१२३॥

---

टि. 1. विप्रस्य भावः । 2. व्रात्यः - अव्यवहर्तव्यः संस्कारेण हीनो ब्राह्मणः । 3. सभाम् । 4. कपोतपोत इवाचरति क्विपि कपोतपोतति [हेम० ३।४।२५ कर्तुः क्विप्] । 5. देशाभयदम् - देशविरतिधरम् । 6. आ + अव् धातुः - आगच्छति ।

आशीर्वादे तया दत्तेऽपृच्छद्गर्भकथां नृपः । साऽप्याह सैष पुत्रस्ते योऽरुणत् त्वत्पुरीमिमाम् ॥१२४॥
प्रीतोऽथ पादचारेण तमुपेयाय पार्थिवः । पुरो लुठन्तमुद्धृत्याश्लिष्याऽजिघ्रच्च मूर्द्धनि ॥१२५॥
नेत्रानन्दजलैः पूर्वं नेत्रा तीर्थजलैस्ततः । तेन राज्यद्वयेऽप्येष तदा पुत्रोऽभ्यषिच्यत ॥१२६॥
**दधिवाहन**राजोऽथ तपसेऽजनि दीक्षितः । **करकण्डुः** पुनर्जज्ञे रक्षायै दीक्षितः क्षितेः ॥१२७॥
**करकण्डुः कलिङ्गे**शः पाकशासनशासनः । प्रशशास प्रचण्डाज्ञो महीमथ महाभुजः ॥१२८॥
तस्य [1]गोपतितुल्यर्द्धेर्नीत्या गोपायतश्च गाम् । गोकुलानि प्रियाण्यासन् गोसहस्रेशतेजसः ॥१२९॥
संस्थानाकारवर्णाद्यैर्व्यवस्थाप्य पृथक् पृथक् । गोव्रजान् पश्यतस्तस्य संतर्प्यन्ते सदा दृशः ॥१३०॥
[2]स्फाटिको घटयित्वैव चेतनां लम्भितोऽन्यदा । वर्णाकृतिभ्यां तत्रैक्षि कश्चिद्वत्सतरोऽमुना ॥१३१॥
क्षीरैर्वत्सतरो यावदभिलाषमयं नवः । पोषणीयोऽन्वहं गोपानित्यशाद् गोपशासनः ॥१३२॥
पुष्टः कतिपयैरेव मासैरसमविक्रमः । अत्रासयन् महोक्षौघान् महाघोषैः सघर्घरैः ॥१३३॥
[3]हस्तिमल्ले यथा प्रीतिर्गोपस्येन्द्रस्य पश्यतः । गोपेन्द्रस्य तथाऽस्याऽऽसीत् वृषे [4]पशुपतेरिव ॥१३४॥
षाड्गुण्यावग्रहव्यग्रो नीत्वा वर्षाणि कानिचित् । भूयः कदाऽपि सोत्कण्ठो भूपः स व्रजमव्रजत् ॥३५॥
तत्रोक्षाणं तमप्रेक्ष्य नृपः प्रेक्षावतांवरः । वृषोऽस्मद्वल्लभः क्वेति वल्लवानादिशद्द्रुशम् ॥१३६॥
जीर्णः स जरसा शीर्णदशनो विक्रमोज्झितः । निविष्टो वत्ससङ्घट्टैः कर्शितो दर्शितोऽथ तैः ॥१३७॥
तं तथा वृषमालोक्य विषमां विमृशन् दशाम् । चिन्तयामास चित्तेन [5]तदात्वोद्बुद्धबोधिना ॥१३८॥
यस्य दृप्ता महोक्षाणो दूरादाकर्ण्य गर्जितम् । गोष्ठाजिरेष्वभज्यन्त घट्यते ही स वत्सकैः ॥१३९॥
सर्गे वा सर्वभूतानां स्थितौ वा प्रलयेऽपि वा । यथेष्ट[6]मीष्टे धिक् कष्टं कालोऽय[7]मनवग्रहः ॥१४०॥
चेतनाचेतनं लोकं सृष्ट्वा सृष्ट्वातिघस्मरः । अहो महोदरः कालो न तृप्यति हहा लिहन् ॥१४१॥
उपायैर्मूषकेभ्योऽपि रक्ष्यते वस्त्वनेकशः । न सर्वमूषकस्याऽस्य प्रतीकारस्तु विद्यते ॥१४२॥
दृश्यते यद्यदैवेह तत्तदैव न दृश्यते । त्रिलोकीमल्लिकागोलैः कालः खेलति कौतुकी ॥१४३॥
अभूत्वाऽऽप्नोति यो भूतिं भूत्वा चाभूतिमाप्नुयात् । अभावादिरभावान्तो भावो भावः कथं भवेत् ॥१४४॥
अनागतमतीतं च नार्थकारीत्यवस्तु सत् । क्षणिकस्य सुखस्याशां मोक्तुमीष्टे न धिक् कुधीः ॥१४५॥
कुटुम्बदेहश्रीदारानुदारान्नाद्रियेत कः । सर्वंकषाद्भयं किन्तु कालादेव बलीयसः ॥१४६॥
काललालाभिरुच्छिष्टं परित्यज्याखिलं भवम् । [8]प्रतिष्ठासुः शिवायार्हत्तत्त्वेषूत्तिष्ठते सुधीः ॥१४७॥
इति वैराग्यसारस्य विचारस्येव संविदा । तस्य बोधः स्फुरत्पूर्वभवसंस्कारभूरभूत् ॥१४८॥
देवतादत्तलिङ्गोऽथ तृणवत् त्यक्तवैभवः । भेजे प्रत्येकबुद्धत्वं **करकण्डु**र्मुनीश्वरः ॥१४९॥

---

टि. 1. गोपतिः कृष्णः तस्य तुल्या ऋद्धि यस्य । 2. स्फटिकाश्मना निर्मितः इत्यर्थः । 3. हस्तिमल्लः-इन्द्रस्य हस्ती ऐरावणः, तस्मिन् । 4. पशुपतिः महेशः, तस्य । 5. तदात्वम् - तस्मिन् समये । 6. चेष्टते इत्यर्थः । 7. अमर्यादः । 8. प्रस्थातुं इच्छति - प्रतिष्ठासुः ।

श्वेतं सुजातं सुविभक्तशृङ्गं गोष्ठाङ्गणे वीक्ष्य वृषं जरार्त्तम् ।
ऋद्धिं त्वनृद्धिं प्रसमीक्ष्य बोधात् **कलिङ्गराजर्षि**रवाप धर्म्मम् ॥१५०॥ [इन्द्रवज्रा]

अथ **द्विमुखचरितम्**—

**पञ्चाल**देशे **काम्पील्य**पुरे **हरिकुलो**द्भवः । अभूत् प्रभूतसत्कर्मा **जयवर्मा** नरेश्वरः ॥१५१॥
**गुणमाले**ति तस्याऽस्ति राज्यलक्ष्मीरिव प्रिया । [1]यदास्यदास्यवान् साऽङ्कपङ्को भाति सुधाकरः ॥१५२॥
अनन्यनृपसामान्यं निःसामान्यमनोरथः । आस्थानीमण्डपं कर्तुं नृपतिः स्थपतीनशात् ॥१५३॥
भुवं परीक्ष्य वास्तुज्ञैर्वास्तुपूजा पुरस्सरम् । मुदा खातेऽथ सञ्जाते मुहूर्त्ते स्फूर्त्तिशंसिनि ॥१५४॥
माणिक्यैर्धामभिर्धाम्नां खमाणिक्यमिव ज्वलन् । पञ्चमेऽह्नि महीमध्ये दृष्टस्तैर्मुकुटोऽद्भुतः ॥१५५॥ युग्मम् ॥
विज्ञप्तस्तैः क्षितीशोऽथ सहर्षः पर्षदा सह । तमेत्य खातभूश्वभ्रान्मुदा मुकुटमग्रहीत् ॥१५६॥
जयघोषैः स्फुरत्तोषैस्तूर्यैर्गर्ज्जद्भिरुत्सवात् । [2]राजन्यमौलिस्तं मौलिं कोशे प्रावेशयत् स्वयम् ॥१५७॥
भूभुजा पूजितास्तेन सत्कृताश्चाऽथ शिल्पिनः । स्वर्विमानोपमं मङ्क्षु मण्डपं निरमापयन् ॥१५८॥
जज्ञे जगत्त्रयीचित्तचौर्येणोपस्कृतैः किल । तत्र चित्रसभा चित्रा सजीवैश्चित्रकर्मभिः ॥१५९॥
निधाय मुकुटं मूर्ध्नि मूर्द्धन्यः स महीभुजाम् । आस्थानमण्डपे तस्मिन् सिंहासनमशिश्रियत् ॥१६०॥
मूर्द्धन्येन द्विधा तेन [3]रेफेणेवाग्नितेजसा । वर्णोज्ज्वलं मुखं भेजे द्वित्वं राज्ञोऽत्र नाद्भुतम् ॥१६१॥
ततः प्रभृति भूभर्त्ता **जयवर्मा** स भूतले । विख्यातो **द्विमुखो** नाम्ना श्रिया शतमखोपमः ॥१६२॥
श्रुत्वा**ऽवन्तीपति**स्तां च मुकुटस्य कथां तथा । **प्रद्योतः** प्राहिणोद् दूतं **द्विमुखं** प्रत्यमर्षणः ॥१६३॥
**द्विमुखा**भ्यर्णमभ्येत्य **प्रद्योता**ज्ञां जगाद सः । यदि वो जीवितेनाऽर्थस्तन्मौलिरयमर्प्यताम् ॥१६४॥
तमाह **द्विमुखो** मौलिं मत्तो मत्तो मुधाऽर्थयन् । वातूलो वे[१]त्त्य**वन्ती**शो न किञ्चिदपि बालिशः ॥१६५॥
रथो**ऽग्निभीरु**र्देवी च **शिवाऽनलगिरिः** करी । दूतः स **लोहजङ्घ**श्च तस्य प्रतिपणोऽस्तु सः ॥१६६॥
अथाऽट्टहासी रोषेण भीमो भूमीश्वरः पुरः । तस्यार्द्धचन्द्रं दूतस्य गले मौलिमयोजयत् ॥१६७॥
तां च दूतादथाकर्ण्य कर्णद्वारकिरं गिरम् । प्रयाणभेरीभाङ्कारैः प्रद्योतः पिदधे श्रुती ॥१६८॥
**प्रद्योते** चलितेऽनेकै[4]रनेकप-रथाऽ[5]र्वभिः । पदातिकोटिसैन्यैश्च प्राचलन्नचला अपि ॥१६९॥
कृतपार्ष्णिप्रतीकारः सारासारबलोज्ज्वलः । पञ्चालदेशसीमान्तमवन्तीशः समासदत् ॥१७०॥
**द्विमुखो** द्विगुणोत्साहः सेनाङ्गैः सर्वतो वृतः । सप्तभिः स्वैः सुतैः साकं [6]साऽऽकम्पीकृतशात्रवः ॥१७१॥
इयाय देशसीमान्तं निजै[7]र्निःस्वाननिस्वनैः । पातयन् परसेनानां गर्वगर्भमिवाऽऽहवात् ॥१७२॥ युग्मम् ॥

---

१. वेत्यवंती.... A, B, D, K, H, KH ।

टि. 1. यस्याः आस्यस्य दासभाववान् साङ्कपङ्कः चन्द्रः इत्यन्वयः । 2. राज्ञां समूहः राजन्यं तेषां मौलिः । 3. रेफः-रकारात्मकवर्णः । यथा मौलिः शिरसि स्थाप्यते तथा रेफोपि वर्णस्योपरि धार्यते 4. अनेकपः - हस्ती । 5. अर्वन् (पु०) - अश्वः तैः । 6. आ-समन्तात् कम्पेन सहितः कृतः शत्रूणां समूहो येन स साकम्पीकृतशात्रवः । 7. निःस्वानं-तुर्यं, तेषां निस्वनैः स्वैः ।

तद्द्वयोः सादिनं सादी निषादी च निषादिनम् । रथी च रथिनं योद्धुं पत्तिः पत्तिं समासदत् ॥१७३॥
अग्रे मुकुटमाहात्म्यान्मुखेन द्वित्वमादृतम् । रणे तु **द्विमुख**स्यासीत् विक्रमस्तत्र कोटिधा ॥१७४॥
बले जितेऽपि तेनाऽथ **प्रद्योतः** स्वयमापतन् । विशस्त्रो विरथः कृत्वा बद्ध्वाऽऽनिन्ये निजां पुरीम् ॥१७५॥
पादान्तक्षिप्तकटकः **प्रद्योत**स्तत्र भूमिभृत् । **द्विमुखेन** लघूचक्रे नरेन्द्रेणाऽद्भुतं न तत् ॥१७६॥ युग्मम् ॥
सञ्चरन्ती**मवन्तीशः** कारागाराऽग्रतोऽन्यदा । कन्यामतिश्रियं धन्यां प्रेक्ष्य यामिकमब्रवीत् ॥१७७॥
कत्यपत्यानि राज्ञोऽस्य तेषु केयं किमात्मजा । **प्रद्योत**मिति पृच्छन्तं यामिको वाचमाददे ॥१७८॥
देवस्य **वनमाला**ख्या सप्ताऽसूत सुतान् सती । यैरष्टानां दिशां भर्त्ताऽष्टमूर्त्तिर्भाति भूपतिः ॥१७९॥
**वनमाला**ऽथ कन्याऽस्तु ममैकेति मनोरथात् । **मदना**ख्यस्य यक्षस्याराधनं व्यधितात्मना ॥१८०॥
जाताथ पारिजातद्रुमञ्जरीस्वप्नसूचिता । क्रमेण **वनमाला**याः सुता सर्वगुणाद्भुता ॥१८१॥
दत्त्वोपयाचितं तस्य यक्षस्याथ महोत्सवात् । तेनैव कन्यका नाम्ना चक्रे **मदनमञ्जरी** ॥१८२॥
इयं कलाभिः सम्पूर्णा बाल्येऽजनि सरस्वती । विभाति यौवने रूपश्रिया श्रीरिव सम्प्रति ॥१८३॥
तां वीक्ष्य तत्कथामित्थमाकर्ण्य महीपतिः । निकारतपसस्तस्य तां फलाप्तिममन्यत ॥१८४॥
तां विना किं श्रिया सारा कारापि यदि साप्यते । तनुश्चेतनया पुण्या तां विना त्यज्यते हि सा ॥१८५॥
अतः परं पदोर्व्यर्थो द्विधाऽपि कटकग्रहः । याम्येव तां विना नेतो याम्येवाऽथ यमालयम् ॥१८६॥
इति ध्यायन्नसौ ज्ञातवृत्तान्तेनाऽवनीभुजा । आनायि यामिकादेव **प्रद्योतः** पर्षदं मुदा ॥१८७॥
स्वस्यैवाऽर्द्धासने राज्ञाऽभ्युत्थायाऽथ निवेशितः । द्विधापि प्राञ्जलीभूय **प्रद्योतो**ऽभिदधे वचः ॥१८८॥
त्वदायत्ता मम प्राणास्त्वदायत्ता मम श्रियः । प्राणानां च श्रियां च त्वमभवः प्रभवो हि मे ॥१८९॥
तेषामेव ततः प्रेम्णा कटकेनेव यन्त्रितः । स्थितोऽस्मि सेवकोऽहं ते व्यर्थस्तु कटकग्रहः ॥१९०॥
तदीयाऽऽकूतदूतस्य भाषितस्यास्य भाववित् । तत्रैवाऽऽनाय्य तस्मै तामदान्**मदनमञ्जरीम्** ॥१९१॥
दत्ते मौहूर्त्तिकेनाऽथ मुहूर्ते**ऽवन्ति**भूपतिम् । विवाह्य **द्विमुखः** पुत्र्या प्रैषयद्विषयाय तम् ॥१९२॥
ततः प्रभृत्य**वन्तीशः प्रद्योतो द्विमुख**स्य सः । जामाता कीर्त्तिभिः शुभ्रो जङ्गमोऽभूज्जयध्वजः ॥१९३॥
**द्विमुख**क्षोणिशक्रस्य पुरे शक्रध्वजोऽद्भुतः । कदाचिदजनि स्मेरो महेनाऽथ महीयसा ॥१९४॥
राजा यथार्च्यते लोकैर्दैवतं चातिभक्तिभिः । भावेनैवाऽवनीन्द्रोऽपि तथा तं ध्वजमार्च्चयत् ॥१९५॥
व्यतीतेऽथ महेऽन्येद्युर्विलुप्तं पतितं नृपः । निध्यायाऽमेध्यमध्यस्थं शक्रध्वजमचिन्तयत् ॥१९६॥
रत्न-स्रक्-सुरभिद्रव्यैर्ह्यो[१] यः संपूजितो जनैः । [२]धिक् स्वार्थपरतां सोऽद्य शाक्रो विध्वंस्यते ध्वजः ॥१९७॥
स्वार्थादेवाऽऽदरो लोके तथा स्वार्थादनादरः । न स्वार्थो यस्य तस्याऽहो नादरो नाऽप्यनादरः ॥१९८॥
राज्यं स्त्रियः श्रियो देहः सर्वोऽयं बाह्यविस्तरः । परमार्थेन न स्वार्थो यः पुराप्येवमुज्झ्यते ॥१९९॥

---

१. र्यश्च – H, A, C, K, KH । २. शक्रध्वजः स एवाद्य हहावस्थामिमां गतः – B, A ।

नित्यं स्वार्थेष्वतिव्यग्राः स्वार्थैर्व्यर्थै[१]र्विमोहिताः । धिग् जडास्तात्त्विकं स्वार्थमौदासीन्यं न जानते ॥२००॥
**औदासीन्यं परो धर्म औदासीन्यं परं तपः । प्रत्यक्षां मुक्तिमेवेदमौदासीन्यं विदुर्बुधाः** ॥२०१॥
**यथेडा[1]-पिङ्गले त्यक्त्वा सुषम्णां योगिनः श्रिताः । रागारागौ तथा स्वार्थौ त्यक्त्वौदासीन्यमर्थ्यताम्** ॥२०२॥
**यो रागारागभूः स्वार्थः स्वार्थाभासः स धीमताम् । अतीत्य तद्द्वयं स्वार्थः सामायिकमिदं विदुः** ॥२०३॥
इतिवैराग्यसारस्य विचारस्येव संविदा[2] । तस्य बोधः स्फुरत्पूर्वभवसंस्कारभूरभूत् ॥२०४॥
देवतादत्तलिङ्गोऽथ तृणवत्त्यक्तवैभवः । भेजे प्रत्येकबुद्धत्वं **द्विमुखो**ऽपि महामुनिः ॥२०५॥
शक्रध्वजं पूजितमेकदाथ विलोक्य लोकैरपरेऽह्नि लुप्तम् ।
ऋद्धिं त्वनृद्धिं प्रसमीक्ष्य बोधात् **पाञ्चालराजर्षिरवाप** धर्मम् ॥२०६॥ [उपजातिवृत्तम्]

अथ **नमिचरित्रम्**—

अस्त्य**वन्तिषु** विख्यातं पुरं नाम्ना **सुदर्शनम्** । तस्मिन्नजनि राजन्यमणि**र्मणिरथो** नृपः ॥२०७॥
युवराजोऽभवत्तस्य **युगबाहुः** सहोदरः । प्रिया **मदनरेखे**ति यस्याऽजनि गुणोज्ज्वला ॥२०८॥
सम्यक्त्वव्रतसंशुद्धं धर्ममार्हतमादितः । सा मानुष्यककल्पद्रोः फलं मधुरमादित ॥२०९॥
तस्याः सर्वैर्गुणैः पूर्णो जज्ञे **चन्द्रयशाः** सुतः । प्रेम्णा दशाब्ददेशीयः श्रियाऽभीक्ष्णं कटाक्ष्यते ॥२१०॥
दृष्ट्वा **मदनरेखां** च तां वधूमवधूतधीः । कामभूतग्रहग्रस्तः सोऽभू**न्मणिरथो**ऽन्यदा ॥२११॥
**न लज्जां नार्यमर्यादां नापवादं न वा श्रुतम् । गणयन्ति न वा धर्मं निपाते बद्धबुद्धयः** ॥२१२॥
दध्यावथ कथं योगो भवेन्मदनरेखया । प्रेम्णा साधारणेनैव पूर्वं विश्वासयामि वा ॥२१३॥
यथावसरमेवाऽथ मन्मथस्याऽपि शासनम् । क्रमेण कारयिष्येऽहमुपायैः किं न सिध्यति ॥२१४॥
ताम्बूलकुसुमालेपनेपथ्याभरणादिकम् । तेनाऽथ प्रेषितं सर्वं निर्विकारैव साऽग्रहीत् ॥२१५॥
निजाऽनुजस्य वात्सल्यात् ज्येष्ठो मयि महाशयः । प्रसादं तनुते नित्यमित्यमन्यत सा वधूः ॥२१६॥
रहः कदाचिदासाद्य स्वयं मणिरथो वधूम् । ऊचे मां स्वामिनं कृत्वा राज्यस्य स्वामिनी भव ॥२१७॥
इत्युक्तवति भूपालेऽनाचारचतुराशये । धर्मराजस्य षाड्गुण्यसिद्धान्तमिव सा जगौ ॥२१८॥
अकृत्रिमं तव स्वाम्यं मज्जाने[3]श्चाऽनुजस्य ते । तत**श्चन्द्रयशो**मातुः स्वाम्यमस्त्येव मेऽधिकम् ॥२१९॥
ज्येष्ठः श्रेष्ठकुलोद्भूतिर्लोकपालश्च मध्यमः । कथमित्थं वदन् मिथ्या स्वात्मनोऽपि न लज्जसे ॥२२०॥
**वरं मृत्युर्वरं शस्त्रं वरमग्निर्वरं विषम् । न तु तज्जीवितं श्रेयो यत् क्रमातिक्रमाद्भवेत्** ॥२२१॥
जयस्याडम्बरो राज्ञां व्यर्थो दिग्यात्रयैव यः । इन्द्रियाणि जय ज्येष्ठ ! जितैस्तैर्विजितं जगत् ॥२२२॥
उपेक्ष्य शत्रुषड्वर्गं यो राज्ञामपरो जयः । ज्वलन्तमालयं हित्वा शैलनिर्वापणं हि तत् ॥२२३॥
इष्टाभासेषु मिथ्यैवं शलभा इव लोलुभाः[4] । स्वं यशः शाश्वतं लोका जीवितं हारयन्ति हा ॥२२४॥

---

१. व्यामोहिताः - L ।

टि. 1. इडा, पिङ्गला, सुषम्णा एतास्तिस्त्रः शरीरस्था नाडयः । 2. संवित्-संकेतः, तेन । 3. मम पत्युः इत्यर्थः । 4. लोलुभः- लोभी ।

हिंसानृताभ्यां चौर्येण परस्त्रीणां च कामतः । यान्त्येव नरकं घोरं जीवाः स्वैरेव चेष्टितैः ॥२२५॥
अनर्थः कामनामाऽयं वज्रपातः स्वसम्पदाम् । नरकाऽध्वैकपाथेयं त्वया तन्मुच्यतां नृप ! ॥२२६॥
स्वकुले त्वं मषीकूर्चं जीवन्मरणमात्मनः । कन्दच्छेदं स्वकीर्तेश्च कर्तुं व्यवसितोऽसि किम् ॥२२७॥
दर्पसाहसशीलानामविचारितकारिणाम् । आयुषा सह नश्यन्ति सम्पदो मूढचेतसाम् ॥२२८॥

किञ्च—

बीजान्मूलमधो याति स्वभावादूर्द्धमङ्कुरः । नाऽऽधाराऽऽधेयतां त्वेकबीजत्वात् त्यज्यते मिथः ॥२२९॥
एवमेव ततो देव ! तस्य त्वदनुजन्मनः । मत्प्रियस्य त्वमाधारः किं वृथा चेष्टसेऽन्यथा ॥२३०॥
बोधितोऽपीति दध्यौ स विश्रब्धमनुजं वरम् । व्यापाद्याऽपि करिष्यामि [1]स्वसादेनां क्रमादिति ॥२३१॥
कदाचिदथ कालेन स्वप्ने **मदनरेखया** । पूर्णेन्दुः शारदो दृष्टः ख्यातश्च **युगबाहवे** ॥२३२॥
भूचक्रशक्रः सूनुस्ते भवितेति स चादिशत् । अर्हन्मुनिकथार्चानां दोहदं चाऽप्यपूरयत् ॥२३३॥
अन्येद्युश्च वसन्तर्त्तौ तया **मदनरेखया** । **युगबाहुः** सहोद्याने लीलाभिर्दिनमत्यगात् ॥२३४॥
निशि श्रान्तश्च तत्रैव विश्रान्तः सह कान्तया । अल्पकल्पपरीवारः स तस्थौ कदलीगृहे ॥२३५॥
प्रस्तावं च तदोत्प्रेक्ष्य बन्धुरन्धुरिवाधमः । तत्र प्रीतितृणच्छन्नमुखो **मणिरथो**ऽभ्यगात् ॥२३६॥
प्रबुध्यते कुतोऽद्याऽत्र युवराजेति स ब्रुवन् । प्राप्तः केलिगृहं तस्मै बुद्ध्वाऽथाऽभ्युत्थितोऽनुजः ॥२३७॥
प्रणमन्तं कृपाणेन निष्कृपात्मा नृपाधमः । प्रहृत्य धिक् प्रमादं मे करात् पेतेऽसिनेत्यगात् ॥२३८॥
तथाविलसितं तस्य ज्ञातमेवेङ्गितैः परम् । स्वामीति यामिकैर्मुक्तो[2]ऽपसरेत इतीरणात् ॥२३९॥
किंवदन्तीमिमां श्रुत्वा स्वयं घातचिकित्सकैः । मन्त्रिभिश्च सहैवाऽऽप्तैः **प्राप्तश्चन्द्रयशाः** सुतः ॥२४०॥
युगबाहोर्वपुर्वीक्ष्य सृतनिःशेषशोणितम् । व्रणकर्मणि मर्मज्ञैर्वैद्यैस्त्यक्तस्तदादरः ॥२४१॥
[3]दृग्विजिह्वाऽऽवली श्वासः श्लथा वाक् कन्धराऽधरा । ओष्ठौ चाऽसंवृतौ रिष्टं तददृश्यत तस्य तैः ॥२४२॥
भर्तुर्**मदनरेखा**ऽपि मत्वाऽवस्थामथाऽन्तिमाम् । आराधनां महाध्वार्हपाथेयर्द्धिमि[१]वाधित ॥२४३॥
शृणु प्राणेश ! विज्ञप्तं मोहं देहादिषु त्यज । धर्मं स्वीकुरु जैनेन्द्रं भजस्वाऽवहितो हितम् ॥२४४॥
देहो गृहं कुटुम्बं श्रीः प्रतिष्ठा सर्वमाप्यते । अर्हदुक्तस्तु धर्मोऽयं सुकृतैर्यदि लभ्यते ॥२४५॥
**[१]व्रतान्य[२]ालोचना [३]पापगर्हा [४]श्रेयोऽनुमोदना** । **[५]क्षामणा[६]ऽनशनं [७]पापस्थानोत्सर्गः [८]सुभावनाः** ॥२४६॥
**[९]चतुःशरणसंप्राप्तिः [१०]परमेष्ठिनमस्कृतिः** । महोदयकरी सेति दशधाऽऽराधनास्तु ते ॥२४७॥
"ध्यात्वाऽर्हतो गुरून्नत्वा सम्यक्त्वं मनसाश्रय । रत्नत्रयमयः पन्थाः शिवस्याभिमतोऽस्तु ते ॥२४८॥
हिंसामृषापरस्वाऽन्यस्त्रीसङ्गेच्छाश्च वर्ज्जयन् । अणुव्रतानि पञ्चेति भावतो भजतां भवान् ॥२४९॥
गुणान् व्रतय दिग्यात्रादण्डभोगयमात्मकान् । शिक्षाः साम्येष्टसङ्कोचपौषधातिथ्यतो भज ॥२५०॥

---

१. वाधितः - L, P, A, H ।

टि. 1. आत्मसात् । 2. अपसर इतः इति ईरणात् इति वाच्यम् । 3. वक्रा दृग्, श्वासः परम्परावान् नीचैः ग्रीवा, शिष्टं स्पष्टम् ।

यद्यदाशातितं तत्त्वत्रयश्रद्धानदूषणात् । किञ्चिन्मिथ्यात्वमिष्टं वा तत्ते मिथ्यास्तु दुष्कृतम् ॥२५१॥
ज्ञानदर्शनचारित्रतपोवीर्यात्मनां स्वयम् । त्वमालोचय पञ्चानामाचाराणामतिक्रमम् ॥२५२॥
जिनादिसाक्षिकं सर्वमालोच्येति त्रिधा त्रिधा । तन्मिथ्यादुष्कृतेनैव प्रतिक्रमणमस्तु ते ॥२५३॥
दुष्कृतं यत्कृतं चात्र भवे पूर्वभवेऽपि वा । तच्च तस्य च कर्त्तारं गर्हस्वाऽऽत्मानमात्मना ॥२५४॥
स्वस्यान्येषां च सत्कर्माण्यनुमोदस्व भावतः । एवं हि वृद्धिस्वीकारौ पुण्यस्याऽभिमतौ जिनैः ॥२५५॥
भवेऽत्रैवाऽथ चान्यत्र मनोवाक्कर्मभिस्त्वया । यद्दुःखे स्थापिता जीवास्तान् सर्वान् क्षमयात्मना ॥२५६॥
किञ्च तेषु क्षमस्व त्वं बाधां मुञ्चापराधजाम् । **कर्मभिः प्रेरितानां हि कोऽपराधः शरीरिणाम्** ॥२५७॥
सुखं दुःखं च कर्मोत्थं निमित्तमपरो मुधा । परमार्थेन जीवानां न तन्मित्रं न वा रिपुः ॥२५८॥
दुर्गत्यै देहिनां वैरमियं मैत्री तु मुक्तये । वैरमुत्सृज्य तन्मैत्रीमेवं जीवेषु चिन्तय ॥२५९॥
यस्मै षट्कायजीवानामारम्भः क्रियते जनैः । प्रत्याख्याहि तमाहारमेवं ते हितमायतौ ॥२६०॥
पञ्चाश्रवान्निशाभक्तं क्रोधादींश्चतुरस्तथा । रागं मायामृषां द्वेषं कलिं पिशुनतां तथा ॥२६१॥
अभ्याख्यानं परीवादं मिथ्यादृक्शल्यमित्यपि । व्युत्सृजाऽमूनि पापानां स्थानानि जिनसाक्षिकम् ॥२६२॥
सावद्यमान्तरं योगं सर्वं बाह्यं तथोपधिम् । व्युत्सृज त्वं समुच्छ्वासे चरमे वपुरप्यदः ॥२६३॥
भवादिभावनाः शुद्धा भजतां भावतो भवान् । [1]प्रेरयन्ति हिताश्चित्तं धर्मादन्यत्र न क्वचित् ॥२६४॥
शरणं चार्हतः सिद्धान् साधून् धर्मं च संश्रय । न जीवांस्त्रातुमन्योऽस्ति यत्कोऽपि परमेश्वरः ॥२६५॥
आवर्त्तय नमस्कारं पञ्चानां परमेष्ठिनाम् । श्रेयःश्रियं वशीकर्तुं प्रभुर्मन्त्रो जयत्ययम् ॥२६६॥
भावतः [2]स्मरतः पञ्चपरमेष्ठिनमस्कृतिम् । यस्य प्राणाः प्रतिष्ठन्ते मृतोऽपि हि स जीवति'' ॥२६७॥
विघ्नान् विजित्य वीर ! त्वं धीरत्वं मनसा श्रय । साधनीयोऽवधानेन चन्द्रवेध्यक्षणोऽधुना ॥२६८॥
तदा **मदनरेखायाः** श्रेयसीः स्वादसादरः । दध्यौ पाथेयवद्वाचः स मौलितुलिताञ्जलिः ॥२६९॥
तदा तस्मिन् दिवं प्राप्ते शुचा क्रन्दति नन्दने । लोके शोकेन चाऽऽक्रान्ते सती सेति व्यचिन्तयत् ॥२७०॥
निर्गलोऽधुना ज्येष्ठः शीलं मे ध्वंसयिष्यति । अथवाऽस्मिन् कुमारेऽपि पापः पापं करिष्यति ॥२७१॥
कालोचितमिदं तन्मेऽधुना निःसृत्य याम्यहम् । वरं मे मृत्युरप्यस्तु न पुनः शीलखण्डना ॥२७२॥
इत्थं निशीथे निश्चित्य निःसृत्य तरसाऽथ सा । उत्पथेन तथाऽयासीद् भग्नशुल्को यथा वणिक् ॥२७३॥
सुप्ता क्वापि महाटव्यां विलीना च तमस्विनी । तदीयापत्तमःस्तोमं घनं वीक्ष्येव लज्जिता ॥२७४॥
साऽपराह्णे सरः प्राप्य वृत्तिं चक्रे वनीफलैः । श्रान्ताध्वना च विश्रान्तिं क्वचित् तेने लताकुले ॥२७५॥
साकारमथ साऽऽहारं प्रत्याख्याय विवेकिनी । तस्थौ सायं नमस्कारपरा धर्मपरायणा ॥२७६॥
घूकौघघूत्कृतैर्व्याघ्रबूत्कृतैर्व्यालसूत्कृतैः । शीलाङ्गरक्षगुप्ताया तत्राऽस्या नाऽभवद्भयम् ॥२७७॥

---

१. प्रेर्यं त्वयाहिता... C, H, प्रेर्यंत्तयाहिता – B । २. सारतः – A ।

वेदनार्त्तार्द्धरात्रेऽथ प्रोद्भूताऽद्भुतलक्षणम् । सहसैव कृतोद्द्योतमसूताऽसौ सती सुतम् ॥२७८॥
आमुक्तयुगबाह्वाह्वनाममुद्रमहर्मुखे । रत्नकम्बलसंवीतं न्यस्य तत्रैव तं शिशुम् ॥२७९॥
वाससां स्वस्य चाधातुं शौचं प्राप्ता च सा सरः । हस्तेनोत्क्षिप्य चाऽक्षेपि व्योमाग्रं [1]जलकुम्भिना ॥२८०॥
विद्याधरयुवा कश्चित् निपतन्तीं दिवो भुवि । नियत्यैव समानीतस्तां प्रत्यैच्छदतिश्रियम् ॥२८१॥
नीताऽथ तेन वैताढ्ये स्मरन्ती विधिवामताम् । तमुवाच महाभाग ! शृणु मेऽवहितो[१]ऽर्थनाम् ॥२८२॥
अद्यैवैकाकिनी रात्रौ प्रसूताऽहं सुतं वने । त्वया जलगजोत्क्षिप्ता प्राप्तेति विदितं च ते ॥२८३॥
मां तत्र नय तं चाऽत्र समानय ममात्मजम् । तस्य भाग्यद्वितीयस्य विपत् सम्भाव्यतेऽन्यथा ॥२८४॥
हतो भर्त्ता भयं ज्येष्ठाद्वने सूतिरिहागतिः । अपाऽऽवृतमहो द्वारं विपदां मम वेधसा ॥२८५॥
तन्मां सौम्य ! विना क्षेपं तेन मीलय सूनुना । प्रसीदाऽपत्यदानेन धर्मशील ! दयां कुरु ॥२८६॥
सोऽप्युवाच युवा चक्षुस्तरलं तां प्रति क्षिपन् । अस्ति **गन्धार**देशेऽत्र नाम्ना **रत्नावहं** पुरम् ॥२८७॥
तत्र विद्याधराधीशो **मणिचूडो** महानृपः । पत्नी **कमलवत्य**स्य मामसूत **मणिप्रभम्** ॥२८८॥
मयि विद्याधरश्रेणिद्वयस्य न्यस्य चक्रिताम् । प्रव्रज्य **मणिचूडो**ऽभूच्चारणश्रमणः स्वयम् ॥२८९॥
स सम्पन्नचतुर्ज्ञानो नन्तुं नन्दीश्वरेऽर्हतः । गतोस्तीति निनंसुस्तं तत्र [२][2]यन्नभवं तदा ॥२९०॥
त्वामाप्याऽथ तथाऽध्वाऽर्द्धात् व्यावृत्तोऽहं मणिप्रभः । याचे विद्याधरश्रीणां सपत्नी भव साम्प्रतम् ॥२९१॥
आभोगादेव विद्यायाः **प्रज्ञप्ते**र्विदितं च मे । वाहानीतः शिशुं निन्ये **मैथिलेन्द्रो** वनात् पुरीम् ॥२९२॥
शीलं च रक्षणीयं मे कामो वामश्च तद् ध्रुवम् । कालक्षेपादुपायः स्यादिति ध्यात्वा जगौ सती ॥२९३॥
नय **नन्दीश्वरे** पूर्वं मां वन्दे येन तज्जिनान् । [3]पूर्णेहिता हितार्थं ते ततः कर्त्ताऽस्मि सर्वथा ॥२९४॥
ततो नीत्वा सहर्षस्तां विमानेन **मणिप्रभः** । **नन्दीश्वरे** द्विपञ्चाशच्चैत्यान्यनमयत् क्षणात् ॥२९५॥
एको**ऽञ्जनाद्रिः** प्रत्याशं [4]दध्यास्यानां चतुष्टयम् । अष्टौ **रतिकरा**श्चेति द्विपञ्चाशच्चतुर्गुणाः ॥२९६॥
शतं दीर्घाणि पञ्चाशद्विस्तृतान्येषु चाद्रिषु । चैत्यानि सन्ति चोच्चानि योजनानां द्विसप्ततिः ॥२९७॥
नाम्नैषु **ऋषभो वर्द्धमानश्चन्द्राननः**स्तथा । **वारिषेणो** जिनार्च्चाः स्युरेवं चाऽष्टोत्तरं शतम् ॥२९८॥
शाश्वतार्हतचैत्यानि तानि नत्वा यथाविधि । कृतार्थं यत्र साऽऽत्मानं मुक्तकल्पममन्यत ॥२९९॥ कलापकम् ॥
समं **मणिप्रभेणैव** चारणश्रमणाधिपम् । **मणिचूडं** चतुर्ज्ञानमानमत्तत्र तं मुदा ॥३००॥
सतीभूषाशिखारत्नं तां ज्ञात्वा तं च लम्पटम् । खेचरं शमयामास तं शमी देशनामृतैः ॥३०१॥
सोऽपि सद्यो मुनेर्भूत्वा परस्त्रीवर्ज्जनव्रती । प्रणम्याऽतः परं माता स्वसा वाऽसीति तां जगौ ॥३०२॥
मत्वा समर्थितप्रायमधिकारमथापदाम् । [5]वार्त्तं वार्त्तां च वत्सस्य साऽपृच्छन्मुदिता मुनिम् ॥३०३॥

---

१. तोऽर्थिनां - A, तोऽर्थितां - C । २. यत्रभवं - A, यत्नभवं - D, KH, H ।

टि. 1. जलहस्ती, तेन । 2. गच्छन् अभवम् इत्यर्थः । 3. पूर्णः ईहितः यस्याः सा - पूर्णेहिता । 4. दधिमुखपर्वताः चत्वारः इत्यर्थः । 5. वार्त्त (त्रि०) - निरामयः, तम् मुनेर्विशेषणम् ।

मुनिस्तामाह धर्मज्ञे ! मा शुचः शृणु तद्भवान् । इहैव **जम्बू**द्वीपेऽस्ति विजयः **पुष्कलावती** ॥३०४॥
तत्र**ामितयशा** नाम पुरेऽभू**न्मणितोरणे** । कान्ताऽभूत् **पुष्पवत्या**ख्या तस्य षट्खण्डभूभुजः ॥३०५॥
**पुष्पसिंह**स्तयोराद्यो **रत्नसिंहो**ऽपरः सुतौ । उभावभूतां भूतेषु दयार्द्रौ धर्मकर्मठौ ॥३०६॥
राज्यं चतुरशीतिं तौ पूर्वलक्षाणि धार्मिकौ । पालयित्वाऽऽपतुर्दीक्षां चारणश्रमणान्तिके ॥३०७॥
चारित्रमनुपाल्याऽथ पूर्वलक्षाणि षोडश । **अच्युते**ऽभवतां कल्पे शक्रसामानिकौ सुरौ ॥३०८॥
तच्च्युतौ **धातकीखण्डे भरता**र्द्धधराभुजः । पत्न्यां **समुद्रदत्तायां** [1]**हरिषेण**हरेः सुतौ ॥३०९॥
नाम्नाऽऽद्यः [2]**सागरा**द्देवः परो **दत्त**श्च तावुभौ । मिथः प्रीतिसुधासिक्तावभूतामतिधार्मिकौ ॥३१०॥ युग्मम् ॥
**दृढसुव्रत**देवस्यैकादशस्यान्तिकेऽर्हतः । तौ द्वावगृह्णतां दीक्षां संवेगेन गरीयसा ॥३११॥
तृतीयेऽह्नि ततो विद्युत्पातजातमृती पुनः । अजायेतां सुरौ कल्पे प्रथमे तौ महर्द्धिकौ ॥३१२॥
अन्यदा **भरते**ऽत्रैव ताभ्यां श्री**नेमि**तीर्थकृत् । साक्षाद् व्याख्याक्षणे पृष्टः कियानद्यापि नौ भवः ॥३१३॥
जगाद युवयोराद्य इहैव **मिथिले**शितुः । नृपते**र्जयसेन**स्य भावी **पद्मरथो**ऽङ्गजः ॥३१४॥
**सुदर्शन**पुरेन्द्रस्य **युगबाहु**महीपतेः । पत्न्यां **मदनरेखा**यां तनुभूर्भविताऽपरः ॥३१५॥
[१]च्युत्वा तत्र युवां भूत्वा पिता पुत्रश्च भूपती । प्रबुध्य ध्वस्तकर्माणावक्षेपान्मोक्षमाप्स्यथः ॥३१६॥
श्रुत्वेत्येकावतारत्वं नीत्वाऽऽयुस्त्रिदिवालये । सैकस्तयोश्च **मिथिला**पतिः **पद्मरथो**ऽभवत् ॥३१७॥
स [२][3]व्यस्ताभ्यस्तवाहेन वत्से ! नीतो वनं च तत् । तं च त्वत्पुत्रमासाद्य मुदितः प्रत्यगात् पुरीम् ॥३१८॥
पत्न्यै स **पुष्पमालायै मिथिलेन्द्रे**ण चार्पितः । तज्जन्मोद्दिश्य चक्रे च महानिह महोत्सवः ॥३१९॥
अत्रान्तरे पुष्पवृष्टिरनभ्राया दिवो[३]ऽपतत् । विमानमेकमागाच्च सहस्रकिरणोज्ज्वलम् ॥३२०॥
ततोऽवतीर्य देवश्च कश्चिद् दिव्यविभूषणः । सतीं **मदनरेखां** तां त्रिःपरीय मुदाऽनमत् ॥३२१॥
पश्चात्तं मुनिमानम्य निविष्टः पुरतोऽमरः । विनयव्यत्यये हेतुं पृष्टः प्राह खगाय सः ॥३२२॥
**युगबाहु**रहं पूर्वभवे **मणिरथा**ऽनुजः । हतोऽग्रजेन तद्वैरानुबन्धात् शमितोऽनया ॥३२३॥
यस्मादजनि देवर्द्धिर्देहर्द्धिश्च ममाऽद्भुता । तस्मिन् धर्मे गुरुः सेयं सती पूर्वभवेऽभवत् ॥३२४॥
[4]पितृणाद्भर्तृणाच्चापि पुमान् धर्मेण मुच्यते । प्रतिकुर्वीत वीतस्वो धर्मदातुः कुतो गुरोः ॥३२५॥
**गुरुर्देवो गुरुर्धर्मो गुरुश्च परमागमः । तत् त्रयं तेऽवमन्यन्ते ये गुरूनवजानते** ॥३२६॥
अत एव गुरोः पादानभ्यर्च्य विधिवेदिनः । अर्च्चयन्ति ततो देवान् स्यादवज्ञाऽन्यथा गुरोः ॥३२७॥
**मणिप्रभं** प्रबोध्येति स खगं सुरसत्तमः । प्राञ्जलीभूय भूयोऽपि तां सतीं गुरुमालपत् ॥३२८॥
साधर्मिके ! प्रियं किं ते करवाणि समादिश । साऽप्याह मे प्रियं श्रेयस्तद्दातुं नेश्वराः सुराः ॥३२९॥

---

१. तित्वा – L, तत्वात् – K, D तत्वा – A । २. व्यस्तान्यस्त – A, B । ३. भवन् – A ।

टि. 1. हरिषेणनामा वासुदेवस्य सुतौ इत्यर्थः । 2. सागरदेवः आद्यः सागरदत्तश्चापरः । 3. विपरीतशिक्षिताश्वेन । 4. पितृऋणात् भर्तृऋणात् इति वाच्यम् । ऋतो वा तौ च – १।२।४ इत्यनेन सन्धिः ।

किं तु पुत्राऽऽननं द्रष्टुं **मिथिलां** नय मां पुरीम् । परलोकहितं येन निर्वृता वितनोम्यहम् ॥३३०॥
इत्युक्ते तेन सा नीता प्रीतान्तर्मिथिलां पुरीम् । **श्रीमल्लि-नमिनाथा**भ्यां निन्ये सा तीर्थतां हि पूः ॥३३१॥
अर्हज्जन्मव्रतज्ञानपूतायां पुरि तत्र सा । चैत्ये देवान्नमस्कृत्य साध्वीनामाश्रयेऽगमत् ॥३३२॥
प्रणम्याऽग्रे निविष्टाऽथ समं दिविषदाऽमुना । बोद्धुं **मदनरेखे**यं प्रवर्त्तिन्याऽभ्यधीयत ॥३३३॥
परिवर्त्तिनि संसारे मिथ्या शाश्वतमानिनः । स्निह्यन्ति धर्मादन्यत्र मोहेनाऽहो नियन्त्रिताः ॥३३४॥
अस्मिन्नित्यमविच्छिन्नदीर्घे संसारवर्त्मनि । गच्छन् प्रियः प्रियस्याऽपि मुहूर्त्तं न प्रतीक्षते ॥३३५॥
पिता भ्राता पतिः पुत्रः स्वसा माता सुता वधूः । संसारेऽनन्तशोऽन्योन्यं सम्बध्यन्तेऽत्र जन्तवः ॥३३६॥
क्व कुटुम्बं क्व वा लक्ष्मीः क्व स देहः क्व तद् गृहम् । आत्मसाद् धर्म एवैकः क्रियते तद्विवेकिभिः ॥३३७॥
क्षणेऽत्र सा सुतं द्रष्टुमर्थिता द्युसदा जगौ । अलं स्नेहेन संसारवर्द्धनेन ममाऽधुना ॥३३८॥
साध्वीश्चापृच्छ्य नत्वैताः सुरेऽत्र स्वास्पदं गते । तत्रैवाऽऽत्तव्रता नाम्ना **सुव्रता**ऽजनि सा सती ॥३३९॥
इतो यथा यथा **पद्मरथ**स्याऽवसथे शिशुः । सोऽवर्द्धताऽऽनमंस्तस्य भूभुजोऽन्ये तथा तथा ॥३४०॥
राजा **पद्मरथो** राज्ञी **पुष्पमाला** च तं सुतम् । नाम्ना **नमि**रिति ख्यातं चक्रतुर्गुणयोगिना[१] ॥३४१॥ युग्मम् ॥
भासुरप्रतिभाऽऽदर्शे चैतस्मिन् भाग्यभूतिभिः । पाठकेभ्यो विनाऽऽयासं स्वयं संचक्रमुः कलाः ॥३४२॥
क्षयी विधुर्मधुः[1] कालः किं चानङ्गः स मन्मथः । कान्ते वपुषि तस्यासीदुपमानदरिद्रता ॥३४३॥
अष्टोत्तरसहस्रं स कन्याश्चैक्ष्वाकुवंशजाः । कौतुकाल्लग्न एकत्र पितृभ्यां पर्य्यणाय्यत ॥३४४॥
तस्मै दत्त्वाऽन्यदा राज्यं स्वयं पद्मरथो नृपः । प्रव्रज्य केवली भूत्वा प्रतिपेदे महोदयम् ॥३४५॥
नमिर्नमितराजन्यचक्रश्चक्रधरः श्रिया । प्रतापात्तपनः प्राज्यमयं राज्यमपालयत् ॥३४६॥
मुक्त्वाऽपि पुण्डरीकाक्षं[2] श्रीरमुं शिश्रिये किल । देहार्द्धेन बबन्धेति विरूपाक्षः[3] प्रियां भिया ॥३४७॥
[4]शक्तः क्षमी प्रभुर्न्यायी प्रज्ञानिधिरनुद्धतः । सुभगः शीलवान् सोऽभूद् गुणी प्रियगुणाधिकः ॥३४८॥
रूपेण न्यायधर्माभ्यां विक्रमैश्वर्यकीर्त्तिभिः । स भूपतिर्भुवि भ्रेजे यथा दिवि दिवस्पतिः ॥३४९॥
इतस्तदा **मणिरथः** प्रहृत्य **युगबाहवे** । सौधं जगाम पापात्मा सिद्धकल्पमनोरथः ॥३५०॥
धिक् तत्र रात्रौ कालेन कालदूतेन भोगिना । स तुर्यं[5] नरकं नीतः पदे संदंश्य दुष्टधीः ॥३५१॥
अन्धो मोहादहो बन्धुं निपात्याऽमृत[२] पातकी । **पूर्वमासन्नपातानां धर्मात् प्रच्यवते हि धीः** ॥३५२॥
विपन्नावपि राजा च युवराजश्च सोदरौ । अपकीर्त्तिं च कीर्त्तिं चाऽभाजिषातां विभज्य तौ ॥३५३॥
अथोर्ध्वदेहिकं सर्वं निर्वाह्याऽश्रुप्लुतैस्तयोः । योग्य**श्चन्द्रयशा** राज्ये सचिवैरभ्यषिच्यत ॥३५४॥
मही[6]महीनाहीनाङ्गबाहुश्री**युगबाहुजः** । तां दधारोदयच्चन्द्रयशा**श्चन्द्रयशा** नृपः ॥३५५॥

---

१. शालिना – P, योनिना – L । २. त्यामित – B ।

टि. 1. मधुः विष्णुः । 2. पुण्डरीकाक्षः – विष्णुः । 3. विरूपाक्षः – शङ्करः । 4. यद्यपि शक्तः तथापि क्षमावान् इति अन्वयः कार्यः । 5. तुर्यं नरकं – चतुर्थं नरकम् । 6. अहीनः अहेः इनः स्वामी शेषनागः, तस्य इव संपूर्णाङ्गबाहुशोभा यस्य तस्य युगबाहोः सुतः ।

प्रचण्डशासनस्यास्य दुःसाध्यानपि शासतः । कदाचिदासीद्वाहानां वाहकेल्यां कुतूहलम् ॥३५६॥
समं स मन्त्रिभिः सर्वैः सामन्तैश्चान्वितस्ततः । वाहवाहार्हनेपथ्यो वाह्यालीदेशमासदत् ॥३५७॥
इतश्च राज्ञो राजन्यचक्रशक्रश्रियो नमेः । चतुर्दन्तः सितच्छायः [1]सुधाशनगजोपमः ॥३५८॥
आलानस्तम्भमुन्मूल्य मदान्धो विन्ध्यबद्धधीः । गम्भीरवेदी नेदीयच्छायामात्रमपि क्षिपन् ॥३५९॥
कृतान्त इव दुर्दान्तः प्रतिकारभयङ्करः । मुहुर्मूर्द्धानमाधुन्वन् स्पृशतः पवनादपि ॥३६०॥
उद्दण्डशुण्डादण्डश्रीः खण्डितुं खमिव क्रुधा । [2]मदस्यन्मधुपव्रातैरप्यनासादितान्तिकः ॥३६१॥
अपूर्व इव सर्वेषां गजवर्गनिवासिनाम् । उल्लङ्घ्य **मिथिला**सीमां द्विपोऽधावद्दिशैकया ॥३६२॥ पञ्चभिःकुलकम् ॥
[3]आशुगोप्या[4]ऽऽशुगो नासीद् [5]वाजिनोऽपि न [6]वाजिनः । वामनोऽभून्मनोवेगोऽप्यनुगन्तुं गजं तदा ॥३६३॥
उल्लङ्घ्य देशसीमानमपि श्री**नमि**भूभुजः । क्रान्त्वाऽतिभूयसीं भूमिं सो**ऽवन्ती**मव्रजद्गजः ॥३६४॥
**सुदर्शनपुरो**पान्ते सञ्चरन् कुञ्जरस्तदा । वाह्यालीमिलितैः प्रैक्षि स श्री**चन्द्रयशो**बलैः ॥३६५॥
अतिश्रान्तः क्षुधाक्रान्तो वशीकृत्य चमूचरैः । उपानिन्ये नरेशाय स **चन्द्रयशसे** गजः ॥३६६॥
महामहोत्सवेनाऽथ विशामीशो [7]वशापतिम् । हर्षविशवशात् प्रावीविशदात्मवशं पुरम् ॥३६७॥
अवन्तीन् स गतो दन्ती किंवदन्तीति विश्रुता । राज्ञापि **नमि**नाऽश्रावि सप्ताष्टैरथ वासरैः ॥३६८॥
निसृष्टार्थो नमेर्दूतः प्राप्य **चन्द्रयशो**ऽन्तिकम् । दन्तिनं प्रार्थयन् प्राप दन्तपातं [१][8]निकारतः ॥३६९॥
**नमि**स्तदेतदाकर्ण्य मदाध्मातो महाभुजः । सीमान्तमागमद् वेगात् कैश्चिदेव प्रयाणकैः ॥३७०॥
**नमिं** प्रति प्रतिष्ठासुः स्वयं **चन्द्रयशा** अपि । निषिद्धः शकुनैरूचे मन्त्रपूर्वं महत्तमैः ॥३७१॥
साम्प्रतं साम्प्रतं स्थातुं देव ! दुर्गबलेन ते । कार्यं कालोचितं कार्यं ततः कालविलम्बतः ॥३७२॥
ततः प्रतिकृतोपान्तावासभूमिः स भूपतिः । शतघ्नीभिश्च यन्त्रैश्च दुर्गमुच्चैरसज्जयत् ॥३७३॥
**नमि**रस्खलितोऽभ्येत्य **सुदर्शनपुराद्** बहिः । विशोध्य दूषितां भूमिं सैन्यमावासयन्निजम् ॥३७४॥
अधःस्थैरुपरिस्थानां ततः प्रववृते रणः । **पुष्पवर्षैः** सुरस्त्रीभिरर्हितोऽपि स गर्हितः ॥३७५॥
दुर्गलम्भश्रुतोपायैर्दुर्गं **नमि**रुपाक्रमत् । तत्तत्प्रतिचिकीर्जागरूक**श्चन्द्रयशा**स्त्वभूत् ॥३७६॥
सवित्री सा तयोर्दध्यौ.**सुव्रतार्या**ऽपि शुद्धधीः । उभौ मा नरकं यातां मिथ एव वधोद्यतौ ॥३७७॥
अथेयं तामनुज्ञाप्य निजामेव **प्रवर्त्तिनीम्** । आर्यया परया सार्द्धं शिबिरे श्री**नमेर**गात् ॥३७८॥
गत्वा राजकुले दृष्टो **नमि**र्नमितमस्तकः । दत्त्वासनमुपासीनः शाधि [२]मामिति तां जगौ ॥३७९॥
वात्सल्यकुल्यातुल्याभिर्देशनाभिरुवाच सा । महाराज ! शृणु श्रेयो वचनं हितमात्मनः ॥३८०॥
अनादाविह संसारे समिलायुगयोगवत् । मानुषं भवमासाद्य प्रमाद्यसि मुधेति किम् ॥३८१॥

---

१. निकातरः D, K नकारितः - L निकारयत् - A, B निकारवत् - P । २. मीमाति - D नामिति - A, मिमाति - K र्मामिति B ।

टि. 1. इन्द्रस्य गजः, तस्योपमाऽस्य, ऐरावणसदृशः । 2. मदस्यन् - मदमिच्छन् [अस् च लौल्ये] हेम० ४।३।११५ सूत्रेण अस् प्रत्ययः । 3. आशुगः आशु गच्छति । 4. आशुगः वायुः । 5. वाजिनः वेगवान् । 6. वाजिनः - अश्वः । 7. हस्तिनम् । 8. तिरस्कारतः ।

भूत्या विपुलया राजन्नविपर्यस्तवृत्तय: । अविलुप्तकुलाचारा भवन्ति हि भवादृशा: ॥३८२॥
धिक् तस्य निरपेक्षस्य विभूतिं रौद्रकर्मण: । दीप्तादिव चितावह्नेर्यस्मादुद्विजते जन: ॥३८३॥
स्पृहणीया जगत्यस्मिन् तस्यैव प्रभविष्णुता । निर्भयं सर्वभूतानि यं समाश्रित्य शेरते ॥३८४॥
कामान् पूरयसेऽन्येषामयं दूरेऽस्तु ते विधि: । अपि सौम्य ! स्वपूज्यानामाशाभङ्गं करोषि किम् ॥३८५॥
स्वयमभ्यागतोऽग्राहि बन्धुना यदि सिन्धुर: । सोदरे ज्यायसि क्रोधं तत् कुत: [१]कुरुषेऽधुना ॥३८६॥
**पश्यति द्रविणं लुब्ध: कामी पश्यति कामिनीम् । पश्यति भ्रममुन्मत्त: क्रुद्ध: किञ्चिन्न पश्यति** ॥३८७॥
क्रोधे सन्निहितो वह्नि: क्रोधे सन्निहितं विषम् । क्रोधे सन्निहितो मृत्यु: क्रोधो नरकदेशक: ॥३८८॥
अन्यत्रापि कृत: क्रोधो नरकाय शरीरिणाम् । अमुं तु भवत: क्रोधं किं ब्रूमो यो गुरून् प्रति ॥३८९॥
**नमि**स्तदेतदाकर्ण्य चिन्तयामास चेतसा । पुत्र: **पद्मरथ**स्याऽहं **चन्द्र**स्तु **युगबाहु**ज: ॥३९०॥
मुनिर्दैवतवत्पूज्या पुनर्वक्तीदृशं भृशम् । नाऽपूर्वमपि मिथ्येदमिति वक्तुं च शक्यते ॥३९१॥
एनामेवाऽथ पृच्छामि परमार्थदृशं पुर: । वीतरागमुनीनां हि विपर्येति कुतो वच: ॥३९२॥
जगादाथ क्व स क्वाहं पृथग्देशकुलोद्भवौ । आवां ज्याय:कनीयांसाविति सङ्घटते कथम् ॥३९३॥
तपोधनाऽऽह चेन्मुक्त्वा मदं विभवभूतजम् । शृणोषि वत्स ! तत्सर्वं यथावत्तव कथ्यते ॥३९४॥
**दर्शने नेत्ररोगार्त्ता: श्रवणे कर्णशूलिन: । मूका विनयवाक्येषु भवन्ति विभवोन्मदा:** ॥३९५॥
साऽथ शुश्रूषमाणाय हितार्थविहितात्मने । पूर्वमुर्वीभुजे तस्मै जन्मवृत्तमवर्णयत् ॥३९६॥
परमार्थपिता तत्ते स **सुदर्शनपू**र्नृप: । माता **मदनरेखा**ख्या सैवाऽहं **सुव्रता**भिधा ॥३९७॥
राजा **पद्मरथ: पुष्पमाला**ऽस्य महिषी च सा । बालधारश्च धात्री च तवैता[२]वजरामर ! ॥३९८॥
तदेतच्च परिज्ञाय स्वात्मनो हितमातनु । मैवं प्रहर मोहान्ध: सोदरे [1]स्वपितृव्यवत् ॥३९९॥
अपर्याप्तसमस्तेच्छास्त्यक्त्वा दारान् धनं सुतान् । कालव्यालसमाकृष्टा हन्त गच्छन्ति जन्तव: ॥४००॥
असिपत्रवनं घोरं तप्ता वैतरणी नदी । परत्रोष्णकटाहाश्च क्व राज्यं क्व च बान्धवा: ॥४०१॥
लोकोऽयमेव भूपानां पर एव तपस्विनाम् । असतां न परो नाऽयं परश्चाऽयं च दानिनाम् ॥४०२॥
अबाध्यमविसंवादि संवादिकरमुद्रया । असन्दिग्धं **नमि**र्मेने सिद्धान्तमिव तद्वच: ॥४०३॥
स्वात्मसंविदितप्रीतिसूचितां **सुव्रतां** च ताम् । नमि: परमया भक्त्या प्रणनाम स्वमातरम् ॥४०४॥
अदूरस्थं महातीर्थमसन्तापकरं तप: । [2]अजडं चात्मन: स्नानं मातुर्मेने स दर्शनम् ॥४०५॥
पारलौकिकमेवैकं तत्तीर्थतपसो: फलम् । ददात्येकैव माता तु लोकद्वयमहो नृणाम् ॥४०६॥
प्राञ्जलिर्**नमि**राजेन्दुरानन्दाश्रुप्लुताननः । माहात्म्य[३]महितामूचे [४]मातरं चतुरोऽथ स: ॥४०७॥

---

१. पुरुषे - B, A, D, K । २. वजरामरा - K, KH, L, A, D वजगामसा - H । ३. महतामूचे - A महिमामूचे - D । ४. सानन्दं - KH ।

टि. 1. मणिरथवत् इत्यर्थ: । 2. जलरहितं आत्मन: स्नानम् ।

यदादिशत तत्तथ्यं नाऽत्र मे हृदि संशयः । उन्मुद्रयति मुद्रापि **युगबाहु**जतां च मे ॥४०८॥
माननीयश्च मे ज्यायान्निर्विकल्पं पितुः समः । अबद्धवदनस्त्वेष कथं प्रत्याय्यते जनः ॥४०९॥
**सर्वथा रञ्जनीयोऽयं जनो निर्दोषदोषकृत् । लोकप्रत्ययसारो हि सदाचारपरिग्रहः** ॥४१०॥
ज्यायान् कनिष्ठवात्सल्यात् **चन्द्र**स्त्वायाति चेत्पुरः । तदोचितमिदं भाति मातर्मे मानरक्षणात् ॥४११॥
लोभोऽभिमाने न धने तृष्णा यशसि नाऽऽयुषि । एतावदेव महतां वीरव्रतमखण्डितम् ॥४१२॥
मानमूलस्य यशसः परिरक्षैव जीवितम् । कृतान्तस्य कृता केन मुहूर्त्तं हस्तधारणा ॥४१३॥
अथार्याया निदेशेन बलानां स्वैर्नैर्नमिः । दुर्गरोधाऽभियुक्तानामवहारमकारयत् ॥४१४॥
आर्या नमिं तमापृच्छ्य दुर्गान्तर्द्वारिकाऽध्वना । प्रविश्य राजसौधेऽथ प्राप**च्चन्द्रयशो**ऽन्तिकम् ॥४१५॥
सोऽप्यकस्मादथ प्राप्तामभ्युत्थाय ससम्भ्रमम् । इलातलमिलन्मौलिर्नमति-स्म स्वमातरम् ॥४१६॥
अभिनन्द्य तमाशीभिः स्वयं तेनैव ढौकिते । निषसादाऽऽसने लोकैः सप्रणामं निषेविता ॥४१७॥
अनुयुक्ताऽथ वृत्तान्तं सुतायाऽऽख्याय सा निजम् । अनुजं सोदरं तस्मै ज्ञापयामास तं **नमिम्** ॥४१८॥
श्रुत्वा **चन्द्रयशो**राजस्तं तदानुजमागतम् । हर्षौत्सुक्यत्रपाप्रीति-प्रबोधै रुरुधेऽधिकम् ॥४१९॥
दाराः सम्पत्तयः पुत्राः पत्तयः सुलभाः सताम् । लोकेऽस्मिन् सोदरो बन्धुः सुकृतैर्यदि लभ्यते ॥४२०॥
बहिः पुरान्निरीयाऽथ **चन्द्रः** सानुचरः स्वयम् । आगच्छन्नमिनाऽभ्येत्य भूपीठे लुठताऽऽनतः ॥४२१॥
एकीकुर्वन्मनो गर्भं नयन्निव तमात्मना । **चन्द्रो नमिं** समुद्धृत्याऽश्लिष्यत्प्रणयपूरितः ॥४२२॥
अदर्प्पणस्थौ स्वावेव प्रतिदेहौ महीपती । मिथो विलोकयन्तौ तौ न तृप्तिं जातु जग्मतुः ॥४२३॥
तत्रानन्दक्षणे तस्मिन् महोत्सवपुरस्सरम् । **सुदर्शनपु**रैश्वर्यं[1] **चन्द्रः श्रीनमये** ददौ ॥४२४॥
अथाग्रहात्तमापृच्छ्य स्वयं सङ्गबहिर्मुखः । अन्तर्मुखमतिर्मुक्त्यै **चन्द्रः** संयममग्रहीत् ॥४२५॥
श्रीमा**न्नमिरवन्ती**नां **मिथिला**याश्च भूपतिः । प्रचण्डशासनो जज्ञे विक्रमेण क्रमेण सः ॥४२६॥
अन्यदा च **नमे**र्देहे महान् दाहज्वरोऽजनि । षाण्मासिको विधिवशादवश्यो भिषजामपि ॥४२७॥
निवृत्त्यै सततं तस्य स्वयमन्तः पुरीजनः । आलेपनाय श्रीखण्डं सङ्घर्षात्तत्र घर्षति ॥४२८॥
तासां तदाऽतिभूयस्त्वान्मूर्च्छितोऽभून्मुहुर्मुहुः । वलयावलिभूर्घोषो निःस्वानेभ्योऽपि दुःश्रवः ॥४२९॥
तेनाऽऽर्त्ते चाऽरतिं राज्ञि भेजानेऽन्तःपुरस्त्रियः । पाणौ पर्यधुरेकैकमेव मङ्गलकङ्कणम् ॥४३०॥
स कङ्कणक्वणः क्वेति पृच्छति क्षितिवल्लभे । इत्थं व्यजिज्ञपंस्तथ्यमासन्नपरिचारकाः ॥४३१॥
एकैकत्वेन कैवल्यभाजिनां भूयसामपि । शब्दः संयोगजो ह्येष कङ्कणानां कुतो भवेत् ॥४३२॥
वचस्तदेतदापीय पीयूषमिव भू-विभुः । व्यचिन्तयदयं बोधान्निर्वृतेनान्तरात्मना ॥४३३॥
विचार्यमाणाः शब्दाश्च रागाद्याश्च द्वयेऽप्यमी । संयोगाच्च वियोगाच्च जायन्ते नान्यतः क्वचित् ॥४३४॥

---

टि. 1. ईश्वरस्य भावः ऐश्वर्यम्, स्वामित्वं इत्यर्थः ।

यावद्भिर्युज्यते ह्यात्मा सुखाप्तिमृगतृष्णया । तावन्तो बीजतां यान्ति दुःखाख्यविषभूरुहाम् ॥४३५॥
सम्बन्धो योज्यते मोहाद् येन येन हि जन्तुभिः । तेषां तेषां परिणामः शल्यतुल्योऽनुभूयते ॥४३६॥
रोगातङ्कादितो मुक्तः परित्यज्याऽखिलं [१]ततः । दीक्षयाऽऽसाद्य कैवल्यं यतिष्ये दुःखमुक्तये ॥४३७॥
इति चिन्तयतस्तस्य निद्रया मुद्रिते दृशौ । षण्मासान्तरपूर्वा च तदैवासीत्सुखासिका ॥४३८॥
तदा कार्त्तिकराकायां निद्रामुद्रितलोचनः । रात्रौ विभातभूयस्यां स्वप्नमेवं ददर्श सः ॥४३९॥
कुञ्जरेन्द्रं किलारुह्य सुधाकरसहोदरम् । मूर्द्धानमधिरूढोऽस्मि मन्दरस्य महेन्द्रवत् ॥४४०॥
प्रभातनान्दीतूर्याणां निर्घोषेणाऽथ बोधितः । पीतामृत इव प्रीत्या विममर्श निरामयः ॥४४१॥
अमुमेवंगुणं क्वापि दृष्टपूर्वी महीधरम् । **नमि**स्तद्विमृशन् भेजे जातिस्मरणसंविदम् ॥४४२॥
**शुक्रे** कल्पे यदाऽभूवं **पुष्पोत्तर**विमानगः । देवः पुरा तदा **मेरु**मपश्यं जिनजन्मसु ॥४४३॥
निराबाधत्वमेकत्वं कङ्कणानां विभाव्य तत् । **नमिः** प्रत्येकबुद्धोऽयं निष्क्रान्तो **मिथिला**धिपः ॥४४४॥
पुरमन्तःपुरं राज्यं सर्वमेकपदे तदा । त्यजन्तं **नमि**मालोक्य चमच्चक्रे सुरेश्वरः ॥४४५॥
निरीहो निरहङ्कारो निर्ममो निर्मलाशयः । स्वमहिम्ना महेन्द्रेण महर्षिर्महितो **नमिः** ॥४४६॥

अथ **नगातिचरितम्**—

अस्तीह **भारते** वर्षे स्वर्गा[1]दधिकचारुते । **गन्धार**[2]नीवृतः पुण्ड्रं पत्तनं **पुण्ड्रवर्द्धनम्** ॥४४७॥
तत्र **सिंहरथो** नाम धाम्नां धाम नृपोऽजनि । नीत्या यद्विक्रमो रेजे [3]वैजयन्त्येव [4]मस्करः ॥४४८॥
तस्यान्यदावनीभर्तु[5]रौत्तराहौ तुरङ्गमौ । उपायनाय सम्प्राप्तौ द्रष्टुमासीत् कुतूहलम् ॥४९९॥
तत्रैकत्रात्मनारूढो राजपुत्रोऽपरे हरौ । ययौ राजाऽथ वाह्याल्यां सहान्यैः सादिनां शतैः ॥४५०॥
गतिभेदैः परैः राज्ञा सर्वैः सो[6]ऽर्वा परीक्षितः । मुक्तो गत्याऽथ सोऽन्वेष्टुं पञ्चम्या प्लुतनामया ॥४५१॥
वल्गां यथा यथाऽकर्षत्तदोत्कर्षान्नरेश्वरः । हरीश्वरोऽपि संहर्षादधावत तथा तथा ॥४५२॥
अतिक्रम्येतराश्वीनमध्वानं स मुहूर्त्ततः । [7]व्यस्ताऽभ्यस्तोऽटवीं भेजे समं राज्ञा तुरङ्गमः ॥४५३॥
श्रान्तेन पृथ्वीकान्तेन ततो वल्गा व्यमुच्यत । स्थितो विलोममभ्यस्तो हरिश्च निरचीयत ॥४५४॥
उत्तीर्य वेल्लयित्वा तं पाययित्वाऽम्बु नैर्झरम् । तरावबध्नादर्वन्तं कुर्वन्तं स तृणादनम् ॥४५५॥
प्राणवृत्तिं फलैः कृत्वा नगमारुह्य कञ्चन । सायं प्रासादमद्राक्षीद्विजने स जनेश्वरः ॥४५६॥
तमारोहदथाऽऽश्चर्यात् प्रासादं सप्तभूमिकम् । कनीमेकाकिनीमेकामत्रैक्षत च भूपतिः ॥४५७॥
पाद्यं राज्ञोऽथ हर्षाश्रैः सार्धं प्रीतिस्मितांशुभिः । स्वं चान्तःकरणं पूर्वं ददेऽनु परमासनम् ॥४५८॥
विकिरन् मौक्तिकानीवाऽवनीविभुरथाऽवदत् । का त्वं नगेऽत्र वासः किं किं सौधं कोऽत्र रक्षिता ॥४५९॥

---

१. तपः B, D, KH, K ।

टि. 1. अधिका चारुता यस्य, तस्मिन् । 2. नीवृत् - देशः तस्य । 3. वैजयन्ती - पताका तया । 4. मस्करः - वंशः, कीचकः इति यावत् । 5. औत्तराहः - उत्तरस्मिन् कालादौ भवः । 6. अर्वन् - अश्वः । 7. व्यस्ताऽभ्यस्तः - विपरीतशिक्षः ।

कन्याह दृश्यतां देव ! वेदी नेदीयसी पुरः । बिम्बं चुम्बति चण्डांशोरितश्चास्ताद्रिमस्तकम् ॥४६०॥
गान्धर्वेण विवाहेन पूर्वं मामुद्वहाऽधुना । ततोऽहं निर्वृता सर्वमाख्यास्येऽत्येति यत्क्षणः ॥४६१॥
राजाऽप्यथ तया साकं नमस्कृत्यार्चितं जिनम् । वेदिकायां परीयाऽग्निं चकारोद्वहमङ्गलम् ॥४६२॥
अनन्यतुल्यपल्यङ्के वासाऽऽवासान्तराऽथ सा । रतिः स्मरमिवानैषीद्विश्रामायाऽवनीधवम् ॥४६३॥
तयाऽन्तश्चैक्यमापन्नः स्वदेहावयवानपि । बहिरङ्गान् स मन्वानश्चिन्तयामासिवान् प्रगे ॥४६४॥
सदाग्रेऽपि ममैवेयमिमं मे मतिनिश्चयम् । मनो न मनुते सम्यग् विपर्येत्यत्र दृक् कुतः ॥४६५॥
अस्याः प्रीतिर्मतिर्लक्ष्मीर्भारती सुषमाकृतिः । ब्रूतेऽनुभूतमेवैतदन्तरात्मा न तन्मृषा ॥४६६॥
अटव्यां च नगे सौधमपूर्वमिदमग्रतः । तत्रस्थायां च बालायां प्रत्यभिज्ञात्मनोऽत्र का ॥४६७॥
क्रमात् ज्ञातव्यमेतन्मेऽधुनाऽत्येति प्रगे क्षणः । नित्यकृत्यं करोमि प्राक् प्रियां प्रक्ष्याम्यथो कथाम् ॥४६८॥
राजाऽथ त्यक्तपल्यङ्कोऽधीतपञ्चनमस्कृतिः । ध्याताऽऽवश्यककर्मा च कृत्वा निःशल्यतां तनोः ॥४६९॥
मन्त्रैर्नीरैश्च निर्निक्तोऽञ्जलिध्यातार्कशीतगुः । स्नात्वाऽऽ[1]त्तोद्गमनीयोऽर्घपात्रं सामान्यमुद्वहन् ॥४७०॥
उच्चैरस्त्रोक्षितद्वारोर्च्चित्वा यक्षं श्रियं त्वधः । कालगङ्गे महाकालयमुने शाखयोः पुनः ॥४७१॥
पुष्पं पूजागृहे क्षिप्त्वा ज्वलन्नाराचमुद्रया । पार्ष्णितालाङ्गुलीभिर्घ्नन् विघ्नान् भूम्यभ्रदेवजान् ॥४७२॥
सौम्यशाखाश्रितो सव्येनांह्रिणान्तः प्रविश्य च । पुष्पमस्त्रेण देहल्यां न्यस्य विघ्नौघघातकम् ॥४७३॥
वास्तोष्पतिं च ब्रह्माणं ब्रह्मस्थानेऽभिपूज्य च । प्रणवेनार्च्चितं पीठमध्यासीत्पूर्वदिग्मुखः ॥४७४॥ षड्भिः० ॥
सोऽस्त्रप्राकारवर्माऽवगुण्ठनाभ्यां च धाम तत् । संरक्ष्य चक्रे संशोध्याऽमृतीकृत्य करौ शुची ॥४७५॥
पञ्चतत्त्वोद्भवं ज्योतिर्विन्यस्य करयोर्द्वयोः । स्वं संरक्ष्याऽस्त्रवर्मभ्यां सोऽबध्नात् करकच्छपीम् ॥४७६॥
कृष्णं विरेच्य शुक्लेनाऽऽपूर्य [१]सङ्कुच्य चाऽनिलम् । पुनर्विरेच्य प्राणेन साधयामास धारणाः ॥४७७॥
भौमाप्ये पूरकार्द्धाभ्यामाग्नेयीं कुम्भकेन सः । परे च रेचकार्द्धाभ्यां वायुव्योम्नोश्चकार ताः ॥४७८॥
सकलीकर्मपूर्वं च षोढाङ्गन्यास[२]संस्कृतः । भूमिशुद्धिं विधायाऽन्तः प्रणिधाय जगद्गुरुम् ॥४७९॥
पूजया हृदि होमेन नाभौ ध्यानेन च भ्रुवि । [३]इष्ट्वान्तर्यागमित्येवं सोऽर्घपात्रमथाऽग्रहीत् ॥४८०॥ युग्मम् ॥
प्रक्षाल्याऽस्त्रेण तद्भृत्वा बिन्दुध्यानामृतीकृतैः । पुष्पदूर्वाक्षताम्भोभिर्धन्वारोध्यान्ववर्मयत् ॥४८१॥
मौलौ स्वमभिषिच्यातः प्रोक्ष्याऽखिलमुपस्करम् । अस्त्रवर्मोक्षितैः स्वस्य चन्दनैस्तिलकं व्यधात् ॥४८२॥
मूर्ध्नि पुष्पमथ न्यस्य मूलमन्त्रेण [४]तत्त्ववित् । [५]प्लुतां तानुच्चरन् मौनी मन्त्रवर्णानशोधयत् ॥४८३॥
अस्त्रेणोत्सार्य निर्माल्यं प्रक्षिप्यैशानदिश्यनु । देवाधिदेवमस्त्रेण प्रक्षाल्याऽथ व्यशोधयत् ॥४८४॥
इत्थमात्माश्रयद्रव्यमन्त्रदेवाङ्गपञ्चकम् । विशुद्धीकृत्य कृत्यज्ञः प्रारेभेऽथ जिनार्च्चनम् ॥४८५॥
नमःपूर्वं गुरोः [६]शास्तुः परस्य परमेष्ठिनः । अर्घं गन्धं सुमं धूपं दीपं दत्त्वार्चयत् क्रमौ ॥४८६॥

---

१. संकुंच्य – P, A । २. संहृतः – A । ३. दृष्ट्वां – P । ४. मंत्रवित् – P । ५. लुप्तां – K । ६. शास्त्र – D शास्तु – P, A, B, H, L ।

टि. 1. आत्तोद्गमनीयः – गृहीते द्वे धौतवस्त्रे येन सः ।

मध्येऽम्बुजमथो दिव्यं भद्रपीठं चतुर्मुखम् । अभ्यर्च्याऽस्थापयच्चार्हन्मूर्त्तिं सिद्धादिमूर्त्तिभिः ॥४८७॥
पूर्णाञ्जलिश्चतुर्वक्त्रं प्रातिहार्यसभावृतम् । ज्ञानशक्त्येद्ध[1]मासीनं विद्यादेहमतिष्ठिपत् ॥४८८॥
ध्यात्वा पूर्णाञ्जलिर्मन्त्राद्बिन्दुस्थानेऽद्भुतं महः । तदा[2]ऽऽवाहनयाऽऽहूय [१]स्थापन्यास्थापयत् प्रभौ ॥४८९॥
सन्निधान्या सन्निधाप्य निरोध्यादर्श्य निष्ठुराम् । मुद्रादर्शं पुरो भर्तुरर्घपाद्ये [२]हृदा ददौ ॥४९०॥
स्वागतं न्युञ्छनाभ्यङ्गोद्वर्त्तनस्नानकृत्ततः । प्रोक्ष्यास्त्रेण हृदाऽऽपूर्य सार्घैस्तीर्थोदकैः कुटान् ॥४९१॥
सर्प्पिर्दुग्धदधीक्षूत्थाद्यौषधीभिः सुगन्धिभिः । प्रभुमन्तर्महत्पाथःपुष्पधूपैरसिस्नपत् ॥४९२॥ युग्मम् ॥
मृष्ट्वा सद्वाससा पाद्यमर्घपूर्वं शिरस्यदात् । गन्धैः स्वर्णैः सुमैर्वस्त्रैः प्रभुं चानर्च पीठतः ॥४९३॥
कृत्वा प्राग् मङ्गलं गात्रे हृदयं मस्तकं शिखाम् । वर्मास्त्रं च जगन्नेत्रमूर्त्तेरार्चयदीशितुः ॥४९४॥
हृदाग्नेये [३]शिरश्चैशे शिखां कोणे च नैर्ऋते । मारुते वर्म दिक्ष्वस्त्रं चानर्च सह मुद्रया ॥४९५॥
प्राक्पश्चाद्-याम्य-सौम्यासु सिद्धादींश्चतुरो महत् । ज्ञानादीन् शुचिविद्यान्तानैश्यादौ परितो जिनम् ॥४९६॥
सव्ये सरस्वती-शक्रौ शान्तीशानौ च वामतः । केसरान्तर्मातृगणं कोशाद् बहिरपूजयत् ॥४९७॥
जयाजम्भाचतुष्के द्वे प्राच्याग्नेय्यादिदिग्दलात् । पाशाङ्कुशध्वजवरैर्मुद्राभिः सममार्च्चयत् ॥४९८॥
विद्याः षोडशमुद्राभिः परिवेषे द्वितीयके । तृतीये त्वष्टपत्राङ्केऽष्ट द्वौ चाभ्यर्च्य दिक्पतीन् ॥४९९॥
शक्रवायु-यम-श्रीदेशाग्निपाशाङ्करक्षसाम् । दिक्षु तत्रैव चार्कादीन् ग्रहानानर्च स क्रमात् ॥५००॥ युग्मम् ॥
सव्ये वामे बहिश्चेष्ट्वा क्षेत्रप-क्षेत्रदेवते । त्रैलोक्येन त्रिरावेष्ट्य मण्डलं शृणिना[3]ऽरुणत् ॥५०१॥
[४]ऐन्द्राऽऽप्यवायवीयाख्यं दत्त्वाथो मण्डलत्रयम् । गन्धैरपूजयत्पुष्पैरक्षतैश्च समाहितः ॥५०२॥
दत्त्वाऽथ रोचनापुण्ड्रं धूपपात्रीं सघण्टिकाम् । प्रोक्ष्य संवर्म्य चाभ्यर्च्य प्रबोध्याऽमृतमुद्रया ॥५०३॥
होमान्तेन हृदा धूप-ताम्बूल-बलि-दीपकान् । दत्त्वा दूर्वाऽक्षतश्वेतसर्षपान् मूर्ध्न्यारोपयत् ॥५०४॥ युग्मम् ॥
प्रसूनाद्यञ्जलीर्दत्त्वोत्तार्यारात्रिकमङ्गलौ । जपित्वोपांशु[५]जापार्च्चा स्वान्यावेद्यान्ववन्दत ॥५०५॥
हृत्पद्मकोशेऽथ ज्योतिः शान्तं ज्ञानाख्यशक्तिमत् । विचिन्त्य चित्तं वायुं च विभागेन व्यचिन्तयत् ॥५०६॥
ज्ञानशक्त्याऽथ हृत्कण्ठतालुब्रह्माणि शोधयन् । ज्योतिरुद्द्योतिकोदण्डचक्रान्तरनयच्च तत् ॥५०७॥
तस्मिंश्चतुर्मुखं प्रातिहार्यावार्यं त्रिवर्गदम् । अष्टधैश्वर्यधातारं जन्मादिक्लेशनाशकम् ॥५०८॥
दध्यौ निरामयं देवमर्हद्भट्टारकं क्रमात् । सूक्ष्मात्सूक्ष्ममणुप्रायं लीनमैक्यात्तदात्मनि ॥५०९॥
किञ्चिद्विवृतवक्त्रस्तु नासाग्रन्यस्तलोचनः । अप्रकम्पशिरास्तस्थौ पूर्णकुम्भ इव क्षणम् ॥५१०॥
क्ष्माजलाग्निमरुद्व्योमात्मार्क[4]पीयूषरोचिषाम् । अष्टपुष्पीं ददौ भक्त्याऽष्टसु विश्वेशमूर्त्तिषु ॥५११॥
कृत्वा स्वे तिलकं भाले पुष्पं चारोप्य मूर्द्धनि । [६]अर्घित्वा पूरकाद्देवं न्यस्य स्थाने व्यसर्जयत् ॥५१२॥

---

१. स्थापत्या - A, B । २. तदा - K । ३. शिरस्यैशे - K, A, B, H, L । ४. ऐन्द्राख्य - L । ५. शुनापात्री - A । ६. अर्च्चित्वा - KH ।

टि. 1. इद्धं - दीप्तं, तेजस्विनम् इति यावत् । 2. आवाहना-देवानां निमन्त्रणम्, तया । 3. शृणिः - अङ्कुशः । 4. चन्द्रः, तेषाम् ।

गन्धधूपसुमान् दत्त्वा रेचकेन परान् सुरान् । विसृज्य पत्रिकां वैश्यां धौते पट्टे सुमं न्यधात् ॥५१३॥
उत्थाय तेन धाम्नोऽन्तर्वृत्तं न्यस्याऽथ मण्डलम् । तत्र वास्तोष्पतिर्ब्रह्मा गन्धधूपसुमाक्षतैः ॥५१४॥
स्कन्दश्च मध्यस्तम्भाधः कामः पल्यङ्कमूर्द्धनि । पट्टे भवनदेवी च यक्षेशो द्वारि चार्च्यत ॥५१५॥ युग्मम् ॥
धौते पोते परावृत्य परिधायाऽन्यवाससी । नृपः सिंहासने पत्न्या निषसाद तया सह ॥५१६॥
कान्तां वाचमथोवाच कान्तां स्वैर्दशनांशुभिः । आमुक्तमुक्तापङ्क्तीनां पौनरुक्त्यं भृशं दिशन् ॥५१७॥
अनद्यश्चीन एवायं सम्बन्धस्तावदावयोः । मनो मे लज्जते तेन प्रष्टुं का त्वमिति स्फुटम् ॥५१८॥
तथापि श्रोतुमुत्कण्ठा त्वद्गिरं मे सुधाकिरम् । तदादिशैष देशोस्तु हंसकूजितपूजितः ॥५१९॥
अथाधरद्युतिश्लिष्टोच्छलद्दन्तच्छविच्छलात् । आह सा प्रेयसे साक्षादनुरक्तां सरस्वतीम् ॥५२०॥
भोगवत्यां यथा शेषो लेखोत्तंसो[1] यथा दिवि । पुरे **क्षितिप्रतिष्ठे**ऽभूज्जितशत्रुस्तथा नृपः ॥५२१॥
स चारलोचनो दूतवक्त्रः कीर्त्तिप्रियो गुणी । अभून्मानधनो बाहुसाधनो रिपुराजघः[2] ॥५२२॥
सम्पदाऽनन्यसामान्यः परेषां सैष भूभुजाम् । अर्थमुत्कृष्टमुत्कृष्टं दृष्ट्वाऽऽसीत् तत्र कौतुकी ॥५२३॥
कदाचन चरानेष पप्रच्छ प्रियकौतुकः । परेषामस्ति मे नास्ति किञ्चित्तद् ब्रूत नूतनम् ॥५२४॥
व्यजिज्ञपन्नृपायैते सर्वमस्त्येव देव ! ते । सभायां चित्रमेवैकं न्यूनमन्यूनसम्पदः ॥५२५॥
सर्वानाकार्य नाकार्य[3]चित्रश्रीश्चित्रकानथ । समांशेन सभाभित्तीस्तेभ्यश्चित्राय साऽऽर्प्यत्[4] ॥५२६॥
एकश्चित्रकलोत्कर्षी वर्षीयांस्तत्र[5] चित्रकः । नाम्ना **चित्राङ्गद**श्चित्रं स्वस्यां भित्तौ स चक्रिवान् ॥५२७॥
सहायान्तरशून्यस्य काले तस्याऽन्वहं गृहात् । भक्तमानयते भक्ता सुता **कनकमञ्जरी** ॥५२८॥
वहन्ती शैशवादूर्ध्वं वैदग्ध्यमधुरं वयः[१] । गृहाद् गृहीत्वा पित्रेऽन्नं सैकदा यावदावति ॥५२९॥
यान्तं जनाकुले राजमार्गे राजश्रियोज्ज्वलम् । सादिनं तावदद्राक्षीन्मुखमुक्तेन[२] वाजिना ॥५३०॥ युग्मम् ॥
इतस्ततस्ततस्त्रेसुस्ते जनास्तत्र वर्त्मनि । पलाय्य क्वाऽपि साऽप्यस्थात् क्षणं चित्राङ्गदात्मजा ॥५३१॥
तत्र सादिन्यतिक्रान्ते प्रशस्तेनाऽध्वनाऽथ सा । उपचित्राङ्गदं प्राप राज्ञश्चित्रसभागृहे ॥५३२॥
तां भक्तपाणिमालोक्य प्राप्तां चित्राङ्गदोऽपि सः । ययौ शरीरचिन्तार्थी ततश्चित्रगृहाद्बहिः ॥५३३॥
वस्त्रान्तश्छादितं तत्रैकत्र मुक्त्वान्नभाजनम् । आदात् तौलिकक[6]स्यास्य वर्णकांस्तूलिकाश्च सा ॥५३४॥
तैर्यथावदथावर्त्त्य कौतुकात्कुट्टिमोपरि । साक्षादक्षेपतः सैकं पिच्छं मायूरमालिखत् ॥५३५॥
अत्रान्तरे नरेन्द्रोऽपि **जितशत्रुः** कुतूहलात् । चित्रमीक्षितुमेकाकी वीर्थी तामेव सोऽभ्यगात् ॥५३६॥
चित्राण्यालोकमानोऽत्र सञ्चरंश्चतुरोऽपि सः । बर्हे तत्र च्युतभ्रान्त्या राजा करमवाहयत् ॥५३७॥
तत्राग्रनखभङ्गेन विलक्षो दिक्षु दत्तदृक् । तया **कनकमञ्जर्या** सहासमिदमौच्यत ॥५३८॥
पादो नासीन्ममाऽऽसन्द्याः सन्त्यग्रे यत्त्रयोंह्रयः । लब्धो मयाऽद्य तुर्योऽपि त्वमेवमविमृष्टकृत् ॥५३९॥

१. वचः - K, D । २. त्सुखमुक्तेन - B, C ।

टि. 1. लेखः देवः तेषां उत्तंसः इव इन्द्रः । 2. ५।१।८८ [राजघः] इति सूत्रेण निपातः । 3. नाकः स्वर्गः, तस्य अर्यः स्वामी इन्द्रः नाकार्यः, तस्य चित्रश्रीरिव चित्रश्रीः यस्य सः । 4. स आर्पयत् [तदः सेः...] १।३।४५ इति सूत्रेण सन्धिः । 5. वर्षीयान् - वृद्ध + ईयस्, अतिवृद्धः, ७।४।३८ हेम० शब्दा० सूत्रेण वर्ष इति आदेशः । 6. तौलिकः-चित्रकारः ।

नृपोऽप्याह त्रयः के ते येषां तुर्यः कृतोऽस्म्यहम् । साऽप्युवाच वचः सौम्य ! श्रूयतां यदि कौतुकम् ॥५४०॥
मया दृष्टोऽद्य साद्येको बालस्त्रीवृद्धसङ्कुले । निर्घृणो वाहयन् वाहं विपणेरेव वर्त्मनि ॥५४१॥
द्वितीयश्च नृपोऽत्रत्योऽन्येषामिव कुटुम्बिनाम् । निःस्वस्यैकस्य वृद्धस्य मत्पितुः समभागदः ॥५४२॥
तृतीयो व्ययिताशेषोपार्ज्जनश्चैष मे पिता । भक्ते नित्यमिह प्राप्ते याति यः सरलो बहिः ॥५४३॥
चतुर्थो रोचसे त्वं मे त्रिषु तेषु विशेषवान् । योऽप्रेक्षापूर्वकृच्चित्रबर्हे करमवाहयः ॥५४४॥
चञ्चद्वचनवैचित्र्यचातुरीभिश्चमत्कृतः । अन्तरात्मा नरेन्द्रस्याऽहारि हारिदृशा तया ॥५४५॥
प्रतीपमपि कस्याऽपि [१]वचनं चारु रोचते । कृष्णागरुत्थो धूमोऽपि न स्यात् कस्य मनोहरः ॥५४६॥
रक्तस्तस्यां ततो राजा परतोऽगच्छदात्मना । यामिकीकृत्य तत्रैवाऽमुञ्चत् तां परितो मनः ॥५४७॥
मन्त्रिणोऽथ **सुगुप्तस्य** मुखेन जगतीपतिः । तत**श्चित्राङ्गदात्** कन्यामयाचत महादरात् ॥५४८॥
तद्वेश्माऽऽपूर्य वित्तौघैः प्रशस्तेऽथ दिनक्षणे । उपयेमे महाभूत्या भूपश्चित्राङ्गदाङ्गजाम् ॥५४९॥
प्रासादं च प्रसादं च भूपादासेदुषी परम् । सा महाराजवंश्यानां सपत्नीनामुपर्यभूत् ॥५५०॥
तयाऽऽदितोऽन्यदाऽऽदिष्टा दासी **मदनिका**भिधा । रतिश्रान्ते च भूकान्ते मत्तः पृच्छेः कथामिति ॥५५१॥
अन्यदा रात्रिकेऽतीतेऽमात्यलोके गते गृहान् । नृपो धनुर्धराधीनरक्षोऽभ्यागात्तदालयम् ॥५५२॥
कान्ततः कामसूत्रार्थमशेषमनुभूय सा । तमेवामंस्त शास्तारमपि तत्तत्त्वदर्शनम् ॥५५३॥
सुषुप्सति रतिश्रान्ते क्ष्माकान्ते तत्र भोगिनीम् । ऊचे मदनिका काञ्चित् कथां कथय देवि ! मे ॥५५४॥
राज्ञी **मदनिका**मूचे प्रतीक्षस्व क्षणं सखि । नरेन्द्रो निद्रया शेतामाख्यास्येऽहं ततः कथाम् ॥५५५॥
तत्कथाकाम्यति क्ष्मापे सापेक्षं शयिते [1]मृषा । भोगिन्याऽऽख्यायिकां ख्यातुमथाऽऽरेभे कुतूहलात् ॥५५६॥
पुरे **मधुपुरे** श्रेष्ठी **वरुणा**ऽऽख्यो व्यधापयत् । ग्राव्णैकेनैव हस्तैकमितं देवकुलं कृती ॥५५७॥
[२]चतुष्करः प्रमाणेन घटितोऽतिमनोहरः । तत्र देवः प्रतिष्ठाप्याऽर्च्चितोऽस्मै वरदोऽजनि ॥५५८॥
कथमेककरे देवकुले देवश्चतुष्करः । दास्या पृष्टाऽऽह राज्ञी श्वः प्रच्छेः स्वप्स्यामि साम्प्रतम् ॥५५९॥
राज्ञीमापृच्छ्य धाम स्वमथो **मदनिका**ऽगमत् । जज्ञे **कनकमञ्जर्या** निद्रा मुद्रा दृशोश्च तत् ॥५६०॥
तथा कथारहस्यार्थं राज्ञा जिज्ञासुना हृदि । श्रोतव्यमेवमेव श्वो निश्चित्येत्थमशय्यत ॥५६१॥
तथैव च द्वितीयेऽह्नि तदेकहृदयो नृपः । सायमेवादिशत्तस्या एव वारकमादरात् ॥५६२॥
रतैरतीत्य रात्र्यर्द्धं [३]निदिद्रासति भूपतौ । अप्राक्षीत् प्राक्कथोद्घातं राज्ञीं मदनिका पुनः ॥५६३॥
साऽप्याह स चतुर्बाहुर्बाहुभिर्न तु वर्ष्मणा । हले ! मदनिके ! देवः किं त्वमत्राऽपि मुह्यसि ॥५६४॥
पृष्टा भूयस्तयाऽऽख्यानमूचे **कनकमञ्जरी** । अस्ति **विन्ध्य**गिरौ कोऽपि रक्ताशोकतरुर्महान् ॥५६५॥
छदौघैश्छादितार्क्कस्य शाखाश्लिष्टदिशो भृशम् । तस्य नाऽभूत्परं छाया बहुलस्यापि शाखिनः ॥५६६॥

१. चेष्टितं – A । २. चतुःकरप्रमा....B, K, A, D, L । ३. निदद्रासति – B, KH ।

टि. 1. मृषा (अव्य०) – मुधा ।

कथं तदिति दास्योक्ते भूयोऽभ्यधित[१] भोगिनी । निद्रामि सम्प्रति श्रान्ता श्रोतासि श्व इदं पुनः ॥५६७॥
तद्वदेव तृतीयेऽह्नि राज्ञि रात्रावुपागते । श्रान्ते शिशयिषौ राज्ञी भुजिष्याऽ[1]भ्यर्थिताऽभ्यधात् ॥५६८॥
तपनाऽऽतपतप्तस्य क्व सा छायाऽस्तु भूरुहः । भूरुहं ये श्रितास्तं ते तच्छायाफलभोगिनः ॥५६९॥
अन्यच्च क्वचिदप्यासीन्निवेशे कश्चिदौष्ट्रिकः । स कण्टकाशनं[2] कञ्चिदरण्येऽचारयच्चिरम् ॥५७०॥
मरुप्रियेण[3] तेनाऽपि चरताऽरण्यचारिणा । पत्रैः पुष्पफलैराढ्योऽदर्शि बब्बूलपादपः ॥५७१॥
तदन्तिकमथोपेत्य सरलीकृतकन्धरः । दूरादवाप नैवाग्रविटपानपि पादपात् ॥५७२॥
चिखादिषुश्च बब्बूलमक्षमश्चाप्तुमप्यमुम् । चिरं कादम्बिकश्चैव[4] तत्काम्यस्ताम्यति स्म सः ॥५७३॥
स तत्काम्यपि तद्द्वेषी बब्बूलं परितः स्फुरन् । विधेर्वामतयैवाऽऽसीदीर्ष्यालुरिव कामुकः ॥५७४॥
कथमप्यनवाप्याथ मत्सरच्छुरितान्तरः । बब्बूलभूरुहो मौलावुत्ससर्ज्ज मलं मयः ॥५७५॥
राज्ञीं मदनिकाऽपृच्छत्करभः करभोरु ! सः । ग्रीवाग्रेणाऽप्यनाप्ते द्रौ कथं तत्राऽत्यजन्मलम् ॥५७६॥
अत्रान्तरे निदद्रौ सा श्रान्ता कनकमञ्जरी । परेद्युरपि तत्रागान्नरेन्द्रः कौतुकात्ततः ॥५७७॥
अथ प्राग्वदतिक्रान्ते निशीथेऽवनिवासवे । निद्रायति कथाशेषप्रश्नं मदनिका व्यधात् ॥५७८॥
स्मित्वोचे भोगिनी किं ते चिन्तेयं नापवर्तर्त्ते । सखि शृङ्खलको[5]ऽद्राक्षीत् कूपान्तस्तं हि शाखिनम् ॥५७९॥
किञ्च—
पित्रा मात्रा तथा भ्रात्राऽऽहूतैः प्राप्तैस्त्रिभिर्वरैः । युगपत्कन्यका काचिदिष्टा दष्टाऽहिना मृता ॥५८०॥
तेष्वेकश्च तया साकं चितायां भस्मसादभूत् । प्रायोपवेशनेना[6]न्यस्तस्या भस्माप्यसेवत ॥५८१॥
तज्जीवनेच्छयाऽऽराध्य देवतां प्राप्य चाऽमृतम् । तृतीयस्तच्चितां सिक्त्वा द्वयं दग्धमजीवयत् ॥५८२॥
अहंपूर्विकया तेषां त्रयाणां तुल्यमिच्छताम् । एकेन कन्यका केन परिणेया वरेण सा ॥५८३॥
द्वितीयेऽह्नि तथैवाह तस्याः संजीवकः पिता । सहोद्भूतस्तु सोदर्यस्त्यक्तभक्तः परं पतिः ॥५८४॥
किञ्च—
कश्चिद्भूमिपतिः पत्न्यै गुप्तं भूमिगृहान्तरे । रत्नालोकादलङ्कारान् हेमकारैरजीघटत् ॥५८५॥
स्वर्णाध्यक्षाय तत्रैकः कश्चिन्नाडिंधमो[7]ऽन्वहम् । प्रदोषसमयं सम्यग् ज्ञात्वाख्यद्धेतुतः कुतः ॥५८६॥
सा न्यवेदयदन्येद्युस्तथैव नृपतिप्रिया । दिवसान्तं निशान्धत्वात् कलादस्[8]तत्र वेद सः ॥५८७॥
किञ्च—
राज्ञा केनाऽप्यवध्यौ द्वौ वधप्राप्तौ मलिम्लुचौ । पेटायां न्यस्य नीरन्ध्र्य[9] मध्येवार्द्धि प्रवाहितौ ॥५८८॥
कैश्चिद्दिनैः तटे क्वाऽपि तां पेटां प्राप्य कश्चन । उद्घाट्याऽवोचदद्याऽयं कतिथो वामभूद्दिनः ॥५८९॥
एकस्तत्राह तुर्योऽद्य दिनस्तद्वेत्त्यसौ कथम् । सैवाऽन्येद्युस्तथैवाऽऽह स तुरीयज्वरीति[10] तत् ॥५९०॥
किञ्च—
कयाचित्पणबन्धेन बन्धके[11] कटकद्वयम् । आत्तं प्रकरणे प्राप्ते पुत्रिका पर्यधाप्यत ॥५९१॥

१. प्यधित - P भ्यधिक - A । टि. 1. भुजिष्या - दासी । 2. कण्टकाशनः उष्ट्रः तम् । 3. मरुप्रियः - उष्ट्रः, तेन । 4. उत्कण्ठितः । 5. शृङ्खलकः उष्ट्रः । 6. प्रायः (पुं०) - अनशनम् । 7. नाडिंधमः - स्वर्णकारः । 8. कलादः - स्वर्णकारः । 9. निर्+रन्ध्र+त्वा (यप् आदेशः) वाच्यम् । 10. प्रत्येकं चतुर्थे दिने प्राप्यमाणः ज्वरः येन सः । 11. बन्धकम् - अधमर्णेन देयं प्रति न्यासीकृतं वस्तु, तस्मिन् ।

पिनद्धकटकैवाऽस्थात् ततः कौतुकिनी कनी । संवत्सरैर्बभूवाऽसौ त्रिभिः पुष्टवपुष्टमा ॥५९२॥
पणस्वं देयमादाय धनिकोऽन्येद्युरागतः । तावेव कटकौ स्वीयौ तामयाचत योषितम् ॥५९३॥
पुष्टान्नोत्तरतः कन्याकरतः कटकौ च तौ । तावेवर्त्ते न वर्त्तेत सुस्थितो धनिकः पुनः ॥५९४॥
तदा तथैव [1]निद्रायाऽन्यस्यां निशि जगाद सा । पणस्वमपि तद्याच्यो धनिको बुध्यते यथा ॥५९५॥

किञ्च—

स्वभूषणानि योषैका सपत्नीस्तैन्यशङ्किता । विन्यस्याऽमुञ्चदालोके वेद्यामामुद्र्य पेटिकाम् ॥५९६॥
वयस्याऽऽवासमस्यां च गतायामन्यदाऽन्यया । उद्घाट्याऽहारि हारोऽस्या भूयः पेटाऽथ मुद्रिता ॥५९७॥
प्रत्यागता दृशा साऽपि दूरादालोक्य पेटिकाम् । अविन्दत गतं हारं सपत्नी चाभ्ययुङ्क्त ताम् ॥५९८॥
सा दुष्टदैवतस्पर्शशपथायाऽथ ढौकिता । स [2]पादोपग्रहं [१]हारं तारं तस्यै समार्प्पयत् ॥५९९॥
पेटां तया [२]त्वनुद्घाट्यानिभाल्याऽलङ्कृतीश्च ताः । दूरादालोक्य विज्ञातं हारोऽहारीति तत्कथम् ॥६००॥
तथैवातीत्य तां रात्रिमन्येद्युर्भोगिनी जगौ । स्वच्छकाचमयी पेटा तदन्तर्दृश्यतेऽखिलम् ॥६०१॥

किञ्च—

नृपस्य कस्यचित्कन्या खगेनाऽहारि केनचित् । पिताऽऽह तस्मै तां दास्ये प्रत्यानेष्यति [३]यः सुताम् ॥६०२॥
रत्नभूताश्च चत्वारो राज्ये सन्त्यस्य पूरुषाः । निमित्तज्ञोऽथ रथकृत् [3]साहस्रो भिषगुत्तमः ॥६०३॥
निमित्तज्ञो दिशं वेद रथकृन्निर्ममे रथम् । तेनाऽभ्रगामिना गत्वा साहस्रस्तमहन् खगम् ॥६०४॥
हन्यमानेन कन्यायाः शिरश्छिन्नं भिषक् तदा । सन्दधे तन्नृपस्तेभ्यश्चतुर्भ्योऽपि ददौ सुताम् ॥६०५॥
कन्याऽऽह यो मया साकं कर्त्ता श्वः काष्ठभक्षणम् । पत्न्येकस्यैव तस्याऽहं भविताऽस्मीति निश्चयः ॥६०६॥
अथाऽपरेद्युः प्रच्छन्नः सुरङ्गाद्वारि सञ्चिताम् । चितां सह प्रविष्टे यः कन्यां सोऽन्येद्युरूढवान् ॥६०७॥
चतुर्षु कोऽभवत्तस्याः पतिः सखि ! निवेद्यताम् । सद्यो निद्रामि वक्तास्मि श्वः पुनस्तस्य निर्णयम् ॥६०८॥
राज्ञी मदनिकामाह तथैव क्षणदाक्षणे । तां न मर्त्तेति यो वेद निमित्तज्ञः स तत्पतिः ॥६०९॥

किञ्च—

पुराज्**जयपुरा**त्पूर्वं नाम्ना धाम्ना च **सुन्दरः** । नृपो व्यस्तविनीतेन वनेऽनीयत वाजिना ॥६१०॥
श्रान्तः श्लथितवल्गान्तः स्थितादुत्तीर्य वाजिनः । कूणिताक्षः [4]कणेहत्य सरस्यम्बु क्वचित्पपौ ॥६११॥
तदा च कामपि प्राप्तां तत्र तापसकन्यकाम् । लावण्यसरितं राजा साभिलाषं दृशा पपौ ॥६१२॥
तया सखीमुखेनाऽयमातिथ्याय किलाऽतिथिः । निमन्त्रितो नृपः प्रापदपापं तापसाश्रमम् ॥६१३॥
चक्रे कुलपतिस्तस्मै सपर्यां तापसोचिताम् । उपयेमेऽथ तद्दत्तां नृपस्तां तापसात्मजाम् ॥६१४॥
तं तापसमथाऽऽपृच्छ्य द्वितीयेऽह्नि नरेश्वरः । तया नवोढया साकं ववले वाहवाहनः ॥६१५॥

---

१. कारं हारं - C । २. समुद्.... - A । ३. तां - B ।

टि. 1. निद्राय - नि + द्रा धातुः, त्वा इति अस्य यप् आदेशः । 2. पादोपग्रहं - आपादं लम्बमानं हारम् । 3. साहस्रः - सहस्रपुरुषेण सह योद्धुं क्षमः । 4. कणेहत्य - यावत् तृप्तिः ।

सायं सरसि च क्वाऽपि श्रीवृक्षाधः स्थितो नृपः । निद्राणदारः केनाऽपि बभाषे ब्रह्मरक्षसा ॥६१६॥
प्राप्येष्टं भोज्यमद्य त्वां षष्ठान्मासाद् बुभुक्षितः । नृप ! तृप्तो भविष्यामि देहि वाऽन्यन्ममेप्सितम् ॥६१७॥
अष्टादशाऽब्ददेश्यश्चेत्कश्चिद् ब्राह्मणदारकः । मात्रा मौलौ पदोः पित्रा धृतस्तस्यैव कामतः ॥६१८॥
त्वया हतः कृपाणेन बलिः स्यान्मुदितो मम । ततस्त्वां नृप ! मुञ्चामि सप्तरात्रमिहावधिः ॥६१९॥ युग्मम् ॥
तदङ्गीकृत्य कृत्येष कालस्य हरणाशया । सदारो हरिमारुह्य सञ्चचार पुरं प्रति ॥६२०॥
स्वस्यानुपदिकैः सैन्यैर्मुदितैर्मिलितः प्रगे । पुरं प्राप्य निरुत्साहः प्रपेदे सौधमात्मनः ॥६२१॥
राज्ञा तत्र यथाख्याते वृद्धो मन्त्री महामतिः । क्षणात् तत्प्रमितं हेम्ना तज्ज्ञैर्नरमजीघटत् ॥६२२॥
ततो विप्राग्रहारेषु[1] ख्यातब्रह्मपुरीषु च । तं च लक्षं च हेम्नोऽन्यं सडिण्डिममबिभ्रमत् ॥६२३॥
कोऽस्ति भोः पुण्यपूतायां रात्रौ जातो द्विजात्मजः । दयार्द्रो जीवदानेन यः प्रसीदति भूपतेः ॥६२४॥
तत्पित्रोर्दीयते द्रव्यमिदमेष च पुत्रकः । उच्चैर्ढक्करवेणेति महामतिरघोषयत् ॥६२५॥ युग्मम् ॥
सप्तमेऽह्न्यथ सम्प्राप्ते तादृक् कश्चिद् द्विजात्मजः । रुद्ध्वा तत्तुमुलं बुद्ध्वा घोषणार्थं महाशयः ॥६२६॥
ओमिति स्थापयित्वैतान्नृपस्य पुरुषान् बहिः । अन्तर्गृहं गतो भीत्या पितरावित्यबोधयत् ॥६२७॥ युग्मम् ॥
अहो ममाद्य माद्यन्ति सुकृतान्यखिलोपरि । प्राप्ताऽवसरमेतर्हि जितं मम मनोरथैः ॥६२८॥
यथाकथञ्चिद् गन्तार इमे प्राणा मरुन्मयाः । अहो अहं पणेनैभिर्[2]यशः क्रीणामि शाश्वतम् ॥६२९॥
देहान्तर्योऽहमित्याह भगवान् परमेश्वरः । अर्हन्स एव तुष्टोऽद्य[१] यत्प्राप्तोऽयं मया क्षणः ॥६३०॥
जायन्ते जन्तवः कुक्षिम्भरयो भूरयो हि ते । जन्म यस्य परार्थाय स जातः स च जीवति ॥६३१॥
जगतां पोष्यमात्मानं सर्वे कुर्वन्ति जन्तवः । जगदप्यात्मनः पोष्यं कश्चित्तु कुरुते पुमान् ॥६३२॥
दैवस्य वश्यः कायोऽयं हेतुना तेन गृह्यते । तेनार्[3]ज्जितं यतः[4] पुण्यम्[5]वैगुण्यमिहात्मनः ॥६३३॥
बहुविघ्नः कृतघ्नोऽयं मुधैव यदि यास्यति । कायः परार्थे पुण्याय किं न विक्रीयते ततः ॥६३४॥
किञ्चित् प्राण्युपकाराय प्रायः कायोऽक्षमोऽत्र चेत् । तदनेनाऽधमर्णेन पोषितेनाऽधमेन किम् ॥६३५॥
जयन्ति ते महासत्त्वाः परोपकृतिपारगाः । करुणाकरणिर्येषां तरणिस्तरवोऽम्बुदाः ॥६३६॥
नृपः प्राणैर्धनैर्यूयमिष्टाऽऽहारेण राक्षसः । अहं मनोरथावाप्त्या भवामः पूर्णकामनाः ॥६३७॥
पितरावनुमान्येति स परोपकृतौ कृती । नृपकृत्यं प्रतिश्रुत्य पौरान् गौराननान् व्यधात् ॥६३८॥
स्नातभुक्तानुलिप्तोऽथ पुरीपरिसरं गतः । प्राप्तस्य कौणपस्याऽग्रे पितृभ्यां स तथाधृतः ॥६३९॥
कृपाणपाणिना राज्ञा स्मरेष्टमिति भाषितः । दिक्षु चक्षुर्विनिक्षिप्य जहास ब्राह्मणात्मजः ॥६४०॥ युग्मम् ॥
हासस्य कारणं पृष्टो रक्षसोवाच विप्रसूः । इदं ख्याप्यतया पूर्वं किं राज्ञा ते प्रतिश्रुतम् ॥६४१॥
हर्षोद्धुषितरोमाणं तमथोवाच राक्षसः । तृप्तोऽस्मि तव सत्त्वेन समादिश करोमि किम् ॥६४२॥

---

१. तुष्टोयं – D, K ।

टि. 1. विप्रावासेषु इत्यर्थः । 2. एभिः-प्राणैः इत्यर्थः । 3. तेन – देहेन । 4. यतः हेतुना । 5. सानुबन्धं पुण्यम् ।

अथाह स हसन्नेवं [1]जातुधानं द्विजाग्रजः । याचसे चेत्त्वमादेशं हिंसां तर्हि परित्यज ॥६४३॥
क्व सौमनस्यं हिंस्राणाममृताशी क्व मांसभुक् । जीवजीवातुभावस्तु सत्यं देवत्वमर्हति ॥६४४॥
[2]स्वीकार्य करुणाधर्मं हासहेतुप्रबोधतः । सत्यं पुण्यजनीकृत्य स तेन प्रैषि राक्षसः ॥६४५॥
राजादिभिस्तदाऽनेकैर्बुद्ध्वा ब्राह्मणदारकात् । शान्तः करुणया कान्तः प्रपेदे धर्म आर्हतः ॥६४६॥
हले मदनिके ब्रूहि हासहेतुः. स कीदृशः । यं निशम्याऽभवत्तेषां मतिर्धर्मे दयामये ॥६४७॥
तदा निद्राय साऽन्येद्युर्निशि निद्राति भूपतौ । तथैव दासीमासीनामूचे **कनकमञ्जरी** ॥६४८॥
क्रमान्माता पिता राजा देवश्च शरणं नृणाम् । तेषु सन्निहितेष्वेवं किं स्मरामीति सोऽहसत् ॥६४९॥
य एवाऽहिंसकस्तस्मात्कारुण्यामृतवारिधिः । स एवार्हन् शरण्यः स्यात् परे जन्माब्धिबुद्बुदाः ॥६५०॥
कथाप्रथाभिरित्येवं परिमोहयमाणया । तया **कनकमञ्जर्या** विशामीशो वशीकृतः ॥६५१॥
नित्यमत्यन्तमासक्तस्तस्यामेवानुरक्तहृत् । प्रवृत्तिमपि राज्ञीनां नाऽन्यासां पृच्छति स्म सः ॥६५२॥
प्रायेण मुग्धहृदयाः शिशवो योषितो नृपाः । ह्रियन्ते लुब्धकैर्नीचैः कुरङ्गा इव कानने ॥६५३॥
गण्यन्ते पुरुषास्तावद्यावन्नायान्ति वश्यताम् । धैर्यध्वंसपताकासु भ्रूभङ्गाज्ञासु योषिताम् ॥६५४॥
[3]तन्निशान्तनितम्बिन्यः समन्युमनसोऽपराः । विद्वेषविषयं चक्रुर्न काः कनकमञ्जरीम् ॥६५५॥
भिनत्त्यनायसं शस्त्रमद्रव्यं विषमं विषम् । नीचाऽवमानप्रभवो मन्युर्मर्माणि देहिनाम् ॥६५६॥
रूपं कुलं कलां लक्ष्मीं तासामित्यभिभूय सा । राजानमात्मसाच्चक्रे शिल्पिकन्या गिरां रसैः ॥६५७॥
[१]पावनीश्रीरिहोद्गारो वशीकारो विकार्मणः । मुखमण्डनमद्रव्यं जयन्ति विशदा गिरः ॥६५८॥
तत्सपत्नीजनस्तस्याः [4]पुरोभागी परःशतः । रहस्यमिह शुश्राव कदाचिदिति चेष्टितम् ॥६५९॥
तथाह्येकाकिनी भूत्वा सा मध्याह्ने सदा रहः । चित्रकृत्कन्यका किञ्चिज्जपतीति हितोदितम् ॥६६०॥ युग्मम् ॥
सम्बन्धस्य स्वभावेन सपत्न्यः [२]पादचत्वराः । सत्वरास्तत्तथा सर्वमुर्वीशाय न्यवेदयन् ॥६६१॥
नृपो निशम्य तत्तस्याः सम्यग् जिज्ञासुरात्मना । अगात्तत्र तदान्वेष्टुं छन्नं यत्र गृहेऽस्ति सा ॥६६२॥
इतश्च सा यदैवोढा राज्ञा **कनकमञ्जरी** । मध्याह्ने तत्प्रभृत्येवं नित्यमात्मानमन्वशात् ॥६६३॥
भूत्वैकान्ते परावृत्य पतिप्रत्ताम्बरादिकम् । वस्त्रे [5]पटच्चरे ते तु पर्यधाज्जनकार्प्पिते ॥६६४॥
वापुर्षी त्रापुषीं प्राच्यमेव चालङ्कृतिं तनौ । परिधायात्मनात्मानं नित्यमित्थमबोधयत् ॥६६५॥
आत्मन् ! पुराणं नेपथ्यं विमृश्येदमिहात्मनः । मा कार्षीर्भूपतेर्भूत्या गर्वं गर्वो हि पातकृत् ॥६६६॥
त्वमात्मन् मा स्म विस्मार्षीरात्मानं स्वामिसम्पदा । **मद्याद् विषादपि श्रीणां मोहशक्तिर्महीयसी** ॥६६७॥
न कुलेन न वेषेण न मन्त्रैर्न च कार्मणैः । भर्तृभक्तिबलेनैव महनीया महेलिका: ॥६६८॥
न मुक्ताभिर्न माणिक्यैर्न वेशैर्न परिच्छदैः । अलङ्क्रियन्ते शीलेन केवलेनैव योषितः ॥६६९॥
देवार्चनमिवात्मानुशासनं नित्यमित्यसौ । कृत्वाऽथ राजवेषेण कृत्यमन्यत्पुनर्व्यधात् ॥६७०॥

---

१. पाविनीश्री... D, पावनश्री - C, A । २. पादचत्वारः - A पापचत्वराः C ।

टि. 1. राक्षसः, तम् । 2. स्व+कृ+णिग् (प्रेरकरूपं)+च्वि+त्वा (यप्) । 3. निशान्तम्०-अन्तःपुरम् । 4. पुरोभागी-पुरः पूर्वं भजते-गुणान् त्यक्त्वा दोषान् एव गृह्णाति । 5. जीर्णे ।

प्राप्तो गुप्तं क्षितेर्गोप्ताऽ[1]ररिच्छिद्रेण तत्तदा । सर्वं तद् वृत्तमालोक्याऽऽश्लिष्यन्मुदमुदित्वरीम् ॥६७१॥
तां पट्टमहिषीं चक्रे ततः प्रमुदितो नृपः । **निष्कृत्रिमा हि नारीणां भक्तिर्भर्तृषु कार्मणम्** ॥६७२॥
तापितापि सपत्नीभिर्यं गुणोत्कर्षमाप सा । वर्णोत्कर्षं सुवर्णस्य तप्तस्याऽनुचकार सः ॥६७३॥
अन्यदा **विमलाचार्य**मुद्याने समुपागतम् । नृपः सह महादेव्या निशम्याऽगाद् विवन्दिषुः ॥६७४॥
पञ्चधाऽभिगमेनाऽथ प्रविश्यान्तरवग्रहम् । त्रिः परीय तपोराशिमनंसीन्नृपतिर्मुदा ॥६७५॥
यथास्थानं निविष्टेऽथ भूपतिप्रमुखे जने । ववर्ष देशनासारैर्धर्मामृतघनो गुरुः ॥६७६॥
तेजस्वि श्रेयसां धाम महारत्नं महोदधौ । भवे च मानुषं जन्म भ्रष्टं भूयः सुदुर्ल्लभम् ॥६७७॥
कामानामाशया जन्म ये मुधा हारयन्ति तत् । तैर्भ्रान्तैर्भूतये कष्टं कल्पद्रुः क्रियतेऽग्निसात् ॥६७८॥
देवः शान्तो गुरुर्दान्तो धर्मः कान्तो दयामयः । इति तत्त्वत्रयं शुद्धं श्रयताऽवस्कराद्भवात् ॥६७९॥
यो देवगुरुधर्मेषु बोधो ज्ञानं स उच्यते । दर्शनं तु रतिस्तेषु चारित्रं तत्क्रियाक्रमः ॥६८०॥
रत्नत्रयमयः पन्थास्तत्त्वत्रितयगोचरः । त्रिधा त्रिधाऽयमाराद्धः कैवल्यमुपतिष्ठते ॥६८१॥
श्रुत्वेति देशनां सूरेर्विशेषाद्धर्मकर्मठः । समं **कनकमञ्जर्या** नरेन्द्रोऽभूदुपासकः ॥६८२॥
अन्योन्यस्याविरोधेन राज्यं धर्मं च पार्थिवः । लोकद्वयोपरोधेन यथान्यायमपालयत् ॥६८३॥
तया **कनकमञ्जर्या**ऽन्यदा निर्यामितः पिता । नमस्कारं स्मरन् दत्तं कालाच्चित्राङ्गदो मृतः ॥६८४॥
कियताऽप्यथ कालेन धर्ममाराध्य साऽऽर्हतम् । आयुःक्षयादभूदत्र देवी कनकमञ्जरी ॥६८५॥
च्युत्वा ततोऽपि **वैताढ्ये तोरणा**ख्यपुरेऽजनि । **दृढशक्ति**खगेन्द्रस्य पुत्री **कनकमालिका** ॥६८६॥
उद्यौवनां च कामान्धो **वासवा**ख्यः खगाऽग्रणीः । तां हृत्वाऽत्र नगे सौधं कृत्वाऽन्तरमुचन्मुदा ॥६८७॥
तेन मङ्गलचैत्याऽग्रे वेदीयं विदधे यतः । स्वेच्छासम्पत्तयो देवास्ते विद्यासम्पदः खगाः ॥६८८॥
सर्वां विधाय सामग्रीं मरुभ्योऽपि स वासवः । गान्धर्वाय विवाहाय यावदासीत्समुत्सुकः ॥६८९॥
तावत्**कनकमाला**यास्तदानुपदिकोऽग्रजः । **स्वर्णतेजाः** समायासीत्तस्करं समधिक्षिपन् ॥६९०॥
समं द्वावपि तन्वानौ खड्गाखड्गि महाभुजौ । मिथः क्रोधहुताशस्याभूतां पूर्णाहुती हतौ ॥६९१॥
कान्दिशीकां भिया तत्र सहोदरशुचातुराम् । पुण्यैः कश्चित्तदानीतः प्रीतस्तां त्रिदिवोऽब्रवीत् ॥६९२॥
मा शुचः सोदरं वत्से ! सङ्ग्रामे संमुखं हतम् । यद्विक्रमक्रमे साक्षी [2]कर्मसाक्षी समीक्ष्यते ॥६९३॥
संमुखं निहताः सूरा जितात्मानस्तपोधनाः । प्रयान्ति परमं धाम भर्तृभक्ताश्च योषितः ॥६९४॥
**शोकः शोकानुबन्धी हि न स शाम्यति शोचताम् । अर्थैरर्था इवाऽऽयान्ति दुःखैर्दुःखपरम्पराः** ॥६९५॥
त्वं च मे दुहिता वत्से ! प्राणेभ्योऽप्यतिवल्लभा । लोकैर्मे लालिता प्रीत्यै तिष्ठाऽत्रैवाऽकुतोभया ॥६९६॥
कोऽयं देवः कथं चाऽस्य दुहिताऽहं महात्मनः । स्निह्यतीव ममाऽप्यस्मिन्नन्तरात्मा किमञ्जसा ॥६९७॥
दध्यौ **कनकमाले**ति यावत्तावदुपागमत् । तनयान्वेषको धावन् **दृढशक्तिः** खगाग्रणीः ॥६९८॥ युग्मम् ॥

टि. 1. अररिः - कपाटः द्वारम् वा । 2. कर्म साक्षात् पश्यति - इन् - सूर्यः ।

स स्वर्णतेजसं पुत्रं वासवं चा[1]ऽऽततायिनम् । अपश्यत् काश्यपीपीठे शस्त्रैर्द्वावपि तौ मृतौ ॥६९९॥
पुत्रीं **कनकमालां** च लूनमूर्द्धानमग्रतः । विलोक्य विममर्शेति विद्याधरशिरोमणिः ॥७००॥
तेन नूनं निराशेन प्राक् निहत्य ममात्मजाम् । स्वर्णतेजाः सुतोऽघानि सोऽपि च स्वर्णतेजसा ॥७०१॥
अहो असारः संसारः सारभ्रान्त्या मुधाऽर्थ्यते । **कामाद्यैर्यत्र जन्तूनां सुप्रापाऽनुपदं विपत्** ॥७०२॥
क्व पुत्रः पुत्रिका क्वासौ क्वाततायी स वासवः । न सन्त्येते यथैतर्हि तथा स्वप्नोपमं जगत् ॥७०३॥
जाग्रत्सुप्तपुनर्जाग्रदवस्थासु तिसृष्वपि । बोधिका मध्यमैवैका द्वे तटस्थे न तत्त्वतः ॥७०४॥
कः शत्रुः कोऽथवा मित्रं व्यामोहः सैष मोहजः । येन मूढधियो लोका न जानन्त्यात्मनो हितम् ॥७०५॥
**उत्पथप्रस्थितः शत्रुर्मित्रं सत्पथमास्थितः । अयमात्मैव मन्तव्यो बहिर्भ्रान्तिस्तु विभ्रमः** ॥७०६॥
जनो जानात्वसौ तत्त्वं दुःखस्य च सुखस्य च । **असन्तोषः परं दुःखं सन्तोषः परमं सुखम्** ॥७०७॥
इति चिन्तयतस्तस्य धर्मिणो लघुकर्मणः । प्राग्भवाधिगमादासीत् स्वयंसम्बुद्धसाधुता ॥७०८॥
देवतार्पितनेपथ्यः स चाऽभूच्चारणो मुनिः । दुहित्राऽपि सहाथा[2]ऽमुमानमद्वानमन्तरः ॥७०९॥
ततः **कनकमालां** तां जीवन्तीं वीक्ष्य चारणः । किमेतदिति पृच्छंश्च द्वावश्रौषीन्मिथो हतौ ॥७१०॥
हता तृतीया तत्पार्श्वे मया दृष्टाऽसि तत्कथम् । भूयः पृच्छन्मुनिश्चैवं स्मित्वोचे तेन नाकिना ॥७११॥
वराकी दुहिता नैतद्वेत्ति तत्कल्पितं मया । कारणं शृणु तत्राऽर्थे कथ्यमानं मुने ! मया ॥७१२॥
**क्षितिप्रतिष्ठ**भूभर्तु**र्जितशत्रो**रभूत्पुरा । राज्याः **कनकमञ्जर्याः** पिता **चित्राङ्गदा**भिधः ॥७१३॥
पुत्र्या दत्तनमस्कारः स मृत्वा व्यन्तरोऽस्म्यहम् । दे[3]वीत्वाऽन्तरिता सा तु सुता तेऽजनि खेचरी ॥७१४॥
खगेनाऽऽनीय सा मुक्ता प्रासादेऽत्र स्वयंकृते । नगे निवासिनाऽबोधि पुत्रीत्यवधितो मया ॥७१५॥
हते चौरे हते बन्धौ यावदाश्वासयाम्यमूम् । तावद्युष्मानिह प्राप्तान् वीक्ष्य मायामयोजयम् ॥७१६॥
पित्राऽनेन समं मा गादियं मे दुहितेतिधीः । तव नैराश्यमाधातुमेनां मायामहं व्यधाम् ॥७१७॥
सर्वं तदेतदेतर्हि क्षन्तव्यं मे महामुने ! । उक्त्वेति व्यन्तरं बद्धाञ्जलिमाह महामुनिः ॥७१८॥
दिव्यैवाऽजनि ते माया या मां प्रति नियोजिता । समहारि महामाया यया भवमयी मम ॥७१९॥
नापराद्धं ततस्तत्र प्रत्युतोपकृतं त्वया । इत्युदित्वा च दत्ताशीर्विजहाराऽन्यतो मुनिः ॥७२०॥
प्राग्भवीयं तदाऽऽकर्ण्य वृत्तं व्यन्तरवर्णितम् । तस्याः **कनकमाला**या जातिस्मृतिरजायत ॥७२१॥
अयाचद् व्यन्तरं प्राच्यपितरं सा पुनस्ततः । सम्प्रत्यपि पतिं तात ! तमेव मम मीलय ॥७२२॥
देवोऽप्युवाच नात्माऽत्र देयो दैत्याय याच्ञया । जागरूकस्तवाऽत्रार्थे वत्से ! विजयते विधिः ॥७२३॥
**जितशत्रुः** स ते प्रेयान् देवीभूय च्युतो दिवः । राज्ञो **दृढरथा**ख्यस्य सूनुः **सिंहरथो**ऽजनि ॥७२४॥
पति**र्गन्धार**देशस्य स पुरात् **पुण्ड्रवर्द्धनात्** । तुरङ्गेण हतोऽत्रैव समेष्यति नगे स्वयम् ॥७२५॥

---

टि. 1. आततायिन् (त्रि०) – आततेन शस्त्रादिना अयितुं शीलं अस्य, शस्त्रं उद्यम्य हन्तुं प्रगुणीभूतः इत्यर्थः तम् । 2. अथ अमुम् (चारणमुनिं) आनमद् वानमन्तरः (देवः) इति वाच्यम् । 3. देवीत्वं अनुभूय सा कनकमञ्जरी तव सुता अजनि इत्यर्थः ।

स त्वां वेद्यादिसामग्र्याऽनयैव परिणेष्यते । निराकुलाऽत्र तिष्ठ त्वं यावदायाति स क्षण: ॥७२६॥
ह्य: स च व्यन्तरो मेरुमयासीद् वन्दितुं जिनान् । आर्यपुत्रोऽपि चाऽत्राऽऽगाद् द्व्यह्ने तद् विदितं च व: ॥७२७॥
तामाकर्ण्य कथां कर्ण्यां जातिं **सिंहरथो**ऽस्मरत् । श्वशुरश्च सुर: प्राप्त: सानन्दस्तमनन्दयत् ॥७२८॥
व्यन्तरीभि: कृताश्चर्यवर्यतूर्यत्रयोत्सव: । मध्याह्नेऽभ्यर्च्य सोऽर्हन्तं विधिशेषं व्यधादिति ॥७२९॥
बलिं पात्रे समाहृत्य सत्कृत्य गृहदेवता: । दिग्देवेभ्यश्च दिग्भ्यश्च बलिं दत्ते स्म स क्रमात् ॥७३०॥
योगिनी क्षेत्रप-प्रायान् जिनेच्छानुविधायिन: । निर्विघ्नं सर्वसिद्ध्यर्थं स देवान् समतर्प्पयत् ॥७३१॥
गन्धधूपान्वितं क्षिप्त्वा बलिशेषमिलातले । प्रक्षाल्य पाणी पादौ चार्चांतोऽ[१]भुङ्क्त कृती तत: ॥७३२॥
देवेन पूरिताशेषकामस्तामभिनन्दयन् । निनायैकाहवन्मासमात्रमत्र नगे नृप: ॥७३३॥
राज्यस्याऽस्वास्थ्यमाशङ्क्य चिरकालेन भूपति: । जगाद सादरं प्राणप्रियामप्रियमप्यद: ॥७३४॥
उपद्रोष्यति मे राज्यं शत्रुवर्गो निरर्गल: । पुरे तद्यामि भूयो मां पञ्चमेऽह्न्यत्र वीक्ष्यसे ॥७३५॥
ऊचे **कनकमालै**तत्कृत्यं जीवेश ! यद्यपि । एहिरेयाहिरा कष्टा धराऽध्वनि तथापि ते ॥७३६॥
विद्यां प्रज्ञप्तिमेतर्हि गृहाणाऽनुगृहाण तत् । गतागतं यथा व्योमवर्त्मनैव सुखं भवेत् ॥७३७॥
विद्यामासाद्य सद्योऽपि प्रियया प्रतिपादिताम् । असाधयदथो **सिंहरथो** गगनगामिनीम् ॥७३८॥
आश्लिष्या[1]ऽऽयल्लकक्षामां तामापृच्छ्याऽथ वल्लभाम् । प्रत्यागान्नगरे राजा नागरै: कृतमङ्गल: ॥७३९॥
चतुरो वासरांस्तत्र निर्गम्य नगरे नृप: । स कत्यप्यत्यगात् प्रीत्या नगमेत्य पुनर्दिनान् ॥७४०॥
नगे च नगरे चास्य वर्त्मणाऽभूद्गतागतम् । मन: **कनकमालां** तु नाऽमुचत्क्वचिदन्तिकात् ॥७४१॥
नगेऽतति नृपो नित्यं नगरादिति चान्वयात् । **नगाति**रिति स ख्यातिमाप **सिंहरथो** जनात् ॥७४२॥
नृपं नगेऽन्यदाऽवादीद्विषादी व्यन्तर: स तम् । त्वत्पूज्य इति मान्योऽहमन्यमन्यु[2]भुजामपि ॥७४३॥
यास्यामि स्वामिनिर्देशाद्देशान्तरमितोऽधुना । नगे **कनकमाला**यां त्वयि चातिरतिर्मम ॥७४४॥
न स्निग्धमुग्धयोश्चास्ति भेद: कश्चिद्विपश्चिताम् । [3]धिषणाधिषणं याचे तेन जामातरं निजम् ॥७४५॥
नीत्वा निजपुरे वत्सां मा नैषी: शून्यतां नगम् । अस्मदायल्लकश्चास्या रक्षणीयस्त्वयाऽनघ ! ॥७४६॥
सपरीवार एवेति गदित्वा व्यन्तरोऽगमत् । नगरं नग एवाऽस्मिन् नृपश्च निरमापयत् ॥७४७॥
दिव्यं सुरपुरस्पर्द्धि सुधाधौतै: सुरालयै: । तन्**नगातिपुरं** नाम पुरं धाम श्रियामभूत् ॥७४८॥
तत्र चैत्यालिमौलिस्थसुवर्णकलशैर्दिवा । निरीक्ष्यते परोलक्षभानुबिम्बमिवाम्बरम् ॥७४९॥
पुन्नागै: शाखिभिर्धर्म्मै: फलदै: कल्पपादपै: । हेमपुष्पैरशोकैश्च यदुद्यानमिवाऽऽबभौ ॥७५०॥
ऊर्ध्वं चैत्यध्वजैरच्छकुट्टिमे बिम्बितैस्त्वध: । [4]लेखशेषपुरे जेतुं दत्तपत्रं यदाबभौ ॥७५१॥

---

१. चावान्तो - A, चाचान्तो - D चार्चान्ते - C चावान्तो - L, B, K ।

टि. 1. आयल्लक:-उत्कण्ठा । 2. मन्युभुक्-देव:, तेषाम् । 3. धिषणाधिषणं - धिषणा बुद्धि: तस्या: धिषणं स्थानं, अवस्थानं यत्र स धिषणाधिषण:, तम् । 4. स्वर्गपुरं पातालपुरं च - लेखशेषपुरे ।

यस्मिन् विमुच्य वैमत्यं लक्ष्मीगौरीगिरोऽवसन् । अनेकान्त इवैकत्र सर्वदर्शनिनां दृशः ॥७५२॥
**नगाति**पृथिवीजानिर्व्यन्तरस्य प्रजापतिः । **नगाति**नगरस्याऽस्य द्विधा सोऽभूत्प्रजापतिः ॥७५३॥
स देवार्च्चाक्षणे भेजे मौलिस्थकरसम्पुटः । अन्तर्वहन् महादेवं सकुम्भजिनचैत्यताम् ॥७५४॥
भिन्नेभमुक्तातारासु स्फारासु रणरात्रिषु । भेजे रजोऽन्धकारासु लक्ष्मीर्यमभिसारिका[1] ॥७५५॥
तस्य कल्पद्रुमस्येव सर्वतोऽप्युपकुर्वतः । दिशोऽधिवासयामास यशःकुसुमसौरभम् ॥७५६॥
खेलन् कल्पद्रुदोलासु नाकिनां ललनाजनः । यशांसि यस्य राजेन्दोः सुधागौराणि गायति ॥७५७॥
स्वःशाखिपञ्चकेनास्य पञ्चशाखो[2] ध्रुवं कृतः । तस्य छायां समाश्रित्य कृतार्था स्युर्यदर्थिनः ॥७५८॥
पुमर्थास्तमसेवन्त त्रयोऽन्योन्यमबाधया । तुर्योऽप्यासन्नतां भेजे समयं प्रतिपालयन् ॥७५९॥
राज्यं पालयतो न्यायाद्धर्मं चाऽस्य क्षमाभुजः । सुमहानतिचक्राम क्रमात्कालः क्षणार्द्धवत् ॥७६०॥
पुरीपरिसरेऽन्येद्युर्द्रष्टुं मधुमहोत्सवम् । जगाम जगतीजानिर्नगातिर्जनगौरवात् ॥७६१॥
स मार्गे मञ्जरीपुञ्जं मञ्जुगुञ्जन्मधुव्रतम् । चूतमालोकतोत्तुङ्गमातपत्रमिवाऽवनेः ॥७६२॥
वसन्तदूतमुद्भूतमञ्जरीपुञ्जपिञ्जरम् । तमालोक्याऽवनीजानिरजनिष्ट पदं मुदाम् ॥७६३॥
धाम चामरपुष्पो[3]ऽयं श्रियामतिमनोहरः । समं प्रीणाति सर्वेषामिन्द्रियाणि मनश्च नः ॥७६४॥
इत्युदीर्याऽऽददावेकां मञ्जरीं तस्य भूरुहः । जगाम तामथो जिघ्रन्नग्रतश्च क्षितीश्वरः ॥७६५॥
मञ्जरी किशलं पत्रं विटपश्चाखिलं जनैः । गतानुगतिकैस्तस्य लुण्टाकैरिव लुण्टितम्[१] ॥७६६॥
क्रीडां विधाय वासन्तीं वलितोऽवनिवासवः । तं मूलशेषमालोक्य सहकारं व्यचिन्तयत् ॥७६७॥
योऽयं लोचनलेह्यश्रीः सद्योऽदर्शि मया तरुः । स दशामेधसामेवमधाद्धिग् वेधसो विधिम् ॥७६८॥
धिक्कर्माण्युत्तमाङ्गं यैः पराधीनस्य देहिनः । भूष्यते दूष्यते हा हा मुकुटेन कुटेन वा ॥७६९॥
भवेऽस्मिन् सर्वभावानां कालेन परिवर्त्तिनाम् । अप्यसंक्षीयमाणानां श्वः श्वः कोऽपि विपर्ययः ॥७७०॥
न कुटुम्बं न वा लक्ष्मीर्न लीलाललितं वयः । अधीनानामधीनत्वं न देहोऽप्येति देहिनाम् ॥७७१॥
**अयं क्लेशमयः कायः सर्वाऽपायचयाऽऽश्रयः । भारायते हि पर्यन्ते दरिद्राणामिवोत्सवः** ॥७७२॥
सन्ध्याभ्ररागात्करिकर्णतालात्तडित्प्रकाशाच्चलपत्रिपत्रात् ।
मत्ताङ्गनापाङ्गविलोकिताच्च भवस्थितेरस्थिरतां धिगेताम् ॥७७३॥
प्राक्पुण्यपापोन्नमितोऽप्यसारसंसारहेतुः सुखदुःखभारः ।
नारोढुमीष्टे[4] महतां ममत्वहस्तावलम्बेन विना मनांसि ॥७७४॥

---

१. लुंठितं P ।

टि. 1. अभिसारिका – कुलटास्त्री (जय) लक्ष्मीः स्वपतीन् त्यक्त्वा अमुं भेजे इत्यर्थः । 2. पञ्चशाखः–हस्तः । 3. अमरपुष्पः कल्पवृक्षः । 4. ईष्टे – समर्थः भवति ।

अनादिसिद्धेरविनश्वरस्य ज्ञातुर्जडे नाशिनि कृत्रिमे च ।
गुणेन केनाऽस्तु ममत्वमस्य पुंसः स्वदेहेऽपि कुतोऽन्यदेहे ॥७७५॥
लक्ष्मीमलक्ष्मीं च विचिन्त्य चूते प्रबुध्य **गान्धारनृपो नगातिः** ।
तदैव देवार्प्पितशुद्धवेषः प्रत्येकबुद्धत्वमिति प्रपेदे ॥७७६॥ [उपजातिवृत्तचतुष्कम्]

ते क्रमात्**करकण्डुश्च द्विमुखश्च नमिश्च** सः । **नगातिश्चाययुः क्षोणीप्रतिष्ठान**[1]पुरेऽन्यदा ॥७७७॥
[2]तत्र तस्थुश्चतुर्द्वारि लघौ देवकुले क्वचित् । पूर्वाद्यासु क्रमाद्दिक्षु वलक्षध्यानमानसाः ॥७७८॥
तदा देवकुलाधीशो व्यन्तरः प्रीणितान्तरः । दध्यौ विधेयमातिथ्यमेषां सन्तोषिणां कथम् ॥७७९॥
धन्योऽहं कृतकृत्योऽहं निर्वृतोऽस्मि भवेऽप्यहम् । यदिमे मन्दिरं मेऽद्य पुनते पुण्यदर्शनाः ॥७८०॥
श्लाघ्यं सांमुख्यमेवैषामातिथ्यमधुनोचितम् । विधायाऽपि यदातिथ्यं वैतथ्यं विमुखो नयेत् ॥७८१॥
चतुर्मूर्त्तिश्चतुर्भ्योऽपि मुनिभ्यः संमुखीभवन् । व्यन्तरः स तदात्मानं मेने सुकृतिनं कृती ॥७८२॥
**करकण्डु**मुनिः कण्डूमपनुद्य पुनः श्रुतौ । शलाकां स्थगयन्नूचे **द्विमुखेन** महर्षिणा ॥७८३॥
सर्वं राज्यं च राष्ट्रं च पुरं चान्तःपुरं च तत् । मुक्त्वाऽमुं सञ्चयं भूयः कुरुषे पुरुषेश ! किम् ॥७८४॥
प्रतिवक्ति तदा यावत्**करकण्डु**र्महामुनिः । तावदाविर्भवत्तर्को **नमिर्द्विमुख**मभ्यधात् ॥७८५॥
पैतृकस्याऽपि राज्यस्य कृत्वा कृत्यकृतो बहून् । त्यक्त्वा तत्कृत्यमप्यद्य भूयःकृत्य करोषि किम् ॥७८६॥
**द्विमुखो** नोत्तरं दत्ते यावन्**नमि**महामुनेः । तावद्**गान्धार**राजर्षिर्**नगाति**र्गिरमाददे ॥७८७॥
यदा साम्राज्यमुत्सृज्य मुक्तावुत्तिष्ठते भवान् । आत्मनिःशेषकृत् तस्मान्नान्यमर्हति गर्हितुम् ॥७८८॥
शान्तं कान्तं हितं स्वादु मुधाकृतसुधारसम् । **करकण्डु**रुवाचेति ततः शुचि वचो मुनिः ॥७८९॥
मोक्षमार्गं प्रपन्नेषु साधुषु ब्रह्मचारिषु । हितार्थं दिशतः साधोर्न दोषं वक्तुमर्हसि ॥७९०॥
विषं वा मन्यतामन्यो रोषं तोषं करोतु वा । भाषितव्या हिता भाषा स्वपक्षगुणकारिका ॥७९१॥
[3]महात्मनः प्रपद्यैतां सम्यक्शिक्षां महर्षयः । कालेनाऽऽसाद्य कैवल्यमभजन्त महोदयम् ॥७९२॥

**इति करकण्डु[4]प्रभृतिचतुष्प्रत्येकबुद्धकथानकम् ॥**

इदं चाश्चर्यभूतमसम्भाव्यतमं प्रत्येकबुद्धानां चरितमेवावलम्बनमुररीकृत्य ये स्वयं [5]प्रमादिनो भूत्वा तच्चरितोपदेशेन अन्यानपि प्रमादे पातयन्तः स्वयं नष्टाः परानपि नाशयन्ति तान् प्रत्याह–

**निहिसंपत्तमहन्नो, पत्थितो जह जणो निरुत्तप्पो ।**
**इह नासइ तह पत्तेय-बुद्धलच्छि पडिच्छंतो ॥१८१॥**

**निधिं** रत्नादिभृतं भाजनं **सम्प्राप्तं** सम्यगधिगतं **अधन्यो** निर्भाग्यः **प्रार्थयन्** अभिलषन्, **यथा** यद्वज्जनो लोको **निरुत्तप्पो** निरुद्यमतया शीतलस्तद्ग्रहणे बलिविधानभूखननादिप्रयत्नशून्य इति यावत्, **इह** लोके **नाशयति**

---

१. ष्ठानगरे – P । २. तत्रतेस्थुश्च – L, C, K । ३. महात्मानः L, H, C, K, KH, B, D, A । ४. द्विमुखनमिनगातिश्चतुः....P ।
५. प्रमोदिनो – P ।

हारयति तल्लाभभाग् न भवति जनेन च हस्यते **तथा प्रत्येकबुद्धलक्ष्मीं करकण्डू**वादिबोधसमृद्धिं **प्रतीक्षमाणो** निर्विकल्पम् , तपःसंयमादिषु प्रमत्तो भूत्वा मुक्तिमगृह्णन् सामग्रीं हारयतीति ॥१८१॥

अतः प्रेक्षावता न किञ्चिद् दुष्टमालम्बनं विधेयं यतः सर्वथा अविश्वासहेतुत्वादजय्य एवाऽयमिन्द्रियग्राम इति सदृष्टान्तमाह–

**सोऊण गइं सुकुमालियाए, तह ससगभसगभगिणीए ।**
**ताव न वीससियव्वं, सेयट्ठी धम्मिओ जाव ॥१८२॥**

**श्रुत्वा** आकर्ण्य **गतिं** परिणतिं **सुकुमारिकायास्तथा शासक-भ्रासकभगिन्यास्तावन्न विश्वसितव्यम्** इन्द्रियाणामिति शेषः । **श्रेयोऽर्थी** मोक्षं प्रति साधको **यावद**द्यापि अर्थी, न तत्प्राप्त्या सम्पूर्णाभिलाषतया निष्ठितार्थो भवति । अभावुकस्याऽपि भवाभिनन्दित्वात् श्रेयोर्थित्वं न स्यादिति विशेषितो **धार्मिक** इति । अथवा धर्मेण चरन् **धार्मिकः, श्वेतास्थिः** श्वेतानि मरणकृतधात्वन्तरापिधानापनयनेन विभाव्यमानशुभ्रवर्णानि अस्थीनि यस्य स तथा **यावन्न** सम्पन्न इति शेषः । यावन्निर्विकल्पं न मृतस्तावन्न विश्वसितव्यमित्यक्षरगमनिका ॥१८२॥ भावार्थाऽधिगमाय कथा पुनरेवम्–

## [ सुकुमारिकाकथानकम् ॥ ]

पुरा **चम्पापुराधीशः सिंहसेनो**ऽभवन्नृपः । **शासको भ्रासक**श्चाऽस्य द्वौ सुतौ **सिंहला**ङ्गजौ ॥१॥
शस्त्रे भुजाबले शास्त्रे न्याये धर्मे पराक्रमे । तयोः स्माऽनन्यसामान्यं भाति सातिशयं यशः ॥२॥
सदेहमिव सौभाग्यं लावणस्यैव देवता । एतयोरनुजा जज्ञे नाम्नाऽपि **सुकुमारिका** ॥३॥
पीत्वा **सदागमा**चार्यादन्येद्युर्देशनाऽमृतम् । एतौ भवदवाऽऽ[१]तङ्कजातं तत्यजतुः क्षणात् ॥४॥
अथ संवेग-वैराग्य[1]धुरीणं गुरुसारथिम् । प्राप्य [२]व्रतरथं जेतुमेतौ मोहं [३]विचेरतुः ॥५॥
क्रमादभूतां गीतार्थौ समग्राऽऽगमपारगौ । [४]**सुकुमार्य**पि सम्बुद्ध्याऽऽदित दीक्षां तदन्तिके ॥६॥
स्मरे दग्धे [2]भवाद्भीरुर्वैराग्येण रतिः स्वयम् । तपोऽनुतप्यते बाला सा लोकैरित्यतर्क्यत ॥७॥
कामुकास्तामुपद्रोतुं प्रचरन्ति बहि[५]र्बहु । इत्यमूं स्थापयामासोपाश्रयान्तः प्रवर्त्तिनी ॥८॥
विशन्ति ते वसत्यन्तर्यदा लुब्धान्तराः शठाः । तदा **रुद्रमती** सूरेरित्याऽऽचख्यौ प्रवर्त्तिनी ॥९॥
सूरेरथ समादेशात्तौ द्वौ **शासक-भ्रासकौ** । सहस्रयोधिनौ तासामभूतां द्वाररक्षकौ ॥१०॥
तद्रक्षणाऽक्षणिकयोस्तयोरावश्यकादिषु । प्रत्यूहोऽतिमहानासीत्कथा सूत्रार्थयोस्तु का ॥११॥
हा धिग् ममाऽधिकं रूपमाधिसाधनमेधते । साध्वीनामिव मे भ्रात्रोस्तपःप्रत्यूहकारणम् ॥१२॥
विमृश्येति भृशं साऽथ नृशंसाऽभून्निजेऽङ्गके । आजहार च नाहारमपि सा कर्हिचित्ततः ॥१३॥
तस्या दीप इवाऽस्नेहो देहोऽथाऽऽहारवर्जितः । क्रमेण क्षीणवान् [3]वानवारिकेदारपद्मवत् ॥१४॥

---

१. तंकजानं तत्यजतुः P तंकजानं...K । २. दीक्षारथं – P । ३. विरेचतुः, P, KH । ४. तयोः स्वसापि – A, D, C, B, K, KH, H, L । ५. र्मुहुः – A र्बुहुः B, र्मुखं – KH, र्बहुः – K, र्बुहः – H ।

टि. 1. धुरं वहति इति धुरीणः वृषभादिः तम् , संवेगवैराग्यौ एव धुरीणौ इत्यर्थः । 2. भवः–महादेवः, तस्माद्भीरुः । 3. वानं – वनसम्बन्धि ।

छादिते चेतनाचिह्ने मूर्छया प्राणनामनि । स्पन्दे मन्देऽप्यलक्षे च लिङ्गेऽतर्क्यत सा मृता ॥१५॥

असत्तर्केण निर्णीय सा परिष्ठापिता बहिः । **नियम्यते मतिः केन नियतेरनुसारिणी** ॥१६॥

तदाम्बुप्लवसंसिक्तैः[1] संसिक्ता समिरोर्मिभिः[2] । प्रत्याससाद चैतन्यं विषसाद च सैकिका ॥१७॥

आसन्नावासिसार्थेशनरैः कैश्चिद्विलोक्य सा । अहो सौन्दर्यमित्येषा सार्थेशाय समर्प्पिता ॥१८॥

अभ्यङ्गमज्जनालेपनेपथ्यैः पथ्यभोजनैः । सा तेन नवतां नीता को निजो गुणिनां न वा ॥१९॥

देहाऽनुरागजस्नेहात् तेनेहाऽत्युपकारिणा । स्वयं कदाचिदाभाषि सार्थवाहेन सुन्दरी ॥२०॥

सम्भोगै रहिता सुभ्रु ! नेयं ते शोभते तनुः । गुणज्ञैरपरामृष्टा सुकवेरिव भारती ॥२१॥

सुखेषु यदि वैमुख्यं[3] सम्भोगे यदि नादरः । अद्वितीयमिदं धात्रा तत् किमर्थं कृतं वपुः ॥२२॥

त्वां वीक्ष्य मम लोलाक्षि ! रोचते न वधूजनः । भृङ्गः कल्पलतां प्राप्य वल्लीषु रमतां[4] कथम् ॥२३॥

इत्युक्तया तयाऽचिन्ति पुंसां पौरुषरोधिनी । अहो जगत्त्रयीजिष्णुर्दैवशक्तिर्गरीयसी ॥२४॥

विपदः सर्वगामिन्यो दुर्ल्लङ्घ्या भवितव्यता । **कष्टं दुष्टासु चेष्टासु विधिरस्खलितादरः** ॥२५॥

अस्योपकारिणः कामस्तन्मया पूर्यतामयम् । तुष्यत्वेतावता सैष सर्वथा दुर्जनो विधिः ॥२६॥

ध्यात्वेति प्रणयं तस्य भूत्वा प्रणयिनी स्वयम् । चिरं सफलयामास[5] वासनां चापि वेधसः ॥२७॥

कियताऽप्यथ कालेन **शासक-भ्रासकौ** मुनी । जग्मतुस्तत्र यत्राऽऽसीन्निवेशे सोऽपि सापि च ॥२८॥

अज्ञाततदुदन्तौ च तौ तदालयमीयतुः । रुदती सुदती सापि न्यपतत्तत्पदोरथ ॥२९॥

वृत्तान्तहेतुर्वृत्तान्तस्तया सर्वो निजस्तयोः । स यथावदथाऽऽवेदि निर्वेदस्य रसायनम् ॥३०॥

अथ सार्थेशतस्तस्मात् ताभ्यां सम्बोध्य[6] मोचिता । विशुद्धे हृदयक्षेत्रेऽरोपयत् व्रतपादपम् ॥३१॥

यथावत् प्रतिपाल्याऽथ संयमं **सुकुमारिका** । उत्तमां तपसा प्रापदमर्त्त्यपदसम्पदम् ॥३२॥

**इति सुकुमारिकाकथानकम् ॥**

एवं नाम विशुद्धवासनायाः **सुकुमारिका**या अपि आत्मन एव दुर्दान्ततया व्रतभङ्गः संवृत्त इत्येतदेवाह—

**खर-करह-तुरग-वसभा, मत्तगइंदा वि नाम दम्मंति ।**
**एक्को नवरि न दम्मइ, निरंकुसो अप्पणो अप्पा ॥१८३॥**

**खर-करभ-तुरग-वृषभा-मत्तगजेन्द्रा अपि नाम दम्यन्ते** नैतद् दुष्करम् । **एको नवरं** न केवलं **न दम्यते निरङ्कुशो** निर्मर्यादाङ्कुशभ्रष्ट **आत्मन** एव सम्बन्धी **आत्मा** जीव इति ॥१८३॥

येऽपि च खरादयो जनेन दम्यन्ते, तेषामपि तत्प्राग्भवीयदुर्दान्ततताफलमेवैतदिति विभाव्य आत्मानमेवं प्रबोधयेदित्याह—

**वरं मे अप्पा दंतो, संजमेण तवेण य ।**
**माहं परेहि दम्मंतो, बंधणेहिं वहेहि य ॥१८४॥**

---

१. दाम्बु – KH, D, B, C, L, H । दांबु A । २. समरो...P, A, KH सानरो – H । ३. वैराग्यं – P । ४. रमते – P । ५. च लालयामास वशे किं वा न वेधसः – P । ६. संसोच्य – P ।

**वरं मया आत्मा दमितः संयमेन तपसा च** [1]**माहं वर**मित्यत्राऽपि सम्बध्यते, **परैः** पश्चादकृतपुण्यकर्मा कुयोनिगतः सन् **दम्यमानो बन्धनै**र्निगडादिभि**र्वधैश्च** लगुडघातादिभिरिति ॥१८४॥

किञ्च–

**अप्पा चेव दमेयव्वो, अप्पा हु खलु दुद्दमो ।**
**अप्पा दंतो सुही होइ, अस्सिं लोए परत्थ य ॥१८५॥**

**आत्मैव दमयितव्यो** यतः **आत्मा हु** निश्चयेन **दुर्दमो** नान्य इत्यर्थः, **आत्मा दमितः सुखी भवति । अस्मिन् लोके परत्र च** इति ॥१८५॥

अदान्तस्त्वयमात्मा आत्मन एव महतेऽनर्थायेत्याह–

**निच्चं दोससहगओ, जीवो अविरहियमसुहपरिणामो ।**
**नवरं दिन्ने पसरे, तो देइ पमायमयरेसु ॥१८६॥**

अदान्तो ह्ययं **नित्यं दोषसहगतो** रागद्वेषादिसहचरितो **जीव** आत्मा, **अविरहितं** निरन्तरम् **अशुभ-परिणामः** सङ्क्लिष्टाऽध्यवसायो **नवरं** न केवलं भवतीत्यध्याहारः । अन्यत् किं करोतीत्याह–यथेष्टचेष्टायां **दत्ते** वितीर्णे **प्रसरे ततः** प्रसरलाभाद् **ददाति,** अनेकार्थत्वाद्धातूनां करोति **प्रमादं** विषयकषायप्रवृत्तिलक्षणम् **अतरेषु** अशक्यनिस्तारेषु लोकागमविरुद्धेषु कर्त्तव्येष्विति शेष इति ॥१८६॥

किञ्च अनात्मनीनोऽयमैहिकस्वार्थभ्रंशमपि नात्मनो वेत्तीत्याह–

**अच्चिय-वंदिय-पूइय-सक्कारिय पणमिओ-महग्घविओ ।**
[2]**तह तं करेइ जीवो, पाडेइ जहप्पणो ठाणं ॥१८७॥**

**अर्चित**श्चन्दनघनसारादिभिर्देवतावत् । **वन्दितः** सद्गुणोत्कीर्त्तनेन स्तुतो द्वादशावर्त्तवन्दनेन वा अभिवादितः । **पूजितो** वस्त्रादिप्रतिलाभनया । **सत्कारितो**ऽभ्युत्थानादिप्रतिपत्त्या । **प्रणमितः** प्रतिपदं मूर्ध्नि अञ्जलिनिवेशेन, तेषां कर्मधारयः । तथा **महार्घितः** आचार्यपदस्थापनादिभिर्महान्तमर्घं प्रापितस्तद्गुण-पक्षपातिभिर्गुरुजनविनेयोपासकादिभिरिति गम्यते । स तु विषयकषायमूढतया **तथा तत्** किमपि दुश्चेष्टितं **करोति जीवः पातयति यथा आत्मनः** सम्बन्धि **स्थानम**र्चादिनिबन्धनमिति ॥१८७॥

पतितश्च तदयोग्यो विवेकिनां दयास्पदं भवतीत्याह–

**सीलव्वयाइं जो बहुफलाइं हंतूण सोक्खमभिलसइ ।**
**धिइदुब्बलो तवस्सी, कोडीए कागिणीं किणइ ॥१८८॥**

**शीलं** मूलोत्तरगुणसमाधानं **व्रतानि** अहिंसादीनि, पृथग्ग्रहणं प्राधान्यख्यापनार्थं, तानि **यो** मन्दो **बहुफलानि** स्वर्गापवर्गदायकानि **हत्वा** विलोप्य **सौख्य**मर्वाचीनं तुच्छं वैषयिक**मभिलषति,** स **धृतिदुर्बलो** विशिष्टचेतःप्रणिधानविकल**स्तपस्वी** महतां करुणास्पदीभूतो वराकः । **कोट्या** सहस्रायुतप्रमितया **काकिणीं** षोडशशतीकपर्दकप्रमाणरूपस्य रूपस्याऽशीतितमभागरूपां **क्रीणाति** गृह्णातीति ॥१८८॥

---

१. नाहं – P । २. तं तह – KH, L, H ।

न चाऽयमात्मा वैषयिकैः सुखैर्निरभिलाषः कर्तुं शक्यते । तथाहि—

**''कथं तोषयितुं शक्य आत्मा वैषयिकैः सुखैः ।**
**भोगाऽभ्यासेन वर्द्धन्ते रागाः सेन्द्रियवृत्तयः''** ॥१॥ तथा चाह—

**जीवो जहामणसियं, हियइच्छियपत्थिएहिं सोक्खेहिं ।**
**तोसेऊण न तीरइ, जावज्जीवेण सव्वेण ॥१८९॥**

**जीवो यथामनीषितं हृदयेष्टप्रार्थितै**र्मनोदयितदयितादिसम्पादितैः **सौख्यैस्तोषयितुं** घ्रातोऽहमिति हृष्टः कर्तुं **न तीर्यते** तोषकर्म समापयितुं शक्यते । **यावज्जीवेण सर्वेण** यावच्छब्दोपादानात् प्राग्दिनादीनां गम्यत्वादासतां दिन-मास-संवत्सरादयः समस्तपुरुषायुषेणाऽपि सर्वेण त्रैलोक्यवर्त्तिना विषयजातेनेति । यत्र उच्यते—

**''धान्यानि पशवः पृथ्वी स्त्रियो रत्नानि काञ्चनम् ।**
**नैकस्यालमिदं तृप्त्यै विदित्वेति तपश्चरेत्'** ॥१॥ [ ] १८९॥

कुत एतदुच्यते । यतोऽविवेकादयं न चिन्तयतीत्याह—

**सुमिणंतराणुभूयं, सोक्खं समइच्छियं जहा नत्थि ।**
**एवमिमं पि अईयं, सोक्खं सुविणोवमं होइ ॥१९०॥**

**स्वप्नस्यान्तरा** मध्येऽनुभूतं **सौख्यं, समयेप्सितं** स्वप्नसमयादन्यस्मिन् समये वाञ्छितं सत्, **यथा नास्ति एवमिदमपि** जाग्रदवस्थाऽनुभूयमानमपि **अतीतं** वर्त्तमानकालादन्यस्मिन् समये नास्तीति साधर्म्येण तुच्छत्वादसत्त्वाच्च अलीकमेवेत्यतो नाऽत्राऽऽस्था कार्या ।

यतः- **''अनागतमतीतं च नार्थकारीत्यवस्तु सत् ।**
**क्षणिकस्य सुखस्याऽऽशां मोक्तुमीष्टे न धिक् कुधीः''** ॥१॥

**''स्वप्ने यथाऽयं पुरुषः प्रयाति, ददाति गृह्णाति करोति वक्ति ।**
**निद्राक्षये तच्च न किञ्चिदस्ति सर्वं तथेदं हि विचार्यमाणम्''** ॥१॥ [ उपजातिवृत्तम् ] १९०॥

यस्तु सौख्ये आस्थां विदध्यात्तद्दोषदर्शनार्थमाह—

**पुरनिद्धमणे जक्खो, महुरामंगू तहेव सुयनिहसो ।**
**बोहेइ सुविहियजणं, विसूरइ बहुं च हियएणं ॥१९१॥**

सुखावबोधार्थं तत्र पूर्वं कथा । तथाहि—

### [ मथुरामङ्गुकथानकम् ॥ ]

पुरी पुराणां जयिनी पुराणख्यातिप्रधाना **मथुरा**भिधाऽऽसीत् ।
या कैशवानामिह शैशवानामाधारमैत्रीमधुरा व्यराजत् ॥१॥
न्यासैः पदानां सुगृहीतनामा ता**मार्यमङ्गु**[१]र्विदधे पवित्राम् ।
श्रुतस्य शान्तेस्तपसां निधानं युगप्रधानं हि तदा तमाहुः ॥२॥
विहाय कार्यान्तरमन्तरायमन्याननादृत्य मुनीनशेषान् ।
भक्त्या वशीभूत इवा[२]ऽतिभूरिः सूरिं सिषेवेऽत्र जनस्तमेव ॥३॥

१. तु तदा - P । २. वारिभूरिः - C ।

न वन्दक-प्रच्छक-पाठकेभ्यः प्रपारयामोऽक्षणिकाः सदैव ।
इत्यार्यमङ्गौ वदति प्रदर्प्याज्जयादिशेत्येव [१]जना जगुस्ते ॥४॥
निष्ठागरिष्ठश्च तपोनिधिश्च चारित्रवांश्चेति जनैः स्तुवानैः ।
मुनिः स [1]मानाख्यमहाक्षितिध्रपोत्तुङ्गशृङ्गोपरि रोप्यते स्म ॥५॥
वर्द्धिष्णु [2]ऋद्ध्युत्तरगौरवाख्यं शृङ्गान्तरं तत्र चरन्नवाप्य ।
अहो अहं पूजितपूजितांह्रिरित्येष मेने त्रिजगत् तृणाय ॥६॥
संसारनिस्तारकताविमर्शात्तं सम्प्रदानं परिकल्प्य लोकाः ।
ददुर्यदुत्कृष्टरसं तदेव बभूव पुष्ट्यै रसगौरवस्य ॥७॥
लोकस्य भक्त्या [२]परिपोषिताभ्यां ऋद्धे रसस्याऽपि च गौरवाभ्याम् ।
[३]समेधितः प्राप समृद्धिमुच्चैः सातस्य तद् गौरवमार्य[४]मङ्गुः ॥८॥
विहारमभ्युद्यतमेष मुक्त्वा जनस्य मानादवशोऽवसन्नः ।
हा गौरवाणां त्रितयेन तेन वशीकृतोऽसेवत नित्यवासम् ॥९॥
उपासकानां प्रतिबन्धरागादागामिनीं हानिमचिन्तयित्वा ।
चकार बाढं ममकारमारात्क्षेत्रे कुले चैष भवादभीरुः ॥१०॥
आत्मस्तुतिं श्राद्धकृतामथाऽन्यनिन्दाविमिश्रामनुमोदमानः ।
मिथ्याभिमानाभिनिविष्टबुद्धिर्मिथ्यात्वमूरीकृतवानहंयुः ॥११॥
अर्थानिवेच्छुर्विपरीतनीतिः कामी परस्त्रीष्विव बद्धरागः ।
धर्माध्वपङ्गुर्गुरुरार्यमङ्गुर्मूलक्षतिं प्राप विशेषलिप्सुः ॥१२॥
सद्दर्शनालोकलसद्विशेषं श्रुतं तपः संयम इत्यशेषम् ।
सदप्यसद्भूतमहो चकार हहा महामोहमहान्धकारः ॥१३॥
तत्रैव कालं स विधाय भूत्वा वप्रप्रणालायतनान्तवासी ।
यक्षो विभङ्गात् तदिदं विदित्वाऽनुतापमापद्विरतावशक्तः ॥१४॥
तत्प्राप्तकालं च तदा विचिन्त्य तपोधनानां स बहिर्गतानाम् ।
द्राघीयसीं स्वां रसनां विकृष्य संदर्शयामास भयाय तेषाम् ॥१५॥
दृष्ट्वा तथा तस्य तपोधनास्ते धैर्यं समालम्ब्य तमभ्युपेत्य ।
पप्रच्छुरुच्चैः कतमोऽसि किं वा बिभीषिकां नित्यमिमां करोषि ॥१६॥
यक्षो विषादाऽभिनयादुवाच वाचं स वाचंयमबोधयित्रीम् ।
मन्यध्वमात्मीयगुरुं तमेव मां [3]मङ्गुनामानममानमानम् ॥१७॥

---

१. जगत्प्रशस्ति – KH । २. परितोषि – B, A । ३. समेधितं – B, A । ४. मङ्गौ – A, C ।

टि. 1. मान एव महाक्षितिध्रपः महागिरिः तस्य शृङ्गोपरि इत्यर्थः । 2. ऋद्धिगारवाख्यम् । 3. मङ्गुनामानम् अमानः अपरिमितः मानः यस्य अमानमानः तम् ।

या गौरवेषु प्रतिबद्धबुद्धेरासीद् वसत्यादिषु गृद्धिवृद्धिः ।
तस्याः फलं पश्यत लम्भितोऽस्मि दैवादहं **दुर्गतयक्षभूयम्** ॥१८॥
सुदुर्लभं जन्मशतेषु लब्ध्वा श्रामण्यमन्यत्र मनो न कार्यम् ।
स्नेहेन युष्मानिति शिक्षयामि न चाऽधुनाऽहं तु विधातुमीशः ॥१९॥
इत्थं मुनीनां प्रतिबोधदाता स्वयं विधाता परिदेवितानाम् ।
निदर्शनीभूय स कस्य चित्ते चारित्र एव स्थिरतां न धत्ते ॥२०॥ [उपजातिवृत्तविंशकम्]

**इति मथुरामङ्गुकथानकम् ॥**

अधुनाऽक्षरार्थः—**पुरनिर्द्धमने** नगरप्रणाले **यक्षः** सम्पन्न इति शेषः । मथुरायां मङ्गुर्**मथुरामङ्गुस्तथैव** यथा श्रूयते **श्रुतनिकषः** सिद्धान्तकषपट्टको बहुश्रुतत्वादागमपरीक्षास्थानमित्यर्थः स पश्चात् **बोधयति** प्राकृतशैल्या वर्त्तमाननिर्देशात् बोधितवान् **सुविहितजनं विसूरइ हृदयेनेति** खिद्यते स्म **बहु** प्रभूतं **च**ः समुच्चये हृदयेन चित्तेनेति ॥१९१॥ स यत् तदाऽचिन्तयत् तदाह—

**निग्गंतूण घराओ, न कओ धम्मो मए जिणक्खाओ ।**
**इड्ढि-रस-साय-गरुयत्तणेण ण य चेइओ अप्पा ॥१९२॥**

**निर्गत्य गृहात्** प्रव्रज्येत्यर्थः । **न कृतो धर्मो मया जिनाख्यातः** । **ऋद्धि-रस-सात-गुरुकत्वेन** हेतुना । **ऋद्धिः** शिष्यादिसम्पत्, **रसा** मधुरादयः, **सातं** मृदुशय्यादिसम्पाद्यं सुखम्, तेषु **गुरुक** आदरवान्, तद्भावेन मोहोपहततया **न च** नैव **चेतितो** विज्ञात **आत्मेति** ॥१९२॥ तथा—

**ओसन्नविहारेणं, हा जह झीणम्मि आउए सव्वे ।**
**किं काहामि अहन्नो ?, संपइ सोयामि अप्पाणं ॥१९३॥**

**अवसन्नविहारेण** शिथिलाचारकालनिर्गमनेन, **हा** इति दैन्ये, **यथाहं** स्थितः, तथैव **क्षीणे आयुषि सर्वस्मिन् किं करिष्ये अधन्यः सम्प्रति शोचामि आत्मानं** केवलमिति ॥१९३॥ कथम् ? —

**हा ! जीव ! पाव भमिहिसि, जाई-जोणीसयाइं बहुआइं ।**
**भवसयसहस्सदुलहं पि, जिणमयं एरिसं लद्धुं ॥१९४॥**

**हा जीव ! पाप !** दुरात्मन् ! **भ्रमिष्यसि** पर्यटिष्यसि, **जातयः** एकेन्द्रियाद्याः[1], **योनयो** शीतेतराद्यास्तासां **शतानि बहूनि भवशतसहस्रदुर्लभं** जन्मलक्षदुष्प्रापम् **अपिः** सम्भावनायां, **जिनमतम्** अर्हत्प्रवचनम् **ईदृशम्** अचिन्त्यचिन्तामणिकल्पं **लब्ध्वा** आसाद्य तदनुष्ठानप्रमादितयेति ॥१९४॥

किञ्च—

**पावो पमायवसओ, जीवो संसारकज्जमुज्जुत्तो ।**
**दुक्खेहिं न निव्विण्णो, सोक्खेहिं न चेव परितुट्ठो ॥१९५॥**

**पाप** आत्मन्यपि हितानुध्यानवन्ध्यतया दुरात्मा **प्रमादवशगः** कषायाद्यधीनो, **जीवः संसार-**

---

१. मनुष्याद्याः - B, A, H ।

**कार्योद्युक्तो** मकारस्यार्षत्वात्, **दुःखैर्न निर्विण्णः** आभीक्ष्ण्येन तद्धेतुष्वेव प्रवृत्तेः । **सौख्यैर्न चैव परितुष्ट**स्तत्प्राप्तावपि तत्तर्षोत्कर्षाऽपरिहानात् **च**शब्दान्महानन्दसुखविमुखश्चेति ॥१९५॥

न चैवमनुशयशतैरपि सम्पूर्णं परित्राणं भवतीति सोदाहरणमाह—

**परितप्पिएण तणुओ, साहारो जइ घणं न उज्जमइ ।**
**सेणियराया तं तह, परितप्पंतो गओ नरयं ॥१९६॥**

**परितप्तेन** निन्दागर्हागर्भचित्तपश्चात्तापेन, **तनुको**ऽल्प एव, **साधारः** परित्राणम् । **यदि घनं** गाढमप्रमत्ततया तपःसंयमयोर्**नोद्यच्छति** । अत्र दृष्टान्तमाह – **श्रेणि**[1]**कराजस्तत्तथा**त्मगर्हादिप्रकारेण **परितप्यमानोऽपि गतः** सीमन्तकाख्यं **नरकमिति** । तत्कथानकं च निवेदितचरम् ॥१९६॥

यथा चाऽयं जीवो दुःखेन निर्विण्णस्तथा व्यक्ततरमाह—

**जीवेण जाणि उ विसज्जियाणि, जाईसएसु देहाणि ।**
**थेवेहिं तओ सयलं पि, तिहुयणं होज्ज पडिहत्थं ॥१९७॥**

**जीवेन यानि तु विसृष्टानि** त्यक्तानि तुशब्दाद्यानि त्यक्ष्यन्ते तानि दूरे सन्तु, **देहानि** शरीराणि **स्तोकैस्ततः** स्वल्पैस्तेभ्योऽनन्तभागवर्त्तिभिः । **सकलमपि त्रिभुवनं भवेत् पडिहत्थं** ति परिपूर्णं तथाऽपि नाऽस्य निर्वेद इति ॥१९७॥ तथा—

**नह-दंत-मंस-केस-ऽट्ठिएसु जीवेण विप्पमुक्केसु ।**
**तेसु वि हवेज्ज कइलास-मेरुगिरिसन्निभा कूडा ॥१९८॥**

**नख-दन्त-मांस-केशास्थिष्**विति [2]सप्तम्यास्तृतीयार्थत्वात् नख-दन्त-मांस केशास्थिभिर्जीवेन **विप्रमुक्तै**रनादिकतिचिज्जन्मसम्बन्धिभिः, पिण्डितैर्न सर्वैरित्यपिशब्दार्थः । **तैरपि भवेयुः कैलासमेरुगिरिसन्निभाः कूटा** महापर्वतप्रायाः स्तूपा इति ॥१९८॥ किञ्च—

**हिमवंत-मलय-मंदर-दीवोदहि-धरणिसरिसरासीओ ।**
**अहिअयरो आहारो, छुहिएणाहारिओ होज्जा ॥१९९॥**

**हिमवन्मलयगिरिमन्दराः** पर्वताः, **द्वीपा** जम्बूद्वीपादयः, **उदधयो** लवणोदादयः, **धरण्यो** घर्म्माद्यास्तैः, **सदृशेभ्यो राशिभ्योऽधिकतर आहारो**ऽशनादिः **क्षुधितेनाऽऽहारितो भवे**दिति ॥१९९॥ अन्यच्च—

**जं णेण जलं पीयं, घम्मायवजगडिएण तं पि इहं ।**
**सव्वेसु वि अगड-तलाय-नइ-समुद्देसु न वि होज्जा ॥२००॥**

**यदनेन** जीवेन **जलं पीतं घर्माऽऽतपकदर्थितेन** ग्रीष्माऽऽतपाऽभिभूतेन, **तदपि इह** जलमप्यत्र **सर्वेष्वपि अवटतटाकनदीसमुद्रेषु नापि** नैव **भवे**दिति ॥२००॥ अपि च—

**पीयं थणयच्छीरं, सागरसलिलाओ होज्ज बहुययरं ।**
**संसारम्मि अणंते, माऊणं अन्नमन्नाणं ॥२०१॥**

---

१. दितत्तरं – B, दितमत्र – H दितवरं – A । २. पंडितैर्न – A, B, L ।

**पीतं,** स्तना एव **स्तनकास्तेषां क्षीरं** स्तन्यं, **सागराणां सलिलात्** पाथोनाथपाथसो **भवेद्बहुतरम्** । हेतुमाह-**संसारे अनन्ते**ऽविद्यमानप्रा[1]गभावभाविनि अनादौ, **मातॄणां** सवितॄणाम् **अ[1]न्यासां** पृथक्पृथक्जन्मभाविनीनामिति ॥२०१॥

एवं विस्तरमुक्त्वा परमार्थमाह—

**पत्ता य कामभोगा, कालमणंतं इहं सउवभोगा ।**
**अपुव्वं पिव मन्नइ, तह वि य जीवो मणे सोक्खं ॥२०२॥**

**प्राप्ताश्च कामभोगाः** शब्दादयः, **कालमनन्तं** देवादिभवेष्वभिव्याप्य । **इह** त्रैलोक्ये तेऽपि पारतन्त्र्य-कार्पण्यादिभिरनुपभोग्याः स्युरित्याह-सह उपभोगेनेति **सोपभोगाः, अपूर्वमिव मन्यते** आकलयति **तथापि च जीवो मनसि सौख्यं** वैषयिकमिति ॥२०२॥ अपरं च—

**जाणइ य जहा भोगिड्ढिसंपया सव्वमेव धम्मफलं ।**
**तहवि दढमूढहियओ, पावे कम्मे जणो रमइ ॥२०३॥**

**जानाति** विशेषशेमुषीसांमुख्येन **च**शब्दान्निर्विकल्पकेन, सामान्योपयोगरूपेण पश्यति च । **यथा भोगऋद्धिसम्पदो** विषयलक्ष्मीप्राप्तयः यदि वा किमपि यन्मात्रेण सुकुलोत्पत्ति-सुगुरुसम्पर्कादि **सर्वमेव धर्मफलं** पुण्यं विमुच्य नान्यत्तल्लाभकारणमिति । **तथापि दृढमूढहृदयो** गाढविपर्यस्तचित्तः सन् **पापे कर्मणि जनो रमते** न पुनर्द्धर्मं सेवते । उक्तं चाऽत्र—

**"यः सततमिष्टकारिणि सुकृतेऽपि हि भवति विगलितस्नेहः ।**
**अकृतज्ञदुर्जनानामवधारय धुरि तमेवैकम्"** ॥१॥ [ ] ॥२०३॥ अन्यच्चाश्चर्यम्—

**जाणिज्जइ चिंतिज्जइ, जम्मजरामरणसंभवं दुक्खं ।**
**न य विसएसु विरज्जइ, अहो सुबद्धो कवडगंठी ॥२०४॥**

**ज्ञायते** गुरूपदेशादिना **चिन्त्यते** पुनः पुनर्मनसि स्थाप्यते—यदुत सोप[2]स्कारत्वाद्विषयसङ्गहेतुकमिदं **जन्म-जरा-मरणसम्भवं दुःखम्** । **न च** नैव **विषयेषु विरज्यते** विषयगोचरविरागभूयिष्ठैर्भूयते जन्तुभिरिति शेषः । **अहो** इति आश्चर्ये **सुबद्धो** दुर्म्मोचकत्वात् सुनियन्त्रितः । **कपटग्रन्थि**र्मोहजालालीकबन्धनम् । तथा च सुष्ठूक्तम्—

**"विचिन्त्य बाधाः प्रभवन्ति यत्र, न तत्र मिथ्यामतयश्चरन्ति ।**
**संसारमोहस्त्वयमन्य एव, दिग्मोहवत् तत्त्वधिया सहाऽऽस्ते"** ॥१॥ [ ] [ उपजातिवृत्तम् ] ॥२०४॥

किञ्च - यतो मरणाद्बिभेति ततोऽपि नोद्विजते इत्याह—

**जाणइ य जह मरिज्जइ, अमरंतं पि हु जरा विणासेइ ।**
**न य उव्विग्गो लोओ, अहो रहस्सं सुनिम्मायं ॥२०५॥**

**जानात्येव यथा म्रियते अम्रियमाणमपि च जरा** वयोहानि**र्विनाशयति** वलीपलिताङ्गभङ्गादिना

---

१. प्राग् भावभाविनि - B । २. निराग - KH ।

विसंस्थुलयति । **न च** नैव **उद्विग्नो लोको** [१]भवभयाऽभावात् । **अहो** इति विवेकिनामामन्त्रणे-यूयं पश्यत **रहस्यं** गुह्यं **सुनिर्मितं** दुरवबोधत्वात् सुदुर्भेदमिति ॥२०५॥

तथाहि—

**दुपयं चउप्पयं बहुपयं च अपयं समिद्धमहणं वा ।**
**अणवकए वि कयंतो, हरइ हयासो अपरितंतो ॥२०६॥**

**द्विपदं** नरादि **चतुष्पदं** गवादि **बहुपदं** भ्रमरादि **अपदं** सर्प्पादि **समृद्धमीश्वरम् अधनं** दरिद्रं । **च**शब्दात् पण्डित-मूर्ख-सुजन-दुर्जनादिकम् । **अनपकृतेऽपि** अपराधाऽभावेऽपि । **कृतान्तः** कृतस्य एकभवप्रायोग्यस्य कर्मणोऽन्तोऽवसानरूपः कालो **हरति** प्राणेभ्यश्च्यावयति । **हताश** इत्याक्रोशवाक्यम् **अपरितन्तो** विगतखेद इति ॥२०६॥ अन्यच्च—

**न य नज्जइ सो दियहो, मरियव्वं चाऽवसेण सव्वेण ।**
**आसापासपरुद्धो, न करेइ य जं हियं वज्झो ॥२०७॥**

**नैव ज्ञायते स दिवसो** यत्र मरिष्यत इति गम्यम् । अथ **च मर्त्तव्यमेवावशेना**ऽस्वतन्त्रेण, **सर्वेण** प्राणिना । एवंस्थितेऽपि **आशापाशप्ररुद्धो** मनोरथवागुरापराधीनो **न करोत्येव यत्** अनुष्ठानं **हितं वध्य** इव वध्यः कृतान्तमुखकुहरमध्यवर्त्ती । यदाह—

**"[1]आघातं नीयमानस्य वध्यस्येव पदे पदे ।**
**आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने" ॥ [ ]** इति ॥२०७॥

तथा चाह—

**संझरागजलबुब्बुओवमे, जीविए य जलबिंदुचंचले ।**
**जुव्वणे य नइवेगसन्निभे, पावजीव ! किमियं न बुज्झसे ॥२०८॥**

**सन्ध्यारागेण जलबुद्बुदेन** च क्षणिकरमणीयताभाजनत्वेन **उपमा** यस्य तस्मिन्नेवंविधे **जीविते**, **च**स्य [२]सम्बन्धव्यवधानात् । **जलबिन्दुचञ्चले च** नलिनीदलाग्रादिगतपयोलवचलाचले **यौवने** तारुण्ये । **च**स्याऽनुक्तसमुच्चयार्थत्वाद् द्रव्यनिचयादौ **च नदीवेगसन्निभे** वाहिनीवेगपूरोपमे सति पश्यन्नप्येवं हे **पाप-जीव** ! दुरात्मन् ! **किमिदं न बुध्यसे** इति ॥२०८॥ अबोधमेव फलतः प्रकटयति—

**जं जं नज्जइ असुइं, लज्जिज्जइ कुच्छणिज्जमेयं ति ।**
**तं तं मग्गइ अंगं, नवरि अणंगोत्थ पडिकूलो ॥२०९॥**

**यद् यद**िति वीप्सा सर्वसङ्ग्रहार्था । **ज्ञायते** बालैरपि । **अशुची**ति अपवित्रं [३]**लज्यते** च **कुत्सनीय-मेतदिति** कृत्वा **तत्तन्मार्गयति** याचते, **अङ्गम्** अङ्गनाद्यवाच्यावयवरूपं **नवरं** केवलम् **अनङ्गोऽत्र** मदनोऽस्मिन् लोके **प्रतिकूलो** गाढविपर्यासरूपत्वात् प्रतिलोमः, प्राधान्यविवक्षयाऽत्र तस्य कर्तृत्वनिर्देश इति । तच्चोक्तम्—

**"यल्लज्जनीयम[४]तिगोप्यमदर्शनीयं, बीभत्समुल्बणमलाविलपूतिगन्धि ।**
**तद्याचतेऽङ्गमिह कामकृमिस्तदेवं; किं वा दुनोति न मनोभववामतैषा" ॥ [ ]** ॥२०९॥

१. भवति भया.... - C । २. शब्दव्य... C । ३. लक्ष्यते - KH, B लज्जते - D । ४. मिति - C । टि. 1. आघातः वधस्थानम् ।

एतदेवाह—

**सव्वगहाणं पभवो, महागहो सव्वदोसपायट्टी ।**
**कामग्गहो दुरप्पा, जेणऽभिभूयं जगं सव्वं ॥२१०॥**

**सर्वेषां ग्रहाणां** सर्वोन्मादानां **प्रभव** उत्पत्तिस्थानं **महाग्रहो** गरीयानुन्मादः । **सर्वदोषाणां** व्रतलोप-परदारापकर्षणादीनां [1]प्रष्ठतया **प्रकर्षकः** प्रवर्त्तकः । कोऽसौ ? **कामग्रहो** मदनोन्मादो, **दुरात्मा** दुष्टस्वभावो **येनाऽभिभूतमा**त्मीकृतं **जगत्सर्व**मिति ॥२१०॥

अभिमानमात्रमयं कामो, न परमार्थतः सुखहेतुरित्याह—

**जो सेवइ किं लहइ ?, थामं हारेइ दुब्बलो होइ ।**
**पावेइ वेमणस्सं, दुक्खाणि य अत्तदोसेणं ॥२११॥**

**यः सेवते** कामं, स **किं लभते** तृप्त्यादिकम् ? न किञ्चिदित्यर्थः । केवलं **स्थाम** बलं **हारयति** । तत एव **दुर्बलो भवति । प्राप्नोति** च **वैमनस्यं** मानसोद्वेगं [2]दयिततमानवाप्ति-विप्रलम्भादिप्रभवं **दुःखानि च** क्षयव्याधिप्रमुखानि **आत्मदोषेण** स्वापराधेन कामप्रसराऽनिवारणलक्षणेनेति ॥२११॥

कामजं सुखमपि तत्त्वतो दुःखमेवेत्याह—

**जह कच्छुल्लो कच्छुं, कंडुयमाणो दुहं मुणइ सुक्खं ।**
**मोहाउरा मणुस्सा, तह कामदुहं सुहं बेंति ॥२१२॥**

**यथा कच्छूरः** पामनः **कच्छूं** पामां **कण्डूयमानो** न[5]खादिभिरुल्लिखन् उपतापरूपं **दुःखमेव मनुते सौख्यम्** [3]दृष्टान्तमुक्त्वा [4]दार्ष्टान्तिकमाह—**मोहातुरा** मदनविपर्यासविह्वलाः **मनुष्यास्तथा कामदुःखं सुखं ब्रुवते** संतोषात् परस्मै कथयन्ति इति ॥२१२॥

तेषां च विपाकमाह—

**विसयविसं हालहलं, विसयविसं उक्कडं पियंताणं ।**
**विसयविसाइण्णं पिव, विसयविसविसूइया होइ ॥२१३॥**

**विषया** एव प्राणान्तहेतुत्वाद् **विषं हालाहलं** सदा नूतनमिवाऽतीवतीव्रतया सद्योघातित्वादवकाशनिरासतोऽप्रतीकार्यम् । तदपि तादात्विकसुखास्वादसादराणां दुर्मतीनां किंपाकफलवदापातमधुरतयाऽप्युपादेयं स्यादिति निराचिकीर्षुराह **विषयविषम् उत्कटं पिबतां** पानोपभोगक्षणेऽपि उत्कटम्—प्रत्यूहव्यूहोपनिपातशङ्कया [6]मुखभङ्गदायित्वात्तीव्रम् । तदुत्कर्षप्रकर्षचिख्यापयिषयाह—**विषयविषाजीर्णमिव** उपमानान्तराभावादात्मनैव उपमानेन उपमेया **विषयविषविसूचिका** दुर्जरा विषयविषातिशयप्रसूर्विसूचिका दुरन्तानन्तभवान्तरभ्रान्ति-सम्भूतविविधबाधासम्बाधवती दुःखासिका **भवती**[7]त्यनन्वयेन कालकूटादिविषेभ्योऽप्याधिक्यं विषयविषस्य सूचितम् । आत्मनैवोपमेयस्योपमानेन स्या[8]दनन्वय इति । सुप्रतीतमेव च विषयाणां विषत्वम् ।

१. प्रकृष्टतया - L, B, KH, A । २. दयितमानावाप्ति - H, KH दयितमानवाप्ति - B, D । ३. दुःखांतमु - P । ४. दार्ष्टंतमाह - P । ५. विकला - P । ६. सुख - C । ७. त्यन्वयेन - D, L त्यनित्यत्वयेन - KH । ८. दन्वय - KH ।

यत:—"महारिणा[१] विषमया: केनोक्ता विषया इमे ।
ज्ञातं विषास्त्र एवाऽत्र विषमास्त्रोऽपराध्यति" ॥१॥ [ ] इति ।

वृद्धा: पुनरेवं व्याचख्यु:-**विषयविषं हालाहलं** सद्य: प्राणघाति पिबतां विषयविषविसूचिका भवतीति मूलसम्बन्ध: । किमेतदित्याह – **विशदविषं** प्रकटविषम् **उत्कटं** तीव्रकालकूटादिकं **पिबतां विशदविषाजीर्णमिव** स्पष्टविषाजरणमिव मारणात्मकम् । **विषये** गोचरे **विषविसूचिका** तदजीर्णातिरेकलक्षणा सा **भवति** । कालकूटादिविषभोजिनो मरणमिव शब्दादिविषयभोजिनस्तद्विपाकादनन्तसंसारभ्रमणं प्राप्नुवन्तीत्यर्थ: ॥२१३॥

एतदेव व्याकरोति —

**एवं तु पंचहिं आसवेहिं रयमाइणित्तु अणुसमयं ।**
**चउगइदुहपेरंतं, अणुपरियट्टंति संसारे ॥२१४॥**

**एवमेव पञ्चभिरा**श्रवति आत्मनि संगलति[२] कर्म यैस्ते **आश्रवा**स्तैर्हिंसानृतस्तेयाऽब्रह्मपरिग्रहरूपै: शब्दादिभिर्वा **रज:** पापं कर्म **आदानयित्वा** आत्मसात्कृत्वा । **अनुसमयं** प्रतिक्षणं चतसृणां गतीनां दु:खानि पर्यन्त: सीमा तदनुभवप्रकर्षो यस्मिन् पर्यटने त**च्चतुर्गतिदु:खपर्यन्तं** यथा भवति । एवम् **अनु** रज:-स्वीकारात् **पर्यटन्ति संसारे** भवे इति ॥२१४॥ तथाहि—

**सव्वगईपक्खंदे, काहिंति अणंतए अकयपुन्ना[३] ।**
**जे य न सुणंति धम्मं, सोऊण य जे पमायंति ॥२१५॥**

**सर्वगतिप्रस्कन्दान्** समग्रगत्याक्रमणानि **करिष्यन्ति अनन्तकान्** अपर्यवसानान् , **अकृतप्रज्ञा** असंस्कृतमतयो मूर्खा: सन्त:, ये किं ? **ये न शृण्वन्ति धर्मं** सर्वज्ञदृष्टं **श्रुत्वा च ये प्रमाद्यन्ति** नाद्रियन्ते इति ॥२१५॥

के च[४] ते श्रुत्वाऽपि धर्मं प्रमाद्यन्ति इति, तानेव स्वरूपेणाह—

**अणुसिट्ठा य बहुविहं मिच्छद्दिट्ठी य जे नरा अहमा ।**
**बद्धनिकाइयकम्मा, सुणंति धम्मं न य करेंति ॥२१६॥**

**च**स्याऽप्यर्थत्वात् **अनुशिष्टा अपि** धर्मोपदेशै: प्रेरिता अपि, **बहुविधं** हेतुदृष्टान्तोपपत्तिभि**र्मिथ्या-दृष्टयश्च ये नरा** मनुष्या **अधमा** नीचा अत एव **बद्धम्** आत्मप्रदेशै: श्लेषितं **निकाचितम्** अवश्यवेद्याऽवस्थां नीतं **कर्म** ज्ञानावरणीयादि यैस्ते **बद्धनिकाचितकर्माण:** । **शृण्वन्ति धर्मं** क्वचित्पराभियोगादित: समवसरणादिषु । **न च** नैव **कुर्वन्ति** ते अनन्तान् सर्वगतिप्रस्कन्दान् करिष्यन्तीति प्राक्तनगाथया सम्बन्ध इति ॥२१६॥ अधमानां दोषमुक्त्वा उत्तमानां गुणमाह—

**पंचेव उज्झिऊणं, पंचेव य रक्खिऊण भावेणं ।**
**कम्मरयविप्पमुक्का, सिद्धिगइमणुत्तमं पत्ता ॥२१७॥**

**पञ्चैव** हिंसादीन् आश्रवान् **उज्झित्वा** परित्यज्य । **पञ्चैव च** महाव्रतानि **रक्षित्वा** प्रतिपाल्य

---

१. ८. रिणो – B । रिण्या – KH । २. संलगति – KH, L । ३. पुन्ना – B, L, KH । ४. किंच ते – C ।

**च**स्यानुक्तसमुच्चयार्थत्वादिन्द्रियाणि विषयेभ्यो रक्षित्वा रागद्वेषाऽकरणतो व्यावृत्त्य[१] । **भावेन** तात्त्विक्या वृत्त्या न दाम्भिक इव बाह्ययैव वृत्त्या । **कर्मरजोविप्रमुक्ताः** सन्तः **सिद्धिगतिम् अनुत्तरां** सर्वोत्कृष्टां मुक्तिरूपां **प्राप्ता** इति ॥२१७॥

सामान्यतो मुक्तिहेतूनुक्त्वा[२] व्यक्तितस्तानेवाह–

**नाणे दंसण-चरणे, तव-संजम-समिइ-गुत्तिपच्छित्ते ।**
**दमउस्सग्गववाए, दव्वाइअभिग्गहे चेव ॥२१८॥**

**सद्दहणायरणाए, निच्चं उज्जुत्तएसणाइ ठिओ ।**
**तस्स भवोदहितरणं, पव्वज्जाए य जम्मं तु ॥२१९॥**

**ज्ञानादिषु यः** स्थित**स्तस्यैव** तदीय**प्रव्रज्यायाश्च जन्म** मनुष्यतया प्रव्रजिततया च उत्पत्तिलक्षणम् **भवोदधितरणं** संसारसागरतरण्डकं भवतीति गम्यम् । अन्यस्य तु जन्मद्वयमपि निरर्थकम् । **तु**शब्दात् प्रत्युतानर्थकारणं च भवतीति मूलसम्बन्धः । तत्र **ज्ञानं** सम्यक् सम्बोधलक्षणं तस्मिन् तथा **दर्शनचरणे** द्वन्द्वैकवद्भावेन दर्शनचरणयोः श्रद्धान-क्रिययोः । तपःप्रभृतीनां पञ्चानां द्वन्द्वैकवद्भावात् **तपसि** अनशनादौ **संयमे** पृथिवीकायादिरक्षणात्मके, **समितिषु** ईर्याभाषैषणादाननिक्षेपपरिष्ठापनात्मिकासु **गुप्तिषु** मनोवाक्काय-रोधरूपासु **प्रायश्चित्ते** आलोचनाप्रतिक्रमणादौ **दमे** इन्द्रियनिग्रहे **उत्सर्गे** सामान्येनोक्तानुष्ठाने **अपवादे** द्रव्यादिसापेक्षविशेषोक्तानुष्ठाने, प्राग्वदेकवद्भावः, एवं सर्वत्राऽपि । **द्रव्यादिष्विति**-आदिशब्दात् क्षेत्रकाल-भावग्रहः । तेषु **अभिग्रहो**-यथा अमुकं निर्लेपोज्झितकादिकुल्माषपर्युषितादिरूपं द्रव्यं ग्रहीष्ये, क्षेत्रे गृहबहिः-प्रदेशादौ काले पौरुष्याद्यतिक्रान्तौ, भावे हसन्त्या रुदत्या[३] वा दत्तमित्यादिरूपो विविधो नियमस्तस्मिन् । **चः** समुच्चये । **एव**कारस्याऽवधारणार्थस्य व्यवहितः सम्बन्धः, स च तस्यैवेत्यत्र योजित एव । **श्रद्धान**-प्रधानायाम् **आचरणायां नित्यम् उद्युक्तः** सन् **एषणायां** निरवद्याहारगवेषणग्रहणग्रासगोचरायाम्, यत्तदो-र्नित्याभिसम्बन्धाद्य एतेषु **स्थितस्तस्य** तदीय**प्रव्रज्यायाश्च जन्म भवोदधितरणमिति** प्रागेव योजितम् । चरणस्यैव व्याख्यानार्थं[४] तपःप्रभृतीनि पृथगुपात्तानि । दर्शनचरणग्रहणेऽपि श्रद्धानाचरणग्रहणं सर्वमिद-माचरणीयम् । तत्सामर्थ्याभावे तु श्रद्धेयमिति श्रद्धानप्राधान्यख्यापनार्थम् । यदुक्तम्–

**"जं सक्कइ तं कीरइ जं च न सक्कइ तयम्मि सद्दहणा ।**
**सद्दहमाणो जीवो पावइ अयरामरं ठाणं"** ॥ [ सं.प्र./८९४ ] तथा–

**"भट्ठेण चरित्ताओ सुट्ठुयरं दंसणं गहेयव्वं ।**
**सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति"** ॥ [ दं.प्र./२४८ ] इति ॥२१८॥२१९॥

व्यतिरेकदोषमाह–

**जे घरसरणपसत्ता, छक्कायरिऊ सकिंचणा अजया ।**
**नवरं मोत्तूण घरं, घरसंकमणं कयं तेहिं ॥२२०॥**

---

१. व्यावर्त्य - C, D, K, व्यावृर्त्य - A, L । २. मुक्तौ हेतूनुक्त्वा - C, मुक्तिहेतुमुक्त्वा - D, B मुक्तिहेत्वमुक्त्वा - KH, A । ३. रुदन्त्या - P । ४. ख्यापनार्थं - P व्यापनार्थं - KH ।

**ये गृहशरणप्रसक्ता** गृहक्षणच्छादनाद्यारम्भयुक्ताः[1] सन्तः । **षट्कायरिपवः** पृथिव्याद्युपमर्दकाः **सकिञ्चनाः** सहिरण्यहेमानः **अयता** दुष्प्रयुक्तमनोवाक्कायाः **नवरं** केवलं **मुक्त्वा** प्राक्तनं **गृहं** लिङ्ग-ग्रहणछद्मना **गृहसङ्क्रमणं कृतं** तैरिति ॥२२०॥

तच्च तेषां महतेऽनर्थायैवेत्याह–

**उस्सुत्तमायरंतो, बंधइ कम्मं सुचिक्कणं जीवो ।**
**संसारं च पवड्डइ, मायामोसं च कुव्वइ य ॥२२१॥**

**उत्सूत्रमा**गमातिक्रमणानुष्ठानं दुष्ट**माचरन् बध्नाति कर्म सुचिक्कणं** निबिडं **जीव**स्तत्परिणामात्**संसारं च प्रवर्द्धयति मायया** शाठ्येन सूत्रोक्तं करिष्यामीति स्वीकृत्य तदकरणात् **मृषा**ऽलीकं **च करोत्येव** **च**स्याऽवधारणार्थत्वादिति ॥२२१॥

तस्मादुत्सूत्राचारेण समं संसर्गोऽपि न कार्य इत्युपदिशति ।

**जइ गिण्हइ वयलोवो, अहव न गिण्हइ सरीरवोच्छेओ ।**
**पासत्थसंकमो[2] वि य, वयलोवो तो वरमसंगो ॥२२२॥**

**यदि गृह्णाति** तत्सम्बन्धि अशनवसनादीति गम्यते, ततो **व्रतलोपः** आधाकर्मादिदोषदुष्टतया आगमनिषिद्धत्वात् । **अथवे**ति पक्षान्तरसूचकः, यदि वा **न गृह्णाति** ततस्तदुपष्टम्भकाहाराद्यसम्प्राप्त्या **शरीरव्यवच्छेदः** । अथ कश्चिद् दृढाऽऽग्रहो देहत्यागेऽपि अनेषणीयं न गृह्णात्येव, तस्याऽपि संसर्गो व्रतलोप एवेत्याह–**पार्श्वस्थसङ्क्रम एव च व्रतलोपः, अपे**रवधारणार्थत्वात्, किमन्येन ? पार्श्वस्थानामुत्सूत्रचारिणां गुरुकर्मपाशपरवशानां सङ्क्रम एव तन्मध्ये संवास एव व्रतलोपो भगवदाज्ञाभङ्गरूपत्वात् । **ततो वरम् असङ्ग**स्तैः पार्श्वस्थैः सह संसर्गत्याग इति ॥२२२॥

अत्रार्थे जिनाज्ञामेवाऽऽविष्करोति–

**आलावो संवासो[3], वीसंभो संथवो पसंगो य ।**
**हीणायारेहिं समं, सव्वजिणिंदेहिं पडिकुट्ठो ॥२२३॥**

**आलापः** सापेक्षं सम्भाषणं **संवास** एकत्रोपाश्रयेऽवस्थानं **विश्रम्भ**श्चित्तविश्वासः **संस्तवो** मिथः परोक्षे गुणोत्कीर्त्तनं **प्रसङ्ग** उचितदानप्रत्यादानादिव्यवहारः । **च**शब्दादन्योऽपि मिथो मैत्र्यादिजनित एवंरूपो व्यवहारो, **हीनाचारैः** पार्श्वस्थादिभिः **सह सर्वजिनेन्द्रैः** श्रीऋषभादिश्री**वर्द्धमानान्तैः प्रतिक्रुष्टः** प्रतिषिद्धः ।

अत्रागमः–"**असंकिलिट्ठेहिं समं वसिज्जा मुणी चरित्तस्स जओ न हाणी**" ॥ [ द.वै.चू./२-गा.९ उत्त. ] इति ॥२२३॥

स्यादेतद् दृढचित्तस्य एकत्रोपाश्रयेऽपि को दोष इत्यत आह–

**अन्नोन्नजंपिएहिं, हसिउद्धुसिएहिं[4] खिप्पमाणो य ।**
**पासत्थमज्झयारे, बला जइ वाउली होइ ॥२२४॥**

**अन्योन्यजल्पितैः** परस्परविकथालापैः, **हसितोद्धुषितै**र्हर्षोत्कर्षजनितैर्हास्यरोमोत्कर्षैः **क्षिप्यमाणो** धर्मध्यानात्प्रेर्यमाणः **पार्श्वस्थमध्यचारे** ज्ञानादीनामनुपयोगित्वात्पार्श्वे तटे तिष्ठतीति सामान्यव्युत्पत्त्या

१. गृहकरणाच्छाद... H गृहक्षणस्थानाद्यारम्भ....L । २. संगमोवि... K, P, L । ३. संलावो – P । ४. हसिउव्वरिएहिं – P ।

अवसन्नादयोऽपि गृह्यन्ते पार्श्वस्थानां वा मध्ये चरणं **पार्श्वस्थमध्यचारस्तस्मिन्** वर्त्तमानो, **बलात्** कुसङ्ग-सामर्थ्यात् **यति**रिति दृढचित्ततया निरतिशयसंयमधनोपि साधु**र्व्याकुलीभवति** दृढधर्मताया भ्रश्यति, **वातूलीभवतीति** वा यत्तद्भाषी भवतीत्यर्थः ॥२२४॥

अत्रार्थे आगमचारानुचरं लोकाचारमाह–

**लोए वि कुसंसग्गीपियं जणं दुन्नियच्छमइवसणं ।**
**निंदइ निरुज्झमं पिय-कुसीलजणमेव साहुजणो ॥२२५॥**

आस्तां लोकोत्तरे **लोकेऽपि कुसंसर्गिप्रियं** दुःशीलकदर्थितं **जनं दुर्निवसितं** दुष्परिहितं षिङ्गवेषमिति यावत् । **अतिव्यसनं** द्यूताद्युत्कृष्टव्यसनव्यवसितं **निन्दति** जुगुप्सते यथा **निरुद्यमं** [१]चारित्राचारशीतलं **प्रियकुशीलजनं** वल्लभपार्श्वस्थादिलोकम् **एवं साधुजन**श्चारित्रिलोकोऽपि निन्दतीत्यर्थः ॥२२५॥

स चैवं स्खलितचारित्रोऽपि सम्भाव्यते तस्योदर्कमाह–

**निच्चं संकियभीओ, गम्मो सव्वस्स खलियचारित्तो ।**
**साहुजणस्स अवमओ, मओ वि पुण दुग्गइं जाइ ॥२२६॥**

**नित्यं शङ्कितभीतो** '[२]जल्पान्तरेऽपि मदीयमिदं जल्पते' इत्याशङ्कितो, 'मा अहमेवं ज्ञात्वा गुर्वादिभिः कुलगणादिभ्यो निष्काश्ये' इति त्रस्तश्च । **गम्यो**ऽभिभवनीयः, **सर्वस्य** बालादेरपि, **स्खलितचारित्रः साधुजनस्याऽवमतो**ऽनभिमत इदं तावदिहलोके, परत्राऽपि **मृतोऽपि पुनर्दुर्गतिं** कुयोनिं **याति** । **पुनः**शब्दा-दनन्तसंसारी च भवति ॥२२६॥

अत्रैवार्थे दृष्टान्तमनूद्य शिष्यानुशासनमाह–

**गिरिसुयपुप्फसुआणं, सुविहिय ! आहरणकारणविहन्नू ।**
**वज्जेज्ज सीलविगले, उज्जुयसीले हवेज्ज जई ॥२२७॥**

वृत्तिः– तत्र पूर्वं उदाहरण[३]कथैवोच्यते ॥ तथाहि–

**[ गिरिशुक-पुष्पशुककथानकम् ॥ ]**

**वसन्तपुर**मित्यस्ति पत्तनं श्रीनिकेतनम् । पवित्रकीर्त्तनस्तत्र राजा **कनककेतनः** ॥१॥
सोऽश्ववाहनिकां कर्तुं नगरान्निर्गतोऽन्यदा । व्यस्ताभ्यस्ततुरङ्गेण दूरेणापहृतो वने ॥२॥
अपरे परतः सन्तु सादिनो वायुनाऽपि यत् । वाजी मनोजवभ्राजी नाऽनुजग्मे सभूभुजः ॥३॥
ज्ञानं स्वलक्षणाभासं निर्विकल्पं च वस्तुषु । [1]तथा[४]गतधियाऽश्वेनान्वभाव्यत नृपः पथि ॥४॥
आकृष्याकृष्यवल्गान्तमथ श्रान्तः श्लथं नृपः । तं मुमोच यतो याति ततो यात्विति चिन्तयन् ॥५॥
राज्ञा स्थितः क्षणादर्वागर्वा स निरचीयत । व्यस्तयाऽश्वदमैर्गत्या विनीतोऽयमिति स्फुटम् ॥६॥
अस्तु तत्कियदायातो विश्रान्तिः क्वाऽधुनोचिता । ध्यायन्निति नृपोऽपश्यद् वनान्तवसतिं जनम् ॥७॥
यावद्विश्रामकामश्च तत्र याति क्षितेः पतिः । तरौ दूरात् दुरारोहे शुकस्तावदवोचत ॥८॥

---

१. चारित्रातिचारशीतलं – P । २. जल्पोत्तरेऽपि – K । ३. मथैव – P । ४. गतिधिया – A, KH ।

टि. 1. तथागतः बौद्धः ।

सामान्यजनतातीतैर्लक्षणैरेष लक्ष्यते । प्रौढः परिवृढः कश्चित् तदस्मै बत धावत ॥९॥

अयं निरुद्धो बद्धश्च भूरि दास्यति भूरिशः । सर्वे सम्भूय भूयांसो गृह्णीत शबरा ! अमुम् ॥१०॥

त्रस्तो गिरा तया तस्य सज्जीकृतकिरातया । नृपश्चमत्कृतश्चित्ते दूरं दुद्राव वाजिना ॥११॥

मनसेव समं स्पर्द्धानुबन्धी स क्षणार्द्धतः । निनाय दूरं राजानमाजानेयो[1] जवाधिकः ॥१२॥

स क्वापि तापसावासे पुण्यारामे मनोरमे । प्राप्तः कीरकुमारेणाऽभाषि केनाऽपि पार्थिवः ॥१३॥

स्वस्ति ते स्वागतं राजन्नेकोऽपि विदितोऽसि नः । लक्षणान्येव तेऽमूनि ज्ञापयन्तीति मादृशाम् ॥१४॥

अर्घं पाद्यं तथाऽऽतिथ्यमस्मै कुरुत तापसाः! । गुरुर्वर्णाश्रमाणां वोऽतिथिः स्वयमुपस्थितः ॥१५॥

अवतीर्याऽथ निर्वाह्य वाहार्थं सर्वमात्मना । स्वेनातिथ्यक्रियाशान्तश्रान्तिः स्वान्तिकमागतम् ॥१६॥

अवोचत वचो राजा शकुन्तं कुतुकी[2] शुकम् । प्रकृतिस्ते कुतस्त्येयं सज्जनस्येव पावनी ॥१७॥ युग्मम् ॥

पक्कणेऽद्य[3] शुकोऽस्माभिर्दृष्टस्तस्य तवापि च । विषपीयूषयोर्यादृक् तादृगेवान्तरं द्वयोः ॥१८॥

सोऽप्याह दोषस्तस्यैष न राजन्न च मे गुणः । तत्तदाश्रयभूः किन्तु संसर्गस्तत्र कारणम् ॥१९॥

यदावामाश्रमादस्माददूरेण वनाऽवनौ । अभवाव शुकौ राजन् स चाहं च क्वचिद् वटे ॥२०॥

माताऽप्येका पिताऽप्येको मम तस्य च पक्षिणः । गवाशनैः[4] स नीतोऽस्मादानीतोऽहं तपोधनैः ॥२१॥

स कीरः पार्वतीयानां ख्यातो **गिरिशुका**भिधः । पुण्यारामनिवासी च श्रुतः **पुष्पशुको**ऽस्म्यहम् ॥२२॥

शृणोति वाचः स गवाशनानामहं तु राजन् ! मुनिपुङ्गवानाम् ।
प्रत्यक्षमेतद्भवताऽपि दृष्टं संसर्गजा दोषगुणा भवन्ति ॥२३॥ [उपजातिवृत्तम्]

श्रुत्वेति राजा **कनकध्वजो**ऽपि गतः स्वसैन्यैः सह राजधानीम् ।
दोषे गुणे वापि च सङ्गमेवं प्रमाणयामास निदानमेकम् ॥२४॥ [उपजातिवृत्तम्]

**इति गिरिशुक-पुष्पशुककथानकम् ॥**

**गिरिशुक-पुष्पशुकयोः सुविहित** ! सुकृतिन् ! **उदाहरणे** दृष्टान्ते **कारणम**साधुसाधुसङ्गतिजदोषगुणलक्षणम् । **तद्विधिज्ञः** प्रस्तुतदृष्टान्तविधानवेदी सन् **वर्जयेत् शीलविकलान्** , न च तद्वर्जनमात्रेणैव परितुष्ट आसीत् किन्तु स्वयं **उद्यतशीलो** व्रतोद्यममति[१]**र्भवेद्यतिः** अथवा कुशीलान् सङ्गतो वर्जयित्वाऽपि 'एवमेते दुःशीला वयं तु सुविहिता' इत्यात्मबहुमानपरापमानप्रकटनेन लोकमध्ये वक्रशीलो न भवेदित्युपदिशति ऋजुशीलो भवेदिति[२] कषायवर्जनात् वक्रतां परिहृत्य समतामास्थाय ऋजुशीलः सामायिकशीलो यतिर्भवेत् । ॥२२७॥

एवं हि क्वचिदौचित्येन तद्वन्दनमप्यदुष्टं स्यादिति । तदित्थमौत्सर्गिकं पार्श्वस्थादिसङ्गपरिहारमभिधायाऽधुना कारणे तद्वन्दनमप्यनुजानानस्तेषामपि तत्र कृत्यं चोपदिशन्नाह–

---

१. व्रतोद्यतमति... C, D, व्रतोद्यमेमति – H । २. भवेद्यतिः C, D, K ।

टि. 1. आजानेयः उत्तमः अश्वः । 2. कुतुकं कुतूहलं अस्यास्ति कुतुकी । 3. पक्कणः – भीलानां आवासः । 4. गवाशनः – गोमांसमश्नाति, तैः ।

**ओसन्नचरणकरणं, जइणो वंदंति कारणं पप्प ।**
**जे सुविइयपरमत्था, ते वंदंते निवारेंति ॥२२८॥**

**अवसन्नचरणकरणं** विशीर्णमूलोत्तरगुणं **यतयः** सुसाधवो **वन्दन्ते, कारणं** व्रतपर्यायादिरूपं **प्राप्या**ऽऽसाद्य, तदा च **ये** शीतलविहारिणोऽपि **सुविदितपरमार्थाः** सुपरीक्षितागमोपनिषदः । यदुत कर्मनिगडनिगीर्णोद्यमानामस्माकमेवं स्वयं शिथिलाचाराणाम् एतद्वन्दनप्रत्यादानं महतेऽनर्थायेत्यात्मज्ञा**स्ते** आत्मानं **वन्दमानान्** सुसाधून् **निवारयन्ति** तेषामेकवचननिर्देशोचितानामपि संविग्नबहुमानितया उत्तमत्वख्यापनार्थो बहुवचननिर्देश इति ॥२२८॥ अन्यथा दोषमाह–

**सुविहियवंदावेंतो, नासेई अप्पयं तु सुपहाओ ।**
**दुविहपहविप्पमुक्को, कहमप्प न जाणई मूढो ॥२२९॥**

**सुविहितान्** सुसाधून् **वन्दयन्** वन्दमानाननिषेधयन् **नाशयत्यात्मान**मेव । **तु**शब्दस्याऽवधारणार्थत्वात् **सुपथात्** ज्ञानादिरत्नत्रयासेवनरूपात् । **द्विविधपथविप्रमुक्तः** साधु-श्राद्धाचारपरिभ्रष्टः । स हि चारित्रे अयतमानतया न यतिर्लिङ्गधारित्वान्नाऽपि च गृहस्थोऽत एव **कथमात्मानं न जानाति मूढो** येन सुसाधून् वन्दयतीति ॥२२९॥ अथ पथद्वैविध्यप्ररूपणेन यतिधर्मेण समं गृहिधर्मस्यापि तुलया साम्यमुक्तमिति गृहिधर्माचारविधि मेवोपदिशन्नाह–

**वंदइ उभओ कालं पि, चेइयाइं थयथुईपरमो ।**
**जिणवरपडिमाघरधूव-पुप्फगंधच्चणुज्जुत्तो ॥२३०॥**

श्रावको **वन्दते उभयकालं चैत्यानि** अर्हद्बिम्बरूपाणि, **स्तवा** ऋषिमण्डलाख्य-कवचस्तव-परब्रह्मस्तवाद्याः, **स्तुतय**श्चैत्यवन्दनादिप्रतिबद्धकायोत्सर्गपर्यन्तेषु याः पठ्यन्ते श्रूयन्ते च **तत्परम**स्तद-ध्ययनप्रधानः सन् जिनवराणामर्हद्भट्टारकाणां प्रतिमागृहं गृहदेवालयो देवगृहं च तस्मिन् धूपपुष्पगन्धै**रर्चनं** तस्मिन्नुद्युक्तः सततं कृतोद्यमः स **जिनवरप्रतिमागृहधूपपुष्पगन्धार्च्चनोद्युक्तः** । एतच्चाशातनावर्जनपूर्वं विधिवदङ्गसम्मार्जन-पञ्चामृतादिस्नानविधानं सुगन्धिश्रीचन्दनागरुकर्पूरमृगमदकाश्मीरजप्रभृतिविलेपन-अक्षत-नैवेद्य-फल-जल-प्रदीप-प्रमुखबलिढौकनादीनाम् उपलक्षणमिति ॥२३०॥ तथा –

**सुविणिच्छियएगमई, धम्मम्मि अणण्णदेवओपणओ ।**
**न य कुसमएसु रज्जइ, पुव्वावरवाहयत्थेसु ॥२३१॥**

सुविनिश्चिता सुप्रतिष्ठिता, एका शङ्काकाङ्क्षादिसाहचर्यरहिता अद्वितीया मतिर्यस्य स **सुविनिश्चितैकमतिः** । तथा न भगवन्तं विना अन्यदैवतं भयत्राणवाञ्छया[2] प्रेत्य स्वर्गाऽपवर्गलिप्सया च उपासितव्यं पुरुषविशेषम् उपनतः समर्प्पितात्मा उप समीपे नतः प्रणतो वा **अनन्यदैवतोपनतः** संसारनिस्तारकारणं भगवन्तमर्हद्भट्टारकमेव उपनतः[3] । **न च कुसमयेषु** परप्रवचनेषु **रज्यते** । **पूर्वापरव्याहतार्थेषु** निरुपपत्तिक-प्रलपितेषु, ते हि '**न हिंस्यात् सर्वभूतानि त्रसाणि स्थावराणि चे**'त्युपदिश्य **षट्शतानि निबध्यन्ते पशूनां मध्यमेऽहनि** । **अश्वमेध**स्य वचनात् **न्यूनानि पशुभिस्त्रिभि**रित्यपि लपन्ति ।

१. कश्मीरज A, C । २. भवभय – C, D, K, अयत्राण – A, KH । ३. ध्यानतः A ।

तथा चाहुराचार्य**श्रीहेमचन्द्रपादाः**—

"**हिंसादिसंसक्तपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः ।**
**नृशंसदुर्बुद्धिपरिग्रहाच्च ब्रूमस्त्वदन्यागममप्रमाणम्** ॥ [ अयोगव्यव०/१० ]
**हितोपदेशात्सकलज्ञक्लृप्तेर्मुमुक्षुसत्साधुपरिग्रहाच्च ।**
**पूर्वापरार्थेष्वविरोधसिद्धेस्त्वदागमा एव सतां प्रमाणम्**" ॥ [ अयोगव्यव०/११ ] इति ॥२३१॥ किञ्च—

**दट्ठूणं कुलिंगीणं, तस-थावरभूयमद्दणं विविहं ।**
**धम्माओ न चालिज्जइ, देवेहिं सइंदएहिं पि ॥२३२॥**

**दृष्ट्वा कुलिङ्गिनां** शाक्यादीनां पचन-पाचनादिना **त्रसस्थावरभूतमर्दनं विविधं, धर्मात्,** कारणे कार्योपचारादशेषसूक्ष्मजन्तुरक्षाप्रतिपादकाद् भगवत्प्रवचनात् **न चाल्यते देवैः सेन्द्रैरपि,** किं पुनरितरैरिति ॥२३२॥ अन्यच्च—

**वंदइ पडिपुच्छइ, पज्जुवासेइ साहुणो सययमेव ।**
**पढइ सुणेइ गुणेई य, जणस्स धम्मं परिकहेइ ॥२३३॥**

**वन्दते** मनोवचनकायैः । **प्रतिपृच्छति** क्वचित् संशयानः **पर्युपास्ते** समीपतरवर्त्तितया, कान् ? **साधून् सततमेव पठति** प्रकरणाद्युचितं श्रुतं **शृणोति** सूत्रार्थं **गुणयति** परावर्त्तयति **च**शब्दादर्थं विमृशति **च** । **जनस्य धर्मं परिकथयति** स्वयंबुद्धोऽन्यान् बोधयतीति ॥२३३॥

**दढसीलव्वयनियमो, पोसह-आवस्सएसु अक्खलिओ ।**
**महुमज्जमंसपंचविह-बहुविहफलेसु पडिक्कंतो ॥२३४॥**

**दृढं शीलं** विशुद्धं मनःप्रणिधानं **व्रतनियमा** अणुव्रत-गुणव्रत-शिक्षाव्रतरूपा अभिग्रहाश्च यस्य स **दृढशीलव्रतनियमस्तथा पौषधे** आहार-ब्रह्मचर्य-अव्यापार-शरीरसत्कारभेदाच्चतुर्विधे सामान्यतो व्रत-शब्दसंगृहीतेऽपि वैशिष्ट्यख्यापनार्थं भूयोऽप्युक्तं पौषध इति । तथा **आवश्यकेषु** सामायिकादिषु षट्प्रकारेषु **अस्खलितो** निरतिचारः । तथा **मधुनि** माक्षिक-कौत्तिक-भ्रामरादिभेदात् त्रिविधे, उपलक्षणं चैतन्नवनीतस्य । तथा **मद्ये** पिष्टकाष्ठभेदाद् द्विविधे । **मांसे** जलस्थलखचारिणां त्रसानां तृतीयधातुभेदे । **पञ्चविधफले** प्लक्षाश्वत्थोदुम्बरकाकोदुम्बरीवटप्रभवे **बहुविधे** वृन्ताकादिफले उपलक्षणत्वादज्ञातनामपुष्पफले अक्वथितगोरसमिश्रद्विदलरात्रिभोजनसचित्तानन्तकायिकादिसर्ववर्जनीयसङ्ग्रहः । **तेषु प्रतिक्रान्तो** निवृत्तः ॥२३४॥ मध्वादीनां नियमेभ्यः पृथग्ग्रहणं बहुदोषतासूचनार्थमिति । वर्जनीयसङ्ग्रहश्चैवम् —

"**पंचुंबरि चउविगई हिम-विस-करगे य सव्वमट्टी य ।**
**रयणीभोअणगं चिय बहुबीय-अणंतसंधाणे ॥१॥**
**घोलवडा वाइंगण असुणियनामं च फुल्लफलमाई ।**
**तुच्छफलं चलियरसं वज्जह वज्जाणि बावीसं**" ॥२॥ [ सं.प्र./११९४-११९५, प्र.सा./२४५-२४६ ]

अनन्तकायिकसंग्रहश्च—

"**सव्वा उ कंदजाई सूरणकंदो अ वज्जकंदो अ । अल्लहलिद्दा य तहा अल्लं तह अल्लकच्चूरो ॥१॥**

सत्तावरी[1] विराली कुमारि तह थोहरी गलोई य । ल्हसणं वंसकरिल्ला गज्जर तह लोणओ लोढा ॥२॥
गिरिकन्नि किसलपत्ता खरिंसुया थेग अल्लमुत्थाय । तह लोणरुक्खछल्ली खिल्लूडो अमयवल्ली य ॥३॥
मूला तह भूमिरुहा विरुहा तह ढक्कवत्थुलो । पढमो सूयरवल्लो[2] य तहा पल्लंको कोमलंबिलीया ॥४॥
आलू तह पिंडालू हवंति एए अणंतनामेणं । अण्णमणंतं नेयं लक्खणजुत्तीए समयाओ ॥५॥
घोसाडकरीरंकुरतिंदुअ अइकोमलंबगाईणि । वरुणवडनिंबयाईण अंकुराइं अणंताइं ॥६॥
गूढसिरसंधिपव्वं समभंगमहीरुगं च छिन्नरुहं । साहारणं सरीरं तव्विवरीअं च पत्तेयं ॥७॥
चक्कं व भज्जमाणस्स गंठी हवेज्ज चुण्णघणो । तं पुढविसरिसभेयं अणंतजीवं विआणाहिं ॥८॥
गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं । जं पि य अपणट्ठसंधिं अणंतजीवं विआणाहिं'' ॥९॥
[ प्र.सा./२३६तः२४४ ]

मांसनिषेधश्च लौकिकैरप्येवमनूदितः—
''अहिंसालक्षणं धर्मं सर्वभूताभयप्रदम् । अजातशत्रुणा पृष्टः पुनः शान्तनवोऽब्रवीत् ॥१॥
अमांसभक्षणं नृणामश्वमेधशतैः समम् । मांसं हि जायते घोरान्नाऽन्यत्र वधपातकात् ॥२॥
मांसादेव समुत्पन्नो मांसं मांसेन यो नरः[3] । तुल्यव्यथेऽस्मिन् संसारे भुञ्जानः किं न लज्जते ॥३॥
कण्टकेनाऽपि ये स्पृष्टा यान्ति कामपि विक्रियाम् । तेऽपि शस्त्रनिकृत्तस्य पशोरश्नन्ति विग्रहम् ॥४॥
भयमाकम्पनं तीव्रं देहिनां देहसंशये । दृष्ट्वा को नाम मांसेभ्यः स्पृहां कुर्यादराक्षसः ॥५॥
अमांसाशी जगद्बन्धुः प्राणिनामभयप्रदः । प्रयाति निर्भयं धाम पुण्यकारुण्यसागरः ॥६॥
क्रतुर्निर्विघ्नसंभारस्तीर्थ[4]मध्वश्रमोज्झितम् । अहिंसा नाम परमं व्रतमत्यक्तभोजनम्'' ॥७॥ [ ]

तथा—

**नाहम्मकम्मजीवी, पच्चक्खाणे अभिक्खमुज्जुत्तो ।**
**सव्वं परिमाणकडं, अवरज्झइ तं पि संकंतो ॥२३५॥**

**नाऽधर्मकर्मजीवी** नाऽधर्मेण पापानुष्ठानेन अङ्गारदाहादिना जीवितुं शीलमस्येति कृत्वा[5] **प्रत्याख्याने** ग्रहीतव्ये **अभीक्ष्णमुद्युक्तः** सोत्साहः । **सर्वं** धन-धान्यादिकम् आर्षत्वात् **परिमाणकृतं** कृतपरिमाणं करोतीति शेषः । **अपराध्यतीति तदपि शङ्कमानः** स्वचेतसा-अहो अहं गुरुकर्मा प्रतिज्ञातजिनप्रवचनोऽपि सर्वसङ्ग-परित्यागं कर्तुमद्याऽपि न प्रभुरिति कृत्वा एवमेवात्मापराधं मन्यते । यद्वा **सर्वं कृतपरिमाणं** कृत्वा**ऽपि** यदि प्रमादा**दपराध्यति**-अतीचारेणाऽपराधं प्राप्नोति **तमप्य**पराधमालोच्य कृतप्रायश्चित्ततया **सङ्क्रान्तो**ऽतिक्रान्ता-ऽपराधो भवति इति अथवा **अवि रज्झइ** इति पाठः **यद्यपि** आत्मकुटुम्बाद्यर्थं **राध्यते** पच्यते, **तदपि शङ्कमानो** यतनया कारयतीति ॥२३५॥ पाकादिकां चापराधस्थानं लौकिका अप्याहुः—

**''खण्डनी पेषणी चुल्ली जलकुम्भप्रमार्जनी ।**
**पञ्च शूना गृहस्थस्य तेन स्वर्गं न गच्छतीति''** [ ] ॥२३५॥ इति ।

यतना च तच्च सर्वं देवाद्यर्थं विदधानस्याऽग्रपूराद्यनन्तरं भगवदनुचरवृत्त्या आत्मकुटुम्बादिपोषणमपि अतिथिसंविभाग-दीनानुकम्पादानपूर्वं भावशुद्ध्या भुञ्जानस्य पुण्यायैवेति गुरूपदेशः ।

---

१. सिरिकिण्णि - C, K सिरिकण्णि - D । २. सूरयवल्लो - A । ३. हि व्यथां - C । ४. तीव्र - H, B । ५. ज्ञात्वा - A, B, H ।

अथ अधर्मकर्माणि चामूनि—

''अधर्माणि च कर्माणि विवेकी जीविकाकृते । त्यजेत् पञ्चदशाऽमूनि कर्मादानानि सद्गृही ॥१॥

भ्राष्ट्रकुम्भेष्टिकापाकैः स्वर्णायोघटनादिभिः । ठठारकर्मणेङ्गालैस्त्यजेदङ्गारजीविकाम् ॥२॥

कणोत्पेषादिभिः पत्रप्रसूनफलविक्रयैः । वनस्पत्युपमर्दोत्थां त्यजेच्च वनजीविकाम् ॥३॥

घटनाच्छकटाङ्गानां क्रयविक्रयतस्तथा । वृत्तिं शाकटिकत्वाच्च[१] जह्याच्छकटजीविकाम् ॥४॥

अनोवृषखरोष्ट्राश्वकासराश्वतरादिभिः । भारवाहनतो वृत्तिं नेच्छेद्भाटकजीविकाम् ॥५॥

क्षेत्रकूपतडागादिकरणे[२] भूविदारणात् । शिलाकुट्टकताभिश्च वर्जयेत् स्फोटजीविकाम् ॥६॥

आकरे दन्तकेशास्थिनखरोमत्वचां क्रयात् । त्यजेद् वृत्तिं त्रसाङ्गानां दन्तवाणिज्यमित्यपि ॥७॥

लाक्षानीलीशिलादीनां धातक्याष्टङ्कणस्य च । विक्रयाद्वर्जयेल्लाक्षावाणिज्यं पापकारणम् ॥८॥

वृत्तिं मद्यवसाक्षौद्रक्षीरादिरसविक्रयात् । त्यजेच्च केशवाणिज्यं गोमनुष्यादिविक्रयात् ॥९॥

विषायस्तालयन्त्रास्त्रहलादेर्जीवितच्छिदः । विक्रयाद्विषवाणिज्यं विवेकी वर्जयेन्नरः ॥१०॥

यन्त्रस्येक्षुरसाद्यर्थे तैलाद्यर्थे च वाहनात् । जलाश्मार्थे[३] च वृत्त्यर्थं यन्त्रपीडां विवर्जयेत् ॥११॥

नासावेधश्रवःसास्नामुष्कच्छेदास्तथाऽङ्कनम् । पृष्ठगालनमित्येतत्कृती निर्लाञ्छनं त्यजेत् ॥१२॥

सारिका-शुक-मोराणां कुक्कुटोतुशुनां तथा । पोषं वित्ताय दास्याश्चासतीपोषं त्यजेदमुम् ॥१३॥

दवदानं विशुद्धात्मा कृष्याद्यर्थमपि त्यजेत् । सरःशोषं सरःसिन्धुह्रदादेश्चाम्बुसम्प्लवम् ॥१४॥

धर्मबाधाकरीमन्यामपि चैवंविधां बुधः । अधर्म्यां जीविकां त्यक्त्वा प्रायो व्यवहरेत्पराम्'' ॥१५॥ [ ]

तथा—

**निक्खमण-नाण-निव्वाण-जम्मभूमीओ वंदइ जिणाणं ।**
**न य वसइ साहुजणविरहियंमि देसे बहुगुणे वि ॥२३६॥**

**निष्क्रमणज्ञाननिर्वाणजन्मभूमीर्वन्दते जिनानां** यासु भगवतां कल्याणकानि सम्पेदिरे, तां[४] भूमीर्[५]वन्दते । संवादश्चात्र—

''जम्मणनिक्खमणाइसु तित्थयराणं महाणुभावाणं ।
गमणच्चणमहिमाहिं आगाढं दंसणं होइ'' ॥१॥ [ उ.अ./१८ ]

**न च वसति साधुजनविरहिते देशे बहुगुणेऽपि** सस्याम्बुसम्पत्तिराजन्वत्ता[1]दीनपेक्ष्य प्रभूतगुणाधिकेऽपि धर्महानिकारित्वादिति ॥२३६॥ तथा—

**परतित्थियाण पणमण-उब्भावण-थुणण-भत्तिरागं च ।**
**सक्कारं सम्माणं, दाणं विणयं च वज्जेइ ॥२३७॥**

**परतीर्थिकाणां** शाक्यादीनां **प्रणमनं** शिरसा **उद्भावनं** तत्परोक्षे गुणोत्कीर्त्तनं **स्तवनं** प्रत्यक्षमेव

---

१. शाकटिकां चाथ - C । २. गादेः करणं - K, A, H, B । ३. जलस्यार्थे च - C । ४. तां - A । ५. भूमीं - A ।

टि. 1. राजन्वान् - श्रेष्ठराजा यत्र स देशः ।

**भक्तिरागश्चेतसोऽनुबन्धः** द्वन्द्वैकवद्भावात् , तम् । **चः** समुच्चये । **सत्कारं** वस्त्रादिभिः **सन्मान**मभ्युत्थानाऽनुव्रज्यादिभिः, **दान**मशनादीनां **विनयं** पादप्रक्षालनादिरूपं वर्जयतीति ॥२३७॥ तथा–

**पढमं जईण दाऊण, अप्पणा पणमिऊण पारेइ ।**
**असईअ सुविहियाणं, भुंजई य कयदिसालोओ ॥२३८॥**

**प्रथमं यतिभ्यो दत्त्वा** अशनादिकमाहारं पश्चादात्**मना** सद्भावसारं **प्रणम्य पारयति** भुङ्क्ते, **असइ** त्ति अभावे **सुविहितानां** साधूनां **भुङ्क्ते** **च**शब्दात्परिदधाति वस्त्रादिकमकृतसंविभागः **कृतदिशालोकः** सन् । [१]यथा यद्यत्रावसरे साधवः स्युस्तदाऽनुगृहीतः स्यामिति चिन्तयन्निति । यतः–

"विना[२] दानेन साधुभ्यः केवलं वन्दनैव या ।
दन्तनिष्कोषिका सेयं मुधा धार्मिकमानिनाम् ॥१॥
शय्यासनाशनपयोवसनौषधादौ, चिन्तां स्वयं विरचयन्ति सदा यतीनाम् ।
भक्त्या स्तुवन्ति विपदि प्रतिकुर्वते च, ते श्रावकास्तदपरे तु न किञ्चिदेव ॥२॥ [ वसन्ततिलकावृत्तम् ]
साधुष्वहो दोषविषं किरन्तः स्युर्दन्दशूका इव दीर्घजिह्वाः ।
अल्पेऽपि दानाऽवसरे करेण श्राद्धाधमा धिक् कुणयो भवन्ति ॥३॥ [ उपजातिवृत्तम् ]
मान्यान्मुनीनप्यवमन्यते यस्तत्याज मत्या जडधीः स धर्मम् ।
तत्त्वादसौ [1]तत्त्वसतत्त्वशून्यः शून्यं मुधा ध्यायति देवतत्त्वम् ॥४॥
करोति मातेव हितानि साधोः सखेव शिक्षामपि यो ददाति ।
स एव सुश्रावकनामवाच्यः शेषश्छलाऽन्वेषपरः सपत्नः" ॥५॥ [ ] इति ॥२३८॥

अत्रैव विधिमाह–

**साहूण कप्पणिज्जं, जं नवि दिन्नं कहिं पि किंपि तहिं ।**
**धीरा जहुत्तकारी, सुसावगा तं न भुंजंति ॥२३९॥**

**साधूनां कल्पनीयं** योग्यं **यद**शनादिकं, **न वितीर्णम्** उपकारितं **कस्मिंश्चि**द्देशकालादौ **किमपि** स्वल्पमपि, **तत्र** विधिरेष वक्ष्यमाण इति शेषः । **धीरा** अभ्रष्टसत्त्वा **यथोक्तकारिणो** विहितानुष्ठायिनः **सुश्रावका**स्तद्यद् यतिभ्यो न वितीर्णमासीत् **तद् न भुञ्जते** न स्वयमुपभुञ्जते इति ॥२३९॥

इदमेवाह–

**वसही-सयणा-ऽसण-भत्त-पाण भेसज्जवत्थपयाई ।**
**जइ वि न पज्जत्तधणो, थोवा वि हु थोवयं देइ ॥२४०॥**

**वसति**रुपाश्रयः, **शयनं** काष्ठमयसंस्तारकादि, **आसनं** पीठादि, **भक्त**मोदनादि **पानं** द्राक्षापानादि **भैषज्य**मौषधचूर्णादि, **वस्त्रं** क्षौमादि, **पात्र**मलाबुप्रभृति, **आदि**शब्दात् कम्बलादिग्रहः । एतत् प्रभृतिकं **यद्यपि न पर्याप्तधनो** न सम्पूर्णद्रविणस्तथापि **स्तोकादपि स्तोकं** स्तोकतरं **दत्ते** इति ॥२४०॥

---

१. यथात्रावसरे - C यथाद्यवसरे - B यथायद्यवसरे - H यथायत्रावसरे - KH, L । २. निष्काषिका - L निष्कोकिका B, H ।
टि. 1. तत्त्वसतत्त्वशून्यः - तत्त्वस्य परमार्थरहितः ।

तथा—

**संवच्छर-चाउम्मासिएसु, अट्ठाहिआसु अ तिहीसु ।**
**सव्वायरेण लग्गइ, जिणवरपूआतवगुणेसु ॥२४१॥**

**सांवत्सरिक-चातुर्मासिकेषु** उपलक्षणत्वात्पाक्षिकेष्वपि **अष्टाहिकासु** चैत्रादियात्रासु । चशब्दस्य सम्बन्धव्यवधाना**त्तिथिषु** पञ्चमीअष्टमी[१]पञ्चदशीषु, **सर्वादरेण लगति** ढौकते **जिनवरपूजा-तपोगुणेषु** भगवदर्च्चनेऽष्टमषष्ठचतुर्थादिकरणे, ज्ञानादिषु चेत्यर्थः ॥२४१॥ तथा—

**साहूण चेइयाण य, पडिणीयं तह अवण्णवाइं च ।**
**जिणपवयणस्स अहियं, सव्वत्थामेण वारेइ ॥२४२॥**

**साधूनां चैत्यानां च प्रत्यनीकं** तथा **अवर्णवादिनम्** अश्लाघाकारिणं च । किं बहुना ? **जिनप्रवचनस्याहितं** विपक्षं **सर्वस्थाम्ना** यावच्छक्तिजीवितव्यव्ययेनाऽपि **वारयति** जिनशासनोन्नतिकरणस्य महोदयहेतुत्वादिति ॥२४२॥ सामान्येन श्रावकगुणानुक्त्वा तानेव विशेषत आह—

**विरया पाणिवहाओ, विरया निच्चं च अलियवयणाओ ।**
**विरया चोरिक्काओ, विरया परदारगमणाओ ॥२४३॥**

**विरताः** कृतनिषेधाः **प्राणिवधात्** प्रक्रमान्निरपराधत्रसजीवानां सङ्कल्पपूर्वं हिंसातः । **विरता नित्यं च अलीकवचनात्** कन्यागवादिविषयात् स्थूलाद् **विरताश्चौर्यात्** स्थूलाद् **विरताः परदारागमनात्** परस्त्रीसम्भोगादिति ॥२४३॥ तथा—

**विरया परिग्गहाओ, अपरिमियाओ अणंततण्हाओ ।**
**बहुदोससंकुलाओ, नरयगइगमणपंथाओ ॥२४४॥**

**विरताः परिग्रहाद्** धनधान्यक्षेत्रवास्तुरूप्यस्वर्णकुप्यद्विपदचतुष्पदभेदेन नवविधात् । **अपरिमितात्** अकृतपरिमाणात् परिमाणादूर्ध्वम् अकृतनियमस्य हि अप्राप्नुवतोऽपि तृष्णा स्यादित्याह - **अनन्ततृष्णातः** दुष्पूरमूर्च्छातिरेकात् । यदुक्तम्—

"**इच्छा हु आगाससमा अणंतिआ**" [ ] । तथा—

"**तृष्णा खानिरगाधेयं दुष्पूरा केन पूर्यते ।**
**या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते**" ॥१॥ [ ] इति

**बहुदोषसङ्कुलात्** राजचौराद्युपद्रवनिमित्ततया शारीरमानससन्तापहेतोः । अत एव **नरकगतौ यद्गमनं तत्पथात्** तन्मार्गात् । यदाहुः—

"**चउहिं ठाणेहिं जीवा निरयत्ताए कम्मं पकरेंति । तं जहा—महारंभयाए महापरिग्गहाए पंचिंदियवहेणं कुणिमाहारेणं**" । [ स्थानाङ्ग-४/४/३७३ ] इति ॥२४४॥

एवं च तैर्यत्कृतं भवति तदाह—

---

१. पर्वपंच...B, H ।

**मुक्का दुज्जणमित्ती, गहिया गुरुवयणसाहुपडिवत्ती ।**
**मुक्को परपरिवाओ, गहिओ जिणदेसिओ धम्मो ॥२४५॥**

**मुक्ता दुर्ज्जनमैत्री** कुसंसर्गत्यागो हि परमं सम्पदां मूलम् । यदुक्तम्-"**यदि सत्सङ्गनिरतो भविष्यसि भविष्यसि । अथासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि**" [ ] । तथा **गृहीता** बहुमानपूर्वमादृता[1] **गुरुवचनानां, साधूनां** च **प्रतिपत्तिश्चि**त्तेन स्वीकाररूपा प्रतिज्ञा । यदाह **वाचकमुख्यः**–

"**धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी ।**
**गुरुवदनमलयनिसृतो वचनरसश्चन्दनस्पर्शः ॥** [ प्र.र./७० ]

**मुक्तः परपरिवादः** पराऽवर्णवादस्तस्याऽसूनृतवाक्यरूपतया दुर्गतिहेतुत्वादिति । यतः—भाषते यः परावर्णं चातुर्वर्ण्यविगर्हितः[2] । स पाथेयमनास्वाद्य नरकं याति बालिशः ॥२॥ इति । **गृहीतो जिनदेशितो धर्मः** सुव्रततया आत्मसात्कृत इत्यर्थः ॥२४५॥ तादृशाम् उदर्कमाह–

**तवनियमसीलकलिया, सुसावगा जे हवंति इह सगुणा ।**
**तेसिं न दुल्लहाइं, निव्वाणविमाणसोक्खाइं ॥२४६॥**

**तपोनियमशीलकलिताः सुश्रावका ये भवन्ति । इह** प्रवचने **सगुणा** इति स्वरूपाख्यानमिदम् । **तेषां न दुर्ल्लभानि निर्वाणविमानसौख्यानि** तदुपायैकनिष्ठत्वादिति ॥२४६॥ प्राग् मुक्तः परपरिवाद इत्युक्तं ततः शिथिलाचारे गुर्वादौ को विधिरित्याह–

**सीएज्ज कयाइ गुरू, तं पि सुसीसा सुनिउणमहुरेहिं ।**
**मग्गे ठवंति पुणरवि, जह सेलगपंथगो नायं ॥२४७॥**

**सीदेद्** दुष्टाचारः स्यात् **कदाचित्**कर्मपारतन्त्र्याद् **गुरुस्तमपि सुशिष्याः सुनिपुणमधुरैः** कुशलसुखदैश्चेष्टितैर्वचनैर्वेति गम्यते । **मार्गे** रत्नत्रयात्मके **स्थापयन्ति पुनरपि** पूर्वावस्थायामिव **यथा** शैलकस्य राजर्षेः शिष्यतया सम्बन्धी पन्थकः **शैलकपन्थकः**, स **ज्ञातं** दृष्टान्तः । तेन हि स्वगुरुः **शैलका**चार्यो भूयोऽपि मोक्षमार्गे स्थापित इति ॥२४७॥ अत्र कथानकम्–

**[ शैलक-पन्थककथानकम् ॥ ]**

आकरः सर्वरत्नानां पृथ्वी[टि.1] पृथ्वीधराश्रयः । पृथ्वीव **द्वारिके**त्यासीत् पयोधिपरिखा पुरी ॥१॥
अभिस्यन्दस्य वान्त्येव विद्याधरपुरश्रियाम् । अपवाह्येव वा स्वर्गं या श्रीदेन निवेशिता ॥२॥
तस्यामश्यामपक्षान्तश्यामाकान्तसकान्तिभिः[3][टि.2] । यशोभिः शोभितक्षोणिरभूद्**विश्वम्भरो**[टि.3] नृपः ॥३॥
दशार्हैर्दशभिः पूज्यैः **समुद्रविजयादिभिः** । सेव्यते **सात्वताद्यै**श्च महावीरैः स पञ्चभिः ॥४॥
राजान **उग्रसेनाद्याः** सहस्राः षोडशोऽपि तम् । सेवन्तेऽध्युष्टकोट्यश्च[टि.4] **प्रद्युम्नाद्याः** कुमारकाः ॥५॥
षष्टिः सहस्राः **शाम्बाद्या**स्तमसेवन्त दुर्दमाः[4] । **वीरसेना**दयो वीरसहस्राश्चैकविंशतिः ॥६॥

---

१. बहुमानेन आदृता – C । भक्तिपूर्वमादृता – P । २. विगर्हितं – C । ३. श्यामाकान्तः सकान्तिभिः – P । ४. दुर्मदाः KH ।

टि. 1. पृथ्वी-विशालः । 2. अश्यामपक्षान्तश्यामाकान्तः...शीतपक्षान्ते यः श्यामाकान्तः पूर्णिमा चन्द्रः, तस्य समाना कान्तिः यस्य तद् यशः, तैः इत्यर्थः । 3. विश्वम्भरः कृष्णः । 4. सार्धत्रयकोट्यः इत्यर्थः ।

**महासेना**दिबलवत्षट्पञ्चाशत्सहस्र्यपि । **भरतार्ध**भुजस्तस्य वर्त्तते राज्ञ आज्ञया ॥७॥
**रुक्मिणी**प्रमुखा देव्यः सहस्रास्तस्य षोडश । वेश्या**श्चानङ्गसेना**द्या वशेऽभूवन्ननेकशः ॥८॥
आ**वैताढ्य**समुद्रान्तं भरतार्द्धे स दक्षिणे । एकातपत्रं तत्रस्थः साम्राज्यं कुरुते **हरिः** ॥९॥
तस्मै महीमहेन्द्राय स्वर्महेन्द्रो महीयसे । हरये स्पृहयामास हरिः[1] शौर्यचमत्कृतः ॥१०॥
**स्थापत्या** नाम तत्रैव सार्थवाही महाधना । तस्याः सूनुरनूनश्रीः **स्थापत्यापुत्र** इत्यभूत् ॥११॥
स धीरधीरधीयानः सङ्क्रमादिव दर्पणः[१] । पाठकेभ्यो निरायासमापद्[२] द्वासप्ततिं कलाः ॥१२॥
नृलक्षणाधिदेवीनामिव प्रवररोचिषाम्[३] । स द्वात्रिंशत्कुमारीणां पाणिपीडनमातनोत् ॥१३॥
सौभाग्यसौविदल्लेन तस्य ताश्च वशीकृताः । मुक्ताऽसूया मिथः प्रेम्णा मेनिरे कृतकृत्यताम् ॥१४॥
ललमानः समं ताभिः समन्ताद्रागसागरे । निमग्न इव नो वेद कालं सैष महासुखी ॥१५॥
अन्यदा **रैवतो**द्याने **नन्दनेऽरिष्टनेमि**ना । चक्रे **सुरप्रिय**स्यैत्य चैत्यमत्यन्तपावनम् ॥१६॥
उद्यानपालको ज्ञात्वा भगवन्तं तदाऽऽगतम् । **द्वारका**न्तर्द्रुतं गत्वा **गोविन्दाय** व्यजिज्ञपत् ॥१७॥
सन्तोष्य तुष्टिदानैस्तं **केशवः** सपरिच्छदः । श्रीमन्**नेमि**जिनं नन्तुं **रैवतो**द्यानमासदत् ॥१८॥
स्थापत्यासूनुरप्यागादनूनसुकृतोदयः । शुश्राव च वचः शुद्धं संसारविषभेषजम् ॥१९॥
व्रतमादित्सुराप्रष्टुमथ स्वाऽऽवासमागतः[४] । विनयेनाऽऽग्रहेणाऽपि बोधयामास मातरम् ॥२०॥
अथ प्राभृतमादाय स्थापत्याऽभ्येत्य **केशवम्** । चामरे मुकुटं छत्रं राज्यचिह्नान्ययाचत[५] ॥२१॥
स्वीकृत्याऽथ स्वयं **कृष्ण**स्तत्प्रव्रज्यामहोत्सवम् । **स्थापत्याऽपत्य**मभ्येत्य वात्सल्यादित्यवोचत ॥२२॥
यथेष्टमुपभुङ्क्ष्व त्वं भोगान् मद्भुजपालितः । नैवाऽऽस्कन्दिष्यते वायुरपि त्वां शिशिरेतरः ॥२३॥
अकालेऽपि कुतस्त्योऽयं सङ्गोत्सर्गाग्रहस्तव । मयि स्वामिनि किं न्यूनं भयं कौतस्कुतं च ते ॥२४॥
सोऽप्याह स्थापयाञ्चक्रे शमनः[2] कमनश्वरम् । जरया को न जीर्णश्च रुग्णो रोगैर्न कोऽथवा ॥२५॥
विभो ! बिभेमि तेभ्योऽहं पाहि मां पुरुषोत्तम ! । व्रतायासेन कः स्वार्थस्तातत्रातस्य मे ततः ॥२६॥
**जनार्द्दन**स्तदाकर्ण्य स्मयमानाऽऽननोऽवदत् । स्वयं दुस्थोऽस्मि तत्राऽहं कथमीशे महाशयः ॥२७॥
**स्थापत्यासूनु**रन्यूनपुण्यः पुनरुवाच तम् । तर्हि मामनुजानीहि जिनेन्द्रशरणार्थिनम् ॥२८॥
निश्चलं निश्चयं तस्य मत्वा सत्त्वाधिकस्य तत् । सानन्दमथ **गोविन्द**स्ताडयामास डिण्डिमम् ॥२९॥
संसारोऽयमसारोऽद्य त्यक्तोऽनेन महात्मना । अवस्कारोत्करं मुक्त्वा रत्नान्याद्रियतां जनः ॥३०॥
राजा वा राजपुत्रो वा सार्थवाहोऽथवाऽपरः । यः कोऽपि दीक्षामादित्सुः सार्थेनास्याऽऽददातु सः ॥३१॥
कारयिष्यामि सर्वेषामहं व्रतमहोत्सवम् । तदीयमानुषाणां च वृत्तिं दास्ये यथेप्सितम् ॥३२॥

---

१. पर्वणः - P । २. मापद्वा - P, D मापत् द्वा - L, मापतद्द्वा - A, मापसद्द्वा - H । ३. योषितां - P । ४. मागमत् - A, KH । ५. याच्यत - P ।

टि. 1. हरिः - इन्द्रविशेषः । 2. शमनः - यमदेवः ।

पुरे द्रङ्गरवेणेति घोषिते दानवद्विषा[1] । सहस्रः कृतिनामेको व्रताय समनह्यत ॥३३॥
अभिषिच्य विभूष्याऽथ महोत्सवपुरःसरम् । राजार्हनृविमानेषु प्रत्येकमधिरोपितैः ॥३४॥
तैः समं शिबिकारूढः स्वयं स **हरिणा** स्तुतः । **स्थापत्यानन्दनः** प्रापनन्दने श्रीजिनान्तिकम् ॥३५॥ युग्मम् ॥
नत्वा विधिवदुन्मुच्य रुच्यमङ्गस्य मण्डनम् । आत्मना कृतलोचं तं दीक्षयामास तीर्थकृत् ॥३६॥
**हरिः** परिच्छदैः साकं स्थापत्याद्या जनाश्च ते । जग्मुर्निजं निजं स्थानं भर्तुः श्रुत्वाऽनुशासनम् ॥३७॥
सोऽपि सामायिकप्रष्ठां द्वादशाङ्गीं किलाखिलाम् । अध्यगीष्ट तपोनिष्ठः **स्थापत्यानन्दनो** मुनिः ॥३८॥
शिष्यैः सह सहस्रेण तैरेव परिवारितः । **श्रीनेमे**राज्ञया सूरिर्विजहार स भूतले ॥३९॥
स **शैलकपुरे पद्मावती**जानिं महानृपम् । प्रबोध्य **शैलकं** चक्रे द्वादशव्रतधारिणम् ॥४०॥
ततः **सौगन्धिका**पुर्यां नीलाशोकवने स्थितः । जातख्यातिर्जनव्रातैरनेकैः स नमस्कृतः ॥४१॥
प्रसिद्धिश्रवणाऽऽक्षिप्तः परिव्राजामुपासकः । तस्मिन् **सुदर्शन**श्रेष्ठी तं नन्तुं कौतुकादगात् ॥४२॥
धर्मं विनयमूलं स श्रेष्ठी श्राद्धजनोचितम् । निशम्य निपुणं भेजे सूरिपार्श्वे **सुदर्शनः** ॥४३॥
तस्य पूर्वगुरुः प्रत्यायातो देशान्तरा**च्छुकः** । वृतो शिष्यसहस्रेणागमत्तन्मूलमुत्सुकः ॥४४॥
विनयेन विना वीक्ष्य स परिव्राट् **सुदर्शनम्** । उवाच वाचमाचार्यात् प्राप्तो धर्मः कुतस्त्वया ॥४५॥
तं परिव्राजकाचार्यं प्रत्युवाच **सुदर्शनः** । धर्माचार्यश्चतुर्ज्ञानी **स्थापत्यासूनु**रत्र मे ॥४६॥
समुत्सुकः शुकः शस्तैः शकुनैः **ससुदर्शनः** । नीलाशोकवनाराममुपाचार्यमुपागमत् ॥४७॥
त्रिधा नानार्थसामान्योपचारवचनैश्छलम् । स्वात्मव्याघातकैर्वाक्यैर्ब्रुवन् जात्युत्तरं च सः ॥४८॥
अनेकान्तार्णवावर्त्तगर्त्तसम्पातकातरः । निरुत्तरतरश्चक्रे **स्थापत्यासूनुना शुकः** ॥४९॥ युग्मम् ॥
मिथ्यात्वोर्ज्जस्विमार्ज्जारदुर्गमे गुरुणा **शुकः** । सम्यक्त्वपञ्जरेऽक्षेपि तत्संशयभयच्छिदा ॥५०॥
शिष्यैः सहाददे दीक्षामथाचार्यान्तिके **शुकः** । द्वादशाङ्गीमधीयाय क्रमेण च महातपाः ॥५१॥
गुरुणाऽपि गुरूकृत्य शिष्यैस्तैरेव संयुतः । अनुज्ञातः **शुका**चार्यो विजहार धरातले ॥५२॥
**पुण्डरीका**चले मासानशनी सपरिच्छदः । **स्थापत्यापत्य**मप्याप निष्पापः परमं पदम् ॥५३॥
विहरंश्च **शुकाचार्य शैलकस्य** पुरं गतः । स्थितो **मृगवनो**द्याने वन्दितोऽभ्येत्य भूभुजा ॥५४॥
**शैलको**ऽपि **शुकाचार्या**त्कर्णामृतकिरं गिरम् । नृपो निशम्य निर्वाणभवदावव्यथोऽजनि ॥५५॥
**मद्रुकं** तनयं राज्येऽभिषिच्य नृपतिर्व्रतम् । **पन्थका**दिमहाऽमात्यपञ्चशत्या सहाऽग्रहीत् ॥५६॥
अधीतैकादशाङ्गोऽथ शैलकोऽपि महातपाः । प्राप्तसूरिपदानुज्ञः पावनीमवनीं व्यधात् ॥५७॥
भूरिकालं विहृत्याऽथ शुकः शिवपदोत्सुकः । सहस्रेण वृतः शिष्यैः **शत्रुञ्जय**गिरिं ययौ ॥५८॥
अवाप्य केवलज्ञानं सोऽपि मासमुपोषितः । जगाम धाम सिद्धानां सिद्धानन्तचतुष्टयः ॥५९॥
अरसैर्विरसैः कालातिक्रान्तैः पानभोजनैः । **शैलकस्या**ऽन्यदा रोगो दुस्सहः सहसाऽभवत् ॥६०॥

---

टि. 1. दानवद्विट् – कृष्णः, तेन ।

विहरन्निह रम्यश्रीस्तपोभिरतिदुस्तपैः । सम्प्राप्तः **शैलक**पुरे तस्थौ **मृगवने** मुनिः ॥६१॥

ज्ञात्वा **मद्रुक**राजोऽपि तं वन्दितुमुपागतः । जीवाजीवादितत्त्वज्ञः परमश्रावकोऽजनि ॥६२॥

शुष्कं रूक्षं कृशं मांसशोणिताभ्यां विवर्ज्जितम् । **मद्रुको**ऽपि गुरुं दृष्ट्वा जगादेति शुचा वचः ॥६३॥

एषणीयैरसावद्यैरौषधैः पथ्यभोजनैः । चिकित्सां कारयिष्येऽहमनुजानीत मां प्रभो ! ॥६४॥

प्रतिश्रुतेऽथ तेनेति प्राणाऽऽचार्योपदेशतः[1] । आचार्यः प्रगुणीचक्रे **मद्रुके**न महीभुजा ॥६५॥

रसादिगारवैर्गृद्धो विजहार यदा न सः । तदैकं **पन्थकं** मुक्त्वा जग्मुरन्ये तपोधनाः ॥६६॥

सोऽन्येद्युः **कार्त्तिके** मासे चतुर्मासकवासरे । प्रदोषे प्रतिचक्राम शयाने निर्भरं गुरौ ॥६७॥

क्रमेण क्षामणाकाले पन्थकः शिरसा गुरुम् । सङ्घट्य पादयोर्मूर्ध्ना दृढनिद्रमबोधयत् ॥६८॥

को मां जागरयामास धृष्टः शाठ्यं चकार कः । इति जल्पन्तमाचार्यं पन्थकः प्रत्युवाच तम् ॥६९॥

धिग् मामहृदयं क्रूरं मूर्द्ध्ना घट्टयता क्रमौ । मया मत्तवृषेणेव येन जागरितो गुरुः ॥७०॥

अभ्युत्थितस्त्वहं पूर्व[१]प्रतिक्रमण[२]कर्मणि । चातुर्मासापराधेभ्यो भदन्त ! क्षमयामि वः ॥७१॥

तं[३] प्रीतिव्रीडितो जातानुशयः शयनोत्थितः । उल्लसज्जीववीर्यश्रीरुज्जगार गिरं गुरुः ॥७२॥

अहो दुष्कर्मणां शक्तिरहो मोहबलं महत्[४] । यद् गौरवत्रयेणाऽहमप्येवं हेलया जितः ॥७३॥

प्रदोष इव चन्द्रेण मणिनेव फणीश्वरः । मूर्द्धन्येन त्वयैवेह नीतोऽस्मि श्लाघ्यतामहम् ॥७४॥

विद्यामयः स निर्विद्य स्थिरीभूयाऽथ संयमे । विजहार पुनः पुण्यपरिणाम इवाऽवनौ ॥७५॥

रत्नैरिव चिरत्नैश्च[2] स्वीकृतः स तपोधनैः । रेजे भूयो नभोभाग इव भासुरतारकः ॥७६॥

सोऽपि कालेन पूर्णायुः **पुण्डरीकाद्रि**मागतः । शिष्यपञ्चशतीयुक्तः केवली प्राप निर्वृतिम् ॥७७॥

मन्तव्यं **शैलके**नेव शिष्यस्याऽपि हितं वचः । **पन्थके**नेव शिष्येण न त्याज्यो विनयो गुरौ ॥७८॥

**इति शैलक-पन्थककथानकम् ॥**

**शैलकाचार्य**स्य श्रुतनिधेरपि शीतलत्वं च नाऽसम्भाव्यम् । यतः-

**''नृणां गुणात्मनां दोषः क्रियते कर्मणा द्विषा ।**
**यदेष नन्दिषेणर्षेरप्यभूद्विषयादरः'' ॥१॥** [ ] एतदेवाह–

**दस दस दिवसे दिवसे, धम्मे बोहेइ अहव अहिअयरे ।**
**इय नंदिसेणसत्ती, तह वि य से संजमविवत्ती ॥२४८॥**

**दश दश** जनान् **दिवसे दिवसे** प्रतिदिवसं **धर्मे बोधयति** नियम एषः । कदाचिदाधिक्यमपि स्यादित्याह–अथवा **अधिकतरान्** इत्येवंरूपा **नन्दिषेणस्य शक्तिस्तथापि से** तस्य **संयमविपत्ति**श्चारित्रलोप इत्यक्षरार्थः ॥२४८॥ भावार्थाय कथानकम् । तथाहि–

---

१. पूर्व - KH । २. पर्वणि - A, D, K, H, KH, B, C, L । ३. तं च प्रवी...C, तं प्रति - B, A, तं व्रति K । ४. जगत् - P ।

टि. 1. प्राणाचार्यः - वैद्यः । २. [चिर-परुत्परारेस्त्नः] ६।३।८५ हेम० सूत्रेण त्न प्रत्ययः, पुराणैः रत्नैः इव ।

## [ नन्दिषेणकथानकम् ॥ ]

आसीत्पुरा पुरे क्वाऽपि कोऽपि विप्रो **मखप्रियः** । न्ययुङ्क्त दासमासन्नकार्याय स मखेऽन्यदा ॥१॥
दासस्तमभ्यधादेष मखशेषमशेषतः । सदा ददासि यदि मे तेन तिष्ठामि नाऽन्यथा ॥२॥
विप्रोऽपि प्रतिपेदे तदेतदीयं तदा वचः । लब्धं लब्धं तु साधुभ्यो ददौ दासः सदा स तत् ॥३॥
तैः पुण्यैः स दिवं गत्वा च्युत्वा **राजगृहे** पुरे । बभूव नन्दनो **नन्दिषेणः श्रेणिक**भूपतेः ॥४॥
**मखप्रियः** स विप्रस्तु भ्रान्तो भूरिषु योनिषु । क्वाऽप्यरण्ये करिण्येका तदा तमुदरे दधौ ॥५॥
अथ यूथस्य नाथोऽयं मा भूदिति धिया पुनः । यूथान्तर्यूथपो जातं जातं हन्ति स्म दन्तिनम् ॥६॥
ततः सा दन्तिनी दध्यौ जघन्येन निजघ्निरे । पुत्ररूपाणि ना[1]ऽनेन पत्याऽपत्यानि कानि मे ॥७॥
हृदुत्साहेन जानामि [2][1]नामितारिः समुन्नतः । इदानीं नन्दनो भावी जातस्त्रातव्य एव सः ॥८॥
इति निश्चित्य दुर्वातजातभङ्गपदेव सा । आनुपूर्व्या ययौ दूरे मन्दं मन्दममन्दधीः ॥९॥
असावन्यस्य वन्यस्य भोग्या भून्मा स्म कुम्भिनः । इति तां मन्दसञ्चारो वारणः स्म प्रतीक्षते ॥१०॥
साऽतिमन्दं प्रयाति स्म मिलति स्म गजेशितुः । यामेन यामयुग्मेन दिनेन द्विदिनेन वा ॥११॥
चिरादपि वराकीयमेतीत्यस्यां स यूथपः । अभूदुज्जृम्भिविश्रम्भो **दम्भो वञ्चयते न किम्**[3] ॥१२॥
दवीयःप्रदवीभाजि कदापि द्विपयूथपे । मौलिस्थतृणपूलाऽथ प्राप सा तापसाश्रमम् ॥१३॥
विनमन्तीं [4]पदामन्ते करिणीं शरणार्थिनीम् । मत्वैनां मुनयः प्रोचुः पुत्रि ! तिष्ठेह निर्भया ॥१४॥
अथेह तस्थुषी वन्या धन्यंमन्या मतङ्गजी । गजं लक्षणसामग्र्यमिवोद्धूतमसूत सा ॥१५॥
तमाश्रमाऽवनौ सूनुं मुक्त्वा यूथं जगाम सा । पयः पाययितुं बालमाययौ चान्तरान्तरा ॥१६॥
तापसैर्ग्रासतोऽवर्द्धि [2]प्रवृद्धयुवबालकैः । पौत्रपुत्रकमित्रेतिवाग्भिः स कलभः क्रमात् ॥१७॥
लतातततिजटाजूटो हस्तपर्यस्तिकाग्रहः । ध्यानेनैवाऽचलस्तस्थौ समीपे स तपस्विनाम् ॥१८॥
करे करण्डमादाय साकं मुनिकुमारकैः । ययौ पुष्पफलाद्यर्थं तच्चेष्टाकौतुकी पथि ॥१९॥
पूरं पूरं पयःपूरैः स करी करकोटरम् । वृक्षान् सिञ्चन् मुनिव्रातैरूचे **सेचनका**भिधः ॥२०॥
क्रमेण विक्रमेणाढ्यशक्तिमाल्लँक्ष्यलक्षणः । स ध्वनिध्वनिताऽद्रीन्द्रनिकुञ्जः कुञ्जरोऽभवत् ॥२१॥
अयं नदी[5]मदीनात्मा पयः पातुं गतोऽन्यदा । यूथपं पितरं प्रेक्ष्य हत्वा चाऽजनि यूथपः ॥२२॥
आश्रमेऽहं छलेनेह प्रवृद्धो यत्पितुर्व्यधाम् । दधातु मातुर्वैगुण्यान्मत्सुतस्तन्ममापि मा ॥२३॥
इति ध्यात्वैष दुर्बुद्धिर्दन्ती तं तापसाश्रमम् । बभञ्ज किमकृत्यं वा पितृप्राणाऽपहारिणाम् ॥२४॥
दुर्मत्तो दास्यति स्थातुं नाऽयमत्रेति तापसाः । **श्रेणिकाय** तमाचख्युर्वारणं सर्वलक्षणम् ॥२५॥

---

१. नान्येन – KH नान्येत – D नानेत K नागेन – B । २. नमितारिसमुन्नतः C, A नमितारिः समु...K, D, L, B, H, KH । ३. कम्– C, KH, K, D । ४. पदामर्थे – P यदानन्ते – A, B । ५. महीना – KH नदीना – D, K ।

टि. 1. नामिताः अरयः शत्रवः येन सः नामितारिः । 2. पौत्रइतिवाग्भिः प्रवृद्धैः, पुत्रकइतिवाग्भिः युवभिः, मित्रइतिवाग्भिः बालकैः स अवर्द्धि ।

कौतुकस्यादिभिः[1] साकं सादिभिर्नन्दनैरपि[१] । ससेनाङ्गो जगामाऽयं तां वनीमवनीपतिः ॥२६॥
यूथे भयेन भग्नेऽथ शूरो दूरोल्लसत्करः । प्रारब्धः सैनिकै रोद्धुं योद्धुं सोऽधावत द्विपः ॥२७॥
राजवाह्य इव ग्राह्यः स ह्यसह्योऽपि हस्तिराट् । नाऽतो युयुधिरे धीराः सहाऽनेन महाऽऽयुधैः ॥२८॥
बलिभिर्बलिभिर्मर्माविद्भिरुद्यत्त्वरैर्नरैः । खेदितोऽपि न खिन्नोऽयं चिरेणाऽपि रणोत्कटः ॥२९॥
खिन्नेषु तेषु सर्वेषु कुमाराः कौतुकप्रियाः । तमेत्य तर्जयामासुर्भासुरध्वनिदुर्द्धराः ॥३०॥
स नादं **नन्दिषेण**स्याऽऽकर्ण्य निर्वर्ण्य[2] तं पुनः । अवधिज्ञानविज्ञातप्राक्सम्बन्धः शमं दधौ ॥३१॥
मुष्टित्रयेण तं **नन्दिषेणः** कक्षावलम्बनात् । आरोहदपरा[२]न्यस्तचरणः करिणं रयात् ॥३२॥
कलयन् सकलाः केलिकलाः स तु चतुष्कलः[3] । **नन्दिषेण**[३]गिराऽऽलानं सुशिक्षित इवाश्रितः ॥३३॥
बबन्ध गन्धनागस्य तस्य मूर्ध्नि स्वयं नृपः । माणिक्यपट्टं तत्कुम्भसर्पिश्रीदर्पणोपमम् ॥३४॥
**नन्दिषेणः** सदानन्दी तमनन्यवशं गजम् । हेलया खेलयामास सितेभमिव वासवः ॥३५॥
कदापि भवसन्तापिविश्वपीयूषवारिदः । अलञ्चकार श्री**वीर**स्तत्पुरोद्यानमेदिनीम् ॥३६॥
यावदुक्तः प्रणामाय प्रगुणोऽभूत्स भूपतिः । एत्य तावदवन्दिष्ट नन्दिषेणो जगद्गुरुम् ॥३७॥
स पप्रच्छ प्रभुं किं मां प्रति प्रीतिकरः[४] करी । आख्यच्च सकलं स्वामी तद्वृत्तं प्राग्भवोद्भवम् ॥३८॥
एत्य शक्रमहीशक्रादयस्तदनुवेगिनः । मुदाऽऽवेशेन तीर्थेशं नामं नाममुपाविशन् ॥३९॥
अथाऽऽस्यदर्शिनो भर्तुर्देशनां शुश्रुवुर्जनाः । दृक्कर्णान्तर्मुहुर्गच्छदागच्छदखिलेन्द्रियाः ॥४०॥
मेघनिर्घोषया भर्तुस्तया देशनया जनः । प्रबुध्य मोहनिद्रातो विद्राणः पापपन्नगात्[५] ॥४१॥
प्रणम्याऽथ प्रभुं जग्मुर्जना वेश्म निजं निजम् । **नन्दिषेण**स्ततो दध्यौ प्राग्भवश्रवणस्मितः ॥४२॥
यदाराधनशुद्धस्य साधोर्दानादि यत्फलम् । स्वयं तपस्तदाराद्धं कियद्दास्यति तत्फलम् ॥४३॥
स विमृश्येदमापृच्छ्य महीनाथं व्रताग्रही । कृती चरमतीर्थेशचरणेभ्यो मुदाऽचलत् ॥४४॥
चारित्रावरणं कर्म कर्म भोगफलं च ते । विद्यतेऽद्यापि दीक्षायै मा भूर्वत्स ! तदुत्सुकः ॥४५॥
इति श्रुत्वा वियद्वाणीमप्रमाणीचकार सः । धर्मारामस्य तत्कर्म किं मे कर्त्तेति चिन्तया ॥४६॥ युग्मम् ॥
ययौ जिनं [६]जिनेनाऽपि वार्यमाणोऽप्ययं तथा । जग्राह सहसा दीक्षां करेणाऽहिमिवार्भकः ॥४७॥
अप्रमादी सृजन् षष्ठाष्टमादीनि तपांसि सः । विजहारानुनाथं दिग्हारानुकृतिकीर्त्तिभाक् ॥४८॥
स रेमे सूत्रसूत्रार्थभावनापावनात्मकः । परीषहाणां सहने कर्मद्रुदहनेऽन्वहम् ॥४९॥
अथोद्भवन्तीं भोगेच्छां भोगकर्मोदयादयम् । रोद्धुं तपोभिराकाङ्क्षत् तटिनीमेव सेतुभिः ॥५०॥
आतापनास्तपश्चोच्चैः स चकार यथा यथा । लब्धिवद्ववृधे तस्य भोगतृष्णा तथा तथा ॥५१॥

---

१. रथ P । २. न्यस्तचरणं – C । ३. कलालानं – P । ४. प्रीतिपरः A, B, C, KH, L । ५. प्रापपन्नगात् – P । प्रापन्नगात् – L । ६. जनेनापि – P ।

टि. 1. कौतुकस्य इव स्यदः वेगः अस्य अस्ति इति इनि, तैः, वेगार्थे स्यदशब्दः [स्यदोजवे] ४।२।५३ इत्यनेन निपातितः । 2. निरूप्य, आलोक्य इति यावत् । 3. चतुष्कलः – हस्ती ।

इन्द्रियेषु विकुर्वत्सु बलेन प्रबलेष्वथ । समुद्बन्ध रोषेण **नन्दिषेणस्तदुच्छिदे** ॥५२॥
चारित्रवारिणी बन्धच्छेदं चक्रेऽस्य देवता । शस्त्राणि तस्य सा मृत्यूत्कण्ठितस्य व्यकुण्ठयत् ॥५३॥
मृत्यूपायानितिप्रायान् सा तस्य शतशोऽहरत् । तदयं गिरिमारुह्य झम्पासम्पातमातनोत् ॥५४॥
ततः पतन्तमन्तस्तं धृत्वाऽवोचत देवता । तदा नभस्थयोक्तं यन्मया स्मरसि तद्वचः ॥५५॥
किं मुधोत्तिष्ठसे मर्तुं कर्म भोगफलं यतः । अभुक्त्वा मूढ ! तद्भङ्क्तुं शक्तास्तीर्थकृतोऽपि न ॥५६॥
तयेत्युक्तो धृतैकाकिविहारपरिकर्मणः[1] । षष्ठात्पारणकं कर्तुं भिक्षायै निर्जगाम सः ॥५७॥
अनाभोगवशाद् वेश्यावेशदेशप्रवेशकृत्[१] । स धर्मलाभ इत्युच्चैरुवाच वचनं मुनिः ॥५८॥
वेश्याप्याह सहासेयं धर्मलाभेन किं मम । शर्मलाभं धनेनाहमीहेय प्रत्यहं यतः ॥५९॥
मामियं हसतीत्येष तन्नीव्रतृणकम्पनात् । रत्नानीह तपोलब्धेरब्धेरिव विकीर्णवान् ॥६०॥
शर्मलाभो धनेनायं तवाऽस्त्विति निगद्य सः । निर्जगाम मुनिर्वेश्याऽनुजगाम जगाद च ॥६१॥
किं ते तपोभिर्मृदुताजितपुष्कर ! दुष्करैः । भोगान् भुङ्क्ष्व मया प्राणभर्त्तर्मर्तव्यमन्यथा ॥६२॥
तामालोक्य मुनिर्भोगकर्मरोगमहौषधीम् । अप्रियामप्यसौ मेने प्रियामिव करोतु किम् ॥६३॥
दश पुंसो दिने यत्र बोधयिष्यामि न स्वयम् । तत्राऽऽदास्ये पुनर्दीक्षां प्रतिज्ञायेति स स्थितः ॥६४॥
मुक्तर्षिलिङ्गः स तयाऽन्वहं भोगानभुङ्क्त च । दश प्रैषीच्च दीक्षायै प्रबोध्याऽनुजिनं जनान् ॥६५॥
भोगकर्मण्यथ क्षीणे तस्य बोधयतो जनाः । नवाऽबुध्यन्त नाऽबुद्ध दशमो भृशमोहधीः ॥६६॥
काले रसवतीं कृत्वा संहूतो वेश्यया मुहुः । असम्पूर्णप्रतिज्ञत्वात् भोक्तुमभ्युत्थितो न सः ॥६७॥
दशमं टक्कजातीयं तस्मिन् बोधयति व्यधात् । प्रथमेऽन्ने हिमीभूते वेश्या रसवतीं नवाम् ॥६८॥
पुनर्भोक्तुं तयाऽऽहूतः सोऽब्रूत सुकृती कृती । दशमोऽहं महामोहं हित्वाऽस्म्यद्याऽऽदृतव्रतः ॥६९॥
अवधूय वधूमेनामध्वधूलिमिवानिलः । स पुनः स्वामिसामीप्यवर्त्ती भूत्वाऽऽदित व्रतम् ॥७०॥
आलोचितप्रतिक्रान्तताद‍ृग्दुश्चरितस्ततः । तपस्तप्त्वोज्ज्वलं प्राप **नन्दिषेणः** क्रमेण गाम्[2] ॥७१॥

**इति नन्दिषेणकथानकम् ॥**

अत्रार्थे कर्मशक्तिमेव समर्थयन्नाह—

**कलुसीकओ य किट्टीकओ य, खउरीकओ मलिणिओ य ।**
**कम्मेहिं एस जीवो, नाऊण वि मुज्झई जेण ॥२४९॥**

**कलुषीकृतश्च** वाताऽऽवर्त्तविवर्त्तितरजोगुण्ठितशरीरवत्, अनेन कर्मणः स्पृष्टावस्थां लक्षयति । **किट्टीकृतश्च** चिक्कसतां नीतः श्लक्ष्णतमरजःपरागपरामृष्टघर्माविलकलेवरवत्, अनेन बद्धावस्था सूचिता । **खपुरीकृतश्चा**न्योन्याऽनुवेधेन लोलीभूतः पारदमिश्रसुवर्णचूर्णवत्, अनेन निधत्ताऽवस्थामाह । **मलिनितः** सर्वथा स्वरूपत्यागेन मलरूपतामानीतो, गुह्यनागविद्यया नागी[3]भूतसुवर्णवत्, अनेन निकाचितावस्थामाह । कैरित्याह-

१. वेश्यावसतेप्रवेश - K, D वेश्यावेशादथप्रवेशकृत् - B, वेश्मावेशदेश....KH वेश्यावेश्यादश...H ।

टि. 1. धृतैकाकिविहारपरिकर्मणा येन सः । 2. गो(पुं०) स्वर्गः, तम् । 3. नागम् - सीसकम् ।

**कर्मभि**र्ज्ञानावरणीयादिभि**रेष** स्वसंवेदनादिभिः प्रमाणैः सिद्धो **जीवः**, अत्रोपपत्तिमाह–**ज्ञात्वापि** परमार्थं **मुह्यति** मोहं याति **येन** हेतुनेति ॥२४९॥

इदमेव सदृष्टान्तमाह–

**कम्मेहिं वज्जसारोवमेहिं जउनंदणो वि पडिबद्धो[१] ।**
**सुबहुं पि विसूरंतो, न तरइ अप्पक्खमं काउं ॥२५०॥**

**कर्मभिर्वज्रसारोपमै**र्निबिडनिकाचितै**र्यदुनन्दनोऽपि** विष्णुरपि यः किल भगवदरिष्टनेमिव्याख्यानामृतसमुद्रनिर्भरावस्थानैकरसो, निजकुमारीविवाहविधानेऽप्युदासीनोऽष्टादशसहस्रसङ्ख्यस्य भगवत्परिवारस्य भाववन्दनकदानेन उद्वर्त्तितसप्तमनरकायुर्जन्तुसन्तानाऽऽकुलं प्रावृट्कालं कृतदेशावकाशिकतया निशान्त[1]देशाद्बहिर्निस्सरन्, नित्यसेवकानामपि राजलोकानां दर्शनमददानः, परेषामपि प्रव्रज्योद्यतानां स्वाऽपत्यानामिव महोत्सवेन स्वकीयाया राज्यश्रियः साफल्यं मन्वानो, निरन्तरमनन्यबहुमानाद्भगवन्तमेवोपासीनः, समीचीनशुद्धदृष्टिर्बभूव आस्तामन्यः सोऽपि एवंविध इत्यपिशब्दार्थः **प्रतिबद्धः** कर्मभिरेव पाशैः परवशीकृतः, **सुबह्वपि** तेषु तेषु दुर्दशादुःखेषु मनसा **खिद्यमानो, न तरति** न शक्नोति **आत्मक्षमं** स्वहितं **कर्तुं** वर्त्तमाननिर्देशः श्रुतार्थस्य त्रैकालिकत्वख्यापनार्थ इति । कथानकं प्रागुक्तमेव ॥२५०॥

संश्लिष्टकर्मविपाकमेव सदृष्टान्तमाह–

**वाससहस्सं पि जई, काऊणं संजमं सुविउलं पि ।**
**अंते किलिट्ठभावो, न विसुज्झइ कंडरीओ व्व ॥२५१॥**

**अप्पेण वि कालेणं, केइ जहागहियसीलसामन्ना ।**
**साहंति निययकज्जं, पुंडरीयमहारिसि व्व जहा ॥२५२॥**

**वर्षसहस्रमपि यतिः कृत्वा संयमं सुविपुलमपि अन्ते** मरणावसाने **क्लिष्टभावो**ऽशुद्धपरिणामो **न विशुध्यति कण्डरीकवदिति** ॥२५१॥ **अल्पेनापि कालेन केचि**न्महासत्त्वा **यथागृहीतशीलश्रामण्या** गृहीतशीलश्रामण्यस्यानतिक्रमेण वर्त्तमानाः सन्तः **साधयन्ति निजम्** आत्ममात्रैकोपयोगयोग्यत्वादात्मीयं परलोकहितं **कार्यं** सद्गतिरूपं **पुण्डरीकमहर्षिरिव यथा** ॥२५२॥ अनयोश्च कथा श्री**वज्रस्वामि**चरितारम्भे श्री**गौतमस्वामि**मुखेनैवोक्ता ।

यः सङ्क्लिष्ट एव कालं करोति स एव दुर्गतिभागी स्यादित्युक्त्वा, यस्तु सङ्क्लिष्टताया भूयः प्रतिक्रामति, तस्याऽपि तद्भूयसा दुष्करमित्याह–

**काऊण संकिलिट्ठं, सामन्नं दुल्लहं विसोहिपयं ।**
**सुज्झिज्जा एगयरो, करिज्ज जइ उज्जमं पच्छा ॥२५३॥**

**कृत्वा सङ्क्लिष्टं श्रामण्यं** पूर्वं, पश्चात् **दुर्ल्लभं विशुद्धिपदं शुद्ध्येदेकतरः** कश्चित्कर्मविवरात्**कुर्याद्यदि उद्यमं पश्चात्** न पुनरन्यथेति ॥२५३॥ दुर्लभतायां हेतुमाह–

---

१. पडिबुद्धो - B ।

टि. 1. निशान्तः–अन्तःपुरम् ।

**उज्झेज्ज अंतरे च्चिय, खंडियसबलादउ व्व होज्ज खणं ।**
**ओसन्नो सुहलेहड, न तरिज्ज व पच्छ उज्जमिउं ॥२५४॥**

**उज्झेत्** त्यजेत् **अन्तर एव** जीवितापान्तराल एव, संयममिति प्रक्रमाद् गम्यम् । **खण्डितशबलादयो** वा भवेयुः **क्षणं** खण्डिता एकादिमूलगुणविराधनया शबला विराधनाया अभावेऽप्यतिक्रमादिभिः । प्रभूतातिचाराः संयमास्तात्स्थ्यात् तद्व्यपदेशेन संयता वा आदिशब्दात् सर्वाऽश्रामण्यभाजो वा तत**श्चावसन्नः सुखलिप्सुः** सातलम्पटो **न शक्नुयाद्वा पश्चादुद्यन्तुम्** उद्यमं कर्तुमिति ॥२५४॥ तथाहि–

**अवि नाम चक्कवट्टी, चएज्ज सव्वं पि चक्कवट्टिसुहं ।**
**न य ओसन्नविहारी, दुहिओ ओसन्नयं चयइ ॥२५५॥**

**अपि नाम** सम्भाव्यते एत**च्चक्रवर्त्ती भरतादिस्त्यजेत्सर्वमपि चक्रवर्त्तिसुखं** शुद्धविवेकत्वात् । **न चाऽवसन्नविहारी दुःखितो**ऽपिशब्दस्य गम्यत्वात्, कष्टप्राप्तोऽपि **त्यजति अवसन्नतां** गुरुकर्मतया उपहतत्वादिति ॥२५५॥

तदेवमिहास्ति पश्चादप्युद्यमविधानेन सङ्क्लिष्टस्याऽप्युपायः परलोके दुर्गतौ पुनर्नास्त्येवेत्यत्र दृष्टान्तः ।

**[ शशि-सूरप्रभकथानकम् ॥ ]**

पत्तने **पाटलीपुत्रे जितारे**र्जगतीपतेः । **शशी सूरप्रभ**श्च द्वावभूतां तनुसम्भवौ ॥१॥
आगात्तत्र चतुर्ज्ञानी वाग्मिनां परमावधिः । मुनि**र्विजयघोषा**ख्यः साक्षादिव जिनागमः ॥२॥
तं वन्दितुं तदा राजसुतावाजग्मतुर्गुरुम् । स्पष्टमाचष्ट धर्मं च सोऽप्यायतिहितं तयोः ॥३॥
लघुकर्मतयाऽबोधि लघुः **सूरप्रभ**स्तथा । न गुरुर्गुरुकर्मा तु धर्माऽध्वविमुखः शशी ॥४॥
अथाऽऽवासगतेनाऽशु लघुनाऽभिदधे गुरुः । विरज्य युज्यते भ्रातर्व्रतमादातुमावयोः ॥५॥
शशी कर्मवशीभूतोऽब्रूतोद्यतममुं तथा । जडस्त्वमिव नैवाऽह[१]महो मोहो [२]नवस्तव ॥६॥
ऐहिकं सुखमुत्सृज्य केयमामुष्मिके स्पृहा । वरमद्य कपोतोऽस्तु श्वो मयूरे न मे रतिः ॥७॥
इदं राज्यमियं लक्ष्मीरिमास्तरललोचनाः । [३]सर्वं दृष्टमदृष्टार्थे सकर्णः को विमुञ्चति ॥८॥
असन्दिग्धाः श्रियः प्राप्ताः पुनःप्राप्तौ न निश्चयः । नाऽहं हस्तगतं पादगतं कुर्वीय सर्वथा ॥९॥
ख्यापिते भववैरस्ये स्थापिते मोक्षजे सुखे । कथञ्चिदपि नाऽबुद्ध सैष राजा शशिप्रभः ॥१०॥
**सूरप्रभो**ऽथ निर्विद्य दीक्षामादाय सद्गुरोः । आराध्य संयमं कालाद् **ब्रह्मलोके**सुरोऽजनि ॥११॥
**शशिप्रभो**ऽपि भोगेषु गृद्धो वैषयिकैः सुखैः । अतृप्तः पृथिवीं भेजे [1]तृतीयां कालयन्त्रितः ॥१२॥
[2]**सूरदेवो**ऽपि तद्बोधं विधित्सुस्त्रिदशालयात् । स्वभ्रातुः प्रतिबन्धेन [3]श्वभ्राऽन्तः स्वयमाविशत् ॥१३॥
निशम्य धर्म्यां तद्वाचमर्दितो नारकार्त्तिभिः । क्षयोपशमतो जानन् विभङ्गेन भवं निजम् ॥१४॥

---

१. महामोहो – A माहामोहो – B । २. नवस्तवः – K, नवस्तथा – KH, L । ३. सर्वदृष्टम – D, K, B ।

टि. 1. तृतीयां नरकपृथ्वीं भेजे इत्यर्थः । 2. सूरप्रभदेवः इत्यर्थः । 3. नरकमध्ये इत्यर्थः ।

दृष्ट्वाऽस्य त्रैदशीमृद्धिमनुतप्तो विनिश्वसन् । शशी सूरमुवाचेति द्विषन्नात्मकलेवरम् ॥१५॥ युग्मम् ॥
ममाऽनुकम्पया गच्छ सद्यो मुक्तं मयाऽधुना । कशाभिः कण्टकैः क्षारैर्मद्वपुर्व्यर्थ्यतां त्वया ॥१६॥
तत्पीडाभीरुणा भ्रातर्नाऽऽतेने तत्तदा तपः । अधुनाऽपि तपो मेऽस्तु कलेवरकदर्थनात् ॥१७॥
देवः **सूरप्रभो**ऽवादीदयं मोहोऽधुनाऽपि ते । **वपुःकष्टं तपः स्याच्चेन्नारकास्तत्तपोधनाः** ॥१८॥
किं चाऽष्टप्रातिहार्यश्रीपरमैश्वर्यराजिनः । जिना निर्वृजिनास्ते तु किं तवाऽविरता मताः ॥१९॥
क्षायोपशमिके भावे तपो रत्नत्रयात्मकम् । [1]वेदनौदयिके भावे तयोरेकात्मता कुतः ॥२०॥
[2]चतुर्थाऽस्नानलोचादि ब्रह्मचर्यात्मकं तपः । शमादिगर्भः सर्वोऽयं [3]संवरः खलु वर्ण्यते ॥२१॥
अप्राप्ति-पारवश्यादिसमुत्थैस्तु [4]क्षुधादिभिः । भावेनौदयिकेनैता वेदनाः स्युः शरीरिणाम् ॥२२॥
निर्जरियमकामैव सकामा तु तपोरसात् । न सा न सा च देहस्याऽचेतनस्य कदर्थनात् ॥२३॥
चेतनस्यैव सौख्यानि चेतनस्यैव यातना । अधुना तु मुधाऽङ्गस्य यातना चेतनामृते ॥२४॥
किं चाऽपराद्धं कायेन तस्मै क्रुध्यति यद्भवान् । पञ्चभ्यो बन्धहेतुभ्यस्त्वं कुप्य यदि कुप्यसि ॥२५॥
यन्मिथ्यात्वमविरतिः प्रमादौघः क्रुधादयः । योगाश्च कर्मणां जन्तोः [5]पञ्चामी बन्धहेतवः ॥२६॥
तदुच्छेदाय कर्त्तव्यः प्रयत्नस्तद्विवेकिना । **शशिनं** शिक्षयित्वेति दिवं देवोऽगमत् पुनः ॥२७॥

**इति शशि-सूरप्रभकथानकम् ॥**

इदमेवाह—

**नरयत्थो ससिराया, बहुं भणइ देहलालणासुहिओ ।**
**पडिओ मि भए भाउअ !, तो मे जाएहि तं देहं ॥२५६॥**

**नरकस्थः शशिराजा बहु** प्रभूतं **भणति**, यदुत **देहलालनासुखितः** सन् **पतितोऽस्मि भये** नरकोपपाताऽऽविर्भावरूपे । हे **भ्रातः ! ततो मे** मम सम्बन्धिनं **यातय** पीडय **तं देह**मिति ॥२५६॥

देव उवाच—

**को तेण जीवरहिएण संपयं, जाइएण होज्ज गुणो ।**
**जइ सि पुरा जायंतो, तो नरए नेव निवडंतो ॥२५७॥**

**कस्तेन जीवरहितेन साम्प्रतं यातितेन भवति गुणः** ? न कश्चिदित्यर्थः । **यदि असि** त्वं **पुरा अयातयिष्य**स्तप-श्चरण-करणै**स्ततो नरके नैव अपतिष्य** इति ॥२५७॥

तदिदमवेत्य कृत्यमुपदिशति—

**जावाऽऽउ सावसेसं, जाव य थेवो वि अत्थि ववसाओ ।**
**ताव करेज्जऽप्पहियं, मा ससिराया व सोइहिसि ॥२५८॥**

**यावदायुः सावशेषं जीवितं** किञ्चिदास्ते, **यावच्च स्तोकोऽप्यस्ति व्यवसायः** शरीरेन्द्रियविषयः परिस्पन्दः शक्तिविशेषः **तावत् कुर्यादात्महितं मा शशिराजवत् शोचिष्यसीति** ॥२५८॥

---

१. वेदनौपधिके – C । २. चतुर्थम्लान – B । ३. संवरात् – KH । ४. क्रुधादिभिः K, B, A, D । ५. पश्यामी – C ।

तथाहि—

**घेत्तूण वि सामन्नं, संजमजोएसु होइ जो सिढिलो ।**
**पडइ जई वयणिज्जे, सोयइ य गओ कुदेवत्तं ॥२५९॥**

न केवलमकृतधर्मैव शोचति, यावद् **गृहीत्वाऽपि श्रामण्यं संयमयोगेषु भवति यः शिथिलः** प्रमादी **पतति यतिर्वचनीये** निन्दायोग्यतायां **शोचति च गतः कुदेवत्वं** किल्बिषिकादिभावम् 'हा किं मया मानुषादिसामग्रीमवाप्याऽपि ईदृशमनुष्ठितमिति ॥२५९॥ यतः—

**सोच्चा ते जियलोए, जिणवयणं जे नरा न जाणंति ।**
**सोच्चाण वि ते सुच्चा, जे नाऊणं न वि करेंति ॥२६०॥**

**शोच्यास्ते जीवलोके ये नरा जिनवचनं न जानन्ति** । नरत्वस्य निर्विवेकत्वेन पशुनिर्विशेषत्वात् । **शोच्यानामपि** मध्ये **ते शोच्याः** कृपास्पदं **ये ज्ञात्वाऽपि** प्रवचनं **नैव कुर्वन्ती**ति ॥२६०॥

कथमेवमित्याह—

**दावेऊण धणनिहिं, तेसिं उप्पाडियाणि अच्छीणि ।**
**नाऊण वि जिणवयणं, जे इह विहलंति धम्मधणं ॥२६१॥**

**दर्शयित्वा धननिधिं** रत्नादिनिभृतभृतभाजनं **तेषां** जाल्मानाम**मुत्पाटितानि** उद्धृतानि **अक्षीणि** लोचनानि **ज्ञात्वापि जिनवचनं ये इह** लोके **विफलयन्ति** धर्म एव सद्गतिसम्पत्तिहेतुत्वाद्धनं **धर्मधनं** तत्राऽप्रवृत्तेरिति ॥२६१॥

तत्राऽपि भवितव्यतैव हेतुरित्याह—

**ठाणं उच्चुच्चयरं, मज्झं हीणं व हीणतरगं वा ।**
**जेण जहिं गंतव्वं, चेट्ठा वि से तारिसी होइ ॥२६२॥**

**स्थानं** पदम् **उच्चं** देवत्वम् **उच्चतरं** मोक्षाख्यं **मध्यं** मानुष्यकाख्यं **हीनं वा** तिर्यक्त्वं **हीनतरं वा** नारकत्वं **वा**शब्दौ तद्गताऽनेकभेदसंसूचकौ, **येन** जीवेन **यत्र** देशे काले वा **गन्तव्यं चेष्टाऽपि से** तस्य **तादृशी** तदनुरूपा **भवती**ति ॥२६२॥

तामेव दुर्गतिहेतुं चेष्टां तावदाह—

**जस्स गुरुम्मि परिभवो, साहूसु अणायरो खमा तुच्छा ।**
**धम्मे य अणहिलासो, अहिलासो दुग्गईए उ ॥२६३॥**

**यस्य गुरौ परिभवः** यो गुरुविषयम् अभिभवं करोतीत्यर्थः । **साधुषु अनादरो** नञः पर्युदासतया, अवज्ञा **क्षमा तुच्छा** अल्पा नास्ति वा । **धर्मे** श्रुतचारित्रात्मके**ऽनभिलाषो**ऽनिच्छा । यत्तदोर्नित्याभिसम्बन्धात्तस्या**ऽभिलाषः** परमार्थतो [1]**दुर्गतावेव तु**रवधारणे, तया चेष्टया स दुर्गतिमिच्छतीति । चारित्रात्मनो व्रतिनोऽप्येवमुक्तम् । गृहस्थस्तु य एवं स दुर्गतितोऽप्यधिकं वाञ्छतीति ज्ञेयम् ॥२६३॥ व्यतिरेकमाह—

१. दुर्गतेरेव - C ।

**सारीरमाणसाणं, दुक्खसहस्सवसणाण[१] परिभीया ।**

**नाणंकुसेण मुणिणो, रागगइंदं निरुंभंति ॥२६४॥**

**शारीरमानसेभ्यो दुःखसहस्रव्यसनेभ्यो** विविधपीडाऽऽपद्भ्यः, पञ्चम्यर्थे षष्ठी । **परिभीतास्त्रस्ताः** सन्तो **ज्ञानाङ्कुशेन मुनयो रागगजेन्द्रम्** उच्छृङ्खलं सन्तं **निरुन्धन्ति** । तदुच्छेदेनैव भवोच्छेदसिद्धेर्मोक्षमभिलषन्तीति भावः ॥२६४॥

ज्ञानमूलतया मोक्षाऽवाप्तेर्ज्ञानदातैव पूज्य इत्याह—

**सोग्गइमग्गपईवं, नाणं दिंतस्स हुज्ज किमदेयं ? ।**

**जह तं पुलिंदएणं, दिन्नं सिवगस्स नियगच्छि ॥२६५॥**

**सुगतिमार्गप्रदीपं** मोक्षपथोद्द्योतकं **ज्ञानं ददते भवेत् किं अदेयं** तस्मै गुरवे जीवितमपि देयमेव । अत्र दृष्टान्तः—**यथा तत्पुलिन्दकेन दत्तं** वितीर्णं **शिवकाय** शिवनाम्ने दैवताय **निजकं** स्वकीय**मक्षि** लोचनमिति ॥२६५॥ अत्र कथानकम्—

**[ शिव-पुलिन्दककथानकम् ॥ ]**

उप**विन्ध्यं** महाटव्यां कुत्रचिद् गिरिगह्वरे । कन्दरान्तः **शिवस्या**ऽऽसीन्मूर्त्तिः व्यन्तररक्षिता ॥१॥
आसन्नग्रामतः कश्चिन्नित्यमागत्य धार्मिकः । नाम्ना **मुग्धगण**स्तस्य प्रातरातनुताऽऽनतिम् ॥२॥
सम्मार्ज्य गोमुखं[1] कृत्वा निर्माल्यमपनीय सः । स्नानमालेपनं माल्यं धूपं दीपं बलिं व्यधात् ॥३॥
आरात्रिकं समाप्याऽष्टपुष्पीपूजां विधाय सः । जप्त्वा निवेद्य चात्मानं दध्यौ लीन इव क्षणम् ॥४॥
इयं विश्वस्य वैचित्री प्रासादस्येव शिल्पिनम् । यं प्रणेतारमाचष्टे तमीशं त्वामुपास्महे ॥५॥
इति स्तुत्वाऽथ स ग्रामे प्रत्येत्य प्रीतमानसः । अपराह्णक्षणेऽभुङ्क्त नित्यं तत्कृत्यमित्यभूत् ॥६॥
स प्रातः स्वकृतामर्चां वीक्ष्य क्षिप्तामितस्ततः । **शिवार्च्चां** कुशकाशार्क्कै[३]रर्च्चितां च व्यचिन्तयत् ॥७॥
इतो मयि गते नित्यमेत्य को नाम वामधीः । क्षिप्त्वा प्रागर्हणां[2] गर्हामर्हामातनुते निजाम् ॥८॥
ध्यात्वेति च विधायोच्चैरर्च्चनारचनां स्वयम् । तमस्तिरोहिते कोणे तस्थिवांस्तद्दिदृक्षया ॥९॥
यामेऽह्नः पश्चिमेऽदर्शि तेन यक्षस्य मन्दिरे । **पुलिन्दो**ऽलिन्द[3]माक्रामन् कालिन्दीसोदरद्युतिः ॥१०॥
वामेन पाणिना धन्वबाणिनाऽदधदामिषम् । अर्चां शोणित[4]शोणेन दक्षिणेनाऽर्च्चितुं च तम् ॥११॥ युग्मम् ॥
श्रीकण्ठ[5]स्योपकण्ठेऽग्र्यां[6] परिक्षिप्यांऽह्रिणाऽर्हणाम् । गण्डूषेणाऽथ संस्नप्य स्वां पूजां मूर्ध्नि सोऽक्षिपत् ॥१२॥
नमो नमः शिवायेति नत्वा जिगमिषुर्बहिः । साक्षाद्बहुमतिप्रीत्या **शिवेन** जगदे स्वयम् ॥१३॥
कच्चि[7]दद्य विलम्बोऽभूत् कच्चिद्वपुरनामयम् । भोज्यं कच्चिदवाप्नोषि कच्चिन्निर्विघ्नमस्ति ते ॥१४॥
शम्भुसम्भाषितोऽवादीदसावपि **पुलिन्दकः** । प्रसीदति प्रभावित्थं न मे सीदति किञ्चन ॥१५॥

---

१. सहस्साणवसणपरि..C, P सहस्साणुवसणपरि – KH सहस्सवसणपरि – D, A, K । ३. काशार्कैश्च – C ।

टि. 1. गोमुखं – लेपम्, तम् । 2. अर्हणा – पूजा, ताम् । 3. अलिन्दः – बहिर्द्वारम् । 4. रक्तसिन्दूरेण । 5. श्रीकण्ठः-शिवः । 6. अग्र्या – श्रेष्ठः, ताम् । 7. प्रश्नार्थोऽव्ययः ।

विज्ञप्येति गते तत्र **शिवं मुग्धगणो**ऽभ्यधात् । अयं ते सेवको यादृग् ज्ञातं तादृक् त्वमीश्वरः ॥१६॥

ईशिताऽवोचतैनं च वचः कौरुकुचीरुचिम् । स्वस्य तस्य च ताता[1]ऽसि ज्ञातासि[2] स्वयमन्तरम् ॥१७॥

गत्वा स्वं धार्मिको धाम तामतीत्य निशामथ । शय्योत्थायं प्रगे भूयः शिवधाम जगाम सः ॥१८॥

नत्वा तत्र **शिवस्यै**कमविलोक्य विलोचनम् । हृतमेनःकृता केन भालाक्षीति रुरोद सः ॥१९॥

रुदित्वा चिरमाक्रुश्य नित्यकृत्यमथ व्यधात् । मध्याह्नानन्तरं तावत्पुलिन्दोऽपि समासदत् ॥२०॥

दूनः सोऽथ दृगूनस्य **शिवस्या**[१]ऽवेक्षणेक्षणे[3] । स्वेनाऽक्ष्णा बाणकृष्टेन रुद्रमूर्त्तिमपूजयत् ॥२१॥

अव्यङ्गलोचनं तोषात् तं विधाय त्रिलोचनः । भक्तेः कलिन्दकं साक्षादथाऽवादीत् **पुलिन्दकम्** ॥२२॥

वत्स ! तुष्टोऽस्मि भक्त्या ते बहुमानातिमानया । मत्प्रसादाद्विभूतिस्ते प्रभूतैव भविष्यति ॥२३॥

शिष्यो गुरुमुपासीत **पुलिन्दः** स यथा शिवम् । अंशेनैतावताचार्यैर्दृष्टान्तोऽयमुदाहृतः ॥२४॥

**इति शिव-पुलिन्दककथानकम् ॥**

किञ्च—

**सीहासणे निसन्नं, सोवागं सेणिओ नरवरिंदो ।**
**विज्जं मग्गइ पयओ, इय साहुजणस्स सुयविणओ ॥२६६॥**

**सिंहासने निषण्णं श्वपाकं श्रेणिको नरवरेन्द्रो, विद्यां मार्गयति** प्रार्थयते, **प्रयतो** विनयादतिप्रयत्नपरः । इत्येवमनेनोदाहरणेन **साधुजनस्य श्रुतविनयः** श्रुतदातुरेवं साधुभिर्विनयः कार्य इति ॥२६६॥ अत्र कथा—

**[ श्रेणिक-श्वपाककथानकम् ॥ ]**

पुरे **राजगृहे**ऽराजन्महाराजशिरोमणिः । अत्युल्बणगुणश्रेणिः **श्रेणिकः** शक्रविक्रमः ॥१॥

**चेल्लणा** महिषी तस्याऽन्येद्युराग्रहतोऽब्रवीत् । प्रासादः सुन्दरो मह्यमेकस्तम्भो विधीयताम् ॥२॥

सोऽगणेयगुणग्रामं ग्रामण्यं मन्त्रिणामथ । धामैकस्तम्भमाधातु**मभयं** सुतमादिशत् ॥३॥

वर्द्धकिस्तस्य चाऽऽदेशादरण्ये तरुमुत्तमम् । लक्षणोज्ज्वलमालोक्य तस्य मूले बलिं व्यधात् ॥४॥

उपोषितोऽधिवास्यैनमध्युवास निशां च सः । तुष्टोऽधिष्ठायकश्चाऽस्या**ऽभय**मेत्य सुरोऽब्रवीत् ॥५॥

एकस्तम्भं महासौधं तथा सर्वर्तुकं वनम् । सप्राकारं करिष्येऽहं मम वृक्षो विमुच्यताम् ॥६॥

**अभया**नुमतोऽथाऽयं व्यन्तरो विदधे ततः । तरुश्छिन्न एवास्था**च्चेल्लणा**ऽपि मुदं दधौ ॥७॥

सर्वर्तुकतरुव्रातैस्तदापूर्णं सदाफलैः । सदैव दैवतोद्यानं रक्षकैः परिरक्ष्यते ॥८॥

पुरेऽत्र **कार्त्तिके** मासि मातङ्गपतिमन्यदा । ययाचे दयिताऽऽम्राणि विद्यासिद्धं स्वदोहदात् ॥९॥

तस्मिन् सुरकृते राजाऽऽक्रीडे[4] निशि बहिः स्थितः । आम्राणि **सोऽवनामन्या** विद्ययैव किलाऽग्रहीत् ॥१०॥

नीत्वा प्रत्यवनामन्या स्थाने शाखां पुनस्तरोः । पत्न्यास्तं दोहदं स्तैन्याद्दिवाकीर्त्तिरपूरयत्[5] ॥११॥

---

१. शिवस्यवेक्षणः क्षणे - L शिवस्या विक्षणेक्षणे - B शिवस्यवेक्षणक्षणे - A ।

टि. 1. असि (अव्य०) त्वम् । 2. ज्ञातासि - श्वस्तनीद्वि०पु० एकवचनम् । 3. दृष्टिरहितत्वईक्षणे इति वाच्यम् । 4. आक्रीडः- उद्यानम्, तस्मिन् । 5. दिवाकीर्तिः - चण्डालः ।

दृष्टं प्रगे पदं तावदन्तर्वप्रं न कस्यचित् । रात्रौ रसालसालस्य परं लूनः फलोच्चयः ॥१२॥
श्रुत्वेति **श्रेणिकः** पुत्रमूचे चौरं समर्पय । सोऽपि प्रमाणमादेश इत्युक्त्वोपक्रमं व्यधात् ॥१३॥ युग्मम् ॥
जीर्णोद्यान-सभा-देवकुल-वेश्यालयादिषु । द्यूतेष्वापानकेष्वापि स्तेनस्तेन तु न क्वचित् ॥१४॥
[1]पूर्वरङ्गेऽन्यदा रात्रिजागरप्रेक्षणोत्सवे । अभयः कथकीभूय पुरान्तश्चत्वरेऽवदत् ॥१५॥
एकस्या वृद्धकन्यायाः कृतकौतूहल[१]प्रथाम् । कथां शृणुत भोस्तावद्यावदायाति नर्त्तकी ॥१६॥
पुरे [२]**पुष्पपूरे** पूर्वं श्रेष्ठी **गोवर्द्धनो**ऽभवत् । तस्य जीर्णदरिद्रस्य वृद्धकन्याऽस्ति **सुन्दरी** ॥१७॥
[2]कामार्चामर्चितुं चौर्यादारामे क्वचिदेत्य सा । पुष्पाणि पाणिना लान्ती मालिकेन निरैक्ष्यत ॥१८॥
वृषस्यन्नयमूचे च तयाऽपाणिगृहीतया । कौमारमक्षतं मेऽस्तु मुञ्च मां करुणां कुरु ॥१९॥
मालिकोऽथाऽवदत्पाणिगृहीती प्रथमं सती । मामेषि यदि तन्मुञ्चे प्रतिपन्नं च तत्तया ॥२०॥
[3]इतीयं सा पतीयन्ती स्मरार्च्चनपरायणा । परिणिन्ये [४]वरेणाऽथ वरेण वरवर्णिनी ॥२१॥
रत्या स्मरो विधुः कान्त्या विद्युता च यथा घनः । तथा सोऽतितरां रेजे **सुन्दर्या** सुन्दरस्तया ॥२२॥
सोऽध्युवास यदावासनिवासमनया तदा । निवेद्य मालिकोदन्तं गन्तुमापृच्छ्यत स्वयम् ॥२३॥
अहो सत्यप्रतिज्ञेयमिति मत्वाऽथ तेन सा । प्रेषिता भूषितायान्ती तस्करैर्ददृशे पथि ॥२४॥
भूषणेषु च तस्यां च लम्पटैरथ तैर्वृता । गन्तव्यहेतुसद्भावं स्वस्य साऽऽविरभावयत् ॥२५॥
प्रत्यायान्त्या वयं तर्हि नोल्लङ्घ्या इति संविदा । तैः प्रेषिताग्रतो यान्ती दृष्टाऽथ ब्रह्मरक्षसा ॥२६॥
तेन क्षुधावताऽतीव धावताकर्ण्य कारणम् । तयैव संविदा [३]सत्यान्मुक्ताऽऽरामं जगाम सा ॥२७॥
दृष्ट्वा जागरितः कामी काममारामिकस्ततः । श्रुत्वोदन्तं सतीं सत्यादेव तां देवतां नतः ॥२८॥
प्रेषिता क्षमयित्वैवं मालिकेनाऽथ **सुन्दरी** । श्रुत्वेति रक्षसाऽप्येषा नत्वा मुक्ता सतीति सा ॥२९॥
[4]पाटच्चरान्तिकं प्राप्ता तद्वृत्तमवगत्य तैः । न स्त्रीमात्रमियं किन्तु दैवतं पूजितेति सा ॥३०॥
अथ भर्त्तारमभ्येत्य सर्वं वृत्तान्तमात्मनः । मुदा निवेदयामास [५]सत्प्रवृत्तिः पतिव्रता ॥३१॥
भर्तृभक्तिव्रतानां हि नारीणामङ्गरक्षकः । विपद्विपत्तिदं [६]सम्यक् सम्पत्तिदमहो महः ॥३२॥
मनसो यत्र विश्रान्तिर्या गृहस्याऽधिदेवता । स्वस्य देहान्तरं पत्नी सैव शेषा विडम्बना ॥३३॥
चिन्तयित्वेति तेनाऽपि कान्ता कान्तेन सात्मनः । धन्यंमन्येन तत्प्राप्त्या सर्वस्वस्वामिनी कृता ॥३४॥
तद्ब्रो ब्रूत पति-स्तेन-राक्षसाऽऽरामिकेषु कः । चकार दुष्करं तेषु पप्रच्छेत्यभयः सभाम् ॥३६॥
पतिमीर्ष्यालवश्चौरांश्चौरा रक्षः क्षुधातुराः । प्रशशंसुस्तथेत्यत्र मालिकं पारदारिकाः ॥३७॥

---

१. कौतूहलव्यथां - K । २. पुण्यपूरे - K, C । ३. इयन्ती - KH, L । ४. वरेणार्थवरेण - L, A । ५. सत्यवृत्तिः - C, D, K, सत्यवृत्ति - L, तत्प्रवृत्तिः KH । ६. सम्यत्सम्पत्ति - A ।

टि. 1. पूर्वरङ्गः - यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये नटाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते । नान्दीपाठः इत्यर्थः, तस्मिन् । 2. कामदेवस्य मूर्तिः ताम् । 3. इति हेतोः । 4. पटच्चरः चौरः तेषां समूहः [षष्ठ्याः....] ६।२।९ सूत्रेण अण् ।

अथैकागारिकोत्तंसप्रशंसामुखरान्नरान् । अभयोऽधारयत्सर्वान् पप्रच्छाऽऽप्रहर्ति च ताम् ॥३८॥
शुद्धिमिङ्गितवाक्यानां परीक्ष्याऽथ धियांनिधिः । मुमोचान्यांस्तमेवैकं मातङ्गं निरधारयत् ॥३९॥
**अभयो**ऽथाऽभयं दत्त्वा चौरमूचेऽधुना यदि । ब्रवीषि सत्यं तत्पत्युः **श्रेणिका**दपि मोचये ॥४०॥
तस्माद्विद्याबलं ज्ञात्वा विज्ञप्तः **श्रेणिको**ऽवदत् । **अस्याभयं** तदा दद्यां विद्यां दद्यादयं यदि ॥४१॥
तथेत्यङ्गीकृताऽऽदेशं सदेशं[1] **श्रेणिके**शितुः । तं निनायाऽ**भयो** विद्यावन्तमन्तावशायिनम्[2] ॥४२॥
कृत्वाऽथ विजनं विद्यां स जनङ्गमतो[3] नृपः । अधीयन् भद्रपीठस्थो नाध्यगच्छद्धरास्थितात् ॥४३॥
नाऽध्यापयति सत्येन कुप्यन्तमिति भूपतिम् । **अभयो**ऽभिदधे **विद्या विनयेनाऽधिगम्यते** ॥४४॥
अथ सिंहासनासीनात्ततोऽन्तेवासिनो गुरोः । नृपोऽन्तेवासितामेत्य सुधीर्विद्यामधीतवान् ॥४५॥
गुरुः पिता गुरुर्माता गुरुस्तीर्थं गुरुः श्रुतम् । देवादपि गुरुः पूजां ततः प्रथममर्हति ॥४६॥

**इति श्रेणिक-श्वपाककथानकम् ।**

एवमपि श्रुत्वा गुरुनिह्नुवानानां दोषमाह—

**विज्जाए कासवसंतियाए, दगसूयरो सिरिं पत्तो ।**
**पडिओ मुसं वयंतो, सुयनिण्हवणा इय अपच्छा ॥२६७॥**

भावार्थावगमाय प्रथममाख्यानकम्—

**[ त्रिदण्डिकथानकम् ॥ ]**

पुरे **स्तम्बपुरे** विद्याबलादम्बरलम्बिना । चण्डिलः[4] क्षुरभाण्डेन क्षुरकर्म सदाकरोत् ॥१॥
छन्नं विनयतः कश्चिद् भिक्षु**र्भागवतो** मुनिः । आराध्य विधिवद्विद्यामादत्ताम्बरलम्बिनीम् ॥२॥
अथोत्तरपथोत्तंसं पुरं **गजपुरं** गतः । त्रिदण्डेनाऽम्बरस्थेन पूज्यते स्म स नागरैः ॥३॥
राज्ञा **पद्मरथेना**ऽथ ख्यातिमाकर्ण्य पूजितः । पृष्टश्च ते तपःशक्तिर्विद्याशक्तिरुतेदृशी ॥४॥
ऊचे **भागवतो** राजन् ! विद्याशक्तिरियं मम । प्राह राजा गुरुस्तर्हि कस्ते कुत्राऽस्ति सोऽधुना ॥५॥
निह्नुवानो गुरुं दाण्डाजनिकः[5] काश्यपं ह्रिया । कपोलकल्पनादूचे त्रिदण्डी दण्डधारिणम् ॥६॥
विमुक्तिदेवपादास्ते हिमवत्पादवासिनः । गुरवो मम तेषां हि साक्षादजनि भारती ॥७॥
गुरोरपह्नुतिक्रोधान्मन्त्रदेवी त्रिदण्डिकम् । व्योम्नः कृतखटत्कारमपातयदिलातले ॥८॥
दृढभूमितयैवाऽयं विषयग्रामतो ह्रिया । योगीव दृशमाकृष्य लयं निन्येऽन्तरात्मनि ॥९॥
गुर्वपह्नवकर्त्तारं व्रीडितं हसितं जनैः । तं श्रुत्वा साधुभिः कार्यो न क्वचिन्निह्नवो गुरोः ॥१०॥

**इति त्रिदण्डिकथानकम् ॥**

अथाऽक्षरार्थः-**विद्यया काश्यपसत्कया** हेतुभूतया **दकशूकरो** नित्यस्नानशीलत्वात् त्रिदण्डी, **श्रियं**

---

टि. 1. सदेशं – समीपम् । 2. अन्तावशायी – अन्ते पर्यन्तदेशेऽवशेते – चण्डालः । 3. जनङ्गमः – मातङ्गः । 4. चण्डिलः – नापितः । 5. दाण्डाज[जि]निकः – मायावी ।

पूजां **प्राप्तः । पतितो मृषां वदन्** नीचैर्भूतः अलीकं भाषमाणः गुर्वपलापे च तत्त्वतः श्रुतापलाप इत्यत आह- **श्रुतनिह्नवनमित्येवमपथ्यं** स्त्रीलिङ्गनिर्देशः प्राकृतत्वादिति ॥२६७॥ परमोपकारित्वात् पूजार्हो गुरुरित्याह-

**सयलम्मि वि जियलोए, तेण इहं घोसिओ अणाघाओ ।**
**इक्कं पि जो दुहत्तं, सत्तं बोहेइ जिणवयणे ॥२६८॥**

**सकलेऽपि जीवलोके तेन** महात्मना **इह घोषितो** वाक्पटहेन **अनाघातो**ऽमारिरित्यर्थः । । **एकमपि** किं पुनर्बहून् **यो दुःखार्त्तं सत्त्वं** प्राणिनं **बोधयति जिनवचने** भगवत्प्रवचने । स हि बुद्धः सर्वविरतो मुक्तो वा यावज्जीवं सर्वकालं वा सर्वजन्तून् रक्षतीति भावः ॥२६८॥ अत एव-

**सम्मत्तदायगाणं, दुप्पडियारं भवेसु बहुएसु ।**
**सव्वगुणमेलियाहि वि, उवयारसहस्सकोडीहिं ॥२६९॥**

**सम्यक्त्वदायकानां** विशिष्टदेशनया सम्यग्भावदायिनां **दुष्प्रतिकारं** प्रतिकर्तुमशक्यं **भवेषु बहुषु** वर्त्तमानाभिः **सर्वगुणमीलिताभि**र्द्वित्रिचतुराद्यनन्तैर्गुणकारैः सङ्घटिताभिरपि **उपकारसहस्त्रकोटीभि**स्ताभिरपि न तेषां प्रत्युपकर्त्तुं शक्यत इति हृदयम् ॥२६९॥

कुत एतत् ? सम्यक्त्वस्य महागुणत्वादित्याह-

**सम्मत्तंमि उ लद्धे, ठइआइं नरयतिरियदाराइं ।**
**दिव्वाणि माणुसाणि अ, मोक्खसुहाइं सहीणाइं ॥२७०॥**

**सम्यक्त्वे** तत्त्वार्थश्रद्धानलक्षणे, तुशब्दात् अबद्धायुष्केण, **लब्धे** सति **स्थगितानि** पिहितानि **नरकतिर्यग्द्वाराणि** उपलक्षणत्वात्तद्गतिप्रवेशमुखानि एवमनर्थविघातकत्वमुक्तम् । अथार्थसम्पादकत्वमाह- **दिव्यानि** स्वर्भवानि **मानुषाणि** मर्त्त्यजानि **सुखानी**ति, **च**शब्दस्य व्यवहितसम्बन्धादिहापि सम्बध्यते, **मोक्षसुखानि** च **स्वाधीनानी**ति ॥२७०॥ यथा चैतत्तथा चाह-

**कुसमयसुईण महणं, सम्मत्तं जस्स सुट्ठियं हियए ।**
**तस्स जगुज्जोयकरं, नाणं चरणं च भवमहणं ॥२७१॥**

**कुसमयश्रुतीनां** विरुद्धसिद्धान्तश्रवणानां **मथनम्** उपमर्द्दकं तद्वासनाऽपनोदनक्षमं **सम्यक्त्वं यस्य सुस्थितं हृदये तस्य जगदुद्द्योतकरं** केवलालोकरूपं **ज्ञानं चरणं च** सर्वसंवररूपं **भवमथनं** संसारक्षयकारि भवत्येवेति शेषः । तदेवं दर्शने सति तद्भवेऽन्यभवे वा अक्षेपमोक्षसाधकयोर्ज्ञानचारित्रयोरवश्यंभावात्तदेव प्रधानम् इति लक्षयति ॥२७१॥ मोक्षसाधने तु रत्नत्रयमपि समं व्याप्रियते इत्याह-

**सुपरिच्छियसम्मत्तो, नाणेणालोइयत्थसब्भावो ।**
**निव्वणचरणाउत्तो, इच्छियमत्थं पसाहेइ ॥२७२॥**

**सुपरीक्षितसम्यक्त्वो** दृढसम्यग्दर्शनः सन् **ज्ञानेनालोकितार्थसद्भावः** प्रकाशितजीवादितत्त्वो **निर्व्रणचरणायुक्तो** निरतिचारचारित्रोपयुक्त **इष्टमर्थं** मोक्षं **प्रसाधयती**ति । तदिदमवेत्याऽक्षेपमोक्षसाधने सम्यग्दर्शनेऽप्रमादिना भाव्यम् ॥२७२॥ प्रमादात् तन्मालिन्योपपत्तेरित्याह-

**जह मूलताणए पंडुरम्मि दुव्वन्नरागवण्णेहिं ।**
**बीभच्छा पडसोहा, इय सम्मत्तं पमाएहिं ॥२७३॥**

**यथा मूलतानके** प्रथमसूत्ररचनारूपे **पाण्डुरे** धवले **दुर्वर्णरागवर्णै**र्विच्छायरागरूपैः पश्चाद्वानकैरिति शेषः । **बीभत्सा** विरूपा **पटशोभा** स्यात् **इति** एवं **सम्यक्त्वं प्रमादैः** कषायादिभिर्मूले लाभकाले शुद्धमपि पश्चान्मलिनीभवतीति ॥२७३॥

वैमानिकायुर्बन्धहेतौ च सम्यक्त्वे प्रमादवान् गाढमप्रेक्षापूर्वकारी, बहोः स्वल्पेन हारणादित्याह—

**नरएसु सुरवरेसु य, जो बंधइ सागरोवमं एक्कं ।**
**पलिओवमाणि बंधइ, कोडिसहस्साणि दिवसेणं ॥२७४॥**

सम्यक्त्वरहित-सहितयोः क्रमेण पाप-पुण्यकारिणोर्मध्ये **नरकेषु सुरवरेषु च** गतिद्वयेऽपि, **यो बध्नाति सागरोपमं** पल्योपमदशकोटीकोटिरूपमागमप्रतीत**मेकं स पल्योपमानि बध्नाति कोटिसहस्राणि दिवसेने**ति । तथा च पल्योपमदशकोटीकोटिरूपस्य सागरोपमस्य एककस्याऽग्रे पञ्चदशशून्यरूपस्याङ्कस्य पुरुषायुषदिवसाङ्केन षट्त्रिंशद्दिनसहस्राङ्के भागे हृते लब्धानि पल्योपमानि द्वौ कोटिसहस्रौ सप्तकोटीशतानि सप्तसप्ततिकोट्यः सप्तसप्ततिर्लक्षाः सप्तसप्ततिसहस्राः सप्तशतानि सप्तसप्तत्यधिकानीति । २७७७७७७७७७७ ॥२७४॥ अथाल्पशुभबन्धकमुद्दिशति—

**पलिओवमसंखिज्जं, भागं जो बंधई सुरगणेसु ।**
**दिवसे दिवसे बंधइ, स वासकोडी असंखेज्जा ॥२७५॥**

**पल्योपमसङ्ख्येयभागम्** अनुस्वारस्याऽलाक्षणिकत्वात्, **यो बध्नाति सुरगणेषु** तात्स्थ्यात् त्रिदिवेषु, **दिवसे दिवसे** प्रतिदिनं **बध्नाति स वर्षकोटीरसङ्ख्येया**स्तदात्मकत्वात् तस्येति ॥२७५॥

अशुभबन्धकमतिदिशति—

**एस कमो नरएसु वि, बुहेण नाऊण नाम एयं पि ।**
**धम्मम्मि कह पमाओ, निमेसमित्तं पि कायव्वो ? ॥२७६॥**

**एषो**ऽनन्तरोक्तः **क्रमो नरकेष्वपि** यदुत पल्योपमसङ्ख्येयभागं बध्नन् प्रतिदिनमसङ्ख्येया वर्षकोटीर्बध्नाति । इदं च **ज्ञात्वा बुधेन** विदुषा **नामे**ति प्रसिद्धम् **एतदप्य**नन्तरोक्तम्, **धर्मे** दुर्गतिरोधके सद्गतिदायके च **कथं प्रमादो निमेषमात्रमपि** अल्पकालमपि **कर्त्तव्यः** अपि तु नैवैतद् बुध्यत इति भावः ॥२७६॥

अथ प्रलोभनाय देवलोकगुणानाह—

**दिव्वालंकारविभूसणाइं, रयणुज्जलाणि य घराइं ।**
**रूवं भोगसमुदओ, सुरलोगसमो कओ इहयं ॥२७७॥**

**दिव्यालङ्कारविभूषणानि** अलङ्काराः—सिंहासन-च्छत्र-चामरादयः, विभूषणानि—मुकुटादीनि, दिव्यानि—सर्वोत्तमानि स्युः । **रत्नोज्ज्वलानि गृहाणि, रूपं** वपुःसौन्दर्यम्, **भोगसमुदयो** निरतिशयशब्दादिसमृद्धिः, **सुरलोकसमः कुतो**ऽस्मिन्मर्त्यलोके नैवेत्यर्थः ॥२७७॥ किञ्च—

**देवाण देवलोए, जं सोक्खं तं नरो सुभणिओ वि ।**
**न भणइ वाससएण वि, जस्स वि जीहासयं होज्जा ॥२७८॥**

देवानां देवलोके यत् सौख्यं तत् नरः सुभणितोऽपि वाग्म्यपि, न भणति वर्षशतेनाऽपि यस्याऽपि जिह्वाशतं भवेदपरिमेयत्वात्तस्येति ॥२७८॥

नरकेषु व्यतिरेकमाह—

**नरएसु जाइं अइकक्खडाइं दुक्खाइं परमतिक्खाइं ।**
**को वन्नेही ताइं ?, जीवंतो वासकोडी वि ॥२७९॥**

नरकेषु यानि अतिकर्कशानि शरीरापेक्षया परुषाणि, दुःखानि परमतीक्ष्णानि चित्तापेक्षया तीव्राणि, को वर्णयिष्यति तानि जीवन् वर्षकोटीमपि तेषामसङ्ख्येयत्वाद् [१]वाचां च क्रमवर्त्तित्वादिति ॥२७९॥

तथापि दिग्मात्रमाह—

**कक्खडदाहं सामलि-असिवण-वेयरणि-पहरणसएहिं ।**
**जा जायणाउ पाविंति नारया तं अहम्मफलं ॥२८०॥**

कर्कशदाहं तीव्राग्निना, शाल्मली-असिवन-वैतरणी-प्रहरणशतैर्हेतुभिर्या यातनाः पीडाः प्राप्नुवन्ति । नारका नरकेषु जाता जन्तवः । तत् अधर्मफलं पापकार्यमिति ॥२८०॥ संसारे चान्यत्र न सुखमस्तीत्याह—

**तिरिया कसंकुसारा-निवायवहबंधमारणसयाइं ।**
**न वि इहइं पाविंता, परत्थ जइ नियमिता हुंता ॥२८१॥**

तिर्यञ्चः कशा—लता, अङ्कुशः—सृणिः, आरा—प्राजनकान्तर्वर्त्तिनी, तासां निपातो, वधो—लगुडादिभिः, बन्धो—रज्ज्वादिभिः, मारणं—प्राणच्यावनं तेषां द्वन्द्वे कशाङ्कुशारानिपातवधबन्धमारणानां शतानि । नैव इह प्राप्स्यन् परत्राऽन्यजन्मनि यदि नियमिता विरतिभाजनं धर्मवन्तोऽभविष्यन् तेषां पापफलत्वादिति ॥२८१॥

मर्त्यभवस्वरूपमाह—

**आजीवसंकिलेसो, सुक्खं तुच्छं उवद्दवा बहुया ।**
**नीयजणसिट्ठणा वि य, अणिट्ठवासो य माणुस्से ॥२८२॥**

आजीवं प्राणधारणं यावत् सङ्क्लेशश्चित्तविबाधेति समासः । सौख्यं वैषयिकं तुच्छं स्वल्पं निसारं च, उपद्रवा बाह्या आभ्यन्तराश्च बहवः । नीचजनशिष्टनापि च नीचजनात् प्राकृतलोकात् शिष्टना—आक्रोशनं चेत्यर्थः । अनिष्टवासश्चानभिप्रेतस्थाने कुतश्चिद्धेतोर्वासश्च, मानुष्ये मनुष्यभवे सम्भवन्तीति ॥२८२॥

किञ्च—

**चारगनिरोहवहबंध-रोगधणहरणमरणवसणाइं ।**
**मणसंतावो अयसो, विग्गोवणा य माणुस्से ॥२८३॥**

---

१. वाचं च – C वाचमक्रम.... A ।

**चारकनिरोधो** गुप्तियन्त्रणं **वध-बन्ध-रोग-धनहरण-मरण-व्यसनानि** प्रतीतानि । **मनःसन्ता-पश्चित्तखेदः, अयशोऽश्लाघा, विगोपना** नानारूपा विडम्बना मानुष्ये सन्तीति ॥२८३॥ किञ्च—

**चिंतासंतावेहि य, दारिद्दरुयाहिं दुप्पउत्ताहिं ।**
**लद्धूण वि माणुस्सं, मरंति केई सुनिव्विण्णा ॥२८४॥**

इह शारीरमानसदुःखप्राचुर्यज्ञापनार्थं तद्धेतूनामनेकशो वचनेऽपि न पौनरुक्त्यम् **चिन्तासन्तापैः** कुटुम्ब-भरण-धनहरण-करण-रक्षणादिजन्यैः, **च**स्य सम्बन्धव्यवधानात् , **दारिद्र्य-रुग्भिश्च** दौर्गत्यरोगैश्च **दुष्प्रयुक्ताभिः** प्राकृत[1]दुष्टकर्मसम्भवाभिः, **लब्ध्वाऽपि मानुष्यं म्रियन्ते** प्राणान् मुञ्चन्ति । **केचित्** पापाः **सुनिर्विण्णाः** गाढदैन्योपहता इति ॥२८४॥

**देवा वि देवलोए, दिव्वाभरणाणुरंजियसरीरा ।**
**जं परिवडंति तत्तो, तं दुक्खं दारुणं तेसिं ॥२८५॥**

**देवा अपि देवलोके दिव्याभरणानुरञ्जितशरीराः** उत्तमाऽलङ्कारसुभगवपुषः, **यत् प्रतिपतन्ति** अशुचौ गर्भादिकलिले निमज्जन्ति **ततो** देवलोकात् **तद् दुःखं दारुणं** रौद्रं **तेषां** देवानामिति ॥२८५॥

प्राग् मनुष्यलोकाऽपेक्षया सुखमुपवर्ण्याऽपि तस्मिन् देवलोकेऽपि रागं निराचिकीर्षुः सुखमपि दुरवसा-नतया तत्त्वतो दुःखमेवैतदिति भूयोऽनुवदति—

**तं सुरविमाणविभवं, चिंतिय चवणं च देवलोगाओ ।**
**अइबलियं चिय जं न वि, फुट्टइ सयसक्करं हिययं ॥२८६॥**

**तमि**ति प्राग्वर्णितं **सुरविमानविभवं चिन्तयित्वा च्यवनं च** पतनं **देवलोकात् । अतिबलीय एव** गाढं निष्ठुरमेव **यन्नाऽपि[2] नैव स्फुटति शतशर्क्करं हृदयम्** । तस्य हि स्फोटे महदुपनतभ्रंशरूपं कारणमिति ॥२८६॥ तथा—

**ईसाविसायमयकोहमायलोभेहिं एवमाईहिं ।**
**देवा वि समभिभूया, तेसिं कत्तो सुहं नाम ? ॥२८७॥**

**ईर्ष्या-विषाद-मद-क्रोध-माया-लोभैः** प्रतीतै**रेवमादिभि**स्तोष-दैन्य-शोकप्रभृतिभिश्चित्तविकारै **र्देवा अपि समभिभूता** वशीकृता**स्तेषां कुतः सुखं नाम** तत्सम्भावनाऽपि नेति भावः ॥२८७॥ अतः—

**धम्मं पि नाम नाऊण, कीस पुरिसा सहंति पुरिसाणं ।**
**सामित्ते साहीणे, को नाम करिज्ज दासत्तं ? ॥२८८॥**

**धर्ममपि** असारसंसारकारणोच्छेदकं सर्वज्ञोक्तं **नामे**ति प्रसिद्धं **ज्ञात्वो**पलभ्य **कीस** त्ति किमिति **पुरुषास्सहन्ते पुरुषाज्ञां** पुरुषाणाम् आज्ञा पुरुषाज्ञा ताम् । तेऽपि हि आत्मनः समानसङ्ख्यावयवतया निर्विशेषा एव ततस्तदाज्ञां कथं सहन्ते । निरतिशयैश्वर्यनिदानस्य हि धर्मस्य ज्ञानेन **स्वामित्वे स्वाधीने को** विमृश्यकारी **नामे**ति प्रसिद्धमिदम् । **कुर्याद्दासत्वं** कर्मपारवश्यमिति । तथा चोक्तं–"**समसङ्ख्यावयवः सन् पुरुषः पुरुषं किमन्यमभ्येति ? । पुण्यैरधिकतरश्चेन्ननु सोऽपि करोतु तान्येव**" [ ] ॥२८८॥

---

१. प्राक्कृत - H । २. यन्न च - B ।

स्वाधीनस्वामित्वं धर्मज्ञानमेवाभिलिप्सूनां लक्षणमाह–

**संसारचारए चारए व्व [1]आवीलियस्स बंधेहिं ।**
**उव्विग्गो जस्स मणो, सो किर आसन्नसिद्धिपहो ॥२८९॥**

**संसारे** चरणं चारः स एव **चारकस्तत्र संसारचारके** भवभ्रमणे । **चारके इव** कारागारे इव । **आपीडितस्य बन्धैः** कर्मभिरन्यत्र रज्ज्वादिभिः । **उद्विग्नं** भग्नं **यस्य मनो** यदुत-कथमितो निस्सरिष्यामीति **स** जीवः **किलेति** आप्ता ब्रुवते **आसन्नसिद्धिपथो**ऽभ्यर्णमुक्तिमार्ग इति ॥२८९॥

किञ्च–

**आसन्नकालभवसिद्धियस्स, जीवस्स लक्खणं इणमो ।**
**विसयसुहेसु न रज्जइ, सव्वत्थामेसु उज्जमइ ॥२९०॥**

आसन्न एव काले भवा भाविनी सिद्धिर्यस्य तस्याऽथवा आसन्नकाले एव समीपतरावसाने एव भवे सिद्धिर्यस्य **तस्यासन्नकालभवसिद्धिकस्य जीवस्य लक्षणं** लिङ्गमिदं यदुत **विषयसुखेषु न रज्यते,** न रागं याति **सर्वस्थानेषु** मोक्षसाधकेषु तपश्चरणादिषु **उद्यच्छति** उद्यमं कुरुते । अथवा **सर्वस्थाम्ना** विद्यमानं बल[2]मनपलपन् उद्यच्छति ॥२९०॥

ननु दुःषमायां विशिष्टसंहननादिरहितैः कथमुद्यमनीयमित्यत आह–

**होज्ज व न व देहबलं, धिईमईसत्तेण जइ न उज्जमसि ।**
**अच्छिहिसि चिरं कालं, बलं च कालं च सोयंतो ॥२९१॥**

**भवेद्वा न वा देहबलं धृत्या**ऽऽत्मनः प्रणिधानेन **मत्या** बुद्ध्या **सत्त्वेन** चित्तावष्टम्भेन, त्रयाणां द्वन्द्वैकवद्भावात्तेन **यदि न उद्यच्छसि** तदा धर्मशील ! त्वं **[3]आसिष्यसे** स्थास्यसि **चिरं कालं** प्रभूतसमयं **बलं** च शारीरं, **कालं** च दुःषमारूपं **शोचन्** तच्छोचनेन च न किञ्चित् परित्राणं दैन्यवृद्धिरेव केवलमिति ॥२९१॥

यस्तु सम्प्रत्यशक्तोऽहमन्यजन्मनि तु विशेषोद्यमं करिष्ये इति चिन्तयेत्तं प्रत्युपदिशति–

**लद्धिल्लियं च बोहिं, अकरिंतोऽणागयं च पत्थिंतो ।**
**अन्नं दाइं बोहिं, लब्भिसि कयरेण मुल्लेण ? ॥२९२॥**

**लब्धामेव** स्वार्थिककप्रत्यये **लब्धिकां** स्वाधीनां वर्त्तमानकालिकीं **बोधिं** जिनधर्मावाप्तिम् असत्-कर्माधीनतया **अकुर्वन्निति** सदनुष्ठानेन साफल्यमप्रापय**न्ननागतां** भाविनीं **प्रार्थयन् 'अन्नं दाइं'**ति असूया-वाचकोऽथवा **इदानीं बोधिं लप्स्यसे कतरेण मूल्येन** ? इदमत्राकूतं जिनधर्मावाप्तौ तपःसंयमाराधनस्य तदनुष्ठानवासनातिशयजनिततत्संस्कारस्य प्रेत्याऽपि संस्कारप्रबोधरसातिरेकवशात्तथैव प्रवृत्तिरेव हि बोधि-रुच्यते। ततस्तदनुष्ठानरहितस्य कौतस्कुतो धर्मसंस्कारः ? कुतस्तरां च प्रेत्य तद्बोध इति बोधिलाभस्य मूलाभावादनुत्थानमेव स्यात् । तस्मादनादित एव संसारचारिणा जीवेन यथाप्रवृत्तकरणवशात्, अनाभोगत एव

१. आवीलियव्व – D, A, B । २. मनपलपमानमुद्य...KH मपलपन् तेन उद्य...D, L, C, K, B । ३. आशिष्यसे – D आस्यसि – H आसिष्यसि – B ।

राधावेधोपमानेन कथञ्चिदुत्कृष्टां कर्मस्थितिमतीत्यायुर्वर्ज्जानां सप्तानामपि कर्मणां स्थितीरेकस्याः सागरोपम-कोटीकोटेरन्तरानीय अपूर्वकरणेन ग्रन्थिभेदविधानपूर्वं चिन्तामणिरत्नोपमं विशुद्धं धर्मबोधिमधिगम्य, तदनुष्ठाने सुतरां यत्नो विधेय इति ॥२९२॥ बहवश्च एवम्भूता इत्याह—

**संघयणकालबल-दूसमारुयालंबणाइं घित्तूणं ।**
**सव्वं चिय नियमधुरं, निरुज्जमाओ पमुच्चंति ॥२९३॥**

यथा 'न शक्तिमत् शरीरमिति, नाऽयं कालो दुर्भिक्षत्वात्, नास्ति बलं मानसं धृत्यभावात् , इयं च दुःषमा च भगवता क्लिष्टा समादिष्टा क्व तस्यां धर्माचरणम् , वाताद्याधिक्येन रोगाक्रान्ता वयम्-एवंरूपाणि क्रमेण **संहनन-काल-बल-दुःषमा-रुगालम्बनानि** अलीकावष्टम्भान् **गृहीत्वा** स्वीकृत्य **सर्वामेव** कर्तुं शक्यामपि, **नियमधुरां** संयमोद्वहनलक्षणां **निरुद्यमादा**लस्यतः शैथिल्यात् **प्रकर्षेण मुञ्चन्ती**ति ॥२९३॥

प्रेक्षावता पुनर्यद्विधेयं तदाह—

**कालस्स य परिहाणी, संजमजोगाइं नत्थि खित्ताइं ।**
**जयणाए वट्टियव्वं, न हु जयणा भंजए अंगं ॥२९४॥**

**कालस्य** वर्त्तमानस्य **परिहाणिर्ह्रासः** । **च**शब्दात्तद्वशेन द्रव्यक्षेत्रभावानामपि । अत एव **संयमयोग्यानि न सन्ति** सम्प्रति **क्षेत्राणि** । अतो **यतनया** [1]गुणागुणादानहानलक्षणया **वर्त्तितव्यं** यापनीयम् । यतो **न हु** नैव **यतना** क्रियमाणा **भनक्ति** नाशय**त्यङ्गं** संयमशरीरमिति ॥२९४॥

यतनामेव सविषयामाह—

**समिई-कसाय-गारव-इंदिय-मय-बंभचेरगुत्तीसु ।**
**सज्झाय-विणय-तव-सत्तिओ अ जयणा सुविहियाणं ॥२९५॥**

**समितय** ईर्यासमित्याद्याः पञ्च **कषायाः** क्रोधादयश्चत्वारः । **गारवाणि** ऋद्ध्यादीनि त्रीणि । **इन्द्रियाणि** स्पर्शनादीनि पञ्च । **मदा** जात्यादयोऽष्टौ । **ब्रह्मचर्यगुप्तयो** वसत्याद्या नव द्वन्द्वे च **तासु** तद्विषये । **स्वाध्यायो** वाचनादिः । **विनयो**ऽभ्युत्थानादिः । **तपो**ऽनशनादि । **शक्ति**श्चित्तोत्साहः । तेषां द्वन्द्वे, सप्तमीविषये तसि च **स्वाध्यायविनयतपःशक्तिषु** तेषु विषयेषु **यतना** [2]करणाकरणरूपा **सुविहितानां** साधूनां भवतीति गाथा-समासार्थः ॥२९५॥

अथैतदेव प्रतिपदं व्याख्यातुं समितिषु प्रथमामाह—

**जुगमित्तंतरदिट्ठी, पयं पयं चक्खुणा विसोहिंतो ।**
**अव्वक्खित्ताउत्तो, इरियासमिओ मुणी होइ ॥२९६॥**

**युगमात्रान्तरदृष्टि**श्चतुष्करप्रमाणान्तरालभूमिविलोकनः सन्, अत्र चातिदूरासन्ननिरीक्षणैर्जन्त्व-दर्शनयोगातिप्रवृत्तिदोषाद्युगमात्रक्षेत्रनियमनम् । **पदं पदं चक्षुषा विशोधयन्** पार्श्वतः पृष्ठतश्चोपयोगं ददान इत्यर्थः । **अव्याक्षिप्तः** शब्दादिषु रागद्वेषावगच्छन् । **आयुक्तः** प्रक्रमाज्जीवदयात्मके संयमे एवंविध ईरणमीर्या तस्यां सम्यग् इतः **ईर्यासमितो** यथागमं गमनशीलो **मुनिर्भवती**ति ॥२९६॥

---

१. गुणगणा... D, K । २. करणरूपा - B, L, K ।

अथ भाषासमितियतनामाह–

**कज्जे भासइ भासं, अणवज्जमकारणे न भासइ य ।**
**विगहविसुत्तियपरिवज्जिओ य जइ भासणासमिओ ॥२९७॥**

**कार्ये** ज्ञानादिके **भाषते भाषां** तत्रापि **अनवद्याम्** अपापाम् । **अकारणे** निष्प्रयोजनां पुनर्न **भाषते न च** वक्ति च । अत एव **विकथा** स्त्र्यादिविषया **विश्रोतसिका** मनोविपरिणामजनिता दुष्टान्तर्जल्परूपा, ताभ्यां **परिवर्ज्जितः** सर्वथा विरहितः । **चशब्दात्**षोडशवचनविधिज्ञश्च **यतिः** साधु**र्भाषणा** वाक् तस्यां **समितः** सदाचार इति ॥२९७॥ वचनविधयश्चेमे–

"कालतियं लिङ्गतियं वयणतियं तह परोक्खपच्चक्खं ।
उवणयवयणचउक्कं अज्झत्थं चेव सोलसमं" ॥१॥ [ प्र.सा./८९६ ]

अथैषणासमितियतनामाह–

**बायालमेसणाओ, भोयणदोसे य पंच सोहेइ ।**
**सो एसणाए समिओ, आजीवी अन्नहा होइ ॥२९८॥**

**द्विचत्वारिंशतम्** एष्यते मार्ग्यते पिण्डोऽमूभिरि**त्येषणाः** सामान्यव्युत्पत्त्या आधाकर्मादीन् दोषान् इत्यर्थः । तथा **भोजनदोषांश्च पञ्च शोधयति** परिहरति । **स** साधु**रेषणायां समित** इत्युच्यते **आजीवी** जीविकामात्रफलधर्मध्वजादानतात्पर्यो**ऽन्यथा** तद्वैपरीत्ये गुणशून्यतया **भवती**ति ॥२९८॥

द्विचत्वारिंशद्दोषाश्चैवं ज्ञेयाः । यथा–

"**आहाकम्मुद्देसिय १-२ पूइयकम्मे ३ य मीसजाए ४ य ।**
**ठवणा ५ पाहुडियाए ६, पाउअर ७ कीय ८ पामिच्चे ॥१॥** [ पि.नि./९२ ]
**परियट्टिए १० अभिहडे ११ उब्भिन्ने १२ मालोहडे १३ चेव ।**
**अच्छिज्जे १४ अणिसट्ठे १५ अज्झोयरए १६ अ सोलसमे**" ॥२॥ [ पि.नि./९३ ]

व्याख्या–यत्षट्कायविराधनया यतिन आधया[१] सङ्कल्पेन अशनादिकरणं **तदाधाकर्म** । यत्पुनर्गृहिणा स्वार्थं कृतं पश्चाद् व्रत्युद्देशेन पृथक् क्रियते **तदौद्देशिकं** तत् त्रेधा –तत्र यद्यथासमुद्वृत्तं तत्तथाभूतमेव यावदर्थिकादीनां चतुर्णामुद्दिश्यमान्[२]मुद्दिष्टौद्देशिकम् ॥१॥ यत्पुनः कूरादि दध्यादिना व्यञ्जनादिना वा जीवविराधनां विना संस्क्रियते तत्कृतौद्देशिकम् ॥२॥ यत्तु अग्न्यादिना जीवविराधनापूर्वं संस्क्रियते तत्कर्मौद्देशिकम् ॥३॥ तत् त्रिविधमपि चतुर्द्धा यावदर्थिकमुद्देशम् ॥१॥ पाखण्डिभ्यः समुद्देशं ॥२॥ श्रमणेभ्य आदेशं ॥३॥ निर्ग्रन्थेभ्यः समादेशम् ॥४॥ एवं द्वादशधा औद्देशिकम् ॥२॥ यदुद्गमकोटिदोषदुष्टसङ्गात् शुद्धमपि अपवित्रं तत् **पूतिकर्म**[३] ॥३॥ यदात्मनो हेतोर्गृहस्थेन यावदर्थिकादिहेतोश्च मिलितमारभ्यते **तन्मिश्रम्** ॥४॥ यद्यतिनिमित्तं गृही स्थापयित्वा मुञ्चति तत् **स्थापना** ॥५॥ यत् स्वनिमित्तमपि गृही व्रतिन आगन्तून् जिगमिषून् वा ज्ञात्वा अर्वाक् परतो वा तदर्थमारभते सा **प्राभृतिका** ॥६॥ यत् सान्धकारस्थितस्य यतिनिमित्तं दीपादिना प्रकटनं बहिरालोके नयनं वा तत् **प्रादुष्करणम्** ॥७॥ यत् [टि.1]स्वकीयपरकीयाभ्यां द्रव्यभावाभ्यां मूल्येन

१. आधाय – C आराधया – K, D । २. मुद्दिशमा... L, A, B । ३. पूर्व.... A, B ।

टि. 1. स्वकीयद्रव्यमूल्येनस्वकीयभावमूल्येनपरकीयद्रव्यमूल्येन परकीयभावमूल्येन इत्यन्वयः ।

विसाधितं तत् **क्रीतम्** ॥८॥ यद् उच्छिन्नं याचित्वा गृही दत्ते तत् **प्रामित्यम्** ॥९॥ यत्पुनः परावर्त्त्य गृही यतिभ्यो दत्ते तत् **परावर्त्तितम्** ॥१०॥ यद् ग्रामान्तराद् गृहाद्वा यतिनिमित्तमानीतं **तदाहृतम्** ॥११॥ यन्मुद्रितकुतुपादिमुखं यतिहेतोरुन्मुद्र्य गृही घृतादि दत्ते **तदुद्भिन्नम्** ॥१२॥ यत् करदुर्ग्राह्यं मालादिभ्य उत्तार्य गृही दत्ते **तन्मालोपहृतम्** ॥१३॥ यद् बलात् कस्मादपि उद्दाल्य गृही दत्ते **तदाच्छेद्यम्** ॥१४॥ यद् बहुसाधारणम् अन्यैरदत्तं गृही एको दत्ते **तदनिसृष्टम्** ॥१५॥ यद् गृहिणा मूलारम्भे स्वार्थं कृते तन्मध्ये यतिनिमित्तमधिकावतारणं **सोऽध्यवपूरकः** ॥१६॥ इत्युद्गमदोषाः षोडश ।

**''धाई १ दूइ २ निमित्ते ३ आजीव ४ वणीमगे ५ चिगिच्छा[1] ६ य ।**
**कोहे ७ माणे ८ माया ९ लोहे १० हवंति दस एए** ॥१॥ [ पि.नि./४०८ ]
**पुव्विं पच्छा संथव ११ विज्जा १२ मंते १३ य चुण्ण १४ जोगे १५ य ।**
**उप्पायणाए दोसा सोलसमे मूलकम्मे १६ य''** ॥२॥ [ पि.नि./४०९ ]

व्याख्या–यदा पिण्डार्थं दातुरपत्यानाम् अङ्कधारणादिना लालनं करोति तदा **धात्री**दोषः ॥१॥ पिण्डार्थमेव च सन्देशकनयनाऽऽनयनादिकरणे **दूत्य**[2]दोषः ॥२॥ पिण्डार्थं लाभालाभकथने **निमित्त**दोषः ॥३॥ पिण्डार्थं दातुः सत्कं जात्यादि स्वस्य प्रकाशयत **आजीवना**दोषः ॥४॥ यो दाता यद्भक्तस्तस्याऽग्रतस्तद्भक्तमात्मानं पिण्डार्थं दर्शयतः साधो**र्वनीपक**दोषः ॥५॥ पिण्डार्थं दातृगृहे औषधादिना वमनादिना वा प्रतिकुर्वतो वैद्यादि सूचयतो वा **चिकित्सा**दोषः ॥६॥ बलविद्याराजवर्णकतपःशक्तिप्रभावादिकोपभयाद् यं लभते स **कोप**पिण्डः ॥७॥ प्रशंसितोऽपमानितो वा दातुरभिमानेनोत्पादितेन यल्लभते स **मान**पिण्डः ॥८॥ एकदा गृहाद् गृहीत्वा रूपान्तरं कृत्वा मायावशात् पुनर्ग्रहणार्थं प्रविशति स **माया**पिण्डः ॥९॥ कस्याऽपि वस्तुनो गृद्ध्या बहुतरम् अटतो **लोभ**पिण्डः ॥१०॥ जननीजनकश्वश्रूश्वशुरादिसम्बन्धं परिचयरूपं कुर्वतः पूर्वं पश्चाद्वा दानाद्दातारं वर्णयतो वा **संस्तव**दोषः ॥११॥ स्त्रीरूपदेवताधिष्ठितं पूर्वसेवा-उत्तरसेवाराध्यं च सप्रभाववर्णाम्नायं पिण्डार्थं प्रयुञ्जानस्य **विद्या**पिण्डः ॥१२॥ पुरुषदेवताधिष्ठितं पठितसिद्धं च सप्रभाववर्णाम्नायं प्रयुञ्जानस्य पुन**र्मन्त्र**पिण्डः ॥१३॥ अदृश्यीकरणहेतुं नयनाञ्जनादिकं पिण्डार्थं कुर्वत**श्चूर्ण**पिण्डः ॥१४॥ सौभाग्यदौर्भाग्यफलान् पादलेपप्रभृतीन् वा योगान् पिण्डार्थमेव प्रयुञ्जानस्य **योग**पिण्डः ॥१५॥ मङ्गलस्नानमूलिकाद्यौषधिरक्षादिना गर्भकरणविवाहभङ्गादिवशीकरणादि च पिण्डार्थं कुर्वतो **मूलकर्म**दोषः ॥१६॥ इति उत्पादनादोषा अपि षोडश ।

**''संकिय १ मक्खिय २ निक्खित्त ३ पिहिय ४ साहरिय ५ दाय ६ गुम्मीसे ७ ।**
**अपरिणय ८ लित्त ९ छड्डिय १० एसणदोसा दस हवंति''** ॥१॥ [ पि.नि./५२० ]

व्याख्या–शुद्धमपि केनाऽपि आधाकर्मादिना दोषेन जुष्टं **शङ्कित**मदुष्टमपि दुष्टमेव ॥१॥ म्रक्षितं सचित्तेन आगमगर्हितेन मधुमद्यादिना वा खरण्टितेन करेण भाजनेन वा यद्दत्ते **तन्म्रक्षितम्** ॥२॥ सचित्तेषु पृथिव्यादिषु अनन्तरं परम्परं वा **यन्निक्षिप्तं** तदनादेयम् ॥३॥ सचित्तेन फलादिना छन्नं **पिहितम्** ॥४॥ अयोग्यं सचित्तादि अमत्रादेरुत्सार्य यद्ददाति **तत्संहृतम्** ॥५॥ तथा **दायक**दोषा आभिर्गाथाभिरवसेयाः ॥६॥

**''थेर-अपहुपंड-वेविर-जरि-अंधव्वत्तमत्तउम्मत्ते ।**
**करचरणच्छिन्नपगलिय-नियलंदुयपाउयारूढे** ॥१॥

---

१. विगिच्छा – K, H, A, B, तिगिच्छा L । २. दौत्य – C ।

**खंडइ पीसइ भुंजइ कत्तइ लोढेइ विक्खिणइ ।**
**पिंजे दलइ विरोलइ जेमइ जा गुव्विणि बालवच्छा य ॥२॥**
**तह छक्काए गेण्हइ घट्टइ आरभइ खिवइ दट्ठु जई ।**
**साहारणचोरियगं देइ परक्कं परट्ठं वा ॥३॥**
**ठवइ बलिं उअत्तइ पिढराइ तहा सपच्चवाया जा ।**
**दिंतेसु एवमाइसु ओहेण मुणी न गिण्हंति" ॥४॥** [ पि.वि/गा. ८५तः८८ ]

योग्यम् अयोग्यं च द्वे अपि संमील्य यदा ददाति तदा **उन्मिश्रं** दोषः ॥७॥ अपरिणमितं प्रासुकत्वेन द्रव्यं दायक-संयतयोर्विशुद्धतया भावो वा **अपरिणतं** दोषः ॥८॥ दध्यादिलेपकृत्संसृष्टाभ्यां मात्रक-कराभ्यां सावशेषद्रव्येण च त्रिभिः पदैरष्टभङ्ग्यां विषमसङ्ख्यभङ्गेषु **लिप्तं** दोषः भङ्गस्थापना च एवम् ॥९॥ यत्र दीयमाने परिसाडिस्तत्र **छर्दितम्** ॥१०॥ इति एषणादोषा दश । एते सर्वे च द्विचत्वारिंशद्भवन्ति ॥

**"इय सोलस सोलस दस उग्गमउप्पायणेसणा दोसा ।**
**गिहिसाहूभयपभवा पंच उ घासेसणाए इमे ॥१॥** [ पि.वि./९३ ]
**संजोयणा १ पमाणे २ इंगाले ३ धूम ४ कारणे ५ तह य ।**
**एएहिं जो विसुद्धं गिण्हइ भुंजइ य सो समिओ" ॥२॥** [ पि.वि./९४ ]
**"वेयण १ वेयावच्चे २ इरियट्ठाए ३ य संजमट्ठाए ४ ।**
**तह पाणवत्तियाए ५ छट्ठं पुण धम्मचिंताए ६" ॥१॥** [ पि.नि./६६२ ] इति षट् कारणानि ॥

अथ प्रकृतमेव प्रस्तुमः । चतुर्थीं समितिमाह—

**पुव्विं चक्खुपरिक्खिय-पमज्जियं जो ठवेइ गिण्हइ वा ।**
**आयाणभंडमत्तनिक्खेवणाए समिओ मुणी होइ ॥२९९॥**

**पूर्वं** प्रथमम् आदेयं निक्षेप्यं वस्तु प्रदेशं च **चक्षुषा परीक्ष्य** वीक्ष्य **प्रमृज्य** रजोहरणेन, **यः** साधुः **स्थापयति गृह्णाति वा** स आदानं भाण्डस्य उपकरणस्य निक्षेपणं च, आर्षत्वाद् भाण्डस्य मध्यपदत्वम्, तस्याम् **आदानभाण्डनिक्षेपणायां समितो मुनिर्भवतीति** ॥२९९॥ अथ पञ्चमीसमितिमाह—

**उच्चारपासवणखेलजल्ल-सिंघाणए य पाणिविही ।**
**सुविवेइए पएसे, निसिरंतो होइ तस्समिओ ॥३००॥**

**उच्चारः** पुरीषं **प्रश्रवणं** मूत्रं **खेलः** श्लेष्मा **जल्लो** देहमलः **सिंघानको** नासिकामलस्तेषां द्वन्द्वे तान्, चशब्दादतिरिक्ताऽशुद्धपानोपकरणानि च **प्राणिविधीन्**[1] अनेकान् कथञ्चिदुपकरणादिसमापतितान् **सुविवेचिते** स्वयं स्थावरजङ्गमजन्तुरहिततया विविक्तेऽपि साधुर्दर्शन[2]-रजोहरणाभ्यां सुविवेचिते **प्रदेशे निसृजन्** परिष्ठापयन् **भवति तत्समितः** परिष्ठापनासमित इति । समितय इति गतम् ॥३००॥

सम्प्रति कषायांस्तज्जातीयांश्चाधिकृत्याह—

**कोहो माणो माया, लोहो हासो रई य अरई य ।**
**सोगो भयं दुगुंछा, पच्चक्खकली इमे सव्वे ॥३०१॥**

---

१. प्राणिविधान् - K, D । २. साधुना - K, D, C ।

**क्रोधादयश्चत्वारः हासादयश्च** षट्, इमे सर्वे कलहहेतुत्वात् **प्रत्यक्षकलयः** । उपलक्षणं चेदम् - यावता सर्वाऽनर्थकारणमिमे सर्वेऽपीति ॥३०१॥

**'तत्त्वभेदपर्यायैर्व्याख्या'** इति न्यायात् क्रोधपर्यायान् सदोषानाह—

**कोहो कलहो खारो, अवरुप्परमच्छरो अणुसओ य ।**
**चंडत्तणमणुवसमो, तामसभावो य संतावो ॥३०२॥**

**क्रोधः कलहः क्षारः परस्परमत्सरोऽनुशयश्च चण्डत्वमनुपशमस्तामसभावश्च सन्ताप** इति ॥३०२॥

**निच्छोडण निब्भंच्छण, निरणुवत्तित्तणं असंवासो ।**
**कयनासो य असम्मं, बंधइ घणचिक्कणं कम्मं ॥३०३॥**

**निच्छोटनं निर्भर्त्सनम**नुस्वारलोपात्, **निरनुवर्त्तित्वम् असंवासः कृतनाशश्च असाम्यम्** । अमून्यपि क्रोधकार्यत्वेन फलहेतूपचारात् क्रोधशब्देनोच्यन्ते । एतान्याचरन् जन्तु**र्बध्नाति घनं** गाढं **चिक्कणं** निबिडतया दुर्मोचं **कर्म** ज्ञानावरणीयादीति ॥३०३॥ मानाभिधानान्याह—

**माणो मयहंकारो, परपरिवाओ य अत्तउक्करिसो ।**
**परपरिभवो वि य तहा, परस्स निंदा असूया य ॥३०४॥**

**मानो मदोऽहङ्कारः परपरिवादश्च आत्मोत्कर्षः परपरिभवोऽपि च तथा परस्य निन्दा असूया च** ॥३०४॥

**हीला निरोवयारित्तणं, निरुवणामया अविणओ य ।**
**परगुणपच्छायणया, जीवं पाडंति संसारे ॥३०५॥**

**हीला निरुपकारित्वं निरवनामता अविनयश्च परगुणप्रच्छादनता**, एतानि सर्वाणि मानपर्यायवाचकानि, सेव्यमानानि **जीवं पातयन्ति संसारे** इति ॥३०५॥

अथ मायापर्यायानाह—

**मायाकुडंग पच्छन्नपावया कूडकवडवंचणया ।**
**सव्वत्थ असब्भावो, परनिक्खेवावहारो य ॥३०६॥**

**माया कुडङ्गः प्रच्छन्नपापता, कूटं कपटम्** अनुस्वारलोपात्, **वञ्चना सर्वत्रासद्भावः परनिक्षेपाऽपहारश्च** ॥३०६॥

**छल छउम संवइयरो, गूढायारत्तणं मई कूडिला ।**
**वीसंभघायणं पि य, भवकोडिसएसु विनडेन्ति ॥३०७॥**

**छलं छद्मं संव्यतिकरो गूढाचारत्वं मतिः कुटिला** । [१]**विश्रम्भघातनमपि** चैतानि प्रागुक्तन्यायात् मायाशब्देनोच्यन्ते । तानि **भवकोटिशतेषु विनाटयन्ति** विडम्बयन्ति तत्कारिणं जीवमिति ॥३०७॥

---

१. विश्वस्त... C ।

अथामी लोभपर्याया यथा—

**लोभो अइसंचयसीलया य किलिट्ठत्तणं अइममत्तं ।**
**कप्पन्नमपरिभोगो, नट्ठविणट्ठे य आगल्लं ॥३०८॥**

**लोभोऽतिसञ्चयशीलता च क्लिष्टत्वमतिममत्वं कार्पण्यमपरिभोगः । नष्टे** गते **विनष्टे**ऽप्राप्ते, क्षितमृतादौ [१]**अकल्यता** शोकमूर्च्छादिवशात् हृदयस्फोटादिभिर्मान्द्यमिति ॥३०८॥

**मुच्छा अइबहुधणलोभया य तब्भावभावणा य सया ।**
**बोलेंति महाघोरे, जरमरणमहासमुद्दम्मि ॥३०९॥**

**मूर्च्छा अतिबहुधनलोभता च तद्भावभावनापि च** तदर्थित्वं लौल्यातिरेकेण तदेकतानध्यानतया चित्तस्य तन्मयता । एतानि पूर्वोक्तहेतोरेव लोभशब्देनोच्यन्ते । तानि च **बोलयन्ति** निमज्जयन्ति **महाघोरे** अतिरौद्रे **जरामरणमहासमुद्रे** जीवमिति ॥३०९॥

यस्तु एतान् कषायान् जयति तस्य महिमानमाह—

**एएसु जो न वट्टिज्जा, तेण अप्पा जहट्ठिओ नाओ ।**
**मणुयाण माणणिज्जो, देवाण वि देवयं होज्जा ॥३१०॥**

**एतेषु** क्रोधादिषु **यो न वर्त्तते तेन आत्मा यथावस्थितः** कर्मव्यतिरेकी अनन्तदर्शनज्ञान-वीर्यानन्दात्मको **ज्ञातः** । अत [२]एवासौ **मनुजानां माननीयः** पूजनीयो, **देवानामपि** शक्रादीनां **देवता भवेत्** पूज्यतमत्वादिति ॥३१०॥

भूयः क्रोधदोषमाह—

**जो भासुरं भुयंगं, पयंडदाढाविसं विघट्टेइ ।**
**तत्तो च्चिय तस्संतो, रोसभुयंगोवमाणमिणं ॥३११॥**

**यो** मन्दधी**र्भासुरं** रौद्रं **भुजङ्गमं** सर्पं **प्रचण्डदंष्ट्राविषम्** उत्कटाशीविषं **विघट्टयति** करकिलिञ्चादिना चालयति । **तत एव** भुजङ्गात् **तस्यान्तो** विनाशो भवति **रोषभुजङ्गोपमानमिदम्** क्रोधसर्पोपमैषा क्रोध-मुदीरयत एवमेव विनाश इति ॥३११॥

अथ मानमाह—

**जो आगलेइ मत्तं, कयंतकालोवमं वणगइंदं ।**
**सो तेणं चिय छुज्जइ, माणगइंदेण इत्थुवमा ॥३१२॥**

**य आकलयति** गृह्णाति **मत्तं** मदोद्धतं **कृतान्तकालोपमं** यमकालोपमं **वनगजेन्द्रम्** अरण्यकरिणम् , **स तेनैव** करिणा **क्षुद्यते** चूर्ण्यते, **मानगजेन्द्रेण एषा उपमा** । मानमपि कुर्वन्नेवं प्रलीयते इति ॥३१२॥

मायामाह—

**विसवल्लिमहागहणं, जो पविसइ साणुवायफरिसविसं ।**
**सो अचिरेण विणस्सइ, माया विसवल्लिगहणसमा ॥३१३॥**

---

१. आकल्यता - C आकल्यं - L । २. विनाशयति - C ।

**विषवल्लीनां महागहनं** बृहद्गह्वरं **यः प्रविशति** । किम्भूतं-**सानुवातस्पर्शविषम्** अनुकूलो वातोऽनुवातः, सह तेनेति सानुवातं स्पर्शविषं यत्र तत्तथा । गन्धेन स्पर्शेन च यन्मारयतीति भावः । **स** प्रविशन्न**चिरेण विनश्यति** । एवं **माया विषवल्लिगहनसमा** तद्वन्मारणात्मकत्वादिति ॥३१३॥ लोभमाह—

**घोरे भयागरे सागरम्मि तिमि-मगर-गाहपउरम्मि ।**
**जो पविसइ सो पविसइ, लोभमहासागरे भीमे ॥३१४॥**

**घोरे** रौद्रे **भयाकरे** भयक्षेत्रे **सागरे**, किंभूते **तिमयो** मत्स्या **मकराः** प्रसिद्धास्तत्प्रधाना **ग्राहा**स्तदन्ये जलचरभेदास्**तैः प्रचुरे यः प्रविशति स प्रविशति लोभमहासागरे भीमे** तस्याऽप्यनन्तप्रबलदुःखग्राहाकुलत्वादिति ॥३१४॥

एवमपि सति कर्मपारवश्यात् प्राणिनो दोषेभ्यो नोपरमन्त इत्याह—

**गुणदोसबहुविसेसं, पयं पयं जाणिऊण नीसेसं ।**
**दोसेसु जणो न विरज्जइ, त्ति कम्माण अहिगारो[1] ॥३१५॥**

**गुण-दोषाणां** ज्ञानादि-क्रोधादीनां **बहुर्विशेषो** यथाक्रमं शिव-भवयोः कारणरूपो यस्मिन् पदे तत् **गुणदोषबहुविशेषं पदं पदं** वीप्सया सकलमपि ज्ञानादीनां शिवहेतुत्वस्य क्रोधादीनां भवहेतुत्वस्य प्रतिपादकं भगवदागमवाक्यं **ज्ञात्वा निःशेषं** सम्पूर्णं तथाऽपि **दोषेभ्यः** पापानुष्ठानेभ्यो **जनो न विरज्यते** न निवर्त्तते, **इति** स एष **कर्मणाम् अधिकारो** वश इति ॥३१५॥

तदेवं प्रतिद्वारगाथो[2]क्ता । क्रोधो मानो माया लोभ इति चत्वारो व्याख्याताः । सम्प्रति हासं व्याचष्टे—

**अट्टट्टहासकेलीकिलत्तणं हासखेड्डुजमगरुइं ।**
**कंदप्पं उवहसणं, परस्स न करंति अणगारा ॥३१६॥**

विवृत्तस्य मुखस्य सशब्दं हसनम् **अट्टट्टहासः । केलि**ना क्रीडया **किरति** विक्षेपं करोति स तथा तस्य भावः **केलीकिलत्वम् । हासंखेड्डुं** कौत्कुच्यकरणम् । **यमकं** काव्यालङ्कारभेदस्तत्र **रुचिं** काव्यमन्तरेणाऽपि यमकान्तर्जल्पजल्पाकताम् उपलक्षणत्वात् सर्वामपि सरागकाव्यरुचिम्, **कन्दर्पं** सरागप्रहासनं **उपहसनम्** उत्प्रासनं तदेतत्सर्वं **परस्य न कुर्वन्ति अनगाराः** साधव इति ॥३१६॥

अथ रतिपदं विवृणोति—

**साहूणं अप्परई, ससरीरपलोयणा तवे अरई ।**
**सुत्थियवन्नो अइपहरिसं च नत्थी सुसाहूणं ॥३१७॥**

**साधूनामात्मनि रति**रासक्तिः शब्दादीनां शुभानाम् आदानरूपा, अशुभानां हानरूपा च स्वारसिकी प्रवृत्तिः । **स्वशरीरप्रलोकना** अत्यादरेण आत्मदेहस्य बहुमानतो वीक्षणम् । अत एव **तपसि** अनशनादौ **अरतिः** शरीरवर्णाद्युत्कर्षरसिको हि तपसि न रज्यते । सुस्थितोऽहमिति वर्णः स्वश्लाघा **सुस्थितवर्णो-ऽतिप्रहर्षश्च** महत्यपि लाभादौ हर्षकारणे; एतदात्मरत्यादिकं सर्वमपि **नास्ति सुसाधूनाम्,** साधवो भूत्वा एतानि परिहरन्तः सुसाधवो भवन्तीति ज्ञापनार्थं साधूनामित्युक्त्वाऽपि भूयः सुसाधूनामित्युक्तमिति ॥३१७॥

---

१. भवशिवयो - C, B, K । २. थोक्तं - C, K, L ।

अथ अरतिद्वारमाह—

**उव्वेवओ य अरणामओ य अरमंतिया य अरई य ।**
**कलमलओ अणेगग्गया य कत्तो सुविहियाणं ? ॥३१८॥**

उद्वेग एव **उद्वेगकः** स्वल्पं धर्मधैर्याच्चलनम् । अरणं सन्मार्गादन्यत्र भ्रमणं तदेवाऽऽमयश्चित्तरोगोऽ**रणामयश्च** । धर्मध्याने अरममाणा धर्मविरुद्धा प्रवृत्तिः, अरमन्ती सैव **अरमन्तिका** धर्मविरुद्धा चेष्टा । सा च **अरति**र्गाढोद्वेगतया चित्तस्याऽनवस्थितिः, **कलमलको** विषयाणां लौल्यातिरेका[1]दप्राप्तौ चेतसः क्षोभः **अनेकाग्रता**-इदमद्मि इदं पिबामि इदं परिदधामि इत्यादि चित्तोत्कलिका च । **च**शब्दाः स्वगतानेकभेदसंसूचकाः । एतत्सर्वमपि **कुतः सुविहितानाम्** ? धर्मशुक्लध्यानभावितत्वात् नैवेति भावः ॥३१८॥

अथ शोकं [2]निषेधति—

**सोगं संतावं अद्धिइं च मन्नुं च वेमणस्सं च ।**
**कारुण्णरुण्णभावं, न साहुधम्मम्मि इच्छंति ॥३१९॥**

**शोको** गतमृतादौ चित्तखेदस्तं, **सन्तापः** स एवाधिकतरस्तम्, **अधृतिः** क्वचिदनिष्टद्रव्यादौ तद्वियोगबुद्धिस्तां च । **मन्युः** शोकातिरेकाद् गलसरणिरोधस्तं च । **वैमनस्य**मात्मघातादिचिन्तनम् । **कारुदितम्** ईषद् रुदितं **रुदितभावो** महता शब्देनाऽऽक्रन्दनम् । इदं सर्वमपि **न साधुधर्मे इच्छन्ति** मन्यन्ते परमगुरवः, साधुधर्मस्य समाधानैकसाध्यत्वादिति ॥३१९॥

अथ भयं [3]निषेधति—

**भयसंखोहविसाओ, मग्गविभेओ बिभीसियाओ य ।**
**परमग्गदंसणाणि य, दढधम्माणं कओ हुंति ? ॥३२०॥**

**भयं** निःसत्त्वतया यतःकुतोऽपि धैर्यध्वंसः । **संक्षोभ**श्चौरादेस्त्रासः । **विषादो** दैन्यम् । **मार्गविभेदः** पथि सिंहादित्रासादुद्वर्त्तनम् । **बिभीषिका** वेतालादिभिर्वित्रासनानि । **चः** प्राग्वत् । **परमार्गदर्शनानि** च भयादन्येषां वर्त्तनीविलोकनानि । एतानि सर्वाणि **दृढधर्माणां कुतो भवन्ति** ? निर्भीकत्वान्न कुतोऽपि । इह च मार्गविभेदबिभीषिकाप्रायं जिनकल्पापेक्षं द्रष्टव्यमिति ॥३२०॥

अथ जुगुप्सां प्रत्याचष्टे—

**कुच्छा विलीणमलसंकडेसु उव्वेवओ अणिट्ठेसु ।**
**चक्खुनियत्तणमसुभेसु नत्थि दव्वेसु दंताणं ॥३२१॥**

**कुत्सा** निन्दा, **विलीनमलसङ्कटेषु** अशुभादिक्लेदसङ्कीर्णेषु मृतकलेवरादिषु । **उद्वेगकोऽनिष्टेषु** मलक्लिन्नात्मदेहवस्त्रादिषु । **चक्षुर्निवर्त्तनमशुभेषु** कृमिकुलाधारसारमेयादिषु **नास्ति द्रव्येषु दान्ता-नाम**धीनेन्द्रियाणां साधूनां जितजुगुप्साकर्मणामिति ॥३२१॥ तदेवं निखिलमोहप्ररोहकन्दोन्मूलनाऽनुकूलं साधुधर्मं विदित्वाऽपि कर्माधीनतया बहूनयथाकारिणो वीक्ष्य इदमाह—

---

१. कादवासौ - B, H, KH । २. निषेधयति - B, A, L । ३. निषेधयति - B, L, A ।

**एयं पि नाम नाऊण, मुज्झियव्वं ति नूण जीवस्स ।**
**फेडेऊण न तीरइ, अइबलिओ कम्मसंघाओ ॥३२२॥**

**एतदपि** कषाय-नोकषायनिग्रहपरमनन्तरोक्तम् **अपिशब्दाद्** वक्ष्यमाणं च, **नामेति** प्रसिद्धं भगवद्वाचा **ज्ञात्वा मोहितव्यमिति** अनेन जीवेन यन्मूढेन भूयते तन्नूनं निश्चितं **जीवस्य भ्रंशयितुं न शक्यते अतिबलीयान् कर्मसङ्घातः** । स हि ज्ञाततत्त्वमपि सत्त्वं बलादकार्ये प्रवर्त्तयति । किमन्यदत्र कृत्यं केवलं वयमिह द्रष्टार उपदेष्टारश्चेति ॥३२२॥

अथ मूलद्वारगाथायां गौरवाणि व्याचिख्यासुर्गौरववतः पूर्वं लिङ्गमाह—

**जह जह बहुस्सुओ सम्मओ य सीसगणसंपरिवुडो य ।**
**अवि णिच्छिओ य समए, तह तह सिद्धंतपडणीओ ॥३२३॥**

**यथा यथा बहुश्रुतः** पारगतागमपारङ्गममतिः । **संमतश्च** बहुमतो लोकानां **शिष्यगणसंपरिवृतश्च** विनेयजनसम्यक्परिच्छदश्च । **अपीति** सम्भावनायां **निश्चितश्च** निष्टङ्कितपरमार्थश्च **समये** सदागमे । **तथा तथाऽसौ सिद्धान्तप्रत्यनीको** वस्तुस्थित्या ऋद्ध्यादिगौरवगृद्ध्या सिद्धान्तलाघवापादनादिति ॥३२३॥

तथा सिद्धान्तप्रत्यनीकश्च किमभिमन्यते इत्याह—

**पवराइं वत्थपायासणोवगरणाइं एस विहवो मे ।**
**अवि य महाजणनेया, अहं ति अह इड्ढिगारविओ ॥३२४॥**

'**प्रवराणि वस्त्र-पात्राऽऽसनोपकरणानि एष विभवो मे**' स इत्यभिमन्यते, अयं ऋद्ध्युपचयो मम । **अपि च महाजननेता** प्रधानलोकप्रभुरहम् **इति अथैष** एवम् ऋद्ध्या पूर्वाप्तया[१] उत्सेकेन अप्राप्तप्रार्थनया च गौरवमात्मनो निबिडकर्मदलिकग्रहणेन गुरुत्वम् , तद्विद्यते यस्य स **ऋद्धिगौरविक** इति ॥३२४॥

रसगौरवमाह—

**अरसं विरसं लूहं, जहोववन्नं च नेच्छए भत्तं ।**
**निद्धाणि पेसलाणि य मग्गइ रसगारवे गिद्धो ॥३२५॥**

**अरसं** हिङ्ग्वादिभिरसंस्कृतं **विरसं** पुराणौदनादि **रूक्षं** स्नेहहीनं **यथोपपन्नं च** निरुपाधिलब्ध्या सम्पन्नं **नेच्छति भक्तं** भोजनम् । किन्तु **स्निग्धानि** प्रभूतस्नेहानि **पेशलानि** मनोज्ञानि **मार्गयति** अभिलषति **रसगौरवे** सति **गृद्धो** लौल्याध्मात इति ॥३२५॥

अथ सातगौरवमाह—

**सुस्सूसई सरीरं, सयणासणवाहणापसंगपरो ।**
**सायागारवगुरुओ, दुक्खस्स न देइ अप्पाणं ॥३२६॥**

**शुश्रूषति** प्रतिक्षणं संस्कुरुते शरीरं—वपुः, शयनं—तूल्यादि, आसनं—मसूरकादि, वाहनं—यानं, तेषु आ सामस्त्येन निष्कारणं परिभोगः प्रसङ्गो—गाढमासक्तिस्तत्र तत्परः **शयनासनवाहनाप्रसङ्गपरः सातविषयं**[२] **गौरवं** तेन **गुरुकः दुःखस्य न ददाति आत्मानं** दुःखद्वेषीति भावः ॥३२६॥

---

१. पूर्वापर्यास्तया - D, K । २. सातविषये - C, L सातविषयो - D, K ।

गौरवद्वारं व्याख्याय इन्द्रियद्वारं व्याचष्टे–

**तवकुलच्छायाभंसो, पंडिच्चप्फंसणा अणिट्ठपहो ।**
**वसणाणि रणमुहाणि य इंदियवसगा अणुहवंति ॥३२७॥**

**तपो**ऽनशनादि, **कुलमु**ग्रादि, **छाया** लोकमध्ये उन्नतिरेतेषां **भ्रंशो**ऽधःपतनम् इन्द्रियवशगानां स्यात् । यतः–

**उग्रं तपः कपटतामभिलम्भयन्ति कीर्त्युज्ज्वलानि च कुलानि कलङ्कयन्ति ।**
**अन्तं नयन्ति परमामपि च प्रतिष्ठां किं वा न हीन्द्रियजिताः किल हारयन्ति ॥१॥ [ ] [ वसन्ततिलकावृत्तम् ]**

तथा **पाण्डित्यपुंसना** विद्वत्तालोपः । यतः–

**"शब्दागमाधिगमवान्निगमेष्वधीती सत्तर्ककर्कशमतिः कवितासु वेधाः ।**
**सिद्धान्तधाम सकलासु कलासु दक्षोऽप्यक्षैर्जितः पठितमूर्खतयाऽनु वाच्यः" ॥१॥ [ ]**

तथा **अनिष्टो** रत्नत्रयात्मकान्मोक्षमार्गादिष्टादितरः **पन्था** मार्गः । तच्चोक्तम्–

**"दिवसरजनिसारैः सारितं पक्षगेहम्, समयफलकमेतन्मण्डितं भूतधात्र्याम् ।**
**इह हि जयति कश्चिन्मोक्षमक्षैर्विधेयैरधिगतमपि चाऽन्ये विप्लुतैर्हारयन्ति" ॥१॥ [ ]**

तथा **व्यसनानि** नानाविधा विपदः । यतः–

**"हस्ती स्पर्शनतस्तिमिश्च रसनाद् घ्राणात्फणी दर्शनात्,**
**व्यामूढः शलभो मृगः श्रवणतः प्रापुर्विपत्तिं पराम् ।**
**इत्येकैकमपि क्व नाक्षमजितं स्यात्पञ्चतायाः पदम्;**
**पञ्चानां तु किमुच्यते ध्रुवममी पञ्चापि पञ्चेषवः" ॥१॥ [ ]**

तथा **रणमुखानि च** सङ्ग्रामद्वाराणि विनाशकारणानि **च**शब्दान्निःशेषदोषा**निन्द्रियवशगा अनुभवन्ति** । तथाहि–

**"जितं दशार्णभद्रेण हारितं हरिणा च यत् ।**
**हेतुरत्र हृषीकाणि निर्जितान्यजितानि च"** ॥१॥ [ ] इति ॥३२७॥

इन्द्रियाणामेव जयोपायमाह–

**सद्देसु न रज्जिज्जा, रूवं दट्ठुं पुणो न विक्खिज्जा ।**
**गंधे रसे य फासे, अमुच्छिओ उज्जमेज्ज मुणी ॥३२८॥**

**शब्देषु** काकली-गीत-वेणु-वीणादि[१]प्रभवेषु **न रज्येत** न रक्तः स्यात् । **रूपं** कान्तं कथञ्चित् **दृष्ट्वा पुनस्**तद्वीक्षणलोलतया **न वीक्षेत** आदित एव भास्करादिव दृष्टिं प्रतिसंहरेत्, न भूयः पश्येत् । **गन्धे रसे च स्पर्शे** सुन्दरे**ऽमूर्च्छितो**ऽगृद्धश्चशब्दादसुन्दरे अद्विष्टश्च **उद्यच्छेत्** आत्मानुष्ठाननिष्ठो भवेत् । **मुनि**स्तस्यैवोपदेशार्हत्वादिति ॥३२८॥

---

१. प्रसवेषु – L ।

तत्किम् एतानि इन्द्रियाणि घातनीयान्येवेति असूयकान् शिष्यान् प्रत्याह—

**निहयाणिहयाणि य इंदियाणि घाएह णं पयत्तेणं ।**
**अहियत्थे निहयाइं, हियकज्जे पूयणिज्जाइं ॥३२९॥**

**निहतानिहतानी**ति **इन्द्रियाणि घातयत ननु प्रयत्नेन णं** नन्वर्थे, ननु इत्याक्षेपे प्रयत्नेन प्रकृष्टचेतः-प्रणिधानेन इन्द्रियाणि अक्षाणि निहतानि अनिहतानीति-**घातयत** निहतानि च इष्टानिष्टेषु स्वविषयेषु तत्कार्य-रागद्वेषाऽनुत्पादेन प्रलयं नीतानि, **अनिहतानि** च स्वरूपसद्भावात् स्वविषयग्रहणाच्च स्पष्टतया विद्यमानानि इति द्वन्द्वे तानि निहताऽनिहतानि इत्येवंरूपाणि यथा भवन्ति तथा घातयतेत्यर्थः । अत्र यत्नस्य इन्द्रियाण्याश्रित्य नाशनोल्लासनोभयात्मकत्वं प्रकर्षार्थः । तथा चोक्तम् —

"**न शक्यं रूपमद्रष्टुं चक्षुर्गोचरमागतम् । रागद्वेषौ तु यौ तत्र तौ बुधः परिवर्जयेत्**" ॥१॥ [ ]

अत्रैवाऽर्थे विषयभेदेन विधिमाह-**अहितेऽर्थे** स्वविषये रागद्वेषविधानलक्षणे प्रवर्त्तमानानि **निहतानि** निरुद्धानि सन्ति । **हितकार्ये** जिनबिम्बावलोकन-भगवदागमश्रवणादौ प्रवर्त्तमानानि सन्ति **पूजनीयानि** अर्हणीयानि भवन्तीति विशद एव गाथार्थः । अस्याः सङ्ग्रह एवम्-

"**निहतानिहतानीति हताक्षाणि प्रयत्नतः । अहितेऽर्थे हतान्येवं हिते पूज्यानि धीमताम्**" ॥२॥ [ ] इति ।

इयं च गाथा मूलवृत्तिकृता विस्तरेणाऽनेकधा व्याख्याता । तदर्थिना च तद्वृत्तिद्वारेणातिगम्भीरमतिः स एव भगवान् पर्युपास्य इति ॥३२९॥

इन्द्रियाणि व्याख्याय अधिकृतं मदद्वारमाह—

**जाइ-कुल-रूव-बल-सुय-तवलाभिस्सरियअट्ठमयमत्तो ।**
**एयाइं चिय बंधइ, असुहाइं बहुं च संसारे ॥३३०॥**

**जाति**र्ब्राह्मणादिः **कुल**मुग्रादि **रूपं** शरीरसौन्दर्यं **बलं** वीर्यं **श्रुत**मागमाधिगमः **तपो**ऽनशनादि **लाभ** इष्टार्थप्राप्तिः **ऐश्वर्यं** प्रभुत्वं तेषां द्वन्द्वे तान्येव [अष्ट] **मदा**श्चित्तोन्मादास्तै**र्मत्तो** घूर्णितः प्राणी **एतान्येव बध्नाति** अर्जयति **अशुभानि** क्लिष्टानि '**बहुं**'ति क्रियाविशेषणाद्बहुशोऽनन्तगुणानि **च**शब्दोऽध्यवसायतारतम्याद्वैचित्र्य-दर्शनार्थः, **संसारे** भवे इति ॥३३०॥

तथाहि—

**जाईए उत्तमाए, कुले पहाणम्मि रूवमिस्सरियं ।**
**बलविज्जाए तवेण य, लाभमएणं व जो खिंसे ॥३३१॥**

**जात्या उत्तमया, कुले प्रधाने** सति, **रूपमैश्वर्यमा**श्रित्येति गम्यम् । **बलेन** सह या **विद्या** तया, **तपसा च लाभमदेन वा यो** मन्दधीः **खिंसति** परं हीलयेत् यदुत-अहमुत्तमगुणोऽयं तु अधम इत्यादि ॥३३१॥

स किमित्याह—

**संसारमणवयग्गं, नीयट्ठाणाइं पावमाणो य ।**
**भमइ अणंतं कालं, तम्हा उ मए विवज्जिज्जा ॥३३२॥**

**संसारमनपवर्गम्** अप्राप्तापरपारं **नीचस्थानान्य**धमस्थानानि जात्यादीनि **प्राप्नुवन्** चशब्दस्याव-

धारणार्थत्वात् आसादयन्नेव **भ्रमति** पर्यटति **अनन्तं कालम् । ततः** किमित्याह ? **तस्मात् तु**शब्दस्य व्यवहितसम्बन्धस्यावधारणार्थत्वात् **मदान् विवर्जयेदेव** परिहरेदेवेति ॥३३२॥

किञ्च–

**सुट्ठु वि जई जयंतो, जाइमयाईसु मज्जई जो उ ।**
**सो मेयज्जरिसि जहा, हरिएसबलो व्व परिहाइ ॥३३३॥**

**सुष्ठ्वपि** सातिशयमपि **यतिः** साधु**र्यतमान**स्तपोऽनुष्ठानादौ उद्युक्तो **जातिमदादिषु** जलावर्त्तेषु **मज्जति** ब्रुडति तान् वा विषयीकृत्य माद्यति मत्तो भवति **यस्तु**शब्दात् सद्भिरपि तद्धेतुभिः **स मेतार्यऋषिर्यथा हरिकेशबलः** प्रागुक्तस्वरूपो वा **परिहीयते** जात्यादेर्ह्रासमाप्नोतीति ॥३३३॥ तत्र **मेतार्योपाख्यानमे**वम्–

**[ मेतार्योपाख्यानम् ॥ ]**

पुरा **चन्द्रावतंसस्य** राज्यसम्पदमात्मजः । लेभे **सागरचन्द्राख्यः** साक्षादिव दिवस्पतिः ॥१॥
स नत्वोचेऽन्यदा मातुः सपत्नीं **प्रियदर्शनाम्** । प्रीणाति लोकम्पृणाऽपि श्रीर्न तातं विनाऽद्य मे ॥२॥
तन्मात**र्गुणचन्द्राय** श्रियं दत्त्वानुजन्मने । दीक्षामहं जिघृक्षामि यदि त्वमनुमन्यसे ॥३॥
तयोचे वत्स ! धन्यस्त्वं तस्यैवाऽसि पितुः सुतः । असावसारसंसारविरक्तौ यस्य ते रसः ॥४॥
राज्यभारो महान् किन्तु बालः सोऽयं तवाऽनुजः । किशोरकः कृशो न स्याद्युग्यः साङ्ग्रामिके रथे ॥५॥
तयेति बोधितो मात्रा निर्विकल्पमना: स्वयम् । राजर्षिः पालयामास राज्यं स प्राज्यवैभवः ॥६॥
क्रमात्[1]पराद्धर्यवर्द्धिष्णुमहर्द्धिमवलोक्य तम् । स्त्रीभावसुलभामीर्ष्यामुवाह **प्रियदर्शना** ॥७॥
अन्यस्याऽपि कलेर्मूलात् पोषिका एव योषिकाः । सापत्नकस्य किं वाच्यं यस्य ता जन्मभूमयः ॥८॥
यो ब्रह्मा विष्टपस्याऽस्य स्रष्टेति स्तूयते जनैः । सोऽपि जानाति न स्त्रीणां चित्तानि चरितानि च ॥९॥
तदा यदाददे राज्यं दीयमानं तया पुरा । भेजे तदर्थं सा द्वेषं निर्दोषे तत्र भूपतौ ॥१०॥
वाह्यालीलीलया खेलत्यन्यदाऽवनिवासवे । दास्या [2]पौरोगवः प्रैषीत् प्रातराशाय मोदकम् ॥११॥
वात्सल्यादिव तत्पाणेः पाणिनादाय तं पुनः । विमाता विषलिप्तेन सम्यग् सम्भाव्य चार्प्पयत् ॥१२॥
तदा वाह्यालिकेलीभिर्लालसेऽवनिवासवे । उभावभूतामभ्यर्णे विनीतौ तत्सुतौ च तौ ॥१३॥
आगत्याऽदत्त सा दासी मोदकं मेदिनीभुजे । क्षुधार्त्तयोरनुजयोर्विभुर्न बुभुजे स्वयम् ॥१४॥
राजा तत्त्वमजानानस्तं द्विधाकृत्य मोदकम् । [3]द्विधाहीनोऽपि सस्नेहं द्विधा बान्धवयोर्ददौ ॥१५॥
विषादिनौ विषावेगाद्विवर्णौ वीक्ष्य तावुभौ । विषादिना नृपेणाऽपि प्रापि वैवर्ण्यमात्मना ॥१६॥
निर्देशान्नृपतेः कोशादथाऽऽनीय भिषग्वरैः । सुवर्णं पायितौ जात्यं प्रगुणौ तौ बभूवतुः ॥१७॥
वृद्धान्तःपुरमेत्याऽथ तां विमातरमातुरः । राजाऽऽह साहसं पापे ! धिक् किमर्थमिदं कृतम् ॥१८॥
स्तोकेन परलोको मे न क्षतो भाग्यरक्षितः । कलङ्किनि ! कुतो नात्तं दत्तं राज्यं पुरा मया ॥१९॥

---

टि. 1. पराद्धर्य (त्रि०) उत्तमः । 2. पौरोगवः – सूदः । 3. द्विधाहीनः – शङ्कारहितः ।

अथो सत्त्वाधिको दत्त्वा राज्यं तत्तनुजन्मने । स्वयं संयमसाम्राज्यं सोऽग्रहीद् गुरुसन्निधौ ॥२०॥
एकादशाङ्गपारीण: स धुरीणस्तपोभृताम् । अरीणो[1] निर्वृतेरध्वन्यध्वनीनोऽभवन्मुनि: ॥२१॥
साधुसङ्घाटकोऽन्येद्युर**वन्ती**त: समागत: । तेनाऽनुयुक्तो निर्विघ्नमन्यत: सर्वतोऽभ्यधात् ॥२२॥
किन्तु राज्ञ: सुतस्तत्र सौवस्तिकसुतान्वित: । पाखण्डिन: सुसाधूँश्च दुर्विदग्ध: स बाधते ॥२३॥
तन्निशम्य गुरोराज्ञां शेखरीकृत्य कृत्यवित् । स्वयं **सागरचन्द्रो**ऽगाद**वन्तीं** प्रत्यमर्षण: ॥२४॥
विश्रान्तस्तत्र कुत्रापि साधूनामाश्रमे मुनि: । तेभ्य: साम्भोगिकेभ्योऽपि स्वं जगादात्मलब्धिकम् ॥२५॥
कनिष्ठं स्थापनासद्मालोकनिष्ठं स कञ्चन । मुनिं सह समादाय निर्ययौ किल चर्यया ॥२६॥
ज्ञात्वाऽऽलयं तयोस्तस्माद्दु:शिक्षितकुमारयो: । बालं निवर्त्य तत्रैव स्वयं मुनिपतिर्ययौ ॥२७॥
हहाऽयं किमिहाऽऽयात इत्युक्त: स्त्रीजनै: शनै: । बधिर: किल तत्रोच्चैर्धर्म्मलाभयति स्म स: ॥२८॥
कुमारावथ तं दृष्ट्वाऽऽरोप्य सौधोर्ध्वभूमिकाम् । द्वारं बद्ध्वोचतु: प्रीतौ नृत्य भट्टारकेति तौ ॥२९॥
तालं वादयितुं नाऽलं युवां नृत्तं क्व तं विना । तेनेत्युक्तौ जगदतुस्तर्हि युध्यस्व भिक्षुक[१] ! ॥३०॥
नियुद्धनिपुणेनैतौ यौवनादेव दुर्मदौ । मर्माभिघातिना तेनोद्वान्तफेनौ कृतौ क्षणात् ॥३१॥
समुत्तीर्याऽथ नि:सृत्य पतद्ग्रहपरिग्रह: । बहिरुद्यानमभ्येत्य तस्थौ प्रतिमया मुनि: ॥३२॥
क्रमतोऽथ मतो राज्ञा वृत्तान्तोऽयमनुप्लवै:[2] । सोऽन्विष्टो वसतौ तैश्च शिष्टोऽतिथिरिति स्फुटम् ॥३३॥
मार्गद्भिरवलोक्याऽथ[२] **मुनिचन्द्र**महीभुजे । उद्यानेऽस्तीति विज्ञप्त: स जनैर्मुनिपुङ्गव: ॥३४॥
आगत्य प्रत्यभिज्ञाय महाराजो महामुनिम् । न नाम विनयेनैव ननाम व्रीडयाऽपि स: ॥३५॥
धर्मलाभाशिषं दत्त्वा ऋषिराभाषते स्म तम् । **चन्द्रावतंस**पुत्रस्य तव युक्तं किमीदृशम् ॥३६॥
शक्रादप्यधिक: पृथ्वीं पृथ्वीशक्र: शशास य: । न तत्सुतस्य किं वत्स ! पाकशासनतापि ते ॥३७॥
राजन् ! राज्यरथस्यैतौ न्यायधर्मौ धुरन्धरौ । तव नेतृत्वमेतर्हि गर्हितं तदचिन्तनात् ॥३८॥
अथाऽवादि सुधावादि वसुधापतिना वच: । दुश्चेष्टितं क्षमस्वेति खेदं भृत्ये मयि त्यज ॥३९॥
कृतकृत्योऽस्मि धन्योऽस्मि धनिकेनाऽधुना त्वया । यदेवं शिक्षित: साक्षाद् गुरुणा करुणात्मना ॥४०॥
कुमारयोरपि महान् कश्चिदभ्युदयोदय: । यावेतौ भगवच्चित्ते शासनीयाविति स्थितौ ॥४१॥
स्त्रस्तं[३] तदस्थिसंस्थानं यच्चैतन्यं च किञ्चन । प्रतिमल्लोऽस्ति कस्तादृक् तत्प्रत्यानेतुमीश्वर: ॥४२॥
स्वयं दयोदयोद्भूताऽनुशयातिशयो मुनि: । विज्ञप्य किल राज्ञेति नीत: पार्श्वे तयोर्जगौ ॥४३॥
आभ्यां तप:क्रमो जैनो निजैनोव्रातघातक:[3] । सेव्यते यदि राजेन्द्र ! तदा यच्छामि जीवितम् ॥४४॥
तथाऽभ्युपगते ताभ्यां देहमर्मविदामुना । दीक्षितौ प्रगुणीकृत्य भवपाताच्च रक्षितौ ॥४५॥
मुनिश्रेष्ठ: पितुर्ज्येष्ठ: शास्त्रेऽत्येकाग्रमानस: । शिक्षां राजसुत: सम्यक् करोति क्षत्रियो हि स: ॥४६॥

---

१. भिक्षुक: - A, B, C, D, K, H, L । २. रविलोक्याथ - C । ३. स्तु - B, A, D, H, K ।

टि. 1. अरीण: - अनुद्विग्न: । 2. अनुप्लव:-दास: तै: । 3. निज एनस् (पापम्) व्रात घातक: इति सन्धिविच्छेद: ।

भावतः कुर्वतः सर्वं परस्यापि व्रतं परम् । तन्मनोऽतिदुनोति स्म यद्विडम्ब्य व्रती कृतः ॥४७॥
न्यग्गोत्रं निर्ममे कर्म स तया गुरुगर्हया । दृग्विमोहं च तेनायमभूत् दुर्लभबोधिकः ॥४८॥
नातङ्कः पातकात्तेषां येषां पूज्यतमो गुरुः । अनर्हा तस्य गर्हा तु सत्यङ्कारः स दुर्गतेः ॥४९॥
पालयित्वा व्रतं प्राप्तौ देवभूयमुभावपि । मिथः पूर्वभवप्रेम्णा सङ्केतमिति चक्रतुः ॥५०॥
यः पूर्वमावयोश्च्युत्वा गतः पृथ्वीं नरो भवेत् । धर्मे भगवतः शुद्धे बोधनीयः परेण सः ॥५१॥
पूर्वं च्युतस्ततो जीवः स [1]स्वस्त्याजीविजन्मनः । [2]कौटिकस्य कुटुम्बिन्याः कुक्षिं राजगृहेऽभजत् ॥५२॥
विक्रीणाति स्म सा मांसं [3]वैतंसिकविलासिनी । कस्याऽपि श्रेष्ठिनः पत्नी तदक्रीणात्ततोऽन्वहम् ॥५३॥
क्रयविक्रयतः प्रीतिरथोद्भूता मिथोऽनयोः । तत्प्रीत्या वर्त्तते सुस्थं सौनिकस्त्रीनिकेतनम् ॥५४॥
निन्दुरिन्दुमुखी साश्रुबिन्दुनेत्राऽन्यदा रहः । [4]वाणिनी वणिजस्योचे सा मांसिकमहेलया ॥५५॥
सखि ! स्वामिनि ! कस्तेऽद्य मन्युर्मानसमानशे । साऽप्युवाच वदाम्येषा निन्दुः किं दुःखमात्मनः ॥५६॥
भूयः साऽऽह समो गर्भः साम्प्रतं तावदावयोः । सूतिकाले परावर्त्तः कर्त्तव्यः सखि ! मा शुचः ॥५७॥
काले च व्यत्ययाद् [१]गुप्तान्मृतजीवदपत्ययोः । धाम्नि वणिजवाणिन्या ववृधे मेतिकासुतः ॥५८॥
यदा मेती समेतीह श्रेष्ठिनी तत्पदोः सुतम् । पातयित्वा तदाऽवादीत् त्वदीयो जीवतादयम् ॥५९॥
**मेतार्य** इति तन्नाम्ना समाम्नातकलालयः । षोडशाब्दः सुरेणैत्य रहः सम्बोधितोऽन्यदा ॥६०॥
नाऽबोधि बोधितोऽप्येष तत्पिताऽथ तमात्मजम् । इष्टमष्टमहेभ्यानां पुत्रिकाः पर्यणाययत् ॥६१॥
स्वं सद्म शिबिकारूढो नवोदूढः प्रियासखः । गच्छन् तेन स मेतेन समेतेन पथीक्षितः ॥६२॥
मृतजातां सुतां स्मृत्वा स चाऽवोचत्प्रियां शुचा । व्यधास्यमहमप्येवं सुताऽजीविष्यदद्य चेत् ॥६३॥
तस्य प्राग्जन्ममित्रस्य सुरस्यावेशतस्तदा । सख्याद् यथाकृतं साऽऽख्यन्**मेतार्य**दयिताऽखिलम् ॥६४॥
त्रिविष्टपसदाऽऽविष्टः कौटिकः कोपतोऽथ सः । उत्तार्य शिबिकातस्तमाऽऽह त्रस्तजनेक्षितः ॥६५॥
विसदृश्यः कुलेनैताः परिणीताः कुतः [२]सुत ! । कन्या विहाय वत्स ! त्वं गेहमेहि निजं पुनः ॥६६॥
पश्यतां सर्वलोकानां तदेत्युक्त्वोन्मदिष्णुना । तेन मेतेन **मेतार्यः** स नीतः स्वं निकेतनम् ॥६७॥
प्रत्यक्षीभूय भूयोऽपि रहः सोऽभाषि नाकिना । मर्त्यजन्म त्वमद्यापि सफलीकुरु दीक्षया ॥६८॥
सोऽप्याह विषयासक्तः साध्वहं बोधितस्त्वया । **दुःखं विना विरज्यन्ते न प्रायः कर्मणावृताः** ॥६९॥
यत्तु प्रकाशितं लोके मम व्रीडाकरं त्वया । तस्य प्रच्छादनोपायः प्रायो नाऽन्यस्य गोचरः ॥७०॥
कलङ्के मार्जितेऽमुष्मिन् भुक्त्वा विषयजं सुखम् । कर्त्ताऽस्मि द्वादशाब्दान्ते यद्वक्ताऽसीति निश्चयः ॥७१॥
रत्नौघोत्सर्गिणं छागं दत्त्वा शिक्षां च सोऽखिलाम् । सर्वत्र सन्निधानं च प्रतिपद्य सुरोऽगमत् ॥७२॥

---

१. गुप्तं – B, D, K । २. सुतः A, B, K, D, L ।

टि. 1. पुरोहितपुत्रस्य । 2. कौटिकः – सौनिकः, वैतंसिकः एकार्थिकाः । 3. वैतंसिकः – यो मांसविक्रयणेन जीवति स वैतंसिकः, तस्याः विलासिनी पत्नी । 4. वाणिनी – कुशलस्त्री ।

यान्युत्ससर्ज स छागो दिव्यरत्नानि नित्यशः । कान्तिस्मितानि भान्ति स्म तानि वासरदीपवत् ॥७३॥
**मेतार्य**वचसा स्थालं रत्नैरापूर्य मांसिकः । नृपं दृष्ट्वा ययाचेऽसौ कन्यां स्वसुतहेतवे ॥७४॥
निराकृतो द्वितीयेऽपि तथैवाऽभ्येति स प्रगे । राजा रत्नानि चाऽऽदत्ते न च दत्ते निजात्मजाम् ॥७५॥
**अभयेना**भयं दत्त्वाऽन्यदा पृष्टः स कौटिकः । रत्नसम्पत्तिरियती कुतो वैतंसिकस्य ते ॥७६॥
रत्नोत्सर्गोऽस्ति मे छागस्तेनेत्युक्ते नृपात्मजः । आनीय सौधे दुर्गन्धोत्सर्गिणं पुनरार्प्पयत् ॥७७॥
ऊचेऽ**भयकुमारेण श्रेणिकः** क्षोणिकामुकः । देव ! देवानुभावोऽयं[१] कोऽन्यस्त्वां याचते सुताम् ॥७८॥
**अभयस्या**ऽथ **मन्त्रेण** परीक्षार्थं धराधवः । मानुषाणामसाध्येऽर्थे मेतमादिष्टवानिति ॥७९॥
इतः श्री**वीर**वन्दारोर्जवादारोहतो मम । **वैभार**क्ष्माभृतो मार्गो दुर्गस्तं सुगमं कुरु ॥८०॥
वितेने तेन मेतेन तत्तथैव क्षणार्द्धतः । तद्वर्त्म दृश्यतेऽद्यापि पुरे **राजगृहे** जनैः ॥८१॥
भूयोऽपि भूपनिर्देशात् प्राकारोऽपि हिरण्मयः । उत्तुङ्गशृङ्गशृङ्गारस्तत्क्षणात्तेन कारितः ॥८२॥
अभ्युपेयाय भूपोऽथ पाथोधिर्यदि ते सुतम् । स्नपयत्यात्मनाऽभ्येत्य तस्मै यच्छामि तत्सुताम् ॥८३॥
पाथोनाथमथाऽऽनीय स्नातो जातोऽतिपावनः । धन्यंमन्यां स **मेतार्यो** राज्ञः कन्यामुपायत ॥८४॥
स मानीह समानीय पूर्वोढाः श्रेष्ठिनां सुताः । रमयंस्ताश्च तां चासौ द्वादशाब्दानि नीतवान् ॥८५॥
अवरोधोपरोधेन भूयो दत्तानि नाकिना । सोऽन्यानि द्वादशाब्दानि निन्ये विषयजैः सुखैः ॥८६॥
आपृच्छ्याऽथ निजान् सर्वान् हित्वा चोपनतां श्रियम् । सवैराग्यैः समं दारै**र्मेतार्यो** व्रतमग्रहीत् ॥८७॥
क्रमेण जिनकल्पस्थस्तत्रैव च पुरे चरन् । जगाम हेमकारस्य कस्यचिन्मुनिरालये ॥८८॥
**श्रेणिक**स्याऽऽज्ञया सद्यस्त्रिसन्ध्यं जिनमर्च्चितुम् । कुरुते स्वर्णकृन्नित्यं हैमान् सोऽष्टशतं यवान्[२] ॥८९॥
कार्यादगादगारान्तः स्वयं मुक्त्वा बहिर्यवान् । क्रौञ्चेनान्तरगीर्यन्त ते मुनेस्तस्य पश्यतः ॥९०॥
प्रत्यायातो बहिर्भूयस्तत्राऽपश्यन्नसौ यवान् । क्व यवा इति **मेतार्य**मनार्यः पृष्टवान् मुनिम् ॥९१॥
स मुनिर्मौनमातेने क्रौञ्चस्य कृपया कृती । अमन्यत ग्रहीतारं तत्तमेवैष पातकी ॥९२॥
बद्ध्वा मूर्धन्यथो वर्ध्रं भूयः पप्रच्छ भर्त्सयन् । मुनिना कृपयाऽनुक्ते गाढं चुक्रोध सोऽधमः ॥९३॥
स दुश्चेष्टस्तथा वेष्टमथाऽदत्ताऽस्य मूर्द्धनि । यथा निश्चलचित्तस्य लोचने निरगच्छताम् ॥९४॥
त्रैलोक्यमपि मे तार्यं न **मेतार्यो**ऽयमेककः । सत्याश्रुबिन्दुवन्नेत्रे **मेतार्य**स्येति पेततुः ॥९५॥
आसदद्विशदां ज्ञानसम्पदं पञ्चमीं मुनिः । तत्क्षणात्क्षीणकर्मा च गतिमप्याप पञ्चमीम् ॥९६॥
स क्रौञ्चः कुञ्चितग्रीवो विचिन्वन्नङ्गणे कणान् । हतो दासाहृतक्षिप्तदारूत्थितशलाकया ॥९७॥
क्रौञ्चवान्तान् यवान् वीक्ष्य चुक्रोशेति जनोऽपि तम् । धिक् सौनिको[1] निषादस्त्वं[2] सौवर्णिकमिषादसि ॥९८॥
क्रमेण **श्रेणिक**क्ष्मापः पापमाकर्ण्य तादृशम् । आदिशद्वध्यमेवैनमेनसामेकमन्दिरम् ॥९९॥

---

१. मेदमा – C, B, D, K, H मदमा – KH मेवमा – A, L । २. जवान् – A, KH ।

टि. 1. सौनिकः – मांसविक्रेता, वैतंसिकः । 2. निषादः – चण्डालः ।

सपुत्रदारः स्वागारद्वारमाबद्ध्य बुद्धिमान् । स पथ्यं साधुनेपथ्यमधारयदधार्मिकः ॥१००॥

अथापवारितद्वारो वधकान् धर्मलाभयन् । न्यवेदि मेदिनीशाय तैर्न्यायाऽत्ययभीरुभिः ॥१०१॥

भिक्षुभक्तः समादिक्षदथ क्षितिपतिः स तम् । वेषोऽप्याजन्म धार्योऽयमन्यथाऽनार्य ! मार्यसे ॥१०२॥

इत्थं क्रौञ्चे कलादे च स्वात्मनीव समः शमी । समेयाय स **मेतार्यो** समां सामायिकश्रियम् ॥१०३॥

**इति मेतार्योपाख्यानम् ॥**

**हरिकेशबलो**पाख्यानं तु [1]प्रथमपरिवेष एव निर्व्यूढमेव ॥

अथ ब्रह्मचर्यगुप्तिद्वारमधिकृत्याह–

**इत्थिपसुसंकिलिट्ठं, वसहिं इत्थीकहं वि वज्जितो ।**
**इत्थिजणसंनिसज्जं, निरूवणं[2] अंगुवंगाणं ॥३३४॥**

स्त्रीशब्देन देवी-नार्योर्ग्रहणम्, पशुरिति तिरश्च्यः, **स्त्रीपशुभिः सङ्क्लिष्टा** तां **वसतिम्** । **स्त्रीकथां** नेपथ्यादिकाम् स्त्रियो वा केवलाया धर्मकथन**मपि वर्जयन्, यतेत** इत्युत्तरोत्तरगाथायां क्रियया सर्वसम्बन्धः । **स्त्रीजनसन्निषद्यां** तदुत्थानानन्तरं तदासनोपवेशनरूपां तथा **निरूपणम् अङ्गोपाङ्गानां** वक्षः-स्तन-वदन-नयनोरुनाभीप्रभृतीनां वर्जयन्निति वर्त्तते ॥३३४॥

**पुव्वरयाणुस्सरणं, इत्थीजणविरहरुयविलवं च ।**
**अइबहुयं अइबहुसो, विवज्जयंतो य आहारं ॥३३५॥**

**पूर्वरतानुस्मरणम्** इति गृहस्थावस्थासम्भोगानुचिन्तनम् । **स्त्रीजनविरहरुतविलापं च, च**शब्दात् कुड्यान्तरितमोहनासक्तानां मणित-क्वणितं च । **अतिबहुकं** [3]प्रणीतरसोत्कटतया '**अद्धमसणस्स**'त्यादि मात्रातोऽतिरिक्ततया वा **अतिबहुशो** निष्कारणमेकभक्तात् कारणतो द्व्यादिवारतोऽप्यनियतं **विवर्जयन्नाहारम्** इयता गुप्तिद्वयमुक्तमिति ॥३३५॥

**वज्जंतो अ विभूसं, जइज्ज इह बंभचेरगुत्तीसु ।**
**साहू तिगुत्तिगुत्तो, निहुओ दंतो पसंतो य ॥३३६॥**

**वर्जयंश्च विभूषां** वपुःसंस्काररूपां राढां वर्जयन्निति त्रिःपृथग् वचनं विस्मरणशीलशिष्यस्मृति-प्रतिबोधार्थम् । **यतेत** यत्नं कुर्यात् **इह** प्रवचने, **ब्रह्मचर्यगुप्तिषु** मैथुनविरतिरक्षणविषये **साधुस्त्रिगुप्तिगुप्तो** निरुद्धमनोवाक्कायः । **निभृतो** निर्व्यापारतया शान्तः । **दान्तो** जितेन्द्रियः । **प्रशान्तो** निगृहीतकषाय**श्चे**ति ॥३३६॥ तथा–

**गुज्झोरुवयण[4]कक्खोरुअंतरे तह थणंतरे [5]दट्ठुं ।**
**साहरइ तओ दिट्ठिं, न य बंधइ दिट्ठिए दिट्ठिं ॥३३७॥**

**गुह्यम**वाच्यम्, **ऊरू** जानूपरिमाववयवौ **वदनं** वक्त्रं **कक्षे** बाहुमूले, **उरो** वक्षः, एषां कृतद्वन्द्वानां

---

१. प्रथमोद्योत – D, K, B । २. तिरश्चाः KH, K, D । ३. स्मरणप्रणीतरसोत्कंठतया – L स्मरप्रणीतरसोत्कटतया – A, C । ४. कक्खोर – A, D । ५. दिट्ठे – B, दट्ठुं – A, दिट्ठिं – K, D ।

**अन्तराणि** अवकाशास्तानि । **तथा स्तनान्तराणि** कुचान्तरालभागान् **दृष्ट्वा** अवलोक्य **संहरति** भास्करादिव निवर्त्तयति, **ततो** गुह्यादिभ्यो, **दृष्टिं** महानर्थहेतुत्वात्, तथा **न च बध्नाति दृष्ट्या दृष्टिं** स्त्रीसम्बन्धिन्या दृष्ट्या स्वदृष्टिं न मीलयतीत्यर्थः । यदुक्तम्

**स्त्रीति नामापि संह्लादि विकरोत्येव मानसम् ।**
**किं पुनर्दर्शनं तस्या विलासोल्लसितभ्रुवः ॥१॥** [ ] इति ।

स्यादेतत् - अस्य प्रकरणस्य सिद्धान्तोद्धाररूपत्वात्तस्य च परमपुरुषप्रणीतवाक्यमयतया, स्वतः प्रामाण्यात् तद् बलेनैव शेषवचसां प्रतिष्ठाऽवाप्तेः प्रद्योतनवत् स्वपरप्रद्योतकत्वात्, न युक्तस्तत्समर्थनार्थं सूक्तान्तरोपन्यास इति - एवमेवैतत्, केवलं मार्गानुसारिणां सर्वेषामपि समानैव मतिरितिदर्शनार्थत्वाददोषः । अनेनैव चाऽभिप्रायेण **आचारविवरणादौ** भगवद्भिः श्री**शीलसूरि**प्रभृतिभिरपि सूक्तानि शतशः सुष्ठूक्तानीति ।

क्रमप्राप्तमथ स्वाध्यायद्वारं विवृणोति—

**सज्झाएण पसत्थं, झाणं जाणइ य सव्वपरमत्थं ।**
**सज्झाए वट्टंतो, खणे खणे जाइ वेरग्गं ॥३३८॥**

**स्वाध्यायेन** वाचनादिना क्रियमाणेन, **प्रशस्तं** धर्म-शुक्लमयं **ध्यानं** भवति । **जानाति** च तद्बलेन **सर्वपरमार्थं** विश्वस्याऽपि रहस्यम् । **स्वाध्याये वर्त्तमानः क्षणे क्षणे याति वैराग्यं** रागोरगस्तम्भन-मन्त्ररूपत्वात्तस्येति ॥३३८॥

सर्वपरमार्थज्ञानमेव व्याचष्टे—

**उड्ढमहतिरियनरया, जोइसवेमाणिया य सिद्धी य ।**
**सव्वो लोगालोगो, सज्झायविउस्स पच्चक्खो ॥३३९॥**

**ऊर्ध्व**मिति सर्वेषामहमिन्द्रतयैव तत्रोपपातात् तात्स्थ्यात्तद्व्यपदेशेन ऊर्ध्वशब्दाभिधेया ग्रैवेयकाऽनुत्तर-निवासिनो देवविशेषाः । **अध** इति च सर्वेऽपि नारकाः **तिर्यञ्चः** एकेन्द्रियादयः पञ्चेन्द्रियान्ताः । **नरजा** यथास्वं नरेभ्य एव जाता नरजा मनुष्याः कर्माकर्मजादयः । न पुनर्यथाहुर्लौकिका "**एकस्यैव कस्यचिन्मुखबाहूरुपद्भ्यो जाता मनुष्या**" [ ] इति । तथा **ज्योतिष्काश्च**न्द्रार्क्कादयः । **वैमानिकाः** सौधर्मनिवास्यादयः । **च**शब्दसूचिता भुवनपतयो व्यन्तराश्च सामान्यतो विशेषतश्च चतस्रो गतीरभिधाय पञ्चमीं गतिमाह—**सिद्धिश्च** मुक्तिः । **च**शब्दात्तत्तत्कारणानि मिथ्यात्वादिरत्नत्रयाद्याऽऽसेवनरूपा हेयोपादेया हेतवश्च, किं बहुना ? **सर्वो लोकालोकः स्वाध्यायविदः प्रत्यक्षः** तदुपयुक्तो हि मुनिः सर्वानप्यर्थान् साक्षादिव पश्यतीति ॥३३९॥

व्यतिरेकमाह—

**जो निच्चकालतवसंजमोज्जओ न वि करेइ सज्झायं ।**
**अलसं सुहसीलजणं, न वि तं ठावेइ साहुपए ॥३४०॥**

**यो नित्यकालं तपःसंयमोद्यतोऽपि** अपिशब्दस्य व्यस्तसम्बन्धतया **न करोति स्वाध्यायम्** । अत एव **अलसं** स्वाध्याये निरुत्साहम् । तत एव **सुखशीलजनं** सातलम्पटलोकतया प्रतीतम्, **नाऽपि** नैव **तं स्थापयति** रोपयति **साधुपदे** संयतत्वप्रतिष्ठायां श्रमणसङ्घ इति कर्तृपदस्य गम्यत्वादिति भावः ॥३४०॥

स्वाध्याय इति गतम् । अथ विनयद्वारमधिकृत्याह—

**विणओ सासणे मूलं, विणीओ संजओ भवे ।**
**विणयाओ विप्पमुक्कस्स कओ धम्मो कओ तवो ? ॥३४१॥**

शिष्यन्ते जीवाः अनेनेति **शासनं** द्वादशाङ्गं तस्मिन्, **विनयो मूलम्**, यदाहुः–"मूलाउ खंधप्पभवो दुमस्स" [ द.वै./९-२-१ ] इत्यादि । अतो **विनीतः संयतो भवेत्** । **विनयाद्विप्रमुक्तस्य कुतो धर्मः ? कुतस्तपो ?** निर्मूलत्वादिति ॥३४१॥ तथा—

**विणओ आवहइ सिरिं, लहइ विणीओ जसं च कित्तिं च ।**
**न कयाइ दुव्विणीओ, सकज्जसिद्धिं समाणेइ ॥३४२॥**

विनीयते अनेनाऽष्टविधं कर्मेति **विनय आवहति** प्रापयति, **श्रियं** लक्ष्मीं **लभते विनीतः** पुरुषो **यशश्च** मानभटनिराकरणविक्रमोत्थं श्लाघनं **कीर्त्तिं च** पुण्यभाजनमयमित्येवंरूपां स्तुतिं च । विपक्षे बाधामाह-**न कदाचित् दुर्विनीतः स्वकार्यसिद्धिम्** आत्मार्थनिष्पत्तिं **समानयति** संप्राप्नोति विनयं विना तदुपायाभावादिति ॥३४२॥

विनयानन्तरमथ तपोद्वारमधिकृतम् । तच्च '**मनोवाक्कायनियमनं तप**' इति न्यायात् सर्वमिदं समित्यादि तप एव तथाऽपि प्रायोऽनशनादिकमेव तद् बहुजनख्यातं तथाविधं च देहद्रोहरूपं दुर्विदग्धजनोपहास्यं मा भूदित्याह—

**जह जह खमइ सरीरं, धुवजोगा जह जहा न हायंति ।**
**कम्मक्खओ य विउलो, विवित्तया इंदियदमो य ॥३४३॥**

**यथा यथा क्षमते शरीरं ध्रुवयोगा** नित्यकृत्यव्यापाराः प्रत्युपेक्षणादयो **यथा यथा न हीयन्ते** हानिमधिगच्छन्ति तथा तपः कार्यमिति अधिकृतमेवात्राऽध्याहार्यम् । तथा च नेदं तपो दुःखरूपं मन्तव्यम्, नारकाणां महादुःखित्वान्महातपोधनत्वावाप्तेः, समसुखदुःखानां च योगिनां विपर्ययसिद्धेः । किं तर्हि ? क्षायोपशमिकत्वाद्देहमनोबाधाविरहतो विधानाच्च क्वचिदीषद्देहबाधासम्भवेऽपि बाह्याधिचिकित्सा-तुल्यत्वात्तस्य मनःप्रमोदहेतुत्वाद् रत्नचट्टवदित्यलं विस्तरेण[1] । एतत् तपश्चैवं कुर्वतां **कर्मक्षयश्च विपुलो** भवति । तथा **विविक्तता** देहाद्यन्यत्वभावना **इन्द्रियदमश्च** अक्षनिग्रह इति ॥३४३॥

अथ तपोद्वारानन्तरं क्रमप्राप्तं शक्तिद्वारं व्यतिरेकद्वारेण व्याचष्टे—

**जइ ता असक्कणिज्जं, न तरसि काऊण तो इमं कीस ।**
**अप्पायत्तं न कुणसि संजमजयणं जईजोग्गं ॥३४४॥**

**यदि तावदशकनीयम**शक्यं प्रतिमाऽऽतापनादिकं **न तरसि कर्तुं** संहननादिवैकल्यान्न शक्नोषि विधातुं **तत इमां किमिति** केन हेतुना **आत्मायत्तां** स्वाधीनां **न करोषि संयमयतनाम**नन्तरोक्तां समित्यादिपदेषु यथाशक्ति विधेयप्रतिषेध्यविधानप्रतिषेधरूपामित्यर्थः, **यतियोग्याम**द्यश्चीनसाधुभिरपि सति विवेके कर्तुं शक्यतयोचितामिति भावः ॥३४४॥

---

१. रत्नचटितवद् - KH रत्नवट्टवद् H रत्नवट्टवद् - C ।

ननु यथागममुत्सर्ग एव केवलं सेवनीयस्तर्हि अपवादस्य क्वाऽवकाश इत्याह—

**जायम्मि देहसंदेहयम्मि, जयणाए किंचि सेविज्जा ।**
**अह पुण सज्जो य निरुज्जमो य तो संजमो कत्तो ॥३४५॥**

**जाते देहसन्देहे** प्राणान्तकारिणि व्यसने, **यतनया** पञ्चकपरिहाण्यादिकया **किञ्चिद**नेषणीयादिकमल्पसावद्यं **सेवेत । अथ पुनरिति** पक्षान्तरद्योतकः, **सज्जः** शक्तो नीरोगो वा तथाऽपि **निरुद्यमश्च** सति सामर्थ्ये शिथिलः साधुरिति गम्यते । **ततस्तस्य संयमः कुतो** ? नैव भगवदाज्ञापराङ्मुखत्वादिति ॥

अथ य उत्सर्गैकरुचिरेवमाह-उत्सर्ग एव आगमाभिप्रायस्तथा चोक्तम्—

"**कारणपडिसेवा वि हु सावज्जा निच्छए अकरणिज्जा ।**
**बहुसो वियारइत्ता अ साहणिज्जेसु कज्जेसु** ॥१॥ [ नि.भा./४५९ ]
**जइ वि हु समणुण्णाया तहवि य दोसे ण वज्जणे दिट्ठो ।**
**दढधम्मया हु एवं ण य भिक्खुणिसेवणिद्दयया**" ॥२॥ [ नि.भा./४६० ] इत्यादि ॥३४५॥

ततश्च रोगातङ्कादौ कारणेऽपि नाऽपवादः सेव्य इति, तं प्रत्याह—

**मा कुणउ जइ तिगिच्छं[२], अहियासेऊण जइ तरइ सम्मं ।**
**अहियासिंतस्स पुणो, जइ से जोगा न हायंति ॥३४६॥**

**मा कार्षीद्यतिश्चिकित्सां** रोगप्रतिक्रियां कर्मक्षयसाहाय्यहेतुत्वाद्रोगाणाम् । तदतिसहनस्य परीषहजयरूपत्वात् । यदि किमित्याह **अध्यासयितुम्** अधिसोढुं तत्पीडां क्षन्तुं, **यदि तरति** शक्नोति **सम्यग्** वैक्लव्यं विना धृतिबलात् । **अतिसहमानस्य पुनर्यदि से** तस्य साधोः संहननाभावाद् **योगाः** प्रत्युपेक्षणादयो व्यापारा **न हीयन्ते** न हानिं गच्छन्ति । तद्धानौ तु चिकित्साऽपि क्रियतामेवेति भावः ॥३४६॥

एवं च साधूनां च श्रावकाणां च कीदृशान् साधून् प्रति किं विधेयमिति विषयविभागमाह—

**निच्चं पवयणसोहाकराण, चरणुज्जयाण साहूणं ।**
**संविग्गविहारीणं, सव्वपयत्तेण कायव्वं ॥३४७॥**

**नित्यं प्रवचनशोभाकराणां** शासनमण्डनानां **चरणोद्यतानाम्** अप्रमादिनां **साधूनां संविग्नविहारिणां** मोक्षाभिलाषुकतया विहरणशीलानां **सर्वप्रयत्नेन** परमादरेण **कर्त्तव्यं** वैयावृत्त्यादिकमिति शेषः ॥३४७॥ तथा—

**हीणस्स वि सुद्धपरूवगस्स नाणाहियस्स कायव्वं ।**
**जणचित्तग्गहणत्थं करेंति लिंगावसेसे वि ॥३४८॥**

**हीनस्यापि** चारित्रापेक्षया न्यूनस्याऽपि, **शुद्धप्ररूपकस्य** यथावदागमार्थं व्याचक्षाणस्य **ज्ञानाधिकस्य कर्त्तव्यं** वैयावृत्त्यमिति पूर्ववत् । तथा-**जनचित्तग्रहणार्थं** लोकरञ्जनानिमित्तं- मा भूत् 'परस्परमप्येते मत्सरिण' इति प्रवादात्प्रवचनमालिन्यमिति । तदवज्ञादर्शनाच्छेषलोकोऽपि तदवज्ञया मा भूत् पातकभाजनमिति वा कारणेन **कुर्वन्ति** सुसाधवः सुश्रावकाश्च **लिङ्गावशेषेऽपि** पार्श्वस्थादिविषयमपि यदुचितमिति पूर्ववत् । इत्थं चैतदङ्गीकर्त्तव्यमेव । यतः—

---

१. केवलः - K, B । २. चिगित्सं - C, B चिकित्सं - A तिगित्सं - L ।

"काले कलौ खले लोके जीवे धान्यस्य कीटके । एतदेव महच्चित्रं यज्जना जैनलिङ्गिनः ॥१॥
रत्नाकर इव क्षारवारिभिः परि[१]पूरणात् । गम्भीरिमाणमाधत्ते शासनं लिङ्गधारिभिः ॥२॥
लिङ्गोपजीविनां लोके कुर्वते येऽवधीरणाम् । दर्शनोच्छेदपापेन लिप्यन्ते ते दुराशयाः ॥३॥
धार्मिका अपि नार्चन्ति जैनलिङ्गधरांश्च ये । किं तैः श्रुतमधीतं वा गुरुभ्यस्तर्हि गर्हितैः ॥४॥
दोषाः प्ररूपिता ये तु पार्श्वस्थादिनिरूपणे । ते हि ज्ञापयितुं तेषां न तु वक्तुमगारिणाम् ॥५॥
प्रतिमाधारिणोऽप्येषां त्यजन्ति विषयं पुरः । लिङ्गिनां विषयस्थानामनर्च्चा तु विरोधिनी ॥६॥
यान् लिङ्गिनोऽनुवन्दन्ते संविग्ना अपि साधवः । तदर्च्चा चर्च्यते कस्माद्धार्मिकैर्भवभीरुभिः ॥७॥
वाचेत्यादि विधिर्योऽत्र नमस्काराय लिङ्गिनाम् । आम्नातो यतिनां सैष श्राद्धानां बुध्यतेऽधिकः"॥८॥ इति ।

तथाहि—

वायाए नमोक्कारो हत्थोस्सेहो य सीसनमणं च ।
[२]संपुच्छणअच्छणं थोभवंदणं वंदणं वावि" ॥९॥ [ बृ.क./४५४५ ] इति ॥३४८॥

कीदृशं तर्हि तेषां लिङ्गावशेषाणां लिङ्गं भवतीत्याह—

**दगपाणं पुप्फफलं, अणेसणिज्जं गिहत्थकिच्चाइं ।**
**अजया पडिसेवंती, जइवेसविडंबगा नवरं ॥३४९॥**

**दकपानं** सचित्तोदकपानम् , द्वन्द्वैकवद्भावात् **पुष्पफलं** सचित्तमेव, **अनेषणीयम्** आधाकर्मादि । **गृहस्थकृत्यानि** गृहकरणादीनि । **अयता** अनियन्त्रिताश्रवद्वाराः सन्तः **प्रतिसेवन्ते** । **यतिवेषविडम्बका नवरं** धर्मध्वजादिसाधुनेपथ्यविगोपकाः केवलं ये ते यतिगुणरहितत्वात् लिङ्गावशेषाः स्युरिति भावः ॥३४९॥

तेषां दोषगुणानाह—

**ओसन्नया अबोही य पवयणउब्भावणा य बोहिफलं ।**
**ओसन्नो वि वरं पिहु, पवयणउब्भावणापरमो ॥३५०॥**

**अवसन्नता** अवमग्नता इहलोक एव परिभूतता, परलोके च **अबोधि**र्जिनधर्माऽसंपत्तिर्भगवदाज्ञा-विराधकत्वात् । यतः **प्रवचनोद्भावनैव च**स्याऽवधारणार्थत्वात्, **बोधिफलं** कारणे कार्योपचारात्, सैव बोधिरूपं कार्यमित्यर्थः । प्रवचनोद्भावना तु संविग्नैरेव क्रियते । दुष्करतदनुष्ठानदर्शनेन [३]प्रवचनश्लाघोत्पत्तेः । तदिदं सर्वावसन्नानाश्रित्योक्तं देशत**श्चावसन्नोपि वरं** प्रधानः, स हि आत्मनः कर्मपरतन्त्रतां बुध्यमानः, परेषां च तां प्रकटयन् स्वयं वादलब्धिव्याख्यानादिभिः **पृथौ** विस्तीर्णायां **प्रवचनोद्भावनायां** सुसाधुगुणप्रकाशनेन जिनशासनोन्नतौ **परमः** प्रधान इति समासः ॥३५०॥ व्यतिरेकमाह—

**गुणहीणो गुणरयणायरेसु, जइ कुणइ तुल्लमप्पाणं ।**
**सुतवस्सिणो य हीलइ, सम्मत्तं पेलवं तस्स ॥३५१॥**

**गुणहीन**श्चरणादिशून्यो **गुणरत्नाकरै**रिति तृतीयार्थे सप्तमी सुसाधुभि**र्यदि करोति तुल्यमात्मानं** 'वयमपि सुसाधव' इति लोकमध्ये ख्यापयति । **सुतपस्विनश्च हीलयति** 'मायाविनः खल्वेते लोकप्रतारका' इत्यादिना

---

१. पूरितः – A चारणात् – C । २. संपुच्छणयाच्छणं – A । ३. प्रवचनश्लाघोपपत्तेः KH ।

**सम्यक्त्वं** गुणवत्प्रमोदसाध्यं **पेलवं** निस्सारं [१]तत्कल्पनया सदप्यसत्कल्पं **तस्ये**ति परमार्थतो मिथ्यादृष्टिरिति ॥३५१॥ साधूनामपि प्रवचनभक्त्या अवसन्नान् प्रति यद्विधेयं तदाह—

**ओसन्नस्स गिहिस्स व, जिणपवयणतिव्वभावियमइस्स ।**
**कीरइ जं अणवज्जं, दढसम्मत्तस्सऽवत्थासु ॥३५२॥**

**अवसन्नस्य** सामान्यशब्दतया पार्श्वस्थादे**र्गृहिणो वा** श्रावकस्य **जिनप्रवचनतीव्रभावितमते**रर्हदागमानुरक्तचित्तस्य **क्रियते यदनवद्यं** यदुचितं **दृढसम्यक्त्वस्य** न प्रियधर्ममात्रस्य **अवस्थासु** द्रव्यक्षेत्रकालभावापदादिषु कारणेष्विति ॥३५२॥

तथा चाऽऽह—

**पासत्थोसन्नकुसील, णीयसंसत्तजणमहाछंदं ।**
**नाऊण तं सुविहिया, सव्वपयत्तेण वज्जंति ॥३५३॥**

ज्ञानादीनां पार्श्वे तिष्ठतीति **पार्श्वस्थः** । आवश्यकादिषु अवसदना**दवसन्नः** । कुत्सितशीलः **कुशीलः** । नित्यमेकत्रवासा**न्नित्यः** । परगुणदोषेषु सङ्गात् **संसक्तः**, तेषां द्वन्द्वे **जनस्तम्** । यथा स्वच्छन्दम् आगमनिरपेक्षतया वर्त्तते स **यथाच्छन्दस्तं** तस्य पृथक्करणं बहुदोषताख्यापनार्थं **ज्ञात्वा तं** जनं **सुविहिताः** साधवः **सर्वप्रयत्नेन वर्जयन्ति** तत्सङ्गस्यानर्थहेतुत्वादिति ॥३५३॥

कानि पुनः स्थानानि सेवमानः पार्श्वस्थादितां यातीति तान्येव चाष्टाविंशत्या गाथाभिराह—

**बायालमेसणाओ, न रक्खइ धाइसिज्जपिंडं च ।**
**आहारेइ अभिक्खं, विगईओ सन्निहिं खाइ ॥३५४॥**

**द्विचत्वारिंशतम् एषणाः** पूर्वोक्ता **न रक्षति धात्रीशय्यापिण्डं च** तत्र बालक्रीडनादिलभ्यो धात्रीपिण्डस्तस्य एषणात्वेऽपि पृथगुपादानं गृहस्थसम्बन्धस्य महानर्थहेतुत्वदर्शनार्थम् । शय्यातरपिण्डः शय्यापिण्डस्तं च न रक्षति इति । **आहारयति** वा**ऽभीक्ष्णम**नवरतं **विकृतीः** क्षीराद्याः **सन्निधिं** पर्युषितगुडादिरूपं **खादति** इति ॥३५४॥

**सूरप्पमाणभोई, आहारेई अभिक्खमाहारं ।**
**न य मंडलीए भुंजइ, न य भिक्खं हिंडई अलसो ॥३५५॥**

**सूरप्रमाणभोजी** यावदादित्यं भोजनशीलः, **आहारयत्यभीक्ष्णं** वारंवार**माहारम्, न च मण्डल्यां** साधुभिः सह **भुङ्क्ते, न च भिक्षां हिण्डते अलसः** आलस्योपहतत्वादिति ॥३५५॥

**कीवो न कुणइ लोयं, लज्जइ पडिमाए जल्लमवणेई ।**
**सोवाहणो य हिंडइ, बंधइ कडिपट्टयमकज्जे ॥३५६॥**

**क्लीबो** निःसत्त्वो **न करोति लोचं । लज्जते प्रतिमया** कार्योत्सर्गेण । **जल्लं** मलम् **अपनयति** ।

---

१. परिकल्पनया - A ।

**सोपानत्कः** सपादत्राणश्च **हिण्डते । बध्नाति कट्यां पट्टकं** चोलपट्टकम् । **अकार्ये** कारणं विना इतिः सर्वत्र योज्य इति ॥३५६॥

**गामं देसं च कुलं, ममायए पीढफलगपडिबद्धो ।**
**घरसरणेसु पसज्जइ, विहरइ य सकिंचनो रिक्को ॥३५७॥**

**ग्रामं देशं च** उपलक्षणान्नगरादि च । **कुलम्** उग्रादि **ममायते** ममाऽयमिति मन्यते । **पीठफलक-प्रतिबद्धः** ऋतुबद्धेऽपि तत्सेवकः । **गृहशरणेषु** भवन-तदेकदेशादिषु **प्रसज्यते** सङ्घटते । **विहरति च सकिञ्चनो** हिरण्यादियुक्तस्तथापि **रिक्तो** निर्ग्रन्थत्वशून्यत्वादिति ॥३५७॥

**नहदंतकेसरोमे जमेइ, उच्छोलधोवणो अजओ ।**
**वाहेइ य पलियंकं, अइरेगपमाणमत्थुरइ ॥३५८॥**

**नख-दन्त-केश-रोमाणि यमयति** राढ्या समारचयति, उच्छोलया—भूरिजलेन, धावनं—गात्रप्रक्षालनं यस्य स **उच्छोलधावनः** । अत एव **अयतो** गृहस्थकल्पत्वात् । **वाहयति च पल्यङ्कम् अतिरेकप्रमाणं** संस्तरोत्तरपट्टकातिरिक्तम् **आस्तृणाति** संस्तारयतीति ॥३५८॥

**सोवइ य सव्वराइं, नीसट्ठमचेयणो न वा झरइ ।**
**न पमज्जंतो पविसइ, निसीहियावस्सियं न करेइ ॥३५९॥**

**स्वपिति च सर्वरात्रिं नीसट्ठं** निष्प्रसरमचेतनो निश्चेष्टः । **न वा झरइ** ति न च स्वाध्यायं करोति । **न प्रमृजन्** रजोहरणेन **प्रविशति** वसतौ तमसीति गम्यम् । **नैषेधिकीं** प्रविशन् **आवश्यकीं** निर्गच्छन्न करोतीति ॥३५९॥

**पायपहे न पमज्जइ, जुगमायाए न सोहए इरियं ।**
**पुढविदगअगणिमारुय-वणस्सइतसेसु निरविक्खो ॥३६०॥**

**पादौ पथि** रजोदिग्धौ विजातीयपृथ्वीसङ्क्रमकाले **न प्रमार्जयति । युगमात्रया** चतुर्हस्तप्रमाणेन **न शोधयति**, ईर्यतेऽस्यामिति **ईर्या** वर्त्तनी तां गच्छन् **पृथिव्युदकाग्निमारुतवनस्पतित्रसेषु** विषयेऽ**निरपेक्ष-**स्तदुपमर्दं कुर्वन्निःशङ्क इति ॥३६०॥

**सव्वं थोवं उवहिं, न पेहए न य करेइ सज्झायं ।**
**सद्दकरो झंझकरो, लहुओ गणभेयतत्तिल्लो ॥३६१॥**

अपेरध्याहारात् **सर्वं स्तोकमप्युपधिं** मुखवस्त्राद्यं **न प्रेक्षते**[1], **न च करोति स्वाध्यायं** प्राक् रात्र्यपेक्षया सम्प्रति तु दिवापेक्षयेति न स्वाध्यायस्य पौनरुक्त्यम् । **शब्दकरो** रात्रौ दिवापि वा बृहच्छब्दकरणशीलः । **झञ्झा** अकालकलहस्तत्**करो** राटीप्रियः । लघुरेव **लघुक**स्तुच्छप्रकृतिः । **गणभेदतप्तिमान्** यया गणो भिद्यते तां तर्प्ति[2] कषायवार्त्तां करोतीति ॥३६१॥

---

टि. १. प्रेक्ष्यते - K, B, A । २. तप्तां - K, B, D ।

**खित्ताईयं भुंजइ, कालाईयं तहेव अविदिन्नं ।**
**गिण्हइ अणुग्गइ य सूरे, असणाई अहव उवगरणं ॥३६२॥**

**क्षेत्रातीतं** द्विगव्यूतातिक्रान्तम् अशनादि **भुङ्क्ते । कालातीतं** पौरुषीत्रयाऽतिवाहनेन । **तथैव अविदत्तं गृह्णात्यनुदिते सूरे अशनादि अथवोपकरणं** वस्त्रादि, भगवद्भिरननुज्ञातत्वादिति ॥३६२॥

**ठवणकुले न ठवेई, पासत्थेहिं च संगयं कुणइ ।**
**निच्चमवज्झाणरओ, न य पेहपमज्जणासीलो ॥३६३॥**

**स्थापनाकुलानि** गुरोर्विशिष्टप्रयोजनसाधकानि गृहाणि **न स्थापयति** निष्प्रयोजनं तेषु प्रविशति । **पार्श्वस्थैः** सह **सङ्गतः** सङ्गं मैत्रीं वा **कुरुते । नित्यमपध्यानरतः** सदा दुष्टाध्यवसायासक्तः । **न च प्रेक्षाप्रमार्जनाशीलः** प्रमत्तत्वादिति ॥३६३॥

**रीयए दवदवाए, मूढो परिभवइ तह य रायणिए ।**
**परपरिवायं गिण्हइ, निट्ठुरभासी विगहसीलो ॥३६४॥**

**रीयते** गच्छति **दवदवाए** त्ति द्रुतं द्रुतं **मूढः परिभवति तथा च रत्नाधिकान्** ज्ञानादिभि[1]रभ्यधिकान्, **परपरिवादम्** अन्याश्लाघां **गृह्णाति** करोति । **निष्ठुरभाषी** कर्कशवाक्यः । **विकथाशीलः** स्त्र्यादिकथातत्पर इति ॥३६४॥

**विज्जं मंतं जोगं, तेगिच्छं कुणइ भूइकम्मं च ।**
**अक्खरनिमित्तजीवी, आरंभपरिग्गहे रमइ ॥३६५॥**

**विद्यां** स्त्रीरूपदेवताधिष्ठितां **मन्त्रं** पुरुषदैवतं **योगं** विशिष्टद्रव्यात्मकं **चिकित्सां** रोगप्रतिक्रियां **करोत्यसंयतानामिति** गम्यम् । **भूतिकर्म च** अभिमन्त्रितभूत्यादिना रक्षादिकम्, एषणायामाहारार्थमिदमुक्तम्, इह तूपरोधादिनेति न पौनरुक्त्यम् । अक्षरनिमित्ताभ्यां लेखशाला-दैवज्ञत्वाभ्यां जीवनशीलोऽ**क्षरनिमित्तजीवी** तन्मात्रवृत्तिः । अत एव **आरम्भः** पृथिव्याद्युपमर्दः **परिग्रहो**ऽतिरिक्तस्वीकारस्तत्र **रमते** सजतीति ॥३६५॥

**कज्जेण विणा उग्गह-मणुजाणावेइ दिवसओ सुयइ ।**
**अज्जिअलाभं भुंजइ, इत्थिनिसिज्जासु अभिरमइ ॥३६६॥**

**कार्येण विना** निष्प्रयोजनं देवेन्द्र-राज-गृहपति-सागारिक-साधर्मिकाणा**मवग्रहम् अनुज्ञापयति । दिवसतो** दिने **स्वपिति । आर्यिकालाभं भुङ्क्ते । स्त्रीनिषद्यासु** तत्कालमेव तदुत्थानानन्तरम् **अभिरमते** इति ॥३६६॥

**उच्चारे पासवणे, खेले सिंघाणए अणाउत्तो ।**
**संथारगउवहीणं, पडिक्कमइ वा सपाउरणो ॥३६७॥**

**उच्चारादि**चतुष्टयविषये **अनायुक्तो**ऽयतनया तदुत्सर्गकर्त्ता, **संस्तारकउपधीनाम्** उपरिस्थितः **प्रतिक्रामतीति** साऽध्याहारं **सप्रावरणो वा** वाशब्दस्य सम्बन्धव्यवधानात् साऽऽच्छादनो वा प्रतिक्रमणं करोतीति ॥३६७॥

---

१. रत्यधिकान् - B, रप्यधिकान् - A, L रवधिकान् - D, रधिकान् - KH ।

**न करेइ पहे जयणं, तलियाणं तह करेइ परिभोगं ।**
**चरइ अणुबद्धवासे, सपक्खपरपक्खओमाणे ॥३६८॥**

**न करोति पथि यतनाम्** एषणीयान्नपानान्वेषणादिकाम् , अनुपानत्कः शक्तोऽपि गन्तुं **तलिकयो**रेकैक-तलोपादानयोरुपानहो**स्तथा** निष्कारणं **करोति परिभोगम्** । **चरत्यनुबद्धवर्षे** प्रावृट्काले **स्वपक्षपरपक्षापमाने** साधुभिर्भौताद्यैश्च भूत्वा सम्भाव्यमानापमाने शङ्कितलाघवहेतौ क्षेत्रे विहरतीति ॥३६८॥

**संजोयइ अइबहुयं, इंगाल सधूमगं अणट्ठाए ।**
**भुंजइ रूवबलट्ठा, न धरेइ य पायपुंच्छणयं ॥३६९॥**

**संयोजयति** रसलौल्यात् **अतिबहुकं** क्षीरशर्करादिकं मीलयति । **इङ्गाल** त्ति सशब्दलोपात् **साङ्गारं** रागसहितं **सधूमकं** सद्वेषम्, **अनर्थाय** वेदनादिकारणषट्करहितमित्यर्थः, **भुङ्क्ते रूपबलार्थं** । **न धारयति पादप्रोञ्छनकं** रजोहरणमिति ॥३६९॥

**अट्ठमछट्ठचउत्थं, संवत्सरचाउम्मासपक्खेसु ।**
**न करेइ सायबहुलो, न य विहरइ मासकप्पेणं ॥३७०॥**

**अष्टमं** च **षष्ठं** च **चतुर्थं** च यथाक्रमं **संवत्सरे** च **चातुर्मासके** च **पक्षे** च **न करोति** । पक्षेष्विति द्वन्द्वे बहुवचननिर्देशस्तत्तज्जातीयसर्वपर्वसङ्ग्रहार्थः । **सातबहुलः** सुखशीलतया **न च विहरति मासकल्पेन** हेमन्तादिष्वपीति ॥३७०॥

**नीयं गिण्हइ पिंडं, एगागी अच्छए गिहत्थकहो ।**
**पावसुयाणि अहिज्जइ, अहिगारो लोगगहणम्मि ॥३७१॥**

**नित्यमे**कगृहाद् **गृह्णाति पिण्डम्** । **एकाकी** केवल एव **आस्ते** । **गृहस्थानां** सत्का **कथा** यस्य स **गृहस्थकथः** । **पापश्रुतानि** दिव्यादीन्यधिकरणरूपाण्य**धीते** । **अधिकार**स्तस्मि**र्लोकग्रहणे** जनचित्तरञ्जने न स्वकृत्ये इति ॥३७१॥

**परिभवइ उग्गकारी, सुद्धं मग्गं निगूहई बालो ।**
**विहरइ सायागरुओ, संजमविगलेसु खित्तेसु ॥३७२॥**

**परिभवति** न्यक्करोति **उग्रकारिणः** सुसाधून् अथवा परिभ्राम्यति 'अहम् उग्रकारी' इति जने प्रकाशयन् । **शुद्धं मार्गं** निष्कलङ्करत्नत्रयं **निगूहति** निह्नुते **बालो**ऽज्ञः । **विहरति सातगुरुकः** सुखलिप्सुः **संयमविकलेषु** साधुभिरवासितेषु संसक्तादिदुष्टेषु **क्षेत्रे**ष्विति ॥३७२॥

**उग्गाइ गाइ हसई य, असंवुडो सइ करेइ कंदप्पं ।**
**गिहिकज्जचिंतगो वि य, ओसन्ने देइ गिण्हइ वा ॥३७३॥**

**उद्गायति** महाध्वनिना **गायति** । कण्ठकाकल्या **हसति च** । **असंवृतो** विवृतास्यः **सदा करोति कन्दर्पं** तदुद्दीपकैर्वाक्यादिभिः परान् हासयति । **गृहिकार्यचिन्तको** गृहस्थार्थशीलको**ऽपि च अवसन्ने**, चतुर्थ्यर्थे सप्तमी, तेन अवसन्नाय **ददाति** वस्त्राद्यं **गृह्णाति वा** तत इति ॥३७३॥

**धम्मकहाओ अहिज्जइ, घराघरिं भमइ परिकहंतो अ ।**
**गणणाए पमाणेण य, अइरित्तं वहइ उवगरणं ॥३७४॥**

**धर्मकथा अधीते** जीविकार्थम् अत एव **गृहाद् गृहं भ्रमति परिकथयंश्च** ता इति । **गणनया–** ''जिणा बारसरूवाइं थेरा चउदसरूविणो । अज्जाणं पन्नवीसं तु अओ उड्ढमुवग्गहो'' [ ओ.नि./६७२ ] एवंरूपया । **प्रमाणेन**–''कप्पा आयप्पमाणा, अड्ढाइज्जा उ आयओ हत्था'' [ ओ.नि./७०६ पूर्वा. ] इत्यादि-प्रतिपादितेन **च अतिरिक्तम्** उक्तात् समर्गलं **वहति उपकरणमिति** ॥३७४॥

**बारस बारस तिन्नि य, काइयउच्चारकालभूमीओ ।**
**अंतो बहिं च अहियासि, अणहियासे न पडिलेहे ॥३७५॥**

**द्वादश द्वादश तिस्रश्च** क्रमेण **कायिकाउच्चारकालभूमीः** सप्तविंशतिं स्थण्डिलानि **न प्रत्युपेक्षते** इति सम्बन्धः । तत्राऽऽलयपरिभोगस्य**ान्तर्म**ध्ये षड् **बहिश्च** षट् कायिकायास्तत्राऽपि प्रत्येकं त्रीणि **अध्यासकस्य** सहिष्णोः त्रीण्य**नध्यासकस्या**ऽसहिष्णोः । एवमेव उच्चारस्याऽपि तत्प्रमाणं च तिर्यग् जघन्यतो हस्तमात्रम् अधश्चत्वार्यङ्गुलानि अचेतनमिति ॥३७५॥

**गीयत्थं संविग्गं, आयरियं मुयइ वलइ गच्छस्स ।**
**गुरुणो य अणापुच्छा, जं किंचि वि देइ गिण्हइ वा ॥३७६॥**

**गीतार्थम**पि अधिगतागमं **संविग्नं** मोक्षाभिलाषुकम् **आचार्यं** स्वगुरुं **मुञ्चति,** निष्कारणं त्यक्त्वा गच्छति । कारणे तु आदेशं याचित्वा मुञ्चतोऽपि न दोषः । **वलते गच्छस्य** क्वचिन्नोदनां कुर्वतस्तत्प्रत्युत्तरदानायाभिमुखो भवति । **गुरूंश्च अनापृच्छ्य किञ्चिद्** वस्त्रादिकं कस्मैचिद् **ददाति गृह्णाति** वा कुतश्चिदिति ॥३७६॥

**गुरुपरिभोगं भुंजइ, सिज्जासंथारउवगरणजायं ।**
**किं ति य तुमं ति भासइ, अविणीओ गव्विओ लुद्धो ॥३७७॥**

**गुरुणा** परिभुज्यमानं **परिभोगं भुङ्क्ते शय्या-संस्तार-उपकरणजातं** तत्र **शय्या** शयनभूमिः, **संस्तारकः** फलकादिः **उपकरणजातं** वस्त्रपात्रादि । गुरोः सम्बन्धि सर्वमिदं वन्द्यमेव न भोग्यम् । तथाऽऽहूतः **किमिति च भाषते,** तत्र हि 'मस्तकेन वन्दे' इत्यभिधातव्यम् । आलपंश्च **त्वमिति** गुरुं प्रति **भाषते,** 'प्रभवो यूयम्' इत्यादि तत्र वाच्यम्, बहुवचनार्हत्वात् । अत एव विपरीतकरणा**दविनीतो गर्वितः** सोत्सेको **लुब्धो** विषयादौ गृद्ध इति ॥३७७॥

**गुरुपच्चक्खाणगिलाण-सेहबालाउलस्स गच्छस्स ।**
**न करेइ नेव पुच्छइ, निद्धम्मो लिंगमुवजीवी ॥३७८॥**

**गुरुराचार्यः, प्रत्याख्यानी** क्षपकोऽनशनी वा, **ग्लानः** सरोगः **शैक्षः** प्राथमकल्पिको **बालः** शिशुस्तेषां द्वन्द्वे, तैराकुलस्य सङ्कीर्णस्य **गच्छस्य न करोति** यत् कृत्यं स्वयमेव, **नैव पृच्छति** भगवन्तः ! किं मया कर्त्तव्यमिति । यतो **निर्द्धर्मो** निराचारः । **लिङ्गोपजीवी** जीविकामात्रफलवेष इत्यर्थः ॥३७८॥

**पहगमणवसहिआहार[1]-सुयणथंडिल्लविहिपरिट्ठवणं ।**
**नायरइ नेव जाणइ, अज्जावट्टावणं चेव ॥३७९॥**

**पथगमनं वसतिम् आहारं स्वपनं स्थण्डिलं** चेति द्वन्द्वे, तेषामागमोक्तेन **विधिना** क्रमेण सहिता या **परिष्ठापना** तां जानन्नपि **नाचरति** निर्द्धर्मतया अथवा **नैव जानाति आर्यावर्त्तनं चैव** यथा आर्या आर्यिका वर्त्तयितव्याः सम्यक् वाहयितव्यास्तज्जानन्नपि नाचरति न जानात्येव वेति ॥३७९॥

**सच्छंदगमणउट्ठाणसोवणो[2] अप्पणेण चरणेण ।**
**समणगुणमुक्कजोगी, बहुजीवखयंकरो भमइ ॥३८०॥**

**स्वच्छन्दं** गुर्वाज्ञां विना **गमनोत्थानस्वप्नानि** यस्य स तथा **आत्मीयेन** स्वमतिकल्पितेन **चरणेन** आचारेणोपलक्षणे तृतीया, **श्रमणगुणेषु** ज्ञानादिषु **मुक्तयोगी** त्यक्तव्यापारः । अत एव **बहुजीव-क्षयकरो**ऽनेकप्राणिप्रणाशकर्त्ता अनुस्वारोऽलाक्षणिकः एवम्भूतः सन् **भ्रमति** निरर्थकमटाट्यते इति ॥३८०॥

**वत्थि व्व वायपुण्णो, परिभमइ जिणमयं अयाणंतो ।**
**थद्धो निव्विन्नाणो, न य पिच्छइ किंचि अप्पसमं ॥३८१॥**

**वस्तिवच्चर्मप्रसेविकेव[3], वातपूरितो वाग्पूर्णो** वाऽतिगर्वाध्मातत्वात्, **परिभ्रमति जिनमतं** मदगदौषधकल्पं सर्वज्ञवचनम् **अजानानः । स्तब्धो** वपुषाऽपि दर्शितगर्वचिह्नो **निर्विज्ञानो** ज्ञानगर्वयोर्दूरं विरोधात् **न च** नैव **प्रेक्षते किञ्चिदात्मसमं** जगदप्युत्सेकान्न्यूनं मन्यत इति ॥३८१॥

**सच्छंदगमणउट्ठाणसोवणो, भुंजए गिहीणं च ।**
**पासत्थाई ठाणा, हवंति एमाइया एए ॥३८२॥**

**स्वच्छन्दगमनोत्थानस्वप्न** इति प्राग्वत् । सर्वे गुणा गुणवत्पारतन्त्र्यसाध्या इति ज्ञापनार्थं पुनरप्युक्तम्, तद्रहितस्य हि गुणोपायप्रवृत्तिरपि दूरनिरस्तैवेति तत्सम्बन्धस्य मूलोच्छेद एव । **भुङ्क्ते गृहिणां च** मध्ये इति शेषः[4] । कियद्वा मोहपारतन्त्र्यचेष्टितं निर्वक्तव्यमिति निगमयति-**पार्श्वस्थादिस्थानानि भवन्ति एवमादीनि एतानि,** पुल्लिङ्गनिर्देशो लिङ्गस्य प्राकृतेऽतन्त्रत्वादिति ॥३८२॥

अत्राह कश्चित् - हन्तैवं तर्हि न कश्चिदस्ति सुसाधुरुद्यतविहारिणामपि कारणान्तरादेवं प्रवृत्तिदर्शनादिति । [5]विषयविभागानभिज्ञानामेष व्याहारः । स चायमिति गाथाद्वयेनाह—

**जो हुज्ज उ असमत्थो, रोगेण व पेल्लिओ झुरियदेहो ।**
**सव्वमवि जहा भणियं, कयाइ न तरिज्ज काउं जे ॥३८३॥**

**यो भवेत्तु** पुन**रसमर्थः** प्रकृत्यैव असारसंहननत्वात् यथोक्तं कर्तुमसमर्थ एव, **तु**शब्दस्याऽवधारणार्थत्वात् **रोगेण वा** ज्वरादिना पीडितत्वात् **प्रेरितः** राजयक्ष्मादिना जरया वा, **झुरितदेहो** त्ति जीर्णावस्थां लम्भितस्तदवस्थोचितं किञ्चित् कुर्वाणोऽपि अक्षमत्वात्**सर्वमपि यथा भणितं** यथोक्तं **कदाचिन्न तरेन्न** शक्नुयात्**कर्तुं जे** इति **'इ-जे-राः पादपूरणे'** [सिद्धहे० ८।२।२१७] इति ॥३८३॥

---

१. आयार - C । २. सोयणो - C, K, D, L । ३. प्रसेवकेव - KH, K, D । ४. विशेषः - C । ५. न विषयविभा... C ना विषयविभा....K, D, A ।

**सो वि य नियपरक्कम-ववसायधिईबलं अगूहंतो ।**
**मोत्तूण कूडचरियं, जइ जयइ तो अवस्स जई[१] ॥३८४॥**

**सोऽपि** च अनन्तरोक्तोऽन्योऽपि **च** द्रव्याऽऽपद्गतो, निजकं पराक्रमं–शारीरसामर्थ्यं, व्यवसायो–विशिष्टनिश्चयात्मको वाचनिकः परिस्पन्दः, धृतिश्चित्तधैर्यम् , तेषां बलं **निजकपराक्रमव्यवसायधृतिबलं** त्रिविधमपि **तदगूहयन्** प्रकटयन् **मुक्त्वा कूटचरितं** मायासाध्यं चेष्टितं **यदि यतते** यत्नं कुरुते चेत्, **ततोऽवश्यं यतिः** सुसाधुरेव भगवदाज्ञाकर्तुर्गौतमादेरिव तस्यापि यतित्वसिद्धेरिति ॥३८४॥

कूटचरितस्यैव चेष्टामाह–

**अलसो सढोऽवलित्तो, आलंबणतप्परो अइपमाई ।**
**एवं ठिओ वि मन्नइ, अप्पाणं सुट्ठिओ मि त्ति ॥३८५॥**

**अलसः** क्रियासु मन्दः, **शठो** मायिकः, **अवलिप्तः** सगर्वः, **आलम्बनतत्परो** यत्किञ्चिन्निषमाश्रित्याऽकृत्यनिष्ठः, **अतिप्रमादी** निद्रादिषु गाढं प्रसक्तः । **एवंस्थितोऽपि मन्यते आत्मानं** यदुत **सुस्थितोऽस्मीति** निर्गुणस्याऽपि स्वस्य गुणवत्तां ख्यापयतीति मायिकत्वमिति ॥३८५॥

[२]तस्यापायं दृष्टान्तेनाह–

**जो वि य पाडेऊणं, मायामोसेहिं खाइ मुद्धजणं ।**
**तिग्गाममज्झवासी सो सोयइ, कवडखवगु व्व ॥३८६॥**

**योऽपि च पातयित्वा**त्मवशे इति शेषः । अपि च अनेन अखादकोऽपि परञ्जनमात्रप्रवण एवं यस्तु **मायामृषाभि**रलीकवाक्यचेष्टितैः **खादयति** वञ्चयति-**मुग्धजनम्** ऋजुलोकम् , **त्रयाणां ग्रामाणां मध्ये वसनशीलः स शोचते कपटक्षपक इव** यथा स शोचितवांस्तथाऽन्योऽपीति ॥३८६॥ कथा चात्र–

**[ कपटक्षपककथानकम् ॥ ]**

पुण्यपण्यविशालायां **विशालायां** पुरा पुरि । **अघोरशिव** इत्यासीत् ब्राह्मणो घोर[३]जिह्मधीः ॥१॥
इहलोकैकनिर्बद्धबुद्धिः कपटलम्पटः । अकृत्यैकरतिर्देशादसौ निर्वासितोऽधमः ॥२॥
गतोऽथ **चर्मकाराख्ये** विषये विषयेच्छया । स्वयं धूर्त्तपरीवारः परिव्राजकतामधात् ॥३॥
महाग्रामत्रयस्याऽन्तरध्यास्य स तपोवनम् । दम्भो दम्भोलिदुर्भेदः साक्षादिव तपो व्यधात् ॥४॥
मासान्मासादसौ भुङ्क्ते योगासीनो महातपाः । महाज्ञानीति च ख्यातिस्तस्य मायाविनोऽजनि ॥५॥
दयापरमिवात्मानं परानुग्रहहेलया । निमित्तानि ब्रुवन् बुद्ध्या स विश्वास्य इवाजनि ॥६॥
अयं तपोनिधिरिति प्रीतैर्भक्त्या जनव्रजैः । आमन्त्र्य नीतो गेहान्तः संधिस्थानान्यवैक्षत ॥७॥
धूर्त्तानां तानि निश्चित्य रहस्यथ जगाद सः । ततस्तत्प्रत्ययात् खातं पातयन्ति स्म तत्र ते ॥८॥
इत्थं त्रयोऽपि ते ग्रामास्तेन तैश्च मलिम्लुचैः । मुषित्वा रिक्ततां नीताः कामा इव विकर्मणाम् ॥९॥
जागरूकोऽन्यदा कश्चिन्निशायां कुलपुत्रकः । अन्तःखातमुखं पाशं निजावासे न्यवेशयत् ॥१०॥

---

१. निजकः पराक्रमः C । २. तस्योपायं - B । ३. जन्म - C ।

प्रविष्टमात्रस्तत्रान्तःपाशव्यासङ्गयन्त्रितः । एकस्त्रस्तेषु शेषेषु नीत्वा नृपतयेऽर्पितः ॥११॥

नृपोऽप्यादिशति स्मैवं दण्डपाशिकमादरात् । सत्यं वदति यद्येष मुच्यतां तर्हि नान्यथा ॥१२॥

पूर्वं पृष्टो न सद्भावमाविर्भावयति स्म सः । कशाभिस्ताड्यमानस्तु यथातथमथाऽवदत् ॥१३॥

तपोवनाच्च तैर्बद्ध्वाऽऽनीतः कपटतापसः । भुक्तशेषमसौ लोप्त्रमुपनिन्येऽखिलं स्वयम् ॥१४॥

स [1]श्रोत्रियसुतत्वेन न वध्य इति भूभुजा । आकृष्य नयने मुक्तो भिक्षामप्याप नो जनात् ॥१५॥

पश्चादनुशयानान्तःकरणः शरणोज्झितः । कपटेभ्यो विरक्तात्मा चिन्तयामासिवानिति ॥१६॥

मलिनं मलिनेभ्योऽपि धिग् मां दुष्कर्मकारिणम् । न परं जन्म येनेदं परलोकोऽपि हारितः ॥१७॥

निन्द्यास्तेऽप्यशुभं कुर्युरशुभैर्ये स्वचेष्टितैः । धर्म्यैः कुर्वन्ति ये पापं निन्द्येभ्यो निन्दितास्तु ते ॥१८॥

धर्म्यकर्माणि ये कुर्युरधर्मार्थाय मायिनः । [1]मुख्यं [2]व्याप्रियते तेषां जघन्येष्वपि कर्मसु ॥१९॥

शोचतोऽपि यथा नाऽस्य परित्राणं किमप्यभूत् । जन्मन्येवं विनष्टेऽत्र कः शरण्यस्तपस्विनाम् ॥२०॥

**इति कपटक्षपककथानकम् ॥**

एते चैवंविधास्तारतम्येन कर्मवशादनेकधा भवन्तीत्याह–

**एगागी पासत्थो, सच्छंदो ठाणवासि ओसन्नो ।**
**दुगमाई संजोगा, जह बहुया तह गुरू हुंति ॥३८७॥**

**एकाकी** केवलो धर्मबन्धुरहितः, **पार्श्वस्थो** ज्ञानादिभ्यो बहिः प्लवमानः । **स्वच्छन्दो** गुर्वाज्ञाविकलः । **स्थानवासी** नित्यवासी । **अवसन्न** आवश्यकादिषु शीतलः । तदेतेषां पञ्चानां पदानां क्वचिदेकं क्वचिद् द्वे, त्रीणि, चत्वारि, सर्वाणि वा स्युरित्याह–**द्विकादयः संयोगा** इति, मकारोऽलाक्षणिकः । तेषां पदानां **यथेति** वीप्साप्राधान्याद्यथा यथा **बहूनि** पदानि **तथा** तथा **गुरवः** संयोगा **भवन्ति** पदवृद्ध्या दोषवृद्धेरिति ॥३८७॥

व्यतिरेकमाह–

**गच्छगओ अणुओगी, गुरुसेवी अणियओ [3]गुणाउत्तो ।**
**संजोएण पयाणं, संजमआराहगा भणिया ॥३८८॥**

एकाकित्वोज्झितो **गच्छगतः** पार्श्वस्थप्रतिद्वन्द्वी । **अनुयोगी** आवश्यकाद्यनुकूलयोगवान् । स्वाच्छन्द्यवर्ज्जी **गुरुसेवी** स्थानवासीतरो**ऽनियतः** । अवसन्नप्रतिपक्षो **गुणायुक्तो, गुणेषु** आवश्यकादिषु **आयुक्तो**ऽप्रमादी । **संयोगेनामीषां पदानां** द्व्यादिमीलनेन **संयमा[4]राधका भणितास्**तीर्थकर-गणधरैस्तद्वन्त इति गम्यते । अत्राऽपि पदानां वृद्ध्यानुसारेण गुणवृद्धिर्भावनीयैवेति ॥३८८॥

ननु स्थानवासित्वे दोषार्थमुद्धुष्यमाणे **सङ्गमस्थविराचार्य-अन्निकापुत्र-आर्यसमुद्रादीनाम्** अनाराधकत्वं प्रसज्यते इति नैतद्वचनीयम्, तथा चाह–

**निम्मम निरहंकारा, उवउत्ता नाणदंसणचरित्ते ।**
**एगक्खित्ते वि ठिया, खवंति पोराणं कम्मं ॥३८९॥**

---

१. मुखं – B, K, A मुखां – L । २. वाप्रियते – D । ३. वासियत्तो – C । ४. साधका – A ।

टि. 1. ब्राह्मणसुतत्वेन ।

ममेत्यव्ययं ममकारार्थं **निर्ममाः** 'मम' इति मतिरहिताः, **निरहङ्कारा** अहङ्काररहिताः । **उपयुक्ता** दत्तावधाना **ज्ञानदर्शनचारित्रे । एकक्षेत्रेऽपि** ग्रामादौ अपिशब्दात्पुष्टावलम्बने क्षीणजङ्घाबलत्वादौ सति **[स्थिताः] क्षपयन्ति पुरातनं** पूर्वभवोपार्जितं **कर्मेति** ॥३८९॥ तथा–

**जियकोहमाणमाया, जियलोभपरीसहा य जे धीरा ।**
**वूढावासे वि ठिया, खवंति चिरसंचियं कम्मं ॥३९०॥**

**जितक्रोधमानमाया जितलोभपरीषहाश्च ये धीराः** सत्त्ववन्तस्ते, **वृद्धावासेऽपि** प्राग्निरूपितशब्दार्थे **स्थिताः क्षपयन्ति चिरसञ्चितं कर्मे**ति ॥३९०॥ तथा–

**पंचसमिया तिगुत्ता, उज्जुत्ता संजमे तवे चरणे ।**
**वाससयं पि वसंता, मुणिणो आराहगा भणिया ॥३९१॥**

पञ्चभिः समितिभिः समिताः **पञ्चसमिताः** । तिसृभिर्गुप्तिभिर्गुप्ताः **त्रिगुप्ताः । उद्युक्ताः संयमे तपसि चरणे वर्षशतमपि वसन्तः** एकक्षेत्रे, **मुनय आराधका भणिता**स्तीर्थकरैरिति ॥३९१॥ अस्यार्थस्याद्यगाथयैव गतार्थत्वेऽपि भूयो गाथाद्वयाभिधानं भगवदाज्ञया तिष्ठतां कश्चित् दोषगन्धोऽपि नास्तीति ज्ञापनार्थम् । तथा चोक्तम्–

**"एगखित्तविहारी, कालाइक्कंतचारिणो जइ वि ।**
**तह वि य विसुद्धचरणा, विसुद्धआलंबणा जेणं ॥१॥**
**आणाए अमुक्कधुरा, गुणवुड्ढी जेण निज्जरा तेण ।**
**मुक्कधुरस्स न मुणिणो, सोही संविज्जइ चरित्ते ॥२॥**
**गुणपरिवुड्ढिनिमित्तं, कालातीएण होंति दोसा उ ।**
**जत्थ उ बहुया हाणी हविज्ज तहियं न विहरिज्जा"** ॥३॥ [ ] इत्यादि ।

एतमेव न्यायं शेषकर्त्तव्यद्वारेण निगमयति–

**तम्हा सव्वाणुण्णा, सव्वनिसेहो य पवयणे नत्थि ।**
**आयं वयं तुलिज्जा, लाहाकंखि व्व वाणियओ ॥३९२॥**

यत एवं **तस्मात्** सर्वैः प्रकारैरनुज्ञा **सर्वानुज्ञा** यदुत 'इदमवश्यमेव कर्त्तव्यमि'ति । तथा **सर्वनिषेधश्च** यदुत 'इदमवश्यं न कर्त्तव्यमेवे'ति । **प्रवचने** जिनशासने **नास्ति** द्रव्यक्षेत्रकालभाववैचित्र्यापेक्षया विधिनिषेधोभयवैचित्र्यस्याऽभिधानात् । तथाहि–क्वचिद्विहितस्यापि निषेधः । क्वचिन्निषिद्धस्याऽपि विधिः । यतः-

**"भेदाद्देशाद्यवस्थानामकार्यं कार्यतां व्रजेत् । कार्यं क्वचिदकार्यत्वं तत्राकार्यं परित्यजेत्"** ॥ [ ]

ततः **आयं** ज्ञानादिलाभं **व्ययं** तद्धानिं **तुलयेत्** आकलयेत् । **लाभाकाङ्क्षीव वाणिजको** वणिक् यथा आयव्ययतुलनया बहुलाभे प्रवर्त्तेत इति केवलं रागद्वेषपरिहारेण प्रवर्त्तमानेन दुष्टमालम्बनं शाठ्यान्न कार्यं निश्छद्मवृत्या[1] आत्मैवाऽत्रार्थे प्रत्यायनीयः ॥३९२॥

यत आह–

**धम्मम्मि नत्थि माया, न य कवडं नाणुवत्तिभणियं वा ।**
**फुडपागडं अकुडिल्लं, धम्मवयणमुज्जुयं[2] जाण ॥३९३॥**

१. द्मशा – C । २. मुज्जयं – K, B, A ।

**धर्मे** सद्भावसाध्ये, **नास्ति माया** अत्यन्तविरोधान्न **च** नैव **कपटं** परवञ्चनचेष्टितं **नानुवृत्तिभणितं वा** पराऽऽवर्जनार्थं सदोषं वाक्यं **स्फुटं** व्यक्तवर्णं **प्रकटम**लज्जनीयम् **अकुटिलं** निर्मायं **धर्मवचनमृजुकं** मोक्षं प्रति प्रगुणं **जानीहि** बुद्ध्यस्वेति ॥३९३॥

**न वि धम्मस्स भडक्का, उक्कोडा वंचणा य कवडं वा ।**
**निच्छम्मो किर धम्मो, सदेवमणुयासुरे लोए ॥३९४॥**

**नापि** सम्भाव्यते **धर्मस्य भडक्का** बृहदासनाद्याडम्बररूपाः [१]साधनमिति शेषः । **उत्कोचा** [1]लञ्चा यद्ययं मह्यमिदं दत्ते तदाऽहमस्येदं करोमीत्यादिरूपा, **वञ्चना** वा 'शैवे [२]देशप्रत्यया' इत्यादिवत् तत्त्वदर्शनविप्रतारणा । **कपटं वा** गुप्तं स्निग्धमाहृत्याऽहमुपोषित एवंरूपम् । एकार्थिकानि सर्वाण्येतानि पूर्वगाथयैव गतार्थत्वेऽपि मायया सह धर्मस्याऽऽत्यन्तिको विरोध इति दर्शनार्थम् ।

'**सुद्धस्स होइ चरणं, मायासहिएण चरणभेउ**'' [ ] त्ति वचनात् तदेवाह-**निच्छम्मो** निर्मायः **किल धर्मः सदेवमनुजासुरे लोके** त्रैलोक्य इति ॥३९४॥ आनुषङ्गिकमुक्त्वा आयव्ययतुलनार्थम् अधिकारिणः पुरुषानाह—

**भिक्खू गीयमगीए, अभिसेए तह य चेव रायणिए ।**
**एवं तु पुरिसवत्थुं, दव्वाइं चउव्विहं सेसं ॥३९५॥**

भिक्षुर्द्विधा **गीतार्थो** विहितागमरहस्यस्तदन्योऽ**गीतार्थः**, मकारोऽलाक्षणिकः । **अभिषेक्यो**ऽभिषेकार्ह उपाध्यायः **तथा चैव** 'आचार्यः' पाठान्तरं वा **रात्निको** रत्नाधिक आचार्य एव । '**चेव** त्ति **चशब्दादनुक्त**-स्थविरादिपरिग्रहः । **एवं तु**शब्दस्तद्गुणतारतम्यविशेषणार्थः । पुरुषा एव ज्ञानादिगुणवसनयोगाद्वस्तु **पुरुषवस्तु,** आयव्ययतुलनाया विषयो भवतीति गम्यते । **द्रव्यादि चतुर्विधम्** आदिशब्देन क्षेत्रकाल-भावग्रहणात् । **शेषं** पुरुषवस्तुनोऽन्यत्तद्विषयो भवतीति वर्त्तते । द्रव्यात्[३] पुरुषवस्तुनः पृथगभिधानं प्राधान्यख्यापनार्थम् । एतत्सर्वं तुलयित्वा यथा बहुलाभं तथा विधेयमन्यथाऽतिचार इति तात्पर्यार्थः ॥३९५॥ स चातिचारः सामान्येन ज्ञानादिविषयत्वात् त्रिविधोऽपि विशेषतोऽनेकविध इत्याह—

**चरणाइयारो दुविहो, मूलगुणे चेव उत्तरगुणे य ।**
**मूलगुणे छट्ठाणा, पढमो पुण नवविहो तत्थ ॥३९६॥**

**चारित्रातिचार**श्चारित्रातिक्रमाद् **द्विविधः** । **मूलगुणे चैव उत्तरगुणे च** मूलोत्तरगुणविषयः त्रिविधोऽपि विशेषतो अनेकविध इत्यर्थः । तत्र **मूलगुणेषु षट्स्थानानि** । प्राणातिपातविरत्यादीनि रात्रिभोजनविरतिषष्ठानि तानि अतिचारगोचरतया भवन्ति । **प्रथमो मूलगुणः पुनर्नवविधः** । पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुः-पञ्चेन्द्रियविषयतया **तत्र** तेषां स्थानानां मध्ये इति ॥३९६॥

**सेसुक्कोसो मज्झिम, जहन्नओ वा भवे चउद्धा उ ।**
**उत्तरगुणणेगविहो, दंसणनाणेसु अट्ठट्ठ ॥३९७॥**

---

१. भावनमिति - B । २. देशप्रत्यया... B । ३. निवारयंति - B ।

टि. 1. लायते प्रच्छन्नं गृह्यते इति लञ्चा 'लांच' इति भाषायाम् ।

**शेषो** मृषावादविरत्यादि**रुत्कृष्टो मध्यमो जघन्यस्त्रिधा वा** द्रव्यादिभेदा**च्चतुर्द्धा वा तु**शब्दः स्वगताऽनेकभेदद्योतकः । **उत्तरगुण**गोचरोऽतिचारो**ऽनेकविधः** पिण्डविशुद्ध्याद्यनेकविषयत्वादिति । **दर्शन-ज्ञानयोरष्टाष्टपदानि** । तत्र दर्शने निशङ्कित-निकाङ्क्षितादीनि ज्ञाने काल-विनयादीनि । चारित्रस्य प्रागभिधानं मोक्षं प्रत्यन्तरङ्गताख्यापनार्थमिति ॥३९७॥

अतिचारश्चायमज्ञानप्रभवो वितथाचरणस्याज्ञानप्रभवत्वात्, अज्ञानं चानर्थायैवेत्याह—

**जं जयइ अगीयत्थो, जं च अगीयत्थनिस्सिओ जयइ ।**
**वट्टावेई य गच्छं, अणंतसंसारिओ होइ ॥३९८॥**

**यत्** किमपि **यततेऽगीतार्थः, यच्चागीतार्थनिश्रितो यतते** अगीतार्थस्यैव गुरोर्निश्रामाश्रित्य यत्नं करोति । **वर्त्तयति च गच्छं** पालयति गणं **च**शब्दादजानन्नप्यभिमानेन ग्रन्थान्[2] व्याचष्टे । स तेन स्वयं यतनादिचेष्टितेन अनन्तः संसारो यस्य स **एवानन्तसंसारिको भवती**ति ॥३९८॥ अत्राह परः—

**कह य जयंतो साहू, वट्टावेई य जो उ गच्छं तु ।**
**संजमजुत्तो होउं, अणंतसंसारिओ भणिओ ? ॥३९९॥**

**कथं तु** कथमेवं **यतमानः साधुः वर्त्तयति च यस्तु गच्छम्** । **तु**शब्दात् यश्च ग्रन्थान् व्याचष्टे । स सर्वोऽपि **संयमयुक्तो भूत्वा अनन्तसंसारिको भणित** इति ॥३९९॥

आचार्य आह—

**दव्वं खित्तं कालं भावं पुरिसपडिसेवणाओ य ।**
**न वि जाणइ अग्गीओ, उस्सग्गववाइयं चेव ॥४००॥**

**द्रव्यं क्षेत्रं कालं भावं पुरुषप्रतिसेवनाश्च नैव जानाति अगीतार्थः** । उत्सर्गाऽपवादादिकं चाऽनुष्ठानमिति शेषः । उत्सर्गापवादाभ्यां निर्वृत्तम् - **औत्सर्गिकमापवादिकं च** । **एव**शब्दात्तत्तद्गुणदोषांश्च अगीतार्थो न जानाति । ज्ञानाभावाच्च वितथाचरणम् , ततश्च कर्मबन्धस्ततोऽपि चाऽनन्तसंसार इति द्वारगाथार्थः ॥४००॥

अथैतामेव द्वारगाथां व्याचष्टे—

**जहट्ठियदव्व न याणइ, सच्चित्ताचित्तमीसगं चेव ।**
**कप्पाकप्पं च तहा, जोग्गं वा जस्स जं होइ ॥४०१॥**

**यथास्थितं द्रव्यं न जानाति** । अनुस्वारलोपः प्राकृतलक्षणात् सर्वत्र द्रष्टव्य एवं **सचित्तमचित्तं मिश्रं** तदुभयात्मकं तेषां द्वन्द्वे तत्तथा **चैव, कल्प्याऽकल्प्यं च तथा** साधूनामुचितानुचितम् । **योग्यं वा यस्य** ग्लानादे**र्यद्भवति** द्रव्यं तत्सर्वमगीतार्थो न जानातीति ॥४०१॥

**जहट्ठियखित्त न याणइ, अद्धाणे जणवए य जं भणियं ।**
**कालं पि य न वि जाणइ, सुभिक्खदुब्भिक्ख जं कप्पं ॥४०२॥**

---

१. विषयादीनि - D । २. ग्रन्थांतर्व्याचष्टे - K, D ।

**यथास्थितं क्षेत्रं न जानाति, अध्वनि जनपदे च यद्भणितं** सिद्धान्ते कृत्यतया तच्च न जानाति । द्वारम् । **कालमपि च न जानाति सुभिक्षे दुर्भिक्षे च यत्कल्प्यं** योग्यं साधूनां तन्न जानातीति ॥४०२॥

**भावे हट्ठगिलाणं न वि जाणइ गाढऽगाढकप्पं च ।**
**सहुअसहुपुरिसं तु, वत्थुमवत्थुं च न वि जाणइ ॥४०३॥**

**भावे** चिन्त्ये-**हृष्टं** निरामयं **ग्लानम्** आमयाविनं **नापि जानाति । गाढं** महत्प्रयोजनम**गाढं** सामान्यं, तयोः **कल्प्यं** योग्यं च न जानातीति । **सहं** सहिष्णुं दृढसंहननम् **असहम्** असहिष्णुं सुकुमाराङ्गम् । **पुरुषं तु** शब्दात्परिकर्मितमपरिकर्मितं च । **वस्तु** आचार्यादिकं तदितर**दवस्तु** च । **न** विशेषेण विषयविभागेन **जानातीति** ॥४०३॥

**पडिसेवणा चउद्धा, आउट्टिपमायदप्पकप्पे य ।**
**न वि जाणइ अग्गीओ, पच्छित्तं चेव जं तत्थ ॥४०४॥**

**प्रतिषेवना** निषिद्धाचरणरूपा **चतुर्द्धा आकुट्यां** च **प्रमादे च दर्प्पे** च **कल्पे** च द्वन्द्वैकत्वात्तस्मिन् । तेषां च लक्षणम्—

**''आउट्टिआ उवेच्चा दप्पो पुण होइ वग्गणाईओ ।**
**कंदप्पाइपमाओ कप्पो उण कारणे करणं''** ॥ [ य.स./११० ] इतिरूपम् ।

चशब्दः स्वगताऽनेकभेदसंसूचकः । एतद्विषयां प्रतिसेवनां **नापि जानाति अगीतो**ऽगीतार्थः । **प्रायश्चित्त**मालोचनादिकं **चैव** चशब्दात्तत्सेवकभावोपक्रमणं च **यत्तत्र** तन्न जानाति, बहुशो न जानातीति वाक्यं महामोहान्धकारव्याप्तौ स्वबुद्धिकल्पनायाः सव्यभिचारत्वेन न किञ्चिदागमेन विना ज्ञायते इति ज्ञापनार्थम् । यदुक्तं— **''मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् । सुकृतः परिशुद्ध आगमः कुरुते दीप इवाऽर्थदर्शनम्''** ॥ [ किराता०/सर्ग-२ ] इति ॥४०४॥ अत्राऽर्थे गाथाद्वयेन दृष्टान्तमाह—

**जह नाम कोइ पुरिसो, नयणविहूणो अदेसकुसलो य ।**
**कंताराडविभीमे, मग्गपणट्ठस्स सत्थस्स ॥४०५॥**

**यथा नाम कश्चित्पुरुषो नयनविहीनो**ऽन्धः, **अदेशकुशलश्च** अमार्गज्ञो **भीमकान्ताराऽटव्यां** भीषणविषमारण्ये, प्राकृतत्वाद्भीमशब्दस्य परनिपातः । **मार्गप्रणष्टस्य** मार्गाद्भ्रामूढस्य **सार्थस्य** ॥४०५॥

किमित्याह—

**इच्छइ य देसयत्तं, किं सो उ समत्थो देसयत्तस्स ? ।**
**दुग्गाइ अयाणंतो, नयणविहूणो कहं देसे ? ॥४०६॥**

**इच्छति च देशकत्वं** मार्गदर्शित्वम् । **किं स तु समर्थो देशकत्वस्य ?** करणाय नैवेत्यर्थः । तथाहि-**दुर्गादि** विषमादि **अजानन् नयनविहीनः कथं दर्शयेद्** अत्यन्ताऽसम्भव एवेति भावः ॥४०६॥

दार्ष्टान्तिकमपि गाथाद्वयेनाऽऽह—

**एवमगीयत्थो वि हु, जिणवयणपईवचक्खुपरिहीणो ।**
**दव्वाइ अयाणंतो, उस्सग्गववाइयं चेव ॥४०७॥**

**एवमुक्तेन** प्रकारेण, **अगीतार्थोऽपि** हुर्निश्चये, **जिनप्रवचनमेव** शब्दरूपं प्रद्योतकतया **प्रदीपः**, स च **चक्षुश्च** तदर्थावबोधरूपं ताभ्यां **परिहीनो**ऽनेनालोकलोचनाभ्यां शून्यत्वं दर्शयति । **द्रव्यादीनि** पूर्वोक्तानि **अजानन् उत्सर्गापवादिकं** चानुष्ठानम् । **चेत्यनेन** च अमार्गज्ञतां दर्शयति ॥४०७॥

एवं सति–

**कह सो जयउ अगीओ ? कह वा कुणइ अगीयनिस्साए ? ।**
**कह वा करेउ गच्छं ? सबालवुड्ढाउलं सो उ ॥४०८॥**

**कथमसौ यततामगीतो**ऽगीतार्थः । **कथं वा करोतु** हितमिति शेषः । गीतं गणधरोक्तं श्रुतं, तद्यस्य नास्ति स अगीतस्तस्य निश्रा आश्रयस्तया **अगीतनिश्रया । कथं वा करोतु गच्छं** सबालवृद्धैराकुलं **सबालवृद्धाकुलं** [1]प्राघुणकाद्याकीर्णं **सो**ऽगीतार्थस्तन्निश्रितो वा उपायाभावात् तुशब्दाद्वितथाचरणाच्चाऽनर्थं कुर्यादिति ॥४०८॥

**सुत्ते य इमं भणियं, अप्पच्छित्ते य देइ पच्छित्तं ।**
**पच्छित्ते अइमत्तं, आसायण तस्स महई उ ॥४०९॥**

**सूत्रे च इदं भणितं** यदुत-**अप्रायश्चित्ते ददाति प्रायश्चित्तं** चस्य व्यवहितसम्बन्धात्, **प्रायश्चित्ते** च **अतिमात्रं** मात्राधिकं यः, आशातना–ज्ञानाद्या यस्य लाभस्य शाटरूपा निरुक्तत्वात्, **आशातना तस्य महत्येव**। तुशब्दोऽवधारणे । तथा च सूत्रम्–

"**अप्पच्छित्ते य पच्छित्तं पच्छित्ते अइमत्तया ।**
**धम्मस्साऽऽसायणा तिव्वा मग्गस्स य विराहणा**" ॥ [ बृ.क./६४२२ ] इति ॥४०९॥ ततश्च–

**आसायण मिच्छत्तं, आसायणवज्जणा य सम्मत्तं ।**
**आसायणानिमित्तं, कुव्वइ दीहं च संसारं ॥४१०॥**

**आशातना मिथ्यात्वं** ज्ञानादिशाटनायास्तन्नान्तरीयकत्वात् । **आशातनावर्जना** पुनः साक्षात् **सम्यक्त्वम्** तद्वर्जनपरिणामस्य सम्यक्त्वेनाऽविनाभावात् । अत एव अगीतार्थो वितथाचरणेन **आशातनानिमित्तम्** आशातनया हेतुना **करोति दीर्घं चशब्दात्** क्लिष्टं च **संसारमिति** ॥४१०॥

**एए दोसा जम्हा, अगीयजयंतस्सऽगीयनिस्साए ।**
**वट्टावयगच्छस्स य, जो वि गणं देइ अगीयस्स ॥४११॥**

**एते** पूर्वोक्ता **दोषा यस्मादगीत**स्येति विभक्तिलोपात् **यतमानस्य अगीतनिश्रया** अन्यस्य **वा** यतमानस्येति गम्यम् । **गच्छवर्त्तकस्य** गच्छपालकस्य अगीतार्थस्य पूर्वोत्तरपदयोरार्षत्वाद्व्यत्ययः । **यो** वा **गणं** गच्छं **ददाति अगीतार्थाय** तस्याऽपि एते पूर्वोक्तयुक्तेर्दोषा एवेति ज्ञाने महानादरो विधेय इति ॥४११॥

द्वारगाथाव्याख्यानेन एकान्तेनाऽगीतार्थदोषानुक्त्वा किञ्चिज्ज्ञमधिकृत्याह–

**अबहुस्सुओ तवस्सी, विहरिउकामो अजाणिऊण पहं ।**
**अवराहपयसयाइं काऊण वि जो न याणाइ ॥४१२॥**

---

टि. 1. प्राघूर्णकः प्राघुणकः – अतिथिः ।

**अबहुश्रुतो** विशिष्टसिद्धान्ताधिगमशून्यः । **तपस्वी** विकृष्टतपोनिष्टप्तदेहः सन् तद्बलेनैव **विहर्तुकामो** गीतार्थं विना उद्यतविहारी भवितुकामोऽ**ज्ञात्वा पथं** ज्ञानादिकं मोक्षमार्गं स्वयं च गीतार्थतामनभ्यस्येत्यर्थः । यः किमिति आह-**अपराधपदशतानि** अतिचारस्थानवृन्दानि **यः कृत्वाऽपि न जानाति** । यदुत-एतदेतच्चाऽयुक्तं मया कृतमिति न वेत्तीति ॥४१२॥

**देसियराइयसोहिं, वयाइयारे य जो न याणाइ ।**
**अविसुद्धस्स न वड्ढइ, गुणसेढी तित्तिया ठाइ ॥४१३॥**

दिवसेन निर्वृत्ता **दैवसिका,** एवं **रात्रिका** अतिचारा इति गम्यम्, तेषां **शुद्धिः** स्वपरयोः प्रायश्चित्तेन क्षालनम् । तत् **व्रतातिचारांश्च** मूलोत्तरगुणविराधनाख्यान् स्वरूपतो **यो न जानाति** तस्य ज्ञानशून्यतया **अविशुद्धस्य** अक्षालितसंयमस्य **न वर्द्धते गुणश्रेणि**र्ज्ञानादिसन्ततिर्गुणवद्गुरुसंयोगस्यैव तद्वृद्धिहेतुत्वात् । तदभावे **तावत्येव** यावती प्रागासीत् तत्प्रमाणैव **तिष्ठति** । क्लिष्टचित्तस्य तु तस्या अपि भ्रंशेन अनन्तसंसारित्वं सम्पद्यते इत्यपि द्रष्टव्यमिति ॥४१३॥

एतदेव स्पष्टयति–

**अप्पागमो किलिस्सइ, जइ वि करेइ अइदुक्करं तु तवं ।**
**सुंदरबुद्धीए कयं, बहुयं पि न सुंदरं होइ ॥४१४॥**

**अल्पागम**स्तुच्छश्रुतः **क्लिश्यति** केवलं क्लेशमनुभवति । **यद्यपि करोति अतिदुष्करमेव** तुशब्दस्याऽवधारणार्थत्वात् **तपो** मासक्षपणादि कस्मादित्याह–**सुन्दरबुद्ध्या** सुन्दरमिदमिति स्वकल्पनया **कृतं बह्वपि न सुन्दरं भवति** । लौकिकानामिव तेषामपि अज्ञानतपस्वित्वादिति ॥४१४॥

तथा चाह–

**अपरिच्छियसुयनिहसस्स, केवलमभिन्नसुत्तचारिस्स ।**
**सव्वुज्जमेण वि कयं, अन्नाणतवे बहुं पडइ ॥४१५॥**

**अपरिच्छिन्नो**ऽपरीक्षितो वा **श्रुतनिकष** आगमान्तस्तत्त्वं येन स । तथा **केवलमभिन्नम्** अनुद्ग्रथितार्थं[1] सूत्रविशिष्टव्याख्यानरहितं सूत्रमात्रं, तेन तदनुसारेण चरितुम् अनुष्ठातुं शीलमस्येति तस्या**भिन्नसूत्रचारिणः । सर्वोद्यमेनाऽपि कृतम**नुष्ठान**मज्ञानतपसि** पञ्चाग्निसाधनादिरूपे **बहु पतति** । स्वल्पमेवागमानुसारि भवति । उत्सर्गापवादसूत्राणां परस्परेणाऽऽपाततो विरोधात् । तद्विषयविभागज्ञानस्य गुरुसम्प्रदायाधीनत्वात् । तथा चोक्तम्–

**"जं जह सुत्ते भणियं तहेव जइ तव्वियारणा नत्थि ।**
**किं कालियाणुओगो दिट्ठो दिट्ठिप्पहाणेहिं" ॥१॥ [ बृ.क./३३१५ ]**

एतत्संवादी च **महास्तवश्लोको**ऽपि–

**"त्वदाम्नायपराधीनान् धन्यान् मन्यामहे जडान् ।**
**प्रज्ञादृशां हि स्वाच्छन्द्यं श्वभ्रपाताय केवलम्" ॥ [ ] इति ॥४१५॥**

---

१. अनुग्रथितार्थं – A, K, B, अनुग्रंथितं....D, अनुद्ग्रहितार्थं – KH अनुग्रंथितार्थं – H ।

एतदेव दृष्टान्तेन दृढयति—

**जह दाइयम्मि वि पहे, तस्स विसेसे पहस्सऽयाणंतो ।**
**पहिओ किलिस्सइ च्चिय, तह लिंगायारसुयमित्तो ॥४१६॥**

**यथा** केनिचिद्दिङ्मात्रतया **दर्शितेऽपि पथि तस्य विशेषान्** ग्रामतदन्तरालसमविषमान् **पथो** मार्गस्य **अजानानः पथिकः क्लिश्यत एव** तृष्णा-बुभुक्षा-चौरादिभिर्बाध्यते एव **तथा लिङ्गाचारश्रुतमात्रः** क्लिश्यते बहुभिरपायैर्बाध्यते । तत्र लिङ्गम् —रजोहरणादिर्वेषः, आचारः—स्वधियानुष्ठानं श्रुतमात्रं —तत्त्वार्थाधिगमशून्यं सूत्रं लिङ्गाचारोपलक्षितं श्रुतमात्रं यस्य स **लिङ्गाचारश्रुतमात्र** इति ॥४१६॥

तथाहि—

**कप्पाकप्पं एसणमणेसणं चरणकरणसेहविहिं ।**
**पायच्छित्तविहिं पि य, दव्वाइगुणेसु समग्गं ॥४१७॥**
**पव्वावणविहिमुट्ठावणं च अज्जाविहिं निरवसेसं ।**
**उस्सग्गववायविहिं, अयाणमाणो कहं जयउ ॥४१८॥**

**कल्पं** मासकल्पादिकं स्थविरकल्पादिकं वा तदन्य**मकल्पं** यद्वा **कल्प्यं** साधूनामुचितम् **अकल्प्य**-मयोग्यम् **एषणा** शुद्धपिण्डस्यान्वेषणा च ततोऽन्या **अनेषणा** च तयोर्द्वन्द्वैकत्वे **एषणानेषणं** मकारोऽलाक्षणिकः । **चरणं** व्रतादि ।

''**वय ५ समणधम्म १० संजम १७ वेयावच्चं च १० बंभगुत्तीओ ९ ।**
**नाणाइतिअं ३ तव १२ कोह ४ निग्गहो ईय चरणमेयं**'' ॥१॥ [ ओ.नि.भा./२ ] ति वचनात् ।

**करणं** पिण्डविशुद्ध्यादि—

''**पिंडविसोही ४ समिइ ५ भावणा १२ पडिमा य १२ इंदिअनिरोहो ५ ।**
**पडिलेहण २५ गुत्तीओ ३ अभिग्गहा ४ चेव करणं तु**'' ॥२॥ [ ओ.नि.भा./३ ] इति श्रुतात् ।

**शैक्षविधिं** दीक्षाभिमुखस्य नवदीक्षितस्य वा सामाचारीग्राहणक्रमं तेषां द्वन्द्वे **चरणकरणशैक्षविधिम्** । **प्रायश्चित्तस्या**लोचनादे**र्विधिर्य**त् यस्य यादृशस्य यदा दीयते येन च दातव्यमित्यादिस्त**मपि च** । **द्रव्यादिगुणेषु** च विधिमित्यनुवर्त्तते । द्रव्यक्षेत्रादिषु च सुन्दरासुन्दरेषु यो विधिस्तं **समग्रं** सम्पूर्णम् अजानन्नित्युत्तरगाथातः सम्बन्धनीयमिति । तथा **प्रवाजनविधिं** दीक्षादानक्रमम् , **उपस्थापनां** व्रतारोपन्यायम् , **आर्याविधिं** साध्वीपालनक्रमम् , **निरवशेषं** निःशेषम् **उत्सर्गापवादविधिं** द्रव्यादिचतुष्टयापेक्षया निर्विशेषेण कृत्यमार्गम् । एतत्सर्व**मजानानः कथं यतताम**िति गाथाद्वयार्थः ॥४१७-४१८॥

तदर्थिना च गुरुराराध्य इत्याह—

**सीसायरियकमेण य, जणेण गहियाइं सिप्पसत्थाइं ।**
**नज्जंति बहुविहाइं, न चक्खुमेत्ताणुसरियाइं ॥४१९॥**

**शिष्याचार्यक्रमेणैव चस्य** एवार्थत्वात् । **जनेन** अविवेकिनाऽपि आसतां लोकोत्तराः साधवः । **गृहीतानि शिल्पशास्त्राणि** शिल्पानि चित्रादीनि, शास्त्राणि शब्दागमादीनि । यतस्तथैव गृहीतानि तानि

**विज्ञायन्ते बहुविधानि** नानारूपाणि तानि सम्यग् ज्ञानहेतुतां प्रपद्यन्ते । स्वबुद्ध्या तु[1] गृहीतानि विगोपयन्ति । तदुक्तम्—

**"न हि भवति निर्विगोपकमनुपासितगुरुकुलस्य विज्ञानम् ।**
**प्रकटितपश्चात्भागं पश्यत नृत्तं मयूरस्य" ॥१॥ [ ]**

**न चक्षुर्मात्रानुसृतानि** चक्षुर्मात्रेण यावदेव दृष्टं तावदेवाऽनुसरणं स्वबुद्ध्या विधाय गृहीतानीत्यर्थः ॥४१९॥

तथाहि—

**जह उज्जमिउं जाणइ, नाणी तवसंजमे उवायविऊ ।**
**तह चक्खुमित्तदरिसण-सामायारी न याणंति ॥४२०॥**

**यथा उद्यन्तुं जानाति ज्ञानी तपःसंयमयोरुपायवित्** तत्कारणकुशल**स्तथा** तेन प्रकारेण **चक्षुर्मात्रदर्शनेन** परानुष्ठानालोकनेनागमं विना **सामाचारी** प्रवृत्तिर्येषां ते तथाविधा **न जानन्ति** उद्यन्तुम् अनुष्ठानं कर्तुमिति ॥४२०॥

एवं च श्रुत्वा यः क्रियाविकलो ज्ञानस्यैव प्राधान्येन परितुष्येत्तं प्रत्याह—

**सिप्पाणि य सत्थाणि य, जाणंतो वि हु न जुंजई जो उ ।**
**तेसिं फलं न भुंजइ, इय अजयंतो जई नाणी ॥४२१॥**

**शिल्पानि च शास्त्राणि** च **जानन्नपि** परमार्थतोऽज्ञानः सन् हुर्निश्चये **न युनक्ति यस्तु** क्रियया न व्यापारयति । स **तेषां फलं** द्रव्यलाभादिकं **न भुङ्क्ते इति** एवम् **अयतमानो**ऽनुष्ठानशून्यो **यतिर्ज्ञानी** सन्नपि मोक्षलक्षणं फलं नाप्नोतीति ॥४२१॥

ज्ञानेऽपि सति क्रियावैकल्यं न चाऽसम्भाव्यमित्यत आह—

**गारवतियपडिबद्धा, संजमकरणुज्जमंमि सीयंता ।**
**निग्गंतूण गणाओ, हिंडंति पमायरण्णम्मि ॥४२२॥**

ज्ञानिनोऽपि सन्तो यतो **गौरवत्रयप्रतिबद्धा** ऋद्धि-रस-सातेष्वादरेण सक्ताः सन्तः । **संयमकरणोद्यमे** पृथिव्यादिरक्षणोत्साहे **सीदन्तः** शिथिलीभवन्तः । केचि**न्निर्गत्य गणाद्** गच्छात् यथेष्टं **हिण्डन्ते प्रमादानामेव** विषयकषायादीनां चौरश्वापदानामिवाऽऽस्पदतया **अरण्ये** संसारे, तदुच्छेदकचारित्रवैकल्यादिति भावः ॥४२२॥

नन्वेको मनाक् क्रियाविकलो ज्ञानी, द्वितीयश्च मनाक् अज्ञानो विशिष्टक्रियः, कतरस्तयोः श्रेयानित्याह—

**नाणाहिओ वरतरं, हीणो वि हु पवयणं पभावितो ।**
**न य दुक्करं करिंतो, सुट्ठु वि अप्पागमो पुरिसो ॥४२३॥**

**ज्ञानाधिको वरतरम्** आविष्टलिङ्गत्वादिति प्रधानो **हीनो**ऽपि चारित्रेण हुर्निश्चये **प्रवचनं** जिनशासनं **प्रभावयन्** वादव्याख्यानादिभिः प्रभासयन् । **न च** नैव **दुष्करं** मासक्षपणादि **कुर्वन् सुष्ठ्वपि अल्पागमस्तु**च्छश्रुतः **पुरुषः** सन् वरतरमिति ॥४२३॥

---

१. निगृही... D ।

**नाणाहियस्स नाणं, पुज्जइ नाणा पवत्तए चरणं ।**

**जस्स पुण दुण्ह एक्कं पि नत्थि तस्स पुज्जए काइं ? ॥४२४॥**

**ज्ञानाधिकस्य** सम्बन्धि **ज्ञानं पूज्यते** । यतो **ज्ञानात्प्रवर्त्तते चरणं** तज्जन्यत्वात्तस्य । **यस्य पुनर्द्वयो**र्ज्ञानाचरणयोरे**कमपि नास्ति, तस्य** पुरुषस्य **किं पूज्यते** ? न किञ्चित्, एतेन व्यवहारतो ज्ञानं चरणरहितमपि स्याच्चरणं तु ज्ञानेन विना नास्तीत्यतो ज्ञानहीन उभाभ्यामपि हीन एवेति ॥४२४॥

तत्त्वतस्तु ज्ञानादीनां मिथः सापेक्षाणामेव साधकत्वं न निरपेक्षाणामित्याह–

**नाणं चरित्तहीणं, लिंगग्गहणं च दंसणविहीणं ।**

**संजमहीणं च तवं, जो चरइ निरत्थयं तस्स ॥४२५॥**

**ज्ञानं चारित्रहीनम् , लिङ्गग्रहणं** च रजोहरणादिधारणं **दर्शनविहीनं** श्रद्धानशून्यम् , **संयमहीनं च तपो यः** सर्वमप्येतच्च**रति** सेवते, **निरर्थकं तस्य** सर्वमिदं मोक्षाऽसाधकत्वादिति ॥४२५॥

ज्ञानस्याऽपि चारित्रहीनस्य परमार्थतोऽपार्थकत्वमेवेति सदृष्टान्तमाह–

**जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स ।**

**एवं खु नाणी चरणेण हीणो, नाणस्स भागी न हु सुग्गईए ॥४२६॥**

**यथा खरश्चन्दनभारवाही** सन् **भारस्यैव भागी भवति । न हु** नैव **चन्दनस्य** विलेपनकृत्यार्थमपि स चितादिभस्मन एव भागीति भावः । **एवं खु** एवमेव **ज्ञानी चरणेन हीनो ज्ञानस्य भागी न हु** नैव **सुगते**र्मोक्षलक्षणाया भागीति ॥४२६॥ लिङ्गिनो दर्शनशून्यस्य लक्षणमाह–

**संपागडपडिसेवी, काएसु वएसु जो न उज्जमइ ।**

**पवयणपाडणपरमो, सम्मत्तं पेलवं तस्स ॥४२७॥**

**सम्प्रकटप्रतिसेवी** निःशूकतया लोकसमक्षं प्रतिसेवितुं संयमप्रतिकूलं श्रयितुं शीलमस्येति स तथा । **कायेषु** षट्सु रक्षणेन, **व्रतेषु** पञ्चसु अनुष्ठानेन, **यो न उद्यच्छति** नोद्यमं कुरुते । अत एव **प्रवचनपातनपरमो** विहिताऽकरणनिषिद्धाऽऽचरणाभ्याम् आगमलाघवप्रधानः । **सम्यक्त्वं पेलवं तस्य** युक्त्या तदभाव एवेति भावः ॥४२७॥ तपस्यपि संयमहीने दोष एवेत्याह–

**चरणकरणपरिहीणो, जइवि तवं चरइ सुट्ठु अइगरुयं ।**

**सो तिल्लं व किणंतो, कंसियवोद्दो मुणेयव्वो ॥४२८॥**

**चरणकरणपरिहीनः** संयमशून्यो **यद्यपि तपश्चरति** विधत्ते **सुष्ठु अतिगुरुकं** चतुर्मासक्षपणादि स **तैलमिव क्रीणन्** कांस्येन निर्वृत्तः **कांस्यिकः** आदर्शस्तत्प्रधानो **वोद्रो** ग्रामेयको मूर्खः-यो हि दर्पणतलेन तिलान् मित्वा दत्त्वा च तेनैव च मित्वा तैलं गृह्णाति । तद्वदेव संयमबाह्यतपःकर्त्तापि मूर्ख एवेति **मन्तव्यः** । स्वल्पेन बहुहारणादिति ॥४२८॥ तथाहि–

**छज्जीवनिकायमहव्वयाण, परिपालणाइ जइधम्मो ।**

**जइ पुण ताइं न रक्खइ, भणाहि को नाम सो धम्मो ? ॥४२९॥**

---

१. विहूणं - A ।

**षड्जीवनिकायमहाव्रतानां परिपालनया यतिधर्मो** भवति **यदि पुनस्तानि** षड्जीवनिकायमहाव्रतानि यतिरपि **न रक्षति भण** त्वं ब्रूहि **को नाम स धर्मो** न कश्चिदपीति भावः ॥४२९॥ व्रतान्तःपातिनामपि षड्जीव-निकायानां पृथग्ग्रहणं तद्रक्षणस्य प्राधान्यख्यापनार्थमित्याह—

**छज्जीवनिकायदयाविवज्जिओ नेव दिक्खिओ न गिही ।**
**जइधम्माओ चुक्को, चुक्कइ गिहिदाणधम्माओ ॥४३०॥**

**षड्जीवनिकायदयाविवर्जितः** तदुपमर्द्दको **नैव दीक्षितः** संयमाभावात्, **न गृही** यतिलिङ्गधारणात्, स चैवं **यतिधर्माद् भ्रष्ट** एव **भ्रश्यते गृहिदानधर्माद्** गृहिणां हि दानधर्मो गरीयान्, स च साधुगोचरः श्रेयस्करः, सुसाधूनां च गृहस्थसम्बन्धि कल्पते, न पुनस्तत्सम्बन्धि किमपि कल्पते इति भावः ॥४३०॥

यो यावत् करिष्यते तस्य तावान् धर्मः सम्पूर्णगुणास्तु दुर्लभा इत्यालम्ब्य विचित्रविरतिभाजा श्रावकेणेव यतिना[१]ऽपि यावता तावताऽपि न सन्तोष्टव्यम् । तस्याऽभ्युपगतसर्वविरतिरूपचारित्रस्यैकदेशविसंवादेनापि प्रत्युताऽपायं दृष्टान्तेनाह—

**सव्वाओगे जह कोइ, अमच्चो नरवइस्स घित्तूणं ।**
**आणाहरणे पावइ, वहबंधणदव्वहरणं च ॥४३१॥**

**सर्वानायोगान्** समस्ताऽधिकारान् **यथा** कश्चिदमात्यः प्राप्तप्रसादः सचिवो **नरपते** राज्ञः सम्बन्धिनो **गृहीत्वा** स पश्चाज्जितकाशी । **आज्ञाहरणे** नृपादेशातिक्रमे **प्राप्नोति वधं** ताडनं कशादिभि**र्बन्धनं** रज्ज्वादिभि**र्द्रव्यहरणं** सर्वस्वच्छेदं **च**शब्दान्मारणं **च** । अत्र पूर्वयोरनुस्वारलोपः त्रयाणामपि द्वन्द्वैकत्वं वा इति ॥४३१॥

दार्ष्टान्तिकमाह—

**तह छक्कायमहव्वय-सव्वनिवित्तीउ गिण्हिऊण जई ।**
**एगमवि विराहंतो, अमच्चरन्नो हणइ बोहिं ॥४३२॥**

यथा स मन्त्री **तथा षट्[२]कायमहाव्रतसर्वनिवृत्तीः** षट्कायमहाव्रतेषु **सर्वथा** रक्षणानुष्ठानाभ्यां **निवृत्तयो** नियमास्तान् **गृहीत्वा यतिरेकमपि** कायं व्रतं वा **विराधयन् अमर्त्त्यादीनां** शक्रादीनां **राज्ञो**ऽर्हत्भट्टारकस्य भगवतः सम्बन्धिनीं **हन्ति बोधिं** कारणे कार्योपचारादाज्ञाम्, तद्द्वारेण वा प्रेत्य जिनधर्माऽवाप्तिरूपां बोधिं खण्डयतीति ॥४३२॥

**तो हयबोही पच्छा, कयावराहाणुसरिसमियममियं ।**
**पुणवि भवोअहिपडिओ, भमइ जरामरणदुग्गम्मि ॥४३३॥**

**ततो हतबोधिः पश्चात्कृतापराधानुसदृशं** विहितातिचारानुरूपं **इमं** ज्ञानिनां प्रत्यक्ष**ममित**मनन्तं **पुनरपि भवोदधिं पतितः** सन् **भ्रमति जरामरणदुर्गे** इति ॥४३३॥

स चेहलोकेऽपि स्वपरापकारीत्याह—

**जइयाऽणेणं चत्तं, अप्पाणयं नाणदंसणचरित्तं ।**
**तइया तस्स परेसुं, अणुकंपा नत्थि जीवेसु ॥४३४॥**

---

१. यतनापि - B, A । २. कषाय - A ।

**यदानेन त्यक्तमात्मीयं ज्ञानदर्शनचारित्रं तदा तस्य** तत्त्वतस्त्यक्तात्मनः । **परेषु अनुकम्पा नास्ति** जीवेष्विति । तथा चाहुः—

**''परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत् ।**
**आत्मानं योऽतिसन्धत्ते सोऽन्यस्मै स्यात्कथं हितः''** ॥१॥ [ ] ॥४३४॥

**छक्कायरिऊण अस्संजयाण, लिंगावसेसमित्ताणं ।**
**बहुअस्संजमपभवो, खारो मइलेइ सुट्ठुयरं ॥४३५॥**

**षट्कायरिपूणां** तदुपमर्दकानाम् **असंयतानाम्** अविरतदण्डत्रयाणां **लिङ्गावशेषमात्राणां** च **बहु**र्भूरि **असंयमप्रभव**स्तत्कार्यत्वादशुभाश्रवरूप एव **क्षार** इव तिलादीनां क्षारो **मलिनयति** पङ्कयति आत्मानं **सुष्ठुतरम्** अतिशयोत्कर्षेणेतीदमत्राकूतम्–यथा क्षारेण वस्त्रादिकं मलिनं क्रियते एवमशुभाश्रवेण जीवोऽपि इति ॥४३५॥

वेषधारणेऽपि सति पापसम्बन्ध इति च[1] नाऽसम्भावनार्हमित्याह—

**किं लिंगविड्डुरीधारणेण, कज्जम्मि अट्ठिए ठाणे ।**
**राया न होइ सयमेव, धारयं चामराडोवे ॥४३६॥**

**किं लिङ्गविड्डुरीधारणेनेति** किं वेषमुद्राडम्बराधानेन **कार्ये** चारित्ररूपे **अस्थिते** असम्प्राप्ते **स्थानम**वकाशं द्वितीयार्थेऽत्र सप्तमी, अयमत्र भावः–**कार्ये** चारित्रे **स्थानम**वकाशम् **अस्थिते** अप्राप्ते किं वेषपाखण्डेन प्रयोजनं ? निष्फलत्वात् । तथाहि–कार्ये आज्ञैश्वर्यरूपे अवकाशमप्राप्ते **राजा न भवति । स्वयमेव धारयंश्चामराटोपांश्च** छत्रध्वजादीन् द्वन्द्वे तान्, यथा राज्यचिह्नैरन्यैः सद्भिरपि आज्ञैश्वर्येण विना न राजा, तथाऽयमपि वेषमात्रेण संयमशून्येन न व्रती[2] इति ॥४३६॥

इदमेवान्वयेन साधौ योजयन्नाह—

**जो सुत्तत्थविणिच्छयकयागमो, मूलउत्तरगुणोहं[3] ।**
**उव्वहइ सयाऽखलिओ, सो लिक्खइ साहुलेक्खम्मि ॥४३७॥**

**यः सूत्रार्थविनिश्चयेन** श्रुतसारावसायेन **कृतो**ऽभ्यस्त **आगमः** प्रवचनं येन स **सूत्रार्थविनिश्चयकृतागमः** सन् **मूलोत्तरगुणौघं** व्रतादि-पिण्डविशुद्ध्यादिगुणसङ्घातम् **उद्वहति** सम्यक् क्रियया यावज्जीवं बिभर्त्ति । **सदाऽस्खलितो** निरतिचारः **स** एवंविधो **लिख्यते साधुलेख्याङ्के** साधुगणनायां तस्य रेखा दीयते नाऽन्यस्येत्यर्थः ॥४३७॥

व्यतिरेकमाह—

**बहुदोससंकिलिट्ठो, नवरं मइलेइ चंचलसहावो ।**
**सुट्ठु वि वायामंतो, कायं न करेइ किंचि गुणं ॥४३८॥**

**बहुदोषै**रज्ञानक्रोधाद्यैः **सङ्क्लिष्टो** विबाधितः सन्, **नवरं** केवलं **मलिनयत्या**त्मानमिति शेषः । **चञ्चलस्वभावो** विषयलम्पटप्रकृतिः । **सुष्ठ्वपि व्यायामयन्** क्लेशयन् अप्रेक्षापूर्वकारितया **कायं** देहं **न करोति किञ्चित्**कर्मक्षयादिकं **गुणमिति** ॥४३८॥

१. वचनात्संभा... D, K वचनासंभा...B वचनसंभा...A । २. ब्रवीति – K, KH । ३. गुणेहिं – B, K, KH, D ।

स तर्हि निर्गुणः किं म्रियतां ? न, मरणजीवितयोरपि चतुर्भङ्ग्या प्रशस्यत्वादित्याह—

**केसिंचि वरं मरणं, जीवियमन्नेसि उभयमन्नेसिं ।**
**दद्दुरदेविच्छाए, अहियं केसिंचि उभयं पि ॥४३९॥**

**केषाञ्चित्** प्राणिनां **वरं** प्रधानं **मरणं जीवितमन्येषां** वरमिति वर्त्तते । **उभयमन्येषां** जीवितं मरणं च वरम् । '**दर्दुरदेवेच्छये**'त्याख्यानं सूचयति । **अहितमपथ्यं केषाञ्चित् उभयमपि** पूर्वोक्तमेवेति ॥४३९॥

एतदेव स्थानापेक्षमाह—

**केसिंचि परो लोगो, अन्नेसिं इत्थ होइ इहलोगो ।**
**कस्स वि दोण्णि वि लोगा, दो वि हया कस्सई लोगा ॥४४०॥**

**केषाञ्चित् परलोकः** श्रेयानिति गम्यते, **अन्येषामत्र भवति इहलोकः । कस्याऽपि द्वावपि लोकौ** स्यातां **द्वावपि हतौ** स्वकर्मणा विनाशितौ **कस्यचिल्लोकाविति** ॥४४०॥

**दर्दुरकथा**सम्प्रदायश्चाऽयम्-तथाहि—

**[ दर्दुरदेवकथानकम् ॥ ]**

**कौशाम्बी**त्यस्ति पूस्तस्यां **शतानीको**ऽभवन्नृपः । दुर्मेधा दुर्विधो दुष्टः **सेडुका**ख्यश्च वाडवः[1] ॥१॥
स गर्भारम्भमासेऽपि गर्भिण्याऽभाणि भार्यया । भट्ट ! सूतिकृते सर्प्पिरर्प्पणीयं तदर्जय ॥२॥
तेनाऽवाचि कला[2] काचिन्न कलत्र ! कला[3] मम । कलाधीना धनाधीशास्तल्लाभो वल्लभे ! कुतः ॥३॥
अथोऽवोचदियं शोच मा त्वं निष्कलमाकुलः[१] । वित्तं चित्तेश ! भाग्यैः स्याद्व्यवसायसखैः सुखम् ॥४॥
व्यवसायस्ततः कार्यवद्भिर्मुच्येत न क्वचित् । कदाऽप्युद्घटते भाग्यं तद्व्रज द्विज[२] ! भूभुजम् ॥५॥
तत्तदा[4]ऽऽद्ययमुद्यानाहृतैः पुष्पफलैः कलैः । एकतानः **शतानीकं** समसेवत देववत् ॥६॥
कदाचिदथ **चम्पेशः कौशाम्बीं** प्रबलैर्बलैः । रुरोध भाभिर्बद्धा[5]ऽऽस्यां रविः कैरविणीमिव ॥७॥
तदन्तस्तु **शतानीको**ऽलीकं पक्षोदयं विदन् । समयं गमयामास लीनोऽलीनामिव व्रजः ॥८॥
**चम्पेशो**ऽपि स्वदेशाय यियासुश्चलपक्षकः । प्रावृट्कालेऽभवत्सन्ध्याकाले पक्षीव भूरुहे ॥९॥
ददर्श **सेडुकः** पुष्पाद्यर्थमुद्यानगः प्रगे । क्षीणं रीणमरीणां तद् बलं कुवलयालिवत् ॥१०॥
इत्यागत्याऽयमह्नाय **शतानीकाय** भूभुजे । आचख्यावेष निष्क्लेशश्चम्पेशग्रहणक्षणः ॥११॥
इत्याकर्ण्य **शतानीकः** प्रत्यनीकं नृपं रयात् । सन्नद्धासन्नसैन्यस्तं सन्नसैन्यमतित्रसत् ॥१२॥
एकाङ्गे कान्दिशीकेऽरौ **शतानीकः** स्मिताननः । सर्वं तदक्षकोशाद्य[३]मासाद्य प्राविशत्पुरीम् ॥१३॥
हन्त किं ते ददामीति वदत्यथ मुदा नृपे । **सेडुकः** समुवाचेदं याचे पृष्ट्वा निजां प्रियाम् ॥१४॥
तस्मिन्नखिलमाख्याय किं वाच्यमितिवा[6]च्य[४]थ । विप्री दध्यौ पृथुश्रीमानेष नैक्षिष्यतेऽपि माम् ॥१५॥
तदल्पवित्त एवाऽयमायत्तो नित्यमस्तु मे । इति निश्चित्य साऽवोचद्रोच[7]मानमतिस्थितिः ॥१६॥

---

१. माकुल - C । २. देवतत् - B, KH, A । ३. कौशाम्ब्य...KH । ४. वाभ्यथः H याच्यथ - B, वाच्यथः C वाभ्यधा - A ।

टि. 1. वाडवः - ब्राह्मणः । 2. कला - मनोहरा । 3. कला - शिल्पम् । 4. तदादि अयं उद्यानाहृतैः । 5. बद्धं आस्यं यस्याः सा, ताम् । 6. इति वाचि - इति वाक् यस्य स - इतिवाक्, तस्मिन् । 7. मतेः स्थितिः मतिस्थितिः, रोचमाना मतिस्थितिः यस्याः सा-रोचमानमतिस्थितिः, ग्राह्यवाक् इत्यर्थः ।

एकः प्रत्यह[१]मालोचोऽग्रासने भोजनं तथा । दीनारो दक्षिणायां च भट्ट ! याच्यमिति त्वया ॥१७॥
अथेदं याचते तस्मै ददौ राजा वदन्नदः । अस्य पत्न्या सपत्नीव वर्द्धिष्णुः [२]श्रीर्निवारिता ॥१८॥
भवन् स राजमान्योऽथ नित्यं लोकैर्निमन्त्रितः । दक्षिणालोभतो[३]ऽभुङ्क्त प्राग्भुक्तच्छर्दिकृन्मुहुः ॥१९॥
स क्रमेण समृद्धोऽभूत् [४]प्रासरच्च सुतादिभिः । किन्तूद्वृत्तरसः कुष्ठी तथाभोजनतोऽजनि ॥२०॥
[५]तथाभूतोऽपि भुञ्जानोऽग्रासने ग्रासलोभतः । स पृथ्वीपालमालोच्य सचिवैरेवमौच्यत ॥२१॥
स्वं पथ्यादिपरस्तिष्ठन्नालये [६]पालयेर्द्विज ! । प्रेषयेः पुत्र[७]मत्रैकं [८]भक्ष्य-दक्षिणयोः कृते ॥२२॥
असावथ तथाकारी वृद्धरोगभरो गलन् । पूयेन मक्षिकालक्षकुक्षिम्भरिरभूत् क्रमात् ॥२३॥
क्षिप्तो गृहबहिःकुट्यां त्यक्ताऽऽज्ञैः स सुतैरपि । शूकवक्राऽऽस्य[1]नक्राभिः स्नुषाभिरपि भोजितः ॥२४॥
स्वयमक्षालयत्काष्ठभाजनं भोजनोत्तरम् । भाषयन्नेष लोकाच्च म्रियस्वेत्यापदुत्तरम् ॥२५॥
दध्यौ क्रुद्धोऽथ विप्रोऽयं मया ये लम्भिताः श्रियम् । तैर्दौस्थ्यस्य मृतस्याहं [2]दाहभाण्डमिवोज्झितः ॥२६॥
तत्कुर्वे कुष्ठिनो भक्तिन्यूनान्नूनममूनपि । ध्यात्वेति सोऽवदत् पुत्रांस्तीर्थे कुत्राऽपि याम्यहम् ॥२७॥
किन्त्वयं नः कुलाचारः कुटुम्बाय मुमूर्षुभिः । पशुर्मन्त्रोषितो देयः कोऽप्यानेयः पशुस्ततः ॥२८॥
श्रुत्वेति तैर्मुदाऽऽनिन्ये मूढतापशुभिः पशुः । चिराय चारितस्तेन तनूद्वर्त्तनवर्त्तिकाः ॥२९॥
क्रमादभूदयं रोगमयमांसोच्चयः पशुः । ढौकितश्च कुटुम्बाय तेन यत्नेन तत्त्ववत् ॥३०॥
स आशु बुभुजे पुत्रैरालभ्य च विलभ्य च । मुदा कुष्ठैकचित्तस्य पितुः सर्वस्ववत्पशुः ॥३१॥
अथ तीर्थेषु यामीति प्रीतानापृच्छ्य नन्दनान् । अरण्यमरणं ध्यात्वा शरणं **सेडुको**ऽचलत् ॥३२॥
अर्कत्विषा तृषा मार्गश्रान्त्या क्लान्त्या क्षुधश्च सः । महातापः क्रमादापदरण्ये दूरतो ह्रदम् ॥३३॥
तीरद्रुपुष्पपर्णादिकीर्णं शीर्णकरक्रमः । उष्णमुष्णांशुतापेन स पाथः क्वाथवत् पपौ ॥३४॥
तत्तरूणां फलग्रासी छायावासी तदम्बुपः । विरेकपतितानेककृमिः सोऽभूत् क्रमादरुक् ॥३५॥
शशीव निशि शाखीव वसन्ते स वसन्निह । उद्भूतनूतनतनु[3]प्रतीकश्रीकतामगात् ॥३६॥
पृच्छद्भ्यः स दिशन् देवसेवामारोग्यकारणम् । पुरं स्वमाप **श्रीणां हि फलं द्विड्मित्रदर्शनम्** ॥३७॥
गत्वा निजगृहे सोऽहं युष्मान्निजगृहे तदा । स्वाऽभक्तान् साधु पशुनेत्यवोचत्कुष्ठिनः सुतान् ॥३८॥
अथ पुत्रैश्च मित्रैश्च स्वजनैश्च जनैश्च सः । हाहेत्युक्तः पुरीं त्यक्त्वा पुरं राजगृहं ययौ ॥३९॥
प्रतोलीपालमाहारचेतनस्तुच्छचेतनः । शिश्राय शीतलच्छायनित्यस्थितिरसादसौ ॥४०॥
कदापि **सेडुकं** द्वास्थः स्वस्थाने न्यस्य सत्वरः । जगामाऽऽरामविचरच्चरमार्हत्प्रणामधीः ॥४१॥
[९]द्वारस्थः **सेडुको** द्वारदुर्गाणामग्रतो बलिम् । अभुङ्क्ताऽऽकण्ठमुत्कण्ठाभरलब्धं क्षुधातुरः ॥४२॥

---

१. मालोवो – KH, मालोचा – K, D । २. श्रीर्निराकृता – C, D, K, L । ३. भुंक्ते – A, B । ४. प्रासरत् स्वसुता...B, A, H । ५. तथास्थितो – B, H, A । ६. पालयेद्विजः – KH, D पालयेर्द्विजः K । ७. मेवैकं – B, A । ८. भक्ष – B, A । ९. इतस्त्रयः श्लोकाः L, C आदर्शयोर्न सन्ति ।

टि. 1. नक्रम् – नासिका । 2. दाहभाण्डम् – खोखरी हांडी इति भाषायाम् । 3. ०प्रतीकः० – अवयवः ।

अथाऽतितृषितो वारि वारीति चिरमारटन् । द्वारपालभयात् द्वारमत्यजन् तत्यजेऽसुभिः ॥४३॥
भेकतामेकतानाम्बुध्याना[1]धानमृतेर्वशात् । तत्र वाप्यामवाप्याऽसौ सलिलैर्व्यलसच्चिरम् ॥४४॥
कदापि विश्वविश्वासपरमश्चरमो जिनः । पुनस्तत्पत्तनोद्यानमेदिन्यां समवासरत् ॥४५॥
स्त्रीणां जलहृतां[2] भेकः स विवेकभृतां मुखात् । **वीरं** जिनं वने नन्तुं याम इत्यशृणोद् गिरम् ॥४६॥
तामसौ स्वामिनामोक्तिमूहमानो हरिर्मुहुः । त्रुट्यत्कुकर्मावरणो जातिस्मरणमासदत् ॥४७॥
दध्यौ च द्वारि मां मुक्त्वा द्वाःस्थो नन्तुं जगाम यम् । वनं वीरः स एवाऽऽगात् तं नन्तुं किं न याम्यहम् ॥४८॥
इति निर्गत्य वापीतो वीतरागानुरागभाग् । चचालाऽत्युच्छलन् भेको वेगश्रीकेलिकन्दुकः ॥४९॥
जिनं नन्तुं यतो राज्ञः श्रेणिकस्य चमूहयैः । तदैष दर्दुरः क्षुण्णो दर्दुराङ्कः सुरोऽभवत् ॥५०॥
पादोपान्तलुलद्भूपवेणिः **श्रेणिक**भूपतिः । तदा[3]ऽऽससाद तीर्थेशदेशनासदनं सुधीः ॥५१॥
सहा**ऽभयकुमारे**ण धर्मानूनेन सूनुना । स नत्वेशमुपाविक्षद्राजा **राजगृहेश्वरः** ॥५२॥
कृष्टा विभुविभूतीनां चित्रैस्तत्रैव संसदि । पापीयांसोऽप्युपाजग्मुः **कालशौकरिका**दयः ॥५३॥
अथ विश्वाघवृक्षौघोन्मूलनस्थूलपूरया । श्रीसर्वज्ञः सरस्वत्या सार्वया[4] देशनां व्यधात् ॥५४॥
तदा कोऽप्यसदङ्गुल्यङ्गुष्ठः कुष्ठगलत्तनुः । सर्वसाधारणं नाथं नत्वोपान्तमुपाविशत् ॥५५॥
कुष्ठी विशङ्कः श्रीखण्डद्रवपूरैरिव प्रभोः । चरणौ चर्चयामास भूयः पूयरसैरसौ ॥५६॥
तन्निदध्यौ च दध्यौ च श्रेयोधीः **श्रेणिकः** क्रुधा । प्रभोरभक्तो वध्योऽयं सभामध्योत्थितः खलु ॥५७॥
नाथेनाऽथ क्षुते कुष्ठी द्राग् म्रियस्वेत्युवाच सः । विश्वरञ्जी चिरंजीवेत्याचष्ट **श्रेणिक**क्षुते ॥५८॥
क्षुते**ऽभयकुमारेणा**ऽब्रवीज्जीव म्रियस्व वा । मा जीव मा म्रियस्वेति स जगौ सौनिकक्षुते ॥५९॥
प्रभुं प्रति म्रियस्वेति गिरा रोषस्थिराशयः । ग्राह्यो बाह्योत्थितोऽसावित्यादिशद्भूपतिर्भटान् ॥६०॥
देशनान्ते स नत्वेशमुत्थितः क्ष्मापतेर्भटैः । अरोधि क्रोधिभिः कुष्ठी मक्षिकाभिरिवाभितः ॥६१॥
दिव्यमुत्पाद्य सद्योऽङ्गं तेषां ग्रहणधीजुषाम् । अभाग्यानां निधिरिवाऽभूददृश्यः स पश्यताम् ॥६२॥
तत्परिज्ञाय राज्ञाऽथ विस्मितेन स्मितेन च । स्वरूपं कुष्ठिनस्तस्य पृष्टोऽभाषत सर्ववित् ॥६३॥
एको भेकोऽस्मदानत्यै प्रधावन् ह्यस्तने दिने । हतस्त्वत्तुरगैर्जज्ञे **दर्दुराङ्का**भिधः सुरः ॥६४॥
स देवः सद्य एवास्मान्नमस्कर्तुं तदागतः । तव श्रद्धापरीक्षार्थं विक्रियाश्च ततान ताः ॥६५॥
घनपूयद्रवभ्रान्तिकर्मठैश्चर्मचक्षुषाम् । स दिव्यचन्दनरसैरसिञ्चन्नः पदौ तदा ॥६६॥
मृत्युः शिवाय नस्तन्नः स म्रियस्वेत्यभाषत । त्वां जीवेत्यतिधर्मिष्ठमत्रामुत्र तु नारकम् ॥६७॥
जीवन् धर्मं भजेन्मृत्वा विमानं यात्यनुत्तरम् । जीव म्रियस्व वेत्यूचे तेनाय**मभयो**ऽभयम् ॥६८॥
जीवन् करोति पापानि मृतो यास्यति दुर्गतिम् । मा जीव मा म्रियस्वेति **कालशूकरम**ब्रवीत् ॥६९॥
अथ नत्वाऽभ्यधाद्भूपः प्रभो ! त्वयि सति प्रभौ । नरको नरकोटीनां मुक्तिदायिन् ! कथं मम ॥७०॥

१. नाधीन - KH । २. भृतां - A, KH कृतं K, D हृतां - H । ३. तदा विवेश - KH । ४. सार्थया - B ।

अथ तीर्थकृताऽवाचि पूर्वं काचिन्निकाचिता । कर्मावलिस्त्वया राजन् ! यया स्यादेव दुर्गतिः ॥७१॥
शुभाशुभानां भूनाथ ! पूर्वनिर्मितकर्मणाम् । न भुक्तिमन्यथाकर्तुं वयं स्वयमपीश्वराः ॥७२॥
भविष्यन्त्यां जिनचतुर्विंशत्यां प्रथमो जिनः । त्वं भावी **पद्मनाभस्त**त्किं विषीदसि सीदसि ॥७३॥
पुनः स्माह नृपः स्वामिन् ! कोऽप्युपायः समर्प्यताम् । महानरककूपान्तःपातिनो मेऽवलम्बनम् ॥७४॥
स्वाम्यूचे **कपिला** दासी याऽस्ति ते प्रतिचारिका । साधुभ्यो दापयसि चेद्दानं सानन्दया तया ॥७५॥
यदि मोचयसे शूनां **कालशूकरिकेण** वा । नरको नरकोटीर ! तदयं जीयते त्वया ॥७६॥
इदं हृदन्तर्विन्यस्य विनम्य च जिनं नृपः । चचालाऽचलसम्यक्त्वतत्त्ववृत्तिर्गृहं प्रति ॥७७॥
तत्सम्यक्त्वपरीक्षार्थं दर्दुराङ्केन वर्त्मनि । राज्ञः कैवर्त्तवद्वर्त्तमानो[1] मुनिरदर्श्यत ॥७८॥
माऽर्हत्प्रवचनस्याऽस्तु वचनीयत्वमित्ययम् । साम्नैवाऽऽकार्य तं साधुं विनिवार्य गृहं ययौ ॥७९॥
साध्वीं सोऽदर्शयद्गर्भनिर्भराङ्गीमथाऽमरः । धाम्नि शासनभक्तस्तां सञ्जुगोप स गोपतिः ॥८०॥
साधु साध्वितिगीर्देवः स्फुटीभूयाऽथ सोऽब्रवीत् । राजन् ! शक्रेण सम्यक्त्वे यादृगुक्तोऽसि तादृशः ॥८१॥
इन्दोरिव [2]रुचिच्छेदैर्निर्मितं निर्मलच्छविम् । हारं प्रदाय भूपाय तथा गोलकयोर्द्वयम् ॥८२॥
हारं सन्धास्यते योऽमुं विशीर्णं स विपत्स्यते । इत्युदित्वा च देवोऽयं दीप्तरोदा[१]स्तिरोदधे ॥८३॥
अथ हारं महारम्यं **चिल्लणायै** ददौ नृपः । तत्तु **नन्दा**भिधानायै प्रियायै गोलकद्वयम् ॥८४॥
दानमीदृशमेव स्यान्मादृशामिति नन्दया । स्तम्भेनाऽभञ्जि तत् कोपलोलया गोलकद्वयम् ॥८५॥
कृतेन्दुताडं ताडङ्कयुगमुद्गतमेकतः । प्रभाभिरद्धयं क्षौमद्वयं गोलकतोऽन्यतः ॥८६॥
तदचिन्तितलब्ध्वाऽतिदुर्लभं रत्नमण्डनम् । दृष्ट्वाऽनभ्रसुधावृष्टिमिव नन्दाऽप्यमोदत ॥८७॥
साधुषु श्रद्धया भिक्षां यच्छ भिक्षां हरामि ते । राज्ञेत्यथोदिता कोपकपिला कपिलाऽवदत् ॥८८॥
हेमदेहामदेहां वा कुरु मां न करोम्यदः । **सन्तोऽकृत्यं न कुर्युः [२]श्रीवरणे मरणेऽपि वा** ॥८९॥
तां विसृज्याऽथ भूपालः **कालशूकरिकं** जगौ । मुञ्च पापोचितां शूनां तवाऽनूनां श्रियं ददे ॥९०॥
सोऽप्यूचे स्वां श्रियं भुङ्क्ष्व सोऽहं मर्त्योपकारकम् । कुलक्रमागतं धर्मं [३]मुञ्चेऽमुं चेन्म्रिये ततः ॥९१॥
क्व कर्त्ता[3]ऽस्मिन्नसौ शूनां पशूनां विरहादिति । क्षिप्त्वाऽन्धकूपे भूपेन दध्रेऽहोरात्रमत्र सः ॥९२॥
गत्वा नत्वा च राज्ञाऽर्हन् व्यज्ञपीदं यदद्य सः । शूनाऽऽग्रहमहोरात्रमात्रमत्याजि [४]सौनिकः ॥९३॥
जगौ जगद्गुरुर्भूप ! कूपमध्यगतोऽपि सः । महिषाणामहन् पञ्चशतीं कृत्वाऽपि मृन्मयीम् ॥९४॥
तन्निरूप्य स्वयं भूपो भाविदुर्गतिदुःखितः । भविष्यत्तीर्थनाथत्वप्रीतिप्रत्याशया स्थितः ॥९५॥

**इति दर्दुरदेवकथानकम् ॥**

---

१. दीप्तरोधा... D, दीप्तिरोची...C, दीप्तिरोदा - KH । २. श्रीहरणे - C, L श्रीचरणे - P, KH, H । ३. मुंचेमुंचेन्म्रिये ततः L, मुंचेमुंचेन्म्रियेत सः- B मुंचन्मुंचे म्रिये ततः - D, मुंचमुंचेम्रिये ततः - K । ४. सौनृपः P ।

टि. 1. कैवर्त्तः - मात्स्यिकः । 2. रुचिः कान्तिः, तस्याः छेदः खण्डः तैर्निर्मितम् । 3. अस्मिन् अन्धकूपे इत्यर्थः ।

अथैतां चतुर्भङ्गीं सूत्रकार एव योजयन्नाह—

**छज्जीवकायविरओ, कायकिलेसेहिं सुट्ठुगुरुएहिं ।**
**न हु तस्स इमो लोगो, हवइ अ सेगो[1] परो लोगो ॥४४१॥**

**षट्जीवनिकायेभ्य**स्तदारम्भपरित्यागाद्विरतः संयतः **कायक्लेशैः** केशलोचनाग्न्यमलधारणमासक्षपणादिभिः **सुष्ठुगुरुभि**र्बृहत्तमैर्यो वर्त्तते, इहलोकनिरपेक्षः परलोकैकबद्धबुद्धिस्तपोधनः **न हु** नैव **तस्यायं लोको भवति** परित्यक्तत्वात् **भवति चे**ति चस्याऽवधारणार्थत्वात् भवत्येव **से** तस्य **एक** एव **परो**ऽनुत्तरविमानसिद्धिगमनादि**र्लोकः** उत्कृष्टस्य तपसस्तत्फलप्रदत्वादिति । अनेन पाश्चात्यगाथोक्तास्त्रयोऽन्येऽपि भङ्गकाः सूचिता द्रष्टव्याः । ते च स्वधिया योज्याः सुगमाश्चेति ॥४४१॥

अथोद्दिष्टार्थप्रतिपादने क्रमोऽतन्त्रमिति न्यायं दर्शयन् आद्यगाथोक्तान् भङ्गान् योजयति—

**नरयनिरुद्धमईणं, दंडियमाईण जीवियं सेयं ।**
**बहुवायम्मि वि देहे, विसुज्झमाणस्स वरमरणं ॥४४२॥**

**नरके निरुद्धा** गत्यन्तरान्निवर्त्त्य तत्रैव स्थापिता **मतियैं**स्तेषां **दण्डिकादीनां** पापिष्ठराजप्रभृतीनां **जीवितं श्रेयः**, तदात्वेन सुखावाप्तेः । तथा **बह्वपाये** रोगाद्यपायाक्रान्ते**ऽपि**शब्दात् तदुद्भूतवेदनासहिष्णोरपि **देहे विशुद्ध्यमानस्य** धर्मादिध्यानान्निर्मलीभवतो **वरं मरणं** तथाविधस्य सुगतिगमनादिति ॥४४२॥

तथा—

**तवनियमसुट्ठियाणं, कल्लाणं जीवियं पि मरणं पि ।**
**जीवंतज्जंति गुणा मया वि पुण सुग्गइं जंति ॥४४३॥**

**तपोनियमसुस्थितानां** शुद्धगुणाध्यासितानां **कल्याणं जीवितमपि मरणमपि** । कुत इत्याह— **जीवन्तोऽर्जयन्ति** वर्द्धयन्ति ते **गुणान् मृता अपि** सन्तः **पुनः सुगतिं** स्वर्गापवर्गरूपां **यान्ति** प्राप्नुवन्ति ॥४४३॥ तथा—

**अहियं मरणं अहियं च जीवियं पावकम्मकारीणं ।**
**तमसंमि पडंति मुआ, वेरं वड्ढंति जीवंता ॥४४४॥**

**अहितं मरणम् अहितं च जीवितं पापकर्मकारिणां** चौरादीनाम् ते हि **तमसि** नरकाख्ये **पतन्ति मृताः** । **वैरं** तद्धेतुत्वात् पापं **वर्द्धयन्ति** च **जीवन्त** इति द्विधाऽप्यनर्थस्तेषामिति । अत एव सतामेष निश्चयः-यदाह—

"अकर्त्तव्यं न कर्त्तव्यं प्राणैः कण्ठगतैरपि ।
कर्त्तव्यमेव कर्त्तव्यं तदधीना हि सद्गतिः" ॥ [ ] इति ॥४४४॥ इदमेवाह—

**अवि इच्छंति य मरणं, न य परपीडं करिंति मणसा वि ।**
**जे सुविइयसुगइपहा, सोअरिअसुओ जहा सुलसो ॥४४५॥**

**अपि** सम्भाव्यते एतत् सन्त[2] **इच्छन्ति मरणं न च परपीडां कुर्वन्ति मनसाऽपि** आस्तां वाक्काया-

१. स एगो - P । २. सतां - A, B, C, D, K, H, L, P ।

भ्याम्। **ये सुविदितसुगतिपथाः** सुविज्ञातमोक्षाऽध्वानः । क इवेत्याह-**शौकरिकसुतः** कालशौकरिकसुतो **यथा सुलस** इति ॥४४५॥ तत्कथा चैवम्—

## [ सुलसकथानकम् ॥ ]

पुरे **राजगृहे** राजप्रकटः कटुचेष्टितः । कुटुम्बी कौटिक[1]ः क्रूरः **कालशौकरिको**ऽजनि ॥१॥
पञ्च पञ्चशतानि घ्नन् कासराननुवासरम् । नृपस्य **श्रेणिक**स्याऽपि व्यंरसीदाज्ञया न सः ॥२॥
श्वभ्राऽवशिष्टैः कष्टौघकल्लोलैः सर्वतोमुखैः । राशिस्तस्यैनसां वार्द्धिस्पर्द्धयेव व्यवर्द्धत ॥३॥
पापीयसो भवारम्भादभीरोरतिभैरवाः । अजायन्त रुजस्तस्य दुर्गतेरिव वर्णिकाः ॥४॥
हा रक्ष तात ! हा मातस्त्रातव्यं किमुपेक्षसे । पापीति रारटीति स्म स व्याधिविधुरीकृतः ॥५॥
तदा च ढौकितानाप्तैरिन्द्रियार्थान् शुभानपि । विपरीतानसौ मेने परावर्त्त[१] इवार्त्तिभिः ॥६॥
**सुलसो**ऽनलसोत्साहस्तस्य प्रतिचिकीः सुतः । कांस्कान्न हि चकाराऽसौ भिषजः फल्गुवल्गितान् ॥७॥
प्राणिनां परमाप्ताय पितुरार्त्त्याऽऽतुराशयः । गत्वा**ऽभयकुमारा**य तद्वृत्तं सुलसोऽवदत् ॥८॥
जगाद जगदग्र्योग्रशुद्धबुद्धि**रथाभयः** । इहैवास्याघकाकोलशालः संप्रसवो[२]ऽजनि ॥९॥
प्रतिकूलेन्द्रियार्थानामानुकूल्यविधायिनी । पितुस्ते नारकीयेयं दशा सम्प्रत्यढौकत ॥१०॥
विपरीतैर्भवेत् प्रीतिरिन्द्रियार्थैरमुष्य चेत् । तत्तथ्यं मान्य ! मन्येथा माऽन्यथा वचनं मम ॥११॥
विट्क्षाराभ्यां विलिप्तोऽथ कण्टकेषु च शायितः । भोजितः कटुतिक्तानि पशुमूत्राणि पायितः ॥१२॥
चर्च्चितो नरवर्चोभिर्वर्चोभिर्धूपितः शुनाम् । घरट्टोष्ट्रखरादीनां श्रावितश्च कटुस्वरान् ॥१३॥
कृतानि प्रेतवेतालरूपाणि च निरूपयन् । दिष्ट्याऽद्य जीवितोऽस्मीति सुतं **सुलस**मभ्यधात् ॥१४॥ विशेषकम् ॥
श्रुत्वेति **सुलस**श्चित्ते चिन्तयामासिवानिति । यस्येयं वर्णिकाऽत्रैव भविताऽमुत्र तस्य किम् ॥१५॥
तदा शौकरिको मृत्वा प्राप्तवान् सप्तमावनौ । प्रतिष्ठामतिभूयिष्ठा**मप्रतिष्ठान**धामगः ॥१६॥
समाप्य स्वजनास्तस्य सर्वां प्रेतक्रियामथ । तत्पुत्रं तत्पदं नेतुमित्यवोचन्त सादरम् ॥१७॥
हिंसनान्महिषासूनां सूना[2]मध्यासिते त्वयि । साम्प्रतं **सुलस** ! स्वामिन् ! गमिष्यामः सनाथताम् ॥१८॥
तानाह सुलसो नाऽहमसत्कर्म करोम्यदः । अगाधजलकल्लोले कः पतेद[३]म्बुधौ पुमान् ॥१९॥
स्वस्वादलौल्यतो घ्नन्ति ये तेऽपि पशवो नराः । ये तु निघ्नन्ति लाभाय ही पशुभ्योऽपि तेऽधमाः ॥२०॥
[४]शलाकयाऽपि दूयन्ते ये स्वयं तेऽपि मानवाः । जन्तून् हिंसन्ति ही[५] पापाश्चापाद्यैरिति कौतुकम् ॥२१॥
ददाति नरकं हिंसा प्रसङ्गपतिताऽपि या । सा येषां जीविका तेषां धिग् जीवितमजीवितम् ॥२२॥
[3]खलूक्त्वा खलु वा भूरि बिभेमि नरकादहम् । नरकप्रदया तन्मे हिंसया न प्रयोजनम् ॥२३॥

---

१. परावृत्त - A, B परावृर्त्त्यं - K, D । २. सप्रसभो - P सप्रभवो - H, A, D, B । ३. पतेदप्यसौ - A पतेदर्गतौ - H, K पतेदष्यतौ - B । ४. शिलाकया...P । ५. धिग् - D, धिक् - C ।

टि. 1. कौटिकः - मांसभक्षी । 2. सूना, शूना - वधस्थानम् । 3. उक्त्वा अलम् ।

[१]सर्वं सम्भूय भोक्तारः पापैर्वित्तमुपार्जितम् । एकेनैव विषोढव्या मया तु [२]नरकव्यथा ॥२४॥
अथोचुः स्वजनाः पापं सूनायां यद्भविष्यति । वित्तवत् तद्ग्रहीष्यामो विभज्यैव विभागिनः ॥२५॥
महो महोद्यमे[३]नाऽऽद्यमुहूर्त्ते हन्यतां त्वया । शेषान् हन्मो वयं तेन पापभागोऽस्तु तेऽल्पकः ॥२६॥
तेषामित्याग्रहादेत्य सूनायां **सुलसो**ऽलसः । दयार्द्रया दृशाऽपश्यन्महिषं महितं पुरः ॥२७॥
अरसः परशुं पित्र्यं कलयित्वा किल स्खलन् । निजघान निजां जङ्घां मूर्च्छन्नथ पपात च ॥२८॥
शनैः संज्ञां स चासाद्य जगाद स्खलदक्षरम् । कठोरेण कुठारस्य प्रहारेणार्दितोऽस्मि हा ॥२९॥
वेदनां मत्त आदत्त विभज्य मम बन्धवः! । अद्य सद्यः प्रपद्याऽपि लोकवत् किमुदासत ॥३०॥
पात पात रुजां लात किमुपेक्ष्ये तटस्थितैः । नरकार्त्तिषु [1]दायाद्यं प्रत्येतव्यं क्व तत्र वः ॥३१॥
प्रत्यूचुः **सुलसं** तेऽपि बाष्पाविलविलोचनाः । क्व शक्या वेदनाऽऽदातुं मुग्धवत् किं विमुह्यसि ॥३२॥
निर्व्याजं व्याजहाराऽथ **सुलसो** वेदनामिमाम् । यदा नादातुमीशिध्वे नरकार्त्तेः क्व तत्कथा ॥३३॥
कुटुम्बार्थमकृत्यानि कृत्वा यास्याम्यधः स्वयम् । बन्धवोऽर्थान् ग्रहीष्यन्ति भागेऽनर्थो ममाऽखिलः ॥३४॥
हिंसां किं साम्प्रतं कुर्यामहं विद्वानिदं फलम् । शुनी पुनीते स्कन्धाधिरोपिता पैतृकीति किम् ॥३५॥
तदाऽ**भयकुमारो**ऽपि तत्रागात्तस्य पीडया । प्रतिजागरणं कर्तुं **सुलसस्य** विवेकिनः ॥३६॥
तमाश्लिष्याऽभयो वाचमूचे धन्योऽसि साधु भोः । श्रुतं सर्वं भवद्वृत्तं वयं मोदामहे त्वया ॥३७॥
न स्तुते कस्तु ते वृत्तं त्वमेको मण्डनं भुवः । अपि काचकुलोत्पन्नो यस्त्वं मुक्ताफलायसे ॥३८॥
एवं धार्मिकवात्सल्यादनुमोद्याऽभये गते । **सुलसो**ऽभूद् दृढो धर्मे **सत्सङ्गाद्वर्द्धते हि धीः** ॥३९॥
स्वीकृत्य मृत्युमपि वर्जितजन्तुबाधः, कः **कालसौकरिक**सूनुरिव त्रिलोक्याम् ।
बन्धून् विधूय विबुधो जिनधर्मवेदी; नेदीयसीमकृत मुक्ति[४]वधूं य एषः ॥४०॥ [वसन्ततिलकावृत्तम्]

**इति सुलसकथानकम् ॥**

तदित्थं विवेकिविलसितमुक्त्वा अविवेकिजनाचरणमाह—

**मोलगकुदंडगादामगाणि, उच्चूलघंटियाओ य ।**
**[५]पिंडेइ अपरितंतो, चउप्पया नत्थि य पसू वि ॥४४६॥**

**मौलककुदण्डकौ दामकानि अवचूलं घण्टिकाश्चे**ति । तत्र मौलको—बन्धार्थं निखातः कीलकः । कुदण्डक—उभयतश्छिद्रप्रोतबन्धनं काष्ठम् । दामकं—पादबन्धनम् । अवचूलघण्टिके सुप्रतीते । **च**शब्दाच्चतुष्पदोचितानीतराण्येवंविधानि उपकरणानि **पिण्डयति अपरितृप्तो** मीलयति अविश्रान्तः तस्य परं सत्तायां **चतुष्पदाः पशुरपि** अजाऽपि **नास्ति** न विद्यत एव । आसतां गवाश्वादय इत्यपिशब्दार्थ इति दृष्टान्तः ॥४४६॥

---

१. सर्वे – C, L, B । २. नरके – C, L, H, B । ३. नाद्ये – C । ४. वधूर्यदेषः – P । ५. आपिंडेइ – P ।

टि. 1. दायादस्य भावः दायाद्यम्, तम् ।

दार्ष्टान्तिकमाह–

**तह वत्थपायदंडगउवगरणे, जयणकज्जमुज्जुत्तो ।**
**जस्सट्ठाए किलिस्सइ तं चिय मूढो न वि करेइ ॥४४७॥**

**तथा वस्त्र-पात्र-दण्डक**प्रभृतिके **उपकरणे उद्युक्तस्तत्पर:** सन् । **यस्य** यतनाकार्यस्य चारित्रस्य**र्थाय क्लिश्यति** शिरस्तुण्डमुण्डना[1]स्नाननैर्ग्रन्थ्यादिकं क्लेशमनुभवति । **तदेव** संयमविषयं **यतनाकार्यं मूढो नैव करोति** इत्यक्षरयोजना । तात्पर्यं तु यथा किल चतुष्पदविकलस्य मौलकाद्यन्वेषणं क्लेश एव, एवं संयम-यतनारहितस्योपकरणादर इति ॥४४७॥

एवं तर्हि त्रिभुवनाधिपतिभिरपि तीर्थकरैरुन्मार्गप्रवृत्ताः किमिति न निवारिताः ? इत्याह–

**अरहंता भगवंतो, अहियं व हियं व न वि इहं किंचि ।**
**वारेंति कारविंति य, घित्तूण जणं बला हत्थे ॥४४८॥**

महाप्रातिहार्यपूजामर्हन्तीत्य**र्हन्तो भगवन्तः** सकलैश्वर्यादिभाजः, **अहितं वा** हेयं **हितं वा** उपादेयं तदुभयमपि **नैव इह किमपि** एकमपि यथाक्रमं **वारयन्ति कारयन्ति** वा **गृहीत्वा जनं** लोकं **बलात्** हठात् **हस्ते** आक्रम्य राजान इवेति ॥४४८॥

किं तर्हि ते कुर्वन्तीत्याह–

**उवएसं पुण तं दिंति, जेण चरिएण कित्तिनिलयाणं ।**
**देवाण वि होंति पहू, किमंग पुण मणुयमित्ताणं ॥४४९॥**

**उपदेशं** तत्त्वाख्यानरूपं **पुनस्तं ददति । येन** उपदेशेन **चरितेना**नुष्ठितेन **कीर्त्तिनिलयानां** प्रशंसास्पदानां **देवानामपि भवन्ति प्रभवो** नाथा भगवदादिष्टानुष्ठातार इति गम्यते । **किमङ्गे**ति शिष्यामन्त्रणं किं **पुनर्मनुज-मात्राणां** ये देवानामपि प्रभवः स्युस्तेषां मनुष्यप्रभुतेति अत्यल्पमेतदित्यर्थः ॥४४९॥

तथाहि –

**वरमउडकिरीडधरो, चिंचइओ चवलकुंडलाहरणो ।**
**सक्को हिओवएसा, एरावणवाहणो जाओ ॥४५०॥**

वरमुकुटेष्वपि अत्युत्तमत्वात् किरीटं-प्रधानमस्तकालङ्कारं **धरतीति वरमुकुटकिरीटधरः । चिंचइउ** त्ति कटककेयूरादिभिर्मण्डितः, **चपलकुण्डलाभरणो** विलोलकर्णालङ्कारः । **शक्रो** हि **हितोपदेशात् जात** इति सम्बन्धः । किम्भूतः ? **ऐरावणवाहन** ऐरावणाख्यमहासिन्धुराधिरोहीति ॥४५०॥

तस्यैवैश्वर्यमाह –

**रयणुज्जलाइं जाइं, बत्तीसविमाणसयसहस्साइं ।**
**वज्जधरेण वराइं, हिओवएसेण लद्धाइं ॥४५१॥**

**रत्नोज्ज्वलानि** इन्द्रनीलमयानि **यानि द्वात्रिंशद्विमानशतसहस्राणि** लक्षा इत्यर्थः । **वज्रधरेण** शक्रेण

१. नाम्ना.... D, C, P, L, B, A ।

**वराणि** श्रेष्ठानि **हितोपदेशेन लब्धानी**ति । शक्रोपाख्यानं श्री**सनत्कुमारचरिते** पूर्वभवप्रस्तावे प्रतिपादितचर[1]मेव, वर्त्तमानशक्राख्यानमपि [१]तदनुसारसूचितं **कार्त्तिकश्रेष्ठिचरित** एव विज्ञातव्यम् ॥४५१॥

किञ्च —

**सुरवइसमं विभूइं, जं पत्तो भरहचक्कवट्टी वि ।**
**माणुसलोगस्स पहू, तं जाण हिओवएसेण ॥४५२॥**

**सुरपतिसमां** शक्रतुल्यां **विभूतिं** ऋद्धिं **यत्प्राप्तो भरतचक्रवर्त्त्यपि** श्रीऋ**षभ**जन्मा । **मानुषलोकस्य प्रभुः तज्जानीहि हितोपदेशेन** तस्यैव [२]तत्प्रापणसामर्थ्यादिति ॥४५२॥

उपदेशसामर्थ्यमुक्त्वा कृत्यमाह—

**लद्धूण तं सुइसुहं, जिणवयणुवएसममयबिन्दुसमं ।**
**अप्पहियं कायव्वं, अहिएसु मणं न दायव्वं ॥४५३॥**

**लब्ध्वा** प्राप्य **तं श्रुतिसुखं** कर्णसुखदं **जिनवचनोपदेशम् , अमृतबिन्दुसमं** स्तोकस्यापि तस्य भव्यचित्ताह्लादकत्वात् । **आत्महितम्** उपादेयतयोपदिष्टं **कर्त्तव्यम् । अहितेषु** हेयतयोपदिष्टेषु हिंसादिषु **मनो**ऽन्तःकरणं **न दातव्यं** वाक्काययोस्तु वार्त्तापि दूरापास्तैवेति ॥४५३॥ हिताहितकारिणोरेव गुरुलाघवमाह—

**हियमप्पणो करिंतो, कस्स न होइ गरुओ [३]गुरु य गण्णो ।**
**अहियं समायरंतो, कस्स न विप्पच्चओ होइ ॥४५४॥**

**हितमात्मनः कुर्वन् कस्य न भवति, गुरुको** महान् **गुरुः** प्रधानाचार्योऽत एव **गण्यः** सर्वार्थेषु प्रष्टव्यतया गणनीयः । व्यतिरेकमाह-**अहितं समाचरन् कस्य न विप्रत्ययः** अविश्वसनीयो **भवती**ति ॥४५४॥

हितानुष्ठायिनां रोचकमाह—

**जो नियमसीलतवसंजमेहिं, जुत्तो करेइ अप्पहियं ।**
**सो देवयं व पुज्जो, सीसे सिद्धत्थओ व्व जणे ॥४५५॥**

**य** [४]एव कश्चिन्**नियम-शील-तपः-संयमैः** पूर्वोक्तै**र्युक्तः करोत्यात्महित**मनुष्ठानं **स देवतेव पूज्यः** पूजनीयो भवति । तथा **शीर्षे** शिरसि कृतश्लोद्घात इति शेषः । क इवेत्याह **सिद्धार्थक इव** सर्षप इव मङ्गल्यप्रयोजनीभवतीति । अयमभिप्रायो-नेह पूज्यानामन्या ख्यातिरस्ति । गुणा एव हि [५]पूज्यत्वनिबन्धनम् । तेष्वेव तदर्थिना यत्नो विधेयः । उक्तं च—

"गता ये पूज्यत्वं प्रकृतिपुरुषा एव खलु ते, जना ! दोषत्यागे जनयत समुत्साहमतुलम् ।
न साधूनां क्षेत्रं न च भवति नैसर्गिकमिदम् ; गुणान् यो यो धत्ते स स भवति साधुर्भजत तान्" ॥१॥ [ शि०वृ० ]

तथा—

"यत्नाधीने गुणाधाने यत्ने चात्मनि संस्थिते ।
अन्योऽपि गुणिनां धुर्य इति जीवन् सहेत कः" ॥१॥ [ ] इति ॥४५५॥

---

१. तदनुसारिस्वचिंत्य - K, D । २. तत्प्रमाण....A । ३. गुरू गण्णो - A, H । ४. एवंविधैर्नि - KH एकस्मिन्नि - K, D । ५. पूज्यत्वे - KH । टि. 1. (भूतपूर्वे ष्चरट्) हेम० शब्दा० सूत्रेण चर (ष्चरट्) प्रत्ययो बोद्धव्यः ।

इदमेवाह—

**सव्वो गुणेहिं गण्णो, गुणाहियस्स जह लोगवीरस्स ।**
**संभंतमउडविडवो, सहस्सनयणो सययमेइ ॥४५६॥**

**सर्वः** कोऽपि **गुणैर्ज्ञानादिभिर्गण्यो** गुणिनां धुर्य इति दृष्टान्तमाह—**गुणाधिकस्य** सत्त्वाद्युत्कटस्य **यथा** यद्वत् **लोके** कर्मारिप्रेरकतया प्रसिद्धो **वीरो लोकवीरो** भगवांस्तस्य, **सम्भ्रान्तमुकुटविटपो** भक्त्यतिशयादाकुलितकिरीटपल्लवः **सहस्रनयनो** दशशताक्षः शक्रः **सततम् एति** आगच्छति वन्दितुमिति शेषः । सूत्रस्य त्रिकालगोचरतादर्शनार्थो वर्त्तमाननिर्देश इति ॥४५६॥ गुणहीनस्य व्यतिरेकमाह—

**चोरिक्कवंचणाकूडकवड-परदारदारुणमइस्स ।**
**तस्स च्चिय तं अहियं, पुणो वि वेरं जणो वहइ ॥४५७॥**

चौरिक्कं—चौर्यं स्तेयं, वञ्चना—कायिकी विप्रलम्भना, कूटं—वाचनिकं, कपटं—मनोगतं शाठ्यं, परदाराः—परकलत्रं तेषु दारुणा पापप्रवृत्ता मतिर्यस्य तस्य **चौर्यवञ्चनाकूटकपटपरदारदारुणमतेस्तस्यैव तत्**तथाविधमसच्चेष्टितम् **अहितम**पथ्यम् इह परत्र च । **पुनरपी**त्यधिकार्थवाची **वैरं** तस्योपरि क्रोधाध्यवसायं **जनो वहति** । पापिष्ठोऽद्रष्टव्यमुखोऽयमित्याद्याक्रोशदानात् । तदयं तस्य देवानांप्रियस्य गण्डोपरि पिटकोद्भेद इव संवृत्त इति ॥४५७॥

गुणस्थितानां दूरोत्सारिता एवैते दोषाः । तत्र सर्वदोषाधारस्याद्यदोषस्यैवाभावमाह—

**जइ ता तणकंचण-लेट्ठुरयणसरिसोवमो जणो जाओ ।**
**तइया नणु वोच्छिन्नो, अहिलासो दव्वहरणम्मि ॥४५८॥**

**यदि तावदि**त्यभ्युपगमे तृणकाञ्चनयोर्लोष्टरत्नयोः सदृशी एकाकारा उपमा यस्य स **तृणकाञ्चनलोष्टरत्नसदृशोपमश्चेज्जनो** विशिष्टः कश्चि**ज्जातः** सम्पन्नः । **तदा ननु व्युच्छिन्न**[1]स्त्रुटितो**ऽभिलाषो द्रव्यहरणे** परस्वाऽऽदाने कारणाभावादिति ॥४५८॥

तदिदमवेत्य सन्मार्गस्खलनादवधानेन निवर्त्तनीयम्, अन्यथा वचनीयमशक्यरक्ष्यमित्याह—

**आजीवगगणनेया, रज्जसिरिं पयहिऊण य जमाली ।**
**हियमप्पणो करेंतो, न य वयणिज्जे इह पडिंतो ॥४५९॥**

**आजीवन्ति** द्रव्यलिङ्गेन लोकमि**त्याजीवका** निह्नवास्तेषां **गणो** गच्छस्तस्य **नेता** नायको गुरुरित्यर्थः । **राज्यश्रियं प्रहाय** त्यक्त्वा प्रव्रज्यां प्रपद्य चशब्दादागममधीत्य **च जमाली** भगवज्जामाता यदीत्यध्याहारात् **हितमात्मनोऽकरिष्यत्** । ततो **न च** नैव **वचनीये** क्रियमाणं कृतमिति भगवदागमाश्रद्धानो निह्नवोऽयमिति निन्द्यपदवाच्यत्वे **इह** जने प्रवचने वा **अपतिष्य**दित्यर्थः ॥४५९॥ अत्र कथानकम्—

## [ जमालिकथानकम् ॥ ]

[1]**क्षत्रियोपपदे कुण्डग्राम**नामनि पत्तने । **जमाली**ति कुमारोऽभून्महाक्षत्रियगोत्रभूः ॥१॥

---

१. व्युच्छिष्ट - P ।

टि. 1. क्षत्रियकुण्डग्रामे इत्यर्थः ।

स्वप्रसादावतंसस्थो रूपकाणि निरूपयन् । ललनाभिर्ले[१]ललँल्लेभे स [1]दोगुन्दकदेवताम् ॥२॥
श्रीवर्द्धमानमानन्तुं जनं यान्तमथैकदा । ज्ञात्वा कञ्चुकितः सोऽपि स्नात्वा तत्र रथी ययौ ॥३॥
आरादथो रथोत्सङ्गादुत्तीर्याऽद्भुतभक्तितः । राज्यचिह्नानि संत्यज्य प्राविशद् देशनासदः ॥४॥
विधिवत् त्रिः परीयाथ नाथमानम्य देशनाम् । पपावपारमाधुर्यां चकोर इव चन्द्रिकाम् ॥५॥
व्रतमादातुकामोऽथ धामोत्थाय गतो निजम् । आपृच्छत् पितरौ [२]स्वैरवैराग्यनिरवग्रहः ॥६॥
अकामावपि तौ काममनुमान्य महाग्रहः । उत्सृज्य प्राज्यराज्यश्रीः प्राव्राजीद्भर्तुरन्तिके ॥७॥
राजकन्याभिरन्याभिः सपत्नीभिश्च सान्विता । भर्तुः पुत्र्यपि तत्पत्नी प्राव्रजत्प्रियदर्शना ॥८॥
शतानि पञ्च राजन्यपुत्राः सुत्रामऋद्धिना । प्रवव्रजु[३]र्नुव्रज्याव्रतास्तेऽपि जमालिना ॥९॥
अधीतैकादशाङ्गोऽथ तपस्यन् दुस्तपं तपः । तेनैव [४]परिवारेण विजिहीर्षुरसावभूत् ॥१०॥
नत्वाऽनुज्ञापयन्नाथं तथैव द्विस्त्रिरप्यसौ । अप्राप्तोत्तर एवेशं वन्दित्वा व्यहरत्ततः ॥११॥
श्रावस्त्यां स गतोऽन्येद्युरुद्याने कोष्ठके स्थितः । तीव्रपित्तज्वराक्रान्तः श्रमणानार्त्तितोऽब्रवीत् ॥१२॥
स्रस्तरस्तरसा मह्यं सद्यः संस्त्रियतामहो । तेनेति द्विस्त्रिरप्युक्ता ऊचुः संस्तृत इत्यमी ॥१३॥
दृष्ट्वा संस्त्रियमाणं तैः [५]स तं संस्तृतवादिभिः । भेजे मोहज्वरात्तत्त्वेष्वचिकित्स्यमरोचकम् ॥१४॥
शङ्काद्यङ्कुरितस्वान्तदुर्विमर्शो जगाद सः । क्रियमाणं कृतं मिथ्या किमित्याह महागुरुः ॥१५॥
[६]क्रियाया निष्ठया साकं विरोधेन व्यवस्थितेः । क्रियमाणं कृतं चेति प्रत्यक्षेण विरुध्यते ॥१६॥
स्थविरास्तत्र येऽभूवन्नूचुस्तेऽथ जमालिनम् । मूढस्य कोऽधिकारस्ते गुरोस्तर्कयितुं गिरम् ॥१७॥
आरम्भात् प्रागभावेन कृतत्वं माऽस्तु सर्वथा । प्रारम्भस्य क्षणे त्वाद्ये कृतत्वं को निषेधति ॥१८॥
कृताकृतसमाविष्टं क्रियमाणमिति श्रुतम् । तत्क्रिया-निष्ठयोः कोऽपि विरोधो नोपपद्यते ॥१९॥
क्रियाऽवान्तरभेदानामतिभूयस्त्वसम्भवात् । तत्तन्निष्ठाकृतं तत्र कृतत्वं केन बाध्यते ॥२०॥
स्थविरैरसकृत्प्रोक्तो यावन्नाऽबोधि सोऽधमः । आलोच्य तावदत्याजि जिनोऽभाजि मुदाऽथ तैः ॥२१॥
रोगातङ्काद्विमुक्तोऽथ जमालिरपि [७]दुष्टधीः । चम्पायां पूर्णभद्राख्ये चैत्ये प्राप्तो जिनान्तिके ॥२२॥
धृष्टस्तत्राह वः शिष्या बहवश्छद्मिनो मृताः । जिनोऽहं केवली किन्तु जीवन्मुक्तोऽस्मि [८]पश्यताम् ॥२३॥
अथ प्रथमशिष्येण श्रीवीरस्येन्द्रभूतिना । पृष्टो लोकश्च जीवश्च शाश्वतोऽशाश्वतोऽथ किम् ॥२४॥
निर्भग्नप्रतिभं भुग्नकन्धरं च जमालिनम् । [2]जगदर्यो जगादेनमनुकम्पासुधाम्बुधिः ॥२५॥
आसीदस्ति च लोकोऽयं भवितेति च शाश्वतः । अशाश्वतः पुनः कालविवर्त्तपरिवर्त्तनात् ॥२६॥

---

१. र्लल्न् लेभे - B, P, C । २. स्वैरं - P, B । ३. र्नुव्रज्याद्दता - C, L, र्नुव्रज्याहूता - B, H, A र्नुव्रज्यावृता - K, D । ४. परिहारेण - P । ५. संतं - A, B । ६. क्रियया - P । ७. धृष्टधीः H, A, B, दृष्टधीः K, C, KH, L । ८. पश्य मां - L, C, B, H, पश्य गां - K, D ।

टि. 1. त्रायस्त्रिंशनाम्ना देवजातिविशेषः । 2. जगत्पूज्यः ।

जीवोऽप्येवमयं नित्यो जीवत्वस्याऽविपर्ययात् । पर्यायाणां परावर्त्तैरनित्यः प्रतिभासते ॥२७॥
अश्रद्दधानो मिथ्याभिनिवेशात्तीर्थकृद्वचः । अपक्रम्य ततोऽन्यत्र व्यहरत्कर्मणो वशात् ॥२८॥
स्वमि[१]वान्यानसद्भूतोद्भावनाभिः स भावयन् । **श्रावस्त्या**मगमद्भूयस्तस्थौ चैत्ये च **कोष्ठके** ॥२९॥
पुरि तत्रैव **ढङ्का**ख्यकुलालस्य किलालये । स्वीकृत्योपाश्रयं शुद्धमवात्सीत् **प्रियदर्शना** ॥३०॥
**कोष्ठके** वन्दितुं सूरिं सा गत्वा तां प्ररूपणाम् । श्रुत्वाऽमन्यत तस्यैव मोहेन **प्रियदर्शना** ॥३१॥
प्रत्यायाता पुनः शय्यातरप्र[1]त्तमुपाश्रयम् । स्वयं प्ररूपयामास व्रतिनीनां पुरस्तथा ॥३२॥
उपासीनः कुलालोऽपि श्रुत्वा शासनतत्त्ववित् । एकान्तभक्तः श्री**वीर**पादानामित्यचिन्तयत् ॥३३॥
अहो मोहनटस्याऽस्य नाटकेषु प्रगल्भता । यतो विप्रतिपन्नेयमपि सेति न लक्ष्यते ॥३४॥
वाक्यं **जमालि**नस्तथ्यं मिथ्या केवलिनः प्रभोः । रसनेत्थं ब्रुवाणानां कणशः किं न शी[२]र्यते ॥३५॥
स्वाध्यायपौरुषीं तस्यां कुर्वाणायामथान्यदा । स्वयमुद्वर्त्तयामास भाण्डान्यापाकशीर्षतः ॥३६॥
लाघवेन तथा चाग्नेरुच्चिक्षेप कणांस्तथा । तस्याः सङ्घाटिका दाहाद् द्वित्रिच्छिद्रा यथाऽजनि ॥३७॥
तं कुलालमथोवाच श्रावकं **प्रियदर्शना** । धर्मशील ! कुतो दग्धा सङ्घाटिरखिलाऽपि मे ॥३८॥
ऊचे **ढङ्को**ऽथ निःशङ्कोऽपसिद्धान्तः किमुच्यते । दह्यमानं हि वो दग्धं नैवाभ्युपगतं मते ॥३९॥
क्रियमाणं कृतं ब्रूतामङ्गीकृतजिनागमः । दग्धा सङ्घाटिकेत्येवं वाक्यं [2]वस्तु न वस्तुसत् ॥४०॥
संबुद्धेति गिरा तस्य प्रोवाच प्रियदर्शना । त्वामेवोपासकं मन्ये स[३]म्यञ्चमनुशासकम् ॥४१॥
ममाऽस्तु दुष्कृतं मिथ्या मिथ्यात्वाऽवटतस्त्वया । युक्त्या पवित्रया ह्येवमुद्धृताऽस्मि [3]वरत्रया ॥४२॥
पटाञ्चलार्पितेनाऽपि त्वया दहनकर्मणा । अहो मोहमयो ग्रन्थिर्मम मूलादभिद्यत ॥४३॥
सा [4]चैत्य **कोष्ठकं** चैत्यमथोवाच **जमालि**नम् । त्यज मोहं महाभाग ! कुरु भागवतं वचः ॥४४॥
पतेदहर्पतेर्बिम्बं द्युपतेः कम्पते गिरिः । गिरो जगद्गुरोरेताः परं विपरियन्ति न ॥४५॥
क्रियमाणं कृतं मूढ ! कथं न मनुषे [४]मुधा । त्वमेवानुभवं भक्त्या [5]पृच्छात्र छात्रवद् गुरुम् ॥४६॥
आद्यया क्रियया किञ्चिन्न कृतं चेत्तथान्त्यया । क्रियात्वान्न कृतं तर्हि कृतमप्यत्र नो कृतम् ॥४७॥
एवमारब्धमात्रस्य कृतत्वमुपपद्यते । असद्ग्रहं ततस्त्यक्त्वा सतां स्वीकुरु पद्धतिम् ॥४८॥
बहुशो बोधितोऽप्येवं प्रत्यपद्यत नैष तत् । सा चाऽन्यसाधुसाध्वीभिः सार्द्धं श्री**वीर**मभ्यगात् ॥४९॥
पुष्कलं कालमेकाकी निह्नवः प्रथमोऽथ सः । **जमाली** निरतिचारचारित्रस्तपसाऽनयत् ॥५०॥
निह्नुतेरप्रतिक्रान्तः प्रान्ते पक्षमुपोषितः । षष्ठे त्रयोदशाब्ध्यायुस्त्रिदशस्त्रिदिवेऽभवत् ॥५१॥
प्रत्यनीकतया धर्माचार्यादीनां तु तत्र सः । किल्बिषी किल्बिषेष्वेव देवत्व[५]मुपलब्धवान् ॥५२॥

---

१. वान्यासमुद्भ...P । २. कीर्यते – P । ३. म्यं तमनु...P । ४. सुधा – C । ५. त्वमपि – B, C, A, K, D, KH, L, H ।

टि. 1. दत्तं इत्यर्थः । 2. वः युष्माकं तु इति वाच्यम् । 3. युक्तिरेव वरत्रा-रज्जुः, तया । 4. च एत्य – आगत्य । 5. पृच्छ अत्र – 'प्रच्छ्' धातुः, पञ्चमी द्वि० पु० एकवचनरूपः ।

तिर्यङ्मनुष्यदेवेषु भ्रान्त्वा स कतिचिद्भवान् । भूत्वा **महाविदेहेषु** दूरान्निर्वृतिमेष्यति ॥५३॥
महामुनिसमाम्नातमतीत्य प्रतिभादृशाम् । आत्मनो पश्यतां मार्गं श्वभ्रपातो न दुर्लभः ॥५४॥
**गुर्वाज्ञा निर्मलं ज्ञानं गुर्वाज्ञा शुचि दर्शनम् । गुर्वाज्ञा चारु चारित्रं गुर्वाज्ञा दुस्तपं तपः** ॥५५॥
गुरूपदेशप्रतिकूलवृत्त्या **जमालि**मालिन्यमिहेत्यवेत्य ।
महोदयार्थाधिगमे प्रमाणं श्रयन्तु सन्तो मुनिमूलसङ्घम् ॥५६॥ [उपजातिवृत्तम्]

**इति जमालिकथानकम् ॥**

किञ्च—

**इंदियकसायगारवमएहिं, सययं किलिट्ठपरिणामो ।**
**कम्मघणमहाजालं, अणुसमयं बंधई जीवो ॥४६०॥**

**इन्द्रियकषायगौरवमदैः सततं क्लिष्टपरिणामः** कलुषाध्यवसायः सन् **कर्माण्येव** ज्ञानावरणीयादीनि जीवचन्द्रतिरोधायकत्वात् **घना** मेघास्तेषां **महाजालं** बृहद्वृन्दम् **अनुसमयं** क्षणे क्षणे **बध्नाति** स्वप्रदेशैः श्लेषयति **जीवः** केवलं; न पुनरिह कश्चित्परमार्थो अवसानविरसतया वैषयिकसुखस्य तत्त्वतो दुःख-रूपत्वादिति ॥४६०॥

सुखभ्रान्त्या पुनस्ते अरतिविनोदम् एवं कुर्वन्तीत्याह—

**परपरिवायविसाला, अणेगकंदप्पविसयभोगेहिं ।**
**संसारत्था जीवा, अरइविणोयं करिंतेवं ॥४६१॥**

**परपरिवादविशाला** जनावर्णवादप्रगल्भा, अनेन द्वेषं लक्षयति । **अनेककन्दर्पविषयभोगै**र्बहुविध-परिहासशब्दाद्यनुभवैः करणभूतैरेतेन रागं सूचयति । **संसारस्थाः** सकर्मका **जीवाः** प्राणिनो**ऽरतिविनोदं** परितापप्रेरणं **कुर्वन्त्येवं** मोहात्, अशक्यं च कर्तुमयम् । इन्द्रियाणां हि कौशलं विषयाभ्यासमनुविवर्द्धते रागश्च । यदुक्तम्—

"**उपभोगोपायपरो वाञ्छति यः शमयितुं विषयतृषाम् ।**
**धावत्याक्रमितुमसौ पुरोऽपराह्णे निजच्छायाम्**" ॥१॥ [ ] ४६१॥

कियद्वा एतन्मोहोपहतानाम् ? एते हि विपर्यस्तधियः अपुण्यमाचरन्तीत्याह—

**आरंभपायनिरया, लोइयरिसिणो तहा कुलिंगी य ।**
**दुहओ चुक्का नवरं, जीवंति दरिद्दजियलोयं ॥४६२॥**

आरम्भः—स्नानादौ जन्तूपमर्दः । पाको —धान्यादीनां चरुका[1]दिनिर्वृत्तः, तयोर्निरता आसक्तास्ते **आरम्भ-पाकनिरता लौकिकऋषयो** निश्छद्माध्यवसायास्तापसादयः । **कुलिङ्गिनश्च** शाठ्यवृत्तयो भौतादयः । ते **उभयतो भ्रष्टा नवरं** केवलं देवानांप्रियाः । **ते** हि न गृहस्थास्तद्विरुद्धवेषत्वान्नापि यतयो हिंसादिप्रवृत्तत्वात् । ततश्च **जीवन्ति** प्राणान् धारयन्ति । **दरिद्रा**स्तत्कष्टस्यायासमात्रफलत्वात्तथाविधधर्मधनाऽभावतो निःस्वा **जीवलोके** संसारे इति ॥४६२॥

---

टि. 1. चरुकः भाजनविशेषः तदादिनि निर्वृत्तः ।

जैनर्षीणाम् अखण्डं सामायिकमेव व्रतेष्वपि तत्त्वमिति अहिंसाव्रतं मुखेकृत्वा उपदिशति—

**सव्वो न हिंसियव्वो, जह महिपालो तहा उदयपालो ।**
**न य अभयदाणवइणा, जणोवमाणेण होअव्वं ॥४६३॥**

**सर्वो** जन्तुर्न **हिंसितव्यो यथा महीपालो** राजा **तथा उदकपालो** रङ्क उभावप्यरक्तद्विष्टेन समावेव द्रष्टव्यावित्यर्थः । **न च** नैव **अभयदानपतिना** तद्दायकत्वात्तत्स्वामिना । **अभयदानव्रतिना** अहिंसकत्वेन अभयं मया दातव्यमिति दीक्षाभ्युपगमवता । **जनोपमानेन** अन्यलोकतुल्येन **भवितव्य**मिति ॥४६३॥

तदेवान्यजनविलसितमाह—

**पाविज्जइ इह वसणं, जणेण तं छगलओ असत्तो त्ति ।**
**न य कोइ सोणियबलिं, करेइ वग्घेण देवाणं ॥४६४॥**

**प्राप्यते** नीयते **इह** जगति **व्यसनं** हिंसनरूपं **जनेन** लोकेन **तत्** तथाविधविपाकं **छगलकः** पशुर**शक्तो**ऽसमर्थः प्रतिप्रहारादिकं कर्तुमित्यनेन हेतुना । अत्र[1] व्यतिरेकदृष्टान्तद्वारेण युक्तिमाह-**न च** नैव **कोपि शोणितबलिं करोति व्याघ्रेण** करणभूतेन **देवानां** क्षेत्रपाल-कालिकाप्रभृतीनां तस्याप्रधृष्यत्वेनाऽनर्थ-[2]हेतुत्वात् । एवं जनोपमानेन न भवितव्यमिति गाथाद्वयार्थ इति ॥४६४॥

अत एव इहलोकनिरपेक्षतया विवेकिभिः स्वायुषोऽनित्यत्वमेव भावनीयमित्याह—

**वच्चइ खणेण जीवो, पित्तानिलधाउसिंभखोभेहिं ।**
**उज्जमह मा विसीयह, तरतमजोगो इमो दुलहो ॥४६५॥**

**व्रजति** निर्याति **क्षणेन** स्वल्पकालेन **जीवः पित्तानिलयोर्धात्वोः श्लेष्मणश्च क्षोभैः** प्रकोपैः करणभूतैरायुषश्च्यवते इत्यर्थः । **उद्यच्छत मा विषीदत** संयमानुष्ठानेन मा श्लथीभवत । यत**स्तरतमयोग** उत्तरोत्तरधर्मकारणसामग्रीसद्भावः । **अयं** वक्ष्यमाणो **दुर्लभो**ऽत्यन्तदुरापस्ततस्तत्प्राप्तौ न युक्तः प्रमादः कर्तुमिति ॥४६५॥

तथा चाह—

**पंचिंदियत्तणं माणुसत्तणं, आरिए जणे सुकुलं ।**
**साहुसमागम सुणणा, सद्दहणाऽरोग पव्वज्जा ॥४६६॥**

**पञ्चेन्द्रियत्वं** सम्पूर्णं चक्षुरादिमत्त्वम् । **मानुषत्वं** मनुष्यजन्म **आर्ये** मगधादौ **जने** जनपदे **सुकुलं** धर्मयोग्यमुग्रादिकम् । **साधुसमागमः** सुगुरूपास्तिः । **श्रवणं** धर्म्मशास्त्राकर्णनम् । **श्रद्धानं** तत्त्वार्थाधिगमः । **आरोग्यं** रोगाभावः शीलाङ्गोद्वहनसहत्वमित्यर्थः । **प्रव्रज्या** विवेकात् सर्वसङ्गत्यागेन भागवती दीक्षा इति अयं सर्वोऽपि तरतमयोगो दुर्लभ इति पूर्वगाथया[3] सम्बन्ध इति ॥४६६॥

एवमुपदिष्टेऽपि यः साम्प्रतेक्षितत्वाद् दुर्मतिर्धर्मं न कुर्यात्, स पश्चात् शोचतीत्याह—

---

१. अत्र दृष्टांतद्वारेण – C, P, L अत्र व्यतिरेकदृष्टान्तेन – H, KH अत्र व्यतिरेकमाह तेन युक्तिमाह – B, A । २. तस्य प्रधृ...A, H तस्याप्यधृष्य – P । ३. गाथाया – C, A, B ।

**आउं संविल्लंतो, सिढिलंतो बंधणाइं सव्वाइं ।**
**देहट्ठिइं च मुयंतो, झायइ कलुणं बहुं जीवो ॥४६७॥**

**आयुः** प्राणितं **संवेल्लयन्** सन्निहितोपक्रमहेतुभिर्लघूकुर्वन् । **शिथिलयन्** श्लथीकुर्वन् **बन्धनानि** अङ्गोपाङ्गानां **सर्वाणि देहस्थितिं च** कायावस्थानं चशब्दात् पुत्रमित्रकलत्रसर्वस्वादिकं **मुञ्चन् ध्यायति करुणं** विवेकिजनशोचनीयं **बह्वने**काकारं **जीवो** यदुताहो ! किं मया मन्दभाग्येनाक्षेप[1]मोक्षप्रापिणि प्राप्ते सर्वज्ञशासने विषयलवलम्पटतया निरन्तराऽसारसंसारकारणं दुराचरणमाचेष्टितं साम्प्रतं लोकान्तरावसरे कस्य सुचरितस्य मे बलमिति ॥४६७॥ तथाहि–

**एक्कं पि नत्थि जं सुट्ठु सुचरियं जह इमं बलं मज्झ ।**
**को नाम दढक्कारो, मरणंते मंदपुन्नस्स ॥४६८॥**

**एकमपि नास्ति** किं तदित्याह–**यत् सुष्ठु**[१]**चरितं यथेदं बलं** सद्गतिसामर्थ्यं **ममेति** यस्य तस्य **को नाम** न कश्चित् सम्भाव्यते **दृढीकारो** द्रढिमावष्टम्भ इति भावः । **मरणान्ते** मृत्युरूपाऽवसाने **मन्दपुण्यस्य** निर्भाग्यस्य सामग्रीहारणात् । तदुक्तम्–

"एवमेव गओ जम्मो असारसंसारकारणरयाणं ।
परमत्थकारणं कारणाण न हु सिक्खियं किं पि" ॥१॥ [ ]

तथा–

"लोहाय नावं जलधौ भिनत्ति सूत्राय वैडूर्यमणिं दृणाति ।
सच्चन्दनं प्लोषति भस्मनेऽसौ यो मानुषत्वं नयतीन्द्रियार्थे" ॥ [ उपजातिवृत्तम् ] ॥४६८॥

आकस्मिकमरणकारणान्यपीमानि चिन्त्यानीत्याह–

**सूल-विस-अहि-विसूइय-पाणिय-सत्थ-ऽग्गिसंभमेहिं च ।**
**देहंतरसंकमणं, करेइ जीवो मुहुत्तेण ॥४६९॥**

**शूल-विषाहि-विसूचिका-पानीय-शस्त्राग्नि-सम्भ्रमैश्च** तत्र शूलादीनि प्रतीतानि । सम्भ्रमा-आकस्मिकासम्भावनीयभयादिश्रवणभूम(म)नःक्षोभास्तैर्हेतुभूतै**र्देहान्तरसङ्क्रमं** पूर्वकायत्यागेनाऽन्यकाय-स्वीकारं **करोति जीवो मुहूर्त्ते**नाऽल्पकालेनेति ॥४६९॥

एवं च सति सुचरितानुष्ठातुः शोकावसर एव नास्तीत्याह–

**कत्तो चिंता सुचरियतवस्स गुणसुट्ठियस्स साहुस्स ? ।**
**सुग्गइगमपडिहत्थो, जो अच्छइ नियमभरियभरो ॥४७०॥**

**कुतश्चिन्ता** ? न कुतोऽपि **सुचरिततपसः** स्वभ्यस्तानशनादे**र्गुणसुस्थितस्य** संयमवतः **साधो**र्मोक्ष-साधकस्य विशिष्टावष्टम्भसम्भवादिति भावः । **सुगतिगमपरिहत्थो** देश्यत्वात् स्वर्गापवर्गगमनदक्षो **य आस्ते** तिष्ठति **नियमै**रनेकाकाराऽभिग्रहै**र्भृतः** पूरितो जीवशकटाभिधेयो **भरो** येन स तथाभूत इति ॥४७०॥

---

१. शुद्ध – C ।

टि. 1. अक्षेपेन – शीघ्रं मोक्षप्रापी तस्मिन् इत्यर्थः ।

एतच्च केचिदुपदिशन्तोऽपि गुरुकर्मकत्वान्न कुर्वन्तीत्याह—

**साहंति य फुडवियडं, मा-साहससउणसरिसया जीवा ।**
**न य कम्मभारगरुयत्तणेण, तं आयरंति तहा ॥४७१॥**

**साधयन्ति चा**परेभ्यः कथयन्त्येव **स्फुटविकटं** स्पष्टविस्तरं **मासाहसशकुनसदृशका जीवाः । न च** नैव **कर्मभारगुरुकत्वेन** हेतुना **तत्** स्वयं कथित**माचरन्ति तथा** यथा कथयन्तीति भावः ॥४७१॥

संविधानकमाह—

**वग्घमुहंमि अइगओ, मंसं दंतंतराउ कड्ढइ य ।**
**मा-साहसं ति जंपइ, करेइ न य तं जहाभणियं ॥४७२॥**

**व्याघ्रमुखेऽतिगतः** अन्तःप्रविष्टो **मांसं दन्तान्तराद्** दशनविचालात् **कर्षति च** चञ्च्वग्रेण गृह्णाति **च**शब्दात् स्वादति[1] च **मा साहसमिति जल्पति न करोति च तद्यथा** स्वयं **भणितमिति** ।

"पान्थेन केनाप्यटता वनान्तरा-दाकर्ण्य मासाहसवाक् शकुन्तः ।
व्याघ्राननाग्रात् पिशितांशकर्षी निरीक्ष्य चाभाणि सविस्मयेन ॥१॥
व्याघ्रस्य दन्तक्रकचान्तरालं प्रविश्य भोः खादसि मांसपेशीः ।
मा साहसं चेति गिरो ब्रवीषि रे मुग्ध ! वाचां न सदृक्करोषि" ॥२॥ [ ]

एवमन्येऽपि येऽन्यथावादिनोऽन्यथाकारिणश्च ते तत्तुल्या द्रष्टव्या इति ॥४७२॥

अथ यथोक्तकारिणामाचारमनुवादद्वारेणोपदिशति—

**परियट्टिऊण गंथत्थवित्थरं, निहसिऊण परमत्थं ।**
**तह तं करेइ जह तं, न होइ सव्वं पि नडपढियं ॥४७३॥**

**परिवर्त्त्या**ऽनेकपरिपाटिभिरभ्यस्य **ग्रन्थः** सूत्रम् **अर्थो** व्याख्यानं तयो**र्विस्तरं** प्रपञ्चम् , अभ्यासश्च घोषणिकामात्रेण शुकवदपि स्यादित्याह - **निघृष्य** कनकमिव कषपट्टके **परमार्थं** तत्सारं निश्चित्येत्यर्थः । **तथा** यथोक्तप्रकारेण **तं** सूत्रार्थविस्तरं **करो**त्यासेवते **यथा तन्न भवति सर्वमपि नटपठितं** तद्धि नर्त्तकाधीतं बहिर्जनरञ्जनमात्रप्रयोजनं कृत्रिमम् । स्वरसप्रसरसमुत्थमात्मरञ्जनप्रयोजनं तु सुविहिताचरणमित्यनयोर्दूर-मन्तरमिति ॥४७३॥

नटपाठं व्याचष्टे —

**पढइ नडो वेरग्गं, निव्विज्जिज्जा बहूओ जणो जेण ।**
**पढिऊण तं तह सढो, जालेण जलं समोयरइ ॥४७४॥**

**पठति** व्यक्तया वाचा **नटः** शैलूषो **वैराग्यं** कारणे कार्योपचारात्तज्जनकं श्लोकगाथादिकं गृह्यते । **निर्विद्येत** भवान्निर्वेदं गच्छेद्[2] **बहुः** प्रभूतो **जनो येन**, स पुनः पश्चा**त्पठित्वा तद्** वैराग्यजनकं श्लोकादि । **तथा** तदभिनयादिप्रकारेण **शठो** मायावी **जालेन** करणेन **जलं समवतरति** मत्स्यादिजिघृक्षयेति दुरापास्त एव नटपठितदृष्टान्तो यथोक्ताचरणसेविनां सुसाधूनामिति ॥४७४॥

---

१. स्वादते - A, C । २. गच्छेत - P ।

सुविहिताचरणार्थमुपायमाह—

**कह कह करेमि कह मा करेमि कह कह कयं बहुकयं मे ।**
**जो हिययसंपसारं, करेइ सो अइकरेइ हियं ॥४७५॥**

विवेकिना अनुक्षणमिति पर्यालोच्यं-यदुत **कथं कथं करोमि** हितमनुष्ठानम् । पर्यालोचस्यादरातिशयख्यापनार्थं सम्भ्रमे द्विर्वचनम् । **कथं मा करोमि** अकृत्यं, कथं मा कार्षं परिहरामीति **कथं** वा **कृतं बह्विति** बहुगुणं **कृतमनुष्ठानं मे** ममेत्यवहितस्य गुणमाह-**यो** विद्वान् **हृदयसंप्रसारं** चित्तसावधानतां **करोति सः अतिकरोति** अतीव सम्पादयति **हितमात्मपथ्यमिति** ॥४७५॥ अस्यादरोपदेशस्य निदानमाह—

**सिढिलो अणायरकओ, अवसवसकओ तहा कयावकओ ।**
**सययं पमत्तसीलस्स, संजमो केरिसो हुज्जा ? ॥४७६॥**

**सततं** निरन्तरं प्रमदनं[1] **प्रमत्तं** प्रमादो विषयाद्यभिलाषस्त**च्छीलस्य** तत्र स्वरसप्रवृत्तस्य **संयमः कीदृशो भवेत्** ? न कीदृशोऽपीति भावः । संयम एव पूर्वार्द्धेन विशिष्यते-**शिथिलः** कर्त्तव्य एवेत्यनियन्त्रितः । **अनादरकृतो**ऽयत्नानुष्ठितः, यत्नसेवितोऽपि वा **अवशो** गुर्वाद्यधीनता, **तद्वशेन** गुर्वादि प्रति भयेन **कृतो** नात्मश्रद्धयाऽनुष्ठितः । यत्नेन धर्मश्रद्धया च क्रियमाणोऽप्यप्रेक्षापूर्वकारितयाऽन्तरान्तराऽकृत्यान्तरसान्तरायः[2] स्यादित्याह — **तथा कृतापकृतः** क्वचित् सम्पूर्णानुष्ठानात्कृतश्चासौ अपकृतश्च क्वचित् सर्वथा विराधनादिति गाथार्थः ॥४७६॥ प्रमादशीलस्य भूयोहानिमाह—

**चंदो व्व कालपक्खे, परिहाइ पए पए पमायपरो ।**
**तह उग्घरविग्घरनिरंगणो य न य इच्छियं लहइ ॥४७७॥**

**चन्द्र इव कालपक्षे** कृष्णार्द्धमासे **परिहीयते** परिक्षयं याति । गुणापेक्षया **पदे पदे प्रमादपरः** सन् साधुरिति गम्यते, अभ्युच्चयमाह —**तथा उद्गृहविगृहनिरङ्गनश्च न च** नैव **इष्टं लभते** इति । तत्र उद्गतं प्राबल्येन नष्टं गृहं गार्हस्थ्यपर्यायोचितं यस्य स उद्गृहः, विगृहः—प्रव्रज्यापर्याये विशिष्टवसत्यभावात् । निरङ्गनोऽङ्गनारहितस्तेषां कर्मधारयः । तदयमर्थः क्लिष्टाध्यवसायवशाद्विषयान् वाञ्छन्नसौ केवलं प्रतिक्षणं कर्म चिनोति न पुनरिष्टमाप्नोति तत्साधनानां[3] गृहगृहिणीप्रभृतीनामभावादिति ॥४७७॥

यच्चासाविहैवानुभवति तदाह—

**भीउव्विग्गनिलुक्को, पागडपच्छन्नदोससयकारी ।**
**अप्पच्चयं जणंतो, जणस्स धी जीवियं जियइ ॥४७८॥**

**भीतः** सदोषतया शङ्कितः । **उद्विग्नः** कः किं मां भणिष्यतीत्युत्त्रस्तः । **निलुक्को** त्ति सङ्घपुरुषादिभयेन गोपितात्मा । किमित्येवम्भूतो ? यतः प्रकटप्रच्छन्नानि जनेन विदिताविदितानि दोषशतानि कर्तुं शीलमस्येति **प्रकटप्रच्छन्नदोषशतकारी** । अत एव **अप्रत्ययं** धर्मविषयमविश्वासं **जनयन् जनस्य** लोको हि तमेवंविधमेकमसमीक्षितकारिणं समीक्ष्य सर्वे एव एते एवंविधा एवेत्युत्प्रेक्षते । सोपस्कारत्वाच्च सूत्रस्य अत्र

---

१. प्रमदं - D, B । २. सान्तरः KH । ३. तत्साधूनां - C ।

यत्तदोरध्याहारस्तेन स तथा अप्रत्ययं जनयन् य**ज्जीवति** त**ज्जीवितं** प्राणधारणं तस्य **धिग्** निन्दनीयमित्यर्थः ॥ यदुक्तम्—

**''वरं प्रवेष्टुं ज्वलितं हुताशनं, न चापि लुप्तं चिरसञ्चितं व्रतम् ।**
**वरं हि मृत्युः सुविशुद्धकर्मणो न चापि शीलस्खलितस्य जीवितम्''** ॥१॥ [ ] इति ॥४७८॥

यस्तु द्राघीयांसं कालं व्रतधारणमेवेष्टसिद्धये मनसि दृढयति, न निरतिचाराचारचतुरताम् , तं प्रत्याह—

**न तहिं दिवसा पक्खा, मासा वरिसा व संगणिज्जंति ।**
**जे मूलउत्तरगुणा, अक्खलिया ते गणिज्जंति ॥४७९॥**

**न तस्मिन्** धर्मैक[१]साधने साध्येऽर्थे, **दिवसाः पक्षा मासा वर्षाणि वा संगण्यन्ते** सङ्कल्यन्ते । किं तर्हि ? **ये मूलोत्तरगुणा अस्खलिता** निरतिचारास्**ते गण्यन्ते** इष्टार्थप्रापकत्वस्य तेष्वेवावसितत्वात् इति ॥४७९॥ इत्थं चिरदीक्षितत्वमप्रमाणीकृत्य निरतिचारत्वं स्थापयन् तत्साधनमप्रमादितामुपदिशति—

**जो न वि दिणे दिणे, संकलेइ के अज्ज अज्जिया मि गुणा ? ।**
**अगुणेसु य न य खलिओ, कह सो उ करेज्ज अप्पहियं ? ॥४८०॥**

**यो नापि दिने दिने** अपिशब्दात् प्रतिरात्रं च, **सङ्कलयति** बुद्ध्या सम्यग् निरूपयति । यदुत–**केऽद्यार्ज्जिता मया गुणा** ज्ञानादयोऽगुणेष्वति तृतीयार्थे सप्तमी तेन **अगुणै**र्मिथ्यात्वादिभि**र्न च** नैव **स्खलितो**ऽतिचारं प्राप्त इति च न सङ्कलयति । **कथं स कुर्यादात्महितं** स्वपथ्यं शुद्धवासनाशून्यत्वादिति ॥४८०॥ तदिदं मूलतःप्रभृति सदनुष्ठानमुपदिष्टमपि यः कश्चित् मूलतो न प्रतिपद्यते तस्य स्वरूपं दुश्चिकित्स्यमित्याह—

**इय गणियं इय तुलियं, इअ बहुहा दरिसियं नियमियं च ।**
**जइ तहवि न पडिबुज्झइ, किं कीरउ ? नूण भवियव्वं ॥४८१॥**

**इत्युक्तेन** प्रकारेण **गणितं** परिसङ्ख्यातं '[1]संवच्छरमुसभजिणो' इत्यादिना सदनुष्ठानमिति सर्वत्राभिसम्बन्धः । **तुलितं** आकलितम् '[2]उवसग्गसहस्सेहि वि' इत्यादिना '[3]थेवेण वि सप्पुरिसा' इत्यादिना च । **इति बहुधा** अनेकप्रकारं **दर्शितम् आर्यमहागिरि**दृष्टान्तादिना । **नियमितं च** नियन्त्रितं **च**शब्दात् '[4]समिईककसायगारव' इत्यादिना अन्वयेन । '[5]बायालमेसणाओ न रक्खई' इत्यादिना च व्यतिरेकेण इत्थमुभाभ्याम् अन्वयव्यतिरेकाभ्यां नियन्त्रितं निश्चित्य [२]दृढीकृतमिति यावत् । इयताप्यादरेणोपदिष्टे **यदि तथापि न प्रतिबुद्ध्यते** गुरुकर्मा जीवो न बोधमाप्नोति । ततः **किं क्रियताम्** अधिकतरमन्यत् । **नूनं** निश्चितं **भवितव्य**मवश्यं[३]तया नान्यथा कर्तुं शक्यमित्यर्थः ॥४८१॥

भवतु तावदेतत् गुरुकर्मा भवितव्यतानिरुद्धो मूलत एव न बुध्यते इति । यः पुनर्बुद्ध्वा प्रतिपद्य संयमं भूयः शिथिलीभूय पुनरुपदेशेनाऽपि बोध्यमानो दुर्बोधः स्यात्, तं सोपहासं वितर्कयति—

१. साधन - C । २. दृढीकरणमिति - A । ३. भूयान्नान्य....C ।

टि. 1. गाथा - ३ । 2. गाथा - ३१ । 3. गाथा - २८ । 4. गाथा - २९५ । 5. गाथा - ३५४ ।

**किमगं तु पुणो जेणं, संजमसेढी सिढिलीकया होइ ।**
**सो तं चिय पडिवज्जइ, दुक्खं पच्छा हु उज्जमइ ॥४८२॥**

अत्रेदमोऽध्याहारात् इदं तु **किम् अकं 'अकं** दुःखाऽघयो'रिति पाठात् , किं पापं प्राक्तनगाथोक्तादपि अशक्यतममित्यर्थः । **पुनः** पूर्वं प्रतिबुद्ध्य संयमं स्वीकृत्य भूयो **येन** जीवेन **संयमश्रेणि**र्गुणपद्धतिः **शिथिलीकृता भवति । स** जीव**स्तामेव** संयमश्रेणिं **प्रतिपद्यते**[1] **।** हुर्निश्चये । ततो निश्चितमसंशयं **दुःखं**[2] कष्टतरं श्रद्धातुमप्यशक्यं स्वीकृत्य पुनः शिथिलीकृत्य च **तत्पश्चाद्** भूयस्तस्यैव स्वीकाराय **उद्यच्छति** उद्यमं करोति महामोहवृद्धेरत्यन्तासम्भाव्यमेवैतदित्यर्थः ॥४८२॥

लघुकर्माणस्तु यदुपदिश्यते तदाचरन्तीति तान् प्रति उपदेशोपनिषदमाह—

**जइ सव्वं उवलद्धं, जइ अप्पा भाविओ उवसमेणं ।**
**कायं वायं च मणं च उप्पहेणं जह न देइ ॥४८३॥**

**यदि सर्वम्** अनन्तरोक्तं वक्ष्यमाणं च सिद्धान्ताभिहितं च **उपलब्धं** सम्यगवगतं भवद्भिः । **यद्यात्मा**ऽन्तःकरणरूपो **भावितो** वासित **उपशमेन** रागादिजयेन, एतेन सम्यगुपलम्भकार्यं दर्शितम् । ततो हे विवेकिनः ! पूर्वदोषक्षपणार्थं भाविदोषरक्षणार्थं च **कायं वाचं च**स्य व्यवहितसम्बन्धा**न्मनश्च उत्पथेन** उन्मार्गेण **यथा न दद्ध्वं** यथोत्पथप्रवृत्ता योगा न स्युस्तथा वर्त्तितव्यमिति शेष इत्यर्थः । एतेन योगत्रयनिरोध एव आगमार्थानुष्ठानं संयम इत्युक्तं भवति । तथा चोक्तम्—**"मनोवाक्कायनियमनं तप"** [ ] इति ॥४८३॥

तत्र कायमधिकृत्याह—

**हत्थे पाए न खिवे, कायं चालिज्ज तं पि कज्जेण ।**
**कुम्मो व्व सए अंगम्मि अंगोवंगाइ गोविज्जा ॥४८४॥**

**हस्तौ पादौ न क्षिपेत्** निष्प्रयोजनं न प्रेरयेत् । **कायं** देहं **चालयेत् तदपि** न यथाकथञ्चित् ? किं तर्हि-**कार्येण** ज्ञानादिप्रयोजनेन । तथा **कूर्म इव** कच्छप इव **स्वकीयेऽङ्गे** शरीरे **अङ्गोपाङ्गानि** अत्र पदादीनामुक्तार्थत्वात् पारिशेष्यन्यायेन पञ्चाऽपि इन्द्रियाणि **गोपयेत्** लीनानि कुर्यादिति तत्त्वार्थः । व्यासार्थस्तु **कूर्मज्ञाताद**वसेयम् ॥४८४॥ तथाहि—

## [ कूर्मकथानकम् ॥ ]

**श्रीपार्श्वो**त्पत्तिपूतायां **वाराणस्यां** पुरा पुरि । उपगङ्गमभून्नाम्ना **मृतगङ्गातटो** ह्रदः ॥१॥
तस्माददूरसीमान्ते मालुकाकच्छकोऽभवत् । तत्राभूतां पलाहारौ द्वौ घोरौ घोरवाशिनौ[1] ॥२॥
तपनेऽस्तमितेऽन्येद्युर्नदासन्नतटीचरौ । वृत्तयेऽभिचरत् कूर्मद्वितयं तावपश्यताम् ॥३॥
कमठौ तौ शठौ दृष्ट्वा व्यथितावथ तावपि । पञ्चाङ्गगुप्त इत्याख्यां सत्यतां निन्यतुर्निजाम् ॥४॥

---

१. प्रतिपद्यत एव अवधारणार्थस्य एवशब्दस्यात्र संबन्धात् श्रयते एव, दुःखं तु अत्यंतकष्टतरं तु पश्चादुद्यच्छति K, D । २. दुःखं त एव अवधारणार्थस्य एव...शेषं K, D सदृशः पाठः - KH ।

टि. 1. घोरवाशिन् (पु०) - फेरुः, भूरिमायः, सृगालः, शिवा, घोरवासी जम्बुकः एकार्थिकानि ।

कूर्मौ वर्मितपञ्चाङ्गौ फेरुभ्यां[1] सर्वतोऽपि तौ । नखदन्तघनाघातैर्न स्प्रष्टुमपि पारितौ ॥५॥
भूरिमायाविमौ[1] श्रान्तौ भूरिमायाविनौ शनैः । पापिनौ प्रत्यवष्वष्क्य निलीनौ तस्थतुः स्थिरौ ॥६॥
तौ चिराद्दूरगौ ज्ञात्वा कूर्म एको जडाशयः । पादं बहिर्निचिक्षेप जम्बुकाभ्यां[1] व्यलोपि सः ॥७॥
ततो भूयोप्यपक्रम्य तौ निलीय स्थितौ पदम् । दृष्ट्वान्यमपि निष्कृष्टं निकृष्टौ निचकर्त्ततुः ॥८॥
क्रमेणैकस्य कूर्मस्य क्रमग्रीवाङ्गपञ्चकम् । लुप्त्वा[१] कपालमप्येवं ताभ्यां विघटितं हठात् ॥९॥
फेरवौ स्फुरितौ कूर्मं परितः परमप्यथ । निहन्तुं गुप्तपञ्चाङ्गं पारयामासतुर्न तौ ॥१०॥
मायाऽऽयासैरसाध्यं[२] तमन्विष्यान्विष्य जम्बुकौ । यथाऽऽयातौ तथा यातौ श्रान्तौ मिथ्योद्यमश्लथौ ॥११॥
चिराद्दूरं गतौ ज्ञात्वा ग्रीवां निष्कृष्य दत्तदृग् । तावदृष्ट्वा समं कूर्मश्चकृषेंऽह्रिचतुष्टयम् ॥१२॥
स तयोत्कृष्टया कूर्मः कूर्मगत्याऽतिवेगया । व्यतिव्रजन्नदं भेजे **मृतगङ्गातटं** शिवम् ॥१३॥
स तत्र च निजैर्ज्ञातिजनसम्बन्धिबन्धुभिः । सहानन्दामृतस्यान्तः[३] सपीतिप्रीतिमासदत्[४][2] ॥१४॥
**कूर्मज्ञाताद**गुप्तोऽक्षपञ्चाङ्ग्यामिति वध्यते । तत्र गुप्तस्तु निर्ग्रन्थो लभते शिवसम्पदम् ॥१५॥

**इति कूर्मकथानकम् ॥**

अथ वाचमधिकृत्याह—

**विकहं विणोयभासं, अंतरभासं अवक्कभासं च ।**
**जं जस्स अणिट्ठमपुच्छिओ य भासं न भासिज्जा ॥४८५॥**

विरूपा कथा **विकथा** स्त्र्यादिसम्बन्धिनी ताम् । विनोदनिमित्तं कालनयनाय ज्ञानाद्यर्थरहिता भाषा **विनोदभाषा ताम्** । अन्तरे गुरूणां भाषमाणानां विवरे भाषा **अन्तरभाषा** । अवाक्येन अवचनीयेन असभ्येन भाषा **अवाक्यभाषा** । **यां काञ्चिद्यस्य** कस्यचित् **अनिष्टां** अप्रियाम् **अपृष्टश्च च**शब्दात् अनपेक्षितश्च केनचित् वाचाटतया **भाषां न भाषेते**ति ॥४८५॥

अथ मनोऽधिकृत्याह—

**अणवट्ठिइं मणो, जस्स झायइ बहुयाइं अट्टमट्टाइं ।**
**तं चिंतियं च न लहइ, संचिणइ य पावकम्माइं ॥४८६॥**

**अनवस्थितम्** अवस्थितिरहितमतिचञ्चलं **यस्य मनश्चि**त्तं तथा **ध्यायति** चिन्तयति **बहूनि** नानाविधानि **अट्टमट्टानी**ति पापसम्बद्धानि अर्दवितर्दानि । **तच्चिन्तितं चासौ** यथाभिप्रेतं **न लभते** न प्राप्नोति । **सञ्चिनोति च** अनुक्षणं बध्नाति च **पापकर्माणि** नरकादियोग्यान्यसातादीनि । अतः स्थिरं शुद्धं मनो विधेयम् ।

यदुक्तम्—**''वने रतिर्विरक्तस्य रक्तस्य तु जने रतिः । अनवस्थितचित्तस्य न वने न जने रतिः''** ॥१॥ [ ]

१. लुब्धा - A । २. माययासैरसाध्यं - C, L नायायासै...H मायायासौरसा...-D, K माययासौरसाध्यं - KH । ३. महान...D, K । ४. सोपीति - KH ।

टि. 1. घोरवाशिन् (पु०) - फेरुः, भूरिमायः, सृगालः, शिवा, घोरवासी जम्बुकः एकार्थिकानि । 2. सपीतिः (स्त्री०) - सह-एकत्र पीतिः-पानम् ।

यथा—"यदि यत्रैव तत्रैव यथैव च तथैव च ।

रतिं रे चित्त ! बध्नासि नाऽसि दुःखस्य भाजनम्" ॥१॥ [ ] इति ॥४८६॥

गुरुकर्मा तु विपरीतचारी स्यादित्याह—

**जह जह सव्वुवलद्धं, जह जह सुचिरं तवोवणे [१]वुच्छं ।**
**तह तह कम्मभरगुरू, संजमनिब्बाहिरो जाओ ॥४८७॥**

**यथा यथा** ज्ञानावरणादिक्षयोपशमादिना **सर्वम्** आगमरहस्य**मुपलब्धम्** , **यथा यथा सुचिरं** प्रभूतकालं **तपोवने** साधुमध्येऽध्युषितं तेन स्थितम् । **तथा तथा कर्मभरगुरु**र्मिथ्यात्वादिकर्मभाराक्रान्तः **संयमनिर्बाह्य** आगमोक्तविपरीतचारी **जातः** सम्पन्न इति ॥४८७॥ तदेतस्य उचितमित्याह—

**विज्जप्पो जह जह, ओसहाइं [२]पिज्जेइ वायहरणाइं ।**
**तह तह से अहिययरं, वाएणाऊरियं पोट्टं ॥४८८॥**

**वैद्येषु** आयुर्वेदाचार्येषु **आप्तो**ऽविप्रतारकः, स **यथा यथा औषधानि** [1]व्योषादीनि **पाययति** अनात्मनीनमातुरमिति गम्यम् । **वातहरणानि** वायुशमनानि । **तथा तथा से** तस्य **अधिकतरं** प्रागवस्थायाः समर्गलं **वातेनापूरितं** वायुनाक्रान्तं **पोट्टं** जठरमिति । एवं भगवति गुरौ भाववैद्ये कर्मवातहराणि सिद्धान्तौषधानि अनेकधा पाययत्यपि गुरुकर्मरोगिणां देहिनां चित्तोदरं गाढतरं सङ्क्लिष्टाध्यवसायवायुना पूर्यते इत्युपनयः ॥४८८॥ ये च जानन्तोऽपि जिनवचनं प्रमादिनस्ते न गुरुवैद्यचिकित्सायाः साध्याः स्युरित्यत्र दृष्टान्तमाह—

**दड्ढजउमकज्जकरं, भिन्नं संखं न होइ पुण करणं ।**
**लोहं च तंबविद्धं, न एइ परिकम्मणं किंचि ॥४८९॥**

**दग्धजतु** भस्मीभूतलाक्षाविकाररूप**मकार्यकरं** न प्रयोजनकारि भवति । **भिन्नो** दलितः **शङ्खो** जलजो **न भवति** । **पुनः[३]करणः** पुनः कर्तुं न शक्यते इत्यर्थः । अत्र प्राकृतत्वाल्लिङ्गस्य अप्राधान्यमिति । **लोहमश्मसारं ताम्रविद्धं** [४]शुल्वमिश्रं **नैति** नायाति **परिकर्म** पुनःकरणरूपं **किञ्चित्** । [५][2]घण्टान्तानि हि लोहानीति ख्यातेरिति ॥४८९॥ यथा चैतदेवं तथा प्रव्रजिता अपि प्रमादिन इत्याह—

**को दाही उवएसं, चरणालसयाण दुव्वियड्ढाण ? ।**
**इंदस्स देवलोगो, न कहिज्जइ जाणमाणस्स ॥४९०॥**

**को दास्यत्युपदेशं** न कश्चित्, **चरणालसकानां** प्रमद्वराणां **दुर्विदग्धानां** विपर्यस्तशास्त्रपल्लवग्राहेण सालम्बनानाम् । तेषां दुरभिमाने दृष्टान्तमाह – **इन्द्रस्य देवलोको न कथ्यते जानानस्ये**ति तद्गुणज्ञत्वात् तस्य पुरस्तदुपवर्णयितुरुपहास एव । एवं तेऽपि 'वयमेव किल जानीम' इति स्थिता उपदेष्टारमुपहसन्तीति परमार्थतस्तु ते बाला एव । प्रबलमोहनिद्राविद्राणचित्ततया न किञ्चिज्जानन्ति उत्पथप्रवृत्तेरज्ञानचिह्नत्वादिति ॥४९०॥

---

१. वुत्थं - C, L, H । २. पाज्जह - K, D पउंज्जेइ - C, L । ३. करणपुनः - C, L, K, D करणकर्तुं - KH । ४. शुभ्रमिश्रं - A, H । ५. घट्टत्तानि - C, L ।

टि. 1. व्योषं – त्रिकटु – त्रीणि कटूनि शुण्ठीमरिचपिप्पल्याख्यानि समाहृतानि त्रिकटु तदेव व्योषं – औषधिविशेषः । 2. घण्टा इव शब्दोऽस्य घण्टाशब्दं–कांस्यं तदेव लोहस्यान्तिमो विकारः, न ततः परिकर्म कर्तुं शक्यम् , इत्यर्थः ।

उत्पथत्वमेवास्य प्रथयति—

**दो चेव जिणवरेहिं, जाइजरामरणविप्पमुक्केहिं ।**
**लोगम्मि पहा भणिया, सुस्समण-सुस्सावगो वा वि ॥४९१॥**

**द्वावेव जिनवरैर्जातिजरामरणविप्रमुक्तैर्लोके पन्थानौ भणितौ** । यदुत-**सुश्रमणः** स्यादित्येकः पन्थाः । **सुश्रावको वा** भवेदिति द्वितीयः । **अपि**शब्दसंसूचितः संविग्नपाक्षिकमार्गोऽपि तृतीय इति ज्ञेयम् । केवलमयं तयोरेवान्तर्भवति । सन्मार्गोपबृंहकत्वेन तस्याऽपि तदविरोधादिति ॥४९१॥

एतावेव मार्गौ भावद्रव्यार्चनशब्दाभिधेयतया उपदिशति—

**भावच्चणमुग्गविहारिया य दव्वच्चणं तु जिणपूया ।**
**भावच्चणाउ भट्ठो, हविज्ज दव्वच्चणुज्जुत्तो ॥४९२॥**

**भावार्च्चनं** भगवतां पारमार्थिकं पूजनम् **उग्रविहारिता च** चस्य अवधारणार्थत्वात् उद्यतविहारितैव । **द्रव्यार्च्चनं तु** तुशब्दो भावार्च्चनापेक्षया गौणत्वसाधकः । तत् किम् ? **जिनपूजा** माल्यादिभिर्भगवदर्च्चना । तत्र **भावार्च्चनाद् भ्रष्टः** सर्वसङ्गत्यागं कर्तुमशक्तो **भवेद् द्रव्यार्चनोद्युक्त**स्तत्परः पुण्यानुबन्धिपुण्यैक-निबन्धनतया तस्याऽपि भावार्चनामूलबीजभूतत्वादिति ॥४९२॥

एवं चेद् वस्तुतः किं तर्हि प्रस्तुतमित्याह—

**जो पुण निरच्चणो च्चिय, सरीरसुहकज्जमित्ततल्लिच्छो ।**
**तस्स न य बोहिलाभो, न सोगई नेव परलोगो ॥४९३॥**

अर्चनविधिद्वैधेनाभिहितमार्गद्वैविध्यलिङ्गमन्वयेन यत्प्ररूपितं तद्व्यतिरेके-**यः पुनर्निरर्चन एव** उभय-मार्गलिङ्गद्रव्यभावार्चनाद्वयशून्य एव, चरणकरणजिनपूजनोभयवैकल्यात् । शरीरसुखकार्यमेव तदन्यापोहेन शरीरसुखकार्यमात्रं तस्मिन् लिप्सा लम्पटता यस्य स **शरीरसुखकार्यमात्रतल्लिप्सः** । अत्र सप्तमीतत्पुरुषेण गतार्थस्याऽपि तच्छब्दस्य प्रयोगात् तत्र गाढं प्रतिबन्धं लक्षयति । **तस्यै**वंविधस्य **न च** नैव **बोधिलाभः** प्रेत्ये जिनधर्मावाप्तिः । **न सुगति**र्मोक्षाख्या **नैव परलोकः** सुदेवत्वाद्याप्तिरूप इति ॥४९३॥

अत्र द्रव्यार्चनभावार्चनयोरेवान्तरमाह—

**कंचणमणिसोवाणं, थंभसहस्सोसियं सुवण्णतलं ।**
**जो कारिज्ज जिणहरं, तओ वि तवसंजमो अहिओ ॥४९४॥**

**काञ्चनं** स्वर्णं, **मणय**स्चन्द्रकान्ताद्यास्तत्प्रधानानि **सोपानानि** यत्र तत् । तथा **स्तम्भसहस्रोच्छ्रितं** एतेन विस्तार उक्तः सुवर्णप्रधानं तलं यस्य तत् **सुवर्णतलम्** । एवंविधं **यः कारयेज्जिनगृहम्, ततोऽपि** आस्ता-मन्यदीदृग्विधभगवद्भवनविधानादपि तपःप्रधानः संयमः **तपःसंयमोऽधिकः** उत्कृष्टस्तत एव शिवावाप्तेरिति ॥४९४॥ तस्माद्भावार्चनमङ्गीकृत्य तत्र प्रमादो न विधेयः तथा हि महानपायः स्यादत्राऽर्थे लौकिकं दृष्टान्तं गाथाद्वयेनाह—

**निब्बीए दुब्भिक्खे, रन्ना दीवंतराउ अन्नाओ ।**
**आणेऊणं बीयं इह दिन्नं कासवजणस्स ॥४९५॥**

**केहिवि सव्वं खइयं, पइन्नमन्नेहिं सव्वमद्धं च ।**
**वुत्तोग्गयं च केई, खित्ते खोट्टेंति संतट्ठा ॥४९६॥**

**निर्बीजे दुर्भिक्षे** सति यत्र वपनार्थमपि बीजं धान्यं नास्ति । तस्मिन् दुष्काले केनचित् **राज्ञा** पृथ्वीपतिना **द्वीपान्तरादन्यस्मात्** कुतोऽप्यानीय **बीजमिह** प्रस्तुतदेशे, **दत्तं कर्षकजनस्य** भूरिधान्योत्पत्त्यर्थं वापनाय वितीर्णं कृषीबललोकस्येति, तच्च **कैश्चित् सर्वं खादितं, प्रकीर्ण**मुप्त**मन्यैरर्द्ध**मर्द्धं तु खादितमित्यर्थः । **सर्वं चान्यैः प्रकीर्णं** निष्पत्तिं च नीतमिति गम्यते । **उप्तोद्गतं** च प्रकीर्णप्ररूढं **केचित् क्षेत्रे खुट्टंति** कुट्टयन्ति राज्ञश्चौर्येण विमर्द्य स्वगृहे नेतुकामा विविच्य पृथक् कुर्वन्ति । **स्वान्तार्थाय** स्वस्यात्मनोऽन्तो विनाशस्तदर्थाय । ते ह्येवमाज्ञाभङ्गेनाऽन्यायकारिणो राज्ञा अवश्यं विनाश्यन्ते इति ॥ ४९५॥ ४९६॥

दृष्टान्तमुक्त्वा गाथात्रयेण दार्ष्टान्तिकमाह–

**राया जिणवरचंदो, निब्बीयं धम्मविरहिओ कालो ।**
**खित्ताइं कम्मभूमी, कासववग्गो य चत्तारि ॥४९७॥**

**अस्संजएहिं सव्वं खइयं अद्धं च देसविरएहिं ।**
**साहूहिं धम्मबीयं, वुत्तं नीयं च निप्फत्तिं ॥४९८॥**

**जे ते सव्वं लहिउं, पच्छा खुट्टंति दुब्बलधिइया[1] ।**
**तवसंजमपरितंता, इह ते ओहरियसीलभरा ॥४९९॥**

अत्र **राजा जिनवरचन्द्रो** भगवान् । **निर्बीजं धर्मविरहितः कालो** दुःषमैव । **क्षेत्राणि कर्मभूमयः । कर्षकवर्गश्चत्वारो** यथाक्रमम् असंयत-देशविरत-सुसाधु-पार्श्वस्थाख्या इति । तेषां जिनराजेन धर्मबीजं केवलालोकद्वीपादानीय शिवधान्यसिद्धये समर्प्पितम् । तच्च **तत्रासंयतै**र्धर्मबीजं विरत्याख्यं **सर्वं खादितं** तेषां तद्रहितत्वात् । **अर्द्धं च देशविरतैः** खादितं तदर्द्धस्यैव तेषु दर्शनात् । **साधुभिर्द्धर्मबीजं उप्तम्** आत्मक्षेत्रे निहितं **नीतं** च **निष्पत्तिं** सम्यक्पालनेन इति । **य एते सर्वं लब्ध्वा** धर्मबीजं **पश्चात् कुट्टयन्ति** । स्वक्षेत्रे वर्त्तमानं विमर्दयन्ति । भगवदनादिष्टाश्चौरकर्षका इव **दुर्बलधृतयो**[2]ऽदृढमनःप्रणिधानाः[3] **तपःसंयमयोः परितान्ताः** श्रान्ता **इह** प्रवचने **ते अपभृतशीलभराः** पार्श्वतस्त्यक्तव्रतव्राताः पार्श्वस्था इति यावत् ॥४९७॥४९८॥४९९॥

इत्थं दार्ष्टान्तिकघटनां कृत्वा उपदेशसर्वस्वमाह–

**आणं सव्वजिणाणं, भंजइ दुविहं पहं अइक्कंतो ।**
**आणं च अइक्कंतो, भमइ जरामरणदुग्गम्मि ॥५००॥**

**आज्ञां सर्वजिनानां भनक्ति** आमर्दयति **द्विविधं** साधुश्रावकसम्बन्धिनं **पन्थानं** मार्गम् **अतिक्रान्त** उल्लङ्घ्य स्थितः । **आज्ञां चातिक्रान्तो भ्रमति जरामरणदुर्गे** पर्यटति अनन्तसंसारे इति ॥५००॥

---

१. द्धीया - D, K, KH, B । २. दुर्बलाधियो - B, KH, D, दुर्बलहृतयो - C, L । ३. प्रतिमानाः A ।

भग्नव्रतपरिणामस्य विधेयमुपदिशति—

**जइ न तरसि धारेउं, मूलगुणभरं सउत्तरगुणं तु ।**
**मुत्तूण तो तिभूमी सुसावगत्तं वरतरागं ॥५०१॥**

**यदि न तरसि** न शक्नोषि **धारयितुं** स्वात्मस्थितं **मूलगुणभरम्** अहिंसादिव्रतव्रातं **सोत्तरगुणं** तुरवधारणे तेन पिण्डविशुद्ध्याद्युत्तरगुणसहितमेव, **मुक्त्वा ततस्**तिसृणां भूमीनां समाहार**स्त्रिभूमि**, तत् । **सुश्रावकत्वं** सम्पूर्णगृहस्थधर्मपालनं **वरतरम**तिप्रधानमिति । भूमीत्रयं च जन्म-संवर्द्धन-दीक्षासम्बन्ध्येव ज्ञातव्यमिति ॥५०१॥ [ग्रन्थाग्रम्-३५००,आदितो ग्रन्था०-११८५९ ॥]

इदमेव दृढयति—

**अरहंतचेइयाणं, सुसाहु पूयारओ दढायारो ।**
**सुस्सावगो वरतरं, न साहुवेसेण चुअधम्मो ॥५०२॥**

**अर्हच्चैत्यानां** भगवद्बिम्बानां विभक्तिलोपात् **सुसाधूनां** च **पूजारतो** यथासम्भवं स्नानविलेपन-कुसुमप्रभृतिभिः चन्दनकर्पूरवस्त्रादिभिश्च तदर्चनोद्युक्तः । **दृढो** निष्प्रकम्प **आचारः** सम्यक्त्वाणुव्रतादि-पालनात्मको यस्य स **दृढाचारः**। एवंविधः **सुश्रावको वरतरं** श्रेयस्तरः । **न साधुवेषेण** रजोहरणादिना विद्यमानेनापि **च्युतधर्मो** भ्रष्टाचारः शासनलाघवहेतुत्वादिति ॥५०२॥ अन्यच्च—

**सव्वं ति भाणिऊणं, विरई खलु जस्स सव्विया नत्थि ।**
**सो सव्वविरइवाई, चुक्कइ देसं च सव्वं च ॥५०३॥**

**सर्व**मित्युपलक्षणत्वाद्यः 'सर्वं सावद्यं योगं प्रत्याख्यामि यावज्जीवतया[१] त्रिविधं त्रिविधेने'त्येवं **भणित्वा** उक्त्वा **विरति**र्निवृत्ति**र्यस्य सर्विका** सर्वा **नास्त्येव खलु**शब्दस्य व्यस्तसम्बन्धस्य अवधारणार्थत्वात् । **स सर्वविरतिवादी भ्रश्यति देशं** च **सर्वं चे**ति । पञ्चम्यर्थे द्वितीया । तेन सर्वविरतेर्देशविरतेश्च भ्रश्यति प्रतिज्ञाता-करणादिति ॥५०३॥

न केवलं विरत्युभयभ्रष्ट एवाऽयं यावता मिथ्यादृष्टिरपि स्यादित्याह—

**जो जहवायं न कुणइ, मिच्छद्दिट्ठी तओ हु को अन्नो ? ।**
**वड्ढेइ य मिच्छत्तं, परस्स संकं जणेमाणो ॥५०४॥**

**यो यथावादं न करोति** यथोक्तं नानुतिष्ठति **मिथ्यादृष्टि**र्विपर्यस्तदर्शन**स्ततः** सकाशात् । **हुः** सम्भावनायां **कोऽन्यः** सम्भाव्यते ? स हि मूर्द्धाभिषिक्तो मिथ्यादृष्टिरिति । **वर्द्धयति च मिथ्यात्वं परस्य शङ्कां** सर्वज्ञागमगोचरं संशयं **जनयन्** परे हि तं वीक्ष्य 'किमयमेवंविध एव एतेषां धर्मः,' 'अमी हि अन्यथा-वादिनोऽन्यथाकारिण' इति च विमृश्यन्तीति ॥५०४॥ किञ्च—

**आणाइ च्चिय चरणं, तब्भंगे जाण किं न भग्गं ति ? ।**
**आणं च अइक्कंतो, कस्साएसा कुणइ सेसं ? ॥५०५॥**

**आज्ञयैव** भगवदादेशेनैव **चरणं** चारित्रं स्यात् इति शेषः । **तद्भङ्गे** आज्ञालोपे **जानीहि** बुद्ध्यस्व **किं न**

---

१. यावज्जीवाय – C ।

**भग्नमिति** । सर्वं च रत्नत्रयमपि भग्नमेवेत्यर्थः । **आज्ञां चातिक्रान्त** उल्लङ्घितवान् **कस्यादेशात् करोति शेषम्** ? तद्भङ्गेऽन्यस्यानुष्ठानस्य विडम्बनारूपत्वादिति भावः ॥५०५॥ किञ्च–

**संसारो य अणंतो, भट्ठचरित्तस्स लिंगजीविस्स ।**
**पंचमहव्वयतुंगो, पागारो भिल्लिओ जेण ॥५०६॥**

**संसारश्च अनन्तो भ्रष्टचारित्रस्य** विलुप्तचरणस्य । अत एव लिङ्गेन व्यवसायेनैव जीवनशीलिनो **लिङ्गजीविनः** आन्तरं चरणपरिणाममुपदर्श्य तल्लिङ्गकार्यमाह-**पञ्चमहाव्रततुङ्गः** पञ्चभिर्महाव्रतैः प्राणातिपात-विरमणादिभिस्तुङ्गोऽनाकलनीयः प्राकारो जीवनगर[१]रक्षाक्षमः संवररूपो **भिल्लिओ** त्ति विलुप्तो **येन** अभाग्यभाजेति ॥५०६॥ अथास्य साहसिकत्वमपि लक्षयति–

**न करेमि त्ति भणित्ता, तं चेव निसेवए पुणो पावं ।**
**पच्चक्खमुसावाई, मायानियडीपसंगो य ॥५०७॥**

**न करोमीति भणित्वा तं** [२] **चे( चै )व** स्वयं निषिद्धं **निषेवते** समाचरति **पुनः पापं** यः स **प्रत्यक्ष-मृषावादी** साक्षादलीकवावदूकः पश्यतोहर इवाचिकित्स्यः । तस्य **माया** आन्तरं शाठ्यं **निकृतिर्बाह्यं प्रसङ्गो**-ऽपरापरदोषसन्निपातप्राप्तिरूपश्च भवतीति शेष इति गाथार्थः ॥५०७॥ स चेतरलोकाद[३]प्यधमतम इत्याह–

**लोए वि जो ससूगो, अलियं सहसा न भासए किंचि ।**
**अह दिक्खिओ वि अलियं, भासइ तो किं च दिक्खाए ॥५०८॥**

**लोकेऽपि यः सशूको** मनागपि पापभीरुर्यत्तदोर्नित्यसम्बन्धात् सोऽपि **अलीकं सहसा** राभस्येन **न भाषते किञ्चित्** । स हि लोकस्य व्यवहृतिमात्रेण साधुत्वभीरुतयाऽप्येवंविधः । **अथ पुनर्दीक्षितोऽपि** प्रव्रज्यासाधुरपि **अलीकं भाषते ततः किमत्र दीक्षया** ? न किञ्चिदिति ॥५०८॥

यस्तु तपसा साध्यते, सर्वं तपो हि दुरतिक्रममित्यादिश्रवणात् संयममनपेक्ष्य तप एवाद्रियते तं प्रत्याह–

**महव्वयअणुव्वयाइं, छड्डेउं जो तवं चरइ अन्नं ।**
**सो अन्नाणी मूढो, नावाबुद्दो मुणेयव्वो ॥५०९॥**

**महाव्रताणुव्रतानि त्यक्त्वा यस्तपश्चरति । अन्यदनशनादि** तीर्थान्तरीयं वा । **सोऽज्ञानी मूढो** महामोहोपहतत्वान्**नौबोद्रो मन्तव्यः** । स हि जलधौ नौस्थितस्याल्पकारणेन द्रोणीमूलकाष्ठसंयोजकं कीलिकादिकं गृह्णतः सदृशो मूर्खतया द्रष्टव्यः । संयमतरीनाशे तपःकीलिकया सहितस्याऽपि तस्य भवाब्धौ मज्जनात् । तस्मात् ज्ञानसंयमगर्भिते तपसि यत्नो विधेय इति ॥ यदुक्तम्–

**"नाणं पयासयं सोहओ तवो संजमो अ गुत्तिकरो ।**
**तिण्हं पि समाओगे मुक्खो जिणसासणे भणिओ" ॥१॥** [ ध.स./११७५ ] ५०९॥

ज्ञान-तपः-संयमवता च दुःषमायां सङ्क्लिष्टकाले भूरीन् तद्विकलानवेक्ष्य नोपदेशद्वारतोऽपि तद्दोषो-द्घोषणया मत्सरो विधेयो माध्यस्थ्यमालम्बनीयमितरथा स्वार्थहानिरेव स्यादित्युपदिशति–

---

१. जीवननगर - A । २. तथैव - K, D, B, KH, H । ३. प्यंधनतम - A, B प्यंधतम - H ।

**सुबहुं पासत्थजणं, नाऊणं जो न होइ मज्झत्थो ।**
**न य साहेइ सकज्जं, कागं च करेइ अप्पाणं ॥५१०॥**

**सुबहु**मनेकविधं **पार्श्वस्थजनं** शिथिलस्वयूथ्यवर्गं[१] **ज्ञात्वा यो न भवति मध्यस्थो** मौनेनोपेक्षाशीलः। स **न च** नैव **साधयति स्वकार्यं** रागद्वेषोपपत्तेर्मोक्षान्तरायस्य सुलभत्वात् । न केवलमेतत् **काकं च करोत्यात्मानं** तैः प्रत्युत सर्वैः सम्भूय स्वस्य गुणित्वचिख्यापयिषया हंसकल्पतां सङ्कल्प्य स काककल्पः क्रियते इत्यर्थः । साधूनां तावदिदमुपदिष्टम् । श्रावकैस्तु तेषामपि भक्तिरेव कर्तव्या । अन्यथावृत्त्या तु नैवात्मा दुर्विवेकितां लम्भनीय इति । यतः–

"**बोधिः कषायदग्धानां फलति श्रेणिकादिवत् । दुर्विवेकविदग्धानां दुर्लभस्तु जमालिवत् ॥१॥**
**सन्तो विवेकिनः श्लाघ्या, वरं येऽप्यविवेकिनः । धार्मिकव्यंसकानां तु, का गतिर्दुर्विवेकिनाम्**" ॥२॥[ ] इति ॥५१०॥

तदिदं सुस्थितानामुपदिश्य दुःस्थितानां यत्कृत्यं तत्काक्वा व्यनक्ति–

**परिचिंतिऊण निऊणं, जइ नियमभरो न तीरए वोढुं ।**
**परचित्तरंजणेणं, न वेसमेत्तेण साहारो ॥५११॥**

**परिचिन्त्य** पर्यालोच्य **निपुणं** सूक्ष्मबुद्ध्या **यदि नियमभरो** मूलोत्तरगुणभरो **न तीर्यते** न शक्यते **वोढुं** जीवितान्तं यावन्नेतुं त्वयेत्यर्थः । ततः **परचित्तरञ्जनेन** परेषामयमपि प्रव्रजित इति बुद्धिजनकेन न **वेषमात्रेण** रजोहरणादिधरणादिना **साधारस्त्राण**मिति । इदमिह हृदयं-संयमशून्यस्य बहिर्वेषो जनं प्रति मिथ्यात्वोत्पत्तिहेतुतया अनन्तसंसारकारणत्वात् तत्त्यागः श्रेयानिति ॥५११॥

चारित्रनाशे तस्य ज्ञानदर्शनाभ्यां सगुणत्वं न वेति संशये निश्चय-व्यवहारनयाभ्यां तद्भावाभावौ दर्शयति–

**निच्छयनयस्य चरणस्सुवघाए नाणदंसणवहो वि ।**
**ववहारस्स उ चरणे हयंमि भयणा उ सेसाणं ॥५१२॥**

**निश्चयनयस्य** अन्तस्तत्त्वैकमात्रप्रधानस्य सम्मतमिदं यदुत-**चरणस्योपघाते ज्ञानदर्शनवधोऽपि** जात एव, तयोस्तत्साधनतयैव तात्त्विकस्वरूपावस्थितेस्तदभावे त्वर्थक्रियाया अभावात्, परमार्थतोऽसत्त्वापत्तेः । **व्यवहारस्य तु** बहिस्तत्त्वैकप्रधानस्येदं सम्मतं यदुत-**चरणे हते** सति **भजना** विकल्पना **शेषयो**र्ज्ञानदर्शनयोः, कार्यरहितस्याऽपि कारणस्य कोष्ठागारस्थगितबीजस्येवाङ्कुरशून्यस्य वह्नेरिव च निर्धूमस्याऽपि दर्शनादिति । एतेन द्वावेव जिनवरैर्मार्गावुक्ताविति प्रतिष्ठितम् ॥५१२॥

अथ तयोरेव तृतीयमपि शब्दसूचितं संविग्नपाक्षिकं मार्गं भूयसा स्वकार्यसाधकं दर्शयन्नाह–

**सुज्झइ जई सुचरणो, सुज्झइ सुस्सावगो वि गुणकलिओ ।**
**ओसन्नचरणकरणो, सुज्झइ संविग्गपक्खरुई ॥५१३॥**

**शुद्ध्यते** निःशेषकर्ममलप्रक्षालनेन नैर्मल्यमाप्नोति **यतिः** साधुः **सुचरणो** निरतिचारचारित्रः । **शुद्ध्यति सुश्रावकोऽपि गुणकलितः** सम्यग्दर्शनाणुव्रतादियुक्तः । **अवसन्नचरणोऽपि** स्वयं शिथिलोऽपि ।

---

१. स्वद्यथ्य - L, C स्वयूथ - A ।

अत्राऽ**प्यपि**शब्दः सम्बन्धनीयः, **शुद्ध्यति** संविग्नपक्षे सुसाधूनामनुष्ठाने रुचिः स्पृहा यस्य स **संविग्नपक्षरुचिः** । शुद्धिभेददर्शनार्थो मुहुः क्रियाप्रयोगः । साधूनां हि शुद्धिः साक्षात्, पारम्पर्येण परयोर्व्यवहारनयात्तावदित्थमुक्तम् । निश्चयनये तु कदाचिद्द्वयत्ययोऽपीति ॥५१३॥

संविग्नपक्षरुचयस्तर्हि ते कथं लक्षणीया इत्याह—

**संविग्गपक्खियाणं, लक्खणमेयं समासओ भणियं ।**
**ओसन्नचरणकरणा वि जेण कम्मं विसोहेंति ॥५१४॥**

संविग्नानां—मोक्षाभिलाषुकसाधूनां पक्षे—वर्गे सुन्दरा मतिर्येषां ते **संविग्नपाक्षिकाः** तेषां **लक्षणं** पक्षान्तरव्यावर्त्तको धर्मस्त**देतत्समासतः** संक्षेपतो **भणितं** पूर्वाचार्यैः - **अवसन्नचरणकरणा अपि** कर्मपारवश्यात् प्रमादिनो[१]ऽपि स्वयं **येन** लक्षणेन सता[२] **कर्म** ज्ञानावरणादि **विशोधयन्ति** सम्यक् क्षालयन्तीति ॥५१४॥

बहुवचनोद्देश एकवचनेऽपि चरितार्थ इति न्यायं दर्शयंस्तल्लक्षणमेवाह—

**सुद्धं सुसाहुधम्मं, कहेइ निंदइ य नियमायारं ।**
**सुतवस्सियाण पुरओ, होइ य सव्वोमरायणिओ ॥५१५॥**

**शुद्धं सुसाधुधर्मं कथयति** निष्कलङ्कयथोक्तानुष्ठायकं[३] यत्याचारं प्रतिपादयति । **निन्दति**[४] **च** चशब्दात् [५]नानुमोदते च **निजकं** स्वकीय**माचारं सुतपस्विनां पुरतः** सुसाधूनामग्रतः कदाचिन्मध्यमापन्नो[1] **भवति च सर्वाऽवमरात्निको**ऽद्यतनदीक्षितावसानेभ्यः सर्वेभ्योऽवमरात्निको[६] लघीयानिति ॥५१५॥ तथा—

**वंदइ न य वंदावइ, किइकम्मं कुणइ कारवइ नेय ।**
**अत्तट्ठा न वि दिक्खे, देइ सुसाहूण बोहेउं ॥५१६॥**

**वन्दते** सुसाधून् **न च** स्वयं **वन्दयति**, तद्वन्दनकं न प्रतीच्छतीति भावः । **कृतिकर्म** विश्रामणाद्यं **करोति** तेषां **कारयति नैव** तान् । **आत्मार्थ**मुपस्थितमपि शिष्यं **नापि** नैव **दीक्षयति** । किं तर्हि करोति ? **ददाति सुसाधुभ्यो बोधयित्वा** धर्मदेशनयेति ॥५१६॥ अत्र हेतुमाह—

**ओसन्नो अत्तट्ठा, परमप्पाणं च हणइ दिक्खंतो ।**
**तं खिवइ दुग्गईए, अहिययरं बुड्डइ सयं च ॥५१७॥**

**अवसन्न आत्मार्थं परं** शिष्य**मात्मानं च हन्ति** भावजीवितापेक्षोऽत्र घातः **दीक्षयन्** प्रव्राजयन् । कथमित्याह **तं** शिष्यं **क्षिपति दुर्गतौ, अधिकतरं ब्रुडति** निमज्जति **स्वयं** च संसारपारावार इति ॥५१७॥

न केवलं दीक्षयन् वितथं च प्ररूपयन् ब्रुडतीत्याह—

**जह सरणमुवगयाणं, जीवाणं निकिंतई सिरे जो उ ।**
**एवं आयरिओ वि हु, उस्सुत्तं पन्नवेंतो उ ॥५१८॥**

---

१. प्रमायिनो - A । २. सना - A, H । ३. ष्ठायि - A, B ष्ठायकथ....KH । ४. निंदयति - D, B, K, H । ५. स्वयं निंदति च निजकं....B, D, K, H । ६. वमरात्निकेभ्यो लघीया....H, C ।

टि. 1. मध्यमापन्नो - सुसाधूनां मध्ये प्राप्त इत्यर्थः ।

**यथा शरणमुपगतानाम्** अभयार्थमायातानां **जीवानां निकृन्तति** छिनत्ति **शिरांसि** शीर्षाणि **यस्तु** यथाऽसावात्मानं दुर्गतौ क्षिपति । **एवमनेनैव** न्यायेन **आचार्योऽपि** आस्तामन्यः शास्ताऽपि, दुर्निश्चयेन **उत्सूत्र-मपसिद्धान्तं**[१] **प्रज्ञापयंस्तु** तुशब्दादाचरंश्च, दुर्गतावात्मानं क्षिपतीति ॥५१८॥ निगमयन्नाह—

**सावज्जजोगपरिवज्जणाए, सव्वोत्तमो जईधम्मो ।**
**बीओ सावगधम्मो, तइओ संविग्गपक्खपहो ॥५१९॥**

तस्मात् स्थितमेतत्-**सावद्ययोगपरिवर्जनया** सपापचित्तादि[२]व्यापारपरिहाररूपतया **सर्वोत्तमो यति-धर्मः** साध्वाचारो मोक्षमार्ग इति शेषः । **द्वितीयः श्रावकधर्मः** । **तृतीयः संविग्नपक्षपथ**स्तावपि मोक्षमार्ग इति ॥५१९॥ शेषाणां तर्हि का वार्त्तेत्याह—

**सेसा मिच्छद्दिट्ठी, गिहिलिंगकुलिंगदव्वलिंगेहिं ।**
**जह तिन्नि उ मुक्खपहा, संसारपहा तहा तिण्णि ॥५२०॥**

**शेषा** उक्तेभ्यः परे **गृहलिङ्ग-कुलिङ्ग-द्रव्यलिङ्गै**रुपलक्षिता ये वर्त्तन्ते तेषां किमित्याह-**यथा त्रय एव** सुसाधु-श्रावक-संविग्नपाक्षिकलक्षणा **मोक्षपथाः** शिवमार्गाः । **संसारपथा** भवमार्गा अपि **तथा** गृहस्थ-चरक-पार्श्वस्थादिरूपा**स्त्रय** एवेति ॥५२०॥

इत्थं पूज्यलिङ्गधारिणामपि पार्श्वस्थादीनां गृहस्थचरकादिसाधारण्यं तु भवानुयायित्वादेवेत्याह—

**संसारसागरमिणं, परिब्भमंतेहिं सव्वजीवेहिं ।**
**गहियाणि य मुक्काणि य, अणंतसो दव्वलिंगाइं ॥५२१॥**

**संसारसागरं** भवोदधिम् **इमम्** अनुभवसिद्धं **परिभ्रमद्भिः** पर्यटद्भिः **सर्वजीवै**रखिलप्राणिभिः **गृहीतानि च मुक्तानि च अनन्तशः** अनन्तवारा **द्रव्यलिङ्गानि** रजोहरणादिरूपाणि । अनादित्वात्कालस्य । सर्वभावैः संयोगधर्मकत्वात् प्राणिनामनन्तशस्तत्सम्बन्धो न विरुद्ध इति भावः । इदमत्राऽऽकूतं-सम्यग्ज्ञानादिविकलेन न किञ्चिल्लिङ्गमात्रेण त्राणमिति ॥५२१॥

द्रव्यलिङ्गत्याजनाय चायमागमज्ञैरनेकधा प्रज्ञाप्यमानोऽपि यो लिङ्गत्यागं नाद्रियते तं प्रत्याह—

**अच्चणुरत्तो जो पुण, न मुयइ बहुसो वि पन्नविज्जंतो ।**
**संविग्गपक्खियत्तं, करेज्ज लब्भिहिसि तेण पहं ॥५२२॥**

**अत्यनुरक्तो** गाढप्रतिबद्धो **यः पुनर्द्रव्यलिङ्गं न मुञ्चति** । **बहुशो**ऽनेकवारा **अपि प्रज्ञाप्यमानो** गीतार्थैः गुणदोषविवेचनया अनुशास्यमानः, तं प्रति आचार्यः स्वयमेवोपदिशति—तर्हि धर्मशील ! **संविग्नपाक्षिकत्वं कुर्या** विदध्यास्तद्बीजाधानात् त्वं **लप्स्यसे** प्राप्स्यसि **तेन** संविग्नपाक्षिकत्वेनाऽनुष्ठितेन **पथं** मोक्षमार्गमिति ॥५२२॥ संविग्नेभ्यस्तेन किं कृत्यमित्याह—

**कंतारारोहमद्धाण-ओमगेलन्नमाइकज्जेसु ।**
**सव्वायरेण जयणाए, कुणइ जं साहु करणिज्जं ॥५२३॥**

---

१. मपिसि... A, B, L, D, K, मुपसि... L । २. चिंतादि - B, H, चित्ता - A ।

**कान्तारं** महारण्यम्, **रोधः** परचक्रादिजनितो नगरादौ, **अध्वा** पन्थाः, **अवमं** दुर्भिक्षम्, **ग्लानत्वं**-ज्वरादिजनितं मान्द्यं कृतद्वन्द्वानि तानि **आदिर्येषां** राजोपसर्प्पणादीनां तानि च तानि **कार्याणि** च तेषु । **सर्वादरेण** सम्पूर्णयत्नेन **यतनया** आगमोक्तया यथा तेषां चित्तोपरोधो न भवति तं तथा **करोति यत् साधु** शोभनं **करणीयं** कृत्यं साधुकार्यं वा तपस्विप्रयोजनं वेति ॥५२३॥

एवमतिदुष्करमिदं कुर्वाणश्चायमतिश्रेयानेवेत्याह—

**आयरतरसम्माणं सुदुक्करं माणसंकडे लोए ।**
**संविग्गपक्खियत्तं, ओसन्नेणं फुडं काउं ॥५२४॥**

आदरतरेण सातिशयप्रयत्नेन सतां साधूनां मानः पूजा यस्मिन् तत्[१] **आदरतरसन्मानं संविग्नपाक्षिकत्वं सुदुष्करं** दुरनुष्ठेयं **मानसङ्कटे** अहङ्कारव्याप्ते **लोके** । यदुक्तम्—

**"सर्वस्यात्मा गुणवान्, सर्वः परदोषदर्शने कुशलः ।**
**सर्वस्य चास्ति वाच्यं न चात्मदोषान् वदति कश्चित् ॥"** [ ]

किं तत् ? **संविग्नपाक्षिकत्वम् अवसन्नेन** स्वयं **स्फुटं** निर्व्याजं लोकप्रकाशं वा **कर्तुं** विधातुं सुदुष्करमिति सण्टङ्कः ॥५२४॥

अथ सुसाधुविहारेण चिरकालं विहृत्य पश्चात्कर्मपारवश्येण ये शैथिल्याद् गच्छं त्यजन्ति, ते कुत्र पक्षे ज्ञातव्या इत्याह—

**सारणचइया जे गच्छनिग्गया पविहरंति पासत्था ।**
**जिणवयणबाहिरा वि य, ते उ पमाणं न कायव्वा ॥५२५॥**

**स्मारणत्याजिता** उपलक्षणत्वात् स्मारण-वारण-नोदन-प्रतिनोदनादिभिः प्रागुक्तस्वरूपाभिरनुशासिताः सन्तोऽतिप्रमादितया त्याजितास्त्रासिता अत एव **ये गच्छात्** साधुगणा**न्निर्गता** बहिर्भूताः **प्रविहरन्ति** । यथेष्टचेष्टं हिण्डन्ते । अत एव **जिनवचनबाह्या** भगवत्प्रवचनार्थपार्श्ववर्त्तिनः पार्श्वस्था इत्यर्थः । **ते तु प्रमाणं न कर्त्तव्यास्ते** पुनः सुसाधुतया नैव द्रष्टव्या इति । इदमत्र हृदयं-संविग्नादीनां हि न काचिज्जातिरस्ति सम्पूर्ण-सर्वविरतिधर्मा हि संविग्नाः, देशविरतिविशुद्धः सुश्रावकः, सुसाधुपक्षपाती च पार्श्वस्थादिरपि संविग्नपाक्षिकः । अनेन स्वस्वलक्षणेन हि ते तथा तथा व्यपदिश्यन्ते । तत् तल्लक्षणरहितानां तेषां केवलं पार्श्वस्थत्व-मेवाऽवशिष्यते । प्रागवस्थानुष्ठानं तु तेषां नापेक्षणीयमिति भावः । अथवा अन्यथा प्रस्तूयते-तथाभूतान् तानेव प्रमाणीकृत्याऽपरे प्रमाद्यन्तो गीतार्थैरनुशासिता य एवं ब्रूयुः-किं कुर्मो वयम् ? अस्मत्तो महत्तरैरप्येवमेवा-चरितम् इति तान् प्रति एवमुपदिश्यते । 'सारण...' गाहा, सैवार्थव्याख्या, विशेषार्थस्त्वयं-विदुषा मोक्षमार्गं प्रति प्रवर्त्तमानेन ये जिनवचनबाह्याः पार्श्वस्थास्ते प्रमाणं क्वचिदपि न कार्याः । अव्युच्छिन्नजिनाम्नायशुद्धं सूत्रमेव प्रमाणीकार्यम्, अन्यथा अर्थापत्त्या तैर्वराकैस्त्रिभुवनपितामहो भगवानेवाऽप्रमाणीकृतः स्यात् ।

---

१. तस्मात् - A ।

यदाहुः कलिकालसर्वज्ञसंवादाः **श्रीहरिभद्रसूरिपादाः**—

**"सुअबज्झायरणरया पमाणयंता तहाविहं लोअं ।**
**भुवणगुरुणो वराया पमाणयं नावगच्छंति ॥१॥** [ प.व./१७०८ ]
**सुत्तेण चोइओ जो, अन्नं उद्दिसिय तं न पडिवज्जे ।**
**सो तंतवायवज्झो न होइ धम्मंमि अहिगारी"** ॥२॥ [ प.व./१७०९ ] इत्यादि ॥५२५॥

तस्माल्लोकाचरणनिरपेक्षस्यागमपरतन्त्रतैव मोक्षाङ्गम् । तत्र च यथाशक्ति यदपि यतनयानुष्ठीयते, तावदपि निर्जराकारीत्यभ्युच्चयेनाह[1]—

**हीणस्स वि सुद्धपरूवगस्स संविग्गपक्खवाइस्स ।**
**जा जा हवेज्ज जयणा, सा सा से निज्जरा होइ ॥५२६॥**

आस्तां तावदकलङ्कस्य, **हीनस्याऽपि** उत्तरगुणानपेक्ष्य न्यूनस्याऽपि **शुद्धप्ररूपकस्य** यथावस्थिताऽर्हदागमार्थप्रकाशकस्य **संविग्नपक्षपातिनो या या भवेद्यतना** परिणतदेशीयपरिमितोदकाऽद्याऽऽदानरूपा । **सा सा से** तस्य संविग्नपक्षपातिनो **निर्जरा** कर्मक्षयहेतु**र्भवति** । तस्य कायतोऽन्यतः प्रवृत्तस्यापि चित्तमवेक्ष्य गाढानुरक्तत्वात् । तथा चोक्तम्—

**"संविग्गपक्खिओ उण अन्नत्थ पइट्ठिओ वि काएण ।**
**धम्मे च्चिय तल्लिच्छो दढरतित्थि व्व पुरिसम्मि"** ॥१॥ [ प.व./१६८१ ] ॥५२६॥

यस्तु गीतार्थो बहुगुणाऽल्पदोषपरिकलनया भगवदागमार्थोपदेशात् किञ्चिदासेवते स महतो निर्जरालाभस्य भाजनं स्यादित्याह—

**सुंकाईपरिसुद्धे सइ लाभे कुणइ वाणिओ चिट्ठं ।**
**एमेव य गीयत्थो, आयं दट्ठुं समायरइ ॥५२७॥**

शुल्कं—राजदेयो भागधेयस्तदादिर्येषां कर्मकरव्ययादीनाम् । **शुल्कादिभिः परिशुद्धे** आत्मन एव स्वाधीने **सति लाभे करोति वाणिज्यको** वाणिज्यरूपां **चेष्टां** व्यवहृतिम् । **एवमेव च** अनेनैव न्यायेन च, **गीतार्थो** गृहीतागमसारः पुमान् **आयं** ज्ञानादिलाभमधिकं **दृष्ट्वा** सूत्रार्थदृशा निरीक्ष्य **समाचरति** । यतनया तदासेवते इति ॥५२७॥

अस्त्वेवमायव्ययतुलनया यतमानस्य निर्जरा, यस्तु निष्कारणं सुखित्वेनैव शिथिलः, स संविग्नपाक्षिकः किमर्थं समर्थ्यते इत्याह—

**आमुक्कजोगिणो च्चिय, हवइ हु थोवा वि तस्स जीवदया ।**
**संविग्गपक्खजयणा, तो दिट्ठा साहुवग्गस्स ॥५२८॥**

**आ** समन्तान्मुक्ता योगाः संयमव्यापारा यस्य सन्ति **'सर्वादेरिति'**, स आमुक्तयोगी, तस्या**ऽऽमुक्तयोगिन एव** सतो **भवति** । हुर्निश्चयेन, **स्तोकापि तस्य** संविग्नपाक्षिकस्य **जीवदया । संविग्नपक्षयतना** मोक्षाभिलाषुकयतिजनानुरागेण पूर्वोक्ता प्रवृत्ति**स्ततः** कारणात् **दृष्टा** भगवद्भिरुपलब्धा **साधुवर्गस्येति** । अयमत्र

१. त्युच्चयेना - A. B, H त्यभ्यभूयेना - C, L ।

भावार्थ:-बहुकालमपथ्यसेवकोऽपि आमयावी सुवैद्यसम्पर्कादिना विदितपथ्यासेवनगुण आरोग्याकाङ्क्षया स्वस्यापथ्यं जिहासुः, पथ्यानुरागी क्रमेणैवाऽपथ्यं मुञ्चेत् । तच्चोक्त**मायुर्वेदे**–

"**उचितादहिताद्धीमान्, क्रमशो विरमेन्नरः । हितं क्रमेणोपचरेत्, क्रमश्चाऽत्रोपदिक्ष्यते**" ॥ [ ] इत्यादि ।

यथा चैतदेवं तथा यः पार्श्वस्थादिभावोपजीव्यपि चिरकालात्कथञ्चित् सुसाधुसम्पर्कादिनाऽऽविर्भूत-तीव्रधर्मश्रद्धानोऽपि 'न य ओसन्नविहारी दुहिओ ओसन्नयं चयइ' इत्यादिपूर्वोक्तयुक्त्या दुस्त्यजमपि पार्श्व-स्थादिभावं क्रमशो निवर्त्तयन्, संयमे गाढप्रतिबद्धभावः सम्पूर्णवीर्यलाभादरात् संविग्नपाक्षिकः स्यात् । तदर्थं तन्मार्गोऽपि मोक्षहेतुतया साधुः प्रतिपादित इति ॥५२८॥

तदेवमनेकधा सदुपदेशान् प्रतिपाद्य तेषां विपक्षविक्षेपेण सुपात्रन्यासयोग्यतामाह–

**किं मूसगाण अत्थेण ? किं वा कागाण कणगमालाए ? ।**
**मोहमलखवलियाणं, किं कज्जुवएसमालाए ॥५२९॥**

**किं मूषकाना**माखूना**मर्थेन** सुवर्णदीनारादिना ? न किञ्चित्, निष्प्रयोजनो हि तेषां तद्ग्रहणादरः । **किं वा काकानां** करटानां कनकमयी माला माणिक्यादिश्रेणिः **कनकमाला** तया ? न किञ्चिदेव । **मोहमल-कवलितानां** मिथ्यात्वादिकर्मपङ्कलिप्तानां जन्तूनां **किं कार्यं** प्रयोजनम् **उपदेशमालया** ? न किञ्चिदुपकारा-भावादिति ॥५२९॥

**चरणकरणालसाणं, अविणयबहुलाण सययमजोगमिणं ।**
**न मणी सयसाहस्सो, आबज्झइ कुत्थुभासस्स ॥५३०॥**

जन्तूनां **चरणकरणालसानां** सदनुष्ठानप्रमद्वराणाम् **अविनयबहुलानां** दुर्विनीतानां प्राणिनाम् । धर्म-मूलताख्यापनार्थं विनयस्य पृथग् विशेषणम् । **सततं** सदा **अयोग्यम्** अहितम् **इदम्** उपदेशमालाख्यं प्रकरणम् । तथा हि - **न मणिः शतसाहस्रो** लक्षमूल्य **आबध्यते** विभूषणार्थमामुच्यते केनचित् । **कौस्तुभासस्य** कौस्तुभम् अस्यति क्षिपति यस्तस्य मूर्खस्य । अयमभिप्रायः-यः किल अपरिच्छेद्यमूल्यं पुरुषोत्तमवक्षःस्थलालङ्करणभूतं[1] कौस्तुभमिवातिमहार्घ्यं धर्ममूलभूतं विनयं निरस्यति, स वराकः कथमस्य प्रकरणस्य लक्षमूल्यमणिप्रायस्य योग्यः स्यादिति ॥५३०॥ किं कृतोऽयं प्रमादिनामनात्मनीनतावलेपो यदेवं सदुपदेशे[2]ऽप्यालस्यमित्याह–

**नाऊण करयलगयाऽऽमलं व सब्भावओ पहं सव्वं ।**
**धम्मम्मि नाम सीइज्जइ त्ति कम्माइं गरुयाइं ॥५३१॥**

**ज्ञात्वा करतलगताऽऽमलकवत्** परिस्फुटं **सद्भावत** उपादेयबुद्ध्या **पथं** ज्ञानाद्यात्मकं मोक्षमार्गं **सर्वं** सम्पूर्णं तथाऽपि **धर्मे नामे**ति विस्मये **सीद्यते** प्रमादिभिर्भूयते । **इति** इत्थं प्रकारेण **कर्माणि गुरुकाणि** तथाविधानां कर्मणामिदं दौरात्म्यमित्याकूतम् ॥५३१॥ अन्यच्च–

**धम्मत्थकाममुक्खेहिं जस्स भावो जहिं जहिं रमइ ।**
**वेरग्गेगंतरसं, न इमं सव्वं सुहावेइ ॥५३२॥**

---

१. लालंकारभूतं - KH, लालंकरणं - K, D । २. समुपदेशे...A ।

**धर्मार्थकाममोक्षेषु** चतुर्वर्गाभिधेयेषु मिश्रेषूपदिश्यमानेषु **यस्य** प्राणिनो **भावश्चि**त्ताभिप्रायो **यस्मिन् यस्मिन् रमते** वीप्सा सर्वरसात्मकत्वमाह, तस्य **वैराग्यैकान्तरसं** विरक्त्येकनिर्यासं **नेदं** प्रकरणं **सर्वं** सकलमपि **सुखयति** आह्लादयति, किन्तु वैमुख्यमेवाऽऽतनोतीति ॥५३२॥ किञ्च–

**संजमतवालसाणं, वेरग्गकहा न होइ कण्णसुहा ।**
**संविग्गपक्खियाणं, होज्ज व केसिंचि नाणीणं ॥५३३॥**

**संयमतपोऽलसानां** संयमे तपसि चानुद्यमानां[१] गुरुकर्मणां **वैराग्यकथा** प्रस्तुतप्रकरणरूपा **न भवति कर्णसुखा** श्रुतिसुखेन मानसानन्दहेतुर्न स्यादित्यर्थः । **संविग्नपाक्षिकाणां** प्रतिपादितचराणां[1] स्वयं संयमतपोऽलसानामपि **भवेद्वा** वैराग्यकथा इयं कर्णसुखा **केषाञ्चित् ज्ञानिनां** संयमानुरागनिर्मलज्ञानानामिति यावदिति ॥५३३॥

तथा मोहमहोरगग्रस्तानां जन्तूनां साध्यासाध्यविवेचकत्वेन संग्रहपरिच्छेदवेदनसामर्थ्यमप्यस्य प्रकरणस्येति व्याचष्टे–

**सोऊण पगरणमिणं, धम्मे जाओ न उज्जमो जस्स ।**
**न य जणियं वेरग्गं, जाणिज्ज अणंतसंसारी ॥५३४॥**

**श्रुत्वा प्रकरणमिदमु**पदेशमालाख्यं **धर्मे** जिनोक्ते **जातो नोद्यमो** विशेषाभियोगो **यस्य** जन्तो**र्न च जनितम्** उत्पादितं श्रूयमाणेनाऽनेन **वैराग्यं** विषयवैमुख्यं यस्येति वर्त्तते, तं **जानीया**स्त्वं यदुताऽय**मनन्तसंसारी**ति कालदष्टवदसाध्य एवेत्यर्थः ॥५३४॥ यत आह–

**कम्माण सुबहुयाणुवसमेण उवगच्छई इमं सम्मं[२] ।**
**कम्ममलचिक्कणाणं, वच्चइ पासेण भण्णंतं ॥५३५॥**

**कर्मणां** मिथ्यात्वादीनां **सुबहूनां** प्रभूताना**मुपशमेन** उपलक्षणत्वेन उदीर्णानां क्षयेण, उदयावलिकामप्राप्तानाम् उपशमेन, स्वकार्यकरणाशक्तिलक्षणेन सता अल्पशेषकर्मणामेव प्राणिना**मुपगच्छति** सद्बोधं जनयति **इदं** प्रस्तुतप्रकरणं **सम्यग्** अविपरीतस्थित्या । व्यतिरेकमाह-**कर्ममलचिक्कणानां** मिथ्यात्वादिपङ्कदिग्धानां जीवानां **व्रजति पार्श्वेण भण्यमानं** नान्तः प्रविशति उपरि प्लवते इत्यर्थः ॥५३५॥

अथास्य प्रकरणस्याध्ययनफलमाह–

**उवएसमालमेयं, जो पढइ सुणइ कुणइ वा हियए ।**
**सो जाणइ अप्पहियं, नाऊण सुहं समायरइ ॥५३६॥**

**उपदेशमालामेतां यो** धन्यः **पठति** सूत्रतः **शृणोत्य**र्थतः **करोति वा हृदये** प्रतिक्षणं सूत्रार्थोभयभावनया **स जानात्यात्महितम्** इहलोकपरलोकयोः स्वपथ्यम् , तच्च **ज्ञात्वा सुखम**कृच्छ्रेणैव **समाचरति** अनुतिष्ठतीति ॥५३६॥

---

१. नुद्यतानां - A, H । २. सव्वं - C, D, K, KH, L ।

टि. 1. 'भूतपूर्वे च्चरट्' इत्यनेन चरप्रत्ययः ।

सम्प्रति सूत्रकारः स्वस्याभिधानव्युत्पादनेन कर्तृत्वमाचष्टे—

**धंतमणिदामससिगय-णिहिपयपढमक्खराण नामेण ।**
**उवएसमालपगरणमिणमो रइयं हियट्ठाए ॥५३७॥**

**धन्तादीनां**[1][१] षण्णां **पदानां प्रथमाक्षराणां नाम्ना धर्मदासगणि**ना **उपदेशमालाप्रकरणमिदं रचितं** सिद्धान्तादुद्धृत्याऽर्थं सूत्रतो ग्रथितम् । **हितो** मोक्षः सत्त्वानुग्रहो वा, तद्धेतुत्वात्त**दर्थाय** तन्निमित्तमिति ॥५३७॥

इदं हि प्रकरणं यस्मादर्थं गृहीत्वा विरचितं तस्य भगवद्वचनस्य कल्पतरुरूपकेण स्तवं करोति—

**जिणवयणकप्परुक्खो, अणेगसत्थत्थसालविच्छिन्नो ।**
**तवनियमकुसुमगुच्छो, सोग्गइफलबंधणो जयइ ॥५३८॥**

**जिनवचनं** द्वादशाङ्गं तदेव यथेष्टफलदत्वात् **कल्पवृक्षः । अनेकशास्त्रार्थ** एव व्यापकत्वात्सच्छाया-हेतुत्वाच्च **शाखा**स्ताभि**र्विस्तीर्णो** विशालः । तपोनियमा एव मुनिमधुकरान्तःकरणप्रीतिहेतुत्वात् कुसुमगुच्छाः प्रसूनस्तबका यस्मिन् स **तपोनियमकुसुमगुच्छः** । सुगतिः स्वर्गापवर्गौ, सैव अपरिमितानन्दरसपूर्णत्वात् फलं तद्बध्यते यस्मिन्नसौ **सुगतिफलबन्धनो जयति** । सर्वागमान्तरेभ्य उत्कर्षेण वर्त्तते **स** भगवानिति ॥५३८॥

सम्प्रति परिसमाप्तिं द्योतयन्, येषामिय**मुपदेशमाला** योग्याताननुवदति—

**जोग्गा सुसाहुवेरग्गियाण परलोगपत्थियाणं च ।**
**संविग्गपक्खियाणं, दायव्वा बहुस्सुयाणं च ॥५३९॥**

**योग्या** उचिता सुसाधवो रत्नत्रयाराधनेन मोक्षसाधकाः सुश्रमणाः, वैराग्यं विद्यते येषां ते वैराग्यिकाः सुश्रावकाः, सुसाधवश्च वैराग्यिकाश्च **सुसाधुवैराग्यिका**स्तेभ्यः **परलोकप्रस्थितेभ्यः** पथ्यदनवत् संयमोन्-मुखतया परत्र हिताभ्युद्यतेभ्य**श्च** उचितैव तावत् । तथा **संविग्नपाक्षिकेभ्यो दातव्या बहुश्रुतेभ्यश्च** विवेकि-भ्यश्च चशब्दो विशेषणार्थः, तेन अन्येभ्यो दत्ता दोषोद्घोषणमात्रे पर्यवस्यति । विपरीतमतयो हि व्रतिनामेव केवलमेतदीयगाथाभिर्दोषानुदीरयन्ति, नात्मनः परस्य वा एतदर्थानुयायि किमपि हितमाचरन्तीति ॥५३९॥

अथास्य उपदेशमालाप्रकरणस्य विधातुः श्री**धर्मदासगणेः** शिष्यैर्गुरुबहुमानतोऽनुग्रथितमिदं गाथाद्वयं सम्भाव्यते । तथाहि—

**इय धम्मदासगणिणा जिणवयणोवएसकज्जमालाए ।**
**माल व्व विविहकुसुमा, कहिआ य सुसीसवग्गस्स ॥५४०॥**

**इति** अनेन पूर्वोक्तप्रकारेण **धर्मदासगणिना** भगवता **जिनवचन**रूपै**रुपदेशै**र्हेतुभिः **कार्यो** गणधरै-र्ग्रथनीय आगमस्तस्य **माला** पद्धतिर्द्वादशाङ्गी । उक्तं च "**अत्थं भासइ अरिहा सुत्तं गंथंति गणहरा**" [ आ.नि./९२ पूर्वा.] इत्यादि, तस्या जिनवचनोपदेशकार्यमालायाः सकाशादादायेति शेषः । **मालेव विविधकुसुमा** भव्यमधुव्रतव्रातप्रियतया नानाकुसुमसम्पादिता स्रगिव **कथिता च** उपदिष्टा **सुशिष्यवर्गस्ये**ति ॥५४०॥

---

१. धनादीनां - C, KH धणादीनां - D, K । २. कमपि - A, C, D, L ।

टि. 1. धन्त, मणि, दाम, ससि, गय, णिहि एषां पदानां प्रथमाक्षरः यथाक्रमं - धम्मदासगणि-ग्रन्थकर्तुः नाम ।

कथक-श्रोतॄणामाशिषमाह—

**संतिकरी वुड्ढिकरी, कल्लाणकरी सुमंगलकरी य ।**
**होउ कहगस्स परिसाए, तह य निव्वाणफलदाई ॥५४१॥**

**शान्तिकरी** पूर्वार्जितदुरन्तदुरितोपशमहेतुः । **वृद्धिकरी** पुण्यानुबन्धनिबन्धनपुण्यप्रचयोपचयहेतुः । **कल्याणकरी** अनेन पुण्योदयः सूचितः । **सुमङ्गलकरी** चेत्यनेन कल्याणेभ्यः स्वर्गसुमानुषत्वविभूति-रूपेभ्योऽनन्तरं बोधिहेतुत्वात् पुण्योदयस्य पुण्यानुबन्धित्वमाशंसितम् । **भवतु कथकस्य परिषदस्तथा च निर्वाणफलदायिनीति** ॥५४१॥ अथ गाथामानमाह—

**इत्थ समप्पइ इणमो, मालाउवएसपगरणं पगयं ।**
**गाहाणं सव्वग्गं, पंचसया चेव चालीसा ॥५४२॥**

सुगमा । नवरं आर्षत्वात् **मालाशब्दस्य** पूर्वभावः ॥५४२॥

अथ ग्रन्थस्याशिषमाह—

**जाव य लवणसमुद्दो, जाव य नक्खत्तमंडिओ मेरू ।**
**ताव य रइया माला, जयम्मि थिरथावरा होउ ॥५४३॥**

**यावच्च लवणसमुद्रो यावच्च नक्षत्रमण्डितो मेरुः तावद्विरचिता माला** 'भामा सत्यभामे'ति न्यायादुपदेशमाला **जगति** सम्यग्दृष्टिपञ्चेन्द्रियप्राणिगणरूपे[1] **स्थिरा** पृथिवी, तद्वत् **स्थावरा** शाश्वती **स्थिर-स्थावरा भवतु** आस्तामित्याशीर्वादः ॥५४३॥

**अक्खरमत्ताहीणं**[2], **जं चिय पढियं अयाणमाणेणं ।**
**तं खमह मज्झ सव्वं, जिणवयणविणिग्गया वाणी ॥५४४॥**

**यत्किञ्चन्मया** जिनवचनवाण्याः **अक्षरमात्रया हीनं तत्सर्वं क्षम्य**तां इति भद्रमस्तु ॥५४४॥

## [ प्रशस्तिः ॥ ]

घनकमठभृताम्भोराशिसंवासिसर्प्पा-धिपतिकलितमूर्तिर्नीलनालीनकान्तिः ।
सितरुचिरविराजल्लोचनः केवलश्रीपरिचयचतुरात्मा श्रीजिनो वः श्रियेऽस्तु ॥१॥ [मालिनीवृत्तम्]

श्री**वर्द्धमानः** शमिनां मनांसि जिनो धिनोतु त्रिपदी यदीया ।
व्याप्नोति विश्वं बलिघातिकर्म-जयोदिता विश्वमनश्वरश्रीः ॥२॥ [वसन्ततिलकावृत्तम्]

श्री**वीर**शासनमहामहिमागरिष्ठः श्री**भद्रबाहु**विहिताचरणप्रतिष्ठः ।
काले कलावपि विलुप्तघनाघसङ्घः श्रीमानयं विजयते यतिमूलसङ्घः ॥३॥

श्री**नागेन्द्र**कुले मुनीन्द्रसवितुः श्रीमन्**महेन्द्रप्रभोः**, पट्टे पारगतागमोपनिषदां पारङ्गमग्रामणीः ।
देवः संयमदैवतं निरवधित्रैविद्यवागीश्वरः; सञ्जज्ञे कलिकल्मषैरकलुषः श्री**शान्तिसूरि**र्गुरुः ॥४॥ [शा०वि०]

शक्तिः कापि न **कापिल**स्य न नये **नैयायिको** नायक**श्चार्वाकः** परिपाकमुज्झति मते**बौद्ध**श्च नौद्धत्यभाक् ।
स्याद्**वैशेषिक**शेमुषी च विमुखी वादाय **वेदान्तिके**; दान्तिः केवलमस्य वक्तुरयते सीमां न **मीमांसकः** ॥५॥

१. गणधररूपे - A । २. K प्रतौ ।

तत्पट्टे प्रथमः शमिप्रभुरभू**दानन्दसूरिः** परः, सञ्जज्ञे**ऽमरचन्द्रसूरि**रखिलो[1]ऽनूचानचूडामणिः ।
शश्वद्यस्य सरस्वतीप्रसरणे सिद्धेशितुः संसदि; प्राज्ञैश्चेतसि [2]वेतसीतरुरसावाचार्यकं कार्यते ॥६॥
सिद्धान्तोपनिषन्निषण्णहृदयो धीजन्मभूस्तत्पदे, पूज्यश्री**हरिभद्रसूरि**रभवच्चारित्रिणामग्रणीः ।
[१]भ्रान्त्वा शून्यमनाश्रयैरतिचिराद्यस्मिन्नवस्थानतः; सन्तुष्टैः कलिकालगौतम इति ख्यातिर्वितेने गुणैः ॥७॥
गुरुश्री**हरिभद्रो**ऽयं लेभेऽधिकवचःस्थितिः । मोहद्रोहाय चारित्रनृपनासीरवीरताम् ॥८॥ [अनुष्टुब्]
तत्पदे **विजयसेनसूरयः**, पूरयन्ति कृतिनां मनोरथान् ।
यद्[3]गवी वृषमसूत नूतना कामधेनुरिव सर्वकामदम् ॥९॥
गर्वात्पूर्वमनादरैरवहितैः पश्चात्ततो विस्मितैः,
प्रस्विन्नैरनुविस्मृतात्मभिरथो वादेन वादे क्षणात् ।
भाग्यैर्मानिमनीषिणां परिणता पुंस्त्वेन वागेष इ-
त्याक्षिप्तैरथ सेव्यते स्म सहसा यस्सादरं वादिभिः ॥१०॥
यस्योपदेशममृतोपमितं निपीय, श्री**वस्तुपाल**सचिवेश्वर-**तेजपालौ** ।
सङ्घाधिपत्यमसमं जिनतीर्थतेजः-संवर्द्धनाज्जितशतक्रतु चक्रतुस्तौ ॥११॥ [वसन्ततिलका]
श्रीम**द्विजयसेन**स्य सौमनस्यं नमस्यतः । यद्वासिता धृताः कैर्न गुणाः शिष्याश्च मूर्द्धसु ॥१२॥ [अनुष्टुब्]
तस्याज्ञया **विजयसेनमुनीश्वर**स्य शिष्येण सेय**मुदयप्रभदेव**नाम्ना ।
योग्या विशेषविदुषामुपदेशमालावृत्तिः कथाग्रथनतोऽभिनवा वितेने ॥१३॥ [वसन्ततिलका]
प्रथमादर्शे प्रथमानमानसो **देवबोधविबुध** इमाम् ।
स्थपतिरिव स्थापयिता गुरुषु नतोऽतनुत साहाय्यम् ॥१४॥
**चान्द्रे** कुले [२]कलशतः किल **सूरिदेवानन्दाग्र्यशिष्यकनकप्रभसूरि**नाम्नः ।
**प्रद्युम्नसूरि**रुदितः कवितासमुद्रो मुष्टिंधयोऽम्बुवदशोधयदेष वृत्तिम् ॥१५॥ [वसन्ततिलका]
उत्सेकितोत्सूत्रनिरूपणाद्यैर्याऽऽशातना स्यात्तनु कापि काचित् ।
मिथ्याऽस्तु मे दुष्कृतमत्र साक्षी श्रीसङ्घभट्टारक एव तीर्थम् ॥१६॥ [उपजातिवृत्तिम्]
एकैकेन विमोहशिक्यचरणांश्छि[३]त्त्वा कषायानिमान्,
दीप्ते ध्यानकृशानुधामनि मनश्चैकेन हुत्वाऽऽ[४]त्मना ।
[4]मन्त्रस्याष्टशतीरितीह जपितैस्तैः पञ्चभिः सिद्धये;
गाथाभिर्गुरुगुम्फिता विजयते जाप्योपदेशावलिः ॥१७॥ [शार्दूलविक्रीडितवृत्तम्]
कल्पाऽऽविष्करणादितो विवरणाद्विज्ञाय विज्ञात्मना,
नाम्ना यामुपदेशपद्धतिमिमामासेवमानो मुदा ।

---

१. भ्रांता – C । २. कलसतः – C, L । ३. कं न – C । ४. त्मनः – A, C ।

टि. 1. अनूचानः – समर्थव्याख्याता । 2. 'नेतर' इति भाषायाम् । 3. गवी – वाणी । 4. अनेन ग्रन्थस्यगाथासङ्ख्या उक्ता । (१०८ ×५=५४०)

लोकाग्रोपरि वर्त्तिनीमभिमुखीं कुर्वीत वीतान्यधी-
र्वृत्तिं निर्वृतिदेवतां शिवपुरीसाम्राज्यकाम: कृती ॥१८॥
तत्त्वोदित्वरसप्तभूमिकमहाप्रासादराजाङ्गणम्,
यावद्भाति जगद्गुरोर्भगवतस्तीर्थेशितु: शासनम् ।
तावच्छ्रावकसाधुधर्मविजयस्तम्भद्वयालम्बिनी;
वृत्तिर्वन्दनमालिका विजयतां तत्रोपदेशस्रज: ॥१९॥ [शार्दूलविक्रीडितवृत्तम्]
सेयं पुरे **धवलके** नृपवीरवीर-मन्त्रीशपुण्यवसतौ वसतौ वसद्भि: ।
वर्षे ग्रहग्रहरवौ [१२९९] कृतभार्कसङ्ख्यै: [१२२७४] श्लोकैर्विशेषविवृतिर्विहिताद्भुतश्री: ॥२०॥

**इत्याचार्यश्रीउदयप्रभदेवसङ्घटितायाम्**
**उपदेशमालाया: कर्णिकायां विशेषवृत्तौ तृतीय: परिवेष: सम्पूर्ण: ॥**
**ग्रन्थाग्रं-३७१४ एतावता च सम्पूर्णा उपदेशमालाया: कर्णिकाख्यविशेषवृत्तिरिति**
**आदितो ग्रन्थाग्रं - [१]१२२७४ सर्वसंख्या ॥**

**-: पुष्पिका :-**

यो राज्यं प्रथमं चकार जलधिं कृत्वाऽवधिं लीलया,
शस्त्रैर्वैरिगणं निहत्य सकलं बाह्यं ततोऽभ्यन्तरम् ।
मत्वा जेतुमशक्यमेनमधिकैस्तै[1]र्मात्रया साहसी
यश्चक्रे वशिनामभूदिह पुरा **श्रीनन्नसूरि**प्रभु: ॥१॥ [शा०वि०]

शुभं भवतु लेखकपाठकयोरनुदिनं भूयात् ॥
यादृशं पुस्तके दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥
लग्नपृष्टिकटिग्रीवा, अधोदृष्टिरधोमुखम् । कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥२॥
**कल्याणमस्तु ॥ श्री: ॥**

**संवत् १४७० वर्षे ज्येष्ठ वदि १० बुधेऽद्येह श्रीस्तम्भतीर्थे**
**महाराजाधिराजमुलतानश्री-अहिम्मदस्येह विजयराज्ये श्रीवृद्धतपापक्षे**
**श्रीजयशेखरसूरिशिष्यश्रीजिनरत्नसूरीणां पठनाय ॥**
**श्रीरस्तु ॥**

● ● ●

---

१. १२३७४ - A, १२०२७ - KH, १२१६८ - K ।
टि. 1. तै: शस्त्रै:, किम्भूतै: ? मात्रया अधिकै: = शास्त्रै: ।

# परिशिष्टानि ॥

परिशिष्टम् [ १ ] उपदेशमालायां मूलगाथानामकाराद्यनुक्रमः ॥

परिशिष्टम् [ २ ] उपदेशमालाकर्णिकावृत्तौ उद्धरणानामकाराद्यनुक्रमः ॥

परिशिष्टम् [ ३ ] उपदेशमालाकर्णिकावृत्तौ कतिपयसूक्तिनामकाराद्यनुक्रमः ॥

परिशिष्टम् [ ४ ] उपदेशमालाकर्णिकावृत्तौ कथानकानामनुक्रमः ॥

परिशिष्टम् [ ५ ] उपदेशमालाकर्णिकावृत्तौ विशेषानाम्नामकाराद्यनुक्रमः ॥

परिशिष्टम् [ ६ ] उपदेशमालाटीकादिसाहित्यसूची ॥

# परिशिष्टम्

## [ १ ]

### उपदेशमालायां मूलगाथानामकाराद्यनुक्रमः ॥


| गाथांशः | गाथा/पत्राङ्कम् |
| --- | --- |
| [ अ ] | |
| अंगारजीववहगो | १६८/३२४ |
| अंतेउरपुरबलवाहणेहिं | ४९/१६६ |
| अइसुट्ठिओ त्ति गुणसमुइओ त्ति | ६८/१९६ |
| अक्कोसणतज्जणताडणाओ | १३६/२३६ |
| अक्खरमत्ताहीणं | ५४४/४७८ |
| अच्चणुरत्तो जो पुण | ५२२/४७२ |
| अच्चिय-वंदिय-पूइय | १८७/३६७ |
| अट्टट्टहासकेलीकिलत्तणं | ३१६/४१२ |
| अट्ठमछट्ठचउत्थं | ३७०/४२९ |
| अणवट्ठिइं मणो | ४८६/४६४ |
| अणुगम्मइ भगवई | १३/८६ |
| अणुराएण जइस्स वि | १४१/२३९ |
| अणुवत्तगा विणीया | ९७/२१० |
| अणुसिट्ठा य बहुविहं | २१६/३७५ |
| अन्नोन्नजंपिएहिं | २२४/३७७ |
| अपरिच्छियसुयनिहसस्स | ४१५/४३९ |
| अपरिस्सावी सोमो | ११/८३ |
| अप्पहियमायरंतो | १०८/२२० |
| अप्पा चेव दमेयव्वो | १८५/३६७ |
| अप्पा जाणइ अप्पा | २३/१०० |
| अप्पागमो किलिस्सइ | ४१४/४३९ |
| अप्पेण वि कालेणं | २५२/३९३ |
| अबहुस्सुओ तवस्सी | ४१२/४३८ |
| अभिगमण-वंदण-नमंसणेण | १६६/३२२ |
| अमुणियपरमत्थाणं | १४३/२४१ |
| अरसं विरसं लूहं | ३२५/४१४ |
| अरहंतचेइयाणं | ५०२/४६८ |
| अरहंता भगवंतो | ४४८/४५२ |
| अलसो सढोऽवलित्तो | ३८५/४३२ |
| अवरोप्परसंबाहं | १५५/३१४ |
| अवि इच्छंति य मरणं | ४४५/४४९ |
| अवि नाम चक्कवट्टी | २५५/३९४ |
| अविकत्तिऊण जीवे | ११२/२२४ |
| अस्संजएहिं सव्वं खइयं | ४९८/४६७ |
| अह जीवियं निकिंतइ | १३५/२३६ |
| अहमाहउ त्ति न य | १३७/२३८ |
| अहियं मरणं अहियं च | ४४४/४४९ |
| [ आ ] | |
| आउं संविल्लंतो | ४६७/४५९ |
| आजीवगगणनेया | ४५९/४५४ |
| आजीवसंकिलेसो | २८२/४०३ |
| आणं सव्वजिणाणं | ५००/४६७ |
| आणाइ च्चिय चरणं | ५०५/४६८ |
| आमुक्कजोगिणो च्चिय | ५२८/४७४ |
| आयरतरसम्माणं | ५२४/४७३ |
| आयरियभत्तिरागो | १००/२११ |
| आरंभपायनिरया | ४६२/४५७ |
| आलावो संवासो | २२३/३७७ |
| आसन्नकालभवसिद्धियस्स | २९०/४०५ |
| आसायण मिच्छत्तं | ४१०/४३८ |
| आहारेसु सुहेसु अ | ४०/१३९ |
| [ इ ] | |
| इंदियकसायगारवमएहिं | ४६०/४५७ |
| इक्कस्स कओ धम्मो | १५६/३१४ |
| इच्छइ य देसयत्तं | ४०६/४३७ |

इत्थ समप्पइ इणमो ५४२/४७८
इत्थिपसुसंकिलिट्ठं ३३४/४२१
इय गणियं इय तुलियं ४८१/४६२
इय धम्मदासगणिणा ५४०/४७७
इह लोए आयासं १२७/२३४
ईसाविसायमयकोह २८७/४०४

[ उ ]

उग्गाइ गाइ हसई य ३७३/४२९
उच्चारपासवणखेलजल्ल ३००/४०९
उच्चारपासवणवंत १५९/३१५
उच्चारे पासवणे ३६७/४२८
उच्छूढसरीरघरा ८९/२०८
उज्झेज्ज अंतरे च्चिय २५४/३९४
उड्ढमहतिरियनरया ३३९/४२२
उत्तमकुलप्पसूया १५४/३११
उवएसं पुण तं दिंति ४४९/४५२
उवएसमालमेयं ५३६/४७६
उवएससहस्सेहिं वि ३१/१११
उव्वीलण-सूअण-परिभवेहिं ७७/१९९
उव्वेवओ य अरणामओ य ३१८/४१३
उस्सुत्तमायरंतो २२१/३७७

[ ए ]

एए दोसा जम्हा ४११/४३८
एएसु जो न वट्टिज्जा ३१०/४११
एक्कं पि नत्थि जं सुट्ठु ४६८/४५९
एगंतनिअयवासी १११/२२४
एगदिवसं पि जीवो ९०/२०८
एगदिवसेण बहुया १६०/३१५
एगागी पासत्थो ३८७/४३३
एयं पि नाम नाऊण ३२२/४१४
एवं तु पंचहिं आसवेहिं २१४/३७५
एवमगीयत्थो वि हु ४०७/४३७
एस कमो नरएसु वि २७६/४०२

[ ओ ]

ओसन्नचरणकरणं २२८/३८०
ओसन्नया अबोही य ३५०/४२५
ओसन्नविहारेणं १९३/३७०
ओसन्नस्स गिहिस्स व ३५२/४२६
ओसन्नो अत्तट्ठा ५१७/४७१

[ क ]

कंचणमणिसोवाणं ४९४/४६६
कंतारोहमद्धाण ५२३/४७२
कइया वि जिणवरिंदा १२/८६
कक्खडदाहं सामलि २८०/४०३
कज्जे भासइ भासं २९७/४०७
कज्जेण विणा उग्गह ३६६/४२८
कडुयकसायतरूणं ३६/१३५
कत्तो चिंता सुचरियतवस्स ४७०/४५९
कत्तो सुत्तत्थागम १५७/३१४
कप्पाकप्पं एसणमणेसणं ४१७/४४०
कम्माण सुबहुयाणुवसमेण ५३५/४७६
कम्मेहिं वज्जसारोवमेहिं २५०/३९३
कलहणकोहणसीलो १३१/२३५
कलुसीकओ य किट्टीकओ य २४९/३९२
कह कह करेमि कह मा करेमि ४७५/४६१
कह तं भन्नइ सोक्खं ३०/१११
कह य जयंतो साहू ३९१/४३६
कह सो जयइ अगीओ ४०८/४३८
काऊण संकिलिट्ठं २५३/३९३
कारणनीयावासे ११०/२२३
कारणविऊ कयाई ९५/२०९
कारुण्णरुण्णसिंगारभाव १०७/२१९
कालस्स य परिहाणी २९४/४०६
किं आसि नंदिसेणस्स ५३/१६८
किं परजणबहुजाणावणाहिं २०/८९
किं पि कहिं पि कयाई १८०/३३३
किं मूसगाणं अत्थेण ५२९/४७५
किं लिंगविड्डुरीधारणेण ४३६/४४४
किं सक्का वोत्तुं जे ३५/१३४
किमगं तु पुणो जेणं ४८२/४६३
कीवो न कुणइ लोयं ३५६/४२६
कुच्छा विलीणमलसंकडेसु ३२१/४१३
कुलघरनिययसुहेसु य १५२/२७४
कुसमयसुईण महणं २७१/४०१
के इत्थ करेंतिऽऽलंबणं १७९/३३२
केई सुसीलसुहम्माइसज्जणा १६७/३२३
केसिंचि परो लोगो ४४०/४४५
केसिंचि वरं मरणं ४३९/४४५

केहिवि सव्वं खइयं ४९६/४६७
को तेण जीवरहिएण संपयं २५७/३९५
को दाही उवएसं ४९०/४६५
को दुक्खं पाविज्जा १२९/२३५
कोडीसएहिं धणसंचयस्स ४८/१४६
कोहो कलहो खारो ३०२/४१०
कोहो माणो माया ३०१/४०९
[ ख ]
खर-करह-तुरग-वसभा १८३/३६६
खित्ताईयं भुंजइ ३६२/४२८
[ ग ]
गच्छगओ अणुओगी ३८८/४३३
गयकन्नचंचलाए ३२/१२८
गामं देसं च कुलं ३५७/४२७
गारवतियपडिबद्धा ४२२/४४१
गिरिसुयपुप्फसुआणं २२७/३७८
गीयत्थं संविग्गं ३७६/४३०
गुज्झोरुवयणकक्खोरुअंतरे ३३७/४२१
गुणदोसबहुविसेसं ३१५/४१२
गुणहीणो गुणरयणायरेसु ३५१/४२५
गुरु गुरुतरो य अइगुरू १४२/२४०
गुरुपच्चक्खाणगिलाण ३७८/४३०
गुरुपरिभोगं भुंजइ ३७७/४३०
[ घ ]
घेत्तूण वि सामन्नं २५९/३९६
घोरे भयागरे सागरम्मि ३१४/४१२
[ च ]
चंदो व्व कालपक्खे ४७७/४६१
चरणकरणपरिहीणो ४२८/४४२
चरणकरणालसाणं ५३०/४७५
चरणाइयारो दुविहो ३९६/४३५
चारगनिरोहवहबंध २८३/४०३
चिंतासंतावेहि य २८४/४०४
चोरिक्कवंचणाकूडकवड ४५७/४५४
[ छ ]
छक्कायरिऊण अस्संजयाण ४३५/४४४
छज्जीवकायवहगा ८२/२०१
छज्जीवकायविरओ ४४१/४४९
छज्जीवनिकायदयाविवज्जिओ ४३०/४४३
छज्जीवनिकायमहव्वयाण ४२९/४४२
छल छउम संवइयरो ३०७/४१०
छेओ भेओ वसणं ५०/१६७
[ ज ]
जं आणवेइ राया ७/८२
जं जं नज्जइ असुइं २०९/३७३
जं जं समयं जीवो २४/१०१
जं जयइ अगीयत्थो ३९८/४३६
जं णेण जलं पीयं २००/३७१
जं तं कयं पुरा पूरणेणं १०९/२२२
जं न लहइ सम्मत्तं १२४/२३४
जंतेहिं पीलिया वि हु ४२/१३९
जइ गिण्हइ वयलोवो २२२/३७७
जइ ठाणी जइ मोणी ६३/१९५
जइ ता असक्कणिज्जं ३४४/४२३
जइ ता जणसंववहार ७१/१९७
जइ ता तणकंचण ४५८/४५४
जइ ता तिलोयनाहो वि ४/८१
जइ ता लवसत्तमसुर २९/१११
जइ ताव सुव्वओ सुंदरो त्ति ६७/१९६
जइ दुक्करदुक्करकारओ त्ति ६६/१९६
जइ न तरसि धारेउं ५०१/४६८
जइ सव्वं उवलद्धं ४८३/४६३
जइयाऽणेणं चत्तं ४३४/४४३
जगचूडामणिभूओ २/५
जस्स गुरुम्मि न भत्ती ७५/१९९
जस्स गुरुम्मि परिभवो २६३/३९६
जह उज्जमिउं जाणइ ४२०/४४१
जह कच्छुल्लो कच्छुं २१२/३७४
जह चक्कवट्टिसाहू ५८/१८३
जह चयइ चक्कवट्टी १७३/३३१
जह जह कीरइ संगो ११६/२२७
जह जह खमइ सरीरं ३४३/४२३
जह जह बहुस्सुओ सम्मओ ३२३/४१४
जह जह सव्वुवलद्धं ४८७/४६५
जह दाइयम्मि वि पहे ४१६/४४०
जह नाम कोइ पुरिसो ४०५/४३७
जह मूलताणए पंडुरम्मि २७३/४०२
जह वणदवो वणं १३२/२३५

जह सरणमुवगयाणं ५१८/४७१
जह सुरगणाण इंदो ८/८२
जहट्ठियखित्त न याणइ ४०२/४३६
जहट्ठियदव्व न याणइ ४०१/४३६
जहा खरो चंदणभारवाही ४२६/४४२
जाइ-कुल-रूव-बल-सुय ३३०/४१६
जाईए उत्तमाए ३३१/४१६
जाणइ य जह मरिज्जइ २०५/३७२
जाणइ य जहा भोगिड्ढि २०३/३७२
जाणिज्जइ चिंतिज्जइ २०४/३७२
जायम्मि देहसंदेहयम्मि ३४५/४२४
जाव य लवणसमुद्दो ५४३/४७८
जावाऽऽउ सावसेसं २५८/३९५
जिणपहमपंडियाणं १७६/३३१
जिणवयणकप्परुक्खो ५३८/४७७
जिणवयणसुइसकण्णा ४३/१४२
जियकोहमाणमाया ३९०/४३४
जीयं काऊण पणं १०५/२१८
जीवंतस्स इह जसो ९८/२१०
जीवेण जाणि उ विसज्जियाणि १९७/३७१
जीवो जहामणसियं १८९/३६८
जुगमित्तंतरदिट्ठी २९६/४०६
जे घरसरणपसत्ता २२०/३७६
जे ते सव्वं लहिउं ४९१/४६७
जेट्ठव्वयपव्वयभर ६२/१९५
जो अविकलं तवं संजमं १७१/३३०
जो आगलेइ मत्तं ३१२/४११
जो कुणइ अप्पमाणं ६१/१८४
जो गिण्हइ गुरुवयणं ९६/२१०
जो चंदणेण बाहुं ९२/२०८
जो चयइ उत्तरगुणे ११७/२२८
जो जस्स वट्टए हियए ८४/२०२
जो जहवायं न कुणइ ५०४/४६८
जो न वि दिणे दिणे ४८०/४६२
जो निच्चकालतवसंजमोज्जओ ३४०/४२२
जो निच्छएण गिण्हइ ११८/२२८
जो नियमसीलतवसंजमेहिं ४५५/४५३
जो पुण निरच्चणो च्चिय ४९३/४६६
जो भासुरं भुयंगं ३११/४११
जो वि य पाडेऊणं ३८६/४३२
जो सुत्तत्थविणिच्छयकयागमो ४३७/४४४
जो सेवइ किं लहइ २११/३७४
जो हुज्ज उ असमत्थो ३८३/४३१
जोइसनिमित्तअक्खर ११५/२२७
जोग्गा सुसाहुवेरग्गियाण ५३९/४७७
[ ठ ]
ठवणकुले न ठवेई ३६३/४२८
ठाणं उच्चुच्चयरं २६२/३९६
[ त ]
तं सुरविमाणविभवं २८६/४०४
तम्हा सव्वाणुण्णा ३९२/४३४
तवकुलच्छायाभंसो ३२७/४१५
तवनियमसीलकलिया २४६/३८६
तवनियमसुट्ठियाणं ४४३/४४९
तह छक्कायमहव्वय ४३२/४४३
तह पुव्विं किं न कयं १४०/२३९
तह वत्थपायदंडगउवगरणे ४४७/४५२
तह वि हु सा रायसिरी १८/८८
तिरिया कसंकुसारा २८१/४०३
तिव्वयरे उ पओसे १७८/३३२
ते धन्ना ते साहू ५९/१८४
तो पढियं तो गुणियं ६४/१९५
तो बहुगुणनासाणं १२५/२३४
तो हयबोही पच्छा ४३३/४४३
[ थ ]
थद्धा च्छिद्दप्पेही ७४/१९९
थद्धो निरोवयारी २७/१०१
थेवेण वि सप्पुरिसा २८/१०२
थेवोऽवि गिहिपसंगो ११३/२२४
[ द ]
दगपाणं पुप्फफलं ३४९/४२५
दट्ठूणं कुलिंगीणं २३२/३८१
दड्ढजउमकज्जकरं ४८१/४६५
दढसीलव्वयनियमो २३४/३८१
दव्वं खित्तं कालं भावं ४००/४३६
दस दस दिवसे दिवसे २४८/३८९
दावेऊण धणनिहिं २६१/३९६
दिणदिक्खियस्स दमगस्स १४/८७

दिव्वालंकारविभूसणाइं २७७/४०२
दीसंति परमघोरा वि ३८/१३५
दुक्करमुद्धोसकरं ८८/२०७
दुज्जणमुहकोदंडा १३८/२३९
दुपयं चउप्पयं बहुपयं २०६/३७३
देवा वि देवलोए २८५/४०४
देवाण देवलोए २७८/४०३
देवेहिं कामदेवो १२१/२३०
देवो नेरइउ त्ति य ४५/१४५
देसियराइयसोहिं ४१३/४३९
देहो पिपीलियाहिं १७४/३३१
दो चेव जिणवरेहिं ४९१/४६६
दोससयमूलजालं ५१/१६७

[ ध ]

धंतमणिदामससिगय ५३७/४७७
धम्मं पि नाम नाऊण २८८/४०४
धम्मं रक्खइ वेसो २२/१००
धम्मकहाओ अहिज्जइ ३७४/४३०
धम्मत्थकाममुक्खेहिं ५३२/४७५
धम्ममइएहिं अइसुंदरेहिं १०४/२१७
धम्ममिणं जाणंता १२०/२२९
धम्मम्मि नत्थि माया ३९३/४३४
धम्मो पुरिसप्पभवो १६/८८
धम्मो मएण हुंतो २५/१०१
धिद्धी अहो अकज्जं १२८/२३४

[ न ]

न करंति जे तवं संजमं ८६/२०२
न करेइ पहे जयणं ३६८/४२९
न करेमि त्ति भणित्ता ५०७/४६९
न कुलं एत्थ पहाणं ४४/१४२
न चइज्जइ चालेउं ५/८२
न तहिं दिवसा पक्खा ४७९/४६२
न य नज्जइ सो दियहो २०७/३७३
न वि इत्थ को वि नियमो ४७/१४५
न वि तं कुणइ अमित्तो १२६/२३४
न वि धम्मस्स भडक्का ३९४/४३५
नमिऊण जिणवरिंदे १/४
नरएसु जाइं अइकक्खडाइं २७९/४०३
नरएसु सुरवरेसु य २७४/४०२
नरयगइगमणपडिहत्थए १०३/२१७
नरयत्थो ससिराया २५६/३९५
नरयनिरुद्धमईणं ४४२/४४९
नह-दंत-मंस-केस-ऽट्ठिएसु १९८/३७१
नहदंतकेसरोमे जमेइ ३५८/४२७
नाऊण करयलगयाऽऽमलं व ५३१/४७५
नाणं चरित्तहीणं ४२५/४४२
नाणाहिओ वरतरं ४२३/४४१
नाणाहियस्स नाणं ४२४/४४२
नाणे दंसण-चरणे २१८/३७६
नाहम्मकम्मजीवी २३५/३८२
निक्खमण-नाण-निव्वाण २३६/३८३
निग्गंतूण घराओ १९२/३७०
निच्चं दोससहगओ १८६/३६७
निच्चं पवयणसोहाकराण ३४७/४२४
निच्चं संकियभीओ २२६/३७८
निच्छयनयस्य चरणस्सुवघाए ५१२/४७०
निच्छोडण निब्भंच्छण ३०३/४१०
निब्बीए दुब्भिक्खे ४९५/४६७
निम्मम निरहंकारा ३८९/४३३
नियगमइविगप्पिय २६/१०१
नियया वि नियमकज्जे १५१/२७१
निहयाणिहयाणि य इंदियाणि ३२९/४१६
निहिसंपत्तमहन्नो १८१/३६४
नीयं गिण्हइ पिंडं ३७१/४२९

[ प ]

पंचसमिया तिगुत्ता ३९१/४३४
पंचिंदियत्तणं माणुसत्तणं ४६६/४५८
पंचेव उज्झिऊणं २१७/३७५
पडिरूवो तेयस्सी १०/८३
पडिवज्जिऊण दोसे ३४/१३४
पडिसेवणा चउद्धा ४०४/४३७
पढइ नडो वेरग्गं ४७४/४६०
पढमं जईण दाउण २३८/३८४
पणमंति य पुव्वयरं ५७/१८३
पत्ता य कामभोगा २०२/३७२
पत्थरेणाहओ कीवो १३९/२३९
परतित्थियाण पणमण २३७/३८३
परपरिवायं गेण्हइ ६९/१९७

परपरिवायमईओ ७३/१९८
परपरिवायविसाला ४६१/४५७
परिचिंतिऊण निऊणं ५११/४७०
परिणामवसेण पुणो १३३/२३५
परितप्पिएण तणुओ १९६/३७१
परिभवइ उग्गकारी ३७२/४२९
परियच्छंति य सव्वं ८३/२०१
परियट्टिऊण गंथत्थवित्थरं ४७३/४६०
पलिओवमसंखिज्जं २७५/४०२
पवराइं वत्थपायासणोवगरणाइं ३२४/४१४
पव्वावणविहिमुट्ठावणं च ४१८/४४०
पहगमणवसहिआहार ३७९/४३१
पागडियसव्वसल्लो ६५/१९६
पाणच्चाए वि पावं १७५/३३१
पायपहे न पमज्जइ ३६०/४२७
पाविज्जइ इह वसणं ४६४/४५८
पावो पमायवसओ १९५/३७०
पासत्थोसन्नकुसील ३५३/४२६
पिल्लिज्जेसणमिक्को १५८/३१४
पीयं थणयच्छीरं २०१/३७१
पुण्णेहिं चोइआ पुरकडेहिं १०१/२१४
पुप्फियफलिय तह ३९/१३८
पुरनिद्धमणे जक्खो १९१/३६८
पुव्वरयाणुस्सरणं ३३५/४२१
पुव्विं चक्खुपरिक्खिय २९९/४०९

[ फ ]

फरुसवयणेण दिणतवं १३४/२३६
फुडपागडमकहेंतो १०६/२१९

[ ब ]

बहुदोससंकिलिट्ठो ४३८/४४४
बहुसोक्खसयसहस्साण १०२/२१४
बायालमेसणाओ २९८/४०७
बायालमेसणाओ ३५४/४२६
बारस बारस तिन्नि य ३७५/४३०
बालु त्ति महीपालो ९/८३

[ भ ]

भज्जा वि इंदियविगार १४८/२६२
भद्दो विणीयविणओ ६/८२
भयसंखोहविसाओ ३२०/४१३
भवसयसहस्सदुल्लहे १२३/२३४
भावच्चणमुग्गविहारिया य ४९२/४६६
भावे हट्ठगिलाणं न वि ४०३/४३७
भिक्खू गीयमगीए ३९५/४३५
भीउव्विग्गनिलुक्को ४७८/४६१
भोगे अभुंजमाणा वि १२२/२३३

[ म ]

मउया निहुयसहावा ७९/२००
मणिकणगरयणधणपूरियम्मि ८५/२०२
महव्वयअणुव्वयाइं ५०९/४६९
महिलाण सुबहुयाण वि १९/८८
महुरं निउणं थोवं ८०/२००
मा कुणउ जइ तिगिच्छं ३४६/४२४
माणंसिणो वि अवमाण ७८/२००
माणी गुरुपडणीओ १३०/२३५
माणो मयहंकारो ३०४/४१०
माया नियगमइविगप्पियम्मि १४५/२४१
माया पिया य भाया १४४/२४१
मायाकुडंग पच्छन्नपावया ३०६/४१०
मिणु गोणसंगुलीहिं ९४/२०९
मुक्का दुज्जणमित्ती २४५/३८६
मुच्छा अइबहुधणलोभया य ३०९/४११
मोलगकुदंडगादामगाणि ४४६/४५१

[ र ]

रयणुज्जलाइं जाइं ४५१/४५२
राउ त्ति य दमगु त्ति य ४६/१४५
रायकुलेसु वि जाया ५६/१८३
राया जिणवरचंदो ४९७/४६७
रीयए दवदवाए ३६४/४२८
रूवेण जुव्वणेण य १५३/२७९
रूसइ चोइज्जंतो ७६/१९९

[ ल ]

लद्धिल्लियं च बोहिं २९२/४०५
लद्धूण तं सुइसुहं ४५३/४५३
लुद्धा सकज्जतुरिआ १५०/२६६
लोए वि कुसंसग्गीपियं २२५/३७८
लोए वि जो ससूगो ५०८/४६९
लोभो अइसंचयसीलया ३०८/४११

[ व ]
वंदइ उभओ कालं पि २३०/३८०
वंदइ न य वंदावइ ५१६/४७१
वंदइ पडिपुच्छइ २३३/३८१
वग्घमुहंमि अइगओ ४७२/४६०
वच्चइ खणेण जीवो ४६५/४५८
वज्जंतो अ विभूसं ३३६/४२१
वत्थि व्व वायपुण्णो ३८१/४३१
वरं मे अप्पा दंतो १८४/३६६
वरमउडकिरीडधरो ४५०/४५२
वसही-सयणा-ऽसण २४०/३८४
वह-मारण-अब्भक्खाणदाण १७७/३३२
वहबंधणमारणसेहणाओ ५२/१६७
वाससहस्सं पि जई २५१/२९३
विकहं विणोयभासं ४८५/४६४
विग्गहविवायरुइणो ७०/१९७
विज्जं मंतं जोगं ३६५/४२८
विज्जप्पो जह जह ४८८/४६५
विज्जाए कासवसंतियाए २६७/४००
विज्जाहरीहिं सहरिसं ५४/१६८
विणओ आवहइ सिरिं ३४२/४२३
विणओ सासणे मूलं ३४१/४२३
विरया परिग्गहाओ २४४/३८५
विरया पाणिवहाओ २४३/३८५
विसयविसं हालहलं २१३/३७४
विसयसुहरागवसओ १४७/२४४
विसयाऽसिपंजरमिव ६०/१८४
विसवल्लिमहागहणं ३१३/४११
विससयदिक्खियाए १५/८७
वुड्ढावासे वि ठियं ९१/२१०
वेसं जुन्नकुमारिं १६२/३१७
वेसो वि अप्पमाणो २१/१००
वोत्तूण वि जीवाणं ३३/१२९
[ स ]
संघयणकालबल २९३/४०६
संजमतवालसाणं ५३३/४७६
संजोयइ अइबहुयं ३६९/४२९
संझरागजलबुब्बुओवमे २०८/३७३
संतिकरी वुड्ढिकरी ५४१/४७८
संते वि को वि उज्झइ ३७/१३५
संपागडपडिसेवी ४२७/४४२
संवच्छर-चाउम्मासिएसु २४१/३८५
संवच्छरमुसभजिणो ३/५
संवाहणस्स रन्नो १७/८८
संविग्गपक्खियाणं ५१४/४७१
संसारचाराए चारए व्व २८९/४०५
संसारमणवयग्गं ३३२/४१६
संसारवंचणा न वि १७०/३२६
संसारसागरमिणं ५२१/४७२
संसारो य अणंतो ५०६/४६९
सच्छंदगमणउट्ठाणसोवणो ३८०/४३१
सच्छंदगमणउट्ठाणसोवणो ३८२/४३१
सज्झाएण पसत्थं ३३८/४२२
सट्ठिं वाससहस्सा ८१/२००
सद्दहणायरणाए २१९/३७६
सद्देसु न रज्जिज्जा ३२८/४१५
सपरक्कमराउलवाइएण ५५/१८१
सब्भावो वीसंभो ११४/२२७
समिई-कसाय-गारव २९५/४०६
सम्मत्तंमि उ लद्धे २७०/४०१
सम्मत्तदायगाणं २६९/४०१
सम्मद्दिट्ठी वि कयागमो वि १६४/३१७
सयलम्मि वि जियलोए २६८/४०१
सविडंकोब्भडरूवा १६३/३१७
सव्वं ति भाणिऊणं ५०३/४६८
सव्वं थोवं उवहिं ३६१/४२७
सव्वंगोवंगविगत्तणाओ १४६/२४१
सव्वगईपक्खंदे २१५/३७५
सव्वगहाणं पभवो २१०/३७४
सव्वजिणपडिकुट्ठं १६१/३१५
सव्वाओगे जह कोइ ४३१/४४३
सव्वो गुणेहिं गण्णो ४५६/४५४
सव्वो न हिंसियव्वो ४६३/४५८
सारणचइया जे गच्छनिग्गया ५२५/४७३
सारीरमाणसाणं २६४/३९७
सावज्जजोगपरिवज्जणाए ५११/४७२
सासयसुक्खतरस्सी १४९/२६२
साहंति य फुडवियडं ४७१/४६०

साहू कंतार-महाभएसु ४१/१३९
साहूण कप्पणिज्जं २३९/३८४
साहूण चेइयाण य २४२/३८५
साहूणं अप्परई ३१७/४१२
सिढिलो अणायरकओ ४७६/४६१
सिप्पाणि य सत्थाणि य ४२१/४४१
सीउण्हखुप्पिवासं ११९/२२९
सीएज्ज कयाइ गुरू २४७/३८६
सीलव्वयाइं जो बहुफलाइं १८८/३६७
सीसायरियकमेण य ४१९/४४०
सीसावेढेण सिरम्मि ९१/२०८
सीहगिरिसुसीसाणं भद्दं ९३/२०९
सीहासणे निसन्नं २६६/३९८
सुंकाईपरिसुद्धे सइ लाभे ५२७/४७४
सुंदरसुकुमालसुहोइएण ८७/२०२
सुज्झइ जई सुचरणो ५१३/४७०
सुट्ठु वि उज्जममाणं ७२/१९८
सुट्ठु वि जई जयंतो ३३३/४१७
सुतवस्सियाण पूया १६५/३२१
सुत्ते य इमं भणियं ४०९/४३८
सुद्धं सुसाहुधम्मं ५१५/४७१
सुपरिच्छियसम्मत्तो २७२/४०१
सुबहुं पासत्थजणं ५१०/४७०
सुमिणंतराणुभूयं १९०/३६८
सुरवइसमं विभूइं ४५२/४५३
सुविणिच्छियएगमई २३१/२८०
सुविहियवंदावेंतो २२९/३८०
सुस्सूसई सरीरं ३२६/४१४
सुहिओ न चयइ भोए १७२/३३१
सूरप्पमाणभोई ३५५/४२६
सूल-विस-अहि-विसूइय ४६९/४५९
सेसा मिच्छद्दिट्ठी ५२०/४७२
सेसुक्कोसो मज्झिम ३९७/४३५
सो उग्गभवसमुद्दे १६९/३२५
सो वि य नियपरक्कम ३८४/४३२
सोऊण गइं सुकुमालियाए १८२/३६५
सोऊण पगरणमिणं ५३४/४७६
सोगं संतावं अद्धिइं च ३१९/४१३
सोग्गइमग्गपईवं २६५/३९७
सोच्चा ते जियलोए २६०/३९६
सोवइ य सव्वराइं ३५९/४२७

[ ह ]

हत्थे पाए न खिवे ४८४/४६३
हा ! जीव ! पाव भमिहिसि १९४/३७०
हिमवंत-मलय-मंदर १९९/३७१
हियमप्पणो करिंतो ४५४/४५३
हीणस्स वि सुद्धपरूगवगस्स ३४८/४२४
हीणस्स वि सुद्धपरूवगस्स ५२६/४७४
हीला निरोवयारित्तणं ३०५/४१०
होज्ज व न व देहबलं २९१/४०५


• • •

# परिशिष्टम्

## [ २ ]

## उपदेशमालाकर्णिकावृत्तौ उद्धरणानामकाराद्यनुक्रमः ॥


| उद्धरणांशः | ग्रन्थनाम | पत्राङ्कम् |
|---|---|---|
| [ अ ] | | |
| अइसुद्धिओ त्ति गुणसमुइओ त्ति | [ उप.मा./६८ ] | १५ |
| अकर्त्तव्यं न कर्त्तव्यं | [ ] | ४४९ |
| अत्थं भासइ अरिहा | [ आ.नि./९२ पूर्वा. ] | ४७७ |
| अधर्माणि च कर्माणि | [ ] | ३८३ |
| अनागतमतीतं च नार्थकारी | [ ] | ३६८ |
| अनोवृषखरोष्ट्राश्व- | [ ] | ३८३ |
| अप्पच्छित्ते य पच्छित्तं | [ बृ.क./६४२२ ] | ४३८ |
| अमांसभक्षणं नृणाम् | [ ] | ३८२ |
| अमांसाशी जगद्बन्धुः | [ ] | ३८२ |
| असंकिलिट्ठेहिं समं वसिज्जा | [ द.वै.चू.२-गा.९ उत्त. ] | ३७७ |
| अहिंसालक्षणं धर्म | [ ] | ३८२ |
| आउट्टिया उवेच्चा | [ य.स./१०० ] | ४३७ |
| [ आ ] | | |
| आकरे दन्तकेशास्थि- | [ ] | ३८३ |
| आघातं नीयमानस्य | [ ] | ३७३ |
| आणाए अमुक्कधुरा | [ ] | ४३४ |
| आणाए अवहंतं | [ दं.प्र./१९५ ] | ३१७ |
| आलू तह पिंडालू | [ प्र.सा./२४० ] | ३८२ |
| आहाकम्मुद्देसिय | [ पि.नि./९२ ] | ४०७ |
| [ इ ] | | |
| इ-जे-राः पादपूरणे | [ सिद्धहे./८/२-२१७ ] | ४३१ |
| इक्केण कयमकज्जं | [ ] | ३१५ |
| इच्छा हु आगाससमा अणंतिआ | [ ] | ३८५ |
| इय सोलस सोलस | [ पि.वि./९३ ] | ४०९ |
| [ उ ] | | |
| उग्रं तपः कपटता- | [ ] | ४१५ |
| उचितादहिताद्धीमान् | [ आयुर्वेदे ] | ४७५ |
| उदाहरणसाधर्म्यात् | [ न्यायभाष्ये ] | २१५ |
| [ ए ] | | |
| एगखित्तविहारी | [ ] | ४३४ |
| एवमेवगओ जम्मो | [ ] | ४५९ |
| [ क ] | | |
| कणोत्पेषादिभिः | [ ] | ३८३ |
| कण्टकेनापि ये स्पृष्टाः | [ ] | ३८२ |
| कथं तोषयितुं शक्यः | [ ] | ३६८ |
| कप्पा आयप्पमाणा | [ ओ.नि./७०६ पूर्वा. ] | ४३० |
| करोति मातेव हितानि साधोः | [ ] | ३८४ |
| कविला इत्थं पि इहयं पि | [ महावीरचरिते ] | २१९ |
| कायप्पयोगसुयवय- | [ ] | ८४ |
| कारणपडिसेवा वि हु | [ नि.भा./४५९ ] | ४२४ |
| कालतियं लिङ्गतियं | [ प्र.सा./८९६ ] | ४०७ |
| काले कलौ खले लोके | [ ] | ४२५ |
| क्रतुनिर्विघ्नसंभारः | [ ] | ३८२ |
| [ क्ष ] | | |
| क्षेत्रकूपतडागादिकरणे | [ ] | ३८३ |
| [ ख ] | | |
| खंडइ पीसइ भुंजइ | [ पि.वि./८६ ] | ४०९ |
| खण्डनी पेषणी चुल्ली | [ ] | ३८२ |
| [ ग ] | | |
| गता ये पूज्यत्वं | [ ] | ४५३ |
| गिरिकन्नि किसलयपत्ता | [ प्र.सा./२३८ ] | ३८२ |
| गुणपरिवुड्ढिनिमित्तं | [ ] | ४३४ |
| गुणसुट्ठियस्स वयणं | [ ] | ८६ |

| | | |
|---|---|---|
| गुणान्विमुच्य यो दोषान् | [ ] | १९८ |
| गूढसिरसंधिपव्वं | [ प्र.सा./२४२ ] | ३८२ |
| गूढसिरागं पत्तं सच्छीरं | [ प्र.सा./२४४ ] | ३८२ |
| [ घ ] | | |
| घटनाच्छकटाङ्गानां | [ ] | ३८३ |
| घोसाडकरीरंकुरतिंदुअ | [ प्र.सा./२४१ ] | ३८२ |
| [ च ] | | |
| चउहिं ठाणेहिं जीवा | [ स्था.४/४/३७३ ] | ३८५ |
| चक्कं व भज्जमाणस्स | [ प्र.सा./२४३ ] | ३८२ |
| चारित्रेण विहीनः | [ ] | ८६ |
| [ ज ] | | |
| जं जह सुत्ते भणियं | [ बृ.क./३३१५ ] | ४३९ |
| जं सक्कइ तं कीरइ | [ सं.प्र./८९४ ] | ३७६ |
| जइ वि हु समणुण्णाया | [ नि.भा./४६० ] | ४२४ |
| जिअपरिसो जिणनिद्दो | [ सं.प्र./६०१ ] | ८५ |
| जिणा बारसरूवाइं | [ ओ.नि./६७२ ] | ४३० |
| जितं दशार्णभद्रेण | [ ] | ४१५ |
| जे इह होंति सुपुरिसा | [ पञ्चा./५३० ] | ३१५ |
| जे उ तह विवज्जत्था | [ पञ्चा./५३१ ] | ३१५ |
| [ ठ ] | | |
| ठवइ बलिं उअत्तइ | [ पि.वि./८८ ] | ४०९ |
| [ त ] | | |
| तह छक्काए गेण्हइ | [ पि.वि./८७ ] | ४०९ |
| तृष्णा खानिरगाधेयं | [ ] | ३८५ |
| तेसिं बहुमाणेणं | [ पञ्चा./५३३ ] | ३१६ |
| त्वदाम्नायपराधीनान् धन्यान् | [ ] | ४३९ |
| [ थ ] | | |
| थेर-अपहुपंड-वेविर- | [ पि.वि./८५ ] | ४०८ |
| [ द ] | | |
| दंसण-नाण-चरित्ताऽऽयारा | [ आ.वि./१४ ] | ८६ |
| दधिवाहनपुत्रेण | [ ] | ३३८ |
| दवदानं विशुद्धात्मा | [ ] | ३८३ |
| दिवसरजनिसारैः सारितं | [ ] | ४१५ |
| देसकुलजातिरूवी- | [ सं.प्र./६०० ] | ८५ |
| दोषाः प्ररूपिता ये तु | [ ] | ४२५ |
| [ ध ] | | |
| धन्यस्योपरिनिपतत्यहित- | [ प्र.र./७० ] | ३८६ |
| धर्मबाधाकरीमन्यामपि | [ ] | ३८३ |
| धाई दूइ निमित्ते | [ पि.नि./४०८ ] | ४०८ |
| धान्यानि पशवः पृथ्वी | [ ] | ३६८ |
| धार्मिका अपि नार्चन्ति | [ ] | ४२५ |
| धोलवडा वाइंगण | [ सं.प्र./११९५, प्र.सा. २४६ ] | ३८१ |
| [ न ] | | |
| न शक्यं रुपमद्रष्टुं | [ ] | ४१६ |
| न हि भवति निर्विगोपक- | [ ] | ४४१ |
| नाणं पयासयं सोहओ | [ ध.स./११७५ ] | ४६९ |
| नासावेधश्रवःसास्त्रा- | [ ] | ३८३ |
| निरवद्यायामुक्तौ सत्यां | [ ] | १९८ |
| निर्भाग्योऽपि जडोऽपि | [ ] | ३१६ |
| निष्क्रम्य ये संसृति- | [ ] | १९८ |
| निहतानिहतानीति हताक्षाणि | [ ] | ४१६ |
| नृणां गुणात्मनां दोषः | [ ] | ३८९ |
| [ प ] | | |
| पंचविहे आयारे जुत्तो | [ सं.प्र./६०२ ] | ८५ |
| पंचुंबरि चउविगई | [ सं.प्र./११९४, प्र.सा. २४५ ] | ३८१ |
| परलोकविरुद्धानि | [ ] | ४४४ |
| परियट्टिए अभिहडे | [ पि.नि./९३ ] | ४०७ |
| पान्थेन केनाप्यटता | [ ] | ४६० |
| पायं अभिन्नगंठीतमाउ | [ पञ्चा./५३२ ] | ३१६ |
| पिंडविसोही समिइ भावणा | [ ओ.नि.भा./३ ] | ४४० |
| पुव्विं पच्छा संथव | [ पि.नि./४०९ ] | ४०८ |
| प्रतिमाधारिणोऽप्येषां | [ ] | ४२५ |
| [ ब ] | | |
| बालोऽपि नावमंतव्वो | [ ] | ८३ |
| बोधिः कषायदग्धानां | [ ] | ४७० |
| [ भ ] | | |
| भद्देण चरित्ताओ | [ दं.प्र./२४८ ] | ३७६ |
| भयमाकम्पनं तीव्रं | [ ] | ३८२ |
| भाष्ट्रकुम्भेष्टिकापाकैः | [ ] | ३८३ |
| भेदादेशाद्यवस्थानामकार्यं | [ ] | ४३४ |
| [ म ] | | |
| मतिभेदतमस्तिरोहिते | [ किराता. सर्ग-२ ] | ४०४ |
| मनोवाक्कायनियमनं तपः | [ ] | ४६३ |
| महारिणा विषमयाः | [ ] | ३७५ |
| मांसादेव समुत्पन्नो | [ ] | ३८२ |
| मान्यान्मुनीनप्यवमन्यते | [ ] | ३८४ |

मूला तह भूमिरुहा [ प्र.सा./२३९ ] ३८२
मूलाउ खंधप्पभवो दुम्मस्स [ द.वै./९-२-१ ] ४२३
मोहस्य तदपि विलसित [ ] १९८

[ य ]

यं मन्येत ममाभावाद् [ ] २६६
यं मन्येत ममाभावाद् [ ] २६६
यः सततमिष्टकारिणि [ ] ३७२
यत्नाधीने गुणाधाने [ ] ४५३
यदि यत्रैव तत्रैव [ ] ४६५
यदि सत्सङ्गनिरतो [ ] ३८६
यन्त्रस्येक्षुरसाद्यर्थे [ ] ३८३
यल्लज्जनीयमतिगोप्यदर्शनीयं [ ] ३७३
यान् लिङ्गिनोऽनुवदन्तं [ ] ४२५
'युवर्ण'.... [ सि.हे.श. ५/३/२८ ] ८२

[ र ]

रत्नाकर इव क्षारवारिभिः [ ] ४२५

[ ल ]

लाक्षानीलीशिलादीनां [ ] ३८३
लिङ्गोपजीविनां लोके कुर्वते [ ] ४२५
लोहाय नावं जलधौ [ ] ४५९

[ व ]

वने रतिर्विरक्तस्य [ ] ४६४
वय-समणधम्म-संजम- [ ओ.नि.भा./२ ] ४४०
वरं प्रवेष्टुं ज्वलितं हुताशनं [ ] ४६२
वाचेत्यादि विधिर्योऽत्र [ ] ४२५
वायाए नमोक्कारो [ बृ.क./४५४५ ] ४२५
विचिन्त्य बाधाः प्रभवन्ति यत्र [ ] ३७२
विना दानेन साधुभ्यः [ ] ३८४
विषयास्तालयन्त्रास्त्र- [ ] ३८३
वृत्तिं मद्यवसाक्षौद्र- [ ] ३८३
वेयण वेयावच्चे [ पि.नि./६६२ ] ४०९
व्याघ्रस्य दन्तक्रकचान्तरालं [ ] ४६०

[ श ]

शब्दागमाधिगमवान् [ ] ४१५
शय्यासनासनपयोवसनौषधादौ [ ] ३८४
शीतेऽपि यत्र लब्धो [ ] ८६

[ स ]

संकिय मक्खिय निक्खित्त [ पि.नि./५२० ] ४०८
संजोयणा पमाणे इंगाले [ पि.वि./९४ ] ४०९
संविग्गपक्खिओ उण [ प.व./१६८१ ] ४७४
सत्तलवा जइ आउं [ ] १११
सत्तावरी विराली [ प्र.सा./२३७ ] ३८२
सत्यं ब्रूयात्प्रियं ब्रूयात् [ ] २१८
सद्गतिच्छादिनां [ ] १९८
सन्तो विवेकिनः श्लाघ्या [ ] ४७०
समसङ्ख्यावयवः सन् [ ] ४०४
सरुषि नतिस्तुतिवचनम् [ ] १९९
सर्वस्यात्मा गुणवान् [ ] ४७३
'सर्वादेरिन्' [ सि.हे.श.७/२/५९ ] ८२
सव्वा उ कंदजाई [ प्र.सा./२३६ ] ३८१
ससमयपरसमयविऊ [ सं.प्र./६०३ ] ८५
साधुष्वहो दोषविषं किरन्तः [ ] ३८४
सारिका-शुक-मोराणां [ ] ३८३
सुअबज्झायरणरया [ प.व./१७०८ ] ४७४
सुत्तेण चोइओ जो [ प.व./१७०९ ] ४७४
सुद्धस्स होइ चरणं [ ] ४३५
सो हु तवो कायव्वो [ पञ्च.व./२१४ ] ६
स्त्रीति नामापि संह्लादि [ आचारविवरणे ] ४२२
स्वप्ने यथाऽयं पुरुषः [ ] ३६८

[ ह ]

हस्ती स्पर्शनतस्तिमिश्च [ ] ४१५
हिंसादिसंसक्तपथोपदेशाद् [ अयोगव्यव./१० ] ३८१
हितोपदेशात्सकलज्ञक्लृप्तेः [ अयोगव्यव./११ ] ३८१

• • •

# परिशिष्टम्

## [ ३ ]

## उपदेशमालाकर्णिकावृत्तौ कतिपयसूक्तिनामकाराद्यनुक्रमः ॥


| पद्यांशः | पत्राङ्कम्/श्लोकाङ्कम् |
|---|---|
| [ अ ] | |
| अदृष्टेऽर्थे न तद्दुःखं दृष्टनष्टे तु यद्भवेत् ॥ | ८९/६ |
| अन्योपकृतिः कृतिनां व्रतम् ॥ | २८७/२०१ |
| अपमानो हि हीनेन हतानां महतां मतः ॥ | ३९/१३२ |
| अवश्यम्भाविभावाऽसौ नियतिर्नातिलङ्घ्यते ॥ | १४०/१८ |
| असन्तोषः परं दुःखं सन्तोषः परमं सुखम् ॥ | ३६१/७०७ |
| अहतो हन्त मुच्येत च्छित्वा पुच्छमहिर्न हि ॥ | २६९/६० |
| अहो प्रीतिरपत्येषु मुनिभावेऽपि दुस्त्यजा ॥ | ३३६/६३ |
| अहो स्वयं क्रियामूढाः परोक्तिप्रत्यया नृपाः ॥ | १८५/१६ |
| [ इ ] | |
| इष्टे दृष्टे हि सन्दीप्य शुचः शाम्यन्ति देहिनाम् ॥ | २२०/८ |
| [ उ ] | |
| उपकारापकारेषु मानिनो ह्यधिकक्रियाः ॥ | १०२/८ |
| उपायोऽप्यनुपायः स्यान्महात्मनि दुरात्मनाम् ॥ | १२३/२८५ |
| [ क ] | |
| कर्मभिः प्रेरितानां हि कोऽपराधः शरीरिणाम् ॥ | ३४४/२५७ |
| कष्टं दुष्टासु चेष्टासु विधिरस्खलितादरः ॥ | ३६६/२५ |
| कातरा नितरां धर्मं सुखसाध्यं हि तन्वते ॥ | ३६/६२ |
| कामस्य वन्दकाराणां वाग्निकारेऽस्तु कः क्षयः ॥ | १८४/१५ |
| कामाज्ञा हि सुदुस्सहा ॥ | १५/२२० |
| कामाद्यैर्यत्र जन्तूनां सुप्रापाऽनुपदं विपत् ॥ | ३६१/७०२ |
| कामार्त्ते क्व विवेकिता ॥ | २७३/३९ |
| कामो हि विपदां मूलं कामत्यागस्तु सम्पदाम् ॥ | २४३/२६ |
| किं तेन काञ्चनेनाऽपि येनाशु त्रुटति श्रुतिः ॥ | २६०/३८५ |
| किं दुर्लभं सताम् ॥ | २०५/६२ |
| किं भयं जगदुद्द्योते प्रद्योते सति गोप्तरि ॥ | १३१/५८ |
| किमक्ष्णा तरणिं विना ॥ | १३६/४ |
| कियानिन्द्रोऽपि धीमताम ॥ | १३०/३४ |
| कुत्र वा न श्रियः सताम् ॥ | ३२६/३१ |
| कृत्याकृत्यविचारो हि गुर्वाज्ञासु न धीमताम् ॥ | २७०/८२ |
| कृत्याकृत्येषु मुह्यन्ति वेश्यावश्या ध्रुवं जनाः ॥ | १८८/९० |
| कृष्णाङ्गारत्वमायाति निष्पुण्यस्य न किं निधिः ॥ | ५७/५८७ |
| को बध्नाति जगन्मुखम् ॥ | ३७/१०३ |
| कोऽर्कादन्यो दिनं सृजेत् ॥ | १९०/१४२ |
| को नाम कामं धूर्त्तैं न वञ्च्यते ॥ | २७०/१०१ |
| क्रीडत्यङ्केषु पङ्कस्य सिंहपोतः कदापि किम् ॥ | २०४/४८ |
| [ क्ष ] | |
| क्षाम्यं सर्वं प्रणामान्तः कोपो हि महतां मतः ॥ | ५०/४१९ |
| [ ग ] | |
| गुरूणां तु ऋणान्मुक्तिः काकतालीययोगिनी ॥ | ३२४/१६ |
| [ च ] | |
| चार्वङ्ग्या को न पात्येत को न दह्येत कीलया ॥ | १९०/१४७ |
| चित्तं को वेत्ति योषिताम् ॥ | २९७/४७० |
| [ त ] | |
| तपोधनेषु धन्यानां विश्वसत्येव मानसम् ॥ | ३३५/३७ |
| [ द ] | |
| दम्भो वञ्च्यते न किम् ॥ | ३९०/१२ |
| दविष्ठं पवनस्य किम् ॥ | १२२/२५६ |
| दहत्यरक्ता रक्तापि वह्निकीलेव कामिनी ॥ | १३६/८ |
| दुःखं विना विरज्यन्ते न प्रायः कर्मणावृत्ताः ॥ | ४१९/६९ |
| दुरापं किं सुनिश्चितैः ॥ | २९२/३४० |
| दौस्थ्यं जानन्ति नार्भकाः ॥ | २०५/८० |
| [ ध ] | |
| धन्यानामाकृतिगुणानां क्व न गौरवम् ॥ | १०६/११४ |
| धिगचिन्तितकारिताम् ॥ | ११७/१४४ |
| [ न ] | |
| न कस्यापि कृतार्थस्य परार्थे रमते मतिः ॥ | १३६/२७ |
| न कुर्वन्ति हि भक्तस्य भक्तिभङ्गं भवादृशाः ॥ | १५२/१५० |
| न नामोच्चैः पदं गन्तुमुत्पातो नतिपूर्वकः ॥ | २७५/३३ |
| न मद्यभाण्डविन्यस्तं गङ्गाम्भोऽपि प्रियं सताम् ॥ | ११३/३२ |
| न स्वः पितापि मातापि क्वापि पापात्मनां भवेत् ॥ | १२८/५३ |
| नतेषु पक्षपातित्वमुत्तमानां हि लक्षणम् ॥ | २४८/१०५ |
| नांह्रौ मौलिर्मौलो हि युज्यते ॥ | १३१/४५ |

नांह्री मौलिर्मौलो हि युज्यते ॥ १३१/४८
नियम्यते मतिः केन नियतेरनुसारिणी ॥ ३६६/१६
निर्बलानां छलं बलम् ॥ १०६/११९
निष्कुत्रिमा हि नारीणां भक्तिर्भर्तुषु कार्मणम् ॥ ३६०/६७२
नृणां वक्त्याकृतिर्गुणान् ॥ ११८/१६९

[ प ]

पतिः स्त्रीणां हि दुस्त्यजः ॥ २०५/६१
पादान् ममर्द कार्येण गदर्दभस्य जनार्दनः ॥ १५३/१५३
पुंसां पूजा हि भूजानिजनिता जनयेद्धनम् ॥ १६३/३९९
पुण्यैरपश्यं पश्यन्ति तदेकाग्रहदो न किम् ॥ १२०/२०५
पूज्या केन क्व नाकृतिः ? ॥ १२२/२५२
पूर्वमासन्नपातानां धर्मात् पच्यवते हि धीः ॥ ३४७/३५२
प्रकृतिः खलु दुस्त्यजा ॥ ६१/७०१
प्रणिपातावधिः क्रोधः सत्तां हि परिकीर्तितः ॥ २४९/११६
प्रतिकर्त्ता रुजां वैद्यो गुरुर्दुष्कर्मणां पुनः ॥ २१५/१८
प्रभोरेव हि धैर्येण जयन्ति प्रभुकार्यिणः ॥ १२२/२५०
प्रौढान्यपि हि दुःखानि विस्मार्यन्तेऽतिकोतुकैः ॥ २९८/४८७

[ ब ]

बालदुर्विनयः प्रीत्यै महतामहतान्तरः ॥ ३८/११५
बाललालनहर्षो हि देवीनामपि दुर्लभः ॥ १८२/२४
बुद्धिः कर्मानुसारिणी ॥ २५४/२५१

[ भ ]

भुजङ्गिनि गृहे वस्तुमस्ति कोऽपि किमु क्षयः ? ॥ ११५/९४
भोगाः कुत्र न भोगिनाम् ॥ ११७/१२५

[ म ]

मद्याद् विषादपि श्रीणां मोहशक्तिर्महीयसी ॥ ३५९/६६७
मषीलिप्तोऽपि कुरुते न हंसः काककूजितम्॥ ३५/५५
मायाघाते जघन्यानां कुतस्त्याः स्युर्जयश्रियेः ॥ १२०/२१७
मुकुटेनापि किं तेन शीर्यते येन मस्तकः ॥ १८७/५९
मुक्तापङ्क्तिधिया हन्ति सिंहः
किं हस्तिमस्तकम् ॥ २५३/२१९

[ य ]

यात्यन्धोऽपीहितं स्थानं लगितः सरले पथि ॥ ११२/७

[ ल ]

लोकः कृतानुकारी हि परमार्थपराङ्मुखः ॥ २६६/१०२

[ व ]

वनं भञ्जन्निभः केन रक्ष्यः पञ्चाननं विना ॥ १७३/१३५
वपुःकष्टं तपः स्याच्चेन्नारकास्तत्तपोधनाः ॥ ३९५/१८
वानेयं पुष्पमादेयं मलस्त्याज्योऽङ्गजोऽपि यत् ॥ १४३/१५
विद्भिस्तथागतिर्गीता जन्तोरन्ते यथामतिः ॥ २१३/४६
विद्या विनयेनाऽधिगम्यते ॥ ४००/४४
विना दिनाधिपोपास्तिं नास्ति दृश्यं महन्महः ॥ १६३/४१४
विप्रलब्धावकाशा हि विप्रलब्धाः पराःशताः ॥ १४१/२५
विषयेण विषेणेव मूर्च्छन्मूर्छाः स्मरन्ति किम् ॥ ३९/१५३
वृत्तिश्च रक्षकश्च स्यान्मन्त्री भूपफलद्रुमे ॥ १८५/२७
व्यवसायो वृथा भाग्यं कालेनाऽपि फलेग्रहिः ॥१२३/२७३

[ श ]

शान्तिं धराधरस्याग्निर्नैति धाराधरं विना ॥ ११४/२२९

[ श्र ]

श्रीणां हि फलं द्विड्मित्रदर्शनम् ॥ ४४६/३७
श्रेयसे सङ्गतं सताम् ॥ ३१०/८१०
श्रेयसे हि गुरुस्तुतिः ॥ १५८/२७६

[ स ]

सत्सङ्गाद्वर्द्धते हि धीः ॥ ४५१/३९
सन्तोऽकृत्यं न कुर्युः श्रीवरणे मरणेऽपि वा ॥ ४४८/८९
सरागा कुत्र साऽरयः ? ॥ ११७/१२५
सर्वं सरसमापाते विपाके विरसं पुनः ॥ २२०/१३
सर्वनाशोंऽशनाशेन रक्षणीयो विचक्षणैः ॥ १३१/४६/४९
सर्वा नाऽङ्गुलयः समाः ॥ ११२/६
साध्यते सुकृतैर्न किम् ॥ ३१४/५३
सापदां कुत्र निर्वृतिः ॥ ११७/१२६
सुख-दुःखैकभागिन्यो जनन्यो ह्यात्मजन्मनाम् ॥ १६३/४०८
सूनोरिव सुशिष्यस्य को न रागेण लिप्यते ॥ २७९/११६
स्खलत्येव प्रमादे हि देहिनां सुकृतक्रमः ॥ १६६/४७०
स्त्रीभिर्लङ्घ्या न भर्तृवाक् ॥ २६३/२४
स्त्रीणां भ्रातृ-पितृभ्योऽपि पतिवृद्धिर्यतः प्रिया ॥ १०७/१३९
स्वगृहेऽपि गृही गच्छत्यगृहीतपथः किम् ॥ २६४/४४
स्वस्मै कः किं न यच्छति ॥ १२४/३०६

[ ह ]

हृद्वेत्ति सुजनं जनम् ॥ ११७/१३०
हृताखिलकलाशोभोऽतिलोभो हि न शोभनः ॥ २९०/२९४

• • •

# परिशिष्टम्

## [ ४ ]

## उपदेशमालाकर्णिकावृत्तौ कथानकानामनुक्रमः ॥


| कथानकम् | विषयः | गाथा-पत्राङ्कम् |
|---|---|---|
| १. जिनऋषभचरित्रम् ॥ | तपःकर्मण उपदेशे | ३/६-३३ |
| पूर्वभवाः ॥ | | ३/६-१७ |
| च्यवन-जन्म-वंशस्थापन-लग्न-राज्याभिषेकादि ॥ | | ३/१७-२४ |
| दीक्षा-पारण-केवल-निर्वाणादि ॥ | | ३/२४-३३ |
| २. जिनवीरचरित्रम् ॥ | तपःकर्मण उपदेशे | ३/३३-८१ |
| पूर्वभवाः ॥ | | ३/३३-४४ |
| नन्दनऋषि-आराधना ॥ | | ३/४०-४४ |
| च्यवन-जन्म-दीक्षा-केवल-निर्वाणादि ॥ | | ३/४४-८१ |
| ३. चन्दनार्या ॥ | मानकषायजयेन विनयोपदेशे | १३-१४/८६-८७ |
| ४. अङ्गवीरः ॥ | पुरुषप्राधान्ये | १७-१८/८८ |
| ५. भरतकेवलकथा ॥ | आत्मसाक्षिके सुकृते | २०/८९-९२ |
| ६. प्रसन्नचन्द्रराजर्षिः ॥ | आत्मसाक्षिके सुकृते | २०/९३-१०० |
| ७. सनत्कुमारचक्री ॥ | लघुकर्मत्वात् सुलभबोधित्वे | २८/१०२-११० |
| ८. ब्रह्मदत्तराजा ॥ | गुरुकर्मत्वात् दुर्लभबोधित्वे | ३१/१११-१२६ |
| ९. उदायिनृपमारकः ॥ | गुरुकर्मत्वात् दुर्लभबोधित्वे | ३१/१२६-१२८ |
| १०. जा सा सा सा ॥ | कर्मण दुर्वचत्वे | ३३/१२९-१३३ |
| ११. मृगावती ॥ | अपराधक्षामणायाम् | ३३/१३३-१३४ |
| १२. चिलातीपुत्रः ॥ | क्रूरकर्मप्रतिबोधकधर्ममाहात्म्ये | ३८/१३५-१३७ |
| १३. ढण्ढणऋषिः ॥ | दुर्वहप्रतिज्ञानिर्वाहे सात्त्विकतायाम् | ३९/१३८-१३९ |
| १४. स्कन्दकशिष्याः ॥ | दृढधर्मित्वे | ४२/१४०-१४१ |
| १५. हरिकेशबलर्षिः ॥ | तत्र कुलस्याकिञ्चित्करत्वे | ४४/१४२-१४५ |
| १६. वज्रर्षिः ॥ | अलोभतायाम् | ४८/१४६-१६६ |
| १७. पूर्वभवनन्दिषेणः-वसुदेवः ॥ | परलोकापेक्षया गुणानां पूज्यत्वे | ५४/१६८-१८० |
| १८. गजसुकुमालः ॥ | क्षमायाम् | ५५/१८१-१८३ |
| १९. स्थूलभद्रः ॥ | दुष्करव्रतचरणे | ५९/१८४-१९४ |
| २०. तामलिः ॥ | अज्ञानतपसि | ८१/२०१ |

| | | |
|---|---|---|
| २१. शालिभद्रः ॥ | विवेक-गृहत्याग-देहशोषणस्य बहुफलत्वे | ८७/२०२-२०६ |
| २२. अवन्तीसुकुमालः ॥ | कष्टाधिसहने | ८८/२०७-२०८ |
| २३. सुनक्षत्रमहर्षिः ॥ | विनेयस्य गुरुप्रतिबन्धदार्ढ्ये | १००/२११-२१४ |
| २४. प्रदेशिराजा ॥ | सुखावाप्तिदुःखमुक्तिगुर्वधीनत्वे | १०२/२१५-२१७ |
| २५. कालिकाचार्यः ॥ | प्राणात्ययेऽपि अधर्म्यमभणितत्वे | १०५/२१८-२१९ |
| २६. बलदेव-रथकारक-मृगाः ॥ | सद्गोचरानुमोदनस्यापि महाफलत्वे | १०८/२२०-२२२ |
| २७. सङ्गमस्थविराचार्यः ॥ | अपवादसेवनेऽप्याराधकत्वे | ११०/२२३-२२४ |
| २८. वारत्तर्षिः ॥ | गृहस्थसंसर्गोत्थमालिन्ये | ११३/२२४-२२७ |
| २९. चन्द्रावतंसराजा ॥ | शरीरव्ययेऽपि धृतिमत्यागे | ११८/२२८-२२९ |
| ३०. सागरचन्द्र-कमलामेले ॥ | दृढव्रते | १२०/२२९-२३० |
| ३१. कामदेवश्रावकः ॥ | देवकृतोपसर्गेऽपि निश्चलत्वे | १२१/२३१-२३३ |
| ३२. द्रमकः ॥ | अविवेकेन दुर्गतिपाते | १२२/२३३ |
| ३३. दृढप्रहारी ॥ | आक्रोशादिसहने | १३६/२३६-२३७ |
| ३४. सहस्रमल्लः ॥ | क्षमायाम् | १३७/२३८ |
| ३५. स्कन्दकुमारः ॥ | रागत्यागे | १४१/२३९-२४० |
| ३६. कनककेतुः ॥ | स्वजनानां अनर्थहेतुत्वे-पितृवैसदृश्ये | १४६/२४१-२४४ |
| ३७. भरतः ॥ | भ्रातृवैसदृश्ये | १४७/२४४-२६२ |
| ३८. कोणिकः ॥ | पुत्रस्नेहविपरिणतौ | १४९/२६२-२६६ |
| ३९. चाणक्यः ॥ | सुहृत्प्रीतिविपरिणतौ | १५०/२६६-२७१ |
| ४०. सुभूमः ॥ | निजकस्नेहस्य विपाकदारुणत्वे | १५१/२७१-२७४ |
| ४१. आर्यमहागिरिः ॥ | अनिश्रितविहारित्वे | १५२/२७४-२७९ |
| ४२. जम्बूस्वामी ॥ | निर्लोभतायाम् | १५३/२७९-३११ |
| पूर्वभवाः ॥ | | २७९-२८३ |
| जम्बूः-मधुबिन्दुः ॥ | | श्लोक-१५५-१७६ |
| ज्ञातेयः ॥ | | श्लोक-१७८-२१९ |
| महेश्वरदत्तः ॥ | | श्लोक-२२१-२३८ |
| समुद्रश्रीः-गुडमण्डकलोभी ॥ | | श्लोक-२४०-२५५ |
| जम्बूः-मांसातिलोलकाकोलः ॥ | | श्लोक-२५७-२७४ |
| पद्मश्रीः-वानरः ॥ | | श्लोक-२७६-३१७ |
| जम्बूः-पुण्यसारः ॥ | प्रमादे | श्लोक-३१९-३५६ |
| पद्मसेना-भोगिनी ॥ | उभयभ्रष्टस्थितौ | श्लोक-३५९-५०३ |
| जम्बूः-विद्युन्माली ॥ | मोहमज्जने | श्लोक-५०५-५२९ |
| कनकसेना-शङ्खधमकः ॥ | अनुशयास्पदत्वे | श्लोक-५३२-५४९ |
| जम्बूः-मूर्खकपिः ॥ | | श्लोक-५५१-५६८ |
| नभःसेना-बुद्धिस्त्री ॥ | | श्लोक-५७१-५८६ |
| जम्बूः-वाजिराजः ॥ | | श्लोक-५८८-६३१ |
| कनकश्रीः-पुण्यहीनः ॥ | | श्लोक-६३२-६५७ |
| जम्बूः-कमठः ॥ | | श्लोक-६५९-६६७ |
| कनकवती-मा साहसपक्षी ॥ | | श्लोक-६६८-६७१ |

| | | |
|---|---|---|
| जम्बूः-सहमित्र-पर्वमित्र-प्रणाममित्राणि ॥ | | श्लोक-६७३-७११ |
| जयश्रीः-नागश्रीः ॥ | | श्लोक-७१३-७३८ |
| जम्बूः-ललिताङ्गः ॥ | कामभोगातृप्तौ | श्लोक-७४२-८०२ |
| ४३. मेघकुमारः ॥ | गुरुकुलवासकर्तव्ये | १५४/३१२-३१४ |
| ४४. सत्यकिः ॥ | स्त्रीणां अपायहेतुत्वे | १६४/३१८-३२१ |
| ४५. दशार्हनेता कृष्णः ॥ | साधूपास्तौ | १६५/३२१-३२२ |
| ४६. चण्डरुद्रशिष्यः ॥ | विनयस्य आराध्यजनोपकारफलत्वे | १६७/३२३-३२४ |
| ४७. अङ्गारमर्दकशिष्याः ॥ | कृतज्ञतायाम् | १६८/३२५-३२६ |
| ४८. पूष्पचूला-अन्निकापुत्रः ॥ | लघुकजीवस्वरूपे | १७०/३२६-३३० |
| ४९. मरुदेवी ॥ | अप्रमादोपदेशे | १७९/३३३ |
| ५०. करकण्डुः ॥ | प्रत्येकबुद्धत्वे | १८०/३३४-३४० |
| ५१. द्विमुखः ॥ | प्रत्येकबुद्धत्वे | १८०/३४०-३४२ |
| ५२. नमिः ( युगबाहुः-मदनरेखा ) ॥ | प्रत्येकबुद्धत्वे | १८०/३४२-३५१ |
| ५३. नगातिः ॥ | प्रत्येकबुद्धत्वे | १८०/३५१-३६४ |
| ५४. सुकुमारिका-शासकभ्रासकौ ॥ | इन्द्रियग्रामस्याविश्वसितव्यत्वे | १८२/३६५-३६६ |
| ५५. आर्यमङ्गुः ॥ | सौख्ये आस्थायाः दोषरूपत्वे | १९१/३६८-३७० |
| ५६. गिरिशुकपुष्पशुकौ ॥ | असाधुसाधुसङ्गतिजदोषगुणे | २२७/३७८-३७९ |
| ५७. शैलकपन्थकौ ॥ | कदाचित् शिष्यस्य गुरूपकारित्वे | २४७/३८६-३८९ |
| ५८. नन्दिषेणः ॥ | कर्मणः प्रबलत्वे | २४८/३९०-३९२ |
| ५९. शशिप्रभः ॥ | गुरुकर्मणा उपहतत्वे | २५४/३९४-३९५ |
| ६०. शिवपुलिन्दौ ॥ | ज्ञानदातुः पूज्यतमत्वे | २६५/३९७-३९८ |
| ६१. श्रेणिकश्वपाकौ ॥ | जात्यादिहीनगुरोरपि विनय एव कर्त्तव्यत्वे | २६६/३९८-४०० |
| ६२. भागवतकाश्यपौ ॥ | गुरुनिह्नुवानानां दोषे | २६७/४०० |
| ६३. मेतार्यः ॥ | जात्यादिमदस्य दुर्विपाकत्वे | ३३३/४१७-४२१ |
| ६४. कपटक्षपकः ॥ | मायिकस्य शोचनीयावस्थापाते | ३८६/४३२-४३३ |
| ६५. दर्दुराङ्कः ॥ | मरणजीवितयोर्चतुर्भङ्गीवर्णने | ४४०/४४५-४४८ |
| ६६. कालशौकरिकपुत्रः सुलसः ॥ | प्राणत्यागेऽपि परपीडावर्जनशीलत्वे | ४४५/४५०-४५१ |
| ६७. जमालिः ॥ | सन्मार्गस्खलनाद् वचनीयत्वे | ४५९/४५४-४५७ |
| ६८. कूर्मः ॥ | कायनियमने | ४८४/४६३-४६४ |



• • •

# परिशिष्टम्

## [ ५ ]

## उपदेशमालाकर्णिकावृत्तौ विशेषनाम्नामकाराद्यनुक्रमः ।।


| विशेषनाम | पत्राङ्कम् |
|---|---|
| [ अ ] | |
| अकम्पित [ विप्रपुत्र ] | ८० |
| अक्रूर [ विजयसेनापुत्र ] | १७१ |
| अक्षयतृतीया [ पर्व ] | २६ |
| अक्षोभ्य [ दशार्ह ] | १७० |
| अग्नि [ दारक ] | २७२ |
| अग्निदेव [ उपवन ] | १६१ |
| अग्निद्योत [ द्विज ] | ३६ |
| अग्निभीरु [ रथ ] | ३४० |
| अग्निभूति [ द्विजपुत्र-विप्र ] | ३६, ८० |
| अग्निशर्मा [ त्रिदण्डी ] | १०३ |
| अघोरशिव [ ब्राह्मण ] | ४३२ |
| अङ्ग [ देश ] | ११५ |
| अङ्गवीर [ राजा ] | ८८ |
| अङ्गारक [ ज्वलनवेगसूनु ] | १७१ |
| अङ्गारवती [ खेचरी ] | १७३ |
| अङ्गारवती [ धुन्धुमारसुता ] | २२६, २२७ |
| अङ्गारवती [ प्रद्योतस्त्री ] | १३३ |
| अचल [ दशार्ह-बलभद्र ] | ३७, १७० |
| अचलपुर [ पुर ] | १५२ |
| अचलभ्राता [ द्विजपुत्र ] | ८० |
| अच्छन्दक [ पाखण्डी ] | ५२, ५३ |
| अच्युत [ गृही ] | ६१ |
| अच्युत [ द्वादशदेवलोक ] | १४, १७७, २१३, ३४६, २१३ |
| अच्युतेन्द्र [ द्वादशदेवलोकेन्द्र ] | १९ |
| अजित [ द्वितीयतीर्थकर ] | १४७ |
| अजितसेन [ देवकीसूनु-मुनि ] | १८१ |

| विशेषनाम | पत्राङ्कम् |
|---|---|
| अञ्जन [ अद्रि ] | ३४५ |
| अतिपाण्डुककम्बला [ शिला ] | १७७ |
| अतिभद्रा [ द्विजभार्या ] | ८० |
| अतिमुक्त [ कंसानुज-व्रती ] | १७४, १७५, १७९, १८१ |
| अनङ्गसेना [ वेश्या ] | ३८७ |
| अनन्तवीर्य [ नृप ] | २७३ |
| अनन्तसेन [ देवकीसूनु-मुनि ] | १७५, १८१ |
| अनलगिरि [ करी ] | ३४० |
| अनादृत [ देव ] | ३१० |
| अनिन्दिता [ दिक्कुमारिका ] | १७ |
| अनिरुद्ध [ प्रद्युम्नपुत्र ] | १८१ |
| अनीकयश [ देवकीसूनु-मुनि ] | १७५, १८१ |
| अनुत्तर [ विमान ] | २३ |
| अवन्तीश<br>अवन्तीपति [ प्रद्योत ] | ३४० |
| अन्धकवृष्णि [ शौरिपुत्र ] | १७० |
| अन्ध्र [ देश ] | २७८ |
| अन्नकूट [ कौटुम्बिक ] | २८० |
| अन्निका [ वणिक्स्वसा ] | ३२७ |
| अन्निकापुत्र<br>अन्निकासूनु [ अन्निकासुत-सूरि ] | ३२८, ३२९, ३३० |
| अपरविदेह [ क्षेत्र ] | ४७ |
| अपराजित [ अनुत्तरविमान ] | १७६ |
| अपराजिता [ दिक्कुमारिका ] | १८ |
| अपराजिता [ पुर ] | १५ |
| अपापा [ पुरी ] | ८०, ८१ |
| अपापा मध्यमा [ पुरी ] | ७८ |

अप्रतिचक्रा [ देवी ] २९
अप्रतिष्ठान [ सप्तमनरक ] १४९
अब्दकुमार [ भवनपतिदेव ] ८९
अब्धिकुमार [ भवनपतिदेव ] १६
अब्धितरङ्ग [ अश्व ] १०४
अभय | अभयकुमार [ श्रेणिकपुत्र ] २६२, २६४, ३१२, ३९८, ३९८, ४००, ४२०, ४४६, ४५०
अभयमती [ सार्थपत्नी ] १३
अभिचन्द्र [ दशार्ह ] १७०
अभिचन्द्र [ सुरूपापुत्र ] १६
अभिनन्दन [ चतुर्थतीर्थंकर ] १४७
अभीचिग [ नक्षत्र ] ३३
अमरचन्द्रसूरि [ सूरि ] ४७९
अमितयशा [ नृप ] ३४६
अमृतसागर [ सूरि ] २८२
अयोध्या [ नगरी ] २१, ३४, ३५, २४४, २४९, २६०
अर [ अष्टादशतीर्थंकर ] १४७
अरिकेशरी [ नृप ] २९०
अरिष्टनेमि [ द्वाविंशतीर्थंकर ] १७७, ३८७, ३८८
अरुणाभ [ कल्प ] २३३
अर्केन्दु [ सूर्यचन्द्रेन्द्र ] ७१
अर्च्चिमाली [ खग ] १७१
अलम्बुसा [ दिक्कुमारिका ] १८
अवनामनी [ विद्या ] ३९८
अवन्ती [ नगरी ] १२७, १३१, १५५, १५६, १५७, २०७, २७९, ३४२, ३५०, ४१८
अवन्तीसुकुमार [ भद्रात्मज ] २०७
अवस्वापिनी [ विद्या ] २८५
अव्यक्त [ चैत्य ] ७९
अशनिवेग [ विद्याधर ] १०७, १०८, १७१
अशोक [ वृक्ष ] ५७, ७२
अशोकखण्ड [ उद्यान ] ७२
अशोकचन्द्र [ नृप ] २६३, २६६, ३१२
अशोकदत्त [ सागरचन्द्रमित्र ] १५, १६
अशोकवनिका [ उद्यान ] १८७
अश्वग्रीव [ भूप ] ३७
अश्वसेन [ नृप ] १०३
अष्टापद [ पर्वत ] २९, ३०, ३२, ३३, ८९, ९०, ९१, ९२, १२२, १४७, १७१, २५०
अस्थिक [ ग्राम ] ४९, ६४
अहिकुमार [ भवनपतिदेव ] १६, १७

[ आ ]

आदिनाथ [ प्रथमजिन ] ९१
आनन्द [ गृहस्थ ] ५८, ६६
आनन्द [ स्थविर ] २११, २१२
आनन्दा [ दिक्कुमारिका ] १८
आपात [ भिल्ल ] २४७
आमलकल्या [ पुरी ] २१५
आरुष्कर [ नगर ] २२५
आर्यमङ्गु | मङ्गु [ आचार्य ] ३६८, ३६९
आर्यमहागिरि | महागिरि [ आचार्य ] २७४, २७५, २७६, २७९, ४६२
आर्यरक्षित [ द्विजपुत्र-मुनि ] १६२, १६३, १६४, १६५
आर्यवान् [ कौटुम्बिक ] २८१
आर्यशमित [ आचार्य ] १५०, १५२
आर्यसमुद्र [ मुनि ] ३२६
आर्यसुहस्ती | सुहस्ती [ आचार्य ] २७४, २७५, २७६, २७७, २७८, २७९
आलभिकापुरी [ पुरी ] ६४
आवर्त्त [ ग्राम ] ६१
आसुरी [ मरीचिशिष्य ] ३६

[ इ ]

इक्ष्वाकु [ वंश ] २०, ४४, ८९
इन्द्रभूति [ द्विजपुत्र-प्रथमगणधर ] ८०, ८१, ८२, ४५५
इन्द्रशर्मा [ द्विज ] ५०, ५१, ५३
इलादेवी [ दिक्कुमारिका ] १८

[ ई ]

ईशान [ कल्प ] ११, १२, ३६, १०९, २०१
ईशानचन्द्र [ भूपति ] १३, १५
ईशानेश | ईशानस्वामी [ द्वितीयदेवलोकेन्द्र ] २०, ७१
ईश्वरदत्त [ श्रेष्ठी ] १३

[ उ ]

उग्रसेन [ भोजवृष्णिपुत्र ] १७०, १७५, १८०, २२९, ३८६
उज्जयनी | उज्जयिनी [ नगरी ] १२७, १५६, १५७, १६४, २२८, ३२०, ३२३

उत्तरकुरु [ क्षेत्र ] १२, २०
उत्तरचावाल [ निवेश ] ५३
उत्तरामथुरा [ पुरी ] ३२७
उत्तराषाढा [ नक्षत्र ] १७, २४, २७
उत्पल [ परिव्राड् ] ५१, ६०, ६४
उदयन [ नृप ] १३३
उदयप्रभदेव [ आचार्य ] ४७९
उदायन | उदायी [ चरमराजर्षि-नृप-मुनि ] १२६, १२७, १२८, २६४
उपकोशा [ वेश्या ] ११५
उपनन्द [ अधिप ] ५८, ५९
उष्णाक [ सन्निवेश ] ६४

[ ऋ ]

ऋषभ [ प्रथमतीर्थकर ] ५, ६, २०, ३४, ९०, १४७
ऋषभ [ शाश्वतजिन ] ३४५
ऋषभ [ श्रेष्ठी ] २८३
ऋषभदत्त [ विप्र ] ४४
ऋषभसेन [ व्रती ] २९

[ ए ]

एकनासा [ दिक्कुमारिका ] १८

[ ऐ ]

ऐन्द्र [ शल्यशासन ] ४६
ऐरवत [ क्षेत्र ] १९
ऐलविल [ कुबेर ] १४९

[ क ]

कंस [ नृप-वसुदेवसारथि ] १७०, १७४, १७५, १७७, १७८, १७९, १८०, २२१
कच्छ [ भूप ] २५
कटकवती [ कन्या ] १२४
कटपूतना [ व्यन्तरी ] ६३
कणेरुदत्त [ कुर्वीश ] ११५, १२४
कण्टक [ चमूपति ] १२१
कण्डरीक [ महापद्मसुत ] १४८
कण्डरीक [ मुनि ] ३९३
कदलीसमागम [ ग्राम ] ६२
कनककेतन | कनककेतु [ नृप ] २३९, २४१, २४३, ३२५, ३७८
कनकखल [ तापसाश्रम ] ५३, ५४
कनकध्वज [ पोट्टिलापुत्र-राजा ] २३८, २४२, २४३
कनकप्रभसूरि [ सूरि ] ४८०
कनकमञ्जरी [ चित्रकसुता ] ३५४, ३५५, ३५९, ३६०, ३६१
कनकमाला | कनकमालिका [ खगपुत्री ] ३६०, ३६१
कनकवती [ जम्बुप्रिया ] ३०५
कनकवती [ राज्ञी ] १३
कनकवती [ हरिश्चन्द्रपुत्री ] १७२
कनकश्री [ श्रेष्ठिपुत्री-जम्बूपत्नी ] २८३, ३०३
कनकसेना [ श्रेष्ठिपुत्री-जम्बूपत्नी ] २८३, २९९
कन्दर्पकोश [ पुर ] ३०८
कन्यापूर्णा [ तटिनीद्वय ] १५२
कपिल [ कुलपुत्र-मरीचिशिष्य ] ३५, ३६, ५८, २११
कपिला [ दासी ] ४४८
कमलमाला [ श्रेष्ठिप्रिया ] २८३
कमलवती [ राज्ञी ] ३४५
कमलवती [ श्रेष्ठिपुत्री-जम्बूपत्नी ] २८३
कमलवती [ श्रेष्ठिप्रिया ] २८३
कमला [ लक्ष्मी ] १६२
कमलापीडा | कमलामेला [ धनसेननृपपुत्री ] २२९, २३०
कम्बल [ वृषभ ] ५६
करकण्डु | करकण्डू [ प्रत्येकबुद्ध ] ३३४, ३३६, ३३८, ३३९, ३६४
करण्डक [ वन ] ३६
कलम्बुग्राम [ ग्राम ] ६२
कलिङ्गेश | कलिङ्गराजर्षि | कालिङ्गक [ करकण्डुराज ] ३३४, ३३९, ३४०
काञ्चनचन्द्र [ खेचरेन्द्र ] १७४
काञ्चनपुर [ पुर ] १०२, ३३७
काञ्ची [ पुर ] २३९, २४०
कामदेव [ श्रावक ] २३१, २३३
कामपाल [ बलदेव ] २२२
कामसमृद्ध [ सार्थवाह ] २८२
काम्पील्य | काम्पील्य [ पुर ] ११४, १२०, १२४, ३४०
कार्त्तिक [ मास ] १७६, ३८९, ३९८

काल [ कूणिकभ्राता ] २६४
कालशूकर / कालशूकरिक / कालशौकरिक [ सौनिक ] ४४७, ४४८, ४५०
कालसन्दीप [ ] ३१८, ३१९
कालसेन [ मडम्बपति ] २३८
कालहस्ती [ सेनानी ] ६२
कालिक [ द्विजोत्तम-आचार्य ] २१८
कालिय [ अहि ] १७७
काशी / काशिपुरी [ पुरी ] ८८, ११२, ११५, १२४
किङ्किल्लि [ वृक्ष ] २४
किन्नरगीत [ पुर ] १७१
कुणाल [ नृप ] २७६
कुण्डाक [ सन्निवेश ] ६४
कुन्थु [ सप्तदशतीर्थकर ] १४७
कुबेर [ देव ] १०९
कुबेर / कुबेरदत्त [ गणिकापुत्र ] २८६, २८७
कुबेरदत्त [ श्रेष्ठी ] २८३
कुबेरदत्ता [ गणिकापुत्री-साध्वी ] २८६, २८७
कुबेरसेन [ श्रेष्ठि ] २८३
कुबेरसेना [ पणाङ्गना ] २८६, २८७, २८८
कुमारग्राम [ ग्राम ] ५९
कुम्भकारकट [ पुर ] १४०
कुरु [ देश ] ११५
कुरुजाङ्गल [ देश ] १०३
कुर्मारग्राम [ ग्राम ] ४८
कुलवती [ विद्याधरी ] १०५
कुशल [ मन्त्री ] ८८
कुशस्थल [ ग्राम ] २३६, २३७
कुशार्त्त [ देश ] १६९
कूणिक [ श्रेणिकपुत्र ] २६३, २६४, २६५, २६६
कूपनय [ कुलाल ] ५९, ६०
कूपिकाग्राम [ ग्राम ] ६२
कूर्मग्राम [ ग्राम ] ६५
कूष्माण्ड [ फल ] २१४
कृतमाल [ देव ] २४६
कृतवीर्य [ नृप ] २७३
कृष्ण [ वासुदेव ] १७५, १७६, १७८, १८०, १८१, १८३, ३२२, ३८७
केतुमञ्जरी [ कृष्णपुत्री-वीरकप्रिया ] ३२२
केशव [ कृष्णवासुदेव ] १७७, ३२१, ३८७
केशव [ श्रेष्ठिपुत्र ] १३, १४
केशी [ कंसकिशोर ] १७७
केशी [ पार्श्वगणधारी ] २१५
कोटिशिला [ शिला ] ३९
कोडालस [ अन्वय ] ४४
कोणिक [ नृप-श्रेणिकपुत्र ] १२६, ३११
कोल्लाक [ ग्राम-निवेश ] ३६, ४८, ५८, ८०
कोशल [ खग ] १७२
कोशल [ देश ] ११५
कोशला [ पुर ] ८०, १७२
कोशा [ वेश्या ] १८१, १८५, १८८, १८९
कोष्ठक [ उद्यान ] ४५५, ४५६
कौण्डिन्य [ तापस ] १२०, १४७, १४९,
कौशलिक [ राजा ] १४३
कौशाम्बी [ नगरी ] ७१, ७४, ७५, ८७, १२०, १२१, १२९, १३०, १३१, १३३, १३४, १७२, २७६, ४४५
कौशिक [ गोत्र ] ५४
कौशिक [ द्विज ] ३६

[ क्ष ]

क्षत्रियकुण्ड [ ग्राम ] ४४, ४५४
क्षितिप्रतिष्ठ / क्षितिप्रतिष्ठित [ पुर ] ६, १०, १३, १३५, ३५४, ३६१
क्षीणबल [ यक्ष ] १०६
क्षुद्रहिमाद्रि [ पर्वत ] १९, १६१
क्षेमिल [ शाकुनिक ] ५५
क्षोणीप्रतिष्ठान [ पुर ] ३६४

[ ख ]

खगामिनी [ विद्या ] १५९
खण्डा [ विद्युच्छिखापुत्री ] १२२
खरक [ वैद्य ] ७८, ७९

[ ग ]

गगनवल्लभ [ पुर ] २९८
गङ्गा [ नदी ] १६, १८६, १४३, २४९, ३३०, ४६३

गङ्गादेवी [ देवी ]
गज | [ कृष्णभ्राता-मुनि ] १८२
गजसुकुमार |
गजपुर [ पुर ] ४००
गदापाणि [ कृष्णवासुदेव ] १३८
गन्धर्वसेना [ खेचरी ] १७२
गन्धर्वसेना [ वणिकसुता ] १७२
गन्धसमृद्धक [ पुर ] १०
गन्धार [ देश ] १०, ३४५, ३५१, ३६१
गागलि [ राजपुत्र ] १४६
गान्धारक | [ नगाति ] ३३४, ३६४
गान्धारनृप |
गान्धारराजर्षि |
गिरिशुक [ कीर ] ३७९
गुणचन्द्र [ चन्द्रावतंसकपुत्र ] २२८
गुणचन्द्र [ सागरचन्द्रभ्राता ] ४१७
गुणवती [ श्रेष्ठिप्रिया ] २९१
गुणशिल [ चैत्य ] ३१२
गुणाकर [ राजपुत्र-श्रेष्ठिपुत्र ] १३
गोबर [ ग्राम ] ७९
गोबहुल [ गोशाला ] ५७
गोभद्र [ श्रेष्ठी ] २०२, २०३, २०४
गोमुख [ यक्ष ] २९
गोल्ल [ देश ] २६६
गोवर्द्धन [ श्रेष्ठी ] ३९९
गोविन्द [ कृष्णवासुदेव ] ५८, ५९, ६०, ६४, ६५, ६६, १७६, १७७, १७८, १७९, २११, २१२, २१३, २३०, ३८७
गौतम | [ द्विज-गणधर ] ८०, ८१, १३२, १४६, १४७, १४८, १४९, १५०
गौतमस्वामी | २११, २१२, २१३, २१५, २३३, ३९३
गौतम [ गोत्र ] ७९, ८०
गौतमस्वामी [ गणधर ] ३९३
गौरी [ बलमाता ] १४३
ग्रामाक [ निवेशन ] ६३

[ च ]

चक्रधर [ द्विज ] १६८
चक्षुष्कान्ता [ प्रतिरूपापुत्री ] १६, १७
चक्षुष्मान् [ मिथुनयुगल ] १६
चणक [ ग्राम ] २६६
चणिप्रसू | [ चाणक्य ] २६७, २६८, २६९, २७०
चणिपूत्र |
चणिभू |
चणिसुत |
चणिनन्दन |
चणी [ विप्र ] २६६, २६७
चणेश्वरी [ चाणक्यमाता ] २६६, २७०
चण्डकौशिक [ नाग ] ५४
चण्डप्रद्योत | [ नृप ] १३०, १३१, १३२, १३३, ३२०, ३२१
प्रद्योत |
चण्डरुद्र [ आचार्य ] ३२३, ३२४
चण्डवेग [ दूत ] ३८
चण्डवेग [ विद्याधरी ] १०७
चतुरिका [ चेटी ] ३०८, ३०९
चन्दन | [ श्रेष्ठी ] १५
चन्दनदास |
चन्दना [ वसुमती-वीरप्रभुशिष्या ] ७५, ७६, ७७, ७८, ८६, ८७, १३३, १३४
चन्द्र | [ राजा ] २६६, २६८, २६९, २७०, २७१
चन्द्रगुप्त |
चन्द्र | [ मदनरेखासुत ] ३४२, ३४३, ३४७, ३४८, ३४९, ३५०
चन्द्रयशा |
चन्द्रकान्ता [ मिथुनयुगल ] १६
चन्द्रकान्ता [ राज्ञी ] १०
चन्द्रध्वज [ नृप ] २२५
चन्द्रप्रभ [ अष्टमतीर्थकर ] १४७
चन्द्रयशा [ चन्द्रध्वजस्वसा ] २२५
चन्द्रयशा [ राज्ञी ] १०७
चन्द्रयशा [ विमलवाहनकलत्र ] १६
चन्द्रवेग [ विद्याधरी ] १०७
चन्द्रानन [ शाश्वतजिन ] ३४५
चन्द्रावतंस | [ नृप ] १११, २२८, २२९, ४१७, ४१८
चन्द्रावतंसक |
चमरचञ्चा [ चमरेन्द्रराजधानी ] ७२
चमरेन्द्र [ भवनपतिदेव ] ७२
चम्पक [ द्विपेन्द्र ] १७७, १७९
चम्पकरमणीय [ उद्यान ] ५९

चम्पा [ नगरी-पुर ] ५९, ७५, ७८, ८६, १२६, १३२, १४६, १७२, २२४, २२५, २३१, २६६, २७२, ३११, ३३४, ३३८, ३६५, ४५५
चम्पेश [ दधिवाहननृप-नृप ] ९९, ४४५
चर्मकार [ विषय ] ४३२
चाणक्य [ चन्द्रगुप्तगुरु ] २६६, २६७, २६९, २७०, २७१
चाणूर [ मल्ल ] १७७, १७९
चारुदत्त [ वणिक् ] १७२
चित्र [ मातङ्गसुत ] ११२, ११४
चित्र [ शङ्खस्वसुसुत ] ६६
चित्रकनका [ दिक्कुमारिका ] १८
चित्रगुप्ता [ दिक्कुमारिका ] १८
चित्रा [ दिक्कुमारिका ] १८
चित्राङ्गद [ चित्रक ] ३५४, ३५५, ३६१
चिलाती [ दासी ] १३६
चिलातीतनय | चिलातीसूनु | चैलातेय [ दासीपुत्र ] १३६, १३७
चिल्लणा | चेल्लणा [ चेटकसुता-श्रेणिकप्रिया ] २०३, २६२, २६३, २६५, ३१८, ३९८, ४४८
चुलनी [ ब्रह्मभार्या ] ११४, ११५, ११६
चेटक | चेटकराज [ नृप ] ७४, २६२, ३१८, ३३४, ३३५
चैत्य [ निवेशन ] ३६
चैत्र [ मास ] १७, २४, ३२
चोराक [ सन्निवेश ] ६०, ६१

[ छ ]

छत्र [ नगर ] ४०

[ ज ]

जनक [ नृप ] ७१
जनङ्गम [ श्मशानपाल ] ३३६, ३३७
जनार्दन [ कृष्णवासुदेव ] १७८, १८२, ३२२
जमदग्नि [. ] २७२, २७३
जमाली [ कुमार-वीरशिष्य ] ४७, ४५४, ४५५, ४५६, ४५७
जम्बू [ द्वीप ] १३, १५, १६, ३३, ४४, १०३, १४९, २०२, ३४६
जम्बू | जम्बूकुमार | जम्बूस्वामी [ ऋषभश्रेष्ठिपुत्र-मुनि-चरमकेवली ] २८३, २८४, २८५, २८६, २८८, २९१, २९३, ३००, ३०२, ३०४, ३०५, ३०७, ३१०, ३११
जम्बूखण्ड [ ग्राम ] ६२
जयन्तिका [ पार्श्वशिष्या ] ६०
जयन्ती [ दिक्कुमारिका ] १८
जयन्ती [ पुरी ] ३३, ३०३
जयन्ती [ विप्रभार्या ] ८०
जयपुर [ पुर ] २८५, ३५७
जयवती [ दासी ] ११२
जयवर्मा [ नरेश्वर ] ३४०
जयश्री [ श्रेष्ठिपुत्री-जम्बूपत्नी ] २८३, ३०६
जयश्री [ श्रेष्ठिप्रिया ] २८३
जयसिंह [ वणिक्पुत्र-मुनि ] ३२७, ३२८
जयसेन [ नृप ] ३४६
जयसेना [ श्रेष्ठिप्रिया ] २८३
जरा [ पल्लीशसुता ] १७२
जराकुमार | जरासुत [ जरापुत्र ] १७०, १७२, १७३, १७४, १८०, २२०, २२१
जलावर्त्त [ पल्वल ] १७१
जाम्बुवती [ कृष्णप्रिया ] १८०
जालन्धर [ गोत्र ] ४४
जाह्नवी [ नदी ] ५५, १८५
जितशत्रु [ नृप ] ४०, ६४, १४०, २१५, २१८, २१९, २३१, २७२, ३०२, ३५४, ३६१
जितारि [ नृप ] ३९४
जिनदत्त [ जीर्णश्रेष्ठी ] ७२
जिनदास [ वणिक् ] ५६, २९८, ३०२, ३०३
जिनधर्म [ वणिक् ] १०३
जीर्ण [ श्रेष्ठी ] ७२
जीवन्तस्वामी [ प्रतिमा ] २७५, २७९
जीवयशा [ कंसप्रिया ] १७०, १७४, १८०
जीवानन्द [ वैद्यपुत्र ] १३
जृम्भक [ ग्राम ] ७८, ७९
जृम्भक [ देव ] ४६, १५५

[ ज्ञ ]

ज्ञातखण्डवन [ तरुखण्ड ] ४७
ज्वलनवेग [ राजा ] १७१

ज्वलनशिख [ विद्याधरराजा ] १२२

[ ढ ]

ढङ्क [ कुलाल ] ४५६
ढङ्कर [ धार्मिक ] १६४
ढण्ढण [ कृष्णपुत्र ] १३८, १३९
ढण्ढणा [ कृष्णप्रिया ] १३८

[ त ]

तक्षशिला [ नगरी ] २६, २५१, २६०
तडित [ उपवनमालिक ] १६१
तत्त्वाक [ ग्राम ] ६२
तमालिनी [ पुर् ] २०१
तमिस्रा [ कन्दरा ] २४६
तामलि [ कुटुम्बी-तापस ] २०१
तालोद्घाटिनी [ विद्या ] २८५
तुङ्गगिरि [ पर्वत ] ३७
तुङ्गिका [ सन्निवेश ] ८०
तुङ्गिकाशिखर [ शिखर ] २२१
तुम्बवन [ सन्निवेश ] १४९
तुरमिणी [ पुर् ] २१८
तेजपाल [ सचिवेश्वर ] ४७९
तेतलि [ पुर ] २४१
तेतलि | तेतलिपुत्र [ मन्त्री ] २४२
तोयधारा [ दिक्कुमारिका ] १७
तोरण [ पुर ] ३६०
तोसलिपुत्र [ सूरि ] १६३

[ त्र ]

त्रिपुष्ठ [ विष्णु ] ३५, ३७, ३८, ३९, ६३
त्रिशला [ सिद्धार्थभार्या ] ४४, ४५
त्रिशलासुत [ वीरप्रभु ] ७४
त्वाष्ट्र [ चित्रानक्षत्र ] १७६, १७७

[ द ]

दण्डक [ अरण्य ] १४२
दण्डकी [ नृप ] १४०, १४१, १४२
दत्त [ कालिकस्वस्त्रीय ] २१८, २१९
दत्त [ तापस ] १४७, १४९
दत्त [ शिष्य ] २११, २२३, २२४
दधिमुख [ खेचर ] १७३
दधिवाहन [ भूपति ] ७५, ७७, ८६, ९९, ३३४, ३३८, ३३९
दन्तिला [ दासी ] ५९
दरिद्रस्थविर [ कुटुम्बी ] ६०
दर्दुर | दर्दुराङ्क [ सुर ] ४४५, ४४७
दशपुर [ पुर ] ११२, १५६, १५७, १६२, १६५
दशार्णभद्र [ नृप ] २७९, ४१५
दामोदर [ वासुदेव ] १७६
दिलीप [ राजा ] ३२५
दीर्घ [ कोशलाधिपति ] ११५, ११९, १२४
दुर्गत [ यक्ष ] ३७०
दुर्गिला [ देवदिन्नप्रिया ] २९३, २९४, २९५
दुर्मुख [ अनीक ] ९९
दूयमान [ तापस ] ४८
दृढधर्मा [ श्राद्ध ] २८२
दृढप्रहारी [ लुण्टाक-मुनि ] २३७
दृढभूमि [ भूमि ] ६७
दृढरथ [ राजा ] ३६१
दृढशक्ति [ खगेन्द्र ] ३६०
दृढसुव्रत [ एकादशमजिन ] ३४६
दृष्टिवाद [ द्वादशाङ्ग ] १५६, १६३, १६४, १९२
देव [ विप्र ] ८०
देवक [ नृप ] १७४, १७९
देवकी [ राजपुत्री ] १७४, १७५, १७६, १७९, १८१, १८२
देवदत्त [ वणिक्पुत्र ] ३२६, ३२७, ३२८
देवदत्त [ स्वर्णकार ] २९३, २९४, २९५
देवदिन्न [ स्वर्णकारपुत्र ] २९३
देवबोध [ मुनि ] ४७९
देवयशा [ देवकीसूनु-मुनि ] १७५, १८१
देवसेन [ महापद्म ] २१३
देवानन्द [ सूरि ] ४८०
देवानन्दा [ ऋषभदत्तप्रिया ] ४४
द्रमक [ भिक्षुक ] २३३
द्वारका | द्वारिका [ पुरी ] १३८, १८०, १८१, १८३, २२९, २३०, ३२१, ३८६, ३८७
द्विमुख [ प्रत्येकबुद्ध ] ३३४, ३४०, ३४१, ३४२, ३६४
द्वीपकुमार [ भवनपतिदेव ] १७

द्वैपायन [ ऋषि ] २२०

[ ध ]

धन [ वणिक् ] १५७, १५९
धन [ श्रेष्ठी ] १३
धन [ सार्थवाह ] ६, ८, ९, १३६, १३७
धनगिरि [ इभ्यपुत्र ] १४९, १५०, १५१, १५३, १५४, १६१
धनञ्जय [ नृप ] ४०
धनद [ देव ] २१, १०९
धनदत्त [ वणिक् ] ३०३
धनदेव [ नौवित्त ] २९२, २९३
धनपाल [ इभ्य ] १५०
धनप्रवर [ श्रेष्ठी ] १२१
धनमित्र [ द्विज ] ८०
धनमित्र [ सार्थेश ] २२५
धनश्री [ सार्थेशप्रिया ] २२५
धनसेन [ नृप ] २२९
धनावह [ पितृव्य ] १२१
धनावह [ वणिक् ] ३०४
धनावह [ श्रेष्ठी ] ७५, ७७, ८६, २९१, २९२
धनु [ मन्त्री ] ११५, ११६, १२४
धन्य [ धन्यापति ] २०५, २०६
धन्या [ शालिभद्रस्वसा ] २०४
धन्या [ सङ्गममाता ] २०५
धन्वन्तरी [ सुर ] २७२
धम्मिल [ द्विज ] ८०
धरण [ इन्द्र ] २५
धरण [ दशार्ह ] १७०
धरणीश / धरिणीश [ नृप ] ३१२
धर्म [ उपाध्याय ] ७५
धर्म / धर्मतीर्थेश [ पञ्चदशजिन ] १०९, १४७
धर्मघोष [ मन्त्री ] २२५
धर्मघोष [ मुनि ] २०४
धर्मदासगणि [ उपदेशमालाग्रन्थकर्ता ] ४७७
धर्मघोष / धर्म्मघोष [ मुनीश्वर ] ६, ७, ८, १०
धरणेन्द्र [ नागकुमारेन्द्र ] ७१
धवलक [ पुर ] ४८०
धातकीखण्ड [ क्षेत्र ] ११, ३४६
धान्यपुर [ ग्राम ] १३८
धारणी [ दधिवाहनराज्ञी ] ७५, ८६
धारिणी [ ऋषभश्रेष्ठिप्रिया ] २८३
धारिणी [ जितशत्रुजानि ] १४०
धारिणी [ युवराज्ञी-राज्ञी ] १४, ३६, ४०, २२४, ३१२
धारिणी [ सोमचन्द्रगेहिनी ] ९३, ९४
धारिणीपुत्र [ जम्बू ] २९९
धिक्कार [ दण्ड ] १६
धुन्धुमार [ नृप ] २२६, २२७

[ न ]

नगति [ प्रत्येकबुद्ध ] ३३४, ३६२, ३६३, ३६४
नगातिपुर [ पुर ] ३६२
नन्द [ अधिप ] ५८, १८४, १९२
नन्द [ गोकुलपति ] १७४, १७५, १७६, १७९
नन्द [ भूपाल ] २६६, २७०, २७१
नन्दन [ उद्यान ] ३८७
नन्दन [ जितशत्रुतनूज-मुनि ] ४०, ४४
नन्दन [ वन-उद्यान ] १९, २३
नन्दा [ चेटकमन्त्रिप्रिया ] ७४, ७५, ७७
नन्दा [ दिक्कुमारिका ] १८
नन्दिग्राम [ ग्राम ] ११, ७४, १६८, ३०१
नन्दिवर्द्धन [ सिद्धार्थपुत्र ] ४५, ४७
नन्दिवर्द्धना [ दिक्कुमारिका ] १८
नन्दिषेण [ द्विजपुत्र-मुनि ] १६८, १६९
नन्दिषेण [ पार्श्वदीक्षितसूरि ] ६२
नन्दिषेण [ श्रेणिकनन्दन ] ३८९, ३९०, ३९१, ३९२
नन्दी [ वीरप्रभुपितृमित्र ] ७४
नन्दी [ सत्यकिशिष्य ] ३१९, ३२०, ३२१
नन्दीश्वर [ द्वीप ] १९, २०, ९०, १७७, ३४५
नन्दीश्वर [ सत्यकिशिष्य ] ३१९, ३२०, ३२१
नन्दोत्तरा [ दिक्कुमारिका ] १८
नन्नसूरि [ सूरि ] ४८०
नभःसेन [ उग्रसेनपुत्र ] २२९, २३०
नभःसेना [ श्रेष्ठिपुत्री-जम्बुपत्नी ] २८३, ३०१
नभस्तिलक [ पर्वत ] ११
नमि [ कच्छसुत ] २५
नमि [ एकविंशतीर्थकर ] १४७, ३४७

नमि [ प्रत्येकबुद्ध ] ३३४, ३४७, ३४८, ३४९, ३५०, ३५१, ३६४
नमुचि [ सचिव ] ११२, ११४
नयसार [ नियोगभृत् ] ३३, ३४
नलिनीगुल्म [ अध्ययन-विमान ] २०७
नवमिका [ दिक्कुमारिका ] १८
नवीन [ श्रेष्ठी ] ७२
नाग [ आलय ] २२६
नाग [ वणिक् ] १७५, १८१
नागकुमार [ भवनपतिदेव ] १६, १७, ५५
नागदत्त [ गृही ] ५५
नागदत्त [ नागिलापिता ] २८०, २८१
नागदत्त [ मन्त्री ] ११८
नागदत्त [ सार्थवाह ] १०२, १०३
नागलोक [ देवनिकाय ] १६
नागशर्मा [ माणव ] ३०७
नागश्री [ नागिलपत्नी ] ११
नागश्री [ माणवपुत्री ] ३०६, ३०७
नागिल [ गृहपति ] ११
नागिला [ भवदेवप्रिया ] २८०, २८१, २८२, २८८
नागेन्द्र [ कुल ] ४७८
नाट्यमाल [ सुर ] २४९
नाट्योन्मत्त [ विद्याधर ] ११८, १२२
नाभि [ श्रीकान्तापुत्र-ऋषभपिता ] १७, २१
नाभिनन्दन | नाभिसूनु | नाभेय [ ऋषभप्रभु ] ३०, ३५, ८९, २६१
नाभेयनन्दन [ ऋषभपुत्र ] २५७
नारद [ ऋषि ] १७४, २२९, २३०
नालन्दा [ पृथ्वी ] ५७, ५८
निम्नगा [ नदी ] २४६
निषध [ रामपुत्र ] २२९
निहतारि [ देवकीसूनु-मुनि ] १७५, १८१
नृदत्त [ गृही ] ६१
नृसिंह [ धाम ] २२१
नेपाल [ देश ] १९०
नेमि [ द्वाविंशतीर्थकर ] १३८, १४७, १८१, १८२, २२०, २२१, २३०, ३२१, ३४६, ३८७
नैगमेषी [ सेनानीदेव ] १८, ४४

[ प ]

पञ्चाल [ देश ] ३४०
पण्डिता [ धात्री ] १२
पत्रपाल [ ग्राम ] ५९
पद्म [ ह्रद ] १९
पद्मप्रभु [ षष्ठतीर्थकर ] १४७
पद्मरथ [ अङ्गज ] ३४६, ३४७, ३४९
पद्मरथ [ नृप ] २७२, २८२
पद्मवती [ दिक्कुमारिका ] १८
पद्मश्री [ श्रेष्ठिपुत्री-जम्बुपत्नी ] २८३, २८८
पद्मसेना [ श्रेष्ठिपुत्री-जम्बुपत्नी ] २८३, २९३
पद्मा [ लक्ष्मीदेवी ] १६१
पद्मावती [ कूणिकप्रिया ] २६५
पद्मावती [ चेटकप्रिया ] ३३४
पद्मावती [ राज्ञी ] १४८, २४२, ३८८
पद्मावती [ श्रेष्ठिप्रिया ] २८३
पद्मोत्तर [ आलय ] २२२
पद्मोत्तर [ द्विपेन्द्र ] १७७, १७९
पन्थक [ महामात्य-मुनि ] ३८८, ३८९
परशु | पर्शुराम [ द्विज ] २७३
परासर [ कृषीवल ] १३८
पर्वत [ भूभुज् ] २७०, २७१
पर्वमित्र [ पुरोहितमित्र ] ३०५, ३०६
पवनञ्जय [ खग ] १७१
पाञ्चालक | पाञ्चालराजर्षि [ द्विमुख ] ३३४, ३४२
पाटलीपुत्र [ ग्राम-नगर-पत्तन ] १२६, १५७, १५८, १६२, १८४, १९२, २६६, २७४, ३०५, ३९४
पाण्डक [ वन ] १९
पाण्डुकम्बला [ शिला ] १९, ४५
पापा [ पुरी ] ७९
पार्श्व [ त्रयोविंशतीर्थकर ] ५१, ५९, ६२, ६३, ७२, १४७, २१५, ४६३
पालक [ अमात्य ] १४०, १४१
पालक [ ग्राम ] ७८
पिठर [ नृप ] १४६

पीठ [ श्रेष्ठिपुत्र ] १४, १५, २१
पुट्टिला | [ मन्त्रीजानि-देव ] २४२, २४३
पोट्टिला |
पुण्डरीक [ अचल ] ३८८, ३८९
पुण्डरीक [ अध्ययन ] १५०
पुण्डरीक [ गणधर ] २९, ३१, ३२
पुण्डरीक [ महर्षि ] ३९३
पुण्डरीक [ महापद्मसुत ] १४८, १४९
पुण्डरीका [ दिक्कुमारिका ] १८
पुण्डरीकिणी [ नगरी ] १२, १४, १४८
पुण्ड्रपवर्द्धन [ पत्तन ] ३५१, ३६१
पुण्ड्र [ देश ] २१३
पुण्य [ सामुद्रवेदिता ] ५७
पुण्यभद्र [ उद्यान ] २३१
पुण्यसार [ श्रेष्ठिसुत ] २९१, २९२
पुण्यहीन [ वणिक्पुत्र ] ३०३, ३०४
पुरन्दरयशा [ स्कन्दकभगिनी ] १४०, १४१
पुरिमताल [ उद्यान ] १२५
पुरिमताल [ पुर ] २७, ६४, ११४
पुरुषसिंह [ नृप ] २३९
पुरुषसिंह [ वीर ] ३६
पुलिन्द | [ शिवभक्त ] ३१७, ३१८
पुलिन्दक |
पुष्कल [ विजय ] २८२
पुष्कलावती [ विजय ] १४, १४८, ३४६
पुष्पकेतु [ नृप ] ३२८
पुष्पचूल [ अङ्गदेशराट् ] ११५, ११६, ११८, १२४
पुष्पचूल [ राजपुत्र ] ३२८, ३२९
पुष्पचूला [ राजपुत्री, साध्वी ] ३२६, ३२८, ३२९, ३३०
पुष्पदासी [ दासी ] ३६
पुष्पपुर [ पुर ] ३९९
पुष्पमाला [ दिक्कुमारिका ] १७
पुष्पमाला [ राज्ञी ] ३४६, ३४७, ३४९
पुष्पमित्र [ द्विज ] ३६
पुष्पवती [ कन्या ] ११८, १२३
पुष्पवती [ राज्ञी-देवी ] ३२८, ३२९, ३४६
पुष्पवती [ स्त्रीरत्न ] १२६
पुष्पशुक [ कीर ] ३७९
पुष्पसिंह [ पुण्यवतीसुत ] ३४६
पुष्पोत्तर [ विमान ] ४४, ३५१
पूतना [ विद्या ] १७६
पूरण [ कुटुम्बी ] ७२
पूरण [ दशार्ह ] १७०
पूर्णकलश [ ग्राम ] ६२
पूर्णभद्र [ चैत्य ] ४५५
पूर्णभद्र [ यक्ष ] ७८, २१३
पूर्णभद्र [ श्रेष्ठी ] १५
पूर्णभद्र [ सार्थवाहपुत्र ] १३
पूर्वविदेह [ क्षेत्र ] २६
पृथिवी [ दिक्कुमारिका ] १८
पृथिवी [ द्विजप्रिया ] ८०
पृथ्वीपाल [ नृप ] १३
पृष्ठचम्पा | [ नगरी ] ६०, १४६
पृष्ठिचम्पा |
पेढाल [ ग्रामणी ] ७२
पेढाल [ विद्याधर ] ३१८, ३१९
पेढालक [ उद्यान ] ६७
पेढाल [ ग्राम-पुर ] ६७, १७२
पेढालि [ सत्यकि ] ३२०
पोट्टिलाचार्य [ आचार्य ] ४०
पोतन | [ पत्तन ] ३५, ३७, ३९, ९३, ९४, ९५, ९८
पोतनपुर |
पोतनाधिप [ प्रसन्नचन्द्रराजा-राजर्षि ] ९९
पोलाश [ चैत्य ] ६७
प्रगल्भा [ पार्श्वजिनशिष्या ] ६३
प्रज्ञप्ति [ विद्या ] २५, ३४५
प्रणाममित्र [ पुरोहितमित्र ] ३०५, ३०६
प्रतिरूपा [ सुरूपाकन्या ] १६
प्रतीचीनविदेह | [ क्षेत्र ] ६, ३२
प्रत्यग्विदोह |
प्रदेशी [ नृप ] २१५, २६२
प्रदेशी [ श्वेतवीस्वामी ] ५५
प्रद्युम्न [ कृष्णपुत्र ] १८०
प्रद्युम्नसूरि [ सूरि ] ४८०
प्रद्योत [ अवन्तीपति ] ३४०, ३४१
प्रभव [ विन्ध्यपुत्र-स्वामी ] २८५, २८६, २८८, ३१०, ३११
प्रभास [ तीर्थ ] २४६

प्रभास [ द्विजपुत्र ] ८०
प्रभु [ विन्ध्यपुत्र ] २८५
प्रयाग [ तीर्थ ] ३३०
प्रसनेन्दु / प्रसन्नचन्द्र [ नृप-मुनि ] ६, ९६, ९७, ९८, ९९, १००
प्रसन्नचन्द्र [ राजा-मुनि ] ९६, ९७, ९८, ९९, १००
प्रसेनजित् [ प्रतिरूपापुत्र ] १६, १७
प्राग्विदेह [ क्षेत्र ] ११, १४
प्राणत [ नवमदेवलोक ] ४४
प्राणाम [ व्रत ] ७२
प्रियखण्डा [ कन्या ] ११८
प्रियङ्गु [ राज्ञी ] ३६
प्रियङ्गुमञ्जरी [ ] २२५
प्रियदर्शना [ जमालिपत्नी-महावीरपुत्री ] ४७, ४५५, ४५६
प्रियदर्शना [ राज्ञी ] २२८
प्रियदर्शना [ श्रेष्ठिपुत्री ] १५, १६
प्रियदर्शना [ सागरचन्द्रप्रिया ] ४१७
प्रियमित्र [ चक्रवर्ती ] ३५, ४०, १०३
प्रिया [ दासी ] २४०

[ फ ]

फल्गुरक्षित [ द्विजपुत्र-मुनि ] १६२, १६५
फाल्गुन [ मास ] २७

[ ब ]

बन्धुदत्त [ गृहस्थ ] २९२
बन्धुमती [ बन्धुदत्तनन्दिनी ] २९२
बन्धुमती [ विप्रकन्या ] ११७
बल [ गृही ] ७१
बल / बलदेव [ मुनि, बलदेव ] ३७, १४३, १७८, २२०, २२१, २२२
बलकोट्ट [ कोट्ट ] १४३
बलाहिका [ दिक्कुमारिका ] १७
बलिचञ्चा [ देवराजधानी ] २०१
बहली [ देश ] २६, २५१, २५५
बहुल [ द्विज ] ४८, ५८
बहुल [ महेश्वरदत्तमाता ] २८८
बहुली [ चेटी ] ६६
बहुशाल [ ग्राम ] ६४
बालचन्द्र [ चन्द्रावतंसकपुत्र ] २२८
बालचन्द्रा [ ] १७४
बाहु [ नृपपुत्र ] १४, १५, २१
बाहुबलि / बाहुबली [ नाभेयपुत्र-भरतानुज-सुनन्दासुत ] २१, २३, २४, २५, २५१, २५२, २५४, २५५, २५६, २५७, २५८, २५९, २६०, २६१
बिभीलक [ उद्यान ] ६३
बिभीलक [ यक्ष ] ६३
बीजपूरक [ फल ] २१४
बुद्धि [ वृद्धयोषित ] ३०१
बुद्धिल [ ] १२०
बृहद्बल [ राजा ] १६९
ब्रह्म [ द्वीप ] १५३
ब्रह्म [ भूपति ] ११४, ११५, १२४, १२५
ब्रह्मदत्त [ चुलनीपुत्र ] ११४, ११५, ११६, १२१, १२३, १२४, १२५, १२६, १२८
ब्रह्मदास [ कल्पनशिल्पी ] ११६
ब्रह्मदीपक [ श्रमण ] १५३
ब्रह्मपुत्र [ कल्पनशिल्पी ] ११६
ब्रह्मप्रिय [ ] १२४
ब्रह्मलोक [ पञ्चमदेवलोक ] ३६, २२२, २८२, ३९४
ब्राह्मण [ ग्राम ] ५८
ब्राह्मणकुण्ड [ ग्राम ] ४४
ब्राह्मी [ सुमङ्गलासुता-ऋषभपुत्री ] २१, २९, २६१

[ भ ]

भण्डीरमण [ यक्ष ] ५६
भद्रगुप्त [ गुरु-आचार्य ] १५७, १६४, १६५
भद्रबाहु [ आचार्य ] १९२, ४७८
भद्रसाल [ वन ] १९
भद्रा [ अवन्तीसुकुमारमाता ] २०७, २०८
भद्रा [ कामदेवप्रिया ] २३१
भद्रा [ कालिकसहोदरी ] २१८
भद्रा [ गोभद्रप्रिया ] २०२, २०३, २०४, २०५, २०६
भद्रा [ दिक्कुमारिका ] १८
भद्रा [ धनप्रिया ] १३६
भद्रा [ प्रतिमा ] ६६
भद्रा [ मङ्खलिप्रिया ] ५७, ६१
भद्रा [ महापद्ममाता ] २१३
भद्रा [ राजपुत्री ] १४३, १४४
भद्रा [ राज्ञी ] ३७, ४०
भद्रिकापुरी [ पुरी ] ६४

भद्रिलपुर [ पुर ] ६२, १७५
भद्रिला [ द्विजप्रिया ] ८०
भरत [ क्षेत्र ] १६, १९, २०, ३४, ३७, ४०, ४४, १३२, १४९, १९३, २०२, २४५, २५१, २५३, २५४, २५७, ३४६
भरत [ चक्रवर्ती-नाभेयपुत्र-सुमङ्गलासुत ] २१, २३, २४, २५, २९, ३०, ३४, ४०, ८९, ९२, १००, २४५, २४८, २५०, २५१, २५५, २५८, २५९, ३९४
भरतार्द्ध [ क्षेत्र ] २४६, २४७, ३४६, ३८७
भरताधीश | भरतेश | भरतेश्वर [ चक्री-ऋषभपुत्र ] २८, ३२, ९१, १४७, २४६, २४७, २४९, २५३, २५५, २५६, २६०
भवदत्त [ रेवतीसुत ] २८०, २८१, २८२
भवदेव [ रेवतीसुत ] २८०, २८१, २८२
भागवत [ मुनि ] ४००
भानु [ कृष्णपुत्र ] १८०
भानुकभीरु [ कृष्णापुत्र ] १८०
भानुवेग [ विद्याधर ] १०६, १०७
भारत [ क्षेत्र-वर्ष ] ३०, १०३, ३२५, ३५१
भारद्वाज [ द्विज ] ३६
भीष्मक [ नृप ] १८०
भूतदत्त [ मातङ्ग ] ११२
भूतदत्तिका [ शकडालपुत्रिका ] १८५
भूता [ शकडालपुत्रिका ] १८५
भूतानन्द [ नागराट् ] ७२
भोगंकरा [ दिक्कुमारिका ] १७, ४५
भोगपुर [ पुर ] ७४, २९१, २९२
भोगमालिनी [ दिक्कुमारिका ] १७
भोगवती [ दिक्कुमारिका ] १७
भोजवृष्णि [ सुवीरपुत्र ] १७०
भोलिग [ यक्ष ] ३०१
भ्रासक [ सिंहसेनपुत्र ] ३६५, ३६६

[ म ]

मकरन्द [ उद्यान ] १०४
मखप्रिय [ विप्र ] ३९०
मगध [ देश ] ६४, १२१, १२२, १३८, १६८, २७९
मङ्ख | मङ्खलिसूनु [ गोशाल ] ५८, ५९, ६०, ६१, ६२, ६३, ६४, ६५, ६६, २११, २१२, २१३, २१४
मङ्खलि [ गोशालपिता-मङ्ख ] ५७, २११
मङ्गल [ विजय ] १०
मणिचूड [ चारणश्रमण ] ३४५
मणिप्रभ [ नृपपुत्र ] ३४५, ३४६
मणिरथ [ नृप ] ३४२, ३४६, ३४७
मण्डिक [ द्विजपुत्र ] ८०
मथुरा [ पुरी ] ५६, १४२, १६९, १७०, १७४, १७७, १७८, २८६, २८७, ३२६, ३२७, ३६८
मथुरानाथ | मथुरापति [ कृष्ण ] १७८
मदन [ यक्ष ] ३४१
मदनमञ्जरी [ वनमालापुत्री ] ३४१
मदनरेखा [ युवराजप्रिया ] ३४२, ३४३, ३४४, ३४६, ३४७, ३४९
मदनवेगा [ वसुदेवभार्या ] १७८
मदनिका [ दासी ] ३५५
मद्रुक | मद्रुकराज [ पन्थकतनय ] ३८८, ३८९
मधुपुर [ पुर ] ३५५
मन्दिर [ सन्निवेशन ] ३६
मरीचि [ भरतपुत्र-त्रिदण्डी ] ३४, ३५, ३६, २१९
मरुदेव [ चक्षुष्कान्तापुत्र ] १७
मरुदेवा | मरुदेवी [ श्रीकान्तापुत्री-ऋषभमाता ] १७, २०, २८, ३३३
मर्दन [ ग्राम ] ६४
मलयसुन्दरी [ राज्ञी ] २३९
मल्लि [ एकोनविंशतीर्थकर ] १४७, ३४७
महाकच्छ [ भूप ] २५
महाकाल [ देवकुल ] २०८
महापद्म [ नृप ] १४८
महापद्म [ भद्रापुत्र ] २१३
महापीठ [ सार्थेशपुत्र ] १४, १५, २१
महापुर [ पुर ] १६१
महापुरी [ पुरी ] १६२, १६४
महाबल [ चन्द्रकान्तापुत्र ] १०
महाभद्रा [ प्रतिमा ] ६६
महाभैरव [ उद्यान ] ७९
महारोहिणी [ विद्या ] ३१८
महावप्र [ विजय ] ३३

महाविदेह [ क्षेत्र ] १२, १४८, २०१, २८२, ४५७
महावीर [ तीर्थकर ] ४६, १३३, २१५, २१९, ३११
महाशुक्र [ अष्टमदेवलोक ] ३७, १६९
महासाल [ शालानुज ] १४६
महासेन [ वन ] ७९
महासेना [ सेना ] ३८७
महीधर [ ईशानचन्द्रपुत्र ] १३
महेन्द्रप्रभु [ आचार्य ] ४७८
महेन्द्रसिंह [ कालिन्दीसूरनन्दन ] १०४, १०५, १०८
महेश्वरदत्त [ इभ्य ] २८८
माकार [ दण्ड ] १६
मागध [ तीर्थ ] २४५, २४६
मागधेश | मागधाधीश [ मागधतीर्थेश ] २४५
माणिभद्र [ धनसार्थवाहमित्र ] ८, ९
माणिभद्र [ यक्ष ] ७८, २१३
मातङ्ग [ यक्ष ] ७९
मालवती [ पुरी ] ७१
माहेन्द्र [ क्षत्रिय ] ७४
माहेन्द्रमहेन्द्र [ चतुर्थदेवलोकेन्द्र ] ७८
माहेश्वरी [ पुरी ] ३७, १६१
मित्रप्रभा [ नृप ] २२४, २२५
मिथिला [ पुरी ] ७१, ८०, २७२, ३४७, ३४८, ३५०
मिथिलापति | मिथिलेशिता | मिथिलेन्द्र [ पद्मरथनृप ] ३४६
मुकापुरी [ पुरी ] ४०
मुकुन्द [ कृष्णवासुदेव ] १८३
मुग्धगण [ गृहस्थ ] ३९८
मुञ्जकेशी [ दिक्कुमारिका ] १८
मुनिचन्द्र [ चन्द्रावतंसकपुत्र ] १११, २२८
मुनिचन्द्र [ पार्श्वशिष्यसूरि ] ५९, ६०, ६२
मूला [ धनावहप्रिया ] ७५, ७६, ७८
मूषिकार [ श्रेष्ठी ] २४२
मृगवन [ उद्यान ] ३८८, ३८९
मृगावती [ राजपुत्री-चेटकप्रिया-साध्वी ] ३७, ७४, ७५, ७७, ८६
मृगावती [ शतानीकप्रिया-साध्वी ] १३०, १३१, १३२, १३३, १३४
मृतगङ्गा [ नदी ] ११२
मृतगङ्गातट [ ह्रद ] ४६३, ४६४
मृत्तिकावती [ पुरी ] १७४
मेघ [ ग्रामपति ] ६२
मेघ | मेघकुमार [ धारिणीपुत्र ] ३१२, ३१३
मेघङ्करा [ दिक्कुमारिका ] १७
मेघनाद [ ] २७४
मेघमाला [ दिक्कुमारिका ] १७
मेघमालिनी [ दिक्कुमारिका ] १७
मेघमुख [ सुर ] २४७
मेघरथ [ विद्याधर ] २९८, २९९
मेढाक [ ग्राम ] ७४
मेण्ढक [ ग्राम ] २१३
मेतार्य [ द्विजपुत्र-मुनि-मेतिकासुत ] ८०, २०८, ४१८, ४१९, ४२०
मेरु [ पर्वत ] २५, ४५
मेरुप्रभ [ कुम्भी ] ३१३
मोराक [ सन्निवेश ] ४८, ५२
मौद्रायण [ नृप ] १६२
मौर्य [ द्विज ] ८०
मौर्य [ सन्निवेश ] ८०
मौर्यपुत्र [ द्विजपुत्र ] ८०
मौष्टिक [ मल्ल ] १७७, १७९

[ य ]

यक्षदत्ता [ शकडालपुत्रिका ] १८५
यक्षा [ शकडालपुत्रिका ] १८५
यज्ञदेव [ द्विज ] १३५, १३६
यदु [ राजा ] १६९
यमक [ वेत्री ] २८
यमुना [ नदी ] १७८, १७९, २८६
यशस्वी [ चन्द्रकान्ताङ्गसम्भव ] १६
यशोग्रीव [ वीणाचार्य ] १७२
यशोदा [ नन्दकान्ता ] १७५, १७६, १७८, १८२
यशोदा [ समरवीरपुत्री ] ४७
यशोधरा [ चक्रिप्रिया ] २८२
यशोधरा [ दिक्कुमारिका ] १८
यशोमती [ राज्ञी ] १४६
यानक [ विमान ] ७१

युगन्धर [ मुनि ] ११
युगबाहु [ मणिरथसहोदर-युवराज ] ३४२, ३४३, ३४६, ३४७, ३४९
युगादि / युगादिजिन / युगादिदेव [ ऋषभदेव-प्रथमतीर्थकर ] २०,२५२, २५७, ३३३

[ र ]

रतिकर [ गिरि ] १९, ३४५
रत्नद्वीप [ द्वीप ] २९२
रत्नपुर [ पुर ] १०३, १६८, १६९
रत्नवती [ श्रेष्ठिपुत्री ] १२१, १२२
रत्नसिंह [ पुण्यवतीसुत ] ३४६
रत्नाढ्यमन्दिर [ पुर ] १२२
रत्नावती [ कन्या ] १२४
रत्नावह [ पुर ] ३४५
रथावर्त्त [ महागिरि ] ३९
रमणीय [ नगर ] ३०६
राम [ धाम ] ६४
राजगृह [ पुर-पुरी ] ३६, ५७, ६३, ६५, ८०, ९९, १००, १३६, १४६, २०२, २०६, २१३, २२६, २३३, २६२, २६४, २६६, ३१२, ३९०, ३९८, ४२०, ४५०
राम [ ] २७२, २७३, २७४
राम [ बलदेव-मुनि ] १७६, १७७, १७८, १७९, २२१, २२२, २२९, २७२, २७३, २७४
राम [ गृही ] ६१
राष्ट्रकूट [ अन्वय ] २८०
रिपुप्रतिरिपु [ राजा ] ३७
रिष्टपुर [ नगर ] १७३
रुक्मि [ रुक्मिणीबन्धु ] १८०
रुक्मिणी [ कृष्णप्रिया ] १८०
रुक्मिणी [ धनकन्या ] १५७, १५८, १५९
रुक्मिणी [ राज्ञी ] ३८७
रुचक [ पर्वत ] १८
रुद्र [ देवता ] ३२१
रुद्रदेव [ अभव्य ] ३२५
रुद्रदेव [ नृदेव ] १४४, १४५
रुद्रसोमा [ द्विजभार्या ] १६२, १६३, १६४
रुधिर [ भूप ] १७२
रूपा [ दिक्कुमारिका ] १८
रूपासिका [ दिक्कुमारिका ] १८
रूपिकावती [ दिक्कुमारिका ] १८
रूप्यवालुका [ सरित् ] ५३
रेणा [ शकडालपुत्रिका ] १८५
रेणुका [ नृपकन्या ] २७२, २७३
रेवती [ कौटुम्बिकभार्या ] २८०, २८१
रेवती [ श्राविका ] २१४
रैवत [ पर्वत ] ३८७
रोहिणी [ रुधिरकन्या ] १७२, १७३, १७४, १७९

[ ल ]

लक्ष्मी [ मन्त्रिपत्नी ] १३
लक्ष्मी [ राज्ञी ] १२
लक्ष्मीवती [ दिक्कुमारिका ] १८
लक्ष्मीवती [ शकडालपत्नी ] १८४
ललिताङ्ग [ देव ] ११, १२
ललिताङ्ग [ पुरजन ] ३०८, ३०९, ३१०
लवण [ वारिधि ] १४
लाङ्गल [ ग्राम ] ६१
लीलावती [ राज्ञी ] ३०८, ३०९
लोहजङ्घ [ दूत ] ३४०
लोहार्ग्गलपुर / लोहार्गलपुर [ पुर ] १२, ६४

[ व ]

वज्र / वज्रर्षि / वज्रस्वामी [ ऋषि ] १४६, १४९, १५०, १५१, १५२, १५३, १५४, १५५, १५६, १५७, १५८, १५९, १६०, १६१, १६४, १६५, १६६, १६७, २०९, ३९३
वज्रजङ्घ [ सुवर्णजङ्घपुत्र ] १२, १३
वज्रदत्त [ चक्री ] २८२
वज्रनाभ [ राजपुत्र-चक्री ] १४, १५, १७, २६
वज्रलाढा [ भूमि ] ६५
वज्रवेग [ विद्याधर ] १०७, १०८
वज्रसेन [ चक्री-नृप ] १२, १४, २६
वज्रसेन [ वज्रशिष्य ] १६६
वज्रायुध [ राजा ] ३०५
वत्स [ देश ] ८०
वत्समित्रा [ दिक्कुमारिका ] १७
वनमाला [ राज्ञी ] २८२

वनमाला [ सती ] ३४१
वरदाम [ तीर्थ ] २४६
वरधनु [ मन्त्रीपुत्र ] ११५, ११६, ११९, १२३
वररुचि [ द्विज ] १८५, १८६, १८८
वरुण [ श्रेष्ठी ] ३५५
वरुणा [ द्विजभार्या ] ८०
वर्द्धन [ मुनिचन्द्रशिष्य ] ५९
वर्द्धमान [ ग्राम ] ४९
वर्द्धमान [ चतुर्विंशतीर्थंकर ] ५, ४५, १४७, ४५५, ४७८
वर्द्धमान [ शाश्वतजिन ] ३४५
वल्कलचीरी [ धारिणीपुत्र ] ९६, ९७, ९८
वसन्तपुर [ नगर ] ६, २७२, २९९, ३०२, ३२५, ३७८
वसु [ द्विज ] ८०
वसुदेव [ दशार्ह ] १७०, १७१, १७२, १७३, १७४, १७५, १७६, १७८, १७९, १८०, १८१
वसुपालित [ श्रेष्ठी ] २८३
वसुभाग [ धनुमित्र ] ११९
वसुभूति [ द्विज ] ७९
वसुभूति [ श्रावक ] २७५
वसुमती [ धारिणीपुत्री ] ७५, ८६
वसुमती [ वणिक्प्रिया ] ३०३
वस्तुपाल [ सचिवेश्वर ] ४७९
वाटधानक [ पुर ] ३३८
वाणिजक [ ग्राम ] ६६
वायल [ वणिज् ] ७८
वायुकुमार [ भवनपतिदेव ] ८९
वायुभूति [ द्विजपुत्र ] ८०
वारत्त / वारदत्त [ ऋषि-मन्त्री ] २२४, २२६, २२७
वारदत्त [ नगर ] २२६
वाराणसी [ पुरी ] ७१, ११२, १४३, ४६३
वारिषेण [ शाश्वतजिन ] ३४५
वारिषेणा [ दिक्कुमारिका ] १७
वारुणी [ दिक्कुमारिका ] १८
वारुणी [ द्विजप्रिया ] ८०
वालुकाग्राम [ ग्राम ] ७०
वासव [ खग ] ३६०
वासुकी [ नागिलामाता ] २८०
वासुदेव [ कृष्ण ] २३०
वासुपूज्य [ द्वादशतीर्थंकर ] १४७, २७२, ३३४
विक्रमयशा [ नृप ] १०२, १०३
विचित्रा [ दिक्कुमारिका ] १७
विजय [ मुहूर्त ] ७९
विजय [ सुर ] १०९, ११०
विजयखेट [ पुर ] १७१
विजयघोष [ मुनि ] ३९४
विजयदेवा [ द्विजप्रिया ] ८०
विजयवती [ त्रिपृष्ठभार्या ] ६३
विजयश्री [ श्रेष्ठिप्रिया ] २८३
विजयसेन [ सूरि ] २४०, ३२५, ४७९
विजयसेना [ सुग्रीवपुत्री ] १७१
विजया [ दिक्कुमारिका ] १८
विजया [ पार्श्वजिनशिष्या ] ६३
विजया [ सुग्रीवतनया ] १७२
विजितसेनक [ देवकीसूनु-मुनि ] १७५
विदिशापुर [ पुर ] २०७
विदेह [ क्षेत्र ] १०, १३, १५, ३५, ४०, २१३, २१४, २१७, २३३, ३१४
विद्युच्छिखा [ ज्वलनशिखप्रिया ] १२२
विद्युत्कुमार [ भवनपतिदेव ] ७१
विद्युन्मती [ दासी ] ५९
विद्युन्माली [ देव-विद्याधर ] २८२, २८३, २९८, २९९
विनमि [ महाकच्छसुत ] २५
विनयन्धर [ सूरि ] ११०
विनीता [ पुरी ] २१
विन्ध्य [ अद्रि ] २१३, ३५५, ३९७
विन्ध्य [ जयपुरप्रभु ] २८५
विमल [ त्रयोदशतीर्थंकर ] १४७
विमलवाहन [ कुलकर ] १६
विमलवाहन [ महापद्म ] २१३
विमलाचार्य [ आचार्य ] ३६०
विशाखनन्दी [ विश्वनन्दिपुत्र ] ३६, ३७
विशाखभूति [ युवराज ] ३६
विशाखा [ विद्युच्छिखापुत्री ] ११८, १२२
विश्वनन्दी [ राजा ] ३६
विश्वप्रिय [ देश ] २८२
विश्वभूति [ विशाखभूतिपुत्र ] ३६, ३७

विश्वम्भर [ नृप ] ३८६
विष्णु [ आयतन ] ६४
विष्णु [ कृष्णवासुदेव ] १७९, १८२, ३२२
विष्णुकुमार [ राजा ] १७२
विष्णुश्री [ सार्थवाहप्रिया ] १०२, १०३
विसाला [ पुरी ] ४३२
विहल्ल [ चेल्लणापुत्र ] २६३, २६४, ३१२
वीतशोका [ पुरी ] २८२
वीर [ चतुर्विंशतितमजिन ] ४८, ५६, ६३, ८०, ८१, ९८, १३७, १४६, २०५, २११, २१३, २१४, २१५, २१९, २३१, २७९, २८२, ३११, ३१२, ३१८, ४४७, ४५५, ४५६, ४७८
वीर | वीरक [ कुविन्द ] ३२१, ३२२
वीरघोष [ कर्मकृत् ] ५३
वीरमती [ श्रेष्ठिप्रिया ] २८३
वीरसेन [ नृपसेवक ] २३८
वीरसेन [ राजपुत्र ] ३८६
वृषभ | वृषभप्रभु [ प्रथमतीर्थंकर ] ३४, २४५
वेगवती [ ] १७३, १७४
वेगवती [ नदी ] ४९
वेणा [ शकडालपुत्रिका ] १८५
वैक्रिय [ लब्धि ] १५५
वैजयन्त [ सुर ] १०९, ११०
वैजयन्ती [ दिक्कुमारिका ] १८
वैताढ्य [ गिरि ] ११, १५, १०८, १२२, १७१, २४६, २७८, २९८, ३६०
वैताढ्यकुमार [ देव ] २४६
वैदर्भी [ रुक्मिपुत्री ] १८०
वैदेहिक [ नमि ] ३३४
वैभार | वैभारगिरि [ पर्वत ] २०५, २०६, २३३, २८३, ४२०, ४२१
वैशङ्कायन [ तापस ] ६५
वैशाख [ मास ] २६, ७९
वैशाली [ नगरी ] ६३, ६६, ७१, ३१८
वैश्रवण [ तीर्थंकर ] १४७
वैश्रवण [ श्रेष्ठी ] १२४
व्यक्त [ द्विजपुत्र ] ८०
व्योमगति [ विद्या ] १५५

[ श ]

शकटानन [ कानन ] २८
शकटाल | शकडाल [ मन्त्री ] १८४, १८६, १८८
शकटालभू [ स्थूलभद्र ] १९२
शकुनि [ विद्या ] १७६
शङ्ख [ गणराज ] ६६
शङ्ख [ ध्वज ] १७७
शङ्ख [ नेमिपूर्वभव ] १७६
शङ्ख [ राजा ] १४२
शङ्ख [ वाणारसीपति ] ११२
शङ्खधमक [ ] २९९, ३००
शङ्खपुर [ देश-पुर ] ३७, ३८, २३८
शतद्वार [ पुर ] २१३
शतबल [ क्ष्माभृत् ] १०
शतानीक [ नृप ] ७५, ७७, १३०, १३१, ४४५
शतायुध [ राजा ] ३०८
शत्रुञ्जय [ गिरि ] ३१, ३२, ३८८
शत्रुमर्दन [ नृप ] ३३
शत्रुसेन [ देवकीसूनु-मुनि ] १७५, १८१
शमक [ वेत्री ] २८
शम्बल [ वृषभ ] ५६
शरवण [ ग्राम ] ५७
शशी [ जितारिपुत्र ] ३९४, ३९५
शाखापुर [ शाखा ] १६३
शान्तिनाथ [ षोडशतीर्थंकर ] १४७
शान्तिसूरि [ सूरि ] ४७८
शाम्ब [ कृष्णपुत्र ] २३०
शाल [ तरु ] ७९
शाल [ नृप-ऋषि ] १४६
शाल [ वन ] ६४
शालार्या [ व्यन्तरी ] ६४
शालिग्राम [ ग्राम ] २०५, २९९
शालिभद्र [ भद्रापुत्र ] २०२, २०३, २०४, २०५, २०६
शालिशीर्ष [ ग्राम ] ६३
शासक [ सिंहसेनपुत्र ] ३६५, ३६६
शिग्रु [ तरु ] ५३

शिव [ देवतामूर्ति ] ३९७, ३९८
शिव [ राजपुत्र ] २८२
शिवदत्त [ नैमित्त ] ६१
शिवा [ प्रद्योतप्रिया ] ३२०, ३४०
शिवा | शिवादेवी [ समुद्रविजयप्रिया-नेमिमाता ] १७०, १७६, १७७
शिशुपाल [ ] १८०, २२१
शीतल [ दशमतीर्थंकर ] १४७
शीलवती [ श्रेष्ठिपत्नी ] १३
शुक | शुकाचार्य [ आचार्य ] ३८८
शुक्र [ अष्टमदेवलोक ] ४०
शूर [ बृहद्बलपुत्र ] १६९
शूलपाणि [ यक्ष ] ४९
शेषवती [ दिक्कुमारिका ] १८
शैलक | शैलकाचार्य [ नृप-आचार्य ] ३८८, ३८९
शैलकपुर [ पुर ] ३८८, ३८९
शौरि [ शूरपुत्र ] १६९, १७०, १७३, १७४, १७५, १७६
शौरिपुर [ पुर ] १६९, १७३
शौर्यपुर [ पुर ] १७६
श्यामा [ सुग्रीवपुत्री ] १७१, १७२
श्यामा [ यशोग्रीवतनया ] १७२
श्यामाक [ गृही ] ७९

[ श्र ]

श्रमणदत्त [ श्रेष्ठी ] २८३
श्रावण [ मास ] १७७
श्रावस्ती [ नगरी ] ६०, ६१, ६६, ७१, १४०, २११, २१५, २३९, ४५६
श्री [ दिक्कुमारिका ] १८
श्रीकान्ता [ चक्षुष्कान्तापुत्री ] १७
श्रीद [ धनददेव ] २०, १४९, १५०
श्रीप्रभ [ विमान ] ११
श्रीभद्रा [ नृदत्तप्रिया ] ६१
श्रीमती [ वज्रसेनचक्रिसुता ] १२, १३
श्रीमती [ वैश्रवणश्रेष्ठिसुता ] १२४
श्रीयक [ शकडालपुत्र ] १८५, १८६, १८७, १८८, १८९, १९३
श्रेणिक [ नृप ] ९९, २०२, २०३, २०६, २६२, २६४, २६५, २६६, २८३, ३११, ३१२, ३१८, ३९०, ३९८, ३९९, ४००, ४२०, ४४६, ४५०
श्रेयांस [ एकादशतीर्थंकर ] १४७
श्रेयांस [ सोमप्रभपुत्र ] २५, २६
श्वेतबक [ दुस्थितनर ] ८७
श्वेतवी [ पूरी ] ३६, ५३, ५४, ५५, ७१, २१५

[ स ]

संमुचि [ भूपति ] २१३
संवाहन [ राजा ] ८८
सङ्गम [ धन्यापुत्र ] २०५
सङ्गम [ स्थविराचार्य ] २११, २२३, २२४
सङ्गम | सङ्गमक [ सुर ] ६७, ७०, १०९
सतेरा [ दिक्कुमारिका ] १८
सत्यकी [ पेढालपुत्र ] ३१८, ३१९, ३२०
सत्यभामा [ कृष्णप्रिया ] १७८, १८०
सदागम [ आचार्य ] ३६५
सनत्कुमार [ चक्री ] १०२, १०३, १०५, १०७, १०८, ११०, ११२
सनत्कुमार [ तृतीयदेवलोक ] ३६, १०३
सनत्कुमारेन्द्र [ तृतीयदेवलोकेन्द्र ] ७४, ७८
सन्धीरण [ अन्निकापुत्र-मुनि-सूरि ] ३२८, ३२९, ३३०
सन्ध्यावली [ विद्याधरी ] १०७
समुद्र [ श्रेष्ठी ] २८३
समुद्र | समुद्रविजय [ दशार्ह ] १७०, १७३, १७४, १७६, १७७, १७९, १८०, ३८६
समुद्रदत्त [ महेश्वरदत्तपिता ] २८८
समुद्रदत्त [ श्रेष्ठी ] २८३
समुद्रदत्ता [ हरिपत्नी ] ३४६
समुद्रप्रिय [ ललिताङ्गपिता ] ३०९
समुद्रश्री [ श्रेष्ठिपुत्री-जम्बुपत्नी ] २८३, २८८
सम्पुल [ दधिवाहनकञ्चुकी ] ७७
सम्प्रति [ नृप ] २७५, २७७, २७८, २७९
सम्भव [ तृतीयतीर्थंकर ] १४७
सम्भूत [ मातङ्गसुत ] ११२, ११४
सम्भूतविजय [ आचार्य ] १८८, १८९, १९२
सम्भूति [ मुनि ] ३७

सयाहारा [ दिक्कुमारिका ] १८
सर्वतोभद्रा [ प्रतिमा ] ६६
सर्वप्रभा [ दिक्कुमारिका ] १८
सर्वाण | सर्वाणभूति | सर्वानुभूति [ मुनि ] २१२, २१३
सर्वार्थ | सर्वार्थसिद्ध | सर्वार्थसिद्धि [ विमान ] १७, ४०, ९१, १४९, २०६, २१३
सहदेवी [ महादेवी ] १०३
सहमित्र [ पुरोहितमित्र ] ३०५
सहसाम्रवन [ वन ] १८१
सहस्त्रमल्ल [ वीरसेन ] २३८
सहस्त्रार [ नवमदेवलोक ] ५५, २१२
साकेत [ नगर ] १०७, १११, १२९, २२८
सागर [ दशार्ह ] १७०
सागर | सागरचन्द्र [ श्रेष्ठिसुत ] १५, १६
सागर | सागरेन्दु | सागरचन्द्र [ निषधनन्दन ] २२९, २३०
सागरचन्द्र [ चन्द्रावतंसकपुत्र ] २२८
सागरचन्द्र [ नृपपुत्र ] ४१७, ४१८
सागरचन्द्र [ सूरि ] १११
सागरदत्त [ ] १२०
सागरदत्त [ चक्रिसुत ] २८२
सागरदत्त [ श्रेष्ठी ] २८३
सागरदत्त [ सार्थपति ] १३
सागरदत्त [ हरिपुत्र ] ३४६
सागरदेव [ हरिपुत्र ] ३४६
साङ्ख्य [ मत ] ३६
साण्डिल्य [ विप्र ] ११२
सात्वत [ महावीर ] ३८६
साधुदासी [ जिनदासप्रिया ] ५६
सानुयष्टिक [ ग्राम ] ६६
सामानिक [ देवजाति ] १४९
साम्ब [ कृष्णपुत्र ] १८०
सिंह [ ग्रामेशज ] ५९
सिंह [ मुनि ] २१४
सिंहगिरि [ गुरु ] १५०, १५१, १५४, १५७, २०९
सिंहगुहा [ भिल्लपल्ली ] १३६, ९०
सिंहपुर [ पुर ] १०३
सिंहरथ [ नृप ] १७०, ३५१, ३६१, ३६२
सिंहला [ राज्ञी ] ३६५
सिंहसेन [ नृप ] ३६५
सिद्धदत्त [ नाविक ] ५५
सिद्धायिका [ देवी ] ७९
सिद्धार्थ [ देव ] ४८, ४९, ५१, ५२, ५८, ५९, ६०, ६१, ६२, ६३, ६४, ७८, २२०, २२१
सिद्धार्थ [ नृप ] ४४, ४५, ६३, ६५, ६६
सिद्धार्थ [ वणिज् ] ७८, ७९
सिद्धार्थ [ वन ] २४
सिद्धार्थपुर | सिद्धार्थपुरी [ नगरी ] ६५, ६६
सिद्धार्थभू | सिद्धार्थसूनु [ वीरप्रभु ] ६५, ६६
सिद्धि [ वृद्धयोषित ] ३०१
सिन्धु [ देश ] १७०
सिन्धु [ नदी-देवता ] १६, ७९, २४६, २४७, २४८
सीता [ दिक्कुमारिका ] १८
सीमन्धर [ स्वामी ] १९३
सुंसुमा [ धनसुता ] १३६, १३७
सुकण्टक [ चौर ] १२१
सुकुमारी | सुकुमारिका [ शासक-भ्रासकानुजा ] ३६५, ३६६
सुकोशला [ कोशलपुत्री ] १७२
सुक्षेत्र [ ग्राम ] ७८
सुगुप्त [ चेटकमन्त्री ] ७४, ७७
सुग्राम [ ग्राम ] २८०, २८१
सुग्रीव [ क्ष्मापति ] १७१
सुग्रीव [ वीणाचार्य ] १७२
सुघोषा [ घण्टा ] १८
सुजात [ सार्थेशपुत्र ] २२५
सुज्येष्ठा [ चेटकसुता ] ३१८
सुदर्शन [ परिव्राट् ] ३८८
सुदर्शन [ श्रेष्ठी ] ३८८
सुदर्शन [ सूरि ] २३८
सुदर्शनपुर [ पुर ] ३४२, ३४६, ३४८, ३४९, ३५०

सुदर्शना [ राज्ञी ] २२८
सुदर्शना [ सिद्धार्थपुत्री ] ४५
सुदाढ [ नागकुमारदेव ] ५५, ५६
सुधर्म | सौधर्म [ कल्प ] १२, १३, ३६, ७०, १०३, ११४, १२५, २१७
सुधर्मा [ द्विजपुत्र ] ८०
सुधर्मा [ सभा ] ७१, १०९
सुधर्मा | सुधर्मस्वामी [ गणधर ] २८३, २८४, २८६, २९३, ३१०, ३११
सुधर्मेश [ तीर्थेश ] ८१
सुधर्म्मेन्द्र | सौधर्माधिप | सौधर्माधिभू | सौधर्म्मेन्द्र | सौधर्मनाथ | सौधर्म्मनायक [ प्रथमदेवलोकेन्द्र ] १९, २०, ७२, ९२, १०९, १७७
सुनक्षत्र [ मुनि ] २१२, २१३
सुनन्द [ गृही ] ५८
सुनन्दा [ ऋषभभार्या ] २१
सुनन्दा [ धनपालनन्दिनी ] १५०, १५१, १५२, १५३, १५४, १५८, १५९
सुनन्दा [ भूपनन्दिनी ] १०७
सुनन्दा [ राज्ञी ] ३१२
सुनन्दा [ श्रेणिकप्रिया ] २६२
सुनन्दा [ स्कन्दकानुजा ] २३९
सुनन्दा [ स्त्रीरत्न ] ११४
सुनन्दाभू | सुनन्दानन्दन | सुनन्दासूनु [ बाहुबली ] २५३, २५९
सुनन्दासूनुसूरि [ वज्रस्वामी ] १५८, १६०
सुनासीर [ मन्त्री ] १३
सुन्दर [ नृप ] ३५७
सुन्दरी [ ऋषभपुत्री ] २५०, २६१
सुन्दरी [ वृद्धकन्या ] ३९९
सुन्दरी [ सुनन्दासुता ] २१, २९
सुपर्णकुमार [ भवनपतिदेव ] १६
सुपार्श्व [ सप्तमतीर्थकर ] १४७
सुप्रतिष्ठ [ मुनि ] १७०
सुप्रदत्ता [ दिक्कुमारिका ] १८
सुप्रबुद्धा [ दिक्कुमारिका ] १८
सुबाहु [ अमात्यपुत्र ] १४, १५, २१
सुबुद्धि [ मन्त्रिपुत्र ] १३
सुबुद्धि [ श्रेष्ठी ] २५
सुभद्रा [ राज्ञी ] १७०
सुभूभाग [ उद्यान ] १४६
सुभूम [ ] २७२, २७३, २७४
सुभोगा [ दिक्कुमारिका ] १७
सुमङ्गल [ ग्राम-मुनि ] ७८, २१३
सुमङ्गला [ ऋषभभार्या ] २०, २१
सुमति [ पञ्चमतीर्थकर ] १४७
सुमुख [ अनीक ] ९९
सुमेघा [ दिक्कुमारिका ] १७
सुयशा [ राजपुत्र ] १४
सुरप्रभ [ जितारिपुत्र ] ३९४, ३९५
सुरप्रिय [ चैत्य ] ३८७
सुरप्रिय [ यक्ष ] १२९
सुरभिपुर [ पुर ] ५५
सुरादेवी [ दिक्कुमारिका ] १८
सुराष्ट्र [ भूपति ] १०७
सुरूपा [ चन्द्रकान्ताङ्गसम्भव ] १६
सुरूपा [ दिक्कुमारिका ] १८
सुलस [ कालशौकरिकपुत्र ] ४५०, ४५१
सुलसा [ नागभार्या ] १७५, १८१, १८२
सुवत्सा [ दिक्कुमारिका ] १७
सुवर्णजङ्घ [ नृप ] १२
सुवर्णवालुका [ सरित् ] ५३
सुविधि [ नवमतीर्थकर ] १४७
सुविधि [ वैद्य ] १३
सुवीर [ शूरपुत्र ] १६९, १७०
सुवेग [ दूत ] २५१, २५२, २५४
सुव्रत [ द्वाविंशतीर्थकर ] १४०, १४२, १४७
सुव्रता [ मदनरेखासाध्वी ] ३४७, ३४८, ३४९
सुव्रताचार्य [ आचार्य ] १०३
सुषेण [ चमूपति ] २४६, २४७, २४९, २५५
सुषेण [ श्रेष्ठी ] २८३
सुषेणा [ श्रेष्ठिप्रिया ] २८३
सुसीम [ ग्राम ] २८८
सुसुमार [ पुर ] ७२, ७३, २२६

सुस्थित [ अब्धिदेव ] १८०
सुस्थित [ मुनि ] १६८
सुस्थित [ सूरि ] ८७
सुहस्ती [ आचार्य ] २०७
सूरदेव [ सुरप्रभदेव ] ३९४
सूर्यकान्त [ प्रदेशिपुत्र ] २१५, २१७
सूर्यकान्ता [ प्रदेशिप्रिया ] २१५, २६२
सूर्यपुर [ पुर ] २८६
सूर्याभ [ देव ] २१५, २१७
सेडुक [ ब्राह्मण ] ४४५, ४४६
सेणा [ शकडालपुत्रिका ] १८५
सेवाली [ तापस ] १४७, १४९
सोम [ क्षत्रिययोनि ] १८२
सोम [ विप्र ] ४८
सोमचन्द्र [ क्ष्माप-ऋषि ] ९३, ९७
सोमदेव [ द्विज ] १६२
सोमदेव [ पुरोहित ] १४२
सोमदेवभू [ आर्यरक्षित ] १६४
सोमप्रभ [ बाहुबलिपुत्र ] २५, २६
सोमयशा [ बाहुबलिसुत ] २६०
सोमशर्मा [ द्विज ] १८२, १८३
सोमशर्मा [ पुरोहित ] ३०५
सोमश्री [ माणवप्रिया ] ३०७
सोमा [ पार्श्वशिष्या ] ६०
सोमिल [ सोमप ] ८०
सोमिला [ द्विजप्रिया ] १६८
सोमेन्दु [ नृप ] ९८
सौगन्धिका [ पुरी ] ३८८
सौत्रामणी [ दिक्कुमारिका ] १८
सौदामिनी [ नाटक ] १०९
सौमनस [ वन ] १९
सौवीर [ पत्तन ] १७०
स्कन्द [ ग्रामणीसुत ] ५९
स्कन्दक [ राजपुत्र-सूरि ] १४०, १४१, १४२, २३९, २४०
स्तम्बपुर [ पुर ] ४००
स्तिमित [ दशार्ह ] १७०
स्थापत्या [ सार्थवाही ] ३८७
स्थापत्यापत्य, स्थापत्यानन्दन, स्थापत्यापुत्र, स्थापत्यासूनु [ सार्थवाहीपुत्र-मुनि ] ३८७, ३८८
स्थावर [ द्विज ] ३६
स्थूणा, स्थूणाक [ सन्निवेश ] ३६, ५७
स्थूलभद्र [ शकडालपुत्र-मुनीन्द्र ] १८४, १८७, १८९, १९०, १९१, १९२, १९३, १९४, १९६, २७४, २७९
स्वयंबुद्ध [ मन्त्री ] १०
स्वयम्प्रभा [ देवी ] ११, १२
स्वर्णतेजा [ कनकमालानुज ] ३६०
स्वाती [ नक्षत्र ] ८१
स्वामिदत्त [ द्विज ] ७८

[ ह ]

हयग्रीव [ भूप ] ३८, ३९
हरि [ ] १४३
हरि [ कृष्णवासुदेव ] १३८, १७८, १७९, १८२, १८३, २२०, ३२१, ३२२, ३८८
हरि [ विद्युत्कुमारेन्द्र ] ७१
हरिकुल [ कुल ] ३४०
हरिकेश, हरिकेशबल [ महर्षि ] १४२, १४३, १६८

• • •

# परिशिष्टम्[१]

## [ ६ ]

## उपदेशमालाटीकादिसाहित्यसूची ॥

| | | | | |
|---|---|---|---|---|
| १. | ટીકા | [२]આ.હરિભદ્રસૂરિમ. | | યાકિતીમહત્તરાસૂનુ તરીકે પ્રસિદ્ધ છે. |
| ૨. | પ્રાકૃતભાષાબદ્ધટીકા | આ. જયસિંહસૂરિમ. | સં. ૯૧૩ | જયસિંહસૂરિકૃતા ઉપદેશમાલા પ્રાકૃતા વૃત્તિ કૃષ્ણર્ષિ શિષ્ય છે. |
| ૩. | ★હેયોપાદેયાટીકા | શ્રી સિદ્ધર્ષિગણી | સં. ૯૭૪ | (૧) લઘુ સંસ્કૃત કથાનકો સહ સિદ્ધર્ષિકૃતા "હેયોપાદેયા" ગ્રન્થાગ્ર ૪૨૬૦ શ્લોક પ્રમાણ હીરાલાલ હંસરાજ તરફથી પ્રકાશિત થયેલ છે.<br>(૨) લઘુ સંસ્કૃત કથાનકો સહ સિદ્ધર્ષિકૃતા "હેયોપાદેયા" સંશોધિત થઈને શ્રુતજ્ઞાનપ્રસારક સભાથી પુનઃ પ્રકાશિત થયેલ છે.<br>(૩) લઘુ સંસ્કૃત કથાનકો સહ સિદ્ધર્ષિકૃતા "હેયોપાદેયા" પૂ. જંબૂવિજયમહારાજ દ્વારા તાડપત્રીયના આધારે સંશોધિત થઈને પુનઃ પ્રકાશિત થયેલ છે. |
| ૪. | ★વિશેષવૃત્તિ (દોઘટ્ટી ટીકા) | આ. શ્રી રત્નપ્રભસૂરિમ. | સં. ૧૨૩૮ | ટીકાકાર બૃહદ્ગચ્છીય વાદીદેવસૂરિના શિષ્ય છે. ગ્રં. ૧૧૫૦૦ આ. હેમસાગર સૂ.મ. દ્વારા સંપાદિત<br>આ ટીકા અને તેનો અનુવાદ પ્રસિદ્ધ થયો છે. |
| ૫. | ★કર્ણિકાવૃત્તિ | આ. શ્રી ઉદયપ્રભસૂરિમ. | સં. ૧૨૯૯ | ટીકાકાર નાગેન્દ્રગચ્છીય વિજયસેન સૂ.મ.ના શિષ્ય છે. ગ્રં. ૧૨૨૭૪ આ ટીકા આ. કીર્તિયશસૂરિ મ. દ્વારા સંપાદિત થઈને સન્માર્ગપ્રકાશનથી પ્રકાશિત થઈ રહેલ છે. |
| ૬. | બાલાવબોધ | આ. સોમસુંદરસૂરિમ. | સં. ૧૪૮૫ | કર્તા તપાગચ્છીય આ. દેવસુંદરસૂરિના શિષ્ય છે. ડૉ. કાન્તિભાઈ બી. શાહે આનું સંપાદન કરેલ છે. |
| ૭. | વિવરણ | આ. સર્વાણંદસૂ.મ. | ૧૫મો સૈકો | |
| ૮. | અવચૂરિ | અમરચન્દ્રગણી | સં. ૧૫૧૮ | |

---

१. इदं परिशिष्टं श्रीजिनशासनआराधनाट्रस्टप्रकाशित-पूज्यश्रीमुनिचन्द्रविजयसम्पादित-उपदेशमालाहेयोपादेयाटीकातः उद्धृतमस्ति ॥ (કેટલાક સુધારા કરેલ છે.)

૨. યોગશતક ગા. ૮૯ની ટીકામાં આ. હરિભદ્રસૂરિમહારાજે ઉપદેશમાળાની ટીકા રચ્યાનો નિર્દેશ છે. निर्लोठितं चैतद् उपदेशमालादिष्विति नेह प्रतन्यते । આ પાઠના અક્ષર છે.

★ આ નિશાનીવાળા ટીકાગ્રંથો પ્રસિદ્ધ થયેલા છે.

| | | | |
|---|---|---|---|
| ૯. અવચૂરિ (શબ્દપર્યાય) | આ. જયશેખરસૂરિમ. | | ગ્રં. ૧૫૦૦ કર્તા અંચલગચ્છીય આ. મહેન્દ્રપ્રભસૂરિન શિષ્ય વિદ્વાન કવિ છે. |
| ૧૦. *બાલાવબોધ | આ. નન્નસૂરિમ. | સં.૧૫૪૩ | ગ્રં. ૧૯૧૮ કર્તા કોરંટગચ્છીય આ. સર્વદેવસૂરિના શિષ્ય છે. આ. પ્રદ્યુમ્નસૂરિ મ. સંપાદિત શ્રુતજ્ઞાન-પ્રસારકસભાથી પ્રકાશિત થયેલ છે. |
| ૧૧. અવચૂરિ | ધર્માનંદગણી | સં.૧૫૯૯ | |
| ૧૨. ટીકા | ગુણકીર્તિમ. | સં.૧૬૬૩ | કર્તા તપાગચ્છીય સુમતિવિજયગણીના શિષ્ય છે. |
| ૧૩. બાલાવબોધ | વૃદ્ધિવિજયમ. | સં.૧૭૧૩ | કર્તા શ્રી સત્યવિજયગણીના શિષ્ય છે. આ રચનામાં ઉપાધ્યાય યશોવિજયજીએ સહાય કરી છે. |
| ૧૪. *કથાઓ (પ્રાકૃત) | આ. વર્ધમાનસૂરિમ. | સં.૧૦૫૫ | પૂ. મુનિચંદ્રવિજય સંપાદિત જિનશાસનઆરાધના ટ્રસ્ટથી-પ્રકાશિત હેયોપાદેયામાં પ્રસિદ્ધ થયેલ છે. ગ્રન્થાગ્ર ૯૫૦૦ શ્લોકપ્રમાણ છે. |
| ૧૫. કથામાસ (પ્રાકૃત) | આ. જિનભદ્રસૂરિમ. | સં.૧૨૦૪ | કર્તા શાલિભદ્રના શિષ્ય છે. |
| ૧૬. *ટીકા | શ્રીરામવિજયમ. | સં.૧૭૮૧ | કર્તા સુમતિવિજયગણીના શિષ્ય છે. આ ટીકા પુનર્મુદ્રિત થઈ છે. આ ટીકાનો ગુજરાતી અને હિન્દી અનુવાદ પણ છપાયો છે. ગ્રં. ૭૬૦૦ |
| ૧૭. રાસ | કવિ ઋષભદાસ | સં.૧૬૮૦ | |

*ઉપદેશમાલાની ૫૧મી ગાથા ''दोससयमूलजालं'' છે. તેના ઉપર શતાર્થવૃતિ (સો અર્થ) તપાગચ્છના લાવણ્યધર્મના શિષ્ય ઉદયધર્મગણિએ વિ. સં. ૧૬૦૫માં રચેલ છે.

●●●

★ આ નિશાનીવાળા ટીકાગ્રંથો પ્રસિદ્ધ થયેલા છે.

એક...એવો ભયંકર સમય આવ્યો હતો
જ્યારે જૈન તરીકે જન્મેલાંના જિગર પણ
દીક્ષા વિરોધી બની ચૂક્યાં હતાં!
નાનું બાળક દીક્ષા લે તો એ કહેતા કે-
'આ ઉંમરમાં તો દીક્ષા હોતી હશે ?
બિચારાએ ખાધું શું અને પીધું શું?'
યુવાન દીક્ષા લે તો એ કહેતા કે-
'મોજ કરવાની આ ઉંમરે દીક્ષા ન જ લેવાય.'
પ્રૌઢ દીક્ષા લે તો એ કહેતા કે-
'માથાની જવાબદારી ખભે કરીને દીક્ષા ન જ લેવાય.'
વૃદ્ધ દીક્ષા લે તો એ કહેતા કે-
'આ ડોસો ત્યાં જઈ શું ઉકાળવાનો ?'
આવા જનમાનસને પ્રવચન, દીક્ષાદાન,
કોર્ટની જુબાનીઓ આદિ દ્વારા બદલી
જન-જનના હૈયામાં દીક્ષાની સુપ્રતિષ્ઠા કરનારા
**દીક્ષાયુગપ્રવર્તક પૂ.આ. શ્રી**
**વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજાની**
**દીક્ષા શતાબ્દી ઉજવી**
**ચાલો ! આપણે ય ધન્ય બનીએ...**



पू.आ.श्रीविजयरामचन्द्रसूरि-
स्मृतिसंस्कृतप्राकृत-
ग्रन्थमाला क्रमाङ्क
31

शासनशिरताज सूरिरामचन्द्र
दीक्षाशताब्दी ग्रंथमाला

३४

साहित्य सेवा : ५००/-

ISBN-978-81-87162-92-3

KHUSHI DESIGNS Mo.09227504555